संस्कृतविद्यापीठग्रन्थमालाया एकोननवतितमं पुष्पम्

गोकुलनाथोपाध्यायविरचितः

अवयवतत्त्वचिन्तामणिदीधितिविद्योतः

तत्त्वचिन्तामणिदीधितिगादाधरीश्रीज्वालाप्रसादगौड़विरचित-
विलासिनीव्याख्यासहितः
तत्त्वचिन्तामणिरहस्यसहितः
दीधितिजागदीशीसहितश्च

प्रधानसम्पादकः
प्रो. राधावल्लभः त्रिपाठी
कुलपतिः

सम्पादकः भूमिकालेखकश्च
प्रो. हरेरामत्रिपाठी

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-110016

परार्थानुमानं न्यायसाध्यमिति न्यायस्तदवयवाः गौतमादिभिः प्रतिपादिताः। प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः भवन्ति। एतेषामवयवानां स्वरूपं तत्त्वचिन्तामणिकारेण निरूपितम्। तेषां परिष्कारं रघुनाथशिरोमणिः दीधितिटीकायां कृतवान्। दीधित्युपरिजगदीशस्य जागदीशी ाधरस्य गादाधरी गोकुलनाथोपाध्यायस्य द्योतश्च टीकाः सन्ति। गादाधरी कोपरिज्वालाप्रसादगौड़स्य विलासिनी व्याख्या विद्यते। एतासां सर्वासां टीकानां निरूपणमत्र विद्यते। तत्त्वचिन्तामण्युपरि मथुरानाथतर्कवागीशस्य रहस्याख्या टीका वर्तते इति साऽपि ग्रन्थेऽस्मिन् विद्यते। विशेषतः गोकुलनाथोपाध्यायविरचितः अवयवतत्त्वचिन्तामणिदीधितिविद्योतः दुर्लभत्वात् प्रकाश्यते। तत्र मूलपाण्डुलिपिः रघुनाथमन्दिरपुस्तकालयस्य द्वितीया पाण्डुलिपिः सरस्वतीभवनपुस्तकालयस्य च विद्येते।

संस्कृतविद्यापीठग्रन्थमालाया एकोननवतितमं पुष्पम्

गोकुलनाथोपाध्यायविरचितः

अवयवतत्त्वचिन्तामणिदीधितिविद्योतः

तत्त्वचिन्तामणिदीधितिगादाधरीश्रीज्वालाप्रसादगौड़विरचित-
विलासिनीव्याख्यासहितः
तत्त्वचिन्तामणिरहस्यसहितः
दीधितिजागदीशीसहितश्च

प्रधानसम्पादकः
प्रो. राधावल्लभः त्रिपाठी
कुलपतिः

सम्पादकः भूमिकालेखकश्च
प्रो. हरेरामत्रिपाठी
आचार्यः, सर्वदर्शनविभागे
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली

भूमिका

गौतमादिं नमस्कृत्य तदुक्तीः परिभाव्य च।
विद्योतं गोकुलेशोक्तं समाश्रित्य प्रचक्ष्महे।।

प्राचीनकालादेव भारतीयदर्शनेषु शास्त्रेषु च चतसृणां विद्यानां महत्त्वं दरीदृश्यते। यतोहि चाणक्यैरुक्तम् "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शास्वती" मनुस्मृतावप्युक्तम्-

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शास्वती।
विद्याश्चतस्त्रः एवेताः लोकसंस्थितिहेतवः।।

आन्वीक्षिकी अध्यात्मविद्या एवेति। "आन्वीक्षिक्याध्यात्म-विद्यास्यादिक्षणात्सुखदुःखयोः" चतसृषु विद्यासु प्रामुख्यं भजते आन्वीक्षिकीविद्येति। द्वितीया विद्या त्रयीति पदवाच्या ऋग्वेदः, यजुर्वेदः सामवेदश्चेति। तत्र प्रतिपादितानि कर्मकाण्डनित्यनैमित्तिककाम्यनिषिद्धकर्माणि। वार्ता इत्यस्यार्थः कृषिः गोरक्षा वाणिज्यञ्चेति। वार्तायाः अप्रसारे सर्वे लोकव्यवहाराः छिन्नं भिन्नञ्च जायन्ते। "वार्ताच्छेदे हि लोकोऽयं श्वस्वन्नति न जीवति। अन्तिमा चतुर्थी विद्या दण्डनीतिश्चेति।

दण्डनीतिर्यदा सम्यक् नेतारमधितिष्ठति।
तदा विद्याविदः शेषाः विद्याः सम्यगुपासते।।

बहुषु स्थलेषु चतुर्दशविद्यानामुल्लेखो वर्तत इति। 'शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसांचयः ज्योतिषानयनञ्चैव वेदाङ्गानि षडेव तु। मीमांसा, न्यायविस्तरः, आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः नाट्यशास्त्रञ्च इति विद्या भवन्ति।

चतुर्दशविद्यानां विवरणमधोलिखितरूपेण विद्यते।

अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
आयुर्वेदो गान्धर्वो नाट्य एव च॥

—मुण्डकोपनिषदि (1-1-5) उक्तम्

"तस्यैतस्य महतो भूतस्य निश्वसितमेवैतद् ऋग्वेदो यजुर्वेदः, सामवेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितं ज्योतिषामयनं न्यायो मीमांसा धर्मशास्त्राणि व्याख्यानानि"।

मीमांसान्याायतर्कश्च उपाङ्गपरिकीर्तितः इति विश्वनाथन्याय-पञ्चाननेन न्यायसूत्रवृत्तावुक्तम्। आचार्यकुमारिलभट्टैरुक्तं मीमांसाविषये

धर्मे प्रमीयमाणे तु वेदेन कारणात्मना।
इति कर्त्तव्यताभागं मीमांसा पूरयिष्यति॥

न्यायशास्त्रन्तु वेदज्ञाने उपयोगी विद्यत इति। अत्र न्यायमञ्जरीकारः जयन्तभट्टः आह—

"न्यायविस्तरस्तु मूलस्तम्भभूतः सर्वविद्यानां वेदप्रामाण्यहेतुत्वात् वेदेषु हि तार्किकरचितकुतर्कविप्लावितप्रामाण्येषु शिथिलितास्थाः कथमिव माद्रियेरन् साधव? किं वा तदानीं स्वामिनि परिम्लाने तदनुयायिना मीमांसादिविद्यास्थानपरिजनेन कृत्यम्? तस्मादशेषदुष्टतार्किकोपमर्द-द्वारकदृढ़तरवेदप्रामाण्यप्रत्ययाधायि न्यायोपदेशक्षममक्षपादोपदिष्टमिदं न्यायविस्तराख्यशास्त्रं प्रतिष्ठानं निबन्धनमिति परं विद्यास्थानम्" अपरञ्च जयन्तभट्टः वदति यत् 'अर्थविचारः एव मीमांसाया मुख्यं कृत्यम्" न तु प्रमाणविचारः प्रमाणान्यधिकृत्य तु न्यायविस्तर एव विचारयितुमधिकरोति पृथक्प्रस्थाना हि चतुर्दशविद्याः। तथा च मीमांसा वाक्यार्थविद्या न प्रमाणविद्या।

आन्वीक्षिकीशब्दस्य व्युत्पत्तिं कुर्वन्नाह वात्स्यायनाचार्यः

प्रत्यक्षागमाभ्यामिक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्तते इति आन्वीक्षिकी न्यायविद्या न्यायशास्त्रमिति।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रय सर्वधर्माणां विद्योद्देशे प्रकीर्तिताः॥

न्यायशास्त्रस्य पर्यायवाचिनः अनेके शब्दाः शास्त्रेष्वुपलभ्यन्त इति। आन्वीक्षिकी, न्यायविस्तरः, न्यायविद्या, तर्कशास्त्रम्, हेतुशास्त्रम्, प्रमाणशास्त्रं वाकोवाक्यम् चेत्यादयः। "प्रमाणैरर्थपरीक्षणं न्यायः" इति वार्तिककारैः भणितम् समस्तप्रमाणव्यापारादर्थाधिगतिर्न्यायः इति। नीयते विवक्षितार्थसिद्धिः अनेनेति न्यायः। न्यायशास्त्रस्यादिमो ग्रन्थः न्यायसूत्रमस्ति यस्य प्रणेता महर्षिगौतमो विद्यते। महर्षेः गौतमादारभ्योदयनाचार्यपर्यन्तं प्राचीनन्यायशास्त्रमस्ति। तत्र विद्यमानानां ग्रन्थानां टीकानां वा विवरणमित्थं वर्तत इति।

क्र.सं.	ग्रन्थनाम	प्रणेता
1.	न्यायसूत्रम्	महर्षिगौतमः
2.	न्यायसूत्रभाष्यम्	महर्षिः वात्स्यायनः
3.	न्यायसूत्रभाष्यवार्तिकम्	महर्षिः उद्योतकरः
4.	न्यायसूत्रभाष्यवार्तिकतात्पर्यटीका	वाचस्पतिमिश्रः
5.	न्यायसूत्रभाष्यवार्तिकतात्पर्यपरिशुद्धिः	उदयनाचार्यः।

उपर्युक्तेषु ग्रन्थेषु प्रमेयपदार्थानां प्राधान्यं दरीदृश्यते। द्वादशशताब्द्यां गङ्गेशोपाध्यायः नव्यन्यायस्याविर्भावं कृतवान्। तत्र प्रमाणानां प्रामुख्यं प्रतीयते। पारिभाषिकशब्दानां बाहुल्यं दरीदृश्यते च। सूक्ष्मातिसूक्ष्मविषयाणां प्रकाशनमत्रावलोक्यते। आचार्यगङ्गेशस्य गङ्गेश्वरोऽपि नाम आसीदिति कुसुमाञ्जलिप्रकाशिकया लभ्यते।

"यस्तर्कतन्त्रशतपत्रसहस्त्ररश्मिर्गङ्गेश्वरः सुकविकैरवकाननेन्दुः॥ मिथिलायां छदनग्रामे गङ्गेश जन्म लब्धवानिति पञ्जीद्वारा ज्ञायते। गङ्गेशोपाध्यायस्य द्वे भार्ये आस्ताम्। ज्येष्ठया भार्यया वर्धमानाख्यः पुत्रः एका पुत्री चाभवताम्। द्वितीयायाः भार्यायाः सपूतः हरिश्चेति द्वौ पुत्रावभवताम्। गङ्गेशस्य विषये केचन वदन्ति यत् बाल्यकाले स च महामूर्खः आसीत्

महाकाल्याः उपासनया विद्यां प्राप्तवानिति अत्र प्रमाणं "चिन्तादिव्यविलोचनेन" इतिवाक्यमस्ति। परन्तु दिनेशचन्द्रभट्टाचार्यः उक्तमतं नाङ्गीकरोति। स च भणति यत् गङ्गेशस्य पाण्डित्ये तस्य अधोलिखितश्लोक एव प्रमाणं वर्तत इति।

अनास्वाद्य गौड़ीमनाराध्य गौरीं
विनातन्त्रमन्यैर्विनाशब्दचौर्यात्।
प्रसिद्ध-प्रबुद्ध-प्रबन्ध-प्रवक्ता विरिञ्चि
प्रपञ्चे मदन्यः कविः कः?॥

गङ्गेशोपाध्यायस्य ग्रन्थः "तत्त्वचिन्तामणिः" विद्यते। तस्य टीकाकर्त्तारः अधोलिखिताः विश्वविश्रुताः विद्वांसः अभूवन्।

क्र.सं.	टीकाकारस्य नाम	निवासस्थानम्	
1.	वर्धमानोपाध्यायः	मिथिला	(बिहारप्रदेशः)
2.	तत्त्वोपाध्यायः	मिथिला	"
3.	गणादित्योपाध्यायः	"	"
4.	घटेशोपाध्यायः	"	"
5.	वाचस्पतिमिश्रः (द्वितीयः)	"	"
6.	वटेश्वरोपाध्यायः	"	"
7.	यज्ञपत्युपाध्यायः	"	"
8.	शङ्करमिश्रः	"	"
9.	प्रगल्भमिश्रः	"	"
10.	पक्षधरमिश्रः	"	"
11.	गोपीनाथठाकुरः	"	"
12.	नरहरिनाथमिश्रः	"	"
13.	माधवमिश्रः	"	"
14.	रुचिदत्तमिश्रः	"	"
15.	रघुपतिमिश्रः	"	"

16.	कविरत्नखगेशः	" "
17.	वासुदेवसार्वभौमः	नवद्वीपः (बङ्गप्रदेशः)
18.	रघुनाथशिरोमणिः	" "
19.	जानकीनाथभट्टाचार्यः	" "
20.	मथुरानाथतर्कवागीशः	" "
21.	कृष्णकान्तविद्यावागीशः	" "
22.	राजचूडामणिमाखनः	दक्षिणादिप्रदेशः
23.	धर्मराजाध्वरीन्द्रः	" "

तार्किकशिरोमणयः रघुनाथाः बङ्गप्रदेशस्य नवद्वीपे जन्म लेभिरे। बाल्यकाले एव पितृविहीनः रघुनाथशिरोमणिः मातुः सकाशात् सार्वभौममिश्रस्य पाठशालायां जगाम। सार्वभौममिश्रात् न्यायशास्त्रमधीत्य

शङ्करवाचस्पत्योः सदृशौ शङ्करवाचस्पती।
पक्षधरप्रतिपक्षी लक्ष्यीभूतो न च क्वापि॥

इति किं वदन्तिमवगत्य मिथिलायां रघुनाथोऽगच्छत्। पक्षधरमिश्रः रघुनाथं दृष्ट्वा उवाच–

आखण्डलः सहस्राक्षः विरुपाक्षस्त्रिलोचनः।
वयं द्विलोचनाः सर्वे को भवान्नेकलोचनः॥

तदनन्तरं रघुनाथशिरोमणिरवदत्–

आखण्डलः सहस्राक्षः विरुपाक्षस्त्रिलोचनः।
यूयं विलोचनाः सर्वे वयं न्यायैकलोचनाः॥

पक्षधरमिश्रेण सह सामान्यलक्षणायाः विषये मतभेदादाह पक्षधरमिश्रः

वक्षोजपानकृत्काण! संशये जाग्रतिस्फुटम्।
सामान्यलक्षणा कस्मादकस्मादपलप्यते॥

तत्त्वचिन्तामणिग्रन्थस्य सुप्रसिद्धा टीका दीधिति एव विद्यते।

रघुनाथशिरोमणिविरचिता या तत्त्वचिन्तामणेः दीधितिटीका विद्यते तस्याः टीकाकाराः निम्नलिखिताः विश्वविश्रुताः सन्ति।

क्र. सं.	टीकाकारस्य नाम	निवासस्थानम्
1.	रामकृष्णभट्टाचार्यः	बङ्गप्रदेशः
2.	रघुनाथविद्यालङ्कारः	बङ्गप्रदेशः
3.	कृष्णदाससार्वभौमः	बङ्गप्रदेशः
4.	श्रीरामतर्कालङ्कारः	बङ्गप्रदेशः
5.	मथुरानाथतर्कवागीशः	बङ्गप्रदेशः
6.	भवानन्दतर्कवागीशः	बङ्गप्रदेशः
7.	जगदीशतर्कालङ्कारः	बङ्गप्रदेशः
8.	गदाधरभट्टाचार्यः	बङ्गप्रदेशः

दीधितिटीकोपरि जगदीशतर्कालङ्कारस्य जागदीशी गदाधरभट्टाचार्यस्य गादाधरी, मथुरानाथतर्कवागीशस्य रहस्यम् चेति टीकाः विश्वविश्रुताः विद्यन्ते। यासां टीकानामध्यापनमध्ययनञ्च भारतवर्षस्य प्राच्यपरम्परायां प्राच्यसंस्थायां सर्वत्र भवति।

मथुरानाथतर्कवागीशः पश्चिमबङ्गप्रदेशस्य मनीहारीग्रामे जन्म लेभे। वागीशस्य पिता श्रीरामतर्कालङ्कारः नैयायिकः आसीत्। वागीशस्य गुरू श्रीरामतर्कालङ्कारः रघुनाथशिरोमणिश्चास्ताम्।

जगदीशतर्कालङ्कारः भवानन्दतर्कवागीशस्य प्रमुखः शिष्य आसीत्। रघुनाथशिरोमणेः या दीधितिटीका वर्तते तस्योपरि जगदीशस्य जागदीशी टीका विश्वविश्रुता विद्यते। दीधितेः अनुमानखण्डस्य व्याप्तिवादे जागदीशीटीकायाः वैशिष्ट्यं प्रसिद्धं वर्तते।

गदाधरभट्टाचार्यः जीवाचार्यस्य पुत्रः बङ्गदेशीयश्चासीत्। नवद्वीपे हरिरामतर्कवागीशस्य पार्श्वे गदाधरः नव्यन्यायशास्त्रमधीतवान्। दीधितिटीकायाः गादाधरीटीकापि विश्वविख्याता विद्यते।

एतेषां विदुषां ग्रन्थाः अधोलिखिताः सन्ति।

क्र.सं.	ग्रन्थकारनाम	ग्रन्थः/टीका	कालः
1.	गङ्गेशोपाध्यायः	(क) तत्त्वचिन्तामणिः	1200
2.	रघुनाथशिरोमणिः	(क) तत्त्वचिन्तामणिदीधितिटीका	1477
		(ख) खण्डनखण्डखाद्यटीका	
		(ग) न्यायकुसुमाञ्जलिटीका	
		(घ) आत्मतत्त्वविवेकटीका	
		(ङ) किरणावलीटीका	
		(च) पदार्थतत्त्वनिरूपणम्	
3.	मथुरानाथतर्कवागीशः		
		1. तत्त्वचिन्तामणिदीधितिमाथुरीरहस्यम्।	
		2. तत्त्वचिन्तामणिरहस्यम्।	
		3. तत्त्वचिन्तामण्यालोकरहस्यम्।	
		4. न्यायरहस्यम्।	
4.	जगदीशभट्टाचार्यः		
		1. तत्त्वचिन्तामणिदीधितिजागदीशी	
		2. तत्त्वचिन्तामण्यालोकजागदीशी	
		3. शब्दशक्तिप्रकाशिका	
		4. तर्कामृतम्	
		5. न्यायादर्शः	
4.	गदाधरभट्टाचार्यः	1. तत्त्वचिन्तामणिदीधितिगादाधरी-	1650
		2. तत्त्वचिन्तामणिमयूखः।	
		3. शक्तिवादः।	
		4. व्युत्पत्तिवादः।	
		5. प्रामाण्यवादः।	

6. विषयतावादः।
7. कारणतावादः।
8. युक्तिवादः।
9. सादृश्यवादः।
10. अवच्छेदकवादः।
11. पर्याप्तिवादः।
12. नव्यमतवादः।
13. आख्यातवादः।
14. नञर्थवादः।
15. स्मृतिसंस्कारवादः।
16. कारकवादः
17. तत्त्वचिन्तामण्यालोकगादाधरी।
18. दुर्गासप्तशतीटीका
19. आत्मतत्त्वविवेकदीधितिप्रकाशिका
20. मुक्तावलिटीका

अन्येऽपि वादग्रन्थाः गदाधरैः विरचिताः सन्ति तत्र केचन पूर्वोक्ताः समुपलब्धाः, अन्ये इदानीं यावदनुपलब्धाः सन्ति। वस्तुतः चतुर्षष्टिः वादग्रन्थाः एतैः विरचिताः इति लोके जनाः वदन्तीति।

न्यायदर्शने प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क-निर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानि षोडश पदार्थाः भवन्ति। एतेषां षोडशपदार्थानां सम्यज्ज्ञानात् मोक्षस्य प्राप्तिर्भवति। तेषु पदार्थेष्वन्यतमः पदार्थः अवयवो विद्यते। अपरञ्च स्वार्थपरार्थभेदेनानुमानं प्रमाणं द्विविधं भवति। तत्र परार्थानुमानं न्यायसाध्यमिति परार्थशब्दः मध्यस्थानुमितिजनकपरामर्शपरः। पञ्चानामवयवानामावश्यकत्वं द्योतयितु-मवयवपदं प्रयुक्तवान् न्यायसूत्रकारः। यतोहि "प्रतिज्ञाहेतूदाहरणोपनय-निगमनान्यवयवाः" इति सूत्रेऽवयवानां पञ्चसंख्याकत्वं निरदिशत्। न्यायदर्शनस्य प्राचीनन्याये नव्यन्याये वा पूर्वोक्तानामवयवानां विवरणमुपलभ्यते।

वैशेषिकसूत्रेषु अवयवानां स्पष्टमुल्लेखो यद्यपि नास्ति तथापि प्रशस्तपादाचार्येण पदार्थधर्मसंग्रहे–

"प्रतिज्ञा–अपदेश–निदर्शनानुसन्धानप्रत्याम्नायाः" इत्युक्तमिति। न्यायसूत्रस्य भाष्ये दशावयवानां पूर्वपक्षरूपेण निरूपणं विद्यते। प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनम्, जिज्ञासा, संशयः शक्यप्राप्तिः, प्रयोजनं, संशयव्युदासश्चेति। दशावयवानां व्याख्यानम् अन्यत्राधोलिखित–रूपेणोपलभ्यते। तत्र प्रथमः प्रकारस्तु प्रतिज्ञा, प्रतिज्ञाविशुद्धिः, हेतुः, हेतुविशुद्धिः, दृष्टान्तः, दृष्टान्तविशुद्धिः, उपसंहारः, उपसंहारविशुद्धिः, निगमनम्, निगमनविशुद्धिश्चेति। अन्यः प्रकारस्तु प्रतिज्ञा प्रतिषेधः, प्रतिज्ञाभक्तिः, दृष्टान्तः हेतुः, आशङ्का, हेतुविभक्तिः, आशङ्काप्रतिषेधः, विपक्षः, निगमनञ्चेति। केचन जैनाचार्याः चत्वारः अवयवाः भवन्तीति वदन्ति। भाट्टाः प्राभाकराश्च त्रयोऽवयवाः भवन्तीति वदन्ति। सांख्यकारिकायाः माठरवृत्तिटीकायां परपक्षः हेतुः दृष्टान्तश्चेति त्र्यवयवाः भवन्तीति उक्तमिति। धर्मकीर्तिना केवलमेक एवावयवः सर्वप्राथम्येन अभ्युपगतः।

"तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञा–हेतूदाहरणोपनयनिगमनानि निरूप्यन्ते" इति तत्त्वचिन्तामणिकारः प्रतिज्ञां विधाय न्यायलक्षणमवयवसामान्यलक्षणञ्च प्रतिपाद्य प्रतिज्ञाहेतूदाहरणोप–नयनिगमनानां लक्षणानि निरूप्य प्रतिज्ञादीनां पञ्चानामपि क्रमेण प्रयोक्तव्यत्वमावश्यकत्वञ्च सयुक्तिकं निरूपयामास।

न्यायलक्षणम्

समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यं न्यायः इति केचिदाहुः। तन्न युक्तम्। लक्षणघटके "समस्तरूपोपपन्नलिङ्ग" इति वाक्ये समस्तरूपोपपन्न–लिङ्गप्रतिपादकत्वसत्त्वादव्याप्तेः। परन्तु अनुमितिचरमकारणलिङ्गपरामर्श–प्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः। अर्थात् अनुमितिचरमकारण–लिङ्गपरामर्शजनकमनस्सहकारिभूतशाब्दज्ञानजनकत्वं न्यायस्य लक्षणम्। उक्तार्थेऽपि अनुपपत्तिर्दृश्यते प्रतिज्ञानिगमनयोः उदाहरणावयवान्तरयोश्च द्वयोरपि एकार्थप्रतिपादकत्वेन सम्भावितयोः सम्भूयैकार्थप्रतिपादकत्वं कथमपि न

सम्भवति इति सम्यग्विचार्य दीधितिकारैः भणितम् "उचितानुपूर्वीक-प्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वमिति। इदमपि लक्षणं मणिग्रन्थतः लभ्यते।

1. इतरान्वितस्वार्थबोधकत्वे सति स्वीयं यत् अन्त्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे सति न्यायावयवत्वम् प्रतिज्ञायाः लक्षणम्।

2. इतरान्वितस्वार्थबोधजनकत्वे सति अन्त्यपदवत्त्वे सति स्वीयानन्त्यपदार्थविशेष्यकबोधजनकं यत्तदन्यत्वे सति वा न्यायावयवत्वमिति द्वितीयप्रतिज्ञायाः लक्षणम्। एते लक्षणे द्वे रघुनाथशिरोमणिना उक्त इति।

अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञान-जनकवाक्यत्वमवयवत्वमिति अवयवानां सामान्यं लक्षणं गङ्गेशोपाध्यायेनोक्तम्। वह्निव्याप्यधूमवानयमिति वाक्ये उक्तलक्षणस्य अतिव्याप्तिरपि सूचिता। उक्तलक्षणस्य तात्पर्यं भणति वागीशः स्वाविषयकप्रतीत्यविषयन्यायकत्वे सति प्रतिज्ञाद्यन्यतमत्त्वम् अवयवस्य लक्षणम्। दीधितिकारस्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम्, वा प्रतिज्ञाद्यघटकत्वे सति उभयघटक-भागद्वयाघटितत्वमवयवस्य लक्षणम्।

प्रतिज्ञालक्षणम्

साध्यनिर्देशः प्रतिज्ञा इति गौतमः उक्तवान्। अत्र तत्त्वचिन्तामणिकारः आह "तत्र प्रतिज्ञा न साध्यनिर्देशः, साध्यपदे अतिव्याप्तेः। साध्यतेऽस्मिन्निति साध्यम्, निर्देशपदं बोधजनकन्यायावयवपरम्। साध्यपदमपि प्रकृतसाध्य-विशिष्टार्थकम्। तथाच पक्षतावच्छेदकपर्वतत्वादिविशिष्टे साध्यतावच्छेदक-वह्नित्वादिविशिष्टवैशिष्ट्यज्ञानजनको न्यायावयवः प्रतिज्ञा इति सूत्रस्यार्थं दीधितिकारः उक्तवान्। गङ्गेशोपाध्यायस्तु उद्देश्यानुमितिचरमकारण-लिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सति उद्देश्यानुमित्यन्यूनानतिरिक्त-विषयकशाब्दज्ञानजनकवाक्यत्वं प्रतिज्ञाया लक्षणमिति प्रतिपादयति। अत्र दोषान् प्रदर्श्य यादृशपक्षसाध्यकाः पक्षे यादृशविशिष्टार्थबोधिकाः प्रतिज्ञाः सम्प्रदायसिद्धाः तादृशानां बोधानामन्यतमेनाप्यनिवर्तनीयस्य संशयस्य अनिर्वतको यः तावतामन्यतमो बोधः तज्जनकत्वं प्रतिज्ञालक्षणमिति दीधितिकारो वदति। न्यायावयवत्वे सति लिङ्गाविषयकज्ञानजनकत्वं प्रतिज्ञायाः लक्षणमिति वा।

हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वम्, लिङ्गाविषयकलिङ्गिविषयकज्ञान-जनकन्यायावयववाक्यत्वमित्यपि लक्षणे भवतः।

हेतुलक्षणम् तु अनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्द-ज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वं हेतुवाक्यस्य लक्षणम्। एतदतिरिक्तान्यपि हेतुलक्षणानि भवन्ति।

1. हेतुत्वप्रतिपादकविभक्तिमत् न्यायावयवत्वम्। हेतुत्वप्रतिपादक-विभक्तिः पञ्चमीविभक्तिः तादृशपञ्चमीमत्त्वे सति न्यायावयवत्वम् धूमादित्यत्र विद्यते तत्र लक्षणसमन्वयो भवति। अस्य परिष्कारस्तुविभक्त्यर्थ-हेतुत्वमुख्यविशेष्यकान्वयबोधजनकन्यायावयवत्वमिति।

2. उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वम्।

3. साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वम् हेतोः लक्षणम्।

4. प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्तकज्ञानजनक-

हेतुविभक्तिमद्वाक्यत्वं हेतुवाक्यस्य लक्षणम्।

5. पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा। उक्तलक्षणानि तु अन्वयव्यतिरेकिहेतुवाक्यानां सन्ति।

अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादक-विभक्तिमत् न्यायावयवत्वमन्वयिहेतुवाक्यस्य लक्षणम्। व्यतिरेकव्याप्त्यभिधा-यकावयवाभिधानप्रयोजकहेतुत्वप्रतिपादकविभक्तिमत् न्यायावयवत्वम् व्यतिरेकहेतुवाक्यस्य लक्षणम्। प्रकृतपक्षान्वितस्वार्थबोधकपदोप-स्थापितार्थान्वितस्वार्थबोधकन्यायावयवत्वम् हेतोः लक्षणमिति रघुनाथशिरोमणिः।

उदाहरणलक्षणम्

अनुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनकव्याप्यत्वाभिमत-वन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधकशब्दत्वम् उदाहरणस्य लक्षणम्। अर्थात् व्याप्यत्वाभिमतवद् धर्मिकः यः नियतः प्रतिनियतः प्रकृतपक्षे

प्रकृतसाध्यवत्त्वाविषयकः व्यापकत्वाभिमतस्य सम्बन्धबोधः तज्जनकत्वमुदाहरणस्य स्वरूपम्। वीप्सालभ्यसाधनव्यापकत्वबोधकावयवत्वम् अन्वय्युदाहरणस्य लक्षणम्। वीप्सालभ्यसाध्याभावव्यापकत्वबोधकावयवत्वं व्यतिरेक्युदाहरणस्य लक्षणम्। इतरान्वितस्वार्थाबोधकन्यायावयवत्वम् उदाहरणस्य लक्षणम् इति दीधितिकारः।

उपनयलक्षणम्

अनुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपनयस्य लक्षणम्। इतरोपस्थापितार्थविशेषणकस्वार्थबोधजनकन्यायावयवत्वम् वा स्वार्थविशेष्येतरार्थान्वयबोधजनकन्यायावयवत्वं निगमनस्य लक्षणमिति दीधितिकारः आह।

निगमनलक्षणम्

अनुमितिहेतुलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षधर्मताधीप्रयुक्तसाध्यधीजनकवाक्यत्वं निगमनस्य लक्षणम्। अवयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वम् निगमनस्य लक्षणमिति दीधितिकारः।

ग्रन्थेऽस्मिन् गोकुलनाथोपाध्यायजगदीशभट्टाचार्यगदाधरप्रभृत्याचार्यकृताः उचितानुपूर्वीकत्वम्, न्यायान्तर्गतत्वम् प्रतिज्ञाद्यन्यतमत्त्वम्, प्रतिज्ञाद्यघटकत्वम्, उभयघटकभागद्वयाघटितत्वम्, अन्यूनविषयकत्वम्, अनतिरिक्तविषयकत्वम्, साध्यतावच्छेदकावच्छिन्नगमतौपयिकत्वम् चेत्यादीनां परिष्काराः सन्ति। ते च स्वप्रतिभया ग्राह्याः इति।

गोकुलनाथोपाध्यायविरचितस्य अवयवतत्त्वचिन्तामणिदीधितिविद्योतस्य कपदवाच्या पाण्डुलिपिः रघुनाथमन्दिरपुस्तकालयजम्मूतः लब्धा खपदवाच्या पाण्डुलिपिःसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालयतः (वाराणसीस्थात्) प्राप्ता इति। उभयोः पाण्डुलिप्योः प्रथमान्तिमपृष्ठयोः विवरणमग्रे द्रष्टव्यमिति। पाठान्तरे यदुपलब्धं तत्तु अन्तिमे पृष्ठे सन्निवेशितमिति। विद्योतस्य प्रकाशने प्रथमा पाण्डुलिपिः वा मूलपाण्डुलिपिः रघुनाथमन्दिरपुस्तकालयादुपलब्धा, द्वितीया तु सरस्वतीभवनपुस्तकालयस्यैव

विद्यते। तदनन्तरमध्ययनेऽध्यापने च छात्राणामध्यापकानां सौकर्याय तत्त्वचिन्तामणिदीधितिगादाधरी, ज्वालाप्रसादगौड़विरचितविलासिनीव्याख्या तत्त्वचिन्तामणिरहस्यम् तत्त्वचिन्तामणिदीधितिजागदीशी चापि अस्माभिः प्रकाश्यन्ते।

न्यायवैशेषिकसांख्यादिशास्त्रनदीष्णानां विशिष्य नव्यन्यायशास्त्रेऽप्रतिहतवैदुष्यवतां मयि वात्सल्यपूर्वानुकम्पावतामाचार्यगुरुश्रीवशिष्ठत्रिपाठिमहाशयानां सत्प्रेरणया चेदं कार्यमभवत्। अतः तेषां सन्निधौ भूयो भूयः भक्तिश्रद्धातिशयपूर्वकं प्रणामं विधाय कृतज्ञतां प्रकाशयन् धन्यो भवामि। तदनन्तरं राष्ट्रिय-संस्कृत-संस्थानस्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतीन् प्रो. राधावल्लभत्रिपाठिमहोदयानपि कृतज्ञतां विज्ञापयामि एते सर्वदा प्रेरितवन्त इति। ममोपरि प्रकाशनविभागाध्यक्षस्य प्रो. रमेश कुमार पाण्डेयमहोदयस्यापि अनुकम्पा विद्यते। यतोहि प्रकाशनकर्मणि सदा तेऽपि प्रेरितवन्तः। अतः आचार्यरमेशकुमारपाण्डेयमहोदयान् नमामि कार्तज्ञ्यं बिभर्मि च। रघुनाथमन्दिरपुस्तकालयस्य पूर्वपुस्तकालयाध्यक्षान् धनिरामशास्त्रिणः प्रति कार्तज्ञ्यं विमृशामि। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिमहोदयान् प्रो. वृन्दामिश्रमहोदयान् प्रति तत्रत्य सरस्वतीभवनपुस्तकालयस्य पुस्तकालयाध्यक्षान् डॉ. चन्द्रबलीमहाशयान् प्रति च कृतज्ञतां विज्ञापयामि। यतोहि ख पाण्डुलिपेः छायाप्रतीः दत्त्वा महानुपकारमेतौ महोदयौ कृतवन्तौ। प्रकाशनविभागस्य डॉ. ज्ञानधरपाठकमहोदयान् प्रति धन्यवादं वितरामि। एतेऽपि प्रकाशनकर्मणि साहाय्यं विहितवन्तः। हीरालालमुद्रणालयाधीपतिरपि धन्यवादार्हो वर्तत इति। अन्ते अस्मिन् कर्मणि येऽपि साहाय्यं कृतवन्तः। तान् सर्वानपि कृतज्ञतां विज्ञाप्य विरमामि।

22-12-2012
नवदेहली

प्रो. हरेराम त्रिपाठी
आचार्यः सर्वदर्शनविभागाध्यक्षचरश्च
श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृत-
विद्यापीठस्य (मानितविश्वविद्यालयस्य)
नवदेहलीस्थस्य

विषयानुक्रमणिका

प्रथमस्तबकः

गोकुलनाथोपाध्यायविरचितः अवयवतत्त्वचिन्तामणिदीधितिविद्योतः

द्वितीयस्तबकः

अवयवतत्त्वचिन्तामणिदीधितिगादाधरी विलासिनीव्याख्या सहिता

तृतीयस्तबकः

अवयवतत्त्वचिन्तामणिरहस्यम्

चतुर्थस्तबकः

अवयवतत्त्वचिन्तामणिदीधितिजागदीशी

प्रथमस्तबकः

अवयवतत्त्वचिन्तामणिदीधितिविद्योतः

गङ्गेशोपाध्यायविरचितः

अवयवतत्त्वचिन्तामणिः

रघुनाथशिरोमणिविरचिता

अवयवतत्त्वचिन्तामणिदीधितिः

श्री गोकुलनाथोपाध्यायविरचितः

अवयवतत्त्वचिन्तामणिदीधितिविद्योतः

वेष्टन सं० तत्त्वचिन्तामणिदीधितिविवरण | विषय न्याय

नाम तत्त्वचिन्तामणिटीका | कर्ता गोकुलनाथः

पत्र सं० १-४६ | पंक्ति सं० (पत्रे) १५

श्लोक सं० — | अक्षर सं० (पंक्तौ) ४६

लिपि देवनागरी | आधार कागज

आकार ९.९ x ४.४

लि० कालादि अपूर्ण । (प्रत्यक्षखण्ड...) | स्थिति [illegible]

296

श्रीगुरुगो विंद ॐ सूर्यगणेशमहालक्ष्मीशिवविष्णुभ्यो नमः॥ ॥ चिन्तामणिप्रकाशेन निरस्तजनसोममा। मामो गोकुलनाथस्य स्फुरत्ववयवेस्स
द्विविधानुमितिर्हि सा· स्वार्थपरार्थभेदा· स्वार्थत्वपरार्थत्वे पुनरनुमितित्वव्याप्ये जाती· तत्र स्वार्थानुमितिं प्रति जनकतापरामर्शस्याप्रामाण्यशङ्का
निरस्तं· सूत्रव्याप्तिविशिष्टपक्षधर्मतानिश्चयत्वादिना पूर्वमुपपादिता· परार्थानुमितौ तु न तथाविधः परामर्शः कारणं· शब्दादिवाक्यप्रयोज्यपरा
मर्शधर्मिताज्ञानाप्रामाण्यशङ्काव्यतोऽपि शब्दादिनोभयसाध्यस्य व्याप्यवत्त्वाविधानुमित्युत्पत्त्यात्· न च परामर्शसामान्यकारणतायामेव व्याप्यप्रयोज्यपरामर्श
विषयकाप्रामाण्यज्ञानाभावस्यापि हेतुत्वादनुमितिसामान्यसामग्र्येव परार्थानुमितिरप्युपपद्यत इति वाच्यम्। न तेन परामर्शत्वावच्छिन्नविषय
कज्ञानामप्रामाण्यप्रकारकज्ञानानामनुगतरूपाभावे विधूमज्ञानत्वावच्छेदेनाप्रामाण्यप्रकारकाणां धूमप्रकारकाणां रूपकविशेष्यतावच्छेदकत्वेन
धूमाभाववद्वृत्तित्वप्रकारकाणां धूमपरामर्शत्वावच्छेदेनाप्रामाण्यप्रकारकावच्छिन्नविशेष्यताकत्वाद्यगाहिनां च ज्ञानानामनुगतरूपावच्छिन्नाभाव
स्यैव परामर्शसामान्यकारणतायां प्रवेशात्। तत्तत्पक्षविशेष्यकाप्रामाण्यज्ञानाभावः व्याप्यप्रयोज्यपरामर्शं परार्थानुमित्युत्पादात् स्वार्थपरार्थानुमित्योर्विभिन्न
सामग्रीप्रयोज्यजातिरूपाभ्युपगमस्यावश्यकत्वात्· नन्वनयोर्विधूमपरामर्शस्य धूमलिङ्गकानुमितिसामान्यं प्रत्येव जनकत्वमप्रामाण्यशङ्कानुत्या
र्धूमलिङ्गकानुमितिप्रत्येव प्रतिबन्धिका· न तु परार्थानुमितित्वावच्छि· व्याप्यप्रयोज्यपरार्थपरामर्शस्य परार्थानुमितिरूपपद्यत इति चेन्न एवमपि तन्नि
ष्प्रक्षिकाद्यैव ह्निव्याप्यधूमवानयमिति वाक्यप्रयोज्यसजातीयेनैव परामर्शेन सामग्र्या प्रामाण्यशङ्कायां स्वार्थानुमित्युत्पत्तावपि परार्थानुमित्युत्पादप्रसङ्गात्। अतो

45 तयैवान्वयेन तत्राप्तिआप्तयोगात् तत्र सनिगमनेन तत्प्राप्तिमाह· स्वहेतु हस्तप्रहस्तप्रशान्विति इदं पदार्थविशेषणात् तथैव निगमनवाक्यार्थं स्यान्वयाद
मोलक्षणानुगमाह स्वार्थविशिष्टेति पदार्थविशिष्टवैशिष्ट्यबोधो न्यायजन्यो न्यायघटकपदाजन्यो वा सन्न्यायावयवो हेतुरित्यर्थः तेनोदासीनवाक्यसहकारेण
मिगमनादेः विशादृशानी पञ्चकलेऽपि नक्षतिः द्वितीयतृतीयलक्षणयोरुभयविशिष्टवैशिष्ट्यबोधो न्यायजन्य एव निवारितः॥ नियमानामिति अन्वयव्याप्ति
रेका दाहरणानां तेषामनयक्षेनैकदेशो भवत्यापि तत्रैक एकस्मिन्नतो मनत्तरयोर्मैनेकस्यात्योरतिव्याप्तिरत्र हेतुरूपाणां दर्शनेन न्यूनत्वाभिमानः इतरे साद्दृश्यतरो
पस्था विनार्थविशेषणानां विरूपतां नार्थं व्यभिचारव्यतानिर्णये फलतार्थः॥ ॥नानुपत्तिदोषव्यभिचारेण आभायप्रसावे नद्वितीयं लक्षणं स्वार्थत्वस्य गति
पाद्यत्वं मुख्यविशेष्यतानिवेशान्न प्रतिज्ञागमनतिज्ञातिः निगमनत्वस्य तोऽवयवार्थोऽवयवज्ञाकार्थः स्वार्थः स्वजन्यप्रतीतौ मुख्यविशेष्यः हेतुत्वयेति व्याप्ति
निरुक्ताहेतुत्वर्थश्चेति॥ ॥न्यायावयवमूलोपदीपिनिदोषेणादर्शितो दोषः तस्योद्धारो न मयि— चेतसा कृतेऽनुरूपः॥ ॥इत्यवयवदीधितिविवेचनं॥

~~[illegible]~~ नं: पक्षता [illegible] • न्या.वै.

पत्र १-४८

No

No. 343

नं. ३४३

श्री गणेशाय नमः ॥ चिंतामणि प्रकाशे नाथि र स्तन मलोलन: न्याये गोकुल नाथस्य स्फुरत्वमलं ह्यस्तु ॥१॥ अनुमितिं प्रति
विशिष्ट व्याप्ति पराम‍र्श स्वार्थ परार्थ पुनरनुमिति व्याप्ये आसीत तत्र स्वार्थानुमितिं प्रति जनकता परामर्शस्य आभासा
एव नां काकृतं के अन्यथा विशिष्टे पक्ष धर्मता अस्य निश्चय पर्यवसानात् पूर्व मुपपादिता परार्थानुमितौ जनकता वि
धः परामर्श: कारणं वादिना वक्तुं आ उपपराम र्श धर्मि एव आभाषा न्याय वेनापि वादीना में अस्य पंक्ष्यत: पा
विशिष्टानुमिति स्फुटपातेन उपपरामर्श सामान्य कारणं नाये म न्याय प्रवृत्ते उपपरामर्श विषय कार्यान्याए प्रा
नव्य यागे भाव स्या प्रवृत्ता गरनुमिति सामान्य सामग्र्ये उपपरार्था अनुमिति रस्तु उपपद्यत इति वाच्यं तत्र तु प
रामर्शे ला वाच्छन्ना विशेष्यता कारणम प्रामाण्य प्रकारक ज्ञाना नामनुगत रूपा लाभेपि धूम ज्ञानत्वावच्छे
दे नाप्रामाण्य प्रकार कारणा धूमत्व कारता निरूपक विशेष्यता वावच्छेदेन धूमाभाव वह्नि विषय का
रणानां धूम परामर्श ला वच्छेदेन व्यधि करण प्रकारा वच्छिन्न विशेष्यता कत्वा वगाहि नां च ज्ञानानां
मनुगत रूपावच्छिन्नाभा स्यैव पूर्व परामर्श सामान्य कार्य तापि अप्रवेशात् स सपि ताह तत्र प्रामाण्य
तोन्य व्याप्यवत्रो उपपरामर्शात् परार्था नुमिति सु सादात् स्वार्थ परार्थ नुमिति सोनुमितेन सामग्री प्रयोजप ज
ति धूमाभाव प्रकारकत्वात् । स्फुटतया विपक्ष परामर्श स्य धूम लिंगकानुमिति सामान्यं जनकत्व जनक
तन्मयत्वा रात्र प्रामाण्य धूमलिंगक स्वार्थानुमिति जनकत्व शक्ति वच्छे कोनुपदार्थ परानुमिति व्याप्यत्व उपप
रामर्शात् परार्थानुमिति रूपपद्य नवगते चेन्न एव नमत्यपि सन्निधान साक्षि कारि वा कूट व्याप्य धूमवानपर्व
ता भूवा जनित वापरामर्श सत्वा प्रामाण्य प्रकारकत्वा स्वार्थानुमित्यनुत्पादे परार्थानुमित्यनुत्पत्ति
प्रसंगात् अतो मानस तावा तर वैजात्य विशेषण व्यापकत्वो उप: परामर्शो विशिष्ट परार्थानुमिति त्व
प्रामाण्य मोप पत्ता का विरहेण कारणं नापित त्वा वच्छेदक सत्काम्येनापि अनुपपन्न मन्यानुपपत्ते:

—

श्रीगणेशो विजयते ॐ सूर्यगणेशमहालक्ष्मीशिवविष्णुभ्यो नमः॥ ॥ चिन्तामणिप्रकाशेन निरस्ततमसो मम। न्यायो गोकुलनाथस्य स्फुरत्वयं वैस्व
दृष्टत्वमिति निर्दिष्टा॰ स्वार्थपरार्थश्च॰ स्वार्थत्वपरार्थत्वे पुनरनुमितित्वव्याप्ये जाती॰ तत्र स्वार्थानुमितित्वं प्रतिजनकतापरामर्शसामान्ये शङ्का
भवतु॰ न्यूनव्याप्तिविशिष्टपक्षधर्मतानिश्चयत्वादिना पूर्वमुपपादितम्॰ परार्थानुमितौ तु न तथाविधः परामर्शः कारणम्॰ नादिवाक्यप्रयोज्यपरा
मर्शधर्मिता सामान्यपर्यायाकार्यतो विशेषादिनोपपन्नस्य स्वव्यापारत्वाविधानुमितिस्तु स्यात्॰ न च परामर्शसामान्यकारणतायामेव व्याप्यप्रयोज्यपरामर्श
विषयतासामान्यप्रतिबन्धकाभावस्य प्रवेशादनुमितिसामान्यसामग्र्येव परार्थानुमितिस्तु परपर्यन्तत्वं तथा भातं तत्स परामर्शत्वावच्छिन्नविशे
षणतानामप्रामाण्यप्रकारकज्ञानानामनुगतरूपाभावे विधूमज्ञानत्वावच्छेदेनाप्रामाण्यप्रकारकाणां धूमप्रकारकाणां रूपकविशेष्यतावच्छेदेन
धूमाभाववद्वह्निमत्प्रकारकाणां धूमपरामर्शत्वावच्छेदेनाधिकरणप्रकारावच्छिन्नविशेष्यताकत्वावगाहिनां च ज्ञानानामनुगतरूपावच्छिन्नाभाव
स्यैव परामर्शसामान्यकारणतायां प्रवेशात्। तस्य विनादृष्टान्तप्रामाण्यज्ञानं न्यायप्रयोज्यपरामर्शजन्यपरार्थानुमित्युत्पादात् स्वार्थपरार्थानुमित्योर्विभिन्न
सामग्रीप्रयोज्यं जातिद्वयं परस्परपरिहारेण सावच्छेदकसाधनम्॰ न तु तथाविधधूमपरामर्शस्य धूमलिङ्गकानुमितिसामान्यं प्रत्येव जनकत्वं प्रामाण्यशङ्कानुत्पा
दे धूमलिङ्गकानुमितित्वस्यैव प्रतिबध्यत्वेन व्यक्तिका॰ न तु परार्थानुमितित्वस्यापि॰ न्यायप्रयोज्यपरार्थपरामर्शजन्यपरार्थानुमितिरूपपक्षधर्मता निश्चयेऽपि तस्य
प्रत्यक्षसिकादौ च वह्निव्याप्यधूमवानयमिति ज्ञानस्य समनन्तरं परामर्शसत्त्वे प्रामाण्यशङ्कायां स्वार्थानुमितिस्तु तदपि परार्थानुमितिप्रसादप्रसङ्गात्॰ अतो

45 तथैवान्वयेन गृह्यतेति न्यायप्रयोगात् तत्र च निगमनेनानुमितिरित्याहोक्तहेतुरूपत्वं च तत्पक्षान्वितेदं परार्थविशेषणात्तथैव निगमनवाक्यार्थस्यान्वयादि
मोलक्षणं न माहु स्वार्थविशिष्टेति परार्थविशिष्टविशेषकोधो न्यायजन्यो न्यायप्रकृष्टपरार्थजन्यो वा सम्भवापायत्वात्॰ हेतुरित्यर्थः तेनोदासीनवाक्यसहकारेण
मितिमनादेरविनाट्यानेन प्रागनुमानकालेऽपि नष्टसत्तिः द्वितीयतृतीयलक्षणयोरविविशिष्टविशेष्यको बोधो न्यायजन्य एव नियमः॥ ॥ निर्णयपरामर्शे त्वन्वयव्याप्ति
रेकव्याप्त्युदाहरणाभासेषु न एकत्रैव सदोषप्रयोगपापीत्यङ्कं तत्र तर्कमतो न न तत्र परार्थ इत्याशङ्क्य तथा निश्चितसहकारणवदर्शनेनान्यत्र गणे प्रामाण्याभिमानः इतरे सादि इतरे
पक्षधा विनार्थविशेषणप्रतिपादिका व्यापारोऽयमेव विशेष्यतावच्छेदकेन परार्थः॥ ॥॥ प्रतिज्ञा व्यधिकरणावयवसामान्ये नहि तीर्थं च लक्षणं स्वार्थत्वं स्वत्व
पाद्यत्वं मुख्यविशेष्यतानिवेशात् प्रतिज्ञा गमनिरुक्ताः निगमनलक्षणेऽवयवार्थोऽवयववाक्यार्थः स्वार्थः स्वजन्यप्रतीतौ मुख्यविशेष्यः हेत्वर्थ इत्यास्ति
निरस्तमिति हेत्वर्थश्चेति॥ ॥ अपायप्रयोगोऽयो दीपनिरोधे सादर्शनो दोषः तस्योद्धारो न मपि ~ येतस्मिन् कृते तत्तः प्रत्यय॥ ॥ इत्यवयवदीधितिविवेचनः॥

~~[illegible]~~ नं. [illegible] · न्या. वै.

पत्र १-४७

No

No. 343

नं. ३४३

श्री गणेशाय नमः ॥ चिंतामणि प्रकाशेनाभिर स्तत मलोतन. न्यायो गोकुल नाथस्य स्फुरत्वयमवे स्तह ॥१॥ अनुमिति
द्विधा स्वार्था परार्था च स्वार्थपरार्थैव पुनरनुमितिस्त्वाप्ये आसीत च स्वार्थानुमितिः अनि जनकतापरामर्शस्याभा
एपन्नांका कृतं के न्यव्याप्तिविशिष्टपक्षधर्मता ऐक्य निश्चय पत्यतदनापूर्वमनुपपादित्तापरार्थानुमितेरजनतयाधि
धः परामर्शः कारणं यदि वा कण्ठोक्ता उपपरामर्श विधर्मि एव [illegible] यन्तोपि वागुनेनामे अस्यन्त्यन्तः
द्विधानुमितिस्तु पातेन च परामर्श सामान्य कारण तया भेद व्याप्य अतो उपपरामर्श विषय का प्रामाण्य
नव्यक्तौ नाम भावस्याप्रवेशात् अनुमिति सामान्य सामग्र्ये च परार्थानुमितिरप्युपपद्यत इति चान्ये नतु तस
रामर्श ता वच्छिन्ना विशेष्यकत्वेन प्रामाण्य प्रकारक ज्ञानानामनुगत रूपा लाभेपि धूम ज्ञानत्वावच्छे
देना प्रामाण्य प्रकारक ज्ञानत्व धूमत्व कारणता निरूपक विशेष्यता वच्छेदेन प्रमाभावेन च हि तवेष का
रकाणां धूमपरामर्शत्वावच्छेदेन व्याप्ति करण प्रकारक विच्छिन्न विशेष्यता क बोधावगाहि नां च ज्ञानानां
मनुगत रूपावच्छिन्नाभावस्यैव पूर्वा परामर्श सामान्य कारणतया पापे अवच्छेदात् स सत्यपि तादृश प्रामाण्य
ज्ञान व्याप्य पक्षौ उपपरामर्शात् परार्थानुमिति सुसाध्यात् स्वार्थपरार्थानुमित्यो रेवेन न समवनी च तोऽपजो
निकूलानुपपन्ना अव ग्रपकत्वात् । स्तुतिपक्षे धूम परामर्शस्य धूम लिंगको नुमितित्व सामान्यं जटेजनक
तम्प्रमा एपन्नां कास्तु धूम लिंगक स्वार्थानुमिति जलेव जति वधिको न तु पहा परानुमिति व्यापकता उपप
रामर्शात् परार्थानुमितिरुपपद्यत इति चेन्न एव न प्रसिसतिज्ञानसाध्य कारीवाक्य अपन्न धूमवान पामि
साधूवाक्येर जनिते वा परामर्श सत्यामप्रामाण्य ग्राका पा स्वार्थानुमितस्तु ना दृष्य परार्थानुमितस्तुला
दृश्य संगात् अतो मानस तावा तदवं जात विशेषेण व्यापकत्वो उपः परामर्शो विशिष्ट परार्थानुमि तोवा
रणमस्य मो एपन्नांका विरहोन कारणं नापि तत्वावच्छेदक सकारोमेनापि अस्तु पंचम व्याप्तु पचतः

—

विवक्षायां पदपूर्वपर्तिपदर्थायांशि विशेष्यक ान्वयबोधजनकनिगमनवारणायाह तीयविभक्त्यंतेति तदाह तेन निगमनस्य
तासद्वित्तिपरेषु तस्मान्तिवरणाः। निगमनवारणाय स्वघटकपदजन्यवृत्तिपदस्यैवत्ववनेनैव विनोक्तिविशेष्यता विशेष्य
विशिष्टं तादृशस्य वृत्तौ स्याद्‌ः। तल्लक्षणे नोक्तमिति सादृश्यविशेषणाय व्याप्तिप्रसंगात् तस्मादन्यद्वयन्यद्वितिनिगमनं तत्
व्याप्यविशिष्टपक्षतादृशस्यास्य न प्रतिज्ञायां न प्रतिज्ञामुख्यविशेष्य। ननु प्रथमे हेतुवचनवत्त्वस्य मुख्यविशेष्य
प्रतिस्थापि पक्षान्वित स्वार्थबोधकं यन्निगमनं चरमं तदर्थविशेष्यतयाऽविते हेतुवाक्यार्थ कलितं न हेतुवचोपा
विशेषण तथैव विवक्षितः प्रथमत्वमभिधेयं प्रथमपदलक्षितप्रतिज्ञावारणाय स्वार्थपदमिति विशेषवत्त्वेन
तत्रातिविशेषण तथान्वयस्य विवक्षितत्वे प्रतिज्ञैकदेशार्थस्यापि विशेष्यतयैवान्वयेन तत्रातिव्याप्त्ययोगा
त्। तत्र यन्निगमनेन व्याप्यतिव्याप्तिश्च हेतुक नयस्यान्वितं तदपदार्थविशेषणतयैव निगमनवाक्यार्थस्यान्व
यादतो लक्षणांतरमाह स्वार्थविशिष्टेति यत्स्वार्थविशिष्टविशेष्यताकबोधो न्यायजन्यो न्यायावयवटकपदस
मुदायत्वे सत्या वाचवबोधः शुध्यर्थः। तेनोदासीनवाक्यसहकारेण निगमनादेरपि तादृशबोधजनकत्वेपि
न क्षतिः। द्वितीयततीयलक्षणयोरपि विशिष्टवैशिष्ट्यबोधोजन्यायजन्यत्ववविवक्षितः। विशेषलक्षणमिति
अन्वयव्यतिरेकसुदाहरणं नास्त्येव अत एव तत्र वने कदोमयव्याप्तुं न्यासोपीति पूर्वमुक्तम् ततो ननु
लक्षणयोरति — व्याप्तिलक्षणम्॥ अदृशनात् न्यून तावत्समभिमानः। इत रे सादि तरोपस्थापिता
पणतानि त्वयन स्वार्थमुख्यविशेष्यताकबोधजनकत्वमर्थः। तत्र द्विविशेष्याविशेषणाभावव्यासासे न द्वितीय
लक्षणस्वार्थत्वं स्वप्रतिपाद्यत्वं मुख्यविशेष्यतानिवेशाः। लप्रतिज्ञापामति व्याप्तिः। निगमनलक्षणे अवयवा
र्थोऽवयववाक्यार्थः स्वार्थः स्वजन्यज्ञानतो मुख्यविशेष्यः हेतुवचवदिति व्याप्तिवारणायेतिहेतुर्थश्चेति॥ न्याया
वयवमणेोपाधीधितिदीधितिदोष०॥ तस्योद्धरणे नम्रे मिश्री येतनातततर:पुरुषः।१। इस वयव
मणिदीधितिसाधिविवरणं समाप्तम्। श्री राजेश्वरी विजयतेतराम्। ५ ॥ शुभमस्तु सर्वजगतः।

गङ्गेशोपाध्यायविरचितः

तत्त्वचिन्तामणिः

तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनय-निगमनानि निरूप्यन्ते। तत्र न समस्तरूपोपन्नलिङ्गप्रतिपादकवाक्यं न्यायः, अत्रैव वाक्येऽतिव्याप्तेः, किन्त्वनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः। प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते

गोकुलनाथोपाध्यायकृतावयवतत्त्वचिन्तामणि-
दीधितिविद्योतः

।। श्रीगुरूगोविन्दाभ्यां ॐ सूर्यगणेशमहालक्ष्मीशिवविघ्नेभ्यः नमः[1]।।

चिन्तामणिप्रकाशेन निरस्ततमसो मम।
न्यायो गोकुलनाथस्य स्फुरत्ववयवैस्सह।।

अनुमितिर्द्विविधा स्वार्था परार्था च। स्वार्थत्वपरार्थत्वे पुनरनुमितित्व-व्याप्ये जाती। तत्र स्वार्थानुमितिं प्रति जनकता परामर्शस्या[2]प्रामाण्य-शङ्काकलङ्कशून्यव्याप्तिविशिष्टपक्षधर्मतानिश्चयत्वादिना पूर्वमुपपादिता। परार्थानुमितौ तु न तथाविधः परामर्शः कारणम्। वादिवाक्यप्रयोज्यपरामर्श-धर्मिणाम[3]प्रामाण्यशङ्कावतोऽपि वादिनो मध्यस्थस्य वा तथाविधानुमित्युदयात्।

न च परामर्शसामान्यकारणतायामेव न्यायप्रयोज्यपरामर्शविषयका-प्रामाण्यज्ञानव्यक्तीनामभावस्याप्रवेशादनुमितिसामान्यसामग्र्यैव परार्थानुमिति-रप्युपपद्यत इति वाच्यम्। तत्परामर्शत्वावच्छि[4]न्नविशेष्यकानामप्रामाण्य[5]-प्रकारक-ज्ञानानामनुगतरूपालाभेऽपि धूमज्ञानत्वावच्छेदेनाप्रामाण्यप्रकारकाणां[6] धूमप्रकारता निरूपित विशेष्यत्वावच्छेदेन धूमाभाववद्वृत्तित्वप्रकारकाणा[7] धूमपरामर्शत्वा-वच्छेदेन व्यधिकरणप्रकारावच्छिन्न विशेष्यताकत्वावगाहिनाञ्च ज्ञानानामनुगत-रूपावच्छिन्नाभावस्यैव परामर्शसामान्यकारणतायां प्रवेशात्। सत्यपि तादृशा-

तेन च विशिष्टवैशिष्ट्यावगाहिमानान्तरमुत्थाप्यते तेन च चरमपरामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजकता।

अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनक-शाब्दज्ञानजनकवाक्यत्वमवयवत्वम्, अत एव वह्निव्याप्य-धूमवानयमिति वाक्ये तदवयवे च न न्यायतदवयव-लक्षणातिव्याप्तिः तेन परामर्शस्य तदवयवेन परामर्शजनकस्य जननात्।

प्रामाण्यज्ञाने न्यायप्रयोज्यपरामर्शात् परार्थानुमित्युत्पादात् स्वार्थपरार्थानुमित्यो-र्विभिन्नसामग्रीप्रयोज्यजातिद्वयाभ्युपगमस्यावश्यकत्वात्।[8]

ननु तथापि धूमपरामर्शस्य धूमलिङ्गकानुमितिसामान्यं प्रत्येव जनकत्वमप्रामाण्यशङ्का[9] तु स्वार्थधूमलिङ्गकानुमितिं प्रत्येव प्रतिबन्धिका, न तु[10] परार्थानुमितिं प्रत्यपि न्यायप्रयोज्यपरार्थपरामर्शात् परार्थानुमितिरूपपद्यत इति चेन्न। एवमपि सति प्रात्यक्षिकादौ वह्निव्याप्यधूमवानयमिति आप्तवाक्यजनिते[11] वा परामर्शे सत्यामप्रामाण्यशङ्कायां स्वार्थानुमित्यनुत्पादेऽपि परार्थानुमित्युत्पादप्रसङ्गात्। अतो मानसत्वावान्तरवैजात्यविशेषेण न्यायप्रयोज्यः परामर्शो विशिष्य परार्थानुमितौ कारणमप्रामाण्यशङ्काविरहो न कारणन्नापि[12] **तत्त्वावच्छेदक** इत्यकामेनाभ्युपेयम्[13] अन्यथानुपपत्तेः। स च विजातीयः परामर्शो न तावदर्थोपस्थितिमात्रसहकृतेन मनसा केवलं जननीयः चक्षुरादिना न्यायभिन्नेन शब्देन वोपस्थितेषु व्याप्तिपक्षधर्मता लिङ्गेषु तथाविधपरामर्शोत्पत्ति-प्रसङ्गात्। किन्तु वह्निव्याप्यधूमवान् पर्वत इत्याकारके विजातीयपरामर्शे पर्वतपक्षकवह्निसाध्यकधूमलिङ्गकन्यायेन सम्भूयजनितो महावाक्यार्थबोध-स्तत्त्वेन जनकः यदाहुर्मिश्राः न्यायजन्यमहावाक्यार्थ[14]बोधस्य तादृशशाब्द-ज्ञानत्वेनैव जनकत्वम्। वाद्युक्त[15]प्रयोगजज्ञाने[16] एवोक्तपरामर्शसामग्रीत्वाद-न्यत्राप्तोक्तवाक्याद् वह्निव्याप्यधूमवानयमिति[17] परामर्शस्यैव**ाहत्योत्पाद** इत्यादि न्यायजन्यमहावाक्यार्थज्ञानेन विजातीये[18] परामर्शे जननीये **समयबन्ध**विशेषज्ञानं[19] सहकारीत्युपाध्यायाः व्यापार इति मिश्राः। समयस्तु परामर्शस्यानुमितेर्वा प्रयोजकत्वस्वरूपो यादृशानुपूर्वीकवाक्यत्वावच्छेदेनावगतस्तादृशानु-

पूर्वोक्तवाक्यजनितो महावाक्यार्थबोधस्तत्परामर्शजनकः। तथाहि प्रतिज्ञादिरुदाहरणान्तो वाक्यकलापः। परामर्शविशेषस्यानुमितिविशेषस्य वा प्रयोजक इति समये गृहीते प्राभाकराणान्तथाविधवाक्येनैव उदाहरणोपनयावेव तथेति जानतां बाह्यानां ताभ्यामेव विषयसंशयादयो दशवाक्यसन्दर्भाः परार्थप्रयोजका[20] इति निश्चयवतो जरन्नैयायिकादेस्तैरेव दशभिर्वाक्यैर्जनितो महावाक्यार्थबोधः। परार्थपरामर्शं प्रति **तृणारणिमणिन्यायेन** जनकः तत्तद्दर्शनसमयबन्धवशात् सर्वोऽपि न्याय एव परन्तु पञ्चावयवकन्यायजनिता भगवदनुमितिरदृष्टद्वारा स्वात्मसाक्षात्कारस्योपकरोतीत्याकारकानुसारिणः काश्यपाङ्गिरसा निर्दिशन्ति। अत एव प्रयत्नसाध्यप्रश्नवाक्यादिक्रमेण-श्रुतिवाक्योत्पत्तिद्वारा श्रवणस्येव तथैव न्यायवाक्योत्पत्तिद्वारा मननस्यापि कृतिसाध्यत्वं मन्तव्य इति श्रुत्या प्रतिपाद्यते एवं स्थिते निरूपितानां व्याप्तिपक्षधर्मत्वादीनामेककार्यानुकूलत्वेन निरूपित परामर्शस्य हेतुत्वेन वा सङ्गत्या न्यायं निरूपयितुं निरूक्तसङ्गतिं सूचयति मूले "तच्चानुमानं परार्थं न्यायसाध्यमिति परार्थानुमानम्। परार्थानुमित्युपहितः परामर्शः न्यायसाध्यम्। न्यायजन्यमहावाक्यार्थबोधजन्यम्। अथवा परार्थानुमान[21] परार्थानुमितेः सव्यापारकं कारणं व्याप्तिमपि विषयीकुर्वन्महावाक्यार्थज्ञानं तथाच निरूपितानुमाने जनकत्वमपि न्यायस्य सङ्गतिः। **किन्त्वनुमितिं चरमेति स्वार्था परार्था चेति विभक्तयोरनुमित्योर्यच्चरमं परार्थानुमितिः** तत्कारणं यो लिङ्गपरामर्शो विजातीय[22]व्याप्तिविशिष्टपक्षधर्मताज्ञानं तस्य प्रयोजकं यच्छाब्दज्ञानं तज्जनकं वाक्यं न्यायः। यत्र तु वह्निव्याप्यो धूमो धूमवान्पर्वत इति वाक्यजन्यवाक्यार्थबोधान्मानसो वह्निव्याप्य धूमवानिति परामर्शस्ततः स्वार्थानुमितिस्तत्रत्यवाक्यवारणार्थञ्चरमेति। अनुमितिचरमकारणलिङ्गपरामर्शत्वेन च मानसत्वव्याप्यो वैजात्यविशेष उपलक्ष्यते। अत्र[23] च तज्जातीयं प्रति प्रयोजकत्वं जनकत्वमेव प्रकृते विवक्षितम्। न्यायजन्यमहावाक्यार्थज्ञानस्य साक्षादेव तादृशपरामर्शकारणत्वात्। तेन चेत्यादिमूलन्तु तेन न्यायजन्यमहावाक्यार्थज्ञानेन पंक्षे व्याप्तिविशिष्टस्य हेतोर्वैशिष्ट्याव-गाहिन्यामनुमितिस्तस्याः कारणान्तरं मन उत्थाप्यते स्वात्मस[25]हकारिसम्पन्नं क्रियत इत्युपाध्यायाः। प्रयोजकत्वं सव्यापारकारणत्वं[26] न्यायजन्य-महावाक्यार्थज्ञानेन न्यायविशेषोऽनुमितिविशेषस्य प्रयोजक इति

स्मरणमुद्बोधकविधया जन्यते। तदेव स्मरणं व्यापारमासाद्य महावाक्यार्थधी: परामर्शविशेषमुत्पादयति। तेन चेत्यादिमूलस्य तु न्यायत्वविशिष्टे अनुमितिप्रयोजकत्ववैशिष्ट्यावगाहिमानान्तरमनुभवान्यज्ञानमुत्थाप्यते[27] जन्यते इत्यर्थ: इति मिश्रा: युज्यते चैतत्। अत एव **समयबन्ध**वाक्येऽतिव्याप्तिवारणार्थ शाब्दत्वमपि ज्ञाने विशेषणमर्थवत्। अन्यथा समयबन्धवाक्यजन्य: शाब्दबोध:[28] पञ्चावयववाक्यमनुमितिविशेषप्रयोजकमित्याकार:[29] समानाकारस्मरणद्वारा परार्थ-परामर्शप्रयोजक इति तज्जनकवाक्येऽतिप्रसङ्गात्। शाब्दपदोपसन्दानेन च शाब्दबोधत्वेन प्रयोजकतालभ्यते समयबन्धग्रहस्तु प्रत्यक्षादिसाधारणानुभवत्वादिना प्रयोजको न तु शाब्दबुद्धित्वेन तदुक्तमालोके। न च शाब्दपददानेऽप्येष दोष: शाब्दज्ञानत्वेन तादृशप्रयोजकत्वस्य विवक्षितत्वात्।"

न च योग्य[30]ताज्ञानत्वेन जनकत्वादिति। अत्र योग्यतापदं[31] समयानित्यवधेयम्। अथोपाध्यायमतेऽपि यत्र समयबन्धवाक्यस्य पञ्चावयव-वाक्यस्य चैकं समूहालम्बनात्मकं स्मरणमथ न्यायार्थ[32]पञ्चावयववाक्यत्वा-वच्छेदेनानुमितिप्रयोजकत्वावगाही समूहालम्बनात्मक: शाब्दबोध: तत: परार्थपरामर्श:[33] तत्रत्य समयबन्धवाक्येऽतिव्याप्तिवारणाय शाब्दपदम्। आनुपूर्वी विशेषलाभाय च वाक्यपदम्। तथा च यादृशानुपूर्वीकवाक्यजन्यवाक्यार्थ-बुद्धित्वेन परार्थपरामर्शं प्रति जनकत्वन्तादृशानुपूर्वीमत्त्वं न्यायपदप्रवृत्तिनिमित्तं लभ्यते। अवश्यं चेदमन्यैरपि विवक्षणीयमिति चेत्तदा भवतु प्रयोजकपदं जनकार्थकमस्तु च समयज्ञानं सहकारी न तु व्यापार: इदञ्च सर्वदर्शनसाधारणं[34] न्यायसामान्यलक्षणम्, त्रिषु द्वयोर्वा अवयवयो: पर्याप्तानुपूर्वीकस्यापि वाक्यस्य तत्तत्समयग्रहसहकारेण परार्थपरामर्शप्रयोजकत्वात्। अत एवात्मतत्त्वविवेकादौ "यत्सत् तत्क्षणिकं[35] यथा घट: संश्च विवादाध्यासित: शब्दादिरिति द्व्यवयवेनैव न्यायेन कथा दृश्यते। न चैवं पर्वतेऽग्निर्धूमो यतो धूमश्च वह्निमन्मात्रवृत्तिरस्ति च धूमे पर्वतवृत्तित्वं तस्मादग्नि: पर्वतवृत्तिरिति वाक्येऽतिव्याप्तिरालोक-कारोद्भाविता विरूद्धयते[36] तस्या अप्यानुपूर्व्यास्समयविशेषग्रहसहकारेण परार्थ-परामर्शप्रयोजकतया तादृशवाक्यस्य न्यायत्वसम्भवादिति चेन्न। सर्वदर्शनसम्प्रदाय-विरूद्धानुपूर्वीकवाक्यजन्यवाक्यार्थग्रहस्य परार्थपरामर्शप्रयोजकत्वस्य एतादृशानु-पूर्वीकं वाक्यमनुमितिप्रयोजकमिति समयग्रहसहकारितायाश्च प्रमाणाभाव-

यत्तु संक्षेपतः परामर्शप्रयोजकवाक्यत्वेन विशेषाभावात् सोऽपि न्याय एवेति, तन्न, कथायामाकाङ्क्षाक्रमेणाभिधानमिति प्रथमं विशिष्टवैशिष्ट्य आकाङ्क्षा नास्तीति तदभिधाने निग्रहादिति वक्ष्यते, अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्तिः आकाङ्क्षाविरहस्तुल्य एव।

प्रतिहतत्वात्। अन्वीक्षादर्शने न्यायपदपरिभाषाप्रवृत्तिनिमित्तं तु सूत्रकाराभ्युपगत-समयग्रहसहकारेण यादृशानुपूर्वीकवाक्यजन्यवाक्यार्थबुद्धित्वावच्छिन्नं प्रति परार्थपरामर्शं जनयति तादृशानुपूर्वीमत्त्वं तेन रूपेणोद्दिष्टस्यैव न्यायस्यावयवाः प्रतिज्ञादिवाक्यैर्विभक्ता इति न न्यूनत्वमाधिक्यं चेति दिक्[37]।

ननु स्यादिदं लक्षणं यदि परार्थपरामर्शं प्रति पर्वतो वह्निमानित्यादि-वाक्यपञ्चकघटितानुपूर्वीविशिष्टवाक्यजन्यशाब्दबोधत्वेन कारणत्वं स्यान्न च तथा पृथिवीं द्रव्यं गुणादित्यादिन्यायप्रयोज्यपरामर्शे[38] व्यभिचारात् पर्वतो वह्निमानित्यादिन्यायजन्यवाक्यार्थज्ञानात् द्रव्यत्वव्याप्यपृथिवीत्ववानयमभाव-व्याप्यधूमवानयं वह्निव्याप्यधूमवन्महानसमित्यादिपरामर्शोत्पत्तिप्रसङ्गात्। हेत्वादि-वाक्येष्वव्युत्पन्नस्य प्रतिज्ञावाक्यमात्रे व्युत्पन्नस्य न्यायेन जनिते प्रतिज्ञार्थमात्र-विषयके बोधे तदुत्पत्यापत्तेश्च[39] प्रकारतान्तरेण व्याप्त्याद्युपनयसम्भवाच्च। न चानुपूर्वीपर्याप्त्यधिकरणजन्यत्वं विवक्षितमुत्तरत्वपूर्वत्वस्वरूपानुपूर्व्याः प्रत्येक-वर्णपर्याप्तत्वात्,[40] न्यायवर्णसमुदायत्वेन महावाक्यार्थबोधेऽप्यजनकत्वात् वर्णानामकारणत्वाच्च। अथवा[41] वह्निव्याप्यधूमवान् पर्वत इत्याकारकपरार्थपरामर्शत्वावच्छिन्नं तद् विशेषं वा प्रति पर्वतो वह्निमानित्यादिवाक्यपञ्चकघटितानुपूर्वीज्ञानत्वावच्छिन्नकारणता निरूपित कार्यताधिकरणशाब्दबुद्धित्वेन कारणता। प्रतिज्ञार्थमात्रविषयकः शाब्दबोधस्तु न तादृशानुपूर्वीज्ञानत्वावच्छिन्नकारणता निरूपित कार्यत्वविशिष्ट[42] इति चेन्न। वह्न्यादिपदे घटवाचकत्वभ्रमवतोऽपि वह्निपरामर्शोत्पत्तिप्रसङ्गात्। यदि च पक्षे वह्न्यादिसंसर्गावगाहित्वमपि वाक्यार्थबोधे विशेषणम्। तदापि यत्र न्यायस्य न्यायभिन्नवाक्यस्य च समूहालम्बनो[43] न्यायान्तर्गतवह्न्यादि पदे च वह्न्यवाचकत्वादिभ्रमः न्यायभिन्नवाक्यं शक्त्याद्यवह्निमत्पर्वतादिहे[44]-तुकत्वादिविषयको घटादिपरामर्शजनको वाक्यार्थबोधस्तत्र वह्निव्याप्य-

वत्तापरामर्शोत्पत्तिप्रसङ्ग:। अथ वह्निव्याप्यधूमवान् पर्वत इति परार्थपरामर्शत्वं तद्विशेष्यत्वं वा जन्यतावच्छेदकं पर्वतो वह्निमान् धूमादित्यादिवाक्यपञ्चकं पर्याप्तानुपूर्वीज्ञानत्वावच्छिन्नकारणता निरूपिता धूमज्ञानजन्यज्ञानविषयवह्निमत् पर्वतादिविशिष्टार्थावगाहिवाक्यार्थबुद्धित्वावच्छिन्ना या जन्यता[45] तच्छालिनिर्णयत्वेन च कारणत्वं न्यायाभिन्नवाक्यजन्यन्यायार्थावगाहिवाक्यार्थबोधत्वावच्छेदेन न न्यायवृत्यानुपूर्वीज्ञानत्वेन कारणत्वमतस्तद्व्युदास इति चेन्न। न्यायजन्यवाक्यार्थबोधेऽपि वाक्यपञ्चकपर्याप्तानुपूर्वीज्ञानत्वेन कारणत्वाभावात्। प्रकृतिप्रत्यययोरानुपूर्वीज्ञानस्यैव ताद्रूप्येण-कारणत्वम्। विभक्त्यन्तानामानुपूर्वीज्ञा[46]नपुनरन्यथासिद्धमित्यभ्युपगमात् अथ पर्वतपदाव्यवहितविसर्गस्य वह्निमानित्यानुपूर्व्या धूमादित्यानुपूर्व्याश्चाविशेषेऽपि धूमात् पर्वतो वह्निमानिति वाक्याद्धूमज्ञानव्याप्यवह्नित्वावच्छिन्नविधेयता निरूपित पर्वतत्वावच्छिन्नोद्देश्यताकान्वयबुद्धेरनुत्पत्या निरूक्तबुद्धौ पर्वतो वह्निमान् धूमादित्यानुपूर्वीज्ञानत्वेन कारणत्वमावश्यकमिति चेत् अस्त्येवमपि प्रतिज्ञाहेतुभ्यामुपनयनिगमनाभ्यां सम्भूय वाक्यार्थद्वयम्। उदाहरणे। न च [47]खण्डवाक्यार्थत्रयं प्रतिपाद्यत इति पञ्चानामानुपूर्वीपञ्चकमेव प्रत्येकं धूमज्ञानज्ञा[48]प्यवह्निमान् पर्वत इति यो धूमवानिति धूमवान् धूमव्यापकवह्निमानिति महानसं धूमवद् धूमव्यापकवह्निमदिति[49] वह्निव्याप्यधूमवदिति **वह्निव्याप्य धूमवदिति** वह्निव्याप्यधूमवान् पर्वतो निरूक्तरूपोपपन्नधूमज्ञाने ज्ञाप्यवह्निमानिति वाक्यार्थपञ्चके कारणन्तु प्रतिज्ञापञ्चके पर्याप्तानुपूर्वीज्ञानं कुत्रचिदिति तादृशानुपूर्वीज्ञानत्वावच्छिन्नकारणता निरूपित कार्यत्वाधिकरणशाब्दबुद्धेरप्रसिद्ध्या तद्घटितलक्षणमसम्भवतीति शङ्कायां समाधत्ते प्रतिज्ञादिपञ्चेति पर्वतो वह्निमान्धूमादिति यो यो धूमवानिति स वह्निमानिति यथा महानसमिति तथा पर्वतस्तथास्मात् वह्निमानिति पञ्चवाक्यानि परस्परव्यवकलितानि स्वस्वार्थ-बोधकानि तैरेकवाक्यतया परस्परसहकारेण निरूक्तै: पञ्चभि: स्वार्थे विषयतया [50]विशिष्टज्ञानं समूहालम्ब[51]नात्मकशाब्दबोधो जन्यते। तेन[52] मानान्तरमनुमित्युप-हिताया: पक्षे व्याप्तिविशिष्टवैशिष्ट्यावगाहिन्यामनुमिते: परार्थपरामर्शस्य कारणं[53] मन उत्थाप्यते कार्यप्रवणं क्रियते। तेन मनसा चरमपरामर्श: चरमगणितानुमितिजनको विलक्षणपरामर्श उत्पाद्यते। तथा च पर्वतो वह्निव्याप्यधूमवानिति परार्थपरामर्शे पर्वतो वह्निमान् धूमादित्यन्तानुपूर्वीज्ञानत्वाव-

च्छिन्नकारणनिरूपिताया धूमज्ञानज्ञाप्य वह्निमत् पर्वतविषयत्वावच्छिन्नाया: कार्यतायाश्चैवं विधा: चतस्त्रोऽपरा: कार्यता: तावत्कार्यतापञ्चकविशिष्टं यत्पर्वत इत्यादि: तस्मात् वह्निमानित्यन्तमहावाक्यपर्याप्तानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकं शाब्दज्ञानं तत्वेनैव तत्कारणमिति महानुपूर्वीज्ञानस्यान्यथासिद्धत्वेऽपि न क्षति: यादृशानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकशाब्दबुद्धित्वेन परामर्शत्वावच्छिन्नं प्रति जनकत्वं तादृशानुपूर्वीमत्त्वं न्यायत्वमपि न दुर्वचम्। जनकपदस्याव्यवहितपूर्वपरत्वादिति भाव:। न्यायजन्यस्य न्यायजन्यमहानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकस्य परामर्शं प्रति प्रयोजकता जनकता सा च साक्षात्स**व्यापारिका** वेत्यन्यदेतत्। अन्वीक्षानय[54] प्रसिद्धस्य न्यायस्यावयवान् लक्षयति। अनुमितीति परार्थपरामर्शन्यायसूत्रकारसंप्रतिपन्नसमयग्रहसहकारेण जनकं शाब्दमहावाक्यार्थसमूहालम्बनज्ञानं प्रथमशाब्दज्ञानमित्यस्यार्थ:[55] यदाहु: अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दाज्ञानत्वेन न्यायजन्यज्ञानस्य विवक्षिततत्वादिति मिश्रा:।

तज्जनकं तदव्यवहितपूर्ववर्ति यत्शाब्दं शब्दविषयकं ज्ञानम्। यादृशानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकशाब्दज्ञानत्वेनानुमितिचरमकारणलिङ्गपरामर्शजनकत्वं तादृश्या: पञ्चावयवघटितानुपूर्व्या ज्ञानमिति यावत्तज्जनकं [56]तद्विषयिता व्यापकविषयिताकं, तेन न्यायानुपूर्वीघटकानुपूर्वीकत्वं लभ्यते। तदेव च न्यायान्तर्गतत्वम्। तावन्मात्रं प्रतिज्ञैकदेशे प्रतिज्ञाहेतुसमुदायादौ सम्पूर्णन्याये च गतमिति वाक्यमुपात्तम्। तच्च प्रतिज्ञादिपरिभाषाप्रवृत्तिनिमित्तान्यतमानुपूर्वीमत्त्वम्। एतेन यदि प्रथमशाब्दज्ञानान्तेन न्यायजन्यो महावाक्यार्थबोधो ग्राह्यस्तज्जनकमवान्तरवाक्यार्थज्ञानमुद्रया पर्वतादौ वह्निमदभेदाद्यवगाहिशाब्दज्ञानं तज्जनकवाक्यत्वमित्यवयवलक्षणमभिप्रेतम्। तदा प्रतिज्ञाद्यवयवै: प्रत्येकं जनितानामवान्तरवाक्यार्थबोधानां चिरविनष्टत्वात् पुनरपि न्यायघटकपदानामनुसन्धानम्। तत: खले कपोतन्यायेन महावाक्यार्थबोधस्तेनाहत्यैव परामर्शो जन्यत इत्यसम्भव:। अथ खले कपोतन्यायेन [57]बोधाद**नतिरिक्तो** विशिष्टवैशिष्ट्यावगाहीशाब्दबोधो जन्यते। स एव परामर्शहेतु: अत एव तेन च विशिष्टवैशिष्ट्यावगाहिमानान्तरमुत्थाप्यते[58] इति स्वरसत: सङ्गच्छते। तथाच तथाविधपरार्थपरामर्शजनकज्ञाने वर्त्तते या विशिष्टवैशिष्ट्यविषयता तद्विशिष्टशाब्दत्वावच्छिन्ने यादृशशाब्दबुद्धित्वेन

अन्ये तु पञ्चावयववाक्याद्विजातीयमेव शाब्दज्ञानमुत्पद्यत इति तद्विजनकवाक्यत्वं न्यायत्वम्, एवं प्रतिज्ञाद्यवयवादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्धीजनकशाब्दत्वमेव तत्तल्लक्षणमिति, तन्न, ज्ञानविशेषजनकत्वं तत्तज्ज्ञानजनकत्वं वा न्याये प्रतिज्ञादौ चानतिप्रसक्तमनुगतरूपमन्तरेण दुर्निरूपमिति तत्स्वीकारे तस्यैव लक्षणत्वात् अन्यथा

जनकत्वम्। तदवच्छिन्नकारणीभूत[59]ज्ञानविषयीभूतानुपूर्वीमत्त्वमवयवलक्षणमिति चेन्न। नीलपर्वतः कस्तूरीप्रभव वह्निमान्नीलधूमादित्यादौ प्रतिज्ञाहेत्वैकदेशेऽति-व्याप्तिः प्रतिज्ञोदाहरणयोरर्थस्यान्यत्रानन्वयात्तयोरव्याप्तेश्च महावाक्यार्थबोधानु-प्रविष्टा ये वाक्यार्थस्तेषां प्रत्येकबोधकत्वं तु हेतूपनययोः प्रतिज्ञानिगमनयोश्चा-व्याप्तमतिव्याप्तञ्च त्रिषूदाहरणावयवेषु न हि यो यो धूमवान स वह्निमा-नित्यनयोर्वाक्ययोरेको विशिष्टवाक्यार्थः। यत्तच्छब्दघटितवाक्याभ्यामेकमुख्य-विशेष्यताकबो[60]धजननात्। अन्यथायं पश्येस्तस्य पादौ[61] **प्रणमर्थ यत्कात**मोदनंभुंक्त इत्यादौ योग्यत्वप्रसङ्गः इत्यादिसमाहितम्। यादृशानुपूर्वीकवाक्यत्वावच्छेदेन प्रतिज्ञात्वादिव्यवहारः[62] तादृशी न्यायानुपूर्वीघटिकानुपूर्वी तद्वत्त्वे तात्पर्यात्। **मतङ्गजो नील**[63] इत्यादौ गजो नील इत्यानुपूर्वीवारणाय प्रतिज्ञात्वादिव्य[64]वहार-गोचरानुपूर्व्यघटकत्वमपि विशेषणं वक्ष्यते।

नन्वनुमितिजनकवाक्यार्थज्ञानजनकवाक्यं न्यायः तद्घटकं वाक्यमवयव इत्येव निरूप्यता[65]मस्तु च न्यायेन साक्षाज्जनित एव परामर्श परार्थानुमितिहेतुरत आह अत एवेति। तदवयवेन वह्निव्याप्येत्यादिना। जननादिति। जननमुत्पादनम् घटनञ्च तस्य यथासंख्यमन्वय इति बोध्यम्। अथ स्वार्थत्वं परार्थत्वंञ्च नानुमितित्वव्याप्ये जाती किन्तु शब्दप्रयोज्यानुमिति-परार्थेति[66] न्यायोऽप्यनुमितिप्रयोजकं वाक्यम्। तच्च समयबन्धविशेषवशात्तेषां[67] दार्शनिकानां द्व्यवयवं त्र्यवयवं पञ्चावयमित्यादिक्रमेण व्यवस्थितम्। [68]आप्तोक्तिन्तु वह्निव्याप्य धूमवानित्यादिवाक्यं सर्वतन्त्राविरूद्धो न्याय इत्यभि-सन्धानस्य कस्यचिन्मतमुपस्थापयति। यत्वित्यादिसंक्षेपतो[69] अनुमितिविशेषस्या-प्रवेशात् परामर्शोऽनुमितिजनकं ज्ञानम्।

जातिसङ्करप्रसङ्गः। (तत्त्वचिन्तामणौ अवयवप्रकरणम्)

ननु परामर्शप्रयोजकवाक्यत्वं कथाघटकन्यायमात्रे प्रयुज्यमानस्य न्यायपदस्य प्रवृत्तिनिमित्तमुत स्वपरिभाषितस्य। आद्ये कथायामिति आकाङ्क्षा समयबन्धस्तथाच यादृशानुपूर्वीकवाक्यत्वात्तदवच्छेदेन समयः शास्त्रे निबद्धः तद्विशिष्ट एव वाक्ये न्यायपदप्रयोगात्। वह्निव्याप्यधूमवानिति वाक्ये च समयबन्धाभावान्न तादृशवाक्यं शास्त्रीयन्यायव्यवहारविषय इति भावः। द्वितीये त्वाह अन्यथेति। समयमुलंघ्यपरिभाषणेत्वित्यर्थः। तथाच लाघवात् वाक्यत्वमपि यत् क्व परामर्शजनकमात्रे न्यायपदं परिभाव्यतामिति भावः। अथ न्यायजन्यशाब्दबोधादौ वैजात्यस्वीकारः परामर्शादिवैजात्योपपादकतया न्यायावयवलक्षणनिर्वचनान्यथानुपपत्या वा सिद्ध्यति। आद्ये परार्थानुमितित्वं जातिरनुभवात्सामग्रीवैचित्र्यात् वा सिद्धा न पक्षसाध्यलिङ्गव्याप्तिभेदाद्भिद्यते जलपृथिव्यौ रसवत्यौ गुरुत्वादिति न्यायप्रयोज्यानुमितौ जलपक्षकपृथिवीपक्षकानुमितित्वयोः साङ्कर्यप्रसङ्गात्। चित्रानुमितिस्वीकारे जात्यादिबाहुल्यस्यानुमितिद्वयस्वीकारे ज्ञानयौगपद्यस्य चापत्तेः किन्तु सकलपरार्थानुमितिसाधारण्येकैव। तथाच पर्वतपक्षकवह्निसाध्यकधूमलिङ्गकविजातीयानुमितौ तथाविध एव परामर्शो निश्चयत्वस्य न्यायप्रयोज्यत्वस्य च प्रवेशेन[70] लाघवात् ज्ञानत्वस्थाने वैजात्यविशेषं प्रवेश्य कारणमभ्युपेयते। तादृशपरामर्शे च न्यायजन्यो महावाक्यार्थबोधो न वैजात्यमात्रेण च जनकः घटसाध्यकन्यायवाक्यार्थबोधो वह्निसाध्यकपरार्थपरामर्शप्रसङ्गः।[71] किन्तु वह्निमदभिन्नपर्वतादिस्वरूपवाक्यार्थपञ्चकावगाहिविजातीयत्वेन। तथाच शाब्दत्वमेव कुतो न निवेशनीयमलं वैजात्येन शाब्दत्वप्रवेशेनापि निश्चयत्वाप्रवेशलाघवसम्भवात्।

ननु तथापि पर्वतोऽग्निर्धूमो यत इत्यादिन्यायभिन्नवाक्यजन्यतावद् वाक्यार्थबोधेन परार्थपरामर्शाजननात्। न्यायनियतानुपूर्वीविशेषज्ञानप्रयोज्यत्वमपि तावद्वाक्यार्थबोधे प्रवेशनीयम्।

तदप्रवेशलाघवात् वैजात्यप्रवेश एवोचितः विजातीयशाब्दबोधे च न्यायनियतानुपूर्वीज्ञानस्य पृथक्कारणत्वमभ्युपेयम्। परामर्शं प्रति कारणतायां गुरूधर्मस्यावच्छेदकत्वे तद्घटकानां विशेष्यविशेषणभावस्य व्यत्यासेन

गुरुतरकारणत्वाधिक्यप्रसङ्गात् इति चेन्न। यत्र घटसाध्यकन्यायस्य वह्निसाध्यकन्यायाभासस्य[73] समूहालम्बनस्मरणमथ न्यायतदाभासयोर्महावाक्यार्थस्य विजातीयशाब्दबोधः। तत्र घटस्येव वह्नेरपि परार्थपरामर्शप्रसङ्गे न न्यायनियतानुपूर्वीप्रयोज्यत्वप्रवेशस्योभयथाप्यावश्यकत्वात्। वह्निसाध्यकन्यायार्थगोचरोविजातीयः शाब्दबोधो वह्निसाध्यकन्यायनियतानुपूर्वीज्ञानजन्यतया तदभावे कथमुत्पद्यत[74] इति चेत्। मास्तु विजातीयः शाब्दसामान्यन्तु स्यादेव सामग्रीसत्त्वात्। विजातीयशाब्दबोधसामग्र्या तदितरप्रतिबन्धकतायामतितरां गौरवम्। यदि चानया रीत्या परामर्शवैजात्यमपि न सिद्ध्यति नासैत्सीत्।[75] यादृशानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकन्यायार्थशाब्दबोधजनितपरामर्शत्वेन परार्थानुमितिजनकत्वं तादृशानुपूर्वीमद् वाक्यं न्याय इत्येव[76] तल्लक्षणं निर्वाच्यमिति दिक् यदपि वह्निसाध्यकपरामर्शपरामर्शे न्यायार्थविषयकविजातीयशाब्दबोधस्य कारणतायामेकस्यामेव पञ्चानां वाक्यार्थविषयकत्वानां प्रवेशे पञ्चसु विशेषण[77]विशेष्यभावव्यत्यासे विशंत्यधिकशतं गुरवः कार्यकारणभावः स्युरतो वह्निमत्पर्वताद्येकैकवाक्यार्थ-[78]विषयकविजातीयशाब्दबोधाः कार्यसहभावेन कारणमेषामैक्यं पुनरर्थसिद्धम्। न्यायनियतानुपूर्वीज्ञानमपि पूर्ववर्तितया परामर्शं प्रत्येव जनकं यत्र च न्यायार्थबोध एव न्यायान्तरवशात् न्यायनियतानुपूर्वीविषयकस्तत्रापि परार्थः परामर्श इष्यत एवेति मतम्। तत्रापि किं वैजात्येन तत्स्थाने शाब्दबोधत्वप्रवेशेनैवाभिमतनिर्वाहात्। यादृशानुपूर्वीज्ञानत्वेन परार्थपरामर्शजनकत्वं तद्वद् वाक्यं न्याय इति लक्षणस्यापि सुवचत्वाच्च। अन्त्ये त्वाह। तन्न ज्ञानविशेषे इत्यादिः। एवमुपपद्यमानमूलं परार्थत्वमनुमितित्वव्याप्यजातिरिति तावदप्रामाणिकम्। सा ह्यनुभवाद् वा व्यवहाराद् वा कारणवैचित्र्याद्वा सिद्ध्येत। नाद्योऽनुभवासिद्धेः। न द्वितीयः परार्थानुमितिरिति व्यवहारस्य न्यायप्रयोज्यानुमितित्वावलम्बनत्वात्। न तृतीयः सत्यामप्रामाण्यशंकायां परार्थानुमितेरप्यनभ्युपगमात्। अभ्युपगमे वा न्यायजन्यवाक्यार्थज्ञानविरहविशिष्टस्याप्रामाण्यज्ञानस्यानुमितिसामान्यं प्रत्येव प्रतिबन्धकत्वाभ्युपगमेन न्यायजन्यवाक्यार्थबोधानन्तरता[79]दृशप्रामाण्यावगाहिनोऽपि परामर्शादनुमित्युत्पादसम्भवात्। अनुमितिपरामर्शयोर्वैजात्यद्वयस्य कार्यकारणभावान्तरस्य विजातीयपरामर्शे न्यायजन्यशाब्दबोधविशेषस्य जनकतायाश्च कल्पनमपेक्ष्य क्लृप्ताप्रामाण्यज्ञानप्रतिबन्धकतायां

रघुनाथशिरोमणिविरचिता

अवयवदीधितिः

उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम्।

शाब्दबोधविशेषस्योत्तेजकत्वस्वीकारस्यैव लघीयस्त्वात् भवतु वा परार्थत्वं जातिस्तथापि तद्विशिष्टे कारणान्तरकल्पनाऽऽवश्यकत्वे न्यायजन्यो वाक्यार्थबोधः ताद्रूप्येण वैजात्यविशेषेण वा कारणमस्तु किमन्तरा मानसपरामर्शाङ्गीकारेण। स्याद्वोपन[80]यस्थायं पदानुषङ्गे न जायमानायां निगमनार्थ बुद्धावेव सा जातिस्तत्रापि पक्षधर्मताज्ञानप्रभवतया गौणो मननपदव्यपदेशः मानसपदार्थपरामर्शप्रयोज्यजातेरपि मननत्वव्याप्यत्वे प्रमाणाभावात् गौणा एव सः। अथ सिद्धसाधनस्थलीयन्यायात् परार्थमननस्यानुत्पत्त्या तत्राप्यनुमितित्व-व्याप्यजातिसिद्धिरन्यथा पक्षता कारणत्वान्तरकल्पनप्रसङ्गादिति चेत्। न स्वार्थानुमितिर्जायतामित्यनुमित्सा सत्त्वे सति चाप्रामाण्यज्ञानास्कन्दिते सिद्धि-स्वरूपे न्यायप्रयोज्ये[81] मानसपरामर्शे वा परार्थानुमित्यापत्त्या परार्थानुमितौ स्वार्थानुमितित्वानवच्छिन्नोद्देश्यताकानुमित्साविरहविशिष्टसिद्ध्यभावस्वरूपायाः पक्षतायाः कारणत्वान्तरकल्पनावश्यकत्वेन लाघवानवकाशात्। अनुमितित्व-प्रकारकेच्छा तु स्वार्थानुमितिं प्रति सिद्धेः प्रतिबन्धकतायामेवोत्तेजिका न परार्थानुमितिः उत्तेजकत्वेऽपि वा नानुमितित्वस्य स्वार्थमनन[82]वृत्तिधर्मप्रकार-केच्छायारपि तत्प्रतिबन्धकत्वम्। साधयति फलबलेन तदवृत्तित्वोत्तेजकत्वे क्षतिविरहादित्यादिदूषणैरनुपपन्नमिव मत्वा यथाश्रुतन्यायलक्षण-वक्ष्यमाणदोषदुष्टतया च स्वयं न्यायलक्षणमाह दीधितौ उचितानुपूर्वीकेति। पर्वतो वह्निमानित्यादयस्तस्मात् वह्निमानित्यादिन्ता[83] वर्णा न्यायपदेन पर्वतो वह्निमानित्यादिवाक्यस्य घटकाः पकाररेफवकारादयः प्रतिज्ञापदेन धूमादित्यत्र धूकारमकार वतकारादयः[84] हेतुपदेनेत्येवं यथायथं प्रतिपाद्यन्ते। तत्र तस्मात् वह्निमानित्यत्र नकारे न्यायावयवत्वम्। निगमनत्वञ्च पर्वतो वह्निमानित्यत्र पकारे रकारे[85] च प्रतिज्ञात्वमवयवत्वं न्यायत्वञ्च न्यायादिपदप्रवृत्तिनिमित्तस्य पूर्वोत्तरत्वमध्यत्वस्वरूपानुपूर्वीविशेषस्य **प्रत्येकवर्णेऽप्येव** विश्रान्तेः तथाचैकत्र[86] वर्णे न्यायपदं प्रतिज्ञादिपदञ्च प्रवर्तते तत्र न्यायपदप्रवृत्तिनिमित्ता-

नामानुपूर्वीणामुपलक्षणविधया परिचयार्थोऽयमारम्भः। अथवा तावद् वर्णवृत्तिरन्यतमत्वादिरनुगतो धर्मो न्यायादिपदप्रवृत्तिनिमित्तमात्रैव[87] वाक्ये न्यायपदेन मानार्थं किन्तु भिन्न एव वाक्ये तथाच तावदन्यतमत्वानां परिचायकोऽयमुद्यमः। तथाच प्रथमकल्पे प्रतिज्ञादिपञ्चकसमुदायत्वात्मिकाया उचितानुपूर्वी तदवद्वाक्यं न्याय इत्यर्थः। उचितत्वं कथाघटकवर्णवृत्तित्वम्। जायमानाभास इति कण्टकोद्धारवाक्यानुपूर्व्यपि कथाघटकवर्णवृत्तिरिति तद्व्युदासाय प्रतिज्ञादिपञ्चकसमुदायात्मकत्वमानुपूर्वीविशेषणम्। प्रतिज्ञादिपञ्चकान्यावृत्तिरिति तदर्थः प्रतिज्ञापञ्चकान्यावृत्तिकथारम्भकवर्णवृत्तिर्या आनुपूर्वी सा प्रतिज्ञादिस्वरूपापि[88] सम्भवति तद्व्यावृत्तये वाक्यत्वमुपात्तम्। यावन्तः प्रतिज्ञात्वादिविशिष्टवर्णास्तद्वृत्तिजातयो वा तद्घटितत्व[89]स्वरूपं लक्षणं तथानुपूर्वी विशेषणम्। वाक्यपदेन प्रतिज्ञात्वाद्यानुपूर्वीपञ्चकघटितत्वमवधीयत इति तत्त्वम्। एवं सति न्यायकण्टकोद्धारोभयघटितानुपूर्वी वारणाय प्रतिज्ञाद्यानुपूर्वीपञ्चकानधिकरणवर्णाघटितपरम्। प्रतिज्ञादिपञ्चकसमुदायपदम्। उचितपदन्तु पर्वतो वह्निमान् गुणात् यो यः पृथिवीत्ववान्न स द्रव्यवान् रूपव्याप्यगन्धवानयं तस्मात् सत्तावानित्यादिविभिन्नपक्षकसाध्यहेतुके न व्युत्क्रमोक्ते न वा प्रतिज्ञादिपञ्चकेन घटितायाः वर्ततो वह्निसामग्रीमान् तस्मादित्यादिसम्प्रदायविरूद्धायाः भिन्नपुरूषोच्च[90]रितक्रमिकवर्णसमूहवृत्तेः सिद्धसाधनस्थलीयन्यायाभासवृत्तेश्चा[91]नुपूर्व्या व्युदासाय असाधकतासाधकन्याय न्यायपदं नानार्थं तत्र समयबन्धवशादवयवतुष्टय घटितायास्तत्पञ्चकघटितायाश्चानुपूर्व्या न्यायपद- प्रवृत्तिनिमितत्वात्। न हीदं न्यायस्य लक्षणमिति भ्रमितव्यं भवतु वा न्यायस्वरूपवर्णानां लक्षणपरमिदं वचनं तथापि[92] असाधकतासाधकन्यायोऽपि पञ्चावयवक एव हेत्वाभासात्मकहेतोरसाधकताव्याप्यत्वस्योभयवादिसिद्धत्वेऽपि वादिना कथासमयवशादुदाहरणमप्रयोज्यमिति भट्टाचार्याणामभिप्रायः एवञ्च प्रतिज्ञाद्यानुपूर्वीपञ्चकघटिताया[93] प्रतिज्ञाद्यानुपूर्वीपञ्चकानधिकरणवर्णाघटिता कथा घटकवर्णवृत्तिरानुपूर्वीतद्वान् वर्णो न्याय इति निगर्वः। द्वितीयकल्पे तु उचितानुपूर्वीकाः कथाघटकाः प्रतिज्ञात्वादीनां पञ्चानां प्रत्येकमधिकरणं ये वर्णास्तेषां समुदायोऽन्यतमो वा न्याय इत्यर्थः।

भिन्नसाध्यहेतुकादिन्यायाभासवारणाय कथाघटका इति कण्टकोद्धारवारणाय प्रतिज्ञादिपञ्चकेति तावद्वर्णानामनुगमाय समुदाय इति।

ननु वक्ष्यमाणन्यायावयवकत्वगर्भप्रतिज्ञात्वादिप्रवेशे न्यायत्व-प्रतिज्ञात्वयोरन्योन्याश्रय इत्यत आह प्रतिज्ञात्वादिकमिति यादृशानुपूर्वी-विशेषावच्छेदेन प्रामाणिकानां प्रतिज्ञादिव्यवहारः तादृशानुपूर्वी पञ्च घटितत्वादिकमेव प्रवेशनीयमिति भावः।

ननु तथा[94] चायं नाभास इति कण्टकोद्धारवाक्यमादाय न्याय[95]-घटितानुपूर्वीकथाघटकमात्रवृत्तिः प्रतिज्ञाद्यानुपूर्वीमात्रघटिता चेति तन्निमित्त-कन्यायपदप्रवृत्तिप्रसङ्गः अयं नाभास इत्यानुपूर्व्या अपि प्रतिज्ञादिव्यवहार-प्रयोजकत्वादत आह साध्यादीति तथा च यादृशानुपूर्वीविशेषावच्छेदेन वह्निपर्वतधूमवत्साध्यपक्षहेतुकप्रतिज्ञादिव्यवहारस्तादृशानुपूर्व्यनधिकरणवर्णाघटि[96]-तत्वप्रवेशनीयम् अयं नाभास इत्यानुपूर्वी विशेषावच्छेदेनाभासत्वाभावसाध्यक-[97]प्रतिज्ञाव्यवहारसत्त्वेऽपि वह्न्यादिसाध्यकप्रतिज्ञाव्यवहाराभावात् तद्घटितानुपूर्वी न्यायपदप्रवृत्तिनिमित्तमिति भावः।

नन्वेवं हेतुसाध्यपक्षभेदेन न्यायपदप्रवृत्तिनिमित्तभेदात् न्यायपदं नानार्थकं स्यादित्याशङ्क्य तदिष्टमेवेत्याह व्याप्त्यादेरिति व्याप्तिपदादेः न्याया-देर्न्यायपदादेरननुगमः, अननुगतप्रवृत्तिनिमित्तकत्वम् उपलक्षणमिदम् एक-साध्यहेतुकपक्षकन्याये[98] आनुपूर्वीभेदात् न्यायपदप्रवृत्तिर्भिद्यत एव न्यायपदेन हि गिरिरग्निमानित्यादिपर्वतो वह्निमानित्यादि शैलो हुताशनीत्यादिवाक्यानि तत्तदानुपूर्वीविशेषविशिष्टानि प्रत्याय्यते।

ननु सकलानुपूर्वीसाधारणकोऽथानुगतोऽनतिप्रसक्तो धर्मो विद्यते विद्यमानोऽपि न न्यायपदजन्यप्रतीतीयथामवतरतीति पदवाक्यरत्नाकरे प्रपञ्चितमस्माभिः।

गौडास्तु उचितानुपूर्वीकेति औचित्यं व्युत्क्रमोक्तप्रतिज्ञादिपञ्चका-वृत्तित्वम् आनुपूर्वीवर्णानां वाक्यानां वा पौर्वापर्यं व्युत्क्रमोक्तप्रतिज्ञादिपञ्चकभिन्नेति निर्गलितार्थः। तावन्मात्रं घटमानयेति[99] वाक्येऽपि गतमतः प्रतिज्ञादीति न्यायावयववारणाय पञ्चकेति समुदायपदं तु तादृशपञ्चकत्वपर्याप्त्य-

प्रतिज्ञात्वादिकं पुनरुदासीनवाक्यवारकन्यायान्तर्गतत्व-शून्यमेवाऽत्रोपादेयमिति नान्योन्याश्रयः। साध्यादिभेदनियंत्रिताश्च प्रतिज्ञादयो वाच्या इति विभिन्नसाध्यादिपक्षकप्रतिज्ञादिसमुदाये

धिकरणताया न्यायपदप्रवृत्तिनिमितत्त्वमेव तदितरभेदसाधनत्वस्य वा लाभाय तथाच व्युत्क्रमोक्तप्रतिज्ञादिपञ्चकं भिन्नं यत् प्रतिज्ञादितत्पर्याप्तपञ्चकत्वं न्यायत्वमिति समुदायार्थः शून्यमिति[100] यादृशयादृशानुपूर्वीविशेषावच्छेदेन प्रतिज्ञादिव्यवहारस्तावन्मात्रमित्यर्थः। नान्योन्याश्रय इत्युपलक्षणं न्यायान्तर्गतत्व-गर्भप्रतिज्ञात्वादेः प्रवेशे व्युत्क्रमोक्तप्रतिज्ञादेः न्यायान्तर्गतत्वविरहात् तत्समु[101]-दायातिव्याप्तिविरहादुचितानुपूर्वीकपदं व्यर्थमपि भवतीति ध्ययम्। भिन्नपक्ष[102]-साध्यकप्रतिज्ञादिसमुदायेऽतिव्याप्तेराह साध्यादीति तथाच यादृशयादृशानु-पूर्व्यवच्छेदेन प्रामाणिकानां तत्पक्षसाध्यहेतुकप्रतिज्ञादिव्यवहारस्तादृशान्यत-मानुपूर्वीकत्वमत्र प्रतिज्ञात्वादिकं निर्वाच्यम्। पर्वतः प्रभावान् वह्नेः यो यो **दहवान्** स द्युतिमान् रूचिव्याप्यहुताशनवान् गिरिस्तस्मात् छविमान्[103] इत्यादिभिन्नपर्यायोक्यप्रतिज्ञादिसमुदायो न्यायत्वेन[104] नेष्ट इति भावः। नन्वेवमुचितानुपूर्वीकवह्निसाध्यकपर्वतपक्षकधूमहेतुकप्रतिज्ञादिपञ्चकसमुदायत्वस्य न्यायलक्षणत्वे साध्यपक्षहेत्वन्तरकन्यायेषु[105] अव्याप्तेरत आह साध्यादेरिति तथाच यादृशसमुदायत्वावच्छेदेन पर्वतपक्षकवह्निसाध्यकधूमलिङ्गकानु-मितितात्पर्येण प्रयुज्यमानत्वं प्रामाणिकानां[106] तादृशन्यायव्यवहारोऽपि विषयत्वं वा तादृशसमुदायत्वमेव पक्षतावच्छेदकमिति लक्षणाननुगमो न दोष इति व्याचक्षते। तच्चिन्त्यम्। न त्वनुमितिचरमकारणस्य लिङ्गपरामर्शस्य[107] प्रयोजकत्वं वाक्यार्थविशेषत्वोपलक्षकम्[108] अत एव प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यत इत्यनेन तदुपपादितम्। तादृशवाक्यार्थबोधजनकवाक्यत्वं यथाश्रुतमूलार्थः कथं परित्यक्त[109] इति चेत् स वाक्यार्थबोधः किमेकमुख्य-विशेष्यताको नानामुख्यविशेष्यताको वा। आद्ये प्रतिज्ञानिगमनयोरिति निगमनपदमुपनयस्याप्युपलक्षकं तथाच[110] वह्निमत्पर्वतः प्रतिज्ञार्थ उपनयार्थो विशिष्टधूमवत्पर्वतः तयोर्न भेदेनान्वयः प्रातिपदिकार्थ[111]योर्भेदेनान्वयस्या-व्युत्पन्नत्वात् नार्थभेदेन निरवच्छिन्नपर्वतत्वप्रकारतानिरूपित विशेष्यता-

नातिव्याप्तिः। व्याप्त्यादेरिव साध्यादेरप्यननुगमादननुगगो न्यायादेरपीष्यत एव।

एतेन प्रतिज्ञानिगमनयोरुदाहरणावयवान्तरयोश्च न संभूयैकार्थ-प्रतिपादकत्वम्, प्रागेव तु पञ्चानामवयवानाम्,

प्रतियोगिन्यास्तादात्म्यसंसर्गावच्छिन्नाया[112] प्रकारताया निरवच्छिन्नावच्छेदकतासंसर्गेण शाब्दबोधे पर्वतत्वस्य तादात्म्येन प्रतिबन्धकत्वात्। अन्यथा पर्वतः पर्वत इत्यादिवाक्यादपि शाब्दबोधप्रसङ्गात् अथ प्रतिज्ञोपनयाभ्यां पर्वतो वह्निमान् वह्निव्याप्यधूमवान् इति [115]पर्वतत्वमेकदैवोल्लिखन्ननुभवे जन्यताम् एकत्व-वाचकयोः सुबाऽख्यातयोः संभेदेरुप्येकत्रैकत्वावगाहनवत् पर्वतवाचकाभ्यामिदं पर्वतपदाभ्यां पर्वतस्यापि[116] तथैवावगाहनसम्भवात् भवतु वा प्रकृते पर्वतत्वनिष्ठ-प्रकारतावच्छेदकतासामानाधिकरण्येन धूमत्वावच्छिन्ना[117] न तु निरवच्छिन्ना तद्धर्मविशिष्टविशेषणवत्ता निर्णयस्य[118] सामानाधिकरण्यसम्बन्धेन तद्धर्मावच्छिन्न तद्धर्मनिष्ठावच्छेदकताक विशिष्टवैशिष्ट[119]यबोधजनकत्वस्वाभाव्यात् संसर्गभेदेन विशिष्टवैशिष्ट्यबोधे[120] विशेषणत्वावच्छेदकप्रकारकज्ञानकारणताभेदात्। भवतु वा पर्वतत्वावच्छिन्न विशेष्यता निरूपित तादात्म्यसम्बन्धावच्छिन्न[121] प्रकारता निरूपकं यदवच्छेदकतावदन्य[121/2] तदवच्छेदकत्वं तदेव पर्वतत्वभेदजन्यता-वच्छेदकः सम्बन्धः अवच्छेदकतावत्त्वञ्च स्वनिरूपकत्वस्वनिरूपक[129]-स्वनिरूपकप्रकारता निरूपकत्वान्यतरसंसर्गेण। एवञ्च न स्त्वविशिष्टं तथाच प्रतिज्ञार्थविशेष्यकोपनयार्थप्रकारकवाक्यार्थबोधाभ्युपगमेऽपि पर्वतत्वनिष्ठ प्रकारतावच्छेदकता स्वनिरूपकप्रकारता निरूपकत्वसंसर्गेण धूमनिष्ठावच्छेद-कतावती भवतीति पर्वतत्वेन न प्रतिबध्यते एवं हेतु सहकृतप्रतिज्ञाया धूमज्ञान[123]ज्ञाप्यवह्निमत् पर्वत तदुपनयसहकृतेन[124] निगमनेन वह्निव्याप्यधूमवान् व्याप्तिपक्षधर्मताविशिष्टधूमज्ञानज्ञाप्यवह्निमान् पर्वत उपस्थापितस्त-योस्तादाम्येनान्वयोऽपि सम्भवतीति[125]। दण्डवान् रक्तदण्डवानिति बोधस्य खयमेवाभ्युपेष्यमाणत्वादत[126] आह **उदाहरणावयवान्तरयोश्चेति**। इदमुपलक्षणम् उदाहरणघटकवाक्यार्थात्रयस्यापि परस्परमनन्वयो द्रष्टव्यः। यद्यपि धूमवत् यत्पदार्थयोः[127] धूमव्यापकवह्निमन्महानससदृशं धूमवत् तच्च तादात्म्येन

परन्तु प्रतिज्ञाहेत्वोः कथञ्चिदुपनयनिगमनयोः।

एकवाक्यताव्यवहारस्तु विशिष्टैकार्थप्रतिपत्तिपरतामात्रेण। तादृशपरामर्शप्रयोजकत्वं च यदि तद्विषयतत्तत्पदार्थोपस्थापकतया तदा उदाहरणोपनययोरेव तत्पर्यवस्यति।

अथ तदानुकूल्यमात्रेण। तदा को वह्निमान्, कुतो धूमत्त्वादित्यादेरपि

प्रतिज्ञार्थेऽन्वेतुमर्हत्येव। चैत्रो जानाति पाककृतेः यो यः पचति स जानाति यथा मैत्रः ज्ञानाश्रयत्वव्याप्यपाककृतिमानयं तस्माज्जानाति इति न्यायादाख्यातार्थ-विशिष्टमुद्दिश्येतरपदार्थस्यान्वयासम्भवेऽपि युगपदुपस्थितानां सर्वपदार्थानां **खलेकपोतन्यायात्** पाककृतिव्याप्यज्ञानाश्रयत्ववान् पाककृतिमदभिन्नो मैत्रसदृशेन पाककृतिव्याप्यज्ञानाश्रयत्ववान् पाककृतिमता चाभिन्नो ज्ञानाश्रयत्वव्याप्य-पाककृतिमता व्याप्तिपक्षधर्मताविशिष्टपाककृतिव्याप्यज्ञानाश्रयता केन चैत्रेणाभिन्नश्चैत्र इत्यन्वयबोधः। यथा मैत्र इत्यादौ यथाशब्दार्थे उपमानस्य विशेषणत्वेनैवान्वयस्य व्युत्पन्नत्वात् इव शब्दार्थवत् तदुक्तं काव्यप्रकाशे यथेव वा शब्दाः यत्पराः तस्यैवोपमानताप्रतीतिरिति। तथापि यथा महानसमिति वाक्ये यथा पदपरामृष्टधूमतद्व्यापकवह्निमत्तया महानसं बोधयति। न तु यथापदार्थविशेषणतया तदवाक्यार्थस्य धूमादिमन्महानसस्य भेदेनाभेदेन वा नान्यत्रान्वयो भवितुमर्हतीति नैकमुख्यविशेष्यताकबोधजनको[128] न्यायः। अन्यथा यथा महानसं तथा पर्वत इत्यादौ महानसवृत्तिः धूमवान् पर्वत इति यथा पदेनैव[129] बोधिते तथा यदानर्थक्यप्रसङ्गात्। सिद्धान्ते तु यथा शब्दोपात्तो धूमादिरेव तथा शब्देन परामृश्यत इति धूमवन्महानसं धूमवान् पर्वत इत्यन्वयबोधः। सूपपदः यत्तदोरेक**धर्मावली** तु परामर्शकत्वस्य वाक्यद्वयानुप्रवेशे न अनित्याभिसम्बन्धस्य च व्युत्पत्तिसिद्धत्वात्। यथाशब्दस्य यच्छब्दविकारत्वात्। उदाहरणवाक्ये तु न तथा शब्दानुप्रवेशः, यच्छब्दस्योत्तरवाक्यगतत्वेन पूर्ववाक्ये तच्छब्दानुपादानस्य प्रकाशकारादिभिर्व्यवस्थापितत्वात्।

न चैवं यथेव वा **शब्दा यत्परा**स्तस्यैवोपमानताप्रतीतिरिति प्रकाश-विरोधः। तत्रोपमानत्वं हि न साधारणधर्मविशेषणत्वस्वरूपं तत्तुल्यमस्येत्यादौ

तथात्वमित्यादिकं समाहितम्।

अवयवत्वन्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम्।

प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाऽघटितत्वं वा वक्तव्यम्।

साधर्म्यविशेषेऽप्युपमान[130]तावभासात् किन्तु प्रकृष्टगुणत्वादि: तच्च व्यञ्जना-सहकृतयाभिधया इवादिशब्दै: प्रतिपाद्यत इत्यलंकारिकाणां दर्शन एव शोभते। यदि च यथामहानसं तथा पर्वत इत्यादावपि यदा शब्दोपत्ति:[131] धूमादौ महानसं विशेषणमेव तथाच यो धर्मो महानसवृत्ति: स धर्म: पर्वतवृत्तिरित्यन्वयबोध: यत्र चोत्तरवाक्यगतो यथा शब्द: स उपमानविशेष्यगतं[132] स्वार्थं पूर्ववाक्यार्थगतो प्रमेयविशेषणतयैव भासयति इव शब्दवत्। अत एव बाहुना प्रहरति वज्रेण[133] यथा वज्रेणेव चेत्यादौ तुल्यमेवोपमानोपमेयपदयो: समानविभक्तिकत्वं श्रूयत इति मतमाश्रीयते यदि वा यथा शब्दार्थोपमानयोर्विशेष्यविशेषणाभावे कामाचार इत्यभ्युपेयते। तथापि[134] ह्रदो निर्धूमो निर्वह्नित्वात् यो यो धूमवान् स वह्निमान् यथा पर्वत इत्यत्र व्यतिरेक्युदाहरणस्य न प्रतिज्ञावाक्यैकवाक्यत्वम्। किञ्च यत्तदोरेकधर्मावच्छिन्न[135] परामर्शिणोरेकधर्मावच्छिन्नपरामर्शिणोरेकमुख्यविशेष्यताक वाक्यार्थबुद्धिं प्रत्यसमर्थत्वात्[136]। यो धूमवान् स स वह्नि[137]मानित्यनयोरेकवाक्यत्वासंभव:। अन्यथायं प्रत्कान्नं भुंक्ष्व इत्यादेरपि अन्वयबोधप्रसंगात् येन योषितस्तमभिद्रुह्यतीत्यादौ चैत्र इत्यनुषक्तस्य द्वयोर्वाक्ययोरनुप्रवेशादाकांक्षा-समर्थनमित्याशय: एकविशेषे निषेधस्य विशेषान्तरे[139] अनुज्ञाफलकत्वात्। परन्त्विति कथञ्चिदुपनयस्थायं पदस्य निगमनेऽनुषंगाभावे विशिष्टैकार्थप्रति-पत्तिरनुमितिस्तत्परता तत्प्रयोजकत्वेन तात्पर्यम्।

ननु माभूदेकमुख्यविशेष्यताको बोध: मुख्यविशेष्यतापञ्चकविशिष्ट-वाक्यार्थबोधस्यानुमिति[140]जनकपरार्थपरामर्शस्य प्रयोजकत्वे नानानुगमाज्जन-कवाक्यत्वं न्यायलक्षणं सम्भवति इति द्वितीयकल्पे[141] स्यादित्यत आह तादृशेत्यादि परामर्शप्रयोजकत्वं[142] परामर्शविषयतेतराविषयकज्ञानत्वेन वा तद्विषयविषयकत्वमात्रेण वा विवक्षितमाद्ये यदीति तत्तत्पदार्थसार्थो

उभयं च प्रतिज्ञाहेतू-हेतूदाहरणे-उदाहरणोपनयौ-उपनयनिगमने इति विशिष्य वक्तव्यमिति।

प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकज्ञानपञ्चकान्यतमज्ञान-जनकवाक्यत्वमिति केचित्।

व्याप्तिपक्षधर्मते तदुपस्थापकतया उदाहरणं[143] दृष्टान्तविनाभूतम्-उदाहरणोपनययोस्तन्मात्रजनितवाक्यार्थबोधस्य। तथाच न्यायजनितो वाक्यार्थबोधो न तथेति[144] सम्भव इति भावः। द्वितीये त्वाह अथेति तदानुकूल्य-तद्विषयविषयकत्वं तथात्वम्। परामर्शविषयविषयकवाक्यार्थबोधप्रयोजकत्वम्। तथाचात्रैण्व वाक्येऽतिव्याप्तिरिति भावः। समाहितम् अनुमितिचरमेत्यादि-मूलस्योचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदाये तात्पर्योपवर्णनेन स्वयमवयवस्य[145] लक्षणमाह अवयवं त्वित्यादि तत्पक्षकतत्साध्यकतल्लिङ्गकन्यायावयवस्य लक्षणम्।

तादृश न्यायसामान्यपदविषयकप्रतीतिविषयस्तद्भिन्नं यत् प्रतिज्ञादि-व्यवहारनिमित्तसमुदायत्वं पर्याप्त्या तत्पञ्चकान्य[146]तमवत्त्वं पर्वतो वह्निमा-नित्युदासीनवाक्यवारणाय सत्यन्तम्। गिरिरग्निमानित्यादिन्यायस्य पर्वतो [147]वह्निमानित्यादिमुदायत्वाविषयकप्रतीतिविषयत्वेऽपि पर्वतपक्षक वह्निसाध्यक-धूमलिङ्गकन्यायसामान्यम्, न तथा समस्तन्यायपर्याप्तसमुदायत्वादेर्वारणाय प्रतिज्ञादीति पञ्चकवत्त्वं न **कुत्राप्य[148]न्यतमेति।**

ननु मतङ्गजो नील इत्यादिन्यायान्तर्गतस्य गजो नील इत्यादि[149]भाग-स्यान्यायान्तर्गतप्रतिज्ञाव्यवहारनिमित्तसमुदायत्ववत्त्वात् तत्रातिव्याप्तिः, अतो लक्षणान्तरमाह प्रतिज्ञाद्यघटकेति न्यायान्तर्गतत्वे सतीत्यत्रानुषंजनीयम्। अत्र तु तत्तन्यायाऽनुपूर्वीभेदात् अवयवलक्षणं भिद्यते। तथाच न्यायपर्याप्ततदानु-पूर्वीघटकत्वे सतीत्यर्थः। प्रतिज्ञाघटकत्वमपि तन्न्यायानुपूर्व्यन्तर्गतप्रतिज्ञाघट-कत्वमेव, घटकत्वन्तु तदभिन्नत्वे सति तद्विषयताव्यापकविषयताकत्वं तेन प्रतिज्ञात्वादेर्न प्रतिज्ञात्वघटकत्वं प्रतिज्ञादिहेत्व[150]न्तरभागेऽतिव्याप्तेराह उभयेति अत्र प्रथमघटकत्वं न भेदगर्भम् उभयपदार्थविशिष्य निर्वक्ति उभयञ्चेत्यादि।

अत्रेदमवसेयं प्रतिज्ञादिपञ्चकसमुदायत्वं यदि न्यायत्वं तदा द्व्यव[151]यवकं वाक्यं न्याय इति बौद्धैः सह विवादः कथं पदमादध्यात् न हि द्व्यवयवकं वाक्यं पञ्चावयवसमुदाय इति बौद्धा व्यपदिशन्ति। व्यावहतत्वादग्रे च प्रतिज्ञा साधनांगमित्यादिकाशंका कथमवतरेत्। साधनाङ्गत्वेन न्यायावयवत्वस्यैव तत्र निषेधात्।

न च प्रतिज्ञाप्रतिज्ञाद्य[152]न्यतमेत्याशंकितुं शक्यते। नापि न न्यायान्तर्गतेऽतिव्याघातात्, तथाच यत् सत् तत् क्षणिकं संश्च विवादाध्यासितम्, शब्दातिरित्युदाहरणोपनयमात्रात्मकं वाक्यं न्यायो न वेति विप्रतिपत्तिविषयन्यायत्वस्वरूपनिर्वचनप्रस्तावे किमनेन नैयायिकमात्राभिमतन्यायधर्मिनिर्वचनेन ततो यादृशानुपूर्वीकवाक्यप्रयोज्यवाक्यार्थबुद्धित्वेन परार्थपरामर्शप्रयोजकत्वं तादृशानुपूर्वीकवाक्यत्वं [153]सर्वदर्शनसाधारणं लक्षणमवश्यं निर्वाच्यम्, यस्य द्व्यवयवकवाक्यत्वावच्छेदेन विवादः। प्रतिज्ञा न साधनाङ्गमित्यादिका शंङ्का तु तादृशानुपूर्वीघटकत्वस्वरूपमवयवतदवयवसाधारणं न्यायान्तर्गतत्वमात्र मालम्बने मौलमवयवलक्षणं नैयायिक[154]परिभाषितावयवमात्र ालम्बने अत एव पञ्चधा तद्विभागोऽपि[155] संगच्छते। यदपि पञ्चभिरवयवैरेकैकवाक्यतया बोधो न सम्भवतीत्युपपादितम्। तदपि चिन्त्यम्। द्विधा[156] ह्येकवाक्यतापदैकवाक्यता वाक्यैकवाक्यता च तत्र पदैकवाक्यत्वं प्रतिज्ञाहेत्वोरुपनयनिगमनयोरेव न तूदाहरणेन कस्यापि तथापि वाक्यैवाक्यत्वं पञ्चानामवयवानां सम्भवत्येव। अत एव प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यत इति मूले। वाक्यैकवाक्यतैवोक्ता न तु पदैकवाक्यतावाक्ययोरेकवाक्यतार्थां[157] च न पदयोरिव समानविभक्तिकत्वं पष्ठयन्तत्वादितन्त्रं किन्तु संगतिमात्रमत एव मूले प्रत्वययवमेकवाक्यतायै संगतयः प्रदर्शिताः। अत एव दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेति प्रधानविधिना यागेन स्वर्गं भावयेदित्यवगतायां भावनायां कथमित्याकांक्षायामुपपादकत्वसंगत्या[158] प्रवृत्त इडो यजति[159] समिधो यजतीत्यादिविधाववगतस्य प्रयाजस्योपपाद्योपपादकभावेनान्वयः यथा संगत्या ययोर्वाक्ययोः पौर्वापर्येण प्रवृत्तिस्तदर्थयोस्तेनैव संसर्गेणान्वयोपगमात्। अत एव मलिनं ते वपुरिति सिद्धार्थे निर्दिष्टे किं तत इति साध्यत्वसंगत्याऽभिहिते सरसि स्नाया इति वाक्ये साध्यतयैव

वपुर्मालिन्यस्यान्वयः। अत एव त्वं पश्येत्युक्ते किमित्याकांक्षायामुक्ते मृगो धावतीति वाक्ये विषयितया मृगकर्तृकधावनस्य दर्शनेऽन्वयः। अत एव पश्य मृगो [160]धावतीत्यादावेकवाक्यताव्यवहारः। शब्दविद्यावतामत[161] एव तिङ[162]तिङिति सूत्रेण तिङ तात्परं तिङन्तं निहन्यत इत्यर्थकेनातिङ इति तिङन्तशब्दः पर्युदस्तः अन्यथा अग्निमीले [163]पुरोहितमित्यत्रेले शब्दे सुबन्तात्परे यथा निघातो नाम सर्वानुदात्तः स्वरस्तथा धावति पश्येत्यत्र पश्य शब्दस्यापि प्रसज्येत। तत्र च दर्शनधावनयोः परस्परमनन्वये सामर्थ्याभावादेव **निधात**स्वराप्रसक्तौ सौत्रमतिङ इति पदमनर्थकमापद्येत[164] इति क्रिययोरपि परस्परमन्वयो वाक्यैकवाक्यतयावश्यमभ्युपेतव्यः पदसम्बन्धिनो विधेः सामर्थ्यमात्रा[165]श्रितत्वेन पूर्वपदव्यपेक्षारहिते निघातादिविधिर्न प्रवर्तत इति तद्विदो मंत्रणीयास्तथा च प्रकृते प्रतिज्ञाहेत्वोः पदैकवाक्यतैव अत एव मूले साध्यनिर्देशानन्तरं कुत इत्याकांक्षायां साधनत्वाभिव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचितमित्यनेन विभक्त्यादिनिर्देशात् पदैक वाक्यतैव[168] सूच्यते वाक्यैकवाक्यतया साधनत्वेनान्वये मलिनं वपुः स्नाया इत्यादौ साधन[167]त्वाभिव्यञ्जकविभक्तेरनुपयोगात्। हेतुता च धूमस्य गमकत्वे प्रदर्शिते कथमस्य गमकत्वमित्याकांक्षायामुपपादकत्वसंगत्याभिहिते उदाहरणे तदर्थव्याप्तेरूपपाद्योपपादकभावसंसर्गेण गमकत्वेऽ[168]न्वयः अत एव हेतावुक्ते कथमस्य गमकत्वमित्याकांक्षायामित्यादिमूलेन हेतुदाहरणयोरूपोद्धतः सूचयिष्य[169] उदाहरणावयववाक्ययोरपि वाक्यैकवाक्यतयान्वयादेव धूमवान् धूमव्यापकवह्निमानित्यर्थलाभात् यत्तच्छब्दयोरूभयोरपि महानसत्वेन महानसस्य पर्वतत्वेन पर्वतादेश्च केवलं बोधकतया तच्छब्देन धूमवतोऽनुपस्थापनादतो यो यो[170] धूमवानिति वाक्येन महानसं धूमवत् पर्वतो धूमवानित्यादिकमुपस्थितं स वह्निमानित्यनेनापि महानसं वह्निमत् पर्वतो वह्निमानित्युपस्थितं ततो यत्तदर्थपरीहारेण वाक्यैकवाक्यतयैव धूमवान् धूमव्यापकवह्निमानित्यन्वयबोधः यच्छब्दद्विवचनार्थव्यापकतायास्तत्रैव बोधेऽनुप्रवेशात्। अत एव यच्छब्दयोगोऽप्युद्देश्य नाव्यञ्जकमध्ये परिगणितः तत्पदोपस्थितत्वं[171] प्राथम्यं वा नियामकमित्येवाभ्यधात्। तस्मात् धूमवदुद्देश्यक महावाक्यार्थबोधे[172] यच्छब्दघटितवाक्यजन्या धूमविधेयकोपस्थितिः कारणमिति वाक्यैकवाक्यतयोद्देश्यविधेयभावप्रायकमित्यवसीयते दृष्टान्तार्थोऽपि वह्निमति

विशेषणतयैवान्वेति एव उदाहरणार्थ उपनयार्थश्च द्वावप्युपपाद्योपपादकभावने हेत्वर्थगमकत्वेऽन्वितः। अत एव व्याप्तिपक्षध[173]र्मतयोरूभयोरप्युपदर्शनप्राप्तौ व्याप्तेः प्राथम्यादित्यादिना मूले हेतूपनयोरप्युपपादकत्वं संगतिः सूचयिष्यते, यदि पुनरूदाहरणार्थोपनयार्थयोरन्वयाभिनिवेशः तदा भवतु व्याप्तिरित्यादिना मूलेन सहकारित्वेनान्वयः सूचयिष्यते। उपनयनिगमनयोस्तु पदैकवाक्यतैव[174] इति वाक्यैकवाक्यतया पञ्चानामवयवानामेकविशिष्टार्थबोधकत्वं मूलोक्तं नानुपपन्नमिति दिक्।।

साम्प्रदायिकानामेव सकलदर्शनसाधारणमवयवलक्षणं व्याचक्षे[175] कारणमत आह **प्रतिज्ञादिभिः** पञ्चभिः प्रतिपाद्या वह्निमत्पर्वतधूमीयहेतुत्वादयो विशिष्टार्थास्तेषां ज्ञानपञ्चकं विषयतापञ्चकं तेषामन्यतमेन रूपेणावच्छिन्नं शाब्दबोधं प्रति जनकवाक्यत्वमित्यर्थः। एतन्मते पर्वतो वह्निमानित्यानु-पूर्वीज्ञानत्वावच्छिन्नकारणता निरूपिताया वह्निमत्पर्वतावगाहिशाब्दत्वावच्छिन्ना जन्यताया च धूमादित्यानुपूर्वीज्ञानत्वावच्छिन्नकारणता निरूपिता धूमीय[176]-हेतुतान्वयबोधत्वावच्छिन्ना कार्यतायाश्चापरास्तिस्रः तथावि[177]धकार्यतास्तादृश-पञ्चकविशिष्टस्य न्यायमहानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकस्य शाब्दबोधस्य[178] महानुपूर्वीज्ञातस्य वा शाब्दबोधद्वारा कारणत्वमेकं पर्वतो वह्निमानित्यानुपूर्वी ज्ञानत्वावच्छिन्न कारणता निरूपित वह्निम[179]त्पर्वत विषयताकशाब्दबोधत्वावच्छिन्न कार्यताविशिष्टशाब्दबोधादेः पञ्चकार्यसहभावेन कारणं तेषामैक्यमर्थसिद्धं तथाच यादृशानुपूर्वी ज्ञानत्वावच्छिन्नकारणता निरूपित कार्यतावत्त्वेन परामर्शजनकत्वं तादृशानुपूर्वीमत्त्वे सति न्यायघटकत्वमित्यवयवत्वमित्यक्षर-तात्पर्याभ्यामर्थः केचिदिति अवयवान्तरस्य तथात्वसम्भवेऽपि उदाहरणवाक्यार्थ-[180]स्यैक्याभावेन उदाहरणवाक्यानुपूर्वीज्ञानत्वेन तत्तत्कार[181]णत्वासम्भवादव्याप्तिः। प्रतिज्ञाहेतुभ्यामुपनयनिगमनाभ्यां संभूयैकार्थबोधने तद्विषयत्वेनैव परामर्शजनने[182] हेत्वंते उपनयादौ च भागेऽतिव्याप्तिर्मतं गजो नील इत्यत्र च गजो नील इति भागेऽतिव्याप्तितादवस्थ्यमित्यादिरस्वरसः सूचितः।

मूले ज्ञानविशेषेति निर्वचनान्यथानुपपत्या न जातिसिद्धिस्तद-भिव्यञ्जकधर्मान्तरावश्यकत्वे तत एवानुगतव्यवहारोपपत्तेरिति भावः। तदे वोत्तंभयति दीधितौ तथाचेति तादृशजातौ न्यायप्रतिज्ञादिप्रयोज्यजातौ मूलेऽन्यथेति

यदि निर्वचनान्यथानुपपत्या तल्लाघवेन वा जातिसिद्धिस्वीकार[183] आवश्यक: तदा पृथिवीजलोभयनिर्वचनादेकाज्लतेजोलक्षणनिर्वचनादपराजाति: सिध्येदिति जातिसंकरप्रसंग इत्यर्थ:। परार्थानुमितिपरामर्शत्वे तु न निर्वचनलाघवात् सिद्धे किन्तु कारणवैजात्यादेवेति भाव:। दीधितिकारस्तु प्रतिज्ञादिप्रयोज्यजातीनां सङ्करप्रसङ्गपरतया मूलं योजयति बाधकमित्यादिना सुतरामिति अननुगतजाते: निर्वचनस्यानु[184]पपादकत्वादिति भाव: मिश्रमतमाह केचित्विति उदक्षरत्वमस्वरस: यथाश्रुतमनूद्य मूलेदूषितमपि सूत्रं स्वयं परिष्कुरूते **साध्येत्यादिविशिष्ट** इति। तदुद्देश्यकेत्यर्थ: विशिष्टेति। तद्विधेयकेत्यर्थ:। तथाच पक्षतावच्छेदकावच्छिन्नोद्देश्यतानिरूपिताया साध्यतावच्छेदक-धर्मसंसर्गोभयावच्छिन्ना विधेयता तद्वद्वाक्यार्थबुद्धिजनकत्वे सति न्यायाव-यवत्वमर्थ:। पर्वतो वह्निमानिति प्रतिज्ञावाक्याच्च पर्वतमुद्दिश्य वह्निर्विधीयते न तु वह्निमान् अन्यद्विप्रकारविशेष्यत्वादि अन्यदेव च विधेयोद्देश्यत्वम् अत एव गुणानां गुणत्वमिति वाक्ये गुणमुद्दिश्य गुणत्वं विधीयत इति **वर्द्धमानोपाध्याया:**। मत्वर्थस्तु[185] पदार्थतया प्रकारभूतो विधेयतावच्छेदकसंसर्गी-[186]भूतापि भासते। अत एव विषयतया ज्ञाने साध्ये समवायेन हेतौ तस्मिन्नुपनये-[187]नातिव्याप्तिरूपनये ज्ञानविधेयताया: [188]साध्यतावच्छेदकसम्बन्धानवच्छेद्यत्वात् सिसाधयिषया च न न्यायप्रयोग:। येन वह्निसाध्यकतद्धेतुकन्यायोपनयेऽति-व्याप्ति: स्यात् पक्षतावच्छेदकावच्छेदेन तत्सामानाधिकरण्येन च न्यायो [189]द्वेधा। तल्लक्षणमपि द्विविधम्। तत्र प्रथमे पक्षतावच्छेदेनतादृशसाध्यकत्वमेव प्रवेशनीयमत एव पर्वतत्वावच्छेदेन[190] साध्यसिद्धेरूद्देश्यतायां तत्सा-मानाधिकरण्येन पर्वतस्य दृष्टान्तत्वाभ्युपगमेऽपि नोदाहरणेऽतिव्याप्ति:। पक्षतावच्छेदकविशिष्टे इत्यस्य फलमाह उदाहरणाच्चेति साध्यतावच्छेदकेत्यादे: फलमाह उपनयाच्चेति।

वस्तुत: प्रतिज्ञासहकारेणावयवान्तरस्यापि तादृशबोधजनकत्वात् साध्यतावच्छेदकावच्छिन्नविधेयता निरूपित पक्षतावच्छेदकावच्छिन्नोद्दश्यता[191]-शालिशाब्दबोधत्वावच्छिन्नकार्यता निरूपित कारणताया[192] यज्ज्ञानत्वेनावच्छिद्यते तादृशावयवतावच्छेदकानुपूर्वीमत्त्वं सूत्रार्थोऽवश्यमभ्युपेतव्य इति साध्यता-वच्छेदकपक्षतावच्छेदकयोरप्रवेशेऽसम्भव एव स्यादतो द्वयमुपात्तमित्यवधेयं

मूले किन्तूद्देश्येति अत्रैवं विधानुमिताविथं प्रतिज्ञेति प्रामाणिकव्यवहारगोचरवाक्यत्वं लक्ष्यतावच्छेदकम् अथवा तादृशवाक्यार्थनिर्वचनपरमिदं तत्राप्युद्देश्या तु मिति पदद्वयं कण्ठोक्ता तु वाद इतरत्सप्तम्यर्थनिर्वचनं उद्देश्यानुमितिः पर्वतो वह्निमानित्यादिः परार्थानुमितिस्तद्धेतुर्यो लिङ्गपरामर्शः तस्य प्रयोजकं जनकं यद्वाक्यार्थजानं तज्जनकत्वे तदव्यवहितपूर्ववर्त्तिज्ञानविषयानुपूर्वीमत्त्वे सतीत्यर्थः। यादृशानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकवाक्यार्थज्ञानत्वेन तादृशपरामर्शजनकत्वं तादृशानुपूर्वीमत्त्वे सतीति यावत् आनुपूर्वी तु तादृशोत्तरत्वरूपा चरमवर्णमात्रे तादृशपूर्वत्वस्वरूपा प्रथमवर्णमात्रे कतिपयवर्णपूर्वोत्तरत्व[193]द्वयघटितमध्यमत्वरूपा [194]मध्यवर्णमात्रे विश्राम्यतीति सर्वेऽपि न्यायघटका वर्णा- स्तादृशानुपूर्वीमत्त्वं तेन न्यायत्वे[195] सतीति फलितार्थः। न्यायत्वं समुदाये व्यासक्तमित्येकदेशिनामभिमानमात्रम् उद्देश्यपदसमभिव्याहाराच्च। प्रकृतपक्षसाध्यकन्यायत्वं लभ्यते तेन पर्वतवह्निपक्षसाध्यकप्रतिज्ञालक्षणे द्रव्यं वह्निमत् वह्निमत्पर्वतादित्यत्र हेत्ववयवस्य वह्निमत् पर्वतभागे नातिव्याप्तिस्तस्यापि मध्यमत्व[196]स्वरूपानुपूर्वीद्रव्यपक्षकवह्निसाध्यकन्यायानुपूर्वीमत्त्वात्। न वा हेतुत्वं धूमीयमिति प्रतिज्ञालक्षणे हेतुत्वपक्षकन्यायान्तरीये धूमादित्यवयवेऽतिव्याप्तिस्तस्य प्रकृतसाध्यकन्यायत्वविरहात्। एवमपि वह्निसाध्यक पर्वतपक्षकप्रतिज्ञालक्षणे धराधरो वह्निमानिति प्रतिज्ञैकदेशे धरो वह्निमानिति[197] धरा पदव्यवकलितानुपूर्व्याः प्रतिज्ञाव्यवहारनिमित्तत्वं स्यादिति वाक्यत्वमुपात्तं तदर्थस्तु यादृशानुपूर्वी ज्ञानत्वेनानुमितिसमानविषयकवाक्यार्थबोधजनकत्वं तादृशानुपूर्व्यनंतर्गतत्वं फलत आनुपूर्वीविशेषणम् एतावन्मात्रमपि हेत्वाद्यवयवेऽतिव्याप्तमत उद्देश्यानुमित्यन्यूनेति तथाच[198] पर्वतो वह्निमानित्येतावन्मात्रविषयताको योऽन्वयबोधस्तज्जनकतावच्छेदकानुपूर्वीमत्त्वमित्यर्थः एवं पर्वतपक्षकवह्निसाध्यकन्यायत्वे सति पर्वतो वह्निमानित्यन्वयबोधत्वा[199]वच्छिन्न कार्यता निरूपिता कारणतावच्छेदकानुपूर्व्यनंतर्गताया तादृशान्वयबुद्धित्वावच्छिन्नकार्यता निरूपित कारणतावच्छेदकानुपूर्वी सा पर्वतपक्षक वह्निसाध्यकप्रतिज्ञाव्यवहारनिमित्तमिति समुदायार्थः। अत्र पर्वतत्वावच्छिन्नोद्देश्यतानिरूपित केवलवह्नित्वावच्छिन्न विधेयताकान्व[200]यबोधत्वस्य कार्यतावच्छेदकत्वलाभाय अन्यूनानतिरिक्तेति

अन्यथा धूमवान् वह्निमानित्यर्थकोदाहरणैकदेशे स वह्निमानित्यत्र हेत्वंतभागेऽयमादिनिगमनान्तभागेऽतिव्याप्तिः[201] स्यादिति ध्येयम्।

दीधितौ पौर्वापर्यान्न वर्णवृत्तिसमुदायत्वविशेषः प्रतिज्ञात्वम्। स च पर्याप्त्या स्वाश्रये प्रतिज्ञाव्यवहारं जनयति तत्परिचायकमिदं लक्षणमिति वासनाप्रकृतन्यायेति पर्याप्तिभिन्ने नैकसमुदायत्ववानिति प्रतीतिसाक्षिकेण संबन्धेन न्यायपर्याप्तसमुदायत्ववत्त्वे सति यादृशसमुदायत्वावच्छेदेनावयवत्व-व्यवहारः तत्पर्याप्त्यधिकरणत्वे सतीत्यर्थकं सत्यन्तमित्यर्थः। मतं गजो नील इत्यत्र नील इति भागवारणायावयवव्यवहारप्रयोजकसमुदायत्वान्यून-वृत्तित्वमपि मुख्यसमुदाये विशेषणम्। अथवा यादृशसमुदायत्वावच्छेदेन प्रकृत न्यायावयवत्वव्यवहारः तादृशसमुदायत्वे सतीत्येव सत्यंतार्थः। स्वोक्तस्य प्रकृतपदस्य मूलोक्त[202]स्योद्देश्यपदस्य प्रयोजनमेकोक्त्या वदितुंप्रकृतद्वयमित्यत्र वाग्वैचित्र्यसम्पादनाय[203] उद्देश्यपदं प्रकृतपदेन निर्दिशति प्रकृतेत्यर्थ इति। उद्देश्येति पदं प्रकृत[204]पदस्यार्थः पर्याय इत्यर्थः प्रकृतद्वयमिति न्याये प्रकृतपदानु-पादाने पर्वतपक्षकवह्निव्याप्यधूमसाध्यकप्रतिज्ञालक्षणे वह्निसाध्यकोपनयेऽति-व्याप्तिः। अनुमितौ प्रकृतपदानुपादाने पर्वतपक्षक वह्निसाध्यकप्रतिज्ञालक्षणे तदुपनयेऽतिव्याप्तिः स्यादिति प्रकृतपदद्वयमवश्यं देयमित्यर्थः। एकत्र लक्षणे पदद्वयसार्थके तु यद्यभिनिवेशस्तदा पर्वतपक्षकवह्नि व्याप्यधूमसाध्यकप्रतिज्ञा-लक्षणे न्याये प्रकृतत्वाप्रवेशे वह्निसाध्यकन्यायोपनयेऽतिव्याप्तिरनुमितौ प्रकृतत्वाप्रवेशे वह्निव्याप्यधूम[205]व्याप्यवानयमित्युपनये एवातिव्याप्तिः स्यादिति प्रकृतपदद्वयं व्यावर्तनीयमनुसर्त्तव्यं समुदायार्थमनुवदति तथाचेत्यादियादृशपक्ष-कन्यायावयवत्वमेताव**ति कृते** पर्वतपक्षक वह्निव्याप्यधूमसाध्यक-प्रतिज्ञालक्षणस्य[206] पर्वतपक्षकवह्निसाध्यकोपनयेऽतिव्याप्तिः स्यादिति साध्यमपि यादृशत्वेन विशेषितं यादृशसाध्यकन्यायेति कृते विषयतात्वावच्छिन्न पक्षक तदनुमितिविषयतात्वज्ञानजन्यज्ञानीयत्वतत्साध्यकप्रतिज्ञालक्षणे ज्ञानीयत्वविशिष्टविषयता तदनुमितिविषयतात्वज्ञानजन्यज्ञानीया तदनुमितिविषयतात्वादिति न्यायीयहेत्वयवेऽतिव्याप्तिः स्यादिति तद्धर्मावच्छिन्न पक्षकत्वमपि न्याये तदवयवे वा विशेषणं सति च तत्र विशेषणे शुद्धविषयता[207]त्वावच्छिन्न पक्षक तदनुमितिविषयतात्वज्ञानजन्यज्ञानीयत्व-

साध्यकन्यायावयवत्वाभावादेव तत्र नातिव्याप्तिः[208]। शुद्धविषयतायां तदनुमितिविषयतात्वज्ञानजन्यज्ञानीयत्वे साध्ये तदनुमितिविषयतात्वादिति हेतुघटितो न्याय एव न संभवति प्रतिज्ञाहेत्वोः पौनरुक्त्यं प्रति हेतुत्वादिति स्वयमेव दीधितिकृताभिधास्यते यदि पुनरूचितानुपूर्वीकोऽसल्लिंगकोऽपि न्यायत्वेन तदवयवाश्च प्रतिज्ञात्वादिना संग्राह्या। अत एव कथायामेकतरस्याः स्थापनाया आभासत्वनियमेऽपि न्यायाभ्यां कथमारम्भ इत्युपपद्यते तदा बुद्धि विषयता धूमज्ञानजन्यज्ञानीया धूमादिति न्यायस्य हेत्वययवे शुद्धविषयता धूमज्ञानजन्यज्ञानीया धूमलिङ्गकानुमितिविषयतात्वादिति न्यायीयप्रतिज्ञालक्षणाति-व्याप्तिवारणाय तद्धर्मावच्छिन्न पक्षाकत्वं न्याये विशेषणं तस्य यादृशसाध्यक-न्यायादवयवत्वं तादृशसाध्यकशुद्धविषयता पक्षकानुमित्यन्यूनानतिरिक्त-[209]विषयताकज्ञानजनकत्वादेवमनुमितौ तादृशपाकत्वमात्रप्रवेशे पर्वतपक्षकवह्नि साध्यकप्रतिज्ञालक्षणे तत्रत्योपनयातिव्याप्तिः स्यात्तज्जन्यज्ञानस्यापि पर्वतो वह्निव्याप्य धूमवानित्यनुमितिसमानविषयकत्वादिति। तादृशसाध्यकत्वमनुमिति-विशेषणं तावन्मात्राभिधाने तु बुद्धिविषयता धूमज्ञानजन्यज्ञानीया धूमादिति[210] हेत्ववयवे तत्प्रतिज्ञालक्षणमतिप्रसज्येत। हेत्ववयवजन्यज्ञानस्य विषयता धूमज्ञानजन्यज्ञानीयेति तादृशसाध्यकानुमित्यंतरसमानविषयकत्वादिति तादृश पक्षकत्वमनुमितिविशेषणं वस्तुतोऽनतिरिक्तविषयकत्वं तादृशविषयताकानु-मितित्वाव्यापकविषयताशून्यत्वं[211] तथाच वह्निसाध्यकानुमितित्वादेरव्यापिका पक्षादिविषयतेति[212] तच्छून्यत्वमसंभवि स्यादिति साध्यपक्ष तदवच्छेदकसंसर्गाणां प्रति स्वं प्रवेश आवश्यक इति ध्येयम्।

धूमादित्यादि आलोको ज्ञेयः। वस्तुतः तेन धूमादिति हेत्ववयवेनालोक-भिन्नवृत्तिज्ञाप्यताया अपि विषयीकरणादनतिरिक्तपदेनैव तन्निवारण[213]मिति ध्येयम्। साक्षात् पक्षतावच्छेदक रूपेण मतुपा पुन रधिकरणत्वेनैवोपस्थाप्यते। न्यूनतेति। असति पक्षतावच्छेदकपदानुषंगे पौनरूक्त्यप्रतिसंधानाभावा-दबाधितत्वाद्यनपेक्षेणानुमितिसामग्री न्यूना स्यादिति भावः अनुषंगादीति अत्रेदमवधेयम्। यत्र सम्पूर्णन्यायघटकवाक्यानामनुसंधानमेकं हेत्वाद्यवयवेषु[214] अयोग्यनिराकाङ्क्षात्वाद्यनुसंधानं स्वरूपं ततः प्रतिज्ञामात्रार्थस्य वाक्यार्थबोधस्तत्रानतिरिक्तपददानेऽपि हेत्ववयवेऽतिव्याप्तिः[215]। जनकपदस्य

जनकज्ञानविषयत्वार्थकत्वावश्यकत्वे न हेत्ववयवादपि[216] तस्याक्षतत्वात्। अथान्यूनपदोपसंदानेन प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिशाब्दबोधत्वा[217]-वच्छेदेन यादृशानुपूर्वीज्ञानत्वेन कारणता तद्वत्त्वं विवक्षितमिति हेत्वादि[218] वाक्येऽतिप्रसंग इति चेत् तत्किं येन[219] रूपेण तादृशानुपूर्वीज्ञानत्वेन कारणत्वं विवक्षितमुत येन केनापि रूपेण? आद्ये कथं निगमनेऽतिव्याप्तिः। तत्र ह्यवयवत्वं तस्मात् वह्निमानित्यानुपूर्व्यवच्छेदेन पर्वतो वह्निमानिति वाक्यार्थबोध[220]-जनकत्वं त्वनुषक्तायमादिपदघटितानुपूर्वीज्ञानत्वेनैवेति[221] वैषम्यात्। अनुषक्तपदस्य निराकांक्षत्वप्रतिसंधाने ततो वाक्यार्थबोधाभावेन[223] तादृशानुपूर्वीज्ञानत्वस्य कारणत्वावश्यकत्वात् पौर्वापर्यमेव हि पदानां दीधितिकाराणां[224] मते आकाङ्क्षाद्वितीयेऽनुषक्तायं पदघटितवह्निमत्पदानुपूर्वीज्ञानत्वेन वह्नि मत्पर्वत मात्रविषयकज्ञानजनकत्वात् तादृशानुपूर्वीमादायानतिरिक्तपददानेऽपि निगमनातिप्रसक्तेर्दुर्वारत्वापत्तिः। अथ न्यायावयवत्वप्रयोजकसमुदायत्वा-वच्छेदेन वह्निमत्पर्वतबोधकत्वप्रयोजकानुपूर्वीमत्त्वं विवक्षितम् अयं वह्निमानित्यानुपूर्वी तु न न्यायावयवसमुदायत्वावच्छेदेन वर्तते तस्मादित्यंशे तदभावात् उत्तरत्वमध्यमत्त्वपूर्वत्व[225]रूपायाः प्रत्येकवर्णवृत्तेरप्यानुपूर्व्याः समुदायत्वावच्छेदेन वृत्तिस्वीकारात्। अत एव द्वौ रूप[226]वन्तौ इत्यादिकः प्रत्ययः तथाचानतिरिक्तपदादानेऽनुषक्तायं पदघटितानुपूर्वीविशेषो भवतीति[227] विशिष्टधूमज्ञाप्यवह्निमत्पर्वतबोधकत्वप्रयोजकोऽवयवत्वावच्छेदक-समुदायत्वावच्छेदेन विद्यमानश्चेति निगमनेऽतिव्याप्तिवारणायानतिरिक्तपदं तेन च पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहि[228]-बोधत्वावच्छिन्ना तदितरविषयकत्वानवच्छिन्नाया कार्यता तन्निरूपककारणता-प्रयोजकानुपूर्व्या अवयवत्वप्रयोजकसमुदायत्वावच्छेदेन वृत्तिर्लभ्यते अनुषक्तायं पदगर्भानुपूर्वीप्रयोज्यकार्यता तु पक्षतावच्छेदकादीतरहेतुज्ञाप्यत्वविषयकत्वा-वच्छिन्नेति व्युदास इति चेदेवं सति हि किमनुषंगगवेषणेन। अयमादि-[229]निगमनांतभागे हेत्वंतभागे च वर्तमानानुपूर्वीमादाय हेतौ निगमने चातिव्याप्ति-वारणायानतिरिक्तपदमित्येव[230] वदितुमुचितम्। एवमेवाग्रिमग्रन्था अपि न विचारं सहन्त इति तत्र तत्र सूचयिष्यामः। परामर्शहेतुरिति न्यायावयव इत्यर्थः अत एव **एतेने**त्यादौ न्यायावयवत्वमेवानूदितम्।

तस्यैवेति। तथा च तादृशजातौ साधकाभाव इति भावः। बाधकमप्याह। अन्यथेति। न्यायजन्यज्ञाने पंचावयवजन्यत्वात्पञ्च, द्वित्रादिजन्ये द्वित्राद्या, एकैकजन्ये चैकैका जातय इति जातिसंकर

नन्वबाधितत्वमसत्प्रतिपक्षितत्वं चापदार्थतया कथं निगमनबोध्यमत आह। **तद्बोधौपयिकेति** विशिष्टो व्याप्तपक्षधर्मः सम्बन्धोज्ञाप्यत्वं मिश्रैरन्यथोक्त-मन्यथा दूषयितुं निर्दिशति **यत्त्विति** अविषयीकरणात् तद्विषयकवाक्यार्थ-बोधाजननात्। ननु तादृशवाक्यार्थबोधोपहितत्वं न विवक्षितम् सभाक्षोभादिना वाक्यार्थबोधजनय[231]**न्यां** प्रतिज्ञायामव्याप्तिः। किन्तु तद्योग्यता सा च यत्र **पृथिव्यामितर**भेदाश्रयत्वबोधे तात्पर्यभ्रमः तत्रत्यफलानुरोधादस्त्येवेत्यत आह तात्पर्येति अतिप्रसक्तत्वादिति धूमादिति हेतावपि पञ्चम्याः पर्वते धूमपदस्य वह्नौ शक्तेस्तत्र प्रतिज्ञासमानाकारवाक्यार्थबोधतात्पर्यस्य च भ्रमेण तादृशबो[232]धजनने योग्यतावश्यकत्वादिति भावः।

ननु शक्तिभ्रम मेयार्थ लक्षणाद्यजन्यस्यानुमितिसमा[233]नाकारवाक्यार्थ-बोधजननानुकूलाकाङ्क्षैवात्र प्रवेश्यते न तु तत्तात्पर्यकत्वमपीति तत्रोदाहरणे भवत्येवातिव्याप्तिरित्यत आहतावतेति। न च तावतेतिन्यायावयवत्वावच्छेदेन तादृशाकाङ्क्षावत्त्वमवश्यं प्रवेशनीयमितरथानतिरिक्तपदादानेऽपि तत्रोदाहरणैक-देशेऽतिव्याप्तितादवस्थ्यात्। न चोदाहरणत्वावच्छेदेनात्र प्रकृतानुमित्य-न्यूनविषय[234]कवाक्यार्थबोधशाब्दजननानुकूलाकाङ्क्षा विद्यते तन्नेत्यादिभागे तदभावादिति भावः। अत्रेदं बोध्यम् **मिश्रास्तावत्** सत्यं तस्य न्यायावयवत्वमर्थ इति न मन्यन्ते। किन्तु न्यायान्तर्गतत्वमात्रम् अत एव सत्यन्तभागस्य [235]विवरणमभिधाय तच्चावयवतदवयवसाधारणमतो हेत्वादिव्यावृत्तये विशिनष्टि [236]तदुद्देशेति विशेष्यदलमवतारितयालोके अत एव च न चावयवान्तरस्यानति-रिक्तपदेनैव व्युदासादन्यूनपदमधिकमित्याशंक्य यो यो धूमवान् सोऽग्निमा-नित्युदाहरणैकदेशेऽग्निमानित्यत्रातिव्याप्तिवारकत्वादिति समाहितमन्यूनपदेन च पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकवैशिष्ट्या[237]वगाहिशाब्दबोधजनन-योग्यता लभ्यते। सा च सर्वमतेऽप्यानुपूर्वीविशेष्यस्वरूपाकांक्षा एतावन्मात्रं च न्यायान्तर्गते पृथिव्यामितरभेदवत्ता [238]बोधकप्रयोजकाकाङ्क्षावति प्रतिज्ञासमानानु-

इत्यर्थः। तत्र तत्र भिन्नभिन्नजातिकल्पने च सुतरां मानाभाव इति भावः।

केचित्तु यदि चानुगतकारणमन्तरेणापि तादृशजातिमत्त्वसंभवस्तदा कदाचित्प्रतिज्ञाजन्येऽपि हेत्वादिजन्यवृत्तिर्हेत्वादिजन्ये प्रतिज्ञादि-जन्यवृत्तिर्जातिः स्यादिति संकर एवेत्यर्थः। एवं सर्वेषां सर्वजातीयत्वमेकजातीयत्वं वा स्यादित्यपि द्रष्टव्यमित्याहुः।

पूर्वोक्ते यन्न पृथिवीतरेभ्यो भिद्यते इत्युदाहरणैकदेशेऽपि गतमतोऽनतिरिक्तपदम्। अत एव लोके न च पक्षतावच्छेदकस्य चावयवांतरा प्रतिपाद्यत्वादन्यूनपदमात्र-गर्भतयैव सम्यगित्याशंक्य यन्न पृथिवीत्युदाहरणैकदेशे गतत्वेन तावन्मात्रगर्भस्य दुष्टत्वादिति समाहितम्। तत्र पक्षतावच्छेदकस्येति विशिष्टे साध्यवैशिष्ट्यस्येत्यर्थः। उपलक्षणमिदं मतं गजो नील इत्यत्र गजो नील इति भागेऽतिव्याप्तिवारणा[239]यानतिरिक्तपद[240] देयमिति ध्येयम्। अनतिरिक्तपददानेन वावयवानतन्तर्गतत्वं लभ्यते। तथाच न्यायान्तर्गतत्वेऽवयवानंतर्गतत्वे च सति शक्तिभ्रमनैयार्थलक्षणाद्यजन्यस्य प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्या[241]वगाहिनः शाब्दबोधस्य प्रयोजकानुपूर्वीमत्त्वं प्रतिज्ञात्वमिति समुदायार्थः। हेत्वन्तभागे अयमादिनिगमनान्तभागे च यानुपूर्वी सा पक्षसाध्यवैशिष्ट्यावगाहिबोधं प्रति न प्रयोजिका किन्तु धूमज्ञानहेतुकवह्निज्ञानविषयः पर्वत इति बोधं प्रति वह्न्यादिपदेन वह्निज्ञाननिरूढ़लक्षणा सहकारेणैव तादृशानुपूर्व्याः फलोपधाय-कत्वात् हेतुव्यवकलितप्रतिज्ञानुपूर्वी तु वह्निमत्तामेव पर्वते बोधयति अत एव न च प्रतिज्ञायां ज्ञानलक्षणाया असम्भव इत्याशंक्य वह्निमानित्यस्य हेत्वन्वयानुपपत्त्या ज्ञातव्यत्वलक्षणायां हेत्वन्वय प्राक्कालिकमुख्यान्व-यबोधमादाय लक्षणसम्भवादित्यालोके समाहितमित्यविविच्यालोक**कृतां** मते दीधितिकृतोक्त[242] दूषणं न श्रद्धेयमिति दिक् निविशतेऽनुषज्यते।

नन्वेवं पौनरूक्त्यप्रतिसंधानाभावादबाधितत्वादेराक्षेपो न स्यादित्यत आह। **वाक्यैकवाक्यनयेति**। यद्यपि हेतुसहकृतप्रतिज्ञया शुद्धपर्वतत्वा-वच्छेदेनोपनयनिगमनैकवाक्यतया धूमवत्पर्वतत्वावच्छेदेन धूमज्ञाप्यवह्निमत्ता प्रतीयत इति न पौनरूक्त्यम्, अन्यथा निराकाङ्क्षतया शाब्दबोधस्यैव[243]

तत्र प्रतिज्ञा न साध्यनिर्देशः साध्यपदेऽतिव्याप्तेः(६)। किन्तूद्देश्यानुमिति- हेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं

साध्यनिर्देशः प्रतिज्ञेति सूत्रम्। साध्यो विधेयधर्मविशिष्टोधर्मी।

तथा च पक्षतावच्छेदकपर्वतत्वादिविशिष्टे साध्यतावच्छेदक-वह्नित्वविशिष्टवैशिष्ट्यज्ञानजनको न्यायावयव इति पर्यवसितार्थः।

दुर्लभत्वापत्तेः तथाप्युपनयेन पर्वतत्वावच्छेदेन धूमवत्तायां हेतुसहकृतप्रतिज्ञया पर्वतत्वावच्छेदेन धूमवत्तायां हेतुसहकृतप्रतिज्ञया पर्वतत्वावच्छेदेन हेतुज्ञाप्य साध्यवत्तायामुदाहरणेन हेतौ साध्यव्याप्तौ बोधितायां धूमवत्पर्वतत्वावच्छेदेन व्याप्तिपक्षधर्महेतुज्ञाप्यसाध्यवत्ताप्यर्थात् प्रत्येतुं शक्यत इति अर्थलभ्यार्थाभिधान-स्वरूपमपुष्टार्थत्वं पुनरूक्त[244] **पदेनेति** मूलाभिप्रेतमित्यभिप्रायः। यत्तु वाक्यैकवाक्यतायां पौनरूक्त्या संभवादेव यदि चेत्युक्तमिति गौडैरूक्तमयुक्तं तत् एवमपि हेतुसहकृतप्रतिज्ञया शुद्धहेतुज्ञाप्यत्वस्य निगमनेन च व्याप्तिपक्षधर्महेतुज्ञाप्यत्वस्य साध्येऽभिधानात् पौनरूक्त्यासम्भवात् पौनरूक्त्य-पदेनातिविततगगनसरणिप्रसरणपरिमुक्तमिश्र[245]सानन्द इत्यादाविवापुष्टार्थत्व-स्यैवाभिधानावश्यकत्वात्।

ननु न्यूनपदेन[246] पक्षे पक्षतावच्छेदकस्य प्रकृतसाध्यस्य वैशिष्ट्या-वगाहिज्ञानं विवक्षितमुत प्रकृतपक्षतावच्छेदकावच्छेदेन प्रकृतसाध्यवैशिष्ट-च्यावगाहि, आद्ये हेतौ साध्येत्यादिद्वितीये यत्रेत्यादिगौडास्तु यद्यपि वह्निव्याप्य-धूमवानित्युपनयः पक्षतावच्छेदकावच्छेदेन न प्रकृतसाध्यवैशिष्ट्यबोधक-स्तथाप्यधिकरणं वह्निमद्धूमादित्यादिन्यायोपनयाभिप्रायेणेदम् अधिकरणत्वा-वच्छेदेन साध्यसिद्धेरूद्देश्यत्वान्न सिद्धसाधनमित्याहुस्तत्तुच्छम्, नहि व्याप्ति-पदेनाधिकरणत्वं धर्मितावच्छेदकीकृत्य साध्यवत्ता प्रतीयते किन्तु अनवच्छि-न्नाधिकरणे साध्यतावच्छेदकसंसर्गेण साध्यमित्यनुपपत्तितादवस्थ्यात्।

ननु साध्यस्य हेतुत्वे न्याय एव न सम्भवत्युदाहरणाभावात् स वह्निमान् इति वाक्यस्य वह्निमान् वह्निमानित्यन्वयबोधजनने निराकाङ्क्षत्वात्

वाक्यम्।(७)

अन्यूनानतिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणं तेनोदाहरणादिव्युदासः, निगमनञ्च न परामर्शहेतुः अबाधितासत्प्रतिपक्षिततत्वज्ञानजनकत्वात्।

हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा।

यदि च वह्निमन्तमुद्दिश्य वह्निव्याप्यव[247]त्ताविशिष्टो वह्निः शुद्धसंयोगेन वह्निमति वह्निव्यापकसंयोगेन वा वह्निर्विधातुं शक्यते रूपान्तरेण संसर्गान्तरेण चैकस्याप्युद्देश्यतावच्छेदक**विधेय**भावस्वीकारादित्युच्यते तदापि सिसाधयिषया न्यायप्रयोगानभ्युपगमात्। अनुपपन्नस्तादृशो न्याय इत्यत आह **यत्र चेत्यादि**। एतदिति संपातायातं शुद्धपर्वतत्वेन[248] दृष्टान्तोपन्याससंभवात् दृष्टान्त-स्योपन्यासस्यासार्वत्रिकत्वात्, सत्यन्तस्येत्यादिसत्यन्तस्य न्यायावयवत्वार्थ[249]-कत्वे हेत्वन्त[250]भागस्य तेनैव वारणसम्भवात्। अवयवाघटकेत्यादि मतं गजो नील इत्यत्र गजो नील इति भागवारणा[251]याघटकेति उदासीनवाक्यवारणाय न्यायान्तर्गतत्वप्रवेशः[252]। वस्तुतस्तु सत्यन्तस्य न्यायावयवत्वार्थकत्वेऽपि प्रतिज्ञासहकारेण प्रकृतानुमित्यन्यूनविषयकवाक्यार्थबोधजनके हेत्ववयवेऽति-व्याप्तिवारणायानतिरिक्तपदमावश्यकम् तदुपादाने तु येन रूपेणावय[253]वत्वं तेनैव प्रकृतानुमित्यन्यूनानतिरिक्तविषयकबोध[254]जनकत्वं लभ्यत इति नातिप्रसङ्ग इति स्मर्तव्यम्। अनतिरिक्तविषयकत्वं यदि प्रकृतानु[255]मितिविषयतान्य-विषयताशून्यत्वं तदा धूमादालोकवान् पर्वतो वह्निमान् धूमादिति[256] हेत्ववयव-जन्यो बोधः प्रकृतानुमितिविषयतान्य[257]विषयताक एवेत्यन्यूनपदवैयर्थ्यज्ञानभेदेन विषययताभेदाभावेऽपि अनुमितिविषयताधूमज्ञाप्यवृत्तिविशेषणत्वपर-तन्त्राहेतुजन्यज्ञानविषयता तु मुख्यतया स्वतन्त्रेति। स्वातन्त्र्या स्वातन्त्र्य-प्रयुक्तभेदसत्त्वात् प्रकृतानुमितिर्मुख्यत्वेनापि धूमज्ञाप्यत्वमवगाहत इति पुनरप्रामाणिकमसंसर्गाग्रहादीनामपि मुख्यविशेष्यता[258](न) जन्यतावच्छेदिका किमुत पक्षतापरामर्शयोरतः प्रकृतानुमितिविषयतान्याविषयकत्वमनतिरिक्त विषयकत्वं वक्तव्यम्। तत्राह **यद्यपीत्यादि**।

लिङ्गाविषयकलिङ्गिविषयकज्ञानजनकन्यायावयववाक्यत्वं वा इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात्।

प्रतिज्ञात्वं जातिः अनुगतानतिप्रसक्ततान्त्रिकव्यवहारादिति

मिश्रमतमाह कोद्येति **स्वणुशः**[259] प्रसिद्ध्या संशयसंभवात् मिश्रम-[260]तमनुपपन्नमिति यत्वोपाध्यायमतमुपन्यस्यति प्रकृतेति सर्वपक्षकोपनयेऽतिव्याप्तेस्तदेव परिष्कुरुते। प्रकृतेति प्रकारतासामान्यस्य समनियमो विवक्षितो निरवच्छिन्नप्रकारत्वस्य वाद्ये[261] सकलाभिधेयवृत्तीति द्वितीये तन्निष्ठेति पक्षसाध्ययो: यावन्तोऽभिधात्वात्यन्ताभावत्वप्रतियोगित्वद्रव्यादयो निरवच्छिन्नप्रकारास्तावन्त एवोपनयजन्यवाक्यार्थबोधेऽपीति तत्रातिव्याप्तिरिति भाव:। अत्र द्रव्यं तादाम्त्येन साध्यमाकाशञ्च तादात्म्येन हेतुरतो द्रव्यव्या[262]प्याकाशवदित्युपनयोत्पन्नबोधे द्रव्यत्वाकाशत्वयोरपि निरवच्छिन्न[263]-प्रकारत्वमुपपन्नम् आकाशत्वस्य विशेषरूपस्य निरवच्छिन्नप्रकारतासम्भवादत एव पक्षविशेषणे आकाशपदमर्थवत् यदि चाकाशपदं शब्दाश्रय[264] प्रवर्तते तदा पक्षे नोपादेयमाकाशपदं सकलाभिधेयनिष्ठात्यन्ताभावाप्रतियोग्यभाववदिदं द्रव्यमाकाशाच्छब्दाद् वेत्यादौ प्रतिज्ञाया अपि अभिधेयपदार्थस्य शब्दत्वगर्भतया प्रतिज्ञोपनययोरनवच्छिन्नप्रकारतयोः समनियमसंभवात्। गुणादिहेत्वन्तरोपादाने तु गुणत्वादिनिष्ठनिरवच्छिन्न प्रकारताया एव अनुमितितादृशप्रकारतावैयधिकरण्यं स्यात् प्रकृतपक्ष इत्यादि। अत्र यदि तादृशविषयताविलक्षणविषयताशून्यत्व-मनतिरिक्तविषयकत्वं तदा वह्निमद् द्रव्याद् वाच्यवान् पर्वतो वह्निमान् वह्निमद् द्रव्यादित्यत्र हेत्ववयवेऽतिव्याप्तिवारणाय पक्षे प्रकृतेति। यदि च व्याप्त्यविषयकत्वं तदा पर्वतो वह्निमान् वह्निमद्द्रव्यादित्यादावप्य-तिव्याप्तिवारणाय तत्।

अथ यदि व्याप्त्यविषयकत्वमनतिरिक्तविषयकत्वं तदा साध्ये प्रकृतपदस्य फलमाह प्रकृतपञ्चम्यर्थेति तथा च साध्ये प्रकृतपदानुपादाने हेतुत्वं ज्ञेयत्ववत् वाच्यत्वादित्यत्र हेत्ववयवेऽतिव्याप्तिः स्यादिति भाव:। प्रकृतपदोपादाने तदुद्धार इत्याह न तु प्रकृतेति हेतुत्वं वाच्यवद् वाच्यादित्यादिक[266]

केचित्, तन्न, देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गात्, प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं वाक्यं प्रतिज्ञेत्यपि न, तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्यानुसरणीयत्वात्। एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञाना-वृत्तिजातियोगिज्ञानजनकवाक्यं प्रतिज्ञेति निरस्तम्।

तु न न्यायः सिद्धसाधनादित्याशयः। तादृशविषयता विलक्षणविषयताशून्यत्वे तु पर्वतो वह्निमत्पर्वतादालोकवद्वृत्तिधर्मवान् वह्निमत्पर्वतादित्यत्र हेत्ववयवेऽतिव्याप्तिवारणमेव साध्ये प्रकृतत्वप्रवेशप्रयोजनमित्यनुसंधेयम्। तादृशेति प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयतेत्यर्थः। तद्विलक्षणत्वं तादृशविषयताव्यापकत्वं तथा च यादृश विषयताबुद्धिवृत्त्यत्यन्ताभावप्रति-योगिविषयताशून्यत्वमनतिरिक्तविषयकत्वं वाच्यमिति भावः।

ननु प्रतिज्ञाजन्यशाब्दबोधविषयताव्यक्तिः तादृशबोधान्तरनिष्ठात्यन्ता-भावप्रतियोगिनीत्यसम्भवो ज्ञानभेदेन विषयताभेदात्तदभावेऽपि विषयभेदात्तद् भेदस्यावश्यकत्वेन वह्नित्वेन पर्वतवह्निवृत्तिविषयताव्यक्तेः वह्नित्वेन महानसवह्निमात्रावगाहितादृशबोधनिष्ठात्यन्ताभावप्रतियोगित्वात् कस्यापि विषयताया व्यापकत्वाभावादसम्भवः वह्नित्वेन यावद् वह्निवृत्तिरेका विषयता पुनरप्रामाणिकी। न च साध्यतावच्छेदकावच्छिन्नप्रकारता निरूपित पक्षतावच्छेद-कावच्छिन्नविशेष्यता यावत्यस्त[268]तद्विषयता विशिष्टशाब्दत्वाव्यापकविषयता-शून्यत्वमनतिरिक्तविषयताकत्वमिति वाच्यम् एवं सत्यपि धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यत्र हेत्ववयवेऽतिव्या[269]प्त्यसम्भवेनान्यूनपदवैयर्थ्यप्रसङ्गात् हेत्ववयवजन्यवाक्यार्थबोधस्य[270] धूमज्ञाप्यत्वनिष्ठ विषयताया मुख्यविशेष्यतात्वेन तादृशशाब्दबोधत्वाव्या[271]पकतयाऽतिरिक्तपदेनैव तद्वारणात् न च मुख्यविशेष्यता-नातिरिक्ता किन्तु धूमादालोकवान् धूमादित्युभय[272]साधारण्येकैव सा च धूमादालोक इत्यत्रालोकनिष्ठविशेष्यतानिरूपित विशेषणत्वेन तज्ज्ञानीयेनावच्छिन्ना धूमादित्यत्र तु तदवच्छिन्नेति विशेष इति वाच्यम् एवं सति धूमादालोक इति ज्ञाप्यत्वीय

उदाहरणाच्च पक्षतावच्छेदकविशिष्टे न साध्यवैशिष्ट्यज्ञानम्।

उपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदकविशिष्ट-वैशिष्ट्यज्ञानमिति तयोर्व्युदासः।

आलोको धूमायं ज्ञाप्यत्वमिति ज्ञानयोरवैलक्षण्यप्रसङ्गात्। परं तत्र स्वतंत्रविशेष्यतयोः तदावश्य[273]कत्वादित्यतः पक्षांतरमाह **प्रकृत हेतुकेति।** अन्वयव्यतिरेकभेदादन्योन्यात्यन्ताभावभेदाच्च विभिन्नानां व्याप्ती-नामनुगमनार्थमौपयिकान्तं यादृशविषयताकज्ञानत्वेन व्याप्ति[274]ज्ञानस्य तल्लिङ्गक-तत्साध्यताकानुमितिकारणत्वं तादृशविषयताशून्यत्वे तात्पर्यं तल्लिङ्गकेत्यस्य फलमाह **वह्नीति।** तादृशालोकवत् पर्वते वह्नेः संशयस्य विप्रतिपत्तेरयोगात्[275] न्याय एव न युज्यत इत्यत आलोकस्य व्याप्तत्वे पक्षधर्मताया[276] च गृहीतायां हेत्वन्तराकाङ्क्षानुदयाद् वा **सधर्मेति।** प्रकृतसाध्यकेत्यस्य फलमाह **इंधनेत्यादि** व्याप्त्यविषयकत्वस्यानतिरिक्तविषयकत्वपदार्थत्वे[277] उदासीनवाक्यवारणाय न्यायावयवत्वमेव प्रवेशनीयम् नत्ववयवाघटकन्यायान्तर्गतत्वं तथासति हेत्वन्तभागेऽतिप्रसंगादनतिरिक्तपदं तु पर्वतत्वावच्छेदेन वह्नेः साध्यतायां पर्वत**दृष्टान्त**वत्युदाहरणेऽतिव्याप्तेर्वारणाय्।

न च यत्र पर्वतत्वावच्छेदेन साध्यसिद्धेरुद्देश्यता[278] वह्निमत्पर्वतादिस्ता-दात्म्येन हेतुस्तत्र वह्निमत्पर्वतादिहेतावतिव्याप्तिः पर्वतत्वसामानाधिकरण्येन वह्निसिद्धावपि तादृशन्यायाभ्युपगमादिति वाच्यम्। पर्वतत्वावच्छेदेन वह्नि-सिद्धिं विना वह्निमत्पर्वतस्यापि तदवच्छेदेन परामर्शासम्भवादेतादृशन्यायस्य सिद्धसाधननियमेनाभ्युपगमात् यदि च तादृश एव साध्ये वह्निमत्पर्वतसंयोगादिति[279] हेतावतिव्याप्तिरित्या[280]शङ्कते तदा मुख्यविशेष्ये पक्षे साध्यवैशिष्ट्यावगाहित्व-मन्यूनविषयकत्वं प्रवेश्यमनन्यगतिकत्वात् आकाङ्क्षाविरहेणेति आकांक्षा-प्रामाणिकानां समयबन्धप्रतीतायां व्याप्तौ पुनर्नाभिधातव्यमित्येव[281] रूपा विरहेण विरोधेन उदाहरणेत्युपलक्षणम् इदमापरामृष्टे वह्नि व्याप्यधूमवत्पर्वते तादृशधूमानन्वयात् उपनयासम्भवोऽपि द्रष्टव्यः।

ननु प्रतिज्ञाप्रविष्टव्याप्तिभिन्नाव्याप्तिरूदाहरणोपनयाभ्यां **प्रतिपादनीयेति**

किन्त्वित्यादि। प्रकृतन्यायबहिर्भूतवाक्यवारणाय सत्यन्तम्, प्रकृतन्यायावयवत्वपर्यवसितम्। उद्देश्येति। प्रकृतेत्यर्थः।

वह्निसाध्यकोपनयस्य वह्निव्याप्यधूमसाध्यकाऽनुमित्यन्यूनाऽनतिरिक्तविषयकशाब्दबोधजनकस्य वारणाय प्रकृतद्वयं। तथा च यादृशपक्षसाध्यक न्यायावयवत्वं तादृशपक्षसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वं पर्यवसितोऽर्थः।

धूमादालोकवान्पर्वतोवन्हिमान्धूमादित्यादावनतिरिक्तविषयकज्ञानजनकस्य हेतोर्वारणायाऽन्यूनेति। निगमनवारणायाऽनतिरिक्तेति।

न समयभङ्गो निराकाङ्क्षत्वं वेत्यत आह–**अन्यथेति** अतिप्रसङ्गात् हेतुद्वयोपादानप्रसङ्गात्। तथाच यथा तत्साध्यगमकेकस्मिन्नपि हेतावभिहिते हेत्वन्तरं नोपादेयमिति समयस्तथा तत्र हेतौ साध्यगमकतौपयिक्यां कस्यामपि व्याप्तावभिहितायां न व्याप्त्यंतरोपादानमित्यपीत्यतो निरूक्तन्याय **एवासम्भवी** कुत्र प्रतिज्ञायामतिव्याप्तिरिति भावः। उभयव्याप्त्युपन्यासोपीत्यत्र भिन्नाभ्यां वाक्याभ्यामिति शेषः। तेनोभयव्या[282]प्तिबोधकमुदाहरणमभिधास्यमानं नानुपपन्नं भवतीति ध्येयम्।

नन्वेव[283] गौरिति प्रत्यभिज्ञायामिदन्त्वविशिष्टे साध्यस्य गोत्वस्यानवगाहनात् कथमनुमितिसमानविषयकज्ञानप्रयोज[284]कत्वमतो गोत्वस्य साध्यत्वाभावं व्यवस्थापयति **गोत्वत्वाद्येति** साध्यतानुमितिविधेयता[285] सा च किञ्चिद् धर्मावच्छिन्नेति **नियम** इति हृदयम्। नन्वनवच्छिन्नगोत्वविधेयकाप्यनुमितिः[286] सम्भवत्येव सास्नासमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकगोत्ववत् गोवृत्तिसास्नावदिदमिति परामर्शस्य तादृशानुमितौ कारणत्वसम्भवादत[287]स्तादृशगोत्वसाध्यकन्यायासम्भवमाह पदार्थतेति जातावित्यनेनान्वयितावच्छेदकरूपानुपस्थितिरभिहिता तेन घटादन्य[288] इत्यत्र पदार्थतावच्छेदके अन्यत्वे पञ्चम्यर्थान्वयेऽपि न क्षतिः। किञ्चिद्धर्मावलीढ़ एव पदार्थान्तरान्वय इत्यभिमानः अयं गौरिति प्रतिज्ञया केवलया पक्षे गवाभेदः[289] प्रत्याय्यते हेतुसंवलितया तु

यद्यपि निगमने साक्षात्पक्षवाचकपदं न श्रूयते तथापि न्यूनताभंगायोपनयस्थाऽयमादिपदस्याऽनुषङ्गात्तथा बोध्यम्। इत्थमेव च प्रसक्तामतिप्रसक्तिनिगमनंचेत्यादिना निराकरिष्यति।

तदर्थश्च निगमनमन्यूनाऽनतिरिक्तविषयकशाब्दज्ञानजनकं सन्न परामर्शहेतु:येन निरुक्तन्यायावयवत्वरूपं प्रतिज्ञात्वं तदपि व्याप्नुयात्। अबाधितत्वादेस्तद्बोधौपयिकविशिष्टहेतुसंबन्धस्य च बोधकतया तस्यातिरिक्तविषयकज्ञानजनकत्वादिति।

यत्तु पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ यन्न पृथिवीतरेभ्यो गोपदस्य गोत्वविधेयकज्ञानविषयलक्षणावशात् सास्नाज्ञानजन्यगोत्वविधेयक-ज्ञानविषयोऽयमित्यन्वयबोधो जन्यत इति न न्यायानुपपत्तिरिति तु ध्येयम्। तथैव वह्नेरेव साध्यत्वे न तु वह्निमत्[290] अन्यथा वह्निमदव्याप्यवानयमित्युपनय: स्यादिति भाव:।

ननु वह्निसाध्यकप्रतिज्ञालक्षणे वह्निमदभेदावगाहित्वस्वरूपमन्यून-विषयकत्वं प्रवेश्यम्। न च वह्निमत्साध्यकप्रतिज्ञायामतिव्याप्ते:[292]। न्यायान्तर्ग-तत्वदलेनैव तद्वारणादित्यत आह **एवमिति**। आदिपदेनान्यपदनञ्पदयोरूपग्रह: सूक्ष्ममित्यनेन विमर्दाक्षमत्वं सूचितम्। तथाहि साध्यविधेयता निरूपित पक्षोद्देश्यताकत्व[293]मेवात्रान्यूनविषयकत्वम् अयं गौ: पर्वतो वह्निमान् चैत्र: पक्ता पृथिवीतरभिन्नेत्यादौ शुद्धगोत्वे वह्नौ पाककृतावितरभेदे च विधेयता पर्याय[294] वर्तते।

न तु प्रकारीभूतेऽपि गोवह्निमदादौ अन्या खलु प्रकारता अन्यैव च विधेयता नहि शब्देन पदान्तरलभ्यो धर्मी विधीयते किन्तु धर्ममात्रमत एव विशेष्यविशेषणभावेनान्वयाभावेऽपि स्वर्गकामो यजेतेत्यादौ स्वर्गमुद्दिश्ययाग-करणिका भावना विधीयते इति भट्टा व्यपदिशन्ति। यत्र चानुकूलत्वेन पाक: कृतौ प्रतियोगितया[295] इतराणि समवायेन गुणो वानुमितौ विधेयतावच्छेद-कस्तत्र पाककृतिमानितरभिन्नो गुणवानित्यादिप्रतिज्ञाजन्यवाक्यार्थबोधेऽपि तथा पाकपदस्य पाकानुकूले इतरपदस्येतरप्रतियोगिके गुणपदस्य गुणसमवायि

ननु प्रतिज्ञा न साधनाङ्गं विप्रतिपत्तेः पक्षपरिग्रहे तत्र

भिद्यते तन्न पृथिवीत्युदाहरणवारणाय तदिति।

तत्तुच्छम्। तेन पृथिव्यामितरभेदस्याऽविषयीकरणात्। तात्पर्यभ्रमेण तादृशबोधजनकत्वस्याऽतिप्रसक्तत्वात्।

निवृत्तिमत्त्वेन तत्तत्पदार्थस्य विधेयविशेषणत्वेनान्वयेऽपि विधेयतावच्छेदकत्वाभावात्। तदविशेषणस्यापि तन्निष्ठविशेष्यता[296]वच्छेदकत्वोपगमात्। अत एव सोमेन यजेतेत्यादौ सोमपदस्य मत्वर्थलक्षणायामपि सोमविशिष्टो यागो भावनामुद्दिश्यकरणतया विधीयत इति तौतातिताः।

नन्वेवमपि पर्वतो वह्निमानिति प्रतिज्ञाजन्यवाक्यार्थबोधस्यानुमित्यविषयम[297]त्वर्थतादात्म्यादिविषयकत्वादनतिरिक्तविषयकत्वं दुर्घटमिति चेन्न। अन्यूनपदेन प्रकृतानुमितिविधेयत्वस्यानतिरिक्तपदेन तद्भिन्नविधेयताशून्यत्वस्य विवक्षितत्वात्। साध्यतावच्छेदकेतरधर्मानवच्छिन्नविधेयता निरूपित पक्षतावच्छेदकावच्छिनोद्देश्यताशालिवाक्यार्थबोधजनको न्यायावयवः प्रतिज्ञेति समुदायार्थः हेत्वन्त भागेनायमादिनिगमनान्तभागेन च जनितस्य वाक्यार्थबोधस्य विधेयता साध्यतावच्छेदकेतरेण धूमज्ञाप्यत्वादिनैवावच्छिन्नेति न तयोरतिव्याप्तिः। ननु तथापि घटो जातिमानिति प्रतिज्ञाक्षणे घटो द्रव्यमित्यत्रातिव्याप्तिः। तत्र द्रव्यत्वनिष्ठ विधेयतायाः केनापि धर्मेणानवच्छिन्नत्वात् पक्षसाध्यभेदेन प्रतिज्ञालक्षणभेदावश्यकत्वे घटे जातिसाध्यकप्रतिज्ञालक्षणे केवलं न्यायान्तर्गतत्वस्यैवोपादेयत्वात्। न्यायप्रकृतत्वोपादाने प्रयोजनविरहात्। साध्यतावच्छेदकावच्छिन्नत्वस्यापि विधेयताविशेषणत्वे इदं द्रव्यमिति निरवच्छिन्न विधेयताक प्रतिज्ञायामव्याप्तिरिति चेन्न। विधेयोद्देश्यभेदेन प्रतिज्ञालक्षणभेदावश्यकत्वे निरवच्छिन्न द्रव्यत्वादिसाध्यकप्रतिज्ञायास्तथाविधविषयताकवाक्यार्थबोधजनकवाक्यत्वेन निर्वचनसम्भवात्। अनुमितिविषयत्वं धूमज्ञानजन्यज्ञानीयधूमादिति हेत्ववयवेऽप्यतिव्याप्तिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नत्वमुद्दिश्यताविशेषणं हेतुजन्यवाक्यार्थबोधस्याद्देश्यता[298] तु नानुमिति-

न च तावताप्युदाहरणस्य तथात्वसंभवः। यन्नेत्यादेरनन्वयात्। यदि च निगमने नायमादिपदं निविशते वाक्यैकवाक्यतयैव

विषयतान्वेनावच्छिन्ना किन्तु शुद्धविषयतात्वेन यदि चैकपदार्थयोर्ज्ञानविषयत्वयोः नोद्देश्यविधेयभावेनान्वयः। तदा प्राचीनमते जनकतामात्रस्य पञ्चम्यर्थतया घटजनकता धूमज्ञानीया धूमादित्यत्र हेत्यवयवेऽतिव्याप्तिवा[299]रणायोद्देश्यता-विशेषप्रवेशः। यदि[300] प्रकृतिप्रत्ययार्थयोरपि नोद्देश्यविधेयभावेनान्वयस्तदा नोपादेयमेव तदिति दिक्। तदा यादृशेत्यादियादृशसाध्यिका[301] तावति कृते अनुमितिविषयत्वं[302] धूमज्ञानजन्यज्ञानीयं धूमादित्यत्र हेत्ववयवेऽतिव्याप्तिः। विषयत्व[303]पक्षकैतत्साध्यकप्रतिज्ञातुल्यविषयकत्वादतो यादृश पक्षिका इति तावन्मात्रे[304] कृते पर्वतो वह्निव्याप्यधूमवानिति प्रतिज्ञासमानविषयके पर्वतपक्षक वह्निसाध्यकोपनये तथाविध प्रतिज्ञालक्षणातिव्याप्तिरतो यादृशसाध्यिका इति पक्षे यद्धर्मविशिष्टे तेन संयोगेन वह्नेः पक्षतावच्छेदकत्वे वह्निमत्पर्वतो द्रव्यमित्यादिप्रतिज्ञोपग्रहः शक्तिभ्रमनेयार्थलक्षणादिना पर्वतो वह्निमानिति प्रतिज्ञापि धूमीयं हेतुत्वमिति बोधस्य जनिका भवतीति हेत्ववयवेऽतिव्याप्तिवारणाय सम्प्रदायसिद्धा इति हेत्वन्तभागेऽयमादि निगमनान्तभागे चातिव्याप्ति-वारणायानिवर्तकान्तं फलतोऽनतिरिक्तविषयकत्वस्वरूपनिर्वचनं सत्यन्त-भागस्यावयवाघटकन्यायान्तर्गतत्वपरतायामिदमुपादेयं न्यायावयवत्वपरत्वे तु नोपादेयमेव।

अत्र कल्पे सिसाधयिषया न्यायप्रयोगो नाभ्युपेयते[305] इतरथा हेतुत्वं धूमीयं धूमा[306]दिति हेत्ववयवेऽतिव्याप्तिः दुर्वारा स्यात् यद्यपि धूमज्ञाप्यवह्निमान् पर्वत इति बोधजनकत्वेनापि प्रतिज्ञा सम्प्रदायसिद्धान्तबोधो निवर्त्यो[307] न हेतुत्वं धूमीयं न वा वह्निज्ञा[308]प्यो न वेत्यादिकः संशय इति तद्बोधानि-वर्तनीयसंशयनिवर्तकेतरस्य तावन्यतमबोधस्य जनकत्वंहेत्वन्तभागेऽतिव्याप्तम्। यदि च प्रतिज्ञा[309]सम्प्रदायाविच्छेदकानुपूर्वीज्ञानत्वेन यादृश यादृशविषयताक-शाब्द[310]त्वावच्छिन्नं प्रति जनकत्वं तादृशविषयताकनिर्ण[311]यत्वावच्छिन्न प्रतिबन्धकता निरूपित प्रतिबध्यतानधिकरणसंशयाप्रतिबन्धकत्वं प्रवेश्यते तदा संशयपद[312]वैयर्थ्यम्। तावदन्यतमबोधा निवर्तनीया निवर्तकत्वमात्रस्यैव

विशिष्टार्थभानादिति विभाव्यते, तदा हेतौ साध्यसामानाधिकरण्यभाने सामान्यतः पक्षेऽपि साध्यवत्त्वभानात्पक्षे हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताबोधकस्योपनयस्य यत्र च पक्षसाध्ययोस्ताद्रूप्येण दृष्टान्तत्वहेतुत्वाभ्यामुपन्यासः तादृशसिषाधयिषया च न्यायप्रयोगस्तत्रोदाहरणोपनययोः।

सम्यक्त्वात् तथापि तादृशनिर्णयत्वविशिष्टन्या[313]यप्रतिबध्यस्य समानविषयक[314]शाब्दस्य शाब्दबोधो जायतामितीच्छायामनिवर्तक[315]: सर्वोऽपि शाब्दबोध इत्यसम्भववारणाय संशयेति अत्रेच्छामा[316]दायासम्भववारणाय ज्ञानत्वप्रवेश एव युज्यते न तु विशिष्यसंशयत्वप्रवेशः प्रवेशः। न च समानाकारशाब्दसामान्यं न शाब्दसामान्यप्रतिबन्धकं किन्तु वुभुत्साविरहविशिष्टमेव। तथासति तादृशनिर्णयसामान्याप्रतिबध्यशाब्दनिवर्त्तकबोधजनकत्वात् प्रतिज्ञायामव्याप्तिवारणाय तदिति वाच्यम्। यत्र चान्तरेत्यग्रिमग्रन्थे न विवक्षितस्य तादृशनिर्णयाप्रतिबध्यशाब्दबोधानिवर्तक शाब्दत्वरूपयोग्यत्वस्य तत्रापि सत्त्वेनाव्याप्तिविरहादिति केचित्। तदसत् स्वरूपयोग्यतामात्रस्यातिप्रसक्तत्वात् प्रतिज्ञायामव्याप्तिवारणार्थं तस्यावश्यकत्वात्। सर्वथा शाब्दानुपसर्जकप्रतिज्ञायां योग्यताया अप्यादरणीयत्वात् सर्वं तु न तथा सति नयैव निर्वाहे उपधानस्य कुत्रापि निवेशाप्रसङ्गात्। साध्यादिभेदेन प्रतिज्ञालक्षणस्य[317] भिन्नत्वात् धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यत्र हेत्ववयवेऽतिव्याप्तिवारणाय तावदन्यतम इति फलतोऽन्यूनविषयकत्वनिर्वचनम्। तत्र साध्यसाधनादिप्रतिज्ञालक्षणभेदात् कुत्रचित्[318] साधने एकविधः क्वचिदन्यतरः क्वचिदन्यतमः निवेशनीय इत्याह **एवञ्चेति**[319]। इदं पक्षक गोसाध्यक प्रतिज्ञालक्षणे निरूक्तबोधानिवर्त्तनीयसंशयानिवर्तकबोधजनकन्यायावयवत्वमात्रं प्रवेश्य[320]मितरस्यान्यूनापि विषयकत्वभागस्य व्यर्थत्वात् दैवादेकत्वादिसंख्यामप्यन[321]वगाहमानस्येदं पदार्थे केवलं गोतादात्म्या[322]वगाहिबोधस्य जननयोग्यतामादाय तत्र[323] लक्षणसङ्गमनमिति ध्येयम्। संयोगेन समवायेन वेत्युपलक्षणं दैशिका[324]दिवृत्तिनियामकसम्बन्धमात्रस्यान्यतरत्वेन प्रवेशस्थलमुदाहरति समवायेनेत्यादिपाककृतिमत्त्वं चैत्रः पचतीत्यत्र कर्त्रभेदश्चैत्रः पाचक इत्यत्र तथाच तथावि[325]धान्यतमबोधानिवर्त्य संशयानिवर्त्तकबोधजनकन्यायावयवत्वं तथाविधप्रतिज्ञालक्षणमिति भावः।

यत्र वा पर्वतत्वाद्यवच्छेदेन साध्यसिद्धेरुद्देश्यतायामेतत्पर्वतत्वादिना दृष्टान्तस्योपन्यासस्तत्रोदाहरणस्य।

सत्यन्तस्य चाऽवयवाऽघटकन्यायान्तर्गतत्वपरतया हेत्वन्तस्याऽ-यमादिनिगमनान्तभागस्य वारणाय तत्।

यद्यपि सर्वमभिधेयं प्रमेयमित्यादावतिरिक्ताऽप्रसिद्धिः

न च कोट्यप्रसिद्ध्या प्रमेयं न वेति विप्रतिपत्तेः संशयस्य

अन्यत[326]मत्वेनैव बोधानां प्रवेशस्थलमुदाहरति विशेषणतयेति पृथिवीतरेभ्यो भिद्यते इतरान्या अनितरावानेतराणि इतरभिन्नेति क्रमेण चत्वारि प्रतिज्ञाशरीराणि अन्यपदमन्योन्याभावस्वरूपेण भिन्नपदं तदाश्रयत्वेन धर्मिणं बोधयतीति भेदः। अत्र तावदन्यतमबोधानिवर्तनीयसंशयनिवर्तकबोधजनकन्यायावयवत्वं शुद्धपृथिवी पक्षकेतरभेदसाध्यकप्रतिज्ञालक्षणं तावतामन्यतम इति तु न प्रवेशनीयं प्रयोजनविरहात्। प्रवेशनीयन्तु पृथिवीत्वात् गन्धवती पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यत्र तादृशपृथिवी पक्षकप्रतिज्ञालक्षणे हेत्ववयवेऽतिव्याप्ति[327]-वारणायेति ध्येयम्। कस्यचिन्मतमुपन्यस्यति तावदिति तत्पक्षक तत्साध्यिका[328] प्रतिज्ञा यादृश-यादृशबोधजनकतया सम्प्रदायसिद्धा तावदन्यतमेत्यर्थः। इदन्तु [329]पूर्ववद्धेत्वंतभागेऽतिव्याप्तिवारणायानतिरिक्तविषयकपदार्थविवरणं संशय-पदोपादानप्रयोजनं पूर्ववत् धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिहेत्व-वयवेऽतिव्याप्तिवारणाय संशयनिवर्त्तकान्तम्। निरूक्तहेत्ववयवजन्यबोधस्तु तावदन्यमतबोधनिवर्त्य यावत् संशयान्तर्गतस्य पर्वतो वह्निमान्नवेति संशयस्येव न निवर्तक इति तद्व्युदासः। पृथिवी नेतराणीत्येवमाकारकतादृशान्यतमबोध-निवर्त्तनीयसमानविषयकानुमितिनिवर्त्तकत्वं पृथिवीतरेभ्यो भिद्यते इति प्रतिज्ञा-जन्यबोधस्य नास्तीति तत्राव्याप्तिवारणाय **संशयेति**। अत्र पृथिवीतरभिन्नेति बोधस्य तावदन्यतमान्तर्गतस्य निवर्त्यः पृथिवी आश्रयो न वेति संशयस्तेन बोधेन क्तप्रत्ययार्थस्याश्रयस्य पृथिव्या तादात्म्येनानवगाहनात् तन्निवर्त्तकत्वं पृथिवी नेतराणीत्यन्वयो बोधस्य[330] सम्भवति समानविषयकत्वेन प्रतिबन्धकता वादेऽपि प्रतीत्यविषयीभूताश्रय तादात्म्यसंदेहे तस्याविरोधित्वादित्यस्वरसः।

चाऽयोगान्न तादृशी प्रतिज्ञा, प्रकृतानुमितिविषयतासमव्याप्त-विषयताकत्वं, प्रकृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वा वक्तव्यमिति वाच्यम्। सकलाभिधेयवृत्तिधर्मवत् सकलाभिधेय-निष्ठात्यन्ताभावाप्रतियोगि आकाशाभाववद्वा इदं द्रव्यमित्यादौ विशिष्टपक्षबोधके उपनयेऽतिव्याप्तेः।

तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयत्वं तदन्यूनविषयत्वम्।

चैत्रः पचति घटो नेतराणीत्यादावुपनयासंभवात् प्रतिज्ञापि न संभवतीत्याशंक्याह चैत्र इत्यादि। अत्रेदं चिन्तनीयम्[331] पाचकत्वव्याप्यवान् अनितरत्वव्याप्यवानित्यादिको नव्यानामपि सुवच एवोपनयः एतादृशस्थले कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भाव[332]प्रत्ययेत्यनुशासनादेकपदार्थ संसृष्टद्वितीयपदार्थतावच्छेदकस्यैव त्वप्रत्ययेनाभिधानात्।

ननु पाचकत्वमित्यादावनुकूलता संसर्गेण पाक[333]विशिष्टप्रयत्नस्य भावप्रत्ययेनाभिधानेऽपि तस्य प्रकृत्यर्थविशिष्टस्यैव व्याप्यत्वेनान्वयो न तु केवलस्येति। पाचकवृत्तिपाककृतिव्याप्यत्वं लभ्यते[334] न तु केवलपाककृति-व्याप्यत्वमिति चेत् किं चातः तर्हि वह्नौ साध्ये प्रमेयवह्निव्याप्यवानित्युपनयोऽपि प्रसज्येनेति चेत् न। तत्र प्रमेयपदं विनापि वह्निपद प्रयोगसम्भवेनाधिकपदप्रयोगेण निग्रहादिहेतु पाचकपदप्रयोगं विना प्रत्ययप्रयोगासम्भवात् विशेषोप[335]स्थाप-कत्वाच्चाधिक्याभावात्।

परे तु पाककृतिव्याप्यवानितरान्योन्याभावव्याप्यवानित्याकारक एवात्रोपनयः कृत्यन्योन्याभावपदयोर्व्याप्यान्वयानुरोधेन लक्षणाया[336] आवश्य-कत्वेऽनुकूलत्वप्रतियोगित्वादिसंसर्गेण पाकेतरादिविशिष्टकृत्यन्योन्या[337]भाव-संबन्धिनि लक्षणापूर्वपदं तात्पर्यमात्रग्राहकमिति सर्वसामञ्ज स्यादिति प्राहुः। वह्न्यादिसाध्य[338]कन्याय एव नास्ति कुतः प्रतिज्ञापर्वतस्तथेत्यादिका तु न प्रतिज्ञाविप्रतिपत्त्युपस्थिते कोटिद्वये सर्वनाम्ना साध्यनिर्देशस्यापरिच्छेद[339]कत्वात् इत्याशयवतो यथाश्रुतमू[340]लमुपपादयतो मतमुपन्यस्यति **केचित्त्वित्यादि**। विप्रतिपत्तिकोटितामात्रं न जिज्ञा[341]सानिमित्तकमित्यतस्तदधीनसंशये **चेति** तथा

पञ्चम्यर्थपक्षकप्रतिज्ञादिस्थले तु पक्षे प्रकृत्यर्थस्य वैशिष्ट्यबोधको हेतु र्नतु प्रकृतसाध्यस्य।

तादृशविषयताविलक्षणविषयताशून्यत्वम् प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौपयिकव्याप्तिविषयकत्वं वा तदनतिरिक्तविषयकत्वम्।

वह्निव्याप्यालोकवत्सधर्मा पर्वतो वन्हिमान्धूमात्, इन्धनव्याप्यधूमवान्पर्वतो वन्हिमान्धूमादित्यादौ तस्याः संग्रहाय प्रकृतहेतुसाध्ययोरुपादानम्। वह्निव्याप्यधूमवान्पर्वतो वह्निमान्धूमात्, सत्तादिव्याप्यद्रव्यवदिदं सत्तादिमद्द्रव्यत्वादित्यादयस्तु न प्रयोगाः। विशिष्टपक्षोपस्थापकादेव तादृशव्याप्तिप्रतीतौ आकांक्षाविरहेणोदाहरणानुत्थानात्, अन्यथाऽतिप्रसङ्गात्। अत एव नैकदोभय-

---

च विप्रतिपत्या धर्मिणः कोप्योश्च वह्निमत्तदन्योन्याभावयोरूपस्थितिरथ मानसः संशयस्ततो दुःखमथ दुःखानुव्यवसायः ततो दुःखे द्वेषोऽथ दुःखसाधनतया वह्निमत्तदन्योन्याभावकोटिकसंशयस्य ग्रहणमतस्तत्र द्वेषस्ततः संशयसाधनतया वह्निमत्तदन्योन्याभावान्यतरनिर्णयाभावस्य प्रतिसंधानमथ तत्र द्वेषस्ततो द्वेषयोनिस्तदन्यतरकोटिनिर्णय[342] इच्छा भवतीति भवति वह्निमान् जिज्ञासित इति भावः। अत्र संशय एव विप्रतिपत्युपस्थितवह्निकोटिको वह्निमत्कोटिकसन्देहसाधनत्वेन वह्निनिर्णयाभावे द्वेषस्तन्निर्णयेच्छा च संभवतीति वह्नेरपि जिज्ञासिततत्वात्तत्साधनेनार्थान्तरमित्यलं बहुतन्त्र[343]चिह्नत्वेनेत्यस्वरसः। योग्यतापदमापाततः अयोग्येऽपि न्यायस्वीकारादत एव न्यायाभ्यां कथारम्भ इत्युपपद्यत इति स्मर्तव्यम्। **तथाचेत्यादि।** उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकेत्यत्रान्यूनानतिरिक्तपदपरिहारे उद्देश्यानुमितिविषयकेत्यवशिष्टं तत्र च सप्तम्यु[344]पमानोत्तरपदलोकादुद्देश्यानुमितौ विषय इव विषयो यस्येति विग्रहलाभादनुमितिसमानविषयकत्वं पर्यवसन्नमिति भावः। अत्र सत्यन्तभागस्यावयवाघटकन्यायान्तर्गतत्व[345]नार्थः। तथासति चैत्रो विकृतोऽक्ष्णा काणत्वादित्यत्र चैत्रो विकृतोऽक्ष्णोऽत्यन्त[346]-भागेऽतिप्रसङ्गादत एवात्र न्यायावयवत्वं सत्यन्तार्थत्वेन व्याख्यातमपि पुनरनूदितम्। पक्षविशेष्यकत्वविवक्षायाः फल[347] दर्शयितुं पक्षविषयकमुदाहरणं

व्यात्युपन्यासोऽपि।

यदि च मैत्रः पचति अयं गौरित्यादेरेव प्रतिज्ञाया तथोपवर्णितविशिष्टज्ञानजनकत्वसंभवः तादात्म्येन गोः साध्यत्वात् गोत्वत्वाद्यनुपस्थित्या गोत्वादेः साध्यत्वानुपपत्तेः पदार्थतावच्छेदकजातौ हेत्वर्थान्वयायोगाच्च

वह्निमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य वह्नेः संयोगात्मकः संबन्धों भासते तथैव वह्निव्याप्यधूमवानयमित्युपनयसङ्गमात्,

शाब्दबोधे तु वह्निमतोऽभेदः एवं भेदे साध्ये भिद्यते

दर्शयति यथेति दृष्टान्तवत्तदुदाहरणस्य वारणायेत्यन्वयः यो यो धूमवान् स वह्निमान् यथा ह्रदभिन्नमित्यादेर्निर्वह्नित्वहेत्वग्राहकस्येति शेषः। दृष्टान्तप्रयोगस्यासार्वत्रिकत्वात् स्थलान्तरमाह ह्रदावृत्तीत्यादि। ह्रदो निर्द्धूमो ह्रदावृत्तिधर्मशून्यत्वादित्यत्र यो यो धूमवान् स ह्रदावृत्तिः धर्मवानित्युदाहरणजन्यप्रतीते लिङ्गाविषयकत्वात् पक्षविषयकत्वाच्च तद्वारणाय पक्षमुख्यविशेष्यकत्वं समानविषयकान्तार्थो वाच्य इत्यर्थः। केवलान्वयिनि व्यतिरेकिणा प्रयोगो नास्तीत्यभिमानेनेदमन्यथावृक्षः कपिविभागाभाववान् कपिसंयोगाभावादित्यादौ यो यः कपिविभागवान् स कपिसंयोगवान् यथा वृक्ष इत्युदाहरणेऽतिव्याप्तिरिति[348] ध्येयम्। उपनयेति[349] निगमनं पक्षतावच्छेदकावच्छिन्न विशेष्यकत्वविवक्षयापि[350] व्यावर्त्तयितुमशक्यत इत्युपनयपर्यन्तानुधावनम्। इदमुपलक्षणम्। हेतुत्वं प्रमेयं ज्ञेयत्वादित्र [351]हेत्ववयवेऽतिव्याप्तिवारणमपि लिङ्गाविषयकत्वोपादाने प्रयोजनमवसेयम्। प्रकृतपदं यदि लिङ्गतावच्छेदकविशिष्टार्थकं तथासत्याह। **गन्धवतीत्यादि**[352]। उपनयासम्भव इति तथा च प्रकृतन्याय एव नास्ति कुत्र प्रतिज्ञायामव्याप्तिरिति भावः। साध्याभावेति। तथाचेतरत्वव्यापकगन्धाभाववती[353] चेयमित्येवोपनयशरीरमिति भावः।

साध्याभावेति। तथाचेतरत्त्वव्यापकगन्धाभाववती चेयमित्येवोपनयशरीरमिति भावः। **प्राचामिति**। व्याप्तेरूदाहरणे न लाभात् पक्षधर्मतामात्रमुपनयेन

भिन्नमित्यादावपि वैलक्षण्यमिति सूक्ष्ममीक्ष्यते–

तदा यादृशपक्षसाध्यिका: पक्षे यादृशयादृशविशिष्टार्थबोधिका: प्रतिज्ञा सम्प्रदायसिद्धाः तादृशानां बोधानामन्यतमेनाप्यनिवर्त्यत्वस्य संशयस्यानिवर्तको यस्तावद्बोधानामन्यतमो बोधस्तज्जनकत्वं वक्तव्यम्। एवं च तादात्म्येन गवि साध्ये पक्षे गवाभेदस्य, संयोगेन समवायेन वा वह्नौ वह्निमदभेदस्य, समवायेन पाकस्य कृतौ

प्रतिपाद्यत इति प्राचामभिसन्धिः पक्षाविशेषणत्वेनेत्यादि यद्यपि गन्धवती भिद्यते गंधादित्यत्र पक्षविशेषणताभिन्नापि गन्धे विशेष्यता विद्यत एव। न च गवाश्वयोरिव प्रकारत्वविशेष्यत्वयोरैक्यासम्भवः। यत्तु पक्षविशेषणताभिन्ना या हेतुतावच्छेदकावच्छिन्ना विषयता तच्छून्यत्वमर्थः गन्धवत्पक्षके च पक्षविशेषणतैव गन्धत्वावच्छिन्ना न तु विशेष्यतेति। तन्न। सुरभि गन्धवती तथा गन्धादित्यत्र सौरभत्वप्रकारता निरूपित विशेष्य[354]तायां गन्धत्वावच्छिन्नत्वात् सुरभित्वगन्धत्वोभयावच्छिन्न विशेषणता[355]न्यत्वाच्चाव्याप्तितादवस्थ्यात्। तथापि विशिष्टवैशिष्ट्यबोधे मुख्यविशेषणांशे प्रकारत्व विशेष्यत्वयोरभेद एवेत्यभिमानेनेदमेवं साध्याविशेषणत्वमपि निर्वाच्यम्। दधि द्रव्यं दध्न इत्यत्र दधिद्व्यणुकमात्रग्राहिकापि प्रतिज्ञा सम्भवतीति। न च द्व्यणुकं हेतुर्दध्नि पक्षे समवेतत्वाभावादाह प्रमेयत्वमभिधेयमिति। अत्र घटादिवृत्ति प्रमाविषयत्वमेव प्रमेयत्ववृत्तिप्रमाविषयत्वं न तु अतिरिक्तविषयत्वे विषयत्वान्तरस्वीकारेऽ-नवस्थानादित्यभिप्रायेणेदम् इतरथात्वाह गोत्वाभाव इति उपनयस्येति उपनये व्याप्तिर्न निविशत इति प्राचां मतेन साध्याभाववदवृत्तित्वमेव व्याप्तिरित्यभि[357]प्रायेण साक्षात्परम्परासाधारणपक्षविशेषणता प्रवेशाभिप्रायेण वोपनया[358]तिव्याप्तेरभिधानमन्यथाव्यापकता विशेषणतया साधनस्योपनयेन बोधनात्। साधनव्यापकसाध्यसमानाधिकरणसाधनवानयमित्येवं विधे तस्मिन्नतिव्याप्त्यनवकाशात् **तथापीत्यादि**। गंधवती भिद्यते गंधादित्यत्र प्रतिज्ञासंग्रहाय पक्षतावच्छेदकविशिष्ट इति पर्वतो वह्निसामग्रीमान् वह्निरित्यत्र न तत्संग्रहाय साध्यतावच्छेदकविशिष्टेति नन्वत्र को वहिर्भावपदार्थः न तावद्भेदः तादृशवैशिष्ट्यविषयताभिन्न लिङ्गविषयतासत्त्वेन गन्धवती भिद्यत इत्यत्रेवाव्याप्तितादवस्थ्यात्। नाप्यव्यापकत्वं विषयताया[359] विषयभेदेन ज्ञानभेदेन

पाककृतिमत्त्वस्य, पाककर्त्रभेदस्य,

विशेषणतया इतरेभ्योभेदे, इतरभेदवत्ववत्त्वस्य, इतरान्याभेदस्य, इतरभेदवत्त्वस्य, इतरभिन्नाभेदस्य बोधा विशिष्य धर्तव्या इति दिक्।

तावद्बोधानिवर्त्यसंशयानिवर्तकतावद्बोधनिवर्त्ययावत्संशयनिवर्त्तक-बोधजनकत्वं वाच्यमित्यपि कश्चित्।

चैत्रः पचति, घटो नेतराणीति प्रतिज्ञायां साध्ये विषयत्वानु-योगित्वयोः संबन्धविधयैवानुप्रवेशात् यथोपदर्शितसाध्यगमतौपयिक-

---

वाभिन्नतया सर्वस्या एव विषयतायास्तादृशवैशिष्ट्यविषयताया अव्यापकत्वादित्यतः पक्षान्तरमाह वस्तुत इति यद्वा यथाश्रुते गन्धवती भिद्यत इत्यत्र पक्षे साध्यवैशिष्ट्यं न विषयः किन्तु साध्याश्रयत्ववैशिष्ट्यमिति तद्विषयतावहिर्भूतमेव लिङ्गविषयत्वमित्यव्याप्तिः तादवस्थ्यम्। अथवा [360]यादृशयादृशविषयताकबोधजनकत्वेन प्रतिज्ञासम्प्रदायसिद्धान्तविषयता वहिर्भूतलिङ्गविषयत्वाभावो वाच्यः। तदा लिङ्गपदवैयर्थ्यमनतिरिक्तविषयत्वे पूर्वोक्ते पर्यवसानं चेत्यतः पक्षान्तरमाह। वस्तुत इति लिंगलिङ्गत्वं वा प्रमेयमित्यादावव्याप्तेराह **तथा चेत्यादि हेतुभूतेत्यादि**। ह्रदो धूमाभाववान् वह्न्यभावादित्यत्र यो यो धूमवान स वह्निमानिति यो यो धूमाभावाभाववान् स वह्न्यभावाभाववान् इति यो यो धूमवान् स वह्न्यभावाभाववानिति त्रिविधोदाहरणव्यावृत्तये तल्लिङ्गविशे[361]षणनिर्देशः तथाच हेतुभूतो वह्न्यभावस्तत्प्रतियोगितावच्छेदकं वह्नित्वं वह्न्यभावाभावत्वं चेति तदवच्छेदेन साध्याभावव्यापकतावगाहिनां त्रयाणामुपग्रहः साध्याभावोऽपि साध्यभूताभाव-प्रतियोगित्वेनैवोपादातुमुचित इति[362] ध्येयम्। यादृश व्याप्तिविषयताकत्वेन प्रकृतानुमितिकारणत्वं तादृशविषयताशून्यत्वं तु निर्गलितार्थः। एवं सति पक्षविशेष्यकार्थकमुद्देश्यानुमितिसमानविषयकत्वं नोपादेयमित्याशयेन मूलं योजयति अन्यूनेत्यादिपक्षविशेष्यत्वाप्रवेशे धूमादित्यत्र हेत्ववयवेऽतिव्याप्तिं परिहारयितुमुपक्रमते हेतुत्वमित्यादि पञ्चम्यन्तान्यत्वं पटो न दण्डादिति प्रतिज्ञायामव्यापकमतो हेत्वन्यस्येति। आवश्यकत्वादिति तथाच हेत्वन्यत्वेनैव

व्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षे उपनेयत्वात्तथा चाऽयमित्याकारकः सुवच एव प्राचामुपनयः।

नव्यानां पुनरनन्यगतिकतया तद्व्याप्यहेतुमान् तद्वान्वेत्याकारो योग्यतावशाच्च तदा साध्यस्य तद्व्याप्यस्य वा परामर्शः।

केचित्तु वह्निमान्नवेति विप्रतिपत्ती संशये च वह्निमत्तदन्योन्याभावयोस्तादात्म्यविशेषणत्वाभ्यां कोटित्वेन जिज्ञासितत्वादिति तादात्म्येन वह्निमानेव साधयितुमुचितः, न तु वह्निरजिज्ञासितत्वात्।

सकलहेतुवारणो पक्षविशेष्यकत्वं नोपादेयमिति।

ननु हेत्वन्यत्वोपादानावश्यकत्वे हेतुत्वमभिधेयं प्रमेयत्वादित्यत्र हेत्ववयवस्य व्यावृत्तिबीजमित्यसाम्प्रतम्। किन्तु प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र हेत्ववयवस्य तत्र हि पञ्चम्यर्थहेतुत्वस्य प्रकृत्यर्थविशेषणत्वेनान्वयात् पक्षविशेष्यकत्वेन तद्वारणासंभव इत्यतः सुबर्थस्य प्रकृत्यर्थ विशेष्यत्वेनान्वयबोधमुपपादयति संख्येत्यादिविशेषणत्वेनान्वये बाधकमाह प्रातिपादिकेति तथा च पर्वतो वह्निमान् धूमात् पृथिवी भिद्यते गन्धादित्यादौ हेतुताविशिष्टस्य हेतोर्वह्नौ भेदेनान्व[363]योऽनुपपन्न इति भावः।

ननु विभक्त्यर्थसंसर्गेण प्रातिपदिकार्थयोः क्रियाप्रातिपदिकार्थयोश्चान्वयबोधो भवन्नाति[364]प्रसज्यते इत्यत्र आह चैत्रस्येदमित्यादि न मैत्रस्येत्यत्र षष्ठ्यर्थसम्बन्धावच्छिन्न प्रतियोगिताको मैत्राभावो न प्रतीयते। षष्ठ्यर्थ स्वस्वामिभावस्य वृत्यनियामकत्वात् वृत्यनियामकसंसर्गस्य प्रतियोगितानवच्छेदकत्वात् संयोगादिना मैत्राभावस्तु मैत्रधनेऽप्यतिप्रसक्तमिति भावः।

ननु न चैत्रस्येत्यत्रान्य एव नञर्थः स एव स्वस्वामिभावो न धनेऽन्वेतीत्यत्राहद्वयोरिदमिति। तथाच चैत्रमैत्रयोर्धने न चैत्रस्येति प्रयोगप्रसङ्ग इति भावः। बाधकान्तरमप्याह नेदमिति। तथाचैकान्यस्याप्रसिद्ध्याऽस्वामिकेनेदमेकस्यापीति प्रयोगो न सम्भवतीत्याशयः। वृत्यनियाम[365]कोऽपि सम्बन्धः कुतो न प्रतियोगितावच्छेदक इत्यतो बाधकान्तरं सूचयति चैत्रो

तथाचायमित्याकारको वह्निमद्व्याप्यधूमवांश्चायमित्याकारको वा उपनयः। न तु वह्निव्याप्यधूमवांश्चायमित्याकारकः, अर्थान्तरत्वादिति प्राहुः।

यत्र चाऽन्तरा तादृशबोधो न जनितस्तत्रापि तादृशाकाङ्क्षा-योग्यताशालित्वरूपं तज्जननयोग्यत्वमक्षतम्।

तल्लाभश्च जातिविशेषोपस्थापकशाब्दवाक्यपदयोरूपसन्धानादेवेति।

अन्यूनेत्यादि। तथा चोद्देश्यानुमितिसमानविषयकलिङ्गाविषयक-शाब्दज्ञानजनकन्यायावयत्वमर्थः। व्यतिरेकिणि ह्रदो निर्धूम इत्यादौ निर्वह्नित्वहेतुके यथा ह्रदभिन्नमिति दृष्टान्तवतो ह्रदावृत्तिधर्म-शून्यत्वादिहेतुके वा उदाहरणस्य वारणाय समानविषयकान्तम् पक्षमुख्यविशेष्यकार्थकम्। उपनयवारणाय लिङ्गाविषयकेति।

यद्यपि प्रकृतलिङ्गाविषयकत्वं पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् (गन्धवती तथा गन्धादित्यादावव्यापकम्। न चात्रोपनयासम्भवः इदमा गन्धवत्त्वेन परामृष्टे हेतुभूतगन्धवत्वान्वयायोगादिति वाच्यम्। साध्याभावव्यापकगन्धाभावाभावत्त्वेनान्वयात्।

अत एव व्यतिरेकिणि न च नेयं पृथिवीत्यादिकः प्राचां प्रयोगः।

यदि च दण्डवान् रक्तदण्डवानित्यस्यान्वयो नानुपपन्नः तद्विशिष्टे शुद्धत द्विशिष्टान्वयस्यैवाव्युत्पन्नत्वादित्युच्यते। तदा नानुपपत्तिगन्धोऽपि।

पक्षाविशेषणत्वेन तदविषयकत्वञ्चायं वह्निसामग्रीमान् वह्नेरित्यादौ

पक्षाविशेषणत्वेन साध्याविशेषणत्वेन तदविषयकत्वञ्च,

नेति नेदं चैत्रस्येत्यादौ चैत्राभावबोधने[366] भूतले न घट इत्यादाविवानुयोगिनि सप्तम्यपेक्षेति हृदयम्।

दधि द्रव्यं दध्नः प्रमेयत्वमभिधेयं प्रमेयत्वात् गोत्वाभावो न सास्नादिमान् गोत्वाभावादित्यादावव्यापकमतिव्यापकञ्चोपनयस्य।

तथापि पक्षतावच्छेदकविशिष्टपक्षे यत्साध्यतावच्छेदकविशिष्ट-साध्यवैशिष्ट्यावगाहित्वं तद्बहिर्भावेण लिङ्गविषयत्वस्याभावो वाच्यः।

वस्तुतो लिङ्गं लिङ्गत्वम्। तथा च प्रकृतहेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतौपयिकं यद्व्याप्तिविषयकत्वं तच्छून्यत्वमर्थः।

तच्च हेतौ साध्यव्याप्यत्वावगाहित्वं, हेतुभूताभावप्रतियोगिता-वच्छेदकावच्छिन्ने साध्याभावव्यापकत्वावगाहित्वञ्चः द्रव्यत्वव्याप्य-संयोगवद्वृत्तिधर्मवानयं द्रव्यत्ववान् गुणात्। गुणव्याप्यरूपवानयं स्पर्शवान् रूपादित्यादौ प्रतिज्ञासङ्ग्रहायावच्छेदकद्वयोपादानम्।

अन्यूनानतिरिक्तपदमिति च मूलमुद्देश्यानुमित्यन्यूनानतिरिक्त-विषयभागपरम्। हेतुत्वमभिधेयं प्रमेयत्वादित्यादौ पञ्चम्यर्थपक्षक-हेतुवारणाय पञ्चम्यन्तान्यत्वस्य हेत्वन्यत्वस्य वाऽवश्यं वाच्यत्वात्।

संख्यातिरिक्तसुबर्थस्य प्रकृत्यर्थविशेष्यत्वेनैवाऽन्वयात्। प्रातिपदि-कार्थयोः क्रियाप्रातिपदिकार्थयोश्च साक्षाद्भेदेनाऽन्वयस्याऽ-व्युत्पत्तेर्वक्ष्यमाणत्वात्।

चैत्रस्येदं न मैत्रस्य, मैत्रस्येदं न चैत्रस्य, द्वयोरिदं नेदमेकस्यापीत्यादौ चैत्रादिसंबन्धाभावबोधस्य विभक्त्यर्थविशेष्यतां विनाऽनुपपत्तेः।

चैत्रो न पचतीत्यादौ तिङर्थस्येव विनाप्यनुयोगिनि सप्तमीं सुबर्थस्याप्यभावान्वयात्।

प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेत्, न, विप्रतिपत्त्यग्रे हि समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनो वाकाङ्क्षायां शब्दानित्यत्वं साध्यं, न च साध्यनिर्देशं विना हेतुप्रवाक्यं निष्प्रतियोगिकमन्वयं

हेतुविषयकज्ञानजनकत्वव्याप्याऽवयवतावच्छेदकरूपशून्यत्वे सति उदाहरणान्यन्यायावयवत्वं तत्त्वम्। तादृशावच्छेदकं हेतुत्वादिकमिति केचित्।

हेत्वभिधानेति। जिज्ञासाजनकत्वं–तद्योग्यता। वाक्यत्वं–

मिश्राणां व्याख्यानमुपन्यस्यति **हेतुविषकेति**। हेतुविषयकज्ञान-जनकत्वसमानाधिकरणं प्रतिज्ञात्वम[367]पीत्यतो व्याप्येति हेतुविषयकज्ञानजनक-त्वव्याप्यमपि **तत्तत्प्रतिज्ञात्वमित्यवयवतावच्छेदकेति**। उदाहरणत्वमपि न **लिङ्गविषयकज्ञानजनकत्वनियतमित्युदाहरणान्येति**। उदासीनवारणाय **न्यायावयवेति**। अत्राहुः अवयवत्तावच्छेदकमिह[369] सकलहेत्ववयवसाधारण-हेतुत्वादिकं विवक्षितमुत तत्तल्लिङ्गकहेतुत्वादिकमाद्येन[370] तत्प्रकृतलिङ्गविषय-कस्वव्याप्यं लिङ्गत्वस्य केवलान्वयितया लिङ्गपदेन प्रकृतलिङ्गस्यैवाभिधानात् अन्त्ये गन्धवत्पक्षक प्रतिज्ञात्वमपि लिङ्गविषयकज्ञानजनकत्वनियत-मित्यव्याप्तितादवस्थ्यमत एवास्वरसादत्र केचिदित्युक्तमिति गौडाः। तच्चिन्त्यम्[371] तथापि हेतुसाध्यपक्षेषु यो यो येन येनावयवेन ग्राह्यस्तद्भेदेनावयवतावच्छेदकं रूपं भिद्यते गन्धवत्पक्षकभेदसाध्यक यावत्प्रतिज्ञासाधारणप्रतिज्ञात्वं न प्रकृतहेतुविषयकज्ञानजनकत्वनियतं पृथिवीत्वहेतुकप्रतिज्ञायां तदभावात् प्रकृतपदेन स्वसमभिव्या-हृतहेत्ववयवप्रतिपाद्यहेतोरभिधानात् हेत्ववयवत्वं तु हेतुभेदादेव भिन्न[372] हेतुविष-यकज्ञानजनकत्वनियतमुपनयत्वनिगमनत्वेऽपि नयेति ध्येयम्।

वस्तुतो मिश्रैरपि प्रथमतो लिङ्गाविषयेत्यत्र नञव्यत्यासेन लिङ्ग-विषयकज्ञानजनकत्वनियतावयवान्यत्वमर्थमुक्त्वा पश्चादित एवास्वरसात्तेनो-दाहरणाद्यवयवचतुष्टयान्यत्वं पर्यवसितमिति न काप्यनुपपत्तिरिति कण्ठतः

बोधयितुमीष्टे। न च वादिवाक्येऽनुपस्थितमपि योग्यतया अन्वेति, अतिप्रसङ्गात्। न च विप्रतिपत्तितः साध्योपस्थितिः, तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरितत्वात् परविप्रतिपत्तिं समयबन्धञ्च विना स्थापनाया अभावात् विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण पर्य्यवसितत्वेन निराकाङ्क्षत्वाच्च, आवृत्तौ तु सैव प्रतिज्ञा। न चावयवान्तराद्धेत्वन्वययोग्या साध्योपस्थितिः, नाप्यवयवान्तरेणाक्षेपात्, साध्यान्वये तदभिधानं तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात्। तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेहाक्षेपः।

अन्ये तु(१२) शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा किन्तु विशिष्टे, विशिष्टन्तु विशेषणं साध्यमनभिधाय न शक्याभिधानं। न च वस्तुतो यत्साध्यं तत्र प्रमाणं वदेति मध्यस्थनियोगः, वादिद्वयमध्ये तदसम्भवात् तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा, न वान्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति। इति प्रतिज्ञालक्षणम्

न्यायावयवत्वम्। लिङ्गेत्यादि। लिङ्गाविषयकेति पूर्वोपदर्शितार्थकम्। अभावहेतुकव्यतिरेक्युदाहरणवारणाय लिङ्गीति। लिङ्गी—साध्यं—तद्विषयकं—तद्वद्विशेष्यकम्।

कथितमिति हेत्वाद्यवयवचतुष्टयान्यन्यायावयवत्वमेव समञ्जसं लक्षणमिति मन्तव्यम्। ननूदाहरणे न व्याप्तिरूपनयेन पक्षधर्मता चोपनीतेति। तदा तदुभयविशिष्टलिङ्गपरामर्शात् निगमनेन साक्षादेव स्वार्थानुमितिहेतुः परामर्शो जन्यत इत्यनुपपन्नानि सर्वाणि प्राचीनानि लक्षणानीत्यत आह मूले निगमनञ्चेति परामर्शः। स्वार्थानुमित्युपहितः अबाधितेति। अबाधितः असत्प्रतिपक्षिततत्वज्ञानजनो यत्र तादृशत्वादिति विग्रहः। प्रतिपक्षो विषयः जनः समूहः। तथाचासद्विषयकत्वस्याप्रामाण्यस्य ज्ञानसमूहः प्रकृते न बाधित इति। तज्जनितः परामर्शः

तेनेदं जलं निःस्नेहत्वप्रकारकप्रमाविषयशून्यत्वत्वात् इदं द्रव्यं जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वादित्यादौ यन्न जलं तन्निःस्नेहत्वप्रकारकप्रमाविषयः इत्युदाहरणे नातिप्रसङ्गः। लिङ्गाविषयकेत्यस्य पूर्वोक्तव्याप्यत्वाविषयकार्थकत्वे तु हेतुवारणाय लिङ्गीति।

लिङ्गिविषयकत्वं च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतु-विशिष्टहेतुत्वविषयताबहिर्भावेण वाच्यम्।

लिङ्गविषयकज्ञानजनकत्वाऽनियतलिङ्गिविषयकज्ञानजनकत्व-नियतावयवताच्छेदकरूपवत्त्वं तत्त्वमित्यादिकं तु तादृशरूपान्तरापरिचये

कथं स्वार्थानुमितिमुपदधीत। अप्रामाण्यशङ्कायाः स्वार्थानुमितिविरोधित्वादिति भावः। जिज्ञासानुपधायकप्रतिज्ञायामव्याप्तिरत[374] आह दीधितौ योग्यतेति। योग्यता नुतु पूर्वत्वमात्रम्। तेन यस्य न्यायस्यावयवत्वं तन्न्यायीयहेत्ववयवपूर्ववर्त्तित्वं लभ्यतेऽतो[375] न्यायान्तरावयवान्तरे तन्न्यायपूर्वोच्चरितेनातिप्रसङ्गः। लिङ्गाविषयकेति मूलम्। **अत्र[376] मिश्राः** लिङ्गं साध्यं तद्विषयकं तद्विधेयकं यज्ज्ञानं **तज्जन्यत्व-मर्थः**। पर्वतो वह्निमानित्यादौ वह्निरेव विधेयो न तु तस्य सम्बन्धः सम्बन्धी वा तयोरनभिधाने वह्नेर्विधातुमशक्यतया तद्विधानार्थमेव तदभिधानात्। उदाहरणे तु स वह्निमानित्यादौ वह्निर्न विधेयः किन्तु वह्निमुद्दिश्य धूमवदवृत्तित्वं अन्यद्धि प्रकारत्वमन्यच्च विधेयत्व[377]मित्थमुपनयस्थायं पदानुषङ्गेन साध्यविधेयकबोधजनके निगमनेऽतिव्याप्ति[378]वारणाय लिङ्गाविषयकेति लिङ्गाविषयत्वं तु निरूक्तलिङ्गत्वाविषयत्वमितरथा[379] पृथिवी भिद्यते पृथिवीत्वा[380]-दित्यत्राव्याप्तिप्रसङ्गात् लिङ्गाविषयत्वमन्यथा व्याचष्टे। पूर्वोपदर्शितार्थकमिति प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयता वहिर्भावेन लिङ्गाविषयकेत्यर्थः[381]। अभावेति। ह्रदो निर्द्धूमो निर्वह्नित्वादित्यत्र यो यो धूमवान् स वह्निमानित्युदाहरण-वारणायेत्यर्थः। तेन तद्वद्विशेष्यक-पर्यन्ता[382]नुसरणेनात्र स्नेहसमवायिकारणता-वच्छेदिकाया जलत्वजातेः परमाणुवृत्तित्वे व्यभिचारात् स्थलान्तरमाह इदं द्रव्यमिति।

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जक-विभक्तिमल्लिङ्गवचनमेवोचितं अन्यथानाकाङ्क्षिताभिधाने निग्रहापत्तेः लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः, हेतुत्वञ्चानुमितिकारणीभूतलिङ्ग-परामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतु-

---

दुर्ग्रहत्वादनुपादेयम्।

तेन वह्निमान् वह्निसामग्रीमत्त्वात् अयं हेतुरिदं वा हेतुत्वं तत्त्वेन प्रतीयमानत्वादित्यादौ नातिप्रसङ्गः।

इति दीधितौ प्रतिज्ञालक्षणम्।

ननु प्रकृतपक्षे साध्यवैशिष्ट्यविषयतावहि[383]र्भूतत्वेन लिङ्गाविषयकं यत् साध्यवद्विशेष्यकं ज्ञानं तज्जनकन्यायावयवत्वस्य प्रतिज्ञालक्षणत्वे धूमाभाववान् वह्न्यभावादित्यत्र यत्र यत्र धूमस्तत्र[384] तत्र वह्निरित्युदाहरणेऽति-व्याप्तिस्तज्जन्यबोधस्य साध्यवद् धूमादिमुख्यविशेष्यकत्वादतः कल्पान्तरमाह **लिङ्गाविषयेत्यस्येति पूर्वोक्तेति।** प्रकृतहेतोः प्रकृतसाध्यसिद्ध्यौपयिकेत्यर्थः।

ननु लिङ्गिविषयत्वं यदि साध्यवद् विशेष्यकत्वं तदा घटोऽभिधेयः प्रमेयत्वादित्यत्र हेत्ववयवेऽतिप्रसङ्गः[384(2)] हेतुत्वस्यापि साध्यत्वात्। अथ साध्यविषयकत्वमात्रं तदा पर्वतो वह्निमान् वह्निसामग्र्या इत्यत्र हेत्ववयवेऽति-व्याप्तिरतोऽन्यथा निर्वक्ति प्रकृतेति हेतुतावच्छेदकावच्छिन्नस्य फलमाह वह्निमानिति हेतुविषयतेत्यस्य[384(3)] फलमाह अयं हेतुरिति।

ननु लिङ्गिविषयकेत्यस्य साध्यतत्पक्षावगाहित्वार्थकत्वेऽपि तथाविधहेतुवारणं। सम्भवति हेत्ववयवजन्यबोधस्य हेतुत्वात्मकसाध्य विशेष्यकत्वादिति हेतुत्वत्वसाध्यकं न्यायमाह इदं चेति। तथाच प्रकृते हेतु प्रकारता निरूपित हेतुतात्वा[385]वच्छिन्न विशेष्यता वहिर्भूत विषयताकत्वमेवात्रलिङ्गि[386]विषयकत्वं वाच्यम्। अन्यथा पर्वत एको धूमादित्यत्र

विभक्तिमच्छब्दत्वं।

हेतुत्वप्रतिपादकविभक्तिमन्यायावयवत्वं वा।

उदाहरणप्रयोजकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा।

अनुमितीत्यादि। जनकान्तं न्यायावयवार्थकम्। निगमनवारणाय साध्याविषयकेति।

साध्याऽविषयकत्वं च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयताबहिर्भावेण, पूर्वोपदर्शितसाक्षात्परंपरासाधारणप्रकृतपक्षविशेषणत्वेन वा तेन पूर्वोपदर्शितहेतौ नाव्याप्तिः

प्रकृतहेतूपरक्तहेतुत्वविषयतावहिर्भावेनैकत्वग्राहकस्य हेत्ववयवस्य [387]दुर्वारतापत्तेः। अयं यागवान् यागकृतेरिति न्याये यत्रानुकूलतासंसर्गेण यागसम्बंधिनी कृतिहेत्ववयवेनाभिमता तत्र यागानुकूलाभिन्नकृतित्वेन हेतुप्रयोगेऽतिव्याप्तेश्चेति ध्येयम्। एतेनेत्यादिमूलं पञ्चभिरवयवैरेकवाक्यतया जनिते वाक्यार्थबोधे विद्यमानां जातिमादायावयवमात्रेऽतिप्रसङ्गः स्यादित्यत आह **कृतकृत्वादिति।** अवयवान्तरजन्यज्ञानावृत्तिरपूर्व विशेषज्ञानजनकतावच्छेदिका शापानुग्रहादिशब्दनिर्वचनानुरोधात् सिद्धा शब्दत्वान्तरं जाति स्तद्योगिज्ञानजनके शापादिरूपोदासीनवाक्येऽतिव्याप्तिवारणाय वृत्यन्तं जातिविशेषणं लिङ्गिधीर्न्यायजन्यो महावाक्यार्थबोधः **तत्परं** तज्जनकं वाक्यजन्यज्ञानमवयवजन्यो महावाक्यार्थबोधः तद्वृत्ति- रवयवान्तरजन्यज्ञानावृत्तिर्या जाति तदाश्रयजनकत्वं प्रतिज्ञैकदेशेऽ[389]तिव्याप्तिमतः शब्दोऽनित्य इति ज्ञानाकारप्रदर्शनम्। तथाच तथाविधाकारकविजातीयशाब्दत्वावच्छिन्न[390]जनकत्वं लभ्यते। एतन्मते पञ्चभिरवयवैः पञ्चवाक्यार्थबोधाविजातीयास्ते स्वजन्यसंस्कारद्वारान्यायजन्ये विजातीयवाक्यार्थबोधे कारणानीति वासना। अथ हेत्वादिचतुरवयवक एव न्याय इति वादी प्रत्यवतिष्ठते नन्विति न साधनाङ्गं न न्यायावयवः पक्षः साधनीया कोटिः तस्याःपरिग्रहे स्मरणे तत्र विप्रतिपत्तौ प्रमाणे न हेतुपञ्चम्या सहाकांक्षायां प्राथम्यात्

साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा।

प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा।

इदं न दण्डाज्जातं दण्डसंयोगाजन्यद्रव्यत्वात्, अयं न धूमादालोकवान् आर्द्रेन्धनशून्यत्वादित्यादौ व्यतिरेक्युदाहरणस्य,

हेतुत्वपक्षकसाध्यान्वितस्वार्थबोधकेदं पदशालिनः उपनयस्य च

प्रथममेवाभिधातुं योग्यत्वात् तथाच शब्दो नित्योऽनित्यो वेति विप्रतिपत्त्या अनित्यत्वादिकोटेः स्मरणम् अनित्य इति पदेन सह कृतकत्वादित्यस्याकाङ्क्षा च[391] विद्यते इति प्रथममभिहितेनापि हेतुना विप्रतिपत्तिवाक्यसहकृतेनाभिमतबोधनिर्वाहादलं प्रतिज्ञयेति भावः। विप्रतिपत्तिघटकहेतुसाकाङ्क्षपदजनिता पदार्थोपस्थितिरेव नास्तीत्याह नेत्यादि। आकाङ्क्षायां नियोगे प्रतिवादिविप्रतिपत्या तन्नियोगेन एवञ्च विप्रतिपत्तिवाक्यजनिता पदार्थोपस्थितिः समवा[392]यसम्बन्धेन परनियोगेन चान्तरितेतिं पदजन्यपदार्थोपस्थित्यभावान्न प्रतिज्ञां विनाभिमतबोधनिर्वाह इति भावः। इत्थं पदजन्यपदार्थोपस्थित्यभावान्न प्रतिज्ञया विनाभिमतबोधनिर्वाह इत्युपपाद्य विप्रतिपत्ति[393]वाक्यघटकं पदं हेतुना सह साकाङ्क्षमपि न भवतीत्याह **विप्रतिपत्तिवाक्यस्येति**। पक्षपरिग्रहो नित्यत्वतदभावादिकोटिकः संशयः [394]तत्पर्यवसितत्वेन निराकाङ्क्षत्वादिति हेत्ववयवेनेति शेषः। शब्दो नित्यो न वेति विप्रतिपत्तिवाक्ये नित्यतदन्योन्याभावौ पदार्थविधया वाक्यार्थविधया चोपस्थितौ वाकारार्थे संदेहे विषयतयान्वितौ संदेहस्तु शब्दान्वयीति नित्यतदन्योन्याभावकोटिकसंशयविषयः शब्द इत्यन्वयबोधः। तत्र हेत्ववयवार्थस्तद्धेतुकत्वं न वाकारार्थेऽन्वेति बाधात्। नापि नित्यपदार्थे नित्यज्ञाने विप्रतिपत्तिस्थनि[395]त्यशब्दस्य ज्ञानलाक्षणिकत्वाभावात्, अन्यथा तस्य विषयतया सन्देहेऽन्वयो न स्यात्। यदाहुर्मिश्राः प्रतिज्ञासाधनाङ्गमेव विप्रतिपत्तेः, साध्यपरतया हेतुत्वेऽनाकाङ्क्षित[396]त्वेन ततः प्रतिज्ञाफलनिर्वाहादिति। नापि ज्ञापकत्वं ज्ञाप्यत्वं वा हेत्वर्थ इति मतेऽपि सन्देहविशेषणमित्यादि[397]पदार्थे तदन्वयौपरयिकाङ्क्षा अन्यथा धूमात् पर्वतो वह्निमान्नवेत्यादि वाक्यस्यापि

वारणाय हेतुविभक्तिमदिति। तदर्थश्च प्रकृतसाध्यान्वितस्वार्थ-बोधनक्षमार्थोपस्थितिजनकविभक्तिमत्त्वम्।

हेत्विति संपातायातम्।

यदि च पर्वते पर्वतभिन्नत्वप्रकारकज्ञानस्य विशेष्यतया अभावस्य साध्यत्वं हेतुत्वं च सिषाधयिषया च न्यायप्रयोगः तत्र यथा तादृशज्ञानाभावादुत्पन्नं ज्ञानमिति दृष्टान्तशालिनि व्यतिरेक्युदाहरणेऽति-व्याप्तिरित्युच्यते।

तदा अवयवान्तरोपस्थापितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वं वक्तव्यम्। उदाहरणान्यत्वेन वा विशेषणीयम्। केचित्तु साध्य-

---

योग्यत्वापत्तेरिति भावः। अथ न वा पदं विना कृतस्य शब्दो नित्य इति भागस्य पुनरनुसंधानान्तज्जनितप[398]दार्थोपस्थितिस्तस्य हेत्ववयवेन सहाकाङ्क्षा च सम्भवतीत्यत आह आवृत्तौ त्विति।

न चावयवान्तरादिति उदाहरणात् साध्यं प्रतीयमानमिपि न पक्षता-वच्छेदकावच्छेदेनान्वेति किन्तु हेतुमत्त्वावच्छेदेन निगमनात् पुनरुपनयस्थायं पदानुषङ्गतः पक्षे प्रतीयमानमपि साध्यं न हेत्ववयवयोग्यं तस्मादित्यनेनावरु-द्धत्वादिति भावः। **आक्षेपादिति** हेत्वव[399]यवयोग्यसाध्योपस्थितिरित्यनुषज्यते। तथाचोदाहरणोपनयाभ्यां साध्यवान् पक्ष आक्षिप्यते। तत्र हेत्ववयवार्थान्वय इत्याशंकितुराशयः साध्यान्वये। साध्यहेत्वोः ज्ञाप्यज्ञापकभावान्वये। तदभिधानमु दाहरणा[400]भिधानम्। हेतोः साध्यज्ञापकतोपपादकतया ह्युदाहरणोपनययोः प्रयोग इति भावः तस्मादिति गां वधान नेत्यादौ जातेवननकर्मत्वप्रतीत्यनुपपत्या व्यक्तिराक्षिप्यते न चेह तथा वह्निमत् पर्वताक्षेपं विनाप्यु[401]दाहरणवाक्यार्थ-बोधनिष्पत्तेः पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ दिवसा भोजिनः पीनत्वं प्रतीतमपि रात्रिभोजनं विनाऽनुपपन्नमिति तदाक्षिपति। न चेह तथा वह्निमत् पर्वतं विना धूमवत्त्वावच्छेदेन वह्निमत उदाहरणवाक्यार्थस्यानुपपत्ति-विरहात्। यद्यप्युपनयवाक्यार्थो धूमवान् पर्वतः, पर्वते वह्निमतामन्तराऽनुपपन्न

विषयकधीजनकत्वानियतहेतुविभक्तिमत्त्वनियतावयवतावच्छेदक-रूपवत्त्वं समुदितलक्षणार्थम् इत्याहुः।

तच्चिन्त्यम्। हेतुत्वप्रतिपादकेति। विभक्त्यर्थहेतुत्वविशेष्यकान्वय-बोधजनकन्यायावयवत्वमर्थः। हेतुत्वं प्रमेयमित्यादिप्रतिज्ञावारणाय विभक्त्यर्थेति। तस्मादितरेभ्यो भिद्यत इत्यादिनिगमनवारणाय हेतुत्वेति विशेष्येति च। घटो दण्डात् वह्निर्धूमादित्यादिकाः न प्रतिज्ञाः। तदवृत्तेरतदात्मनश्च तद्धर्म व्यापकत्वायोगात् सम्प्रदायविरोधाच्च। तेन तत्रत्यनिगमने नातिप्रसङ्ग इति भावः।

उदाहरणेति क्वचिज्जिज्ञासानुत्पादेऽपि तद्योग्यतासत्त्वान्नाव्याप्तिः।

अनुक्तोदाहरणस्थलेऽपि तादृशस्वरूपयोग्यतासत्त्वात्तद्वारणाय

इति तदाक्षेपे क्षमते तथापि न च वादिवाक्यादनुपस्थितिमपि योग्यतयाऽन्वेत्यति-प्रसङ्गादिति पूर्वोक्ते निर्भरः। अन्ये त्वित्यारभ्य तदसंभ[402]वादित्यत एक एव सन्दर्भः। अत एव मिश्रैरन्येषां मते शब्दानित्यत्वे प्रमाणं वदेति वाक्यं साध्यविशेषितस्य साध्योपलक्षितस्य वा साधनस्याभिधाने नियोग इति निर्द्धारयितुं [403]शक्यते इत्यस्वरसमुद्भाव्य ततः पूर्वोक्तयुक्तिमुपसंहरति तस्मादित्यवतारितम्।[404]

साध्यनिर्देशानन्तरमिति कुत इति पञ्चम्यन्तमात्रोपलक्षकम् आकाङ्क्षा-समयः अनाकांक्षिताभिधाने। समयमतिक्रम्याभिधाने लोकेऽपि तथैव साध्यं निर्दिश्य हेतुरुपन्यस्तव्य इत्येवमाकाङ्क्षायाः **समयस्य** निवृत्तिरुत्सर्गः। तथाच प्रतिज्ञानन्तरं हेतुरभिधेय इति लोके शास्त्रे च समयबन्धात् साध्यनिर्देशानन्तरं हेतूपन्यास इति निगर्वः। एतेनावयवविच्छेदे वादिनो मध्यस्थस्य वा सर्वत्र कुत इत्याकाङ्क्षा नियमे प्रमाणाभावः। कस्यचिदन्यत्रैवाकाङ्क्षासंभवात् न प्रतिज्ञावाक्येन सह हेतुवाक्यस्य सङ्गतिप्रदर्शनमिदमित्य[407]साम्प्रतं सङ्गतेर्वाक्यैक-वाक्यतानिष्पादकतया[408] पदैकवाक्यतापन्ने तदुपदर्शनानौचित्यादत एवोपनयानन्तरं निगमनमिति संगतिप्रदर्शनं विना कृतमेव विनिगमनावतरणमग्रिममुपपद्यते।[409] अन्यथा प्रतिज्ञाभागयोरपि सङ्गतिप्रदर्शनप्रसङ्गादित्यादिसमाहितम्। जनकान्तस्य न्यायान्तर्गतत्वपरत्वे तस्मादिति निगमनैकदेशेऽतिव्याप्तिर्न च तच्छब्देन

न्यायावयवेति। उदाहरणत्वं चेदं न न्यायावयवत्वगर्भम्। वैयर्थ्यात् (साध्याविषयकेत्यादि अयं न दण्डात् दण्डसंयोगाजन्यद्रव्यत्वानित्यादौ प्रतिज्ञानिगमनयोर्वारणाय साध्याविषयेत्यादिव्याख्यातार्थकम्। उपनयविशेषवारणाय हेतुपञ्चम्यन्तेति)

हेत्विति हेतुत्वबोधकार्थकम्। हेतुपञ्चम्योर्वैकल्पिकमुपादानम्। उपनयस्य चान्तेऽनुसन्धीयमाना प्रथमैवान्तः। एवं दण्डादित्यादेः स्वपरस्यापि दृष्टान्तस्य पञ्चम्यन्तत्वे अन्वयायोगात् कस्यचिद्व्य-तिरेकिण उदाहरणस्य पञ्चम्यन्तत्वसम्भवे तु तद्वारणं पूर्ववत्। अत्र

साध्य[410]व्याप्यहेतोः परामर्शात् साध्याविषयकत्वदलेनैव तस्य वारणमिति मिश्रोक्तं युक्तम्, धूमाभाववान् वह्न्यभाववात यो यो धूमवान्[411] स वह्निमान् धूमव्यापकवह्न्यभाववानयं तस्मात् धूमाभाववानिति न्याये तस्मादिति तच्छब्देन धूमव्यापकवह्न्यभावत्वेनैव हेतोः [412]परामर्शात्तस्मादित्यस्य साध्याविषयकशाब्द[413] जनकत्वसंभवादतो दीधितौ न्यायावयवार्थकमिति। प्रकृतेति हेत्ववयवानां यादृशयादृशविषयताकबोधजनकत्वेन सम्प्रदायसिद्धत्वं तादृशविषयताबहिर्भूत-साध्यविषयाशून्यत्वं साध्याविषयकत्वमित्यर्थः। तेनानुकूलता संसर्गेण यागवत् कृतिहेतुके चैत्रो यागवान् यागकृतेरित्यादौ नाव्याप्तिः। साध्यपदोपादानं तु विभक्तिमत्त्वदलसार्थक्याय अन्यथा प्रकृतहेतुप्रकारक हेतुत्वविषयताबहिर्भूत-विषयताशून्यत्वदलेनैवावयवान्तरवारणे तस्य [414]वैयर्थ्यप्रसङ्गात्। इत एवास्वरसाद्वा पूर्वोपदर्शितेति यादृशसाध्यविषयताकत्वे न प्रतिज्ञाः सम्प्रदायसिद्धाः तादृशविषयताशून्यत्वस्वरूपं पक्षविशेषणत्वेन [415]साध्यविषयकत्वं वाच्यमित्यर्थः। प्रतिज्ञा[416] कुत्रचित् साक्षादेव पक्षे साध्यं गृह्णाति यथा चैत्रः पचति घटो नेतराणीत्यादौ कुत्रचित्[417] पदार्थमन्तरा कृत्वा यथा पर्वतो वह्निमान् पृथिवीतरेभ्यो भिद्यते इत्यादौ तथाच नानाविधविषयतानामनुगमनाय पूर्वोपदर्शितः प्रकार आश्रयणीय इत्यावेदयितुं साक्षात् परम्परया वेत्युक्तं निगमनं पुनरूपनयस्थायं. पदा नुषंगेन प्रतिज्ञातुल्यविषयताकबोधजनकमिति भावः। परे तु पूर्वोपदर्शितेति पक्षाविशेषणत्वेन लिङ्गाविषयकत्वमित्याशङ्कायां सूचितेत्यर्थः। तथाच प्रकृतपक्षविशेष्यतया साक्षात्परम्परया वा निरूपिताया साध्यविशेषणता

पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा। हेतुपदेन ज्ञाने लक्षणा अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्था-

---

चार्थवद्भागस्य हेतुपञ्चम्यन्तत्वं बोध्यम्। तेन निरर्थकतसिलन्ते वह्निप्रमात इत्यादौ नाव्याप्तिः।

पञ्चम्यादेः तसिलाद्यादेशत्ववादिनां नये तु नानुपपत्तिगन्धोऽपि। केचित्तु। हेतुपञ्चम्यन्तत्वं हेतुत्वप्रतिपादकपदशालित्वं पूर्ववत्।

साध्याविषयकबोधजनकत्वञ्च इतरनैरपेक्ष्येण प्रकृतहेतुत्वा-विशिष्टसाध्यविषयकज्ञानाजनकत्वं, साध्यं चेह न विवक्षितम्। वैयर्थ्यादित्याहुः पञ्चम्यन्तेति। अनुमितिपरवाक्यत्वमवयवत्वं हेतुत्वादौ

तच्छून्यज्ञानजनकत्वं वाच्यमित्याशय इत्याहुः। ह्रदो धूमाभाववान् वह्न्यभावा-दित्यादौ यो यो धूमवान्[418] स वह्निमानित्युदाहरणं यथाश्रुतेनापि हेतुविभक्तिमत्त्वत्वेन वारयितुं [419]शक्यते इति विवक्षा प्रयोजनमाह इदं नेत्यादिहेतुविभक्तिर्द्विविधाकारकार्थज्ञापकार्था च यथासंख्यं तयोर्निदर्शनमिदम् उदाहरणस्येति। तथाचेदं न दण्डाज्जातं दण्डसंयोगाजन्यद्रव्यत्वात् यत् दण्डाज्जातं तद्दण्डसंयोगाजन्यद्रव्यं[420] न भवतीत्युदाहरणे [421]न्यायावयवत्वमेवं साध्याविषयकबोधजनकत्वं यथाश्रुतहेतुविभक्तिमत्त्वं च वर्तते इति हेतुविभक्तौ प्रकृतसाध्यान्वयबोधनक्षम स्वार्थोपस्थापकत्वं विशेषणमावश्यकमेवं यो धूमालोकवान् स आर्द्रेन्धनवानित्युदाहरणे ज्ञापकत्वार्थकहेतुविभक्तिमत्त्वेनापि न प्रतिकार इति तथाविवक्षावश्यकीति भावः। उदाहरणस्येत्युपलक्षणम् धूमादालोकव्यापकार्द्रेन्धनाभाववानयमित्युपनयातिव्याप्तिवारणमपि तादृशविवक्षा-प्रयोजनमिति ध्येयम्।

विभक्तिमत्त्वविशेषणप्रवेशप्रयोजनमाह हेतुत्वपक्ष इति। हेतुत्वं न गुणो जात्यभावात् यो गुणः स जातिमान् गुणव्यापकजात्यभाववानयमित्युपनयस्थाये[422] पदस्य। तस्मान्न गुण इति निगमनोपस्थितिसाध्यान्वयबोधनक्षम स्वार्थोपस्थाप-कत्वहेतुत्वार्थकत्वयोः सत्त्वात् तद्वदुपनये साध्याविषयकबुद्धिजनकेऽतिव्याप्ते-

पञ्चमी लाक्षणिकी। वृक्षाद्विभजत इत्यादौ लाघवेनावधित्वे अवधिमत्त्वे वा शक्तत्वात्।

द्रव्यनिष्ठावधित्वमिव विभागनिष्ठमवधिमत्त्वमपि सम्बन्धविशेषः। स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत्। तत्सम्बन्धाग्रहेऽपि व्यवहारः, शक्तिभ्रमात्। वृक्षादपैति पततीत्यादौ लाघवाद्विभागे शक्तिः तज्जनकत्वं च क्रियायाः संसर्गमर्यादया भासत इत्यपि वदन्ति।

अतः पचम्यन्तेति लाक्षणिकविशेषणम्। तस्मादित्यत्र च तत्पदे न लक्षणा।

शक्त्यैव तादृशज्ञानोपस्थितिसम्भवात्। पर्वतो वह्निमान् वह्निसामग्रीमान् वा तस्मादित्यादिकस्तु न प्रयोगः सम्प्रदायविरोधादिति वदन्ति। यत्तु हेत्वन्वयानुरोधात् वह्निमानित्यादावपि ज्ञानलक्षणेति।

र्वारणाय विभक्तिमत्त्वप्रवेश[423] आवश्यक इति भावः। **तदर्थस्त्वित्यादि**। घटो न निषेधः सत्वात् यो यो निषेधः स न स न यथा वाच्यत्वादभाव[424] इति व्यतिरेक्युदाहरणस्य साध्याविषयकप्रतीतिजनकत्वमभावस्वरूप-साध्यान्वितस्वार्थबोधकहेतुविभक्तिमत्त्वं चास्तीति। तत्रातिव्याप्तिवारणाय साध्ये **प्रकृतेति**। यथाभावत्वान्निषेधत्वाभाव इति दृष्टान्ततदुदाहरण[425] पुनरसम्प्रदायिक-मेकत्र साध्ये हेतुद्वयोपन्यासो नैकन्यायगोचर इति नियमात् भवतु[426] वा तथा। तथापि साध्याविषयकत्वदलेनैव तद्वारणीयम्। प्रकृतहेतुविशिष्ट-हेतुत्वविषयताबहिर्भूतसाध्यविषयताकबोधजनकत्वात्। पूर्वोपदर्शितेत्यादिद्वितीय-कल्पे तु वक्ष्यमाणोदाहरणा[427]न्यत्वप्रवेशनमेव शरणमत एव **हेत्विति**। संपातायातमित्यभिहितम् अन्यथास्मिन्नेव व्यतिरेक्युदाहरणे यदि यथानिषेधत्वा-भाव इति दृष्टान्तस्तदा साध्यान्वितैकत्वस्वरूपस्वार्थोपस्थापकप्रथमाविभक्तिमति तत्रोदाहरणेऽतिव्याप्तिवारणाय हेतुपदप्रवेशावश्यकत्वप्रसङ्गात्। तज्जन्यबोधे प्रतिज्ञातुल्यविषयकत्वस्य साक्षात्परम्परया वा पक्षविशेषणतापन्नसाध्य-

नन्वयात्(१९) तथैवाकाङ्क्षानिवृत्तेः।

अनुमितिहेतुज्ञानकारणधूमवत्त्वादिशब्दजन्यज्ञानवृत्तिप्रतिज्ञादि-जन्यज्ञानावृत्ति- जातियोगिज्ञानजनकवाक्यत्वं हेतुत्वमित्यन्ये, जातिं विना केन रूपेण ज्ञानस्यानुमितिजनकत्वं वाक्यविशेष-जन्यत्वस्यापि जन्यतावच्छेदकरूपापरिचये दुर्ग्रहादित्यपरे।

तदसत्। पञ्चम्याः ज्ञापकत्वे ज्ञाप्यत्वे वा लक्षणयैवोपपत्तौ तत्र लक्षणायां मानाभावात्।

अत एवोक्तमावृत्तौ सैव प्रतिज्ञेति।

विषयकत्वस्य चाभावसत्त्वात् यदि चेत्यादिपर्वतः पर्वतभिन्नत्वप्रकारकनिर्णय-विशेषाभावात् तथाविधाभावात् यो यः पर्वतः भिन्नत्वप्रकारकनिर्णयवान् स तथाविधनिर्णयवान्[428] यथा पर्वतभिन्नत्वप्रकारकनिर्णयाभावादुत्पन्न[429] ज्ञानमिति व्यतिरेक्युदाहरणस्य साध्यान्वित[430]स्वार्थबोधकहेतुविभक्तिमत्त्वं तज्जन्यबोधस्य प्रकृतविशिष्टहेतुत्वविषयतावहिर्भूतसाध्यविषयताविरहश्च[431] पर्वत इत्यति-व्याप्तिः यदि च हेतुर्विभक्तिर्ज्ञाप्यत्वबोधिकैव प्रकृते उपादीयते तदापि तादृशनिर्णयाभावादाकाशाभाव[432] इति दृष्टान्तवत्युदाहरणेऽतिव्याप्तिर्दुर्वारा।

न च साध्यविशेष्यकान्वयबोधनक्षम स्वार्थोपस्थितिजनकत्वं हेतुविभक्तौ विशेषणमुपादीयतामियन्तु न तथेति वाच्यम्। साध्यान्वितस्वार्थबोधकेदं पदशालिन्युपनयेऽतिव्याप्तिवारकत्वेनोपात्तस्य विभक्तिपदस्य वैयर्थ्यप्रसङ्गात्। न च हेतुत्वं न गुणाद् इत्यादिन्याये गुणत्वव्यापकजात्यभाव इह तस्मान्न गुणत्वमिति हेतुसाध्यप्रधानकोपनयनिगमनाभिप्रायेण हेतुत्वपक्षक इत्यादिग्रन्थ इति वाच्यम्, तादृशप्रयोगस्य मिश्रैः कण्ठतो निराकरणात्। तत्र निगमनोपात्तेन साध्येन सहेदं पदसमभिव्याहृतसप्तम्यर्थस्यैवान्वयादिदं पदार्थस्य साध्यान्व-यायोगात् एवमपि पूर्वोपदर्शितेत्यादिद्वितीयकल्पे यथा पर्वतभिन्नभेदा-त्तथाविधनिर्णयाभाव इति दृष्टान्तवत्युदाहरणेऽतिव्याप्तेर्वज्रलेपत्वाच्चेति समुदायार्थः। सिसाधयिषया न्यायप्रयोगः सविवाद इति यदि चेत्युक्तम्, यद्वा प्रकृतहेतुविशिष्टहेतुत्वविषयतावहिर्भूता[433] तदव्यापिकाहेतुर्विशिष्टहेतुत्व-

अत एव व्याचक्षते यतो द्रव्यं गुणाः कर्मेत्यत्र हेतुत्वं यथासम्भवमुत्पादकत्वं ज्ञापकत्वं चेति। अत एव लोके किं वह्निमदिति पृष्टे तद् गृहं वह्निमदित्युत्तरिते कुत इति जिज्ञासा धूमवत्त्वादित्युत्तरं च। नहि तत्र ज्ञाने प्रश्नः। येन लक्षणया ज्ञानेनोत्तरयेत्।

न वा परकीयभाविप्रश्नानुरोधादजिज्ञासिताभिधानम्। न वा कुत इति प्रश्ने ज्ञातमित्यध्याहारः। मानाभावात्।

वैशिष्ट्यविषयतेति वैशिष्ट्यविषयताघटकसाध्यविषयताशून्यबोधजनकत्वाभावादेव निरूक्तोदाहरणे वारणीयमिति यदि चेत्युक्तम् अवयवान्तरतेति यद्यप्यवयवान्तरेण प्रतिज्ञादिनापि तादृशनिर्णयाभाव उपस्थापित इति तद्दोषतावदस्थ्यं [434]तथाचावयवान्तरघटकपदसाकाङ्क्षविभक्तिमत्त्वे तात्पर्यं लाघवोदाहरणान्यत्वेन[435] वेति। तच्चिन्त्यमिति। तादृशरूपान्तरापरिचय एव चिन्ताबीजं यथाश्रुतनिगमनेऽप्यतिप्रसक्तमतो व्याचष्टे विभक्त्यर्थेति विभक्तिप्रयोज्यहेतुत्व- मुख्यविशेष्यताकबोधजनकन्यायावयवत्वमर्थः। हेतुत्वं प्रमेयमित्यादिवाक्ये हेतुत्वनिष्ठा मुख्यविशेष्यता न विभक्तेः किन्तु प्रातिपदिकस्य प्रयोज्येति भावः। इदं हेतुत्वमिति तादात्म्येन हेतुत्वसाध्यकन्याये तस्माद्धेतुत्वमिति निगमने हेतुत्वमुख्यविशेष्यता न विभक्तिप्रयोज्या किन्तु प्रकारतैवातस्तत्र नातिव्याप्तिः। तदवृत्ते[436]रित्यादितादात्म्यभिन्नवृत्त्यनियामकसम्बन्धेन व्यापकत्वं नाभ्युपेयत इत्यर्थः। गगनादेर्मूर्त्तत्वव्यापकता स्वयमेव स्वीकृता। ज्ञाप्यत्वं पञ्चम्यर्थ इति मते वृत्त्यनियामकोऽपि सम्बन्धो **व्यापकतावच्छेदकः** सम्भवतीत्यत आह **सम्प्रदायेति।** सुबर्थे सुबर्थान्वये व्युत्पत्तिविरहमभिसंदधानाः साम्प्रदायिकाः साध्ये हेत्वन्वयानुपपत्तया घटो [437]दण्डादित्यादिन्यायमेव नाङ्गीकुर्वत इति भावः। उदाहरणेत्यादिमूलमुदाहरणं व्याप्यव्यापकभावप्रतिपादकं तस्य प्रश्नवाक्यादिक्रमेण प्रयोजिका कथमस्य ज्ञापकत्वमित्युपपादकजिज्ञासातज्जनको धूमो ज्ञापक इत्युपपाद्यशाब्दबोधस्तज्जनको न्यायावयवो हेतुरित्यर्थः। अत्र जनकतास्वरूपयोग्यता।[438] तेनोदाहरणं विना कृतस्यासाधकतासाधकन्यायस्य हेत्ववयवेनातिव्याप्तिरिति **मिश्राः**। अत्रासाधकतासाधकोऽपि पञ्चावयवक[439] एव न्यायो योग्यता च

दाहो दहनात् न जलात् जलं स्पर्शवत् रूपात् न गन्धात् नापि शब्दादित्यादौ नञर्थान्वयानुरोधात् जन्यत्वरूपहेतुमत्त्वं जन्यज्ञानविषयत्वरूपज्ञाप्यत्वञ्च पञ्चम्यर्थः। एवञ्च हेतुमत्त्वे शक्तावपि ज्ञाप्यत्वे लक्षणैव।

न च धूमादालोकवान्पर्वतो वह्निमान् धूमात् धूमाद्वह्निमत्सधर्मा पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायाम्, पर्वतो धूमाद्वह्निमानित्यादौ च तत्रत्यनिगमने चातिव्याप्तिः। प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापित प्रकृतसाध्यान्वितस्वार्थबोधकपञ्चम्यन्तलाक्षणिकपदवदवयवत्वस्य विवक्षितत्वात्। यत्तु अयमात्मा ज्ञानादित्यत्राव्याप्तिः शक्तयैव ज्ञानोपस्थितिसम्भवे लक्षणाविरहादिति।

रूपान्तरा परिचये दुर्ग्रहेति मिश्रव्याख्यायामनुशयानो भट्टाचार्यो मिश्रोक्तस्यैव जनकान्तार्थस्य योग्यत्वस्य पूर्ववर्तित्वमात्रमर्थ इति मेने। दीधितौ योग्यतासत्त्वादुदाहरणाव्यवहितपूर्वत्वसत्त्वात्। तथाचोदाहरणाव्यवहितपूर्ववर्तिन्यायावयवत्वं लक्षणार्थ इति भावः। अनुक्तेति अनुक्तमनुक्तोपनयनिगमनकं यदुदाहरणं व्याप्तिप्रदर्शकं वाक्यं तत्पूर्ववर्त्तिनि वाक्येऽतिव्याप्तिवारणाय न्यायावयवत्वं देयम्।

ननु तदुदाहरणमेव न भवतीत्यत आह–उदाहरणत्वं चेति। वस्तुतो[440] न्यायघटकव्याप्तिप्रदर्शकवाक्यपूर्ववर्तित्वं तन्न्यायावयवत्वं हेतुत्वं[441] वाक्यमेव। न [422]चेन्न्यायान्तरीणोदाहरणाव्यवहितपूर्ववर्तिनि न्यायान्तरीयनिगमनादावप्यतिव्याप्तिप्रसङ्गादिति ध्येयम्।[443]

साध्याविषयकेति मूलमत्रानुमितिपरशब्दत्वं न्यायावयवत्वम्। साध्या[444]विषयकेत्यस्य नञर्थो जनकत्वेनान्वेति तेन साध्यविषयज्ञाना[445]जनकन्यायावयत्वं हेतुपञ्चम्यन्तन्यायावयवत्वञ्चेति लक्षणद्वयम्। साध्यो विधेयस्तद्विषयकत्वं विधेयताख्यविषयताशालित्वमिति यावत् हेत्ववयवे विभक्त्यन्तद्वयाभावात्। उद्देश्यविधेयभावेनान्वयबोधो न सम्भवति प्रत्ययार्थमुद्दिश्य

तन्न। यद्विषयकज्ञानस्य हेतुत्वमवगतं तस्य व्याप्त्यादिजिज्ञासायां उदाहरणादिप्रयोगः।

न चेह ज्ञानविषयकत्वेनोपस्थितिर्विना लक्षणाम्। अन्यथा सुखादेरपि व्याप्त्याद्युपदर्शनप्रसङ्गात्। केचित्तु पञ्चम्यन्तलाक्षणिकपदवत्त्वनियतावयवताच्छेदकरूपवत्त्वं तादृशपदवत्त्वव्यभिचार्यवयवतावच्छेदकशून्यावयवत्त्वं विवक्षितमित्याहुः।

नव्यास्तु पञ्चम्याः ज्ञानज्ञाप्यत्वे लक्षणयैवोपपत्तौ न प्रातिपदिकेऽपि लक्षणा आकांक्षावैचित्र्याच्च पदार्थैकदेशेऽपि।

ज्ञाने प्रातिपदिकार्थो विषयित्वेनान्वेति कर्तृकृतीवकृतौ धात्वर्थः।

यद्धर्मविशिष्टश्च हेतुः प्रयुज्यते आकांक्षादिवशात्तद्धर्मविशिष्टस्यैव व्याप्यत्वमुपदर्श्यते अन्यथा यथार्थधूमज्ञानादित्यादिप्रयोगेऽपि

च प्रकृत्यर्थो न विधीयत[446] इति जन्यत्वे सति सत्त्वादित्यादावुद्देश्यविधेयभावेनान्वयबोधस्य क्वचित् सम्भवेऽपि सविधेयकज्ञानजनकत्वनियतावयवतावच्छेदकधर्मशून्यत्वं वक्तव्यमिति नाव्याप्तिः। अत एवालोके साध्यज्ञानाजनकत्वेन तज्ज्ञानजनकत्वानियतत्वमुक्तमित्युक्तं हेतुपञ्चम्यन्तेत्यत्र द्वन्द्वगर्भो बहुव्रीहिः, हेतुश्च पञ्चमी च हेतुपञ्चम्यौ तयोरन्तो विश्रामो यत्रेत्यर्थः पञ्चमी तदर्थः तेन हेतुतावच्छेदकावच्छिन्नविशिष्टहेतुत्वविषयताबहिर्भूतविषयताशून्यज्ञानजनकन्यायावयवत्वम् द्वितीयलक्षणार्थ इति मिश्रानुसारिणः यथा श्रुत साध्याविषयकत्वस्य पर्वतो वह्निमान् वह्निसामग्र्या इत्यादावव्याप्तेराह व्याख्यातार्थमिति[447] प्रकृतहेतुविशिष्टहेतुत्वविषयतावहिर्भावेन साध्याविषयकत्वार्थकमित्यर्थः। उपनयविशेषस्येति ह्रदो धूमाभाववान् वह्न्यभावादित्यत्र धूमव्यापकवह्न्यभाव- वानयमित्याकारकस्येति शेषः। उपलक्षणमिदं तत्रैव यो धूमवान् स वह्निमानित्युदाहरणस्यापि व्यावृत्तिरस्य फलमिति ध्येयं। वैकल्पिकमिति हेतुवाचकपदान्तरानुमितिपरशब्दत्वं पञ्चम्यन्तानुमितिशब्दत्वञ्चेति[448] लक्षणोत्तरदलद्वयमन्यतरस्यामिति भावः।

धूमादेर्व्याप्यत्वोपदर्शनप्रसङ्ग इति प्राहुः। इतरान्वितस्वार्थबोधकत्वे सति, स्वीयं यदन्त्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे सति अन्त्यपदवत्त्वे सति स्वीयानंत्यपदार्थविशेष्यकान्वयबोधाजनकान्यत्वे च सति न्यायावयवत्वं प्रतिज्ञात्वम्। प्रतिज्ञाहेत्वोरुपनयनिगमनयोः स्वार्थौं परम्परमन्वितौ। न तूदाहरणस्य केनापि। पदं विभक्त्यन्तम्। तेन निगमने नातिव्याप्तिः।

ननु प्रथमलक्षणे हेतुत्वं धूमाभाववद् वह्न्यभावात् यो यो धूमवान् स वह्निमान् धूमव्यापकवह्न्यभाववदित्यत्रोपनये[449] साध्यानवगाहिनि हेतुत्व-वाचके[450] पदं पदान्तेति व्याप्तिरत आह उपनयस्य चेति प्रथमैवेति। तथाचान्तत्वमानुसंधानिकं नत्वौपचारिकमिति भावः। द्वितीयलक्षणेऽतिप्रसङ्ग-निरस्यति एवं दण्डादिति [451]दृष्टान्तस्येति प्रथमैवान्तर[452] इति पूर्वेणान्वयः। अन्यथा घटो न शब्दोऽगुणत्वात् यच्छब्दः सगुणो यथा दण्डादिति स्वपरदृष्टान्तकोदाहरणेऽतिप्रसङ्गादिति भावः, उभयत्रान्ते प्रथमानुसन्धानबीजमाह पञ्चम्यन्तत्वे इतिनामार्थयोस्तादात्म्येनान्वये नाम्ना[453] समानविभक्तिकत्व-प्रतिसन्धानस्य तन्त्रत्वादिति भावः। कस्यचिदिति अत्रैव न्याये यथाशब्दः[454] पदत्वादिति पदत्वज्ञाप्यशक्तिमद्दृष्टान्तकमुदाहरणं पञ्चम्यन्तं सम्भवतीत्याशयः पूर्ववदिति उदाहरणान्यत्वप्रवेशेनेत्यर्थः। अत्र चेति पञ्चम्युत्तरसार्थक-पदाद्यघटितत्वे[455] सति पञ्चमीघटितत्वं पञ्चम्यन्तत्वं वा वाच्यमित्याशयः। पञ्चम्यादेरित्यादिपदाभ्यां[456] सम्प्तम्यन्ता देशाद्युपग्रहः नये त्वित्यनेन। स्वरसः सूचितः तथाहि पञ्चम्यन्तादेव तसिलं विधाय तसिलं तस्य तद्धितान्तत्वेन प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोरिति पञ्चमीलुप्यते न तु तसिलः पञ्चम्यादेशत्वं तथासति भ्यसादेशे तसिलपरे सर्वेभ्य इत्यत्रैव सर्वत इत्यत्राप्येकारप्रसङ्गात्।[457] स्त्रीलिङ्गसर्वशब्दात् परतस्तसिलि सर्वत इति प्रयोगानापत्तेः सर्वनाम्नो वृत्तिमात्रे पुंवद्भावेऽपि विभक्तिमुपजीव्य पुंवद्भावाप्रवृत्तेः भवतु वा तसिलपञ्चम्यादेशः तथापि अर्थवद्भागस्य हेतुपञ्चम्यन्तत्वं प्रवेशनीयमितरथा तसिलं तस्य कृत्तद्धितसमासाश्चेत्यनेन प्रातिपदिकसंज्ञायां सुबुत्पत्तौ सत्यामानुसंधानिकप्रथमान्तत्वेन पञ्चम्यन्तत्वाभावादिति दिक् पूर्ववदिति साध्यतावच्छेदकावच्छिन्न विशेष्यकप्रकृतहेतुविशिष्टहेतुत्वप्रकारकबोधजनक-

अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनक-हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वमन्वयिहेतुत्वं, एतदेव व्यतिरेकव्याप्त्यभिधायकपदप्रक्षेपाद्व्यतिरेकि हेतुत्वम्। अन्वय-व्यतिरेकोदाहरणाकाङ्क्षाप्रयोजकतथाभूतावयवत्वमन्वयव्यतिरेकिहेतुत्वं।

यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्वयव्यतिरेकि, अत्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरणपक्ष-सपक्षंसद्धेतुवचनं केवलान्वयि।

यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारण-साध्याविषयकशाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतु-विभक्तिमच्छब्दत्वमन्वयिहेतुत्वम्। एतदेवाप्रतीतान्वयसाध्य-

---

पदघटितत्वमित्यर्थः। तेन धूमादालोकवान् पर्वतो वह्निमान् धूमात् आलोकाद् वह्निमतस्सधर्मा पर्वतो वह्निमान् धूमात् धूमसमानकालीनवह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायां नातिव्याप्तिः। धूमाद् वह्निमत सधर्मा पर्वतो वह्निमान् धूमादित्यादिकः प्रयोगो नाभ्युपेयत इति भावः। तस्माद् वह्निमानिति निगमनेऽतिव्याप्तिवारणाय साध्याविषयकज्ञानजनकत्वं विशेषणम् तच्च वह्निमान् वह्निसामग्र्या[458] इत्यत्रातिव्याप्तमतो नञो जनकपदसाकाङ्क्ष-पदत्वेन व्याचष्टे इतरेत्यादि। प्रतिज्ञासहकारेण हेत्ववयवस्यापि तथाविधबोध-जनकत्वात् असम्भववारणायेतरनैरपेक्षेणेति साध्यँश्चेति।

तथाचेतरनैरपेक्षेण प्रकृतहेतुविशिष्टहेतुत्ववैशिष्ट्यावगाहिज्ञानाजनकत्व-मात्रं प्रकृते प्रवेशनीयं पर्वतो धूमज्ञाप्यवह्निमान् वह्निसामग्र्या इत्यादाव-व्याप्तिवारणाय हेतुत्वे प्रकृतहेतुविशिष्टत्वं विशेषणमिति भावः। मूले[459] प्रतिरोत्यादि प्रतिज्ञावाक्यजत्वं[460] यद्धि स्वरूपे जन्ये कारणकाङ्क्षानिवर्त्तकं ज्ञानं तज्जनकं[461] जनकान्तार्थः। धीः साध्यविषयिणीऽकारणाकांक्षानिवर्तकं ज्ञानं तज्जनकं जनकान्तार्थः। धीः साध्यविषयिणी [462]अकारणाकाङ्क्षा-प्रकृहेतुज्ञानजन्यत्वसंदेहः। तथाच प्रतिज्ञावाक्यजन्यं यत् साध्यज्ञानं

साधनेति विशेषणाद्व्यतिरेकि हेतुलक्षणं, कथायां धूमादित्येव प्रयोक्तव्यं न तु धूमवत्त्वादिति मतुपोव्यर्थत्वात्।

सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकं विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभक्त्यन्तरावरुद्धस्यानन्वयादिति केचित्। तन्न। सति सप्तमीबलात् सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः, न ह्ययमर्थोऽस्मान्नावगम्यते इति। (तत्त्वचिन्तामणौ हेतुग्रन्थः)

प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वम्। निगमनवारणायोपस्थापितान्तम्।

हेतुज्ञानकारणकं न वेत्याकारक संशयनिवर्तकं ज्ञानं तज्जनकत्वे सति इति निगर्वः। निगमनमपि तादृशसंशयनिवर्तकमिति[463]। प्रतिज्ञाजन्यत्वं ज्ञाने विशेषणम्। प्रतिज्ञानिगमनाभ्यां सम्भूयजनितं समूहालम्बनमादाय निगमनेऽतिव्याप्तिवारणाय तादृशसंशयनिवर्तकत्वं विशेषणम् तच्च साधारणं तदन्यव्याप्तिपक्षधर्मतादिसंशयानिवर्त्तकत्वं[464] पर्यवसितम् इति हेतुज्ञाप्यसाध्यवत् पक्ष इति विषयताबहिर्भूतविषयताशून्यज्ञानजनकत्वं निष्कृष्टार्थः। तच्च प्रतिज्ञायामपि गतमतो हेतुविभक्तिमदिति प्रकृतसाध्यान्वितार्थकहेतुविभक्तिघटितत्वं तदर्थस्तेन धूमादालोकवान् पर्वतो वह्निमान् इति प्रतिज्ञाव्युदासः, उदासीनवाक्येऽतिव्याप्तिवारणाय वाक्यत्वमिति न्यायावयवत्वमित्यर्थः। तेन प्रकृतहेतुकप्रकृतसाध्यकप्रकृतपक्षविषयताबहिर्भूतविषयताशून्यज्ञानजनकत्वे सति प्रकृतसाध्यान्वितार्थकहेतु विभक्तिघटित न्यायावयवत्वमिति समुदितार्थः। दीधितौ लक्षणान्तर्गत[465]मनुमितिपरवाक्यत्वं व्याचष्टे अवयवत्वमिति।

ननु लाक्षणिकपदवदनुमितिपरवाक्यत्वमित्येव साधु कृतम् लाक्षणिकपदे पञ्चम्यन्तत्वविशेषणेन[466] प्रतिज्ञायां कस्यापि पदस्य लाक्षणिकत्वाभावात् भावे वा प्रकृतपक्षान्वितप्रकृतसाध्यान्वितस्वार्थकत्वेन

प्रमेयत्वमभिधेयं प्रमेयत्वादित्यादौ प्रकृत्यर्थपक्षान्वितस्वार्थबोधकपञ्चम्यन्तार्थान्वितो न प्रतिज्ञार्थः। अपि तु तदेकदेशार्थ इति।

स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वम्। विशिष्टवैशिष्ट्याबोधजनकस्वार्थबोधजनकन्यायावयत्वम्। विशिष्टवैशिष्ट्याबोधजनकस्वार्थविशिष्टबोधजनकन्यायावयत्वं वा तत्त्वम्। एकवाक्यतया हेत्वर्थविशिष्टसाध्यवैशिष्ट्यं भासते न पुनरवयवान्तरार्थविशिष्टस्य कस्यचिदिति।

वक्ष्यमाणेन तद्वारणात् निगमने च लाक्षणिकं किमपि पदं सर्वनाम्नो लक्षणाविरहात् पञ्चम्याश्च हेतुताशक्तेरानुशासनिकत्वादित्यतः पञ्चम्या एव हेतुत्वे निरूढलक्षणासूचकमनुशासनमिति व्यवस्थापयति। हेतुत्वादावित्यादिना वदन्तीत्यन्तेन **लाक्षणिकीति।** हेतुताया गुरुत्वेन तत्र [467]शक्तेर्ग्राहकमनुशासनमपि तु निरूढलक्षणयेति भावः। कस्य शक्यस्य सम्बन्धः सूत्रेणानुशिष्यत इत्याकाङ्क्षायामाह लाघवेनेत्यादिलाघवमखण्डस्याबाधितत्वादेः शक्यतावच्छेदकत्वे अवधित्वे शक्तिग्राहकं तु पञ्चमीविभक्ते इति सूत्रमिति भावः। वृक्षाद् विभजते न स्वस्मादित्यादौ नञर्थस्यान्वयोपपादनाय[468] अवधिमत्त्वे वेति **अवधितात्वावधि मत्तात्वे** द्वावप्यखण्डौ धर्माववधिरवधिमा नित्यनुगताकारप्रतीतिसाक्षिकौ न तु तयोरेकशैषो विनिगमनविरहादित्याशयेनाह **द्रव्यनिष्ठमिति।** अतिरिक्तः सम्बन्धिद्वयात् अन्यदेतदिति [469]अवधित्वादिकन्त्वखण्ड एव धर्मोयल्लाघवेनातिरिक्तेऽनतिरिक्ते वावधित्वादौ शक्तिरित्यर्थः व्यवहारः शाब्दबोधः हेतुत्वादावित्यनुषज्यते। तथाचावधित्वरूप[470]शक्यसम्बन्धो यदा न गृहीतस्तदा शक्तिग्रहो हेतुत्वादिशाब्दबोधजनको भ्रम एवेति न ततो वस्तुसिद्धिरिति भावः। मतान्तरमाह वृक्षादपैतीत्यादिविभागावच्छिन्नक्रियैव चेदपेतः शक्यात्तथा सत्याह। पततीति विभागे शक्तिरिति अपादाने पञ्चमीत्यनुशासनसिद्धेति शेषः। विभागस्य शक्यत्वे वृक्षान्न पततीत्यादौ जनकता संसर्गावच्छिन्न प्रतियोगिताक विभागाभाव एव नञा क्रियायां प्रतिपाद्यते[471]। न चेदं सम्भवति जनकत्वस्य[472] वृत्यनियामकप्रतियोगितानवच्छेदकत्वादिति वृक्षात् पततीत्यादौ विभागजनकत्वमेव [473]पञ्चम्यर्थस्तत्रैव

हेतावुक्ते कथमस्य गमकत्वमित्याकाक्षायां व्याप्तिपक्ष-धर्म्मतयो: प्रदर्शनप्राप्तौ व्याप्ते: प्राथम्यात् तत्प्रदर्शनायोदाहरणम् तत्रानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनकव्याप्यत्वा-भिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनक-

---

गौरवात् लक्षणैवेत्यस्वरसात् वदन्तीत्युक्तम् अत इति पक्षविशेषणसाध्यान्वि-तार्थकलाक्षणिकपञ्चमीपदवतो निगमनस्य वारणायेत्यर्थ: इदमापातत: यद्यवधितात्वमवधिमत्तात्वञ्चाखण्डं तदा किमपराद्धं हेतुमत्त्वहेतुमत्तात्वाभ्यां[474] यदि च वृक्षात् पततीत्यादौ विभाग: शक्यस्तदा धूमा द्वह्निरित्यादौ ज्ञानं पञ्चम्या शक्यमित्यपि सुवचं ज्ञाने जन्यतया धूमपदार्थस्य धूमज्ञानस्यान्वयो ज्ञानस्य पञ्चम्यर्थस्य तु विषयतया वह्नावित्यनेन सर्वसामञ्जस्यादिति ध्येयम्।

ननु पञ्चम्यन्तपदोपादानेऽपि न निगमनवारणं धूमशक्यस्य [475]धूमज्ञान-लाक्षणिकस्य पञ्चम्यन्तस्य तच्छब्दस्य सत्त्वादित्यत आह। तत्पदे चेति तत्पदस्य धूमे ज्ञाने च शक्त्या द्वयोरुपस्थितयो: परस्परान्वयेन धूमज्ञानलाभात् लक्षणानावश्यकीति भाव:। यदि च तेजस्वी। **उत्तमादिति** न्याये तस्मात्तेज-स्वीति निगमनेऽतिव्याप्ति**रुत्तम**[476] गुणावच्छिन्नस्य गुरुत्वात्तत्पदस्योत्तम[477]गुण एव शक्ति: उत्तमगुणवति लाक्षणिकत्वादिति विभाव्यते तदा पञ्चम्यन्तलाक्षणि-केत्यनेन पञ्चम्यर्थान्वितलक्ष्यार्थकत्वं वाच्यम्। न च पञ्चम्यर्थान्वयिज्ञानं तच्छब्दलक्ष्यमिति नातिव्याप्ति: तस्मादित्याकारो यदि हेत्ववयव: स्यात् तदा तस्य लाक्षणिकपञ्चम्यन्तत्वाभावात् अव्याप्ति: स्यादिति। तन्निषेधति पर्वत इत्यादि सम्प्रदायेति साधारणशब्देन कथायां हेतु प्रयोगो नास्ति। अविज्ञातार्थकनिग्रहस्थानायातादित्याशय:। **मिश्रास्तु** यदवच्छेदेन लाक्षणिकपदवत्तानियमस्तथाविधावयवविभाजकोपाधिमत्त्वमुत्तरदलार्थ:। तावन्मात्रं लाक्षणिकसाध्यवाचकपदवत्यां प्रतिज्ञायामतिव्याप्तमत: पञ्चम्यन्तेति लाक्षणिकपदे विशेषणमित्याहु:। तन्मतैकदेशमुपन्यस्यति यत्त्वित्यादि। ज्ञानलक्षणेति ज्ञानं लक्ष्यं, वह्नि: शक्य इति तयो: [478]परस्परान्वयात् ज्ञायमानवह्निलाभ: ज्ञायमानत्वविशिष्टवह्नौ वा लक्षणा। पदार्थैकदेशे ज्ञाने हेतुपञ्चम्यर्थान्वय इति भाव:। पञ्चम्या इति उक्तयुक्त्या हेतुत्वेऽपि पञ्चमी

शब्दत्वमुदाहरणत्वं सामान्यलक्षणे साध्यसाधनसम्बन्ध-बोधजनकत्वं साध्य-साधनाभावसम्बन्धबोधजनकत्वञ्च विशेषलक्षणद्वयम्।

न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु न। दृष्टान्त-प्रयोगस्य सामयिकत्वेनासार्व्वत्रिकत्वात् यो यो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः।

इतरान्वितस्वार्थाबोधकन्यायावयवत्वमुदाहरणत्वम्। अन्वयव्याप्ति-बोधकतत्त्वं व्यतिरेकव्याप्तिबोधकतत्त्वं च विशेषलक्षणम्। इतरोपस्थापितार्थविशेषणकस्वार्थबोधजनकन्यायावयवत्वम्।

लाक्षणिकीति तस्या ज्ञापकत्वे प्राचां ज्ञाप्यते नवीनानां मते न लक्षणयैवाभिमतार्थबोधे किं साध्यपदे लक्षणा चेति भावः।

ननु हेतुत्वे निरूढ़लक्षणानुशासनिकी न तु ज्ञापकत्वेन चानुशासनात्[479] विभक्तीनां वृत्तिरभ्युपेयते **यदाहुर्मिश्राः**। न च ज्ञापकत्वं पञ्चम्यर्थः, समभिव्याहृतज्ञानं प्रति हेतुत्वेन ज्ञापकप्रत्ययोपपत्तेः पञ्चम्यर्थभेदकल्पनाया बाधितत्वादिति निषिद्धा चाननुशासनिकी लक्षणा भाष्यकारेण सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङां प्रसिद्धे नियमस्तत्र[480] नियमप्रकृतेषु वेति ये सुपां तिङां चार्थाः कर्मादयः ये च तिङां सुपां चार्थाः संख्यादयः तेषु कमादिष्वेव द्वितीयेति नियमः प्रसिद्धः। अथवा कर्मादिषु द्वितीयादिरेवेत्येवं प्रकृतेषु नियम इति तदर्थः, इति सर्वथानुशासनिकपञ्चम्यर्थान्वयानुरोधात् वह्न्यादिपदे ज्ञानलक्षणेत्यत आह अत एवेति पर्वतो वह्निमानिति विप्रतिपत्त्येकदेशस्यावृत्तिः प्रतिज्ञेति मूलं तदैव शोभते यदि विप्रतिपत्त्यर्थतुल्यः प्रतिज्ञार्थः स्यात्। न च ज्ञानलक्षणायां तथा शब्दार्थयोरेकाकारयोः पुनरनुसंधानमावृत्तिरिति भावः।

ननु पर्वतो वह्निमान्न वेति विप्रतिपत्तिवाक्ये वह्निमत्पदार्थो वाकारार्थे विकल्पे सन्देहस्वरूपेऽन्वेति स च विषयतया पर्वतेऽसमानाधिकरणयोरपि पदयोस्तुल्यविभक्तिकत्वनियमस्तु निपातविशेषस्वाभाव्यात्। अत एव पर्युदास

नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानविषयव्याप्त्युपनायकं वचनं तत्, उपनयातिव्याप्तेः, अत एव उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम् । एतदेवान्वयव्यतिरेकव्याप्तिविषयत्वविशेषितं विशेषलक्षणद्वयमित्यन्ये। अत्र च व्यभिचारवारणाय वीप्सामाहुः। यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थमिति तु वयं, वीप्सा च यत्पदे न तु तत्पदेऽपि विरूपोपस्थितयोरपि तत्पदेन परामर्शाद्बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः, यथा "यद्यत् पापं प्रतिजही जगन्नाथ नम्रस्य तन्म" इत्यत्र। इदञ्च साध्यसाधनोभयाश्रयविकलानुपदर्शितान्वयविपरीतोपदर्शितान्वयानुपदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकभेदादाभासरूपमिति।

(तत्त्वचिन्तामणौ उदाहरणग्रन्थः)

नञ् प्रतियोग्यनुयोगिपदयोस्तुल्यविभक्तिकत्वनियमो[481] दृश्यते, न तु विप्रतिपत्तिवाक्ये पक्षेको[482] यः संसर्गो भासते परोक्षसंशयानभ्युपगमात्। अत एव वाकारव्यवकलिततथाविधवाक्यात् न वाक्यार्थबोधः भासतां वा पर्वते तादात्म्येन वह्निमान् तथापि प्रतिज्ञावाक्यं न तत्तुल्याकारबोधजनकं प्रतिज्ञावाक्याद्धि धूमवदनुयोगिक[483]संयोगेन वह्निमतस्तादात्म्येन पर्वतेऽन्वयो न तु शुद्धसंयोगेन अत एवायोगोलकं वह्निमत् धूमादिति वाक्यं न प्रमाणं चायोगोलकं[484] न धूमात् वह्निमदिति धूमवद्वृत्तिसंयोगेन वह्निमतो भेदस्य नञा बोधनात् अथ प्रथमं प्रतिज्ञासंयोगेन[485] वह्निमत एव तादात्म्येनान्वयः यमादाय प्रतिज्ञायां विप्रतिपत्त्या वृत्तित्वव्यपदेशस्ततो हेतुसमभिव्याहारेण बोधे जायमाने हेतुमद्वृत्ति[486]संयोगेन वह्निमानेव भासते यतोऽयोगोलकं वह्निमत् धूमादित्यादिको न प्रयोग इति चेत् हन्त तर्हि प्राथमिके बोधेन ज्ञानलक्षणेति मिश्रैः कण्ठतः उक्ते कथं विप्रतिपत्या वृत्तित्वहानिः तदुक्तमात्लोके प्रतिज्ञालक्षणे [487]हेत्ववयवप्राक्कालिकमुख्यार्थबोधमादाय लक्षणसंगमनादिति इत्यह आह अत एवञ्चेति व्याचक्षते वर्द्धमानोपाध्याया इति शेषः।

उदाहरणानन्तरम्भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्त्तते न वेत्याकाङ्क्षायां भवतु व्याप्तस्य पक्षधर्म्मत्वप्रदर्शनायोपनयः, तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपनयत्वमिति सामान्यलक्षणं, साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वञ्च विशेषलक्षणद्वयम्, उदाहरणान्त एव प्रयोग इति न वाच्यं तृतीयलिङ्गपरामर्शस्य व्याप्तिपक्षधर्म्मतावगाहिनोऽवयवान्तरादलाभात् तदनभ्युपगमेऽपि पक्षधर्म्मताया अलाभात्। न च हेतुवचनादेव तदवगमः, तस्य को हेतुरित्या-

---

यथासम्भवमिति जन्यद्रव्यादौ हेतुत्वमुत्पादकत्वं नित्ये तु ज्ञापकत्वं यत इति पञ्चम्या प्रतिपाद्यते इति व्याख्यातुराश्रय इत्यभिप्रायः तथाच हेताविति सूत्रमेव ज्ञापके पञ्चम्यनुशासकं ज्ञापके हेतुपदप्रतिपाद्यत्वं [488]वर्द्धमानसिद्धमिति भावः।

नन्वेवं हेतुत्वमुत्पादकत्वमिति व्याख्यानादुत्पत्तिरपि पञ्चम्यर्थः स्यादर्थसिद्धव्याख्यानमिदमिति यदि तर्हि ज्ञापकत्वव्याख्यानमपि तथेत्यत आह अत एवञ्चेति इदमप्यापाततः तद्गृहं वह्निमदिति वाक्येन प्रथमं शुद्धवह्निमत्तैव गृहे[489] प्रत्याय्यते तदा वृत्तिसहकृतेन प्रश्नवाक्येन तु वह्निपदज्ञानलक्षणासहकृतेन किं [490]हेतुज्ञानविषयवह्निमदित्युत्तरीसता प्रत्येति ततो धूमादित्युत्तरति तेनोत्तरेण तद्गृहं वह्निमदिति पूर्ववाक्यवृत्तिसहकृतेन धूमज्ञानज्ञाप्यवह्निमदिदमिति प्रतिपाद्यः प्रत्येति।

न च तद्गृहं वह्निमदिति वाक्येन यावन्न [491]प्रतीतमभीष्टज्ञानविषयवस्तु तावद्बोधकमेव प्रश्नवाक्यमुचितमत्र चाभीष्टं ज्ञापकतावच्छेदकरूपावच्छिन्न ज्ञानहेतुकज्ञानविषयवह्निमत् गृहं पूर्ववाक्येन च वह्निमत् गृहमात्रबोधितमिति अनवगतस्य हेतुत्वस्येव ज्ञानस्यापि बोधकं प्रश्नवाक्यमपेक्ष्यते तच्च पञ्चम्या एव ज्ञानार्थकत्वे युज्यते इति शिरोमणेराशय इति वाच्यम्। पञ्चम्या ज्ञापकत्वार्थकत्वेऽपि[492] ज्ञानवह्निसम्बन्धस्य पूर्ववाक्याद[493]प्राप्तस्याभीष्टज्ञान-

काङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात्, वादिवाक्या-देवाक्षेप इति चेत्। न तदर्थस्यासिद्धत्वेनाऽनाक्षेपकत्वात् अन्यथा प्रतिज्ञावाक्यादेव सर्व्वापेक्षेऽवयवान्तरविलयात्। प्रतिपाद्यानां स्वत एव तदवगम इति चेत्, न, तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात् प्रतिपादकेन स्वव्यापारस्य निर्वाहयितु-मुचितत्वाच्च अन्यथावयवान्तरेऽप्येवं प्रसङ्गादिति।

स्वार्थविशेष्यकेतरार्थान्वयबोधो जनकन्यायावयवत्वं चोपनयत्वम्।

विषयस्य च प्रश्नवाक्येऽनुल्लेखेन तवाप्यसङ्गतेः हेतुमद्वृत्तिसंयोगेन वह्निमत्तो जिज्ञासितत्त्वेन पूर्ववाक्याद[494]प्राप्तत्वेन च तस्यापि प्रश्नोल्लेखत्वापत्तेश्च अथ प्रतिज्ञावाक्यप्रश्नवाक्याभ्यां समभिव्याहृत्य यत्र बोधयितुं शक्यते स एव जिज्ञासितः प्रश्नवाक्येन विशिष्योल्लेखनीयः [495]संसर्गाप्तिस्तु न तथेति चेदेवं सति लिङ्गपञ्चमीसमभिव्याहृतसाध्यपदस्य ज्ञानलाक्षणिकत्वध्रौव्यान्[496] हेतुप्रश्नसमभिव्याहृतपूर्ववाक्येनावश्यलभ्यत्वात्, न ज्ञानांशस्य प्रश्नवाक्ये कुत इत्यत्रोल्लेख इति किमनुपपन्नमत एवात्र शत्रु नास्तीत्युक्ते कस्येति प्रश्नश्चैत्रस्येत्युत्तरं च संगच्छते। अन्यथा पूर्ववाक्येन शत्रुसामान्याभावो बोधित इत्यप्राप्तस्य[497] शत्रुविशेषाभावस्य प्रश्नवाक्ये उल्लेखप्रसङ्गात्। तस्मात् समभिव्याहारलभ्यो न पृच्छ्यते इति प्रष्टुः कौशलमनुपपन्नत्वेन ख्यापितमिति महदवैदग्ध्यं दीधितिकृतामिति दिक्।

हेतुर्न पञ्चम्यर्थोऽपि तु हेतुमानिति व्यवस्थापयति दाहो दहनादिति अत्र यदि हेतुता पञ्चम्यर्थस्तदा तस्यावृत्तिनियामकसम्बन्धा[498]वच्छिन्नप्रतियोगिता-काभावो नञा बोध्यस्तदा दाहो दहनादित्यपि प्रसज्येत दाहे दहनवृत्तिहेतु-[499]ताभावसत्त्वान्निरूपितत्वसंसर्गस्तु न वृत्यनियामकतया प्रतियोगितानवच्छेदक इति भावः। इदमप्यापाततः घटो न पारिमाण्डल्यादित्यादौ जन्यतायां पारिमाण्डल्याभाव एव भासते पारिमाण्डल्यजन्यत्वस्याप्रसिद्धेः तथा च वृत्यनियामकसम्बन्धो न प्रतियोगितावच्छेदक इति मते सर्वथैवानुपपत्तेरित्येषा दिक्।

उपनयानन्तरं निगमनं तच्चानुमितिहेतुलिङ्गपरामर्श-प्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम्। न च व्याप्तिपक्षधर्म्मतयोश्चतुर्भिरेवावयवैः पर्य्याप्तेः किं तेनेति वाच्यम्। अबाधितासत्प्रतिपक्षितत्वयोरलाभे चतुर्णामप्यपर्य्यवसानात्। अथाभिधानाभिधेययोर्व्याप्तिपक्ष-धर्म्मतावल्लिङ्गप्रतिपादनादेव पर्य्यवसानेनावयवान्तराणां निराकाङ्क्षत्वं विपरीतशङ्कानिवृत्तेरपि तत एव लाभात् अन्यथा निगमनेनापि तदवारणात्, न हि तत् विशेषदर्शनमनादृत्यैव तन्निवर्त्तकम्। सिद्धनिर्देशतया वारयतीति चेन्न। स्वरूपमात्राभि-

---

अवयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वम्।

ज्ञापकहेतुत्वं न पञ्चम्यर्थोऽपि तु ज्ञाप्यहेतुत्वमित्यत्र हेतुमाह[450] जलस्पर्शवदिति रूपादित्यत्र ज्ञापकता यदि पञ्चम्यर्थस्तदा तस्याभावः स्पर्शेन बाधित इति न रूपादित्यपि प्रसज्येत न गन्धादितिवत्। न च न [501]गन्धादित्यत्र गन्धवृत्तिज्ञापकताया स्वनिरूपित ज्ञाप्यतासंसर्गावच्छिन्नप्रतियो-गिताकाभावो विषय इति वाच्यम्। वृत्यनियामकज्ञाप्यतासंसर्गस्य प्रतियोगिता-वच्छेदकत्वासम्भवादिति भावः। इदमप्यवद्यं पक्षधर्मताभ्रमसहकारेण जलीय-स्पर्शस्यापि गन्धव्याप्यतया[502] स्पर्शत्वावच्छेदेन[503] वा गन्धज्ञाप्यत्वाभावस्यापि बोधयितुमशक्यत्वात्। अथ गन्धात् स्पर्शवानित्यत्र गन्धवद्वृत्तिसमवायसंसर्गेणैव स्पर्शवता प्रतीयते इति जलं गन्धात् स्पर्शवदिति वाक्यमप्रमाणमिति मतमाश्रीयते तदा न गन्धात् स्पर्शवज्जलमित्यादौ तादृशसंसर्गेण गन्ध[504]ज्ञापकतानिरूपित-स्पर्शवद्भेदो जले नञा बोध्यत इति कथं ज्ञाप्यत्वाभावबोधकत्वमस्य शक्यते यदि वा हेत्वधिकरणपक्षस्य[505] वृत्तिसाध्यनिरूपितविशेषणतासंसर्गेणैव हेतुज्ञाप्यत्वान्वय इति। तादृशविशिष्टसंसर्गस्याप्रसिद्ध्या जलं स्पर्शवत् गन्धादिति वाक्यस्याप्रामाण्यमिति उच्यते तदापि[506] तदा न गन्धादित्यत्र तादृशविशिष्ट-संसर्गाप्रसिद्ध्या तदवच्छिन्न प्रतियोगिताकाभावोऽपि कथं प्रसिद्ध्येत् यदि वा पर्वतो वह्निमान् धूमादित्यादौ धूमपदलक्ष्यस्य धूमज्ञानस्य पर्वतवृत्तिधूमज्ञानीय[507]-

धानात् साध्यत्वानुस्थितौ तस्मादिति हेतुविभक्त्यनन्वय-प्रसङ्गाच्चेति चेन्न व्याप्तिपक्षधर्म्मताज्ञानेऽपि बाधसत्प्रति-

हेत्वर्थश्च न प्रतिज्ञार्थे विशेषणत्वेनान्वेति। किन्तु तदेकदेशार्थे इत्युक्तप्रायम्। इति श्रीमन्महामहोपाध्यायभट्टचार्यतार्किकशिरोमणि-रघुनाथकविविरचितायां तत्वचिन्तामणिव्याख्यायामनुमान-दीधित्यपराख्यायामवयवग्रन्थस्सम्पूर्णः।

नियमनिरूपकतासंसर्गेण पञ्चम्यर्थज्ञाप्यतायामन्वयोऽत एवायोगोलकं वह्निमद्धूमादित्यादिकमप्रामाणिकमिति मतं तदापि जलं स्पर्शवत्[508] गन्धादित्यादौ जलवृत्तिगन्धस्याप्रसिद्ध्या तादृशज्ञाप्यत्वाभावो नञा बोधयितुं न शक्यते तस्माज्जलस्पर्शवन्न गन्धादित्यादौ गन्धवद् वृत्तिसमवायेन स्पर्शवतो भेदो जले नञा प्रतीयत इति[509] सारं तत्र ज्ञापकता ज्ञाप्यता वा पञ्चम्यर्थो भवतु उभयथापि न किमपि हीयत इति ध्येयम्।

अत एवास्वरसाद् वा स्थलान्तरमाह नापि शब्दादिति जलं स्पर्शवन्न शब्दादित्यत्र यद्यपि स्पर्शे शब्दज्ञाप्यत्वाभावो बाधितस्तथापि पञ्चम्यर्थ-ज्ञाप्यत्वस्य हेतुव्यापकताविशिष्टविशेषणतासंसर्गेणान्वयात् तादृशसंसर्गावच्छिन्न प्रतियोगिताकशब्दज्ञाप्यत्वाभावो नञा बोध्यत[510] इति ज्ञापकताया पञ्चम्यर्थता-वादेऽपि[511] हेतुव्यापकताविशिष्टनिरूपकतैव पञ्चम्यर्थसंसर्ग इति तस्य वृत्यनियामकतया प्रतियोगितावच्छेदकत्वं दुरुपपादमिति भावः। लक्षणैवेति हेतुमत्त्वस्याखण्डतया[512] तत्र शक्त्युपगमेऽपि ज्ञाप्यत्वे गुरौ लक्षणाया एवाभ्युप-गमात् लाक्षणिकपदवत्त्वं निगमनेऽतिव्याप्तमतः पञ्चम्यन्तत्वमुपादेयमिति भावः। तत्रापि[513] ज्ञापकत्वं न हेत्वर्थः। निरूपकतासंसर्गस्य वृत्यनियामकतया प्रतियोगितानवच्छेदकतया गन्धादित्यादावनन्वयप्रसङ्गादिति पर्यवसितम्।

वृत्यनियामकसम्बन्धो न प्रतियोगितावच्छेदक इति किमाप्तवाक्य-प्रामाण्यादुत कुतश्चिदुपपत्तेरवधारितमाद्ये बहूनि महामुनिवचनानि गोष्पदबहुलं लङ्घवतोनिबन्धमूकारजनजल्पजं वालेमज्जनमनुचितं द्वितीयेकानामेयमुपपत्तिः। प्रतियोगितावच्छेदकतया वृत्यनियामकः संसर्गो नास्तीति प्रतीत्या नावगाह्यत

पक्षबुद्धेः साध्यज्ञानेनानुत्पत्तिदर्शनात् तदभावाबोधने समीहितानिर्व्वाहात्। अथ बाधादिविरहस्य प्रयोजकत्वं न तु तदबोधस्य मानाभावादसिद्धेश्च किमर्थं बाधादिविरहो बोधनीय इति चेन्न यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः। न चानन्वयः, तस्मादित्यन्वयबलादेव

इत्यनुभवो वा आद्योऽसिद्धः द्वितीयस्तु संयोगादिवृत्तिनियामकसंसर्गसाधारणाः। नहि घटो नास्तीत्यनुभवानन्तरं[514] संयोगे प्रतियोगितावच्छेकत्वेन जानामीत्यनुव्यवसायो वा लोकानां, सांसर्गिकविषयत्वस्यायोग्यत्वात्। अथ घटो नास्तीति बुद्धिरेव काचित् संयोगेन घटवत्ताया बुद्धिमेव प्रतिरुणद्धि[515]। न च तत्र प्रकारविशेष्यसंसर्गकृतं वैचित्र्यमिति। परिशेषान् संसर्गतावच्छेदककृतं तदपि निःपीड्यमानं संयोगावच्छिन्नत्वमित्युपपत्तिरस्ति। संयोगादेः प्रतियोगिता-वच्छेदकत्वसाधिकेति चेत् एतावतापि संयोगश्चावच्छिन्नत्वं च प्रतियोगिता चेति परस्परवैशिष्ट्यापन्नं घटो नास्तीति प्रतीतिविषय इत्यप्रामाणिकमेव संयोगसंसर्गावच्छिन्नप्रतियोगितेति त्वयाभिलप्यमाना एका व्यक्तिः सामान्याभावविशेष्यस्वरूपातिरिक्ता वा तस्यां प्रतीतौ विषयो न तु समवाय-संसर्गावच्छिन्न प्रतियोगितेति अभिलप्यमानेत्येतावता संसर्गकृतवैचित्र्यगौरवेणैव[516] तद्वैचित्र्यसिद्धेः संयोगसंसर्गावच्छिन्न प्रतियोगिताकोऽभाव इति प्रतीतिव्यवहारो तु संयोगेन विशिष्टबुद्धिप्रतिबन्धकज्ञानविषयमतोऽभावमालम्बते कश्चायं व्यामोहोपहृत्य नियामकसंसर्गेण विशिष्टबुद्धिं तं काचिदप्यभावबुद्धिर्न प्रतिबध्नाति इति किञ्च विशेषणतापि विशेषणतात्वेनैव[517] नियामिका न तु हेतुव्यापकत्वविशिष्टविशेषणतात्वेनेति ताद्रूप्येण प्रतियोगितावच्छेदको यः संसर्ग इति कस्य प्रामाण्यस्य गोचरः तस्मात् धूमपदं धूमज्ञानस्य पञ्चमीहेतुतायां वह्निपदं ज्ञायमानवह्नेर्ज्ञानवह्न्योर्वा बोधकम्, धूमज्ञानस्य भ्रमभिन्नजन्यज्ञानवृत्ति विशेषणतया हेतुतायां तस्याश्च पर्वतोद्देश्यकविधेयकानुमितित्वावच्छिन्न निरूपकतया ज्ञानेऽन्वयः अयोगोलकं वह्निमत् धूमादिन्धनाच्चेत्यादौ[518] अयो-गोलकोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्ननिरूपकतया भ्रमभिन्नधूमज्ञा-नेन्धनादिवृत्तिहेतुताया बाधादप्रामाण्यं तत्र न धूमान्न चेन्धनादित्यादिना च तादृशनिरूपकतासंसर्गावच्छिन्नप्रतियोगिताको भ्रमभिन्नज्ञानवृत्तिविशेषणतया

हेत्वनाकाङ्क्षितत्वलक्षणसिद्धत्वज्ञानात् न त्वन्वयात् प्राक्। इह केचित् यथा तस्मादिति सर्व्वनाम्ना हेतोः परामर्शः पूर्व्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथेति सर्व्वनाम्ना सिद्धस्थल इव विरोधादिवारणाय युक्त इत्याहुः। तन्न। तथेति स्वरूपे प्रकारे सादृश्ये, वा, आद्ये तथाचायमिति प्रक्रमात् तथेति हेतुमानित्यर्थः स्यात् तथाचानन्वयः, न हि हेतुमत्त्वादेव हेतुमत्त्वमित्यन्वितम्, न द्वितीयः, सामान्येन पक्षस्यापि अन्वयव्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात्, अत

धूमादिज्ञानविशिष्टाया हेतुताया अभावः प्रत्याख्यते। अयोगोलकं वह्निव्याप्यधूमवत् वह्निव्याप्येन्धन[519]वदित्यादिज्ञाने विद्यमानापि हेतुता व्याप्तिपक्षधर्मतांशे भ्रमात्मक-ज्ञानवृत्तिरेवेति न योग्यमिदं वाक्यं न चानुशासनमुल्लंध्यजन्यता ज्ञाप्यता वा पञ्चम्यर्थ इति मतमुचितं। पर्वतो वह्निमान् संयोगेन धूमात् न तु समवायेनेत्यादौ संयोगसंसर्गकत्वं तृतीयान्तार्थो धूमपदार्थतद्ज्ञानान्वयी समवायसंसर्गकत्वाभावो नञर्थश्च तथा एतेन धूमपदार्थो धूम एव ज्ञानज्ञाप्यत्वं पञ्चम्यर्थ इत्यपि परास्तम्। संयोगेन धूमादित्यादौ पञ्चम्यर्थे ज्ञाने तृतीयार्थसंसर्गत्वस्या[520]न्वयायोगात् सुबर्थयोः परस्परान्वयस्य शिरोमणिनैवेत्यादिसूचितत्वादिघटो दण्डादिति प्रतिज्ञा-निराकरणेन सूचितत्वदित्यादिकमुहनीयम् धूमादालोकवान्[521] पर्वतो वह्निमान् धूमादितिं प्रतिज्ञावारणाय साध्यान्वितार्थकत्वेन पञ्चमीविशेष्यतामत आह धूमाद् वह्निमत इति न च वह्नित्वावच्छेदेन धूमज्ञाप्यत्वे प्रतिज्ञायैव प्राप्ते हेतोराकांक्षानुदयादनाकाङ्क्षिताभिधानेनिग्रहप्रसंगात्[522] हेत्ववयवावतारो न स्यादिति वाच्यम् शुद्धवह्नित्वावच्छेदेन ज्ञापकाकाङ्क्षायाः प्रतिज्ञया विच्छेदे पक्षवृत्तिवह्नि-त्वावच्छेदेन तदाकाङ्क्षाया अविच्छेदात् तत्परिपूरणसमर्थहेत्ववयवोत्थानात् धूमात् वह्निमान् पर्वतो वह्निमान् धूमादित्यादावुद्देश्यतावच्छेदकविधेययो रैक्या देव वाक्यार्थबोधासम्भवात् न तादृशो न्याय इति।[523]

नन्वेवमपि प्रकृतपक्षे[524] प्रकृतसाध्यान्वितार्थकत्वेन पञ्चमीविशेष्यता किं साध्ये प्रकृतत्वेनेत्यत आह पर्वतो धूमाद् वह्निमानिति। प्रकृतेत्यादिप्रकृतपक्ष-बोधकपदसाकाङ्क्षप्रकृतसाध्यबोधकपदसाकाङ्क्षाया पञ्चमी तद्[525] न लाक्षणिक-

एव न तृतीयोऽपि, अभेदानुमाने चान्वयिनि तस्मात्तथेति सादृश्यान्वयाभावात् बहूनाञ्च प्रक्रमे विशेष्यानन्वयात्, वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात् तस्मादित्यत्र तु हेतुविभक्त्यर्थानन्वयादेव नियमः तस्मादनित्य इत्यभिधाने च विशिष्य सिद्धान्तावगम्यते पूर्व्वं साध्यतयोक्तस्य समर्थहेतुसम्बन्धेन पुनरुत्कीर्त्तनात् अन्यथा तद्वैयर्थ्यात्। संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः किन्तु न्यायाङ्गतयान्यायान्तर्गतत्वेनोपयुज्यन्त इति नाधिक्यम्, कण्टकोद्धारस्य च सार्व्वत्रिकत्वं समयविशेषोपयोगित्वादिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानापरिच्छेदे अवयवग्रन्थः सम्पूर्ण।

पदवदवयवं[526] समुदायार्थः। अयं रक्तो जपाकुसुमत्वादित्यत्र तस्मादुक्त इति निगमने पक्षान्वितसाध्यान्वितार्थिका प्रथमा तदन्तलाक्षणिकपदवति तत्रातिव्याप्तेः पञ्चमीति जन्यत्वे सति सत्त्वादित्यादौ चरमत्वपदं पाकात् पाचकात् माणवकादित्यादौ ककारादिरेव हेतुज्ञाने लाक्षणिक इतरे वर्णास्तात्पर्यग्राहका इत्यभिसन्धिः प्रगल्भं प्रत्यवस्थाप्य निरस्यति यत्वित्यादिना मिश्रास्तु पञ्चम्यन्तेति अत्राद्याभावे प्रतिज्ञायां लाक्षणिकवत् त्यागे निगमनेऽनुमितिपरत्वाविशेषणे उदासीनतादृशवाक्ये गतमतस्त्रितयगर्भमिदं लक्षणमिति व्याख्याय प्रतिज्ञाया ज्ञानलाक्षणिकसाध्यपदव्यवस्थापनावसरे न वा ब्राह्मणादिपदवदवयवान्तरवारणार्थं पञ्चम्यन्तपदमित्याशङ्क्य लाक्षणिकपद-वत्त्वनियतानुमितिपरवाक्यत्वस्यावश्यं वाच्यत्वेन तत एव तादृशावयववारण-सम्भवादिति समादधुः। तन्मतं निकृष्य प्रदर्शयति। केचित्वित्यादितादृश-मवयवतावच्छेदकं रूपान्तरमपरिचितमत आह तादृशेति न प्रतीति तथाच मौलं लक्षणमसंभव्यव्याप्तं वेति भावः। यद्धर्मेत्यादिपञ्चम्यन्तेन पदेन यद्धर्मविशिष्टमुपस्थाप्यते इत्यर्थः। धूमपदस्य तज्ज्ञानलाक्षणिकत्वाभ्युपगमे तु ज्ञानेऽव्याप्तिः प्रदर्श्यत इति भावः। ननु पञ्चम्यन्तेन यज्ज्ञानमुपस्थाप्यते

तस्यैव व्याप्तिप्रदर्शनमत[527] आह अन्यथेति अत्राहुः पञ्चम्यन्तेत्याद्यशुद्धं प्रातिपदिकयोर्लक्षणयैवोपपत्तौ न पञ्चम्यां लक्षणेति वाक्यमात्रस्य साम्प्रदायिकैरपि सुपठत्वान्न च पदद्वये न लक्षणया पदार्थोपस्थापकत्वं कल्पनीयमिति प्राचां गौरवं वहुषु पदेषु शक्त्या तथात्वं कल्पनीयमिति नव्यानामपि गौरवात् यद्धर्मविशिष्ट इत्याद्यपि प्रलापमात्रम्। यद्धर्मावच्छिन्नज्ञाने पञ्चम्युपात्तहेतुत्वा-न्वयस्तद्धर्मावच्छिन्ने व्याप्तिपक्षधर्मतयोरूत्तरावयवैः प्रदर्शनादिति सम्प्रदाय एव श्रेयानिति दिक्।

मूले[528] तथैवाकाङ्क्षानिवृत्तेरिति तथैव हेतुपदेन ज्ञानलक्षणादेव योग्यतया तत्र साध्यज्ञाप्यतान्वये ज्ञापकाकाङ्क्षानिवृत्तेरित्यर्थः। पञ्चभिरवयवैः पञ्चविजातीयवाक्यार्थबोधाजन्यपक्षे, परम्परया परार्थपरामर्शकारणानीत्याशयवतां केषाञ्चित् हेत्ववयवलक्षणमाह **अनुमितीति**। अनुमितिहेतुज्ञानकारणवृत्तिः धूमादित्यादिशब्दजन्यज्ञानवृत्तिः प्रतिज्ञाजन्य[529]ज्ञानावृत्तिर्या जातिः तद्वद् ज्ञान-जनकवाक्यत्वं हेतुत्वमित्यर्थः। हेतुप्रतिरूपकोदासीनवाक्यजन्ये ज्ञानेऽपि सुखविशेषादिजनकतावच्छेदिका जातिः सम्भवतीति उदासीन[530]वाक्येऽति-व्याप्तिवारणाय प्रथमं वृत्तित्वम्[531]। समयबन्धवाक्यार्थबोधवृत्तिवैजात्यमादाय तत्रातिव्याप्तेर्वारणाय द्वितीयम्। तादृशशाब्दबोधजनक[532]पदार्थस्मरणहेत्वैक-देशादावतिव्याप्तेर्वाक्यत्वमुपात्तम् अन्य इत्यनेन पूर्वनिरस्तकत्वात्[533] इति सूचितम्। तादृशजातौ मानाभावात् तत्र तस्यां जातौ प्रमाणं विद्यत इत्यपरेषां मतमुपन्यस्यति जातिं विनेत्यादि अनुमितिजनकत्वं नत्वनुमितिजनक-परामर्शजनकत्वम्।

ननु न्यायान्तर्गतधूमादित्यादिवाक्यजन्यज्ञानत्वादिना परार्थपरामर्श-कारणत्वं स्यादत आह। वाक्यविशेषेति। अन्वयेत्यादि अन्वयव्याप्त्यभिधायको योऽवयवोदाहरणं तस्याभिधानं प्रथमवर्णस्तस्य प्रयोजकं प्रागभावस्तज्ज्ञान-जनकत्वम्। कालविधया तदाश्रयत्वम्। तेन तादृशोदाहरणपूर्ववर्तित्वं तच्च प्रतिज्ञायामपि गतमतो हेतुत्वेत्यादिः तेन कथितहेत्ववयवलक्षणान्युपलक्ष्यते तेन यन्न्यायीयान्वयय्युदाहरणपूर्ववर्त्तित्वं तन्न्यायीयहेत्ववयवत्वं लभ्यते। अत्रोदाहरणं व्यतिरेकव्याप्त्यवगमकत्वेन विशेषणीयमतोऽन्वयव्यतिरेकिणि हेतौ नातिव्याप्तिः। एवं व्यतिरेकिलक्षणेऽपि बोध्यम्। असौ पर्वत प्रभवो

वारणत्वात् यो यो नागजातः स न गजो मता अञ्जनपुण्डरीककुमुदादिरिती-दमुदाहरणमन्वयतो व्यतिरेकतश्च व्याप्तिं गमयति। तथा हि यो नागजातो गजजातीयः स नगाज्जातो यथा अञ्जनादिदिग्गज इत्यन्वयतो, योऽगजातो न भवति स गजो न भवति यथा कज्जलपद्मकैरवादिरिति व्यतिरेकतो व्याप्तिरेवोदाहरणे न लभ्यते तत्पूर्ववर्त्तीहेत्ववयवोऽन्वयव्यतिरेकेत्यादिना लक्षितः। समयबन्धवशादुभयविधमुदाहरणमपि कुत्रचित्[534] न्याये प्रयुज्यत इत्यपि वदन्ति। नोदाहरणविशेषप्रयुक्तं हेत्ववयवत्रैविध्यमपि तु हेतोरन्वयित्वव्यतिरेकित्वप्रयुक्तं द्वैविध्यमित्याशयेनाह। पक्षेत्यादिपक्षसत इत्युपनयस्य सपक्षसत इति दृष्टान्तस्य साधुतया सन्न्यायत्वार्थम् अत्र केवलव्यतिरेकी हेतुर्नास्तीति भावः। अथान्वयसहचारग्रहतदग्रहस्वरूपदशाद्वै-विध्यप्रयुक्तं हेत्ववयवद्वैविध्यमित्यभिप्रायेण निर्वक्ति अनुमितीत्यादि अत्र जनकान्तेनावयवत्वं तत्सहित[535]हेत्वित्यादिना हेत्ववयवत्वं लभ्यते तेन प्रतीतसाध्यसामानाधिकरण्यकहेतुबोधकहेत्ववयवत्वम्। अप्रतीतसाध्यसहचारक-हेतुबोधकहेत्ववयवत्वं चान्वयिहेत्ववयवत्वं व्यतिरेकि हेत्ववयवत्वं च पर्यवस्यति।

मीमांसकास्तु धूमहेतुकेऽपि न्याये धूमवत्त्वादिति प्रयोज्यं न तु धूमादिति न्याये हेतोः पक्षसंसर्गप्रतिपादनावश्यकतया मतुपा तदभिधानौचित्यात्। उपनयादिकं न न्यायावयवः। अत एवायोगोलकं वह्निमत् धूमादिति वाक्यमप्रमाणमित्याहुः। तानुद्दिश्याह कथायामिति व्यर्थत्वादिति मतुपा सम्बन्धाभिधानेऽपि न तस्य पक्षान्वयो निराकाङ्क्षत्वादतः पक्ष धर्मता-प्रदर्शनार्थमुपनयो नामावयवान्तरमेवोचितम्। अपक्षधर्महेतुकहेत्वयवस्याप्रामाण्यं प्रागुपपादितमिति भावः। यत्र धूमसम्बन्धस्य हेतुत्वमभिप्रेतं तत्र धूमवत्त्वादिति प्रयोज्यमेव परन्तु यो धूमवत्ववानित्यादिकमत्रोदाहरणं न तु धूमवानिति मिश्रा अप्येवम् अपार्थकमिति अभिमतबोधौपयिकाकाङ्क्षारहितमित्यर्थः। विभक्त्यन्तरावरूद्धस्येत्युपलक्षणं पञ्चमी प्रकृत्यनुपस्थापितस्येत्यपि द्रष्टव्यं विशिष्टहेतुत्वान्वयादिति सामान्यवत्त्वे सतीत्यादौ त्वपदस्य ज्ञाने लक्षणा तत्र शक्यार्थस्य पदान्तरसप्तम्यतार्थविशिष्टस्यैवान्वयो नीलो घटो नास्ति चैत्रस्य पुत्रो नास्तीत्यादौ तथादर्शनात् भवतु वा। त्वपदमेवं तादृशविशिष्ट[536]-

ज्ञानलाक्षणिकं पदान्तपरम्[537]। तात्पर्यमात्रग्राहकं, तादृशज्ञानस्य च भ्रमभिन्नवृत्ति-विशेषणतया हेतुतायामन्वयात् पञ्चम्यर्थेन सप्तम्यर्थान्वयविरहात् नानुपपत्तिरिति भावः। नन्वेवं स्वपदमात्रस्य लाक्षणिकत्वे इतरे वर्णा व्यर्था इत्यत आह तथैवेति। तथैवेतरसमभिव्याहारेणैवान्त्यपदस्य विशिष्टज्ञाने व्युत्पत्तिर्निरूढलक्षणा नान्यथेत्यर्थः। निरूढलक्षणायां त्वाजानिकोऽर्थावगमः। प्रमाणमित्याह न हीति। हेत्वर्थोदाहरणार्थयोः संगतिमाह। हेतावुक्ते इति कथं केनोपपादकेनाकाङ्क्षा जिज्ञासा। तथाच हेत्ववयवानंत[538]रोदाहरणाभिधानप्रयोजिका हेत्वर्थगमकत्वो-पपादकं किमिति जिज्ञासा तज्जनकज्ञानविषय उपपादकत्वस्वरूपोपोद्धातो गमकत्वव्याप्त्योः सङ्गतिरिति भावः। लाघवादत्रैवोदाहरणोपनययोरपि सङ्गतिं प्रदर्शयति व्याप्तीत्यादिप्राथम्यात्। प्रथमजिज्ञासितत्वात् तथाचावसरसङ्गतिः सूचिता।

अनुमतीति जनकान्तस्य न्यायावयवत्वमर्थः तेनोदासीनतादृशवाक्य-व्यावृत्तिव्याप्यत्वं व्यापकतानिरूपकत्वम्। तेन यद्धर्मविशिष्टनिरूपिताया यद्धर्मावच्छिन्नव्यापकताया ज्ञानं प्रकृतलिङ्गकप्रकृतसाध्यकानुमित्यौपयिकम् तद्धर्मविशिष्टवती तद्धर्मविशिष्टवैशिष्ट्यबोधकन्यायावयवत्वमित्यर्थः। अनुमित्यौपयिकी च व्यापकाबुद्धिर्द्वेधा। साध्यतावच्छेदकविशिष्टहेतुतावच्छेद-कावच्छिन्नव्यापकतामवगाहमानाः हेत्वभावत्वावच्छेदेन साध्याभावव्यापक-तावगाहिनी च। एवञ्च हेतुमति साध्यवत्त्वावगाहिनो यो यो धूमवान्[539] स वह्निमान् इत्यस्य साध्याभाववति हेत्वभावावगाहिनो यो न वह्निमान् स धूमवानित्यस्य चोदाहरणस्योपग्रहः।

नन्वेवमपि गन्धवती गन्धादित्यादौ प्रतिज्ञायामतिव्याप्तिः व्याप्यत्वाभि-मतवदुद्देशेन व्यापकत्वाभिमतविधायकत्वात्। न च सर्वनाम्नोपस्थितत्वं व्याप्यवती[540] व्यापकत्वाभिमतविशेषणम्। तावतापीयं रूपवतीत्यादौ गन्धवत इदमापरामर्शेऽप्यतिव्याप्तितादवस्थ्यात् यथाच हेतोः पक्षतावच्छेदकत्वेऽप्युपनयः सम्भवति तथा प्रतिपादितमधस्तात् इति चेन्न अत एव नियतपदोपादानात् तेन व्याप्यत्वाभिमतवदुद्देश्यता निरूपित व्यापकविधेयताबोधजनकत्वव्यभि-चार्यवयवतावच्छेदकरूपशून्यावयवत्वमित्यर्थः पर्यवस्यतीति दिक्।

न्यायेति न्यायावयवत्वे सति दृष्टान्तवचनमित्यर्थः। असार्वत्रि-

कत्वादिति तथाच दृष्टान्तं विनाकृतोदाहरणाव्याप्तिरिति भावः। व्याप्तिप्रतीतेरिति विशदमुपरिष्टात् [541]प्रस्तारयिष्यते उपनय इति निगमने चेति शेषः। उपनयाभिधानेति उपनयाभिधानप्रयोजकत्वमुपनयपूर्वत्वं जिज्ञासाजनकत्वं हेत्ववयवोत्तरत्वं विशेषलक्षणे व्याप्तिविषयकबोधजनकत्वमुदाहरणावयवस्य संदिग्धमित्यस्वर-सोऽन्य इति युक्त्या सूचितः। अत्र चेत्यादिवीप्सितयच्छब्दसमभिव्याहृततच्छब्देन वीप्सितेन[542] वायावतां धूमवतामुपस्थितौ तत्र वह्निविधानात् धूमादिकरणो कुत्रापि वह्निविरहशङ्का नोदेतीति व्यभिचारशङ्काविघटनाय वीप्सोपादानं विघटितायां व्यभिचारशङ्कायामुदाहरणोपदिष्टसहचारात् मनसा व्याप्तिग्रहः सूपपद इति भावः। यत्र च स्वत एव व्यभिचारशङ्काविरहस्तत्र वीप्सा नोपादेया। यथा केवलान्वयित्वेन गृहीते वस्तुनि साध्यो यो घटः सप्रमेय इति। घटभिन्नाभेदे साध्ये घटत्वादिति हेतौ च यो घटः स्वघटभिन्नभिन्न इत्येवोदाहरणं प्रयोज्यं हेतुमति घटे घटभेदादिसन्देहस्य स्वरसत एवानुत्पादादित्याह यत्रेत्यादिनाऽभेदानुमाने चेत्यन्तेन वीप्सायामपीति ग्रामो ग्रामो रमणीय इत्यादौ ग्रामत्वे ग्रामे वा रमणीयव्याप्यत्वं न पदार्थो न वा वाक्यार्थ इति कथं शाब्दबोधगोचरः। न च द्वितीयग्रामादिशब्दस्य व्याप्तिरर्थः प्रमाणाभावात्। नित्यं वीप्सयोरिति सूत्रे व्याप्तुमिच्छा वीप्सेति व्युत्पत्त्या व्याप्तिबोधेनेच्छायां द्विर्वचन प्रयोगोऽनुशिष्यते। न तु व्याप्तिः द्विवचनार्थ इति सूत्रार्थस्तथा सति हि नित्यं व्याप्त्योरित्येव मुनिः सूत्रयेत् द्विर्वचनस्थले व्याप्तिबोधस्तु मानसः द्वितीयशब्दप्रयोगप्रयोजनत्वेन व्याप्तिबुद्धाववगतायां मनसा तदुपस्थितिसम्भवात्। न चैवं मूर्त्तं मूर्त्त[543] रूपवदित्यादिवाक्यस्यापि प्रामाण्यप्रसङ्गः। द्विर्वचनप्रयोजनज्ञानाप्रामाण्ये द्विर्वचनस्यासाधुत्वेन तस्य प्रामाण्यव्यवहारात् अत एव क्रोधादावपि व्यंग्ये यत्रामंत्रितस्य द्विर्वचनं विधीयते यत्र क्रोधादिर्न पदार्थः किन्तु मानसस्य वैजनिकबोधस्य विषय इति तदप्रामाण्यात्[544] वक्तरि अक्रुद्धे तदसाधुत्वव्यपदेशः। साधुत्वं चार्जुनार्जुनसात्यके सात्यके इत्यादौ कुद्धेऽश्वत्थाम्निवक्तरि। न हि तत्र क्रुद्धो वक्तेति बोधो व्यञ्जनां विना सम्भवति। वचनस्य कर्तुः क्रोधस्य चापदार्थत्वात्।[545]

न च व्यभिचारशङ्का निवारणाय वीप्साप्रयोग इति मतं युक्तम्[546]। वीप्सितशब्द[547]प्रयोगेण यावतां ग्रामाणां समुपस्थितौ तत्र रमणीयत्वसम्बन्धग्रहेऽपि

रमणीयभिन्ने ग्रामत्वसन्देहस्य ग्रामत्ववत्येव वा तत्सामानाधिकरण्येन रमणीयत्वाभाववत्ता सन्देहस्य दुर्वारत्वात्। न च द्विर्वचनव्युत्पत्तिवैचित्र्यात् ग्रामत्वरमणीयत्वयोः व्याप्यव्यापकसंसर्गेणान्वयः स्वीक्रियते[548] तामिति वाक्यार्थे व्याप्तिरिति वाच्यम्। एवं सत्याचार्यमते व्यतिरेक्युदाहरणप्रयोगानुपपत्तेः यो यो न वह्निमान् स न धूमवानित्यत्र हितच्छब्दोपस्थितो वह्न्यभाव एव व्यापकतासंसर्गेण धूमाभावेऽन्वेतुमर्हति। न च सा व्याप्तिरनुमितादुपयुज्यते। व्यतिरेकसहचारेणान्वयव्याप्तिग्रह एव तेषामनुमितिप्रयोजकः तस्मात् द्विर्वचनं व्याप्तिबोधमात्रतात्पर्यग्राहकम्[549]। गृहीते च तादृशे तात्पर्य्ये मनसा व्याप्तिग्रहः इत्येव साधु[550]। तथाच यद्योगप्राथम्ययोरेव तथाविधतात्पर्यव्यञ्जकयोः सत्वादलं वीप्सयेति चिन्तामणिमतभावार्थः। तथाच पारायणं यद्योगप्राथम्याभ्यामेव व्याप्तौ लब्धायां वीप्सावधारणे स्फुटार्थे इति अवधारणमिह वह्निमानेव धूमवानित्युदाहरणत्ववादिनां मतेनेति मिश्रानुसारी पंथाः।

उपाध्यायानुसारिणस्तु द्विर्वचनात् व्याप्तेर्व्यापकताया बोधस्त्वावश्यक[551] कोऽपि ग्रामो न रमणीय इति व्यभिचारबुद्धौ ग्रामो ग्रामो रमणीय इति वाक्यात् वाक्यार्थबोधानु[552]दयात् मानसो वैञ्जनिको वा व्यापकतागोचरो निर्णय[553] इत्यसाम्प्रतः वीप्सितवाक्ये तदर्थतात्पर्यमेव व्यञ्जनात् तस्यां गृहीतायामपि रमणीयत्वे ग्रामनिष्ठाभावप्रतियोगित्वतदभावयोर्द्वयोर्विशिष्टबुद्धिसामग्र्यां सत्यां संशयात्मकस्यैव व्यापकताबोधस्योत्पत्तेः।

ननु[554] तात्पर्यग्रहस्य तदितरकोटिग्रहप्रतिबन्धकत्वं प्रामाणिकमत एव ग्रामाणामेकतमस्याप्यरमणीयत्वे ग्रामो ग्रामो रमणीय इति वाक्यस्याप्रामाण्यं प्रामाण्यं च ग्रामो रमणीयो न तु ग्रामो ग्राम इति वाक्यस्य, नित्यं वीप्स-योरिति सूत्रे सनो नेच्छावाचकत्वमपि तून्मुखत्वेन लक्षणा, श्वामुमूर्षति। नदी कूलं पिपतिषति इतिवत्। तथाच व्यापनोन्मुखत्वे[555] व्यापकतैकदेशे शक्तिरेवानेन प्रतिपाद्यते ग्राम ग्राम इति समुदायात्मकमेकमेव पदमेक-पदस्थाने द्विर्भावविधानात् नरो नर इत्यादौ णत्वाभाववस्तुक्षुभ्रादिगणान्तर्भावात्तस्य च समुदायस्यात्यन्ताभावप्रतियोगित्वञ्चार्थः।

यत्तु **मिश्रैरूक्तमादेशो** न शक्तिमानपि तु तेन **स्मारितःस्थानीति** तच्चिन्त्यम्। लकारादेशानां तिबादीनामेकत्वादौ शक्तित्वात्[556] न हि लकार

एकत्वादिवाचक: शत्रादेरपि तदवगमप्रसङ्गात् आदेशिन आदेशावयवस्य वा ग्रामशब्दस्यार्थो ग्रामो द्विर्भावार्थेऽत्यन्ताभावे स च प्रतियोगितायां सा च पुनरत्यन्ताभावे रमणीयत्वे पदार्थैकदेशे अन्वेति भवतु वा अन्योन्याभावोऽत्यन्ताभावश्च द्विर्वचनार्थ:। आदेशि [557]ग्रामपदार्थान्वयी गेहे गेहेऽश्वा इत्यादौ गेहान्वितस्य अन्योन्याभावस्याश्वत्वावच्छिन्नप्रतियोगितावच्छेदकतासंसर्गावच्छिन्न प्रतियोगिताकोऽत्यन्ताभावोऽश्वत्वावच्छेदेन ब्राह्मणो ब्राह्मणोऽधीत इत्यादौ ब्राह्मण वृत्यन्योन्याभावस्याध्ययनकर्तृत्वावच्छिन्न [558]प्रतियोगितावच्छेदकता-संसर्गावच्छिन्न प्रतियोगिताकोऽत्यन्ताभावोऽध्ययन[559]कर्तृत्वभासके भवतु वा अभावमात्रं द्विवचनार्थ: उद्देश्यविधेययोश्च येन संसर्गेणान्वतस्तत्संसर्गावच्छिन्न-प्रतियोगितासंसर्गावच्छिन्नैव च प्रतियोगिता द्विवचनार्थयोरभावयो: परस्परान्वये संसर्गमर्यादया भासते। तथाच ग्रामो ग्रामो रमणीय इत्यत्र रमणीयग्रामयोरन्वय-स्तादात्म्येनैवेति ग्रामान्वितोऽभावस्तादात्म्यसंसर्गावच्छिन्न प्रतियोगितासंसर्गावच्छिन्न प्रतियोगिताकत्वसंसर्गेणैव द्वितीयाभावेऽन्वेति[560] ब्राह्मणो ब्राह्मणोऽधीते इत्यादौ ब्राह्मणविशेषितोऽभाव: समवायसंसर्गावच्छिन्न प्रतियोगितासंसर्गावच्छिन्न-प्रतियोगिताकत्वसंसर्गेण द्वितीयाभावेऽन्वेति। विभक्त्युपनीतं वस्तु संसर्गतया[561] भासत इति स्वीकरणीयमन्यथा[562] गेहे गेहे अश्वा इत्यादौ सप्तम्यर्थसंसर्गाव-च्छिन्नप्रतियोगितालाभाय व्युत्पत्यन्तरमाश्रयणीयमेकस्यैव ग्रामपदार्थस्य द्विधा विशेष्यतया विशेषणतया वान्वयो[563] द्विर्वचनार्थस्यैकरूपावच्छिन्नस्य च परस्परान्वयो व्युत्पत्तिवैचित्र्यात्। एवञ्च धूमवान् धूमवान् वह्निमानित्यादौ धूमवन्निष्ठा[564]भावाप्रतियोगिधूमवान् वह्निमानित्यन्वयबोधे व्याप्तिर्व्यापकता च विषय इति निराबाधम् ब्राह्मणोऽधीतेन तु ब्राह्मणो ब्राह्मण इत्यादौ ब्राह्मणवृत्यभावप्रतियोगिता[565]भावाभाववदध्ययनकृतिमान् ब्राह्मण इत्यन्वयबोध:। इत्थञ्चोदाहरणवाक्ये वीप्सावश्यकी। अन्यथा व्याप्त्यवगमासम्भवात्। सा च यद्यपि तत्पद एवोचिता यो धूमवानिति वाक्येन विहितस्य धूमवतस्तच्छब्देन परामर्शे स स वह्निमानिति द्विर्वचनेन व्यापकतायां धूमवान् धूम व्यापक वह्निमानित्यन्वयबोधेनाभिमतनिर्वाहात् प्रयुज्यते च तच्छब्दे तद्द्विवचनं महाकविभि: या याँ धिय:[566] प्रैक्षत कातराक्षी सा सा नम्रमुखी बभूवेत्यादौ प्रियकर्तृकप्रेक्षणकर्मकातराक्षीरूपस्य यच्छब्दघटितवाक्येन बोधितस्य

विशेष्यविशेषणभावव्यत्यासेन तच्छब्दपरामृष्टस्य व्यापको ही नम्रमुखीभाव इत्यन्वयबोधस्यान्यथोपपादयितुमशक्यत्वात्[567] यच्छब्दवीप्सा न वह्वेर्व्यापकता बोधौपयिकी। उद्देश्यपदवीप्सया विधेयेतद् व्यापकतालाभेन यच्छब्दार्थपर्वत-महानसादिव्यापकताया धूमे लाभान्न तु वह्नौ धूमव्यापकतायास्तथापि [568]वीप्सायत्पदेन तत्पदेत्यादिमूलस्यायमर्थः यच्छब्देनोपस्थिते पर्वतमहानसादौ पर्वतादिव्यापकधूमवत्तायां यच्छब्दद्विरूक्तिघटितवाक्येन बोधितायामेकेनापि तच्छब्देन धूमवान् व्यापकता च परामृश्यत इति तयोः परस्परान्वयेन धूमविशिष्टात्यन्ताभावाप्रतियोगी वह्निः प्रत्येतुं शक्यत इति शब्दलाघवाय तच्छब्दवीप्सा नोपादेया। विरूपोपस्थितयोरित्यप्यत एव संगच्छते। धूमवत्ताया व्यापकतायां च विभिन्नाभ्यां रूपाभ्यामुपस्थिताभ्यां तच्छब्देन द्वयोः परामर्शयोः बुद्धिस्थमात्रे तच्छब्दशक्तेरेकत्र तच्छब्दार्थयोः परस्परान्वयो व्युत्पत्तिसिद्धः। अत एव ज्ञानत्वाभ्यां लाघवात् तच्छब्दशक्तिमतस्तच्छब्दात्तस्मादित्यादौ धूमज्ञानलाभः। अत एव येन पच्यते तमानयेत्यादौ यच्छब्दघटितवाक्येन वीप्सा समुपस्थितानां पाककृति यदर्थव्यक्तीनां तच्छब्देन परामर्शे पाककर्तृव्यक्तिमानयेत्यन्वयबोधः। अन्यथा यच्छब्द[569]वाक्यार्थस्य व्यक्ति-कर्तृपाकस्य तदा परामर्शेऽ[570]न्वयप्रसङ्गात्। यत्र च तच्छब्दे वीप्सा दृश्यते तत्र तच्छब्दद्विर्भावस्यैव व्यापकत्वमर्थो यच्छब्दवीप्सा तु तत्र यच्छब्द-द्विर्भावो[571]पात्तव्यापकत्वस्यैव तच्छब्देन परामर्श इति यत्तदोर्नित्याभिसम्बन्ध-व्युत्पत्तिसिद्धा।

नन्वेवं यो यो धूमवान् स वह्निमानित्यादौ तच्छब्देन यच्छब्दार्थ-महानसादेः परामर्शे धूमवन्महानसनिष्ठात्यन्ताभावाप्रतियोगित्वमुदाहरणात् लभ्यते।

न तु धूमव्यापकत्वं, यदि च यच्छब्दार्थमहानसादिपरिहारेण धर्मा धूमवत्त्वेन परामृश्यते तदापि यो यः पचति सजानातीत्यादौ तदा पाककर्त्ता न परामृश्यते यच्छब्दघटितवाक्ये कृतिमतवाचकपदाभावात् वाक्यार्थपरामर्शे च पाककर्तृचैत्रादिव्यापकतैव लभ्यते इति चेत् न। यच्छब्दप्रवृत्तिनिमित्तचैत्रत्वादि परिहारेण पूर्ववाक्यार्थस्य पाककृतिमतस्तच्छब्देन परामर्शात् अनुपपत्यभावात् समवायेन पाककृतिमति तच्छब्दस्य शक्तिरेव यदि च कृतिमत्त्वाद्यपेक्षया गौरवात् कृतिर्न सर्वनाम शक्यतावच्छेदिकेत्युच्यते तदा तत्र भवतु निरूढ़ा

लक्षणा एवं व्यापकत्वप्रकारको बोधः उदाहरणादुपपद्यते। यदि च द्विर्वचनं न व्यापकत्वार्थकं तदा ग्रामो ग्रामो रमणीय इत्यादौ ग्रामत्वव्यापकरमणीय तादात्म्येन ग्रामे रमणीयस्य ब्राह्मणो ब्राह्मणोऽधीते इत्यादौ ब्राह्मणत्व-व्यापकाध्ययनकृतिसमवायेन ब्राह्मणेऽध्ययनकृतेरन्वयः स्वीक्रियताम्। यदि ग्रामो रमणीयो न ग्रामो ग्राम इत्यादौ न [572]तथान्वय उपपादयितुं शक्यते। इत्थं च यो यो धूमवानित्यनेन महानसादिर्महानसादिव्यापकधूमवानिति सवह्निमानित्यनेन धूमवान् धूमव्यापकवह्निमानिति बोधो जन्यते तत्र यथामहानसमिति वाक्ये यथाशब्देन प्रक्रान्तवाक्यविधेयौ धूमवह्नी परामृश्येते। तेन महानसं धूमवत् वह्निमदिति दृष्टान्तादन्वयबोधः। एतेन धूमवान्। धूमव्यापकवह्निमानिति प्रक्रमे यथायगोलकमिति [573]साधनविकल्पोऽपि दृष्टान्तः प्रसज्येत। न हि यथाशब्देन पूर्ववाक्ययोउद्देश्यतावच्छेदकोधर्मः परामृश्यते। मुखमाह्लादकं यथा चन्द्र इत्यादौ मुखत्वपरामर्शेण योग्यतत्वप्रसङ्गादिति समाहितमिति प्राहुः।

मिश्रास्तु सम्बन्धस्वरूपाया व्याप्तेः हेतौ साध्ये वा प्रकारतया भानार्थं यत्र यत्र धूमस्तत्र तत्र वह्निरित्युदाहरणशरीरमिति प्राहुः। साध्यसाधनो-भयाधिकरणताविकलदृष्टान्तकं यथा यो यो धूमवान् सोऽग्निमान् यथा ह्रदः तप्तायः पिण्डो वाऽनुपदर्शितान्वयः हेतौ साध्यान्वयो यत्र न प्रदर्शितः। यथा धूमादिनानन्तरं यथालोकवान् स वह्निमानिति विपरीतोपदर्शितान्वयो हेतौ रूपान्तरेणोपदर्शितान्वयः यथा यो ह्रदावृत्ति[574]धर्मवान् स वह्निमानिति एवं व्यतिरेक्युदाहरणाभासद्वयेऽपि[575] द्रष्टव्यम्।

पूर्वमुदाहरणोपनयोरवसरसङ्गतिः सूचिता। सम्प्रति तूदाहरणार्थव्याप्त्या सहोपनयार्थव्याप्तिविशिष्टपक्ष धर्मताया एककार्यानुकूलत्वसङ्गतिरित्युदाहरणा-नन्तरमित्यादि भवतु व्याप्तिरित्यनेन व्याप्तिरूदाहरणादवगतेति सूचितं व्याप्तमिति।[576] व्याप्तेः सहकारि किमित्याकाङ्क्षायाम्, व्याप्तिपक्षधर्मगोचरायामा-काङ्क्षायामित्यर्थः। तथाचोदाहरणात् व्याप्तौ ज्ञातायां तस्याः सहकारिणि स्मृते किमस्याः सहकारीति जिज्ञासयोपनयाभिधानात् अनन्तराभिधानप्रयोजकजिज्ञासा-जनकज्ञानविषयो व्याप्तिसहकारित्वं सङ्गतिरिति भावः। मिश्राणामपि व्याप्तिपक्षधर्मतयोः सहकारित्वप्रदर्शनमेतत्परमिति तज्ज्ञैः सह मन्त्रणीयम्।

अनुमितिजनकेति प्रकृतसाध्यव्याप्यप्रकृतहेतुविशिष्टप्रकृतपक्षावगाही च बोधो विवक्षितः। निगमनेन तु पक्षवृत्तितया हेतुर्बोध्यते।

न तु हेतुमत्तया पक्षः यादृशबोधजनकतयोपनयाः सम्प्रदायसिद्धाः तादृशविषयताबहिर्भूतविषयताशून्यबोधजनकन्यायावयवत्वं विवक्षितम्। तेन वह्निव्याप्यधूमवानित्यनेन[577] धूमे व्याप्तिवैशिष्ट्यं[578] प्रतीयते। किन्तु व्याप्तितादात्म्यं पक्षे च न धूमवैशिष्ट्यमपि तु धूमवदभेद इत्यसम्भवः समाहितः। समाहिता च निगमनातिव्याप्तिः **तृतीयेति**। अलाभात् अजननात्।

ननु माजन्यता[579]मवयवान्तरेण व्याप्तिविशिष्टपक्षधर्मताज्ञानं, तथामुदाहरणोपनीतव्याप्तिविषयको मानस एव परामर्शो भविष्यतीति अत आह तदनभ्युपगमेवेति अलाभादिति तथाचोपनयाभावे पक्षधर्मतोपन[580]याभावात् मानसोऽपि तथा परामर्शो दुर्लभ इति भावः।

ननु धूमवत्त्वादिति हेत्ववयवे मतुपा पक्षधर्मतोच्यत इत्याशङ्क्य निषेधति। न चेति अतत्परत्वात् पक्षे हेतुसम्बन्धबोधकत्वात् अत एव धूमादिति प्रयोज्यम्, न तु धूमवत्त्वादिति प्रागुक्तं वादिवाक्यादिति यदि वाक्योपस्थितात् हेतोः साध्यगमकत्वादित्यर्थः। असिद्धत्वेनाप्रामाण्य-ज्ञानावलीढत्वेन, अन्यथावादिवाक्यजन्यबोधे[581] भ्रमत्वे[582] शङ्काविरहे सर्वाक्षेपे कृतकृत्यत्वे स्वत एव मानान्तरात् उपनयनिगमनयोः पदैकवाक्यतया सङ्गतिर्नापेक्ष्यते समयबन्धादेव च पौर्वापर्यमित्याशयेन सिद्धं निर्दिशति उपनयान्तरमितीति[583] न्यायावयवत्वम्। कारणं तस्यार्थः साध्यधीजनक[584]त्वम्, साध्यधीज्ञानजनकत्वम्। व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानहेतुकत्वेन साध्यज्ञा-नावगाहिबोधजनको न्यायावयव इति समुदितार्थः। पर्याप्तेरिति साध्यहेतुव्याप्ति-पक्षधर्मतानां परामर्शनीया[585]नामुपनयादित्यर्थः। अबाधितासत्प्रतिपक्षितत्वविषयको मानसो बोध्यः। परार्थपरामर्श इत्युच्यते स एव परार्थानुमितौ जनकः तथाचाबाधितत्वादेर्व्यञ्जकं निगमनमपेक्ष्यत इत्याह अबाधितेति।

नन्वनुमितिकारणज्ञानविषयतयादृष्टचरी व्याप्तिः पक्षधर्मता चेति तद्विषयक एव परार्थः परामर्शो गवेषणीयस्तदुभयं सावयवान्तरेणोपनीयत इति व्यर्थं निगमनमित्याशयेनाह अथेति। अवयवान्तराणां निगमनातिरिक्ता-

नामित्यर्थ इति मिश्रानुसारिणः।

वस्तुतस्तु सौगतस्येयमाशङ्का अवयवान्तराणां, प्रतिज्ञाहेतुनिगमनानाम्। ननु पर्वतो वह्निमान्नवेति शङ्कानिवर्त्तकत्वेन पक्षे साध्यवत्ता बोधिका प्रतिज्ञा[586] निगमनेन चापेक्ष्यते इत्यह आह **अन्यथेति[587] विपरीतेति।** तत एवोदाहरणोपनयजन्यवाक्यार्थबोधाभ्यामेव पक्षे तद्वत्ताबुद्धेरिव तद्व्याप्यबुद्धेरपि[588] विपरीतशङ्कानिवर्तकत्वादिति भावः। अप्रामाण्यशङ्का तु निगमनादिजन्य-वाक्यार्थबुद्धावपि तुल्येत्याह **अन्यथेति।**

ननु निगमनादिजन्यवाक्यार्थबुद्धेः प्रतिबन्धकतायामप्रामाण्यशङ्का नोत्तेजिकेत्यत्राह **न हीति।** विशेषदर्शनं क्लृप्तप्रतिबन्धकतावच्छेदकरूपम्[589]। तथाच क्लृप्तान्यरूपेण स्वतन्त्रप्रतिबन्धकतायां मानाभाव इति भावः। अभिधीयतां वा प्रतिज्ञा तत एव शङ्कानिवृत्तेर्निगमनं तु व्यर्थमिति[590] भावार्थे शङ्कते सिद्धेति प्रतिज्ञासाध्यत्वेन वह्निं बोधयत्यत एव तत्राप्रामाण्यशङ्का। निगमनन्तु सिद्धत्वेनेति। तस्मादप्रामाण्यशङ्काशून्यनिगमनजन्यबोधाद् विपरीतशङ्कानिवृत्ति-रित्याशयः। यद्वा प्रतिज्ञानिगमनयोर्द्वयोरपि सार्थकत्वमाशङ्कते **सिद्धेति।** सिद्धनिर्देशं विना न शङ्कानिवृत्तिरिति निगमनाभिधानं सिद्धनिर्देशश्च साध्यतया प्राङ्निर्देशापे-क्षीति प्रतिज्ञाभिधानमिति भावः। किमिदं सिद्धत्वं यन्निगमनेनाभिधीयते किं प्रमितत्त्वं तत्। अत एव **तत्र नाप्रामाण्यशङ्केति।** किं वा ज्ञाना[591]नन्वयि-त्वेनाभिधानमेवासिद्धाभिधानम् आद्ये स्वरूपेति। प्रमितत्वपरीहारेणान्वयादित्यर्थः। अन्त्ये साध्यत्वेति। साध्यत्वानुपस्थितौ ज्ञानविषयत्वाग्रहे अथ साध्यनिर्देशं विना नावयवान्तरावतार[592] इति प्रतिज्ञासार्थक्यं पूर्वमुपपादितम्। इदानीं तु अबाधितत्वादिरप्यनुमितिजनकज्ञानविषय इति तद्बोधकं निगमनमपेक्ष्यत इति इत्याह न् **व्याप्तीत्यादिना** न असिद्धनिर्णयासम्भवादबाधितत्वादे[593]र्ज्ञान-संशयसाधारणं ज्ञानं कारणमिति सर्वत्र[594] निर्णयेऽपि न क्षतिरित्याशयेनाह **नेत्यादि।** प्रतिज्ञापेक्षया निगमनस्य वैलक्षण्यमाह न चानन्वय इत्यादिनासिद्धत्वेन ज्ञानानन्वितत्वेन साध्यज्ञापकत्वे निगमने तस्मादित्यनन्वितमित्युक्तं तात्पर्यबोध[595]पूर्वकमित्यर्थः।

स्वतात्पर्यमाह तस्मादिति अवयवान्तरानपेक्षयद्धेतुमत्तया साध्यं

बोधयति तत्सिद्धत्वेन साध्यज्ञापकम्। न च प्रतिज्ञा तथा किन्तु निगमन[596]मिति भावः। हेत्वानाकाङ्क्षत्वमवयवान्तरोपातहेत्वनाकाङ्क्षत्वम्। हेत्वयवानाकाङ्क्षात्वं वा। तदेव सिद्धत्वम्, सिद्धत्वाभिधानत्वं, ज्ञानात्=अवधारणात्। निगमन इति शेषः। अन्वयात् प्राक्प्रतिज्ञाया इति शेषः। तस्मात्तथेति निगमनाकारवादिनां मतमुत्थापयति। इह केचिदिति प्रसिद्धस्थल इवेति दृष्टान्त इत्यर्थः। यथा दृष्टान्ते यथा शब्देन धूमविशिष्ट एव वह्निरूपस्थाप्यते तथा निगमनस्थं तथाशब्देनाप्यन्यथाधूमविरोधिसाध्यसिद्धौ[597] अर्थान्तरप्रसङ्गादिति भावः। स्वरूपे धूमवह्नित्वावच्छिन्ने[598] प्रकारे नैयायिकाभिमतसादृश्ये सादृश्ये मीमांसकाभिमते सामान्येनेति तथापदोपात्तसादृश्यप्रतियोगितया उदाहरणवाक्यार्थ एव भासते[599] स च पर्वतोऽपीति पर्वतभिन्नत्वे सति पर्वतवृत्तिधर्मवत्त्वं पर्वतेऽनन्वितमित्यर्थः। अत एवातिरिक्तसादृश्यस्य भेदनियतत्वादेव।

ननु नोदाहरणवाक्यार्थस्तथा शब्दोपात्त सादृश्यप्रतियोगी किन्तु दृष्टान्त वाक्यार्थमात्रम्। तथाच यथा महानसं तथा पर्वत इति सम्बन्ध इत्यह आह अभेदानुमाने चेति अयं घट एतद्घटभिन्न एतद् घटवृत्तियावद् धर्मवत्त्वादित्यादौ केनाप्युदाहरणवाक्यार्थेन सहभेदः पक्षे नास्तीति भावः।

नन्वभेदानुमाने व्यतिरेक्येनोदाहरणात्तस्मान्न तथेति निगमनञ्च सूपपदमत आह अन्वयिनीति गगनं प्रमेयं शब्दादित्यादावित्यर्थः। अत्र व्यतिरेक्युदाहरण-प्रयोगासम्भवात् अन्वय्युदाहरणवाक्यार्थसादृश्यस्य पक्षेऽसम्भवात् च तथेति निगमनानुपपत्तिरिति भावः। अविज्ञातार्थो नाम निग्रहस्तथेति प्रयोगत्याह बहूनां चेति अथ निगमने सिद्धानुवादतया प्रतिसंहिते प्रयोजनजिज्ञासायामबाधि-तत्वादिप्रतिपत्तितात्पर्यकत्वमवसीयते। तदेव तात्पर्यं व्यञ्जनेति। तत्सहकाराद-बाधितत्वादिगोचरो मानसो बोधस्तेन वाक्येन जन्यते।

तत्तात्पर्यस्वरूपव्यञ्जनाया एतावानेवोपयोगो यदीतरकोटिभानप्रतिबन्धेन तन्निर्णय[600]सम्पादनम्। तदुक्तं निबन्धे उपसंहारस्यै वैषमहिमा यद्विपरीतशङ्का-निवारणं नामेति सिद्धान्तवादत्वे[601] पुनरुक्तत्वम्। शब्दोऽर्थतश्चैक्ये सत्येव सम्भवति। तथेत्युपसंहारे च न शब्दैक्यमित्यतोऽबाधितत्व[602]व्यञ्जकत्वमुपपन्नं स्यादित्या- शयेनाह। तस्मादनित्य इति सिद्धतासिद्धान्त[603]वादत्वं निगमनस्येति

शेषः। पूर्व- प्रतिज्ञया साध्यतया अवयवान्तरोपात्तहेतुसाकाङ्क्षतया। अन्यथा प्रयोजनान्तराभावे निगमनेऽबाधितत्वादिप्रतिपत्तिप्रयोजकत्वमवसीयत इति शेषः।

जरन्नैयायिकान्निरस्यति। संशयेत्यादिन्यायस्यावयवानां च लक्षणं[604] प्राक्निर्दिष्टमिदानीं प्रतिज्ञादीनां [605]लक्षणान्याह-**दीधितावितरेत्यादि**। उदाहरण-वारणाय प्रथमं सत्यन्तं स्वाघटकपदसाकाङ्क्षपदघटितत्वं तदर्थः उपनयादि-वारणाय स्वकीयमित्यादिस्वीयमिति पाठः प्रामादिकः। स्वपदादेः प्रत्यये नित्यं छप्रत्ययानुशासनात् स्वघटकपदप्राग्वर्त्ति स्वघटकपदार्थमुख्यविशेष्यक[606]-बोधजनकत्वं द्वितीय सत्यन्तार्थः। उपनयस्यापि निगमनघटकपदवाग्वर्ति पदार्थमुख्यविशेष्यबोधजनक[607]त्वात् प्रथमपदं विशेषणं स्वघटकेति निगमनस्यापि स्वप्राग्वर्त्ति उपनयस्थेदं पदार्थमुख्यविशेष्यकबोधजनकत्वादन्त्यपदं विशेषणम्। स्वघटकेति इदं द्रव्यं गुणान्यत्वे सति सत्वादित्यादिहेत्ववयवस्यान्यत्व-विशेष्यकबोधजनकस्य वारणाय विशेष्यतायां मुख्येति। अस्य द्वितीयसत्यन्त-स्यानुयोगिनि स्वपदार्थप्रवेशादन[608]नुगमात् प्रतियोगिनि स्वपद[609]निवेशादनुगतकल्प-वैकल्पिकं पक्षान्तरमाह अन्त्यवत्त्वे ना सति चेत्यन्तेन। अत्रेतरेत्यादिसत्यन्तं पूर्ववदुदाहरण[610]वारणाय **धूमादिति**। हेत्ववयववारणाया[611]न्त्यवत्त्वे सति इति पदद्वयघटितत्वे सतीत्यर्थः। इतरार्थान्वितस्वार्थ[612]बोधकपदद्वयघटितन्यायावयवत्वं निगमनेऽतिव्याप्तमतः **स्वकीयेत्यादि** अत्रापि स्वघटकपदप्राग्वर्तिस्वघटकपदार्थ-मुख्यविशेष्यकान्वयबोधाजनकं यद्यत्तद्भिन्नत्वमर्थः। उपनयस्थायं पदस्य निगमन प्राग्वर्तित्वात्[613] तद्वारणाय प्रथमं **स्वघटकेति**। निगमनघटकपदप्राग्वर्ति उपनयस्थायं पदार्थमुख्यविशेष्यकान्वयबोध[614]जनकनिगमनेऽतिव्याप्तिवारणाय द्वितीयपदविशेषणं स्वघटकेति। जन्यत्वे सति सत्त्वादिति हेत्ववयववारणाय विशेष्यतायां मुख्येति प्रतिज्ञाहेत्वोरित्यादिना द्वितीयसत्यन्तव्यावर्तनीया हेत्ववयवादय[615] इति सूचितम्।

ननूदाहरणस्येत्यनेन प्रथमसत्यन्तव्यावर्तनीयमुदाहरणम[616]भिमतम्। पदमिति तथाचस्वघटकविभक्त्यन्त[617]पूर्ववर्तिस्वघटकविभक्त्यन्तार्थविशेष्य-कान्वयबोधजनकत्वादिति द्वितीयसत्य[618]न्तार्थस्तस्मान्नेतराणीत्यादिनिगमनवारणाय प्रथमविभक्त्यन्तेति साध्यैकदेशाप्रतिपादकत्वं तदर्थः, तस्मादर्द्धपिप्पलीत्यादौ पिप्पल्यर्द्धादिसाध्यके स्वघटकविभक्त्यन्तपिप्पल्यादिपदपूर्ववर्तिपदार्थार्द्धादि-

विशेष्यकान्वयबोधजनकनिगमनवारणाय द्वितीयविभक्त्यन्तेति तदाहृतेन निगमनव्युदास इति परे तु तस्मान्नेतराणि इति निगमनवारणाय स्वघटक-पदप्राग्वर्त्तिपदमव्ययभिन्नत्वेन विवक्षणीयम्।[619] अथवा निपाता विभक्त्यन्ता एव न भवन्तीत्याहुः तन्नस्वर्मनोरममित्यादौ[620] प्रतिज्ञायामव्याप्तिप्रसङ्गात्। तस्मादन्य इतरेभ्य इत्यत्र[621] निगमने तथाप्यतिव्याप्तितादवस्थ्याच्च् न प्रतिज्ञार्थो प्रतिज्ञार्थमुख्यविशेष्यः।

ननु प्रथमहेत्ववयवलक्षणमुपनयेऽतिव्याप्तं तस्यापि पक्षान्वितस्वार्थ-बोधकं यन्निगमनञ्चरमपदं [622]तदर्थविशेष्यतयान्वितस्वार्थ[623]वाक्यार्थकत्वान्न ह्यन्वयो विशेषणतयैव विवक्षितः। प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र प्रतिज्ञावारणाय स्वार्थपदमिति त्वयैव सूचितत्वात् विशेषणतयान्वयस्य विवक्षितत्वे तु प्रतिज्ञैकदेशार्थस्यापि विशेष्यतयैवान्वयेन तत्रातिव्याप्त्ययोगात्। तत्रत्यनिगमनेन तथाप्यतिव्याप्तेश्च हेतुकृतप्रकृतपक्षान्वितेदं पदार्थविशेषणतयैव निगमनवाक्यार्थस्यान्वयादतो लक्षणान्तरमाह स्वार्थविशिष्टेति यदर्थविशिष्ट-वैशिष्ट्य[624]बोधो न्यायजन्यो न्यायघटकपदाजन्यो[625] वा सन्यायावयो हेतुरित्यर्थः।

तेनोदासीनवाक्यसहकारेण निगमनादेरपि तादृशबोधजनकत्वेऽपि न क्षतिः। द्वितीयतृतीयलक्षणयोरपि विशिष्टवैशिष्ट्यबोधो न्यायजन्य एव विवक्षितः।[626] विशेषणमिति अन्वयव्यतिरेक्युदाहरणं नास्त्येव। अत एव[627] नैकदोभय[628]व्याप्त्यापीत्युक्तं पूर्वमतो न तत्र द्वयोर्लक्षणयोरतिव्या-प्तिस्तल्लक्षणाप्रदर्शनेन[629] न्यूनता वेत्यभिमानः इतरेत्यादि इतरोपस्थापितार्थ-विशेषणता निरूपित स्वार्थमुख्यविशेष्यताकबोधकत्वमर्थः।

तत्रैव विशेष्यविशेषणभावव्यत्यासेन द्वितीयं लक्षणं स्वार्थत्वं स्वप्रति-पाद्यत्वं मुख्यविशेष्यता निवेशान्न प्रतिज्ञायामतिव्याप्तिः निगमनलक्षणेऽवयवा-र्थोऽवयववाक्यार्थः स्वार्थः स्वजन्यप्रतीतौ मुख्यविशेष्यः हेत्ववयवेऽतिव्याप्तिं निरस्यति[630] हेत्वर्थश्चेति। न्यायावयवमणौ यो दीधितिदोषेण दर्शितो दोषः तस्योद्धरणेनापि प्रीयेत प्राकृतेतरः पुरुषः।

इति (महामहोपाध्यायगोकुलनाथोपाध्यायविरचितः)
अवयवदीधितिविद्योतः[631]॥

परिशिष्टम्

1. ख – श्रीगणेशाय नमः
2. ख – परामर्षस्या
3. ख – परामर्शे धर्मिण्यप्रामाण्यम्
4. ख – तत्तत्परामर्शत्वावच्छिन्न
5. ख – विशेष्यकाणाम्
6. ख – प्रकारकाणां
7. ख – प्रकारकाणां
8. ख – द्वयाभ्युपगमावश्यकत्वात्
9. ख – भ प्रामाण्यशङ्का तु धूमलिङ्गकस्वार्थानुमितिं प्रत्येव
10. ख – ननु परार्थानुमितिं न्यायप्रयोज्यपरामर्शात् परार्थानुमितिरूपपद्यत इति चेन्न।
11. ख – धूमवानयमित्याप्तवाक्यजनिते
12. ख – कारणं नापि
13. ख – तत्त्वावच्छेदक इत्यकामेनापि अभ्युपेयम्
14. ख – न्यायजन्यमहावाक्यार्थज्ञानस्य
15. ख – वाद्युक्त
16. ख – प्रयोगजज्ञान-
17. ख – वह्निव्याप्यधूमवानिति
18. ख – विजातीयपरामार्शे
19. विशेषस्य ज्ञानं
20. ख – परार्थ प्रयोज्या इति
21. ख – परार्थमनुमानं
22. ख – परार्थानुमितेस्सव्यापारकं
23. ख – विजातीयं व्याप्तिविशिष्टपक्षधर्मताज्ञानं
24. ख – अत्र तज्जातीयं प्रति प्रयोजकत्वं जनकत्वमेव
25. ख – सहकारिसम्पन्नं क्रियते इति व्याख्येयमित्युपाध्यायाः
26. ख – सव्यापारककारणत्वं
27. ख – ज्ञानमुत्थाप्यत इति मिश्राः
28. ख – बोधोऽपि
29. ख – मित्याकारस्समानाकारस्मरण

30. ख – न च योग्यताज्ञानं तथा योग्यताज्ञानत्वेन अनकत्वादिति
31. ख – अत्र योग्यतापदं समयपदमित्यवधेयम्।
32. ख – न्यायर्थस्य
33. ख – परार्थस्परामर्शस्तत्रत्य
34. ख – सर्वदर्शनसाधारणन्यायसामान्यस्य लक्षणम्
35. ख – यत्सत् तत् क्षणिकं संश्च विवादाध्यासितः
36. ख – विरुद्ध्यते तद्वृत्तेरप्यानुपूर्व्याः समयविशेषग्रह सहकारेण
37. ख – वेति दिक्
38. ख – प्रयोज्ये परामर्शे
39. ख – तदुत्पत्यापत्तेः। प्रकारान्तरेण व्याप्त्याद्युपनयसम्भवात्
40. ख – न्यायीयवर्णसमुदायत्वेन च।
41. ख – अथ
42. ख – कार्यत्वाधिकरणशाब्दबुद्धित्वेन कारणताप्रतिज्ञातार्थमात्रविषयकः शाब्दबोधस्तु न तादृशानुपूर्वीज्ञानत्वविशिष्टजन्य इति चेन्न।
43. ख – समूहालम्बनं
44. ख – पर्वतादिधूमहेतुकत्वादिविषयको
45. ख – तच्छालिशाब्दबोधत्वेन च कारणत्वं
46. ख – आनुपूर्वीज्ञानं
47. ख – न च खण्डशोवाक्यार्थत्रयं प्रतिपाद्यत इति पञ्चानां वाक्यानामानु-पूर्वीयपञ्चकमेव
48. ख – धूमज्ञाप्यवह्निमान्
49. ख – वह्निमदिति वह्निव्याप्यधूमवान्पर्वतो निरूक्तरूपोपपन्नधूमव्यापक वह्निमानिति वाक्यार्थबोधपञ्चके कारणं न तु।
50. ख – विशिष्टं ज्ञानं
51. ख – समूहालम्बनात्मकः
52. ख – तेन च
53. ख – करणं
54. ख – अन्वीक्षादर्शनप्रसिद्धस्य
55. ख – प्रथमशाब्दज्ञानं तस्यार्थः
56. ख – तद्विषयता व्यापकविषयताकं
57. ख – बोधादनंतरितो विशिष्ट
58. ख – मुत्थाप्यत इति
59. ख – ज्ञानविषयानुपूर्वीमत्त्वमवयवलक्षणमिति चेन्न

60. ख – बोधाजननात्
61. ख – यं पंक्त्वा तमोदनं भुंक्त इत्यादिवाक्यानामपि योग्यत्वप्रसङ्गदित्यादिसमाहितम्
62. ख – प्रतिज्ञादिव्यवहारस्तादृशीया
63. ख – मतङ्गजोऽनील इत्यादौ
64. ख – प्रतिज्ञादिव्यवहारगोचरानुपूर्व्याघटकत्वमपि
65. ख – निरुच्यतामस्तु च न्यायेन
66. ख – शब्दप्रयोज्यानुमितिः परार्था तदितरा स्वार्थेति न्यायोप्यनुमितिप्रयोजकं वाक्यम्
67. ख – विशेषवशात्तेषां तेषां दार्शनिकानां द्व्यवयवं
68. ख – आप्तोक्तन्तु वह्वियाप्यधूमवान्पर्वत इत्यादिवाक्यं सर्वतन्त्राविरुद्धो न्याय
69. ख – अनुमितेर्विशेषस्याप्रवेशात्
70. ख – प्रवेशलाघवात्
71. ख – परामर्शप्रसङ्गात्
72. ख – पर्वतेऽग्निर्धूमो यत इत्यादि
73. ख – न्यायाभासस्य च
74. ख – कथमुत्पद्येतेति चेन्मास्तु
75. ख – मासैत्सीत्
76. ख – इत्येव न्यायलक्षणं निर्वाच्यमिति दिक्
77. ख – विशेष्यविशेषणभाव यत्यासे
78. ख – विषयकाविजातीशाब्दबोधाः
79. ख – वाक्यार्थबोधानन्तरिताद् प्रामाण्यावगाहिनोऽपि
80. ख – स्याद्वा उपनयस्थायं यदीयानुषङ्गेन
81. ख – न्यायप्रयोज्यमानसपरामर्शे
82. ख – परार्थमननवृत्तित्वं साधयति। फलबलेन तदवृत्तिधर्मप्रकारकेच्छाया अपि तत्प्रतिबन्धकोत्तेजकत्वे क्षतिविरहादित्यादिदूषणैरनुपपन्नमिव मत्वा यथाश्रुतमूलन्यायलक्षणस्य वक्ष्यमाणदोषदुष्टतया स्वयं न्यायलक्षणमाह दीधितौ
83. ख – वह्निमानित्यन्तावर्णान्यायपदेन
84. ख – धूकारमकारतकाराः हेतुपदेनेत्येवमन्येऽपि यथायथं प्रतिपाद्यते
85. ख – रकारे वकारे च
86. ख – तथाचैकत्रैव
87. ख – प्रवृत्तिनिमित्तमत एवैकवाक्येऽस्ति
88. प्रतिज्ञात्वस्व्यपाणि सम्भवतीति
89. ख – तद् घटित्वस्वरूपं फलत आनुपूर्वीविशेषणं वाक्यपदेन प्रतिज्ञाद्यानुपूर्वीपञ्चकम्
90. ख – विभिन्नपुरुषोच्चरित

91. ख – न्यायाभासादि
92. ख – तथाप्यसाधकता
93. घटिताप्रतिज्ञाद्यानुपूर्वी
94. ख – ननु तथापि अथं नाभास इति
95. ख – न्यायघटिताप्यानुपूर्वीकथा
96. ख – घटितत्वमेव प्रकृते प्रवेशनीयम्
97. ख – व्यवहारसत्त्वे वह्न्यादिसाध्यकव्यवहाराभावात्
98. ख – न्यायेऽप्यानुपूर्वीभेदात्
99. ख – घटमानयेत्यादि वाक्येऽपि गतमत:
100. ख – यादृशयादृशानुपूर्व्यवच्छेदेन
101. ख – तत्समुदायातिव्याप्त्यभावादुचितानुपूर्वीकपदं व्यर्थमपि भवतीति ध्येयम्
102. ख – विभिन्न
103. ख – छमिमानित्यादिभिन्नपर्यायक
104. ख – न्यायत्वे नेष्ट एवेति भाव:
105. ख – न्यायेष्वव्याप्तिरित्यत आह
106. ख – प्रामाणिकै: प्रयुज्यमानत्वं प्रामाणिकानां तादृशन्यायव्यवहारविषयत्वं वा
107. ख – परामर्शस्य प्रयोजकत्वं
108. ख – विशेषविषयकत्वोपलक्षकम्
109. ख – परिहृत इति चेत्
110. ख – तथा च प्रतिज्ञार्थो वह्निमत्पर्वत उपनयार्थो विशिटधूमवत्पर्वतस्तयोर्न भेदेनान्वय:
111. ख – प्रतिपादिकार्थयोर्भेदान्वयस्याव्युत्पन्नत्वात्
112. ख – तादात्म्यसंसर्गावच्छिन्नप्रकारताया
113. ख – शाब्द बुद्धौ
114. ख – पर्वत इति वाक्यादपि शाब्दबुद्धिप्रसङ्गात्
115. ख – पर्वतत्वविशिष्टंमेकदैवोल्लिखन्ननुभवोजन्यतामेकत्ववाचकयो:
116. ख – पवर्तस्यैव
117. ख – धूमवत्त्वावच्छिन्ना न तु निरवच्छिन्ना
118. ख – निश्चयस्य
119. ख – विशिष्टवैशिष्ट्यबुद्धिजननस्वभाव्यात्
120. ख – बुद्धौ
121. ख – संसर्गावच्छिन्नप **221/2 ख भिन्नवच्छेदकत्वं स एव।**
122. ख – स्वनिरूप्कत्वस्वनिरूपकप्रकारतानिरूपकत्वान्यतरसंसर्गेण
123. ख – धूमज्ञाप्यवह्निमत्पर्वत

124. ख – उपनयसहकृतेन निगमनेन वह्निव्याप्यधूमवान्
125. ख – सम्भवति
126. ख – अभ्युपेष्यमाणत्वादित्यत आह
127. ख – यत्पदार्थो धूमव्यापकवह्निमद्यन्महानससदृशं
128. ख – विशेष्यताकवाक्यार्थबोधजनको न्यायः
129. ख – शब्देन
130. ख – विशेष्येऽप्युपमानत्वावभासात्
131. ख – यथाशब्दोपात्ते
132. ख – उपमानविशेष्यभूतं
133. ख – वज्रेणेवेत्यादौ
134. ख – तदपि
135. ख – एतत्पदयोरेकधर्मावच्छिन्न
136. ख – प्रत्यसामर्थ्याद्
137. ख – स वह्निमान् इत्यनयोर्वाक्योरेकवाक्यत्वासम्भवः
138. ख – पक्वान्नं भुङ्क्ते इत्यादेरप्यन्वयाबुद्धिप्रसङ्गात्
139. ख – विषयान्तरेऽनुज्ञाफलकत्वादनुज्ञाविषयमाह
140. ख – बोधस्यानुमितिजनकपरामर्शप्रयोजकत्वेनानुगमात्तज्जनकवाक्यत्वम्
141. ख – द्वितीयकल्पः
142. ख – परामर्शं प्रति प्रयोजकत्वं
143. ख – तन्मात्रविषयकतया उदाहरणम्
144. ख – वाक्यार्थज्ञानप्रयोजकत्वम्
145. ख – स्वयमवयवलक्षणमाह
146. ख – तदन्यतमवत्त्वं पर्वतो वह्निमानित्युदासीनवाक्यबारणाय
147. ख – वह्निमानिति
148. ख – कुत्रापीत्यतस्तदपहान्यान्यनयेति
149. ख – इति भागस्य
150. ख – प्रतिज्ञादिहेत्वन्तभागादावतिव्याप्तेराह
151. ख – द्व्यवयवकं न्याय इति बौद्धैः सह विवादः
152. प्रतिज्ञाद्यन्यतम इत्याशंकितुं शक्यते
153. सर्वदर्शनसाधारणं न्याय लक्षणमवश्यं निर्वाच्यम्
154. ख – नैयायिक परिभाषितावयवमात्रमालम्बने
155. ख – तद्विभागोऽपि प्रतिज्ञावाक्ये संगच्छते
156. ख – द्विविधा ह्येकवाक्यता

157. ख – एकवाक्यतायां च न पदयोरिव तुल्यविभक्तिकत्वं
158. ख – कथमित्याकांक्ष्योपपादकत्वसङ्गत्या
159. ख – इडो यजतीत्यादिविधावगतस्य
160. ख – धावतीत्यादावेकवाक्यताव्यवहारः
161. ख – शब्दविद्याविदाम्
162. ख – तिङ् तिङ् इति सूत्रेणातिङ् तात्परं
163. ख – पुरोहितमित्यत्रेडेशब्दे
164. ख – इति पदमनर्थकमापद्यैतेति क्रिययोरपि
165. ख – समर्थमात्राश्रितत्वेन
166. ख – सूचयिष्यते
167. ख – साधनताव्यञ्जकविभक्तेरनुपयोगात्
168. ख – अत एव मूले इत्यारभ्य.... उदाहरणे तदर्थव्याप्ते इत्यन्तं पुनः पाठः उपलभ्यते
169. ख – सूचयिष्यते
170. ख – यो यो इति पाठो नास्ति
171. ख – तत्पदार्थस्योद्देश्यत्वे तु तत्पदोपस्थिपितत्वप्राथम्यं वा तन्नियामक-मित्येवाभ्यधास्यत
172. ख – बुद्धौ
173. ख – उभयोरूपदर्शनप्राप्तौ
174. पदैकवाक्यतैवेति वाक्यैकवाक्यतया
175. ख – व्याचक्षाणानामत आह प्रतिज्ञादीति प्रतिज्ञादिभिः प्रतिपाद्याः
176. ख – धूमीया हेतुतेत्यन्वयबोधत्वावच्छिन्ना
177. ख – तथाविधास्तादृशकार्यतापञ्चकविशिष्टस्य
178. ख – ताद्रूप्येण वह्निव्याप्यधूमवान् पर्वत इति परार्थपरामर्शं प्रति कारणत्वमथवा महानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकस्य शाब्दबोधस्य इति अधिकः पाठः
179. ख – वह्निमत्पर्वतादि
180. ख – वाक्यार्थस्यैकस्याभावादुदाहरण
181. ख – तत्र
182. ख – च परार्थपरामर्शजनने
183. ख – स्वीकारस्तदा पृथिवीजलीयनिर्वचनादेका
184. ख – निर्वचनस्याप्यनुपादकत्वादिति भावः
185. ख – मतुबर्थस्तु
186. ख – नातिव्याप्तिः। उपनये।

187. ख – संसर्गीभूयापि भास्ते
188. ख – साध्यत्वावच्छेदक सम्बैन्धानवच्छेद्यत्वात्
189. ख – द्विधा
190. ख – पक्षतावच्छेदकावच्छेदेन
191. ख – उद्देश्यताकशाब्दबुद्धित्वावच्छिन्न
192. ख – कारणतायज्ज्ञानतवेनावच्छिद्यते
193. ख – पूर्वोत्तरत्वोभयघटितमध्यमत्वप
194. ख – मध्यममात्रे विश्राम्यतीति
195. ख – न्यायत्ववत्त्वे सतीति
196. ख – मध्यमत्वस्वरूपद्रवयपाकन्यायनुपूर्वीभत्वात्
197. ख – वह्निमानत्यित्र
198. ख – तस्य च
199. ख – बुद्धित्वावच्छिन्न
200. ख – विधेयताकवाक्यार्थबुद्धित्वस्य
201. ख – भागे चारितव्याप्ति:
202. ख – मूलोक्तस्योद्देश्यपदस्य च प्रयोजनमेवोक्त्या वक्तुं प्रकृतद्वयमित्यत्र
203. ख – सम्पादनयोद्देश्यपदं
204. ख – प्रकृतेतिशब्दस्यार्थ:
205. ख – वह्निव्यापयधूमव्याप्यवानयमिति प्रकृतन्यायोपनय एवातिव्याप्ति: स्यादिति
206. ख – लक्षणे
207. ख – शुद्धविषयतावच्छिन्नपक्षक
208. ख – नाति प्रसङ्ग:
209. ख – विषयकज्ञान
210. ख – धूमादित्यत्र
211. ख – विषयताशून्यत्वं
212. ख – विषयितेति
213. ख – न तन्निवारणमिति ध्येयम्
214. ख – हेत्ववयवेष्वयोग्यनिराकांक्षत्वाद्यनुसंधानस्वरूपं
215. ख – हेत्वाद्यवयवेऽतिव्याप्ति:
216. ख – सत्विवयवादावपि
217. ख – शाब्दबुद्धित्वावच्छेदेन
218. ख – विवक्षितामिति न हेत्वादावतिप्रसङ्ग: इति चेत:
219. ख – येन रूपेणावयत्वं तादृशानुपूर्वीज्ञानत्वेन कारणत्वम् विवक्षितमुत3 येन

केनचित्

220. ख – बुद्धिजनकत्वम्
221. ख – ज्ञानत्वेनेति वैषम्यात्
222. ज्ञानत्वेनेति वैषम्यात्
223. ख – बुद्ध्यभावेनदानुपूर्वीज्ञानस्य
224. ख – दीधितिकृतां मते
225. ख – स्वरूपायाः
226. ख – रूपत्वन्तावित्यादिकः
227. ख – भवति विशिष्टधूमज्ञाप्य
228. ख – शाब्दबोधत्वावच्छिन्ना
229. ख – अयमादिनिगमनान्ते हेत्वन्ते च भागे
230. ख – वक्तुमुचितमवग्रिमग्रन्थ्मा अपि न विचार सहन्ते इति
231. बुद्धिमजनन्त्यां प्रतिज्ञायामव्याप्तेः
232. ख – तादृशबोधजननेन योग्यतावयक तवादिति भावः
233. ख – समानाकारकवाक्यार्थबोधस्य जननानपुकूलाकङ्क्षैवात्र प्रवेश्यते
234. ख – वाक्यार्थबोधजननानुकूलाकांक्षा विद्यते
235. ख – विवरणं विधाय
236. ख – उद्देश्येतीति
237. साध्यतावच्छेदकविशिष्टावैशिष्ट्यवगाहि
238. ख – बोधययोजकाकाक्षांवति
239. ख – भागेऽप्यतिव्याप्तिवारणाय
240. ख – अनतिरिक्तपदोपादानेन चावयवानन्तर्गतत्वं लभ्यते
241. ख – पक्षे
242. ख – दीधितिकृदुक्तं
243. ख – शाब्दबुद्धेरेव दुर्लभत्वापत्तेः
244. ख – पौनरूक्त्यपदेनेति
245. ख – विश्रमानन्दं
246. ख – नन्वन्यूनपदेन पक्षे पक्षतावच्छेदकस्य
247. वह्निव्यापकताविशिष्टो वह्निः
248. शुद्धपर्वतत्त्रुवेनापि
249. ख – न्यायावत्रत्वत्वार्थकत्वे
250. ख – हेत्वन्तादिभागस्य
251. ख – इति भागवारणायाघटकान्तमुदासीन

252. ख – न्यायानतर्गतत्वं प्रवेशिषम्
253. येन रूपेण न्र्यायावयवत्वं
254. ख – वाक्यार्थ बोधकत्वम्
255. ख – प्रकृतानुमितिविषयताभिन्नविषयताशून्यत्वं
256. ख – धूमादित्यत्र
257. ख – विषयताभिन्नविषयताक
258. ख – मुख्यविशेष्यता न जन्यतावच्छेदिकाकिमुत पातापरामर्शयोरत:
259. ख – खण्डश:
260. ख – मिश्रोक्तमनुपपन्नमिति
261. ख – वा आद्ये
262. ख – द्रव्याप्याकाशवदित्युपनयजन्यबोधं
263. ख – निखिच्छिन्नंप्रकारत्वमुपपन्नम्
264. ख – शब्दाश्रये प्रवर्तते
265. ख – वृत्तित्वं
266. ख – वाच्यादित्यादिकन्तु न न्याय:
267. ख – तद्भेदावश्यकत्वेन
268. ख – यावत्यस्तावद्विशिष्टवाक्यार्थबुद्धित्वव्यापकविषयतशून्यरवमनतिरिक्त
269. ख – ऽतिव्याप्तेरसम्भवेनान्रूनपदवैयर्थ्यप्रसङ्गात्
270. ख – वाक्यार्थज्ञानस्य
271. ख – तादृशशाब्दबुद्धित्वाव्यापकतया
272. ख – धूमादित्युभयविधबोधसाधारण्येकैव सा च धूमादालोक इत्यत्रालोकाविशेषणत्वेन तज्ज्ञनीथेनावच्छिन्ना धूमादित्यत्र
273. ख – भेदावश्यकत्वादित्यत:
274. ख – व्याप्तिज्ञानस्य इति पाठ: नास्ति
275. ख – विप्रतिपत्तेरप्ययोगान्याय
276. ख – पक्षधर्मत्वे च गृहीते
277. विषयक
278. ख – साध्यसिद्धेरूद्देशतायां
279. ख – संयोगादित्यादि
280. ख – व्याप्तिराशंक्यते
281. ख – स्वरूप: उदाहरणेत्युपलक्षणमिदमापरामृष्टे
282. ख – तेनोभयविधव्याप्तिबोधकमेकमुदाहरणमग्रेऽभिधास्यमानं नानुपपन्नं भवतीति ध्येयम्

283. ख – नन्वयं
284. ख – जनकत्वमतो
285. ख – साध्यतानुमिति विधेयता किञ्चिद्
286. ख – विधेयकानुमितिरपि
287. ख – संभवादित्यतस्तादृश
288. ख – इत्यादौ
289. ख – भ्ेद एव
290. ख – वह्निमत:
291. ख – वह्निमद् व्याप्यवानित्युपनय:
292. ख – अतिव्याप्ति:
293. पक्षनिष्ठोद्देश्यताकत्वमेव
294. ख – पर्याप्य
295. ख – प्रतियोगि
296. ख – तन्निष्ठाविधेयतावच्छेदकत्वोपगमात्
297. ख – विषयमतुबर्थ
298. ख – वाक्यार्थबुद्धेरुद्देश्यता तु नानुमिति
299. ख – अतिष्याप्तेर्वारणाय
300. ख – यदि च
301. ख – एतावति
302. ख – अनुमितिविषयत्वे
303. ख – विषयत्वपक्षकतत्साध्यक प्रतिज्ञां
304. ख – तावन्मात्रे च कृते
305. ख – नाभ्युयेय इतरथा
306. ख – धूमादित्यादिहे त्ववयवाति व्याप्तेर्दुर्वारत्वापत्ते:
307. ख – निवर्तनीयश्च
308. ख – वह्निधूमज्ञाप्यो
309. ख – प्रतिज्ञासंप्रदायावच्छेदकानुपूर्वीज्ञानत्वेन
310. ख – शाब्दबुद्धित्वावच्छिन्नं
311. ख – निश्चयत्वाद्यवच्छिन्न
312. ख – तदा संशयपदोपादनवैयर्थ्यम्
313. ख – तादृसशनिश्चयत्वविशिष्टसामान्यप्रतिबध्यस्य
314. ख – शाब्दबोधस्य शाब्दबोधस्य मे जायताम्
315. ख – इतीच्छायां वा निवर्तक:

316. ख – अत्रेच्छामादाय .... प्रमितज्ञालक्षणस्य भिन्नता त् इति पाठः नास्ति
317. ख – अत्रेच्छामादायासम्भववारणाय इत्थारभ्य प्रतिज्ञालक्षणस्य भिन्नत्वादिति पाठो नास्ति।
318. ख – क्वचित्
319. ख – एवञ्चेत्यादि
320. ख – प्रवेशनीयमितिरस्यान्यूनविषयकत्वभागस्य
321. ख – अनवगहिमानाया
322. ख – गोतादात्म्यमवगाहमानायाबुद्धेर्जननयोग्यतामादाय
323. ख – सर्वत्र लक्षणसंगम इति ध्येयम्
324. ख – कालिकदैशिकादि
325. ख – तथाविधान्यतरबोधानिवर्त्य
326. ख – अन्यतमत्वेन बोधानां
327. ख – हेत्ववयवातिव्याप्तिवारणयेति
328. ख – तत्साध्यिका:
329. ख – भागातिव्याप्ति
330. ख – पृथिवी नेतराणीत्यन्वयबोधस्य न सम्भवति इति पाठः
331. ख – अत्रेदं चिन्त्यम्
332. ख – त्वतलभ्यामित्यनुशासनेन एक पदार्थ संसृष्टद्वितीयपदार्थतावच्छेकस्यैवत्वप्रत्ययेनाभिधानात्
333. ख – पाकविशिष्टस्य प्रयत्नस्य
334. ख – लभ्येत विशेषोपस्थापकत्वासम्भवाच्चाधिक्याभावात्
335. ख – लक्षणावश्यकत्वेऽनुकूलत्वप्रतियोगित्तुवादिसंसर्गेण
336. ख – कृत्यन्योन्याभावादिसम्बन्धिनि
337. ख – वह्यादिसाध्यको न्याय एव
338. ख – परिच्छेदकत्वादितयाशयवतो
339. ख – यथाश्रुतमेवमूलमुपपादयतोमतमुपन्यस्यति
340. ख – निमित्तमित्यतस
341. ख – तदन्यतरकोटिनिश्चये इच्छा भवतीति
342. ख – बहुतन्त्र विप्लेवेनेत्यस्वरस: योग्यतापदमापातत:
343. ख – सत्यभ्युपमानोत्तरपदलोपादुद्देश्यानुमितौ
344. ख – न्यायान्तर्गतउत्वमर्थ:
345. ख – विकृतोऽक्ष्णोइत्यन्तभागेऽतिव्याप्तिप्रसङ्गात्
346. ख – फलं प्रदर्शयितु

347. ख – ऽतिव्याप्तिरित्वधेयम्
348. ख – उपनयेति इति पाठो नास्ति
349. ख – ववक्षायामपि व्यावर्तयितुं शक्यत इत्युपनयपर्यन्तानुधावनम्
350. ख – हेत्ववयववारणमपि लिङ्गाविषयकत्वोपपादनप्रयोजनमवसेयम्
351. ख – गन्धवतीतथेति
352. ख – तथाचेतरत्वव्यापकगन्धाभावाभाववती चेयामित्युपनयशरीरमिति भावः
353. ख – विशेष्यताया गन्धत्वाराच्छिन्नत्वात्
354. ख – विशेषणताभिन्नत्वाच्चाव्याप्तितादवस्थ्यात्
355. ख – सम्भवति
356. ख – व्याप्तिरित्याशयेन साक्षात्परम्परासाधारण
357. ख – वा उपनयेऽह्यतिव्याप्तेरभिधानमन्यथा
358. ख – विषयताया ज्ञानभेदेन विषयभेदेन वा भिन्नतया सर्वस्वय एव गन्धविषयतायास्तादृावैशिष्ट्यविषयत्वाव्यापकत्वादित्यतः पक्षान्तरमाह
359.
360. अथ यादृश यादृशविषयताकबोधजनकत्वेन प्रतिज्ञाः सम्प्रदायसिद्धास्ततद्विषयतावहिर्भूत
361. ख – ये भङ्गि विशेषणनिर्देशः
362. ख – इति तु ध्येयम्
363. ख – भेदे चान्वयोऽनुपपन्न इति भावः
364. ख – प्रसज्य इत्यत आह
365. ख – वृत्यनियामकसम्बन्धोऽपि कुतो न
366. ख – चैत्राभावबोधने तु भूतले न घट इत्यादाविवानुयोगिनि
367. प्रतिज्ञात्वमपि भवतीति व्याप्येति
368. ख – दासीनवाक्यवारणाय न्याययावयवेति
369. ख – अवयवत्वावच्छेदकमिह
370. हेतुत्वादिकम् आद्येन तत्प्रकृतलिङ्गविपषयकत्वव्याप्यं
371. ख – तथाहि
372. ख – भिन्नं हेतुविषयकज्ञानजनकत्वनियतमुपनयत्वानिगमनत्वेऽपि नयेमित ध्येयमति पाठो नास्ति
373. ख – पर्यवसितमतो न काप्यनुपपत्तिरिति
374. ख – प्रतिज्ञायामव्याप्तेराह
375. ख – लभ्यते अतो न्यायान्तरावयवान्तरे
376. ख – अत्र मिश्राः। लिङ्ग साध्यं तद्विषयकं तद्विधेयकं

252. ख – न्यायानतर्गतत्वं प्रवेशिषम्
253. येन रूपेण न्यायावयवत्वं
254. ख – वाक्यार्थ बोधकत्वम्
255. ख – प्रकृतानुमितिविषयताभिन्नविषयताशून्यत्वं
256. ख – धूमादित्यत्र
257. ख – विषयताभिन्नविषयताक
258. ख – मुख्यविशेष्यता न जन्यतावच्छेदिकाकिमुत पातापरामर्शयोरत:
259. ख – खण्डश:
260. ख – मिश्रोक्तमनुपपन्नमिति
261. ख – वा आद्ये
262. ख – द्रव्याप्याकाशवदित्युपनयजन्यबोधं
263. ख – निखिच्छिन्नंप्रकारत्वमुपपन्नम्
264. ख – शब्दाश्रये प्रवर्तते
265. ख – वृत्तित्वं
266. ख – वाच्यादित्यादिकन्तु न न्याय:
267. ख – तद्भेदावश्यकत्वेन
268. ख – यावत्यस्तावद्विशिष्टवाक्यार्थबुद्धित्वव्यापकविषयतशून्यरवमनतिरिक्त
269. ख – ऽतिव्याप्तेरसम्भवेनान्रूनपदवैयर्थ्यप्रसङ्गात्
270. ख – वाक्यार्थज्ञानस्य
271. ख – तादृशशाब्दबुद्धित्वाव्यापकतया
272. ख – धूमादित्युभयविधबोधसाधारण्येकैव सा च धूमादालोक इत्यत्रालोकाविशेषणत्वेन तज्ज्ञानीथेनावच्छिन्ना धूमादित्यत्र
273. ख – भेदावश्यकत्वादित्यत:
274. ख – व्याप्तिज्ञानस्य इति पाठ: नास्ति
275. ख – विप्रतिपत्तेरप्ययोगान्याय
276. ख – पक्षधर्मत्वे च गृहीते
277. विषयक
278. ख – साध्यसिद्धेरूद्देशतायां
279. ख – संयोगादित्यादि
280. ख – व्याप्तिराशंक्यते
281. ख – स्वरूप: उदाहरणेत्युपलक्षणमिदमापरामृष्टे
282. ख – तेनोभयविधव्याप्तिबोधकमेकमुदाहरणमग्रेऽभिधास्यमानं नानुपपन्नं भवतीति ध्येयम्

283. ख – नन्वयं
284. ख – जनकत्वमतो
285. ख – साध्यतानुमिति विधेयता किञ्चिद्
286. ख – विधेयकानुमितिरपि
287. ख – संभवादित्यतस्तादृश
288. ख – इत्यादौ
289. ख – भेद एव
290. ख – वह्निमतः
291. ख – वह्निमद् व्याप्यवानित्युपनयः
292. ख – अतिव्याप्तिः
293. पक्षनिष्ठोद्देश्यताकत्वमेव
294. ख – पर्याप्य
295. ख – प्रतियोगि
296. ख – तन्निष्ठाविधेयतावच्छेदकत्वोपगमात्
297. ख – विषयमतुबर्थ
298. ख – वाक्यार्थबुद्धेरुद्देश्यता तु नानुमिति
299. ख – अतिष्याप्तेर्वारणाय
300. ख – यदि च
301. ख – एतावति
302. ख – अनुमितिविषयत्वे
303. ख – विषयत्वपक्षकतत्साध्यक प्रतिज्ञां
304. ख – तावन्मात्रे च कृते
305. ख – नाभ्युयेय इतरथा
306. ख – धूमादित्यादिहे त्ववयवाति व्याप्तेर्दुर्वारत्वापत्तेः
307. ख – निवर्तनीयश्च
308. ख – वह्निधूमज्ञाप्यो
309. ख – प्रतिज्ञासंप्रदायावच्छेदकानुपूर्वीज्ञानत्वेन
310. ख – शाब्दबुद्धित्वावच्छिन्नं
311. ख – निश्चयत्वाद्यवच्छिन्न
312. ख – तदा संशयपदोपादनवैयर्थ्यम्
313. ख – तादृसशनिश्चयत्वविशिष्टसामान्यप्रतिबध्यस्य
314. ख – शाब्दबोधस्य शाब्दबोधस्य मे जायताम्
315. ख – इतीच्छायां वा निवर्तकः

316. ख – अत्रेच्छामादाय .... प्रमितज्ञालक्षणस्य भिन्नता त् इति पाठः नास्ति
317. ख – अत्रेच्छामादायासम्भववारणाय इत्थारभ्य प्रतिज्ञालक्षणस्य भिन्नत्वादिति पाठो नास्ति।
318. ख – क्वचित्
319. ख – एवञ्चेत्यादि
320. ख – प्रवेशनीयमितिरस्यान्यूनविषयकत्वभागस्य
321. ख – अनवगहिमानाया
322. ख – गोतादात्म्यमवगाहमानायाबुद्धेर्जननयोग्यतामादाय
323. ख – सर्वत्र लक्षणसंगम इति ध्येयम्
324. ख – कालिकदैशिकादि
325. ख – तथाविधान्यतरबोधानिवर्त्य
326. ख – अन्यतमत्वेन बोधानां
327. ख – हेत्ववयवातिव्याप्तिवारणयेति
328. ख – तत्साध्यिकाः
329. ख – भागातिव्याप्ति
330. ख – पृथिवी नेतराणीत्यन्वयबोधस्य न सम्भवति इति पाठः
331. ख – अत्रेदं चिन्त्यम्
332. ख – त्वतलभ्यामित्यनुशासनेन एक पदार्थ संसृष्टद्वितीयपदार्थतावच्छेकस्यैवत्वप्रत्ययेनाभिधानात्
333. ख – पाकविशिष्टस्य प्रयत्नस्य
334. ख – लभ्येत विशेषोपस्थापकत्वासम्भवाच्चाधिक्याभावात्
335. ख – लक्षणावश्यकत्वेऽनुकूलत्वप्रतियोगित्रुवादिसंसर्गेण
336. ख – कृत्यन्योन्याभावादिसम्बन्धिनि
337. ख – वह्यादिसाध्यको न्याय एव
338. ख – परिच्छेदकत्वादितयाशयवतो
339. ख – यथाश्रुतमेवमूलमुपपादयतोमतमुपन्यस्यति
340. ख – निमित्तमित्यतस्
341. ख – तदन्यतरकोटिनिश्चये इच्छा भवतीति
342. ख – बहुतन्त्र विप्लेवेनेत्यस्वरसः योग्यतापदमापाततः
343. ख – सत्यभ्युपमानोत्तरपदलोपादुद्देश्यानुमितौ
344. ख – न्यायान्तर्गतउत्वमर्थः
345. ख – विकृतोऽक्षणोइत्यन्तभागेऽतिव्याप्तिप्रसङ्गात्
346. ख – फलं प्रदर्शयितु

347. ख – ऽतिव्याप्तिरित्वधेयम्
348. ख – उपनयेति इति पाठो नास्ति
349. ख – ववक्षायामपि व्यावर्तयितुं शक्यत इत्युपनयपर्यन्तानुधावनम्
350. ख – हेत्ववयववारणमपि लिङ्गाविषयकत्वोपपादनप्रयोजनमवसेयम्
351. ख – गन्धवतीतथेति
352. ख – तथाचेतरत्वव्यापकगन्धाभावाभाववती चेयामित्युपनयशरीरमिति भावः
353. ख – विशेष्यताया गन्धत्वाराच्छिन्नत्वात्
354. ख – विशेषणताभिन्नत्वाच्चाव्याप्तितादवस्थ्यात्
355. ख – सम्भवति
356. ख – व्याप्तिरित्याशयेन साक्षात्परम्परासाधारण
357. ख – वा उपनयेऽह्यतिव्याप्तेरभिधानमन्यथा
358. ख – विषयताया ज्ञानभेदेन विषयभेदेन वा भिन्नतया सर्वस्वय एव गन्धविषयतायास्तादृवैशिष्ट्यविषयत्वाव्यापकत्वादित्यतः पक्षान्तरमाह
359.
360. अथ यादृश यादृशविषयताकबोधजनकत्वेन प्रतिज्ञाः सम्प्रदायसिद्धास्ततद्विषयतावहिर्भूत
361. ख – ये भङ्गि विशेषणनिर्देशः
362. ख – इति तु ध्येयम्
363. ख – भेदे चान्वयोऽनुपपन्न इति भावः
364. ख – प्रसज्य इत्यत आह
365. ख – वृत्यनियामकसम्बन्धोऽपि कुतो न
366. ख – चैत्राभावबोधने तु भूतले न घट इत्यादाविवानुयोगिनि
367. प्रतिज्ञात्वमपि भवतीति व्याप्येति
368. ख – दासीनवाक्यवारणाय न्याययावयवेति
369. ख – अवयवत्वावच्छेदकमिह
370. हेतुत्वादिकम् आद्येन तत्प्रकृतलिङ्गविपषयकत्वव्याप्यं
371. ख – तथाहि
372. ख – भिन्नं हेतुविषयकज्ञानजनकत्वनियतमुपनयत्वानिगमनत्वेऽपि नयेमित ध्येयमति पाठो नास्ति
373. ख – पर्यवसितमतो न काप्यनुपपत्तिरिति
374. ख – प्रतिज्ञायामव्याप्तेराह
375. ख – लभ्यते अतो न्यायान्तरावयवान्तरे
376. ख – अत्र मिश्राः। लिङ्ग साध्यं तद्विषयकं तद्विधेयकं

377. विधेयमित्युपनयस्थायं
378. निगमनेऽतिव्याप्तेर्वारणाय
379. ख – लिङ्गत्वाविषयकत्वमितिरथा
380. ख – पृथिवीत्वादित्यत्र प्रतिज्ञायामव्याप्तिप्रसङ्गदिति व्याचख्युः। तत्राव्यत्र प्रकारत्वमन्यस्य च विधेयत्वमसहमानो दीधितिकारो यथाश्रुते गन्धवती भिद्यते गन्धादित्यत्राव्याप्तिप्रसङ्गाल्लिङ्गाविषयकत्वमन्यथाव्याचष्टे
381. ख – विषयकेत्यर्थकमित्यर्थ:
382. ख – पर्यन्तानुसारेण नात्र स्नेह समवायिकारणतावच्छेदिंकाया
383. ख – वह्निर्भावेन
384. ख – यत्र धूमस्तत्र वह्नि:
385. ख – हेत्ववयवेऽतिव्याप्ति:
386. ख – हेतुत्वविषयतेत्यस्य फलमहि।
387. ख – हेतुत्वावाच्छेन्न विशेष्यता
388. ख – लिङ्गविषयकत्वं साध्याशस्तु न प्रवेशनीयो वैयर्थ्यात्। अत्र हेत्वावयवानां यादृश यादृश विषबताकबोधजनकत्वं साम्प्रदायिकं तादृशविषयताबहिर्भूतविषयताकत्वमेवलिमिङ्गविषयकत्वं वाच्यम्।
389. ख – दुर्वारत्वापत्ते:
390. ख – विशेषजनकतावच्छेदिकादि
391. ख – प्रतिज्ञैकदेशव्यतिप्रसक्तमत:
392. ख – शदत्वावच्छिन्ने जनकत्वं लभ्यते
393. ख – विद्यत इति।
394. ख – समयबन्धेन
395. ख – विप्रतिवाक्यघटकं पदं हेतुना सह साकांक्षमपि
396. ख – तात्पर्यवमिसत्वेन ताद्विषयकत्वेन निराकांक्षत्वादिति
397. ख – विप्रतिपत्ति नित्याब्दस्य
398. ख – हेत्वनाकांक्षितत्वेन
399. ख – पदार्थेन तदन्वयौपयिक्याकांक्षा
400. ख – तज्जनिता पदार्थोपस्थिति:
401. ख – हेत्वन्यव
402. ख – उदाहरणाद्यमिभधानम्
403. ख – उदाहरणादिवाक्यार्थबोधनिष्पत्ते:
404. ख – तद्सम्भवादित्यंत एक: सन्दर्भ:
405. ख – शक्यत इतयस्वरमुद्भावय

406. ख – तस्मादितीव्यावतारितम्
407. ख – मात्रोपलक्षणम्
408. ख – प्रदर्शनमित्यपि साम्प्रतम्
409. ख – निष्पादकत्वेन
410. ख – उपपद्यतेऽन्यथा
411. ख – साध्यवयाप्यस्य हेतोः
412. ख – यो धूमवान् स वह्निमान्
413. ख – परामर्शेण
414. ख – शब्दज्ञानजनकत्वसम्भवादतो दीधितौ
415. ख – तद्वैय्यर्थ्यप्रसङ्गात्
416. ख – साध्याविषयकत्वे वाच्यमित्‍र्थः
417. ख – प्रतिज्ञा च क्वचित्
418. ख – क्वचित्पदार्थान्तरमन्तरा
419. ख – यो धूमवान् स वह्निमानित्‍रुयुदाहरणं
420. ख – शक्यत् इति
421. ख – संयोगाजन्यं द्रव्यम्
422. ख – न्यायावयवत्वं साध्याविषयकबोधजनकत्वम्
423. ख – मित्युपनयस्थेदं पदस्य तस्मान्न गुण इति
424. ख – विभक्तित्वप्रवेश आवश्यक इति भावः
425. ख – वाच्यत्वाद्यभाव इति
426. ख – दृष्टान्तवदुदाहरणा पुनरसांप्रदायिकमेकत्र
427. ख – भवतु पवा तथापि साध्याविषयद्लेनैवतद्वारणीयम्
428. ख – वक्ष्यमाणोदाहरणान्यत्वप्रवेश एव
429. ख – तथाविधनिश्चयवान्
430. ख – निश्चयाभावादुत्पन्नं ज्ञानमिति
431. ख – साध्यान्वितार्थ
432. ख – विषयताभावश्च
433. ख – तादृशनिश्चयाभावादाकाशाभाव इति
434. ख – विषयत्व
435. ख – तथाप्यवयवान्तरघटक
436. ख – लाघवादाह – उदाहरणान्यत्वेनवेति तच्चिनत्यमिति
437. ख – तदवृत्ते रित्यादिना
438. ख – घटादण्डादित्यादिन्यायेन

439. ख – स्वरूपयोग्यत्वम्
440. ख – पञ्चावयव एव
441. वस्तुतो य न्यायघटकाव्याप्तिप्रदर्शक
442. ख – हेतुत्वमितिवाच यमेव
443. ख – न च न्यायान्तरीयोदाहरणाव्यवहितपूर्ववर्ति
444. ख – इत्यवधेयम्
445. ख – साध्याविषयकेत्यत्र
446. ख – साध्यविषयक
447. ख – न विग्धीयते जन्यत्वे सति सत्त्वादित्यादावुद्देश्यविधेयभावेन
448. ख – व्याख्यातार्थमिति दीधितिः
449. अनुमितिपरशब्दत्वञ्चेति
450. ख – धूमव्यापक वह्यभाववदिदमित्यत्रोपनये
451. ख – हेतुत्वाचकेदं पदान्तेऽतिव्याप्तिरत आह
452. ख – दृष्टान्तस्येति इति पाठो नास्ति
453. ख – प्रथमैवान्त इति पूर्वेणान्वयः
454. ख – नाम्नोः समानविभक्तित्वपन्रतिसन्धानस्य
455. ख – यथाक्तः पदत्वादिति
456. ख – सार्थकपदाघटितत्वे सति
457. ख – पञ्चम्यादेरित्यारदिभ्यारं सप्तम्यास्त्रादेशाप्युपग्रहः
458. ख – परतस्तासिलि सर्वात इत्यापन्नेश्च
459. ख – वह्निमान् वह्निसामग्रीमत्त्वादित्यात्राव्याप्तमतो नञे जनकपदसाकाङ्क्षत्वेन
460. प्रतिज्ञेत्यादिमूलम्
461. ख – प्रतिज्ञावाक्यज यत् धी स्वरूपे जन्ये कारणाङ्क्षा
462. ख – तज्जनकत्वं जनकान्तार्थः
463. ख – धीः साध्यविषयिणीकारणाङ्क्षा प्रकृतहेतुज्ञानजन्यत्वसन्देहः
464. ख – संदेह निवर्तक ज्ञानजनक मिति
465. ख – निवर्तकत्वं पर्यवसिताहेतु ज्ञाप्य साध्यवान् पक्ष इति
466. ख – लक्षणाद्वयान्तर्गत
467. ख – विशेषणेनाप्रतिज्ञायां कस्यापि
468. ख – तत्र न ाक्तेग्राहकमनुशासनमपि तु
469. ख – अन्वयोपपादनायाह
470. ख – अवधितात्वादिकत्वं खण्ड एव धर्मे
471. ख – वधित्वस्व रूपशक्यस्य

472. ख – प्रतिपाद्यते
473. ख – जनकत्वसंसर्गस्य वृत्यनियामकतया प्रतियोगितावच्छेदकत्वाभावादिति
474. ख – तत्र च
475. ख – हेतुतात्वहेतुमत्तात्वाभ्यां यदि च
476. धूमशक्तस्य धूमज्ञाने लाक्षणणिकस्य
477. ख – उदयगुणावच्छिन्नस्य
478. ख – उदयगुण एवं शक्तेरुदयगुणवति लाक्षणिरकस्वादिति
479. ख – परस्परात् ज्ञायमानवह्निलाभ:
480. ख – चाननुशासनाविभक्तीनां
481. ख – प्रसिद्धो नियमस्तत्रनियम: प्रकृतेषु
482. ख – तुल्यविभक्तिनियमो दृश्यते
483. ख – पक्षेको द्वयो: संसर्गो भासते
484. ख – धूमवदनुयोगिकसंयोगसम्बन्धेन
485. ख – न प्रमाणं प्रमाणञ्चायगोलकं
486. ख – प्रतिज्ञया पर्वते संयोगेन
487. ख – संयोगादिना
488. ख – हेत्वन्वय
489. ख – वर्धमानव्याख्यानासिद्धमिति भाव:
490. ख – पर्वतप्रत्ययायते
491. ख – हेतुक ज्ञानविषयक
492. ख – ज्ञातम्। अभीष्टज्ञानविषयवस्तु
493. ख – ज्ञापकत्वेऽपि
494. ख – वाक्यादलब्धस्याभीष्ट
495. ख – वाक्यादलब्धत्वेन
496. ख – संर्गादिस्तु
497. ख – ध्रौव्याद्धेतुप्रश्न
498. ख – इत्यलब्धस्य
499. ख – संसर्गावाच्छिन्न प्रतियोगिताकोऽभावो न ञ बोध्यस्तदा
500. ख – हेतुत्वाभावसत्त्वात् निरूपकत्वादिसंसर्गस्तु वृत्यनियामकतया न प्रतियोगितावच्छेदक इति भाव:
501. बीजमाह
502. ख – प्रतियोगिताकोऽभावो
503. ख – गन्धज्ञाप्यतया

504. ख – स्पर्शत्वावच्छेदेन जलस्पर्शत्वावच्छेदेन वा
505. ख – गन्धज्ञापकस्पर्शाद्
506. ख – पक्षवृत्तिसाध्य
507. ख – तदापि इतिं पाठो नास्ति
508. ख – निरूपकतासंसर्गेण
509. ख – स्पर्शवन्न गन्धादित्यत्र
510. ख – इत्येव सारम्
511. ख – बोध्यते। ज्ञापकतायाः
512. ख – पञ्चम्यर्थतावादे तु
513. ख – हेतुत्वस्याखण्डतया
514. ख – अत्रापि
515. ख – नास्तीतिप्रतीतेरनन्तरम्
516. ख – प्रतिरूणद्धि न समवायेन
517. ख – संसर्गकृतवैचित्र्येणैव तद्विचित्र्यसिद्धेः
518. ख – वृत्तिनियामिका
519. ख – इन्धनवाह्वेत्यादावयोगोलक
520. ख – संसर्गस्यान्वयायोगात्
521. ख – इत्यादि सूचितत्वादिति
522. ख – ननु धूमादालोकवान्
523. ख – नाकाङ्क्षताभिधाननिग्रहप्रसङ्गात्
524. ख – इति भावः
525. ख – प्रकृतपक्षान्वितसाध्यान्वितार्थकत्वेन पञ्चमीविशेष्यता
526. ख – तदन्त
527. ख – अवयवत्वं समुदायार्थः
528. ख – अत्राह
529. ख – श्रीः । मूले
530. ख – प्रतिज्ञादि
531. ख – उदासीनवाक्यातिव्याप्ति
532. ख – वृच्यन्तम्
533. ख – बोधत्वादि
534. ख – पूर्वनिरस्तकल्पा इति सूचितम्
535. ख – क्वचिन्प्राये
536. ख – सहित इति पाठो नास्ति

537. ख – ज्ञाने लाक्षणिकम्
538. ख – पदान्तरं
539. ख – हेत्ववयवाभिधानोत्तरोदाहरणाभिधान
540. ख – यो धूमवान् स वह्निमान्
541. ख – व्याप्यवतो विशेषणम्
542. ख – प्रस्तावयिष्यते
543. ख – वीप्सितेन तच्छब्देन
544. ख – मूर्तं मूर्तरूपवत्
545. ख – तद् प्रमाण्यादक्रुद्धे वक्तरि
546. ख – चापदवाक्यार्थत्वात्
547. ख – मतमिति पाठो नास्ति
548. ख – वीप्सितशब्देन
549. ख – स्वीक्रियतामिति वाक्यार्थौ
550. ख – व्याप्तिबोधतात्पर्यमात्रग्राहकम्
551. ख – इत्येव सारम्
552. ख – बोध आवश्यकः
553. ख – वाक्यार्थ बुद्ध्यनुदयात्मानसौवेञ्जनिको
554. ख – निश्चय
555. ख – न च
556. ख – तून्मुखत्वे
557. ख – शक्तिसत्त्वात्
558. ख – शक्तिसत्त्वात्
559. ख – ग्रामपदार्थविशेषितोऽन्योन्याभावोरमणीयत्वावच्छिन्न प्रतियोगिताव्येधिकरण–संसर्गावच्छिन्न प्रतियोगिताकत्वसंसर्गेणात्यन्ताभावोऽन्वेति सरमणीयपदार्थान्वयी गेहे गेहे।
560. ख – प्रतियोगितावच्छेदकावच्छिन्न प्रतियोगिताकोऽत्यन्ताभावः
561. ख – ऽध्ययन कर्तृत्वपे भासते
562. ख – अन्वेति इति पाठो नास्ति
563. ख – संसर्गतयापि
564. ख – अन्यथापुनः
565. ख – चान्वयो द्विवचनार्थस्यैक
566. ख – धूमवन्निष्ठाभावाप्रतियोगिवह्निमान् धूमवानित्यन्वय
567. ख – वृत्यभावप्रतियोगित्वाभाववदध्ययन कृतिमान्

568. ख – यां यां प्रियः
569. ख – अशक्तवात् । यच्छब्दवीप्सा च न वह्नेः व्यापकता
570. ख – वीप्सा तु
571. ख – वाक्येनोपस्थितानां पाककृति यदर्थव्यक्त्यादीनां
572. ख – परामर्शऽन्वयप्रसङ्गात्
573. ख – भावस्येव व्यापकत्वमर्थो
574. ख – नत्रर्थान्वय
575. ख – साधनविकलो दृष्टान्तः प्रसज्येत
576. ख – ह्याद्यवृत्तिधर्मवान्
577. ख – भासद्वयमपि
578. ख – सूचितमव्याप्त इति व्याप्तेः
579. ख – वह्निव्याप्यधूमवान्पर्वत इत्यनेन
580. ख – वह्निव्याप्तिवैशिष्ट्यं इत्यनेन
581. ख – वह्निव्याप्तिवैशिष्ट्यं न प्रतीयते
582. ख – मा जन्यावयवान्तरेण
583. ख – पक्षधर्मतोपनायकाभावात्
584. ख – बुद्धौ
585. ख – भ्रमत्वशङ्काविरहे
586. ख – उपनयानन्तरमिति। अनुमतीति
587. ख – जनकं साध्यंधीज्ञानजनकम्
588. ख – परामर्श विषयाणामुपक्यादित्यर्थः
589. ख – प्रतिज्ञानिगमनञ्चापेक्षते इत्यत आह
590. ख – अन्यथेमित इति पाठो नास्ति
591. ख – तद्व्याप्यक्ताबुद्धेरपि
592. ख – प्रतिबन्धकतावच्छेदकं रूपम्
593. ख – सर्वथाव्यर्थमितिभावार्थे
594. ख – ज्ञानान्वयितयाऽिधानमेव सिद्धाभिधानम्
595. ख – विनावयवान्तर इति प्रतिज्ञा
596. ख – अबाधितत्वादेः संशयसाधारणं ज्ञानं कारणमिति
597. ख – सर्वत्रानिश्चयेऽपि न क्षतिरित्याशये नाह
598. ख – तत्र मत्तात्पर्थबोधपूर्वकमित्र्थः
599. ख – निगमनमेवेति भावः
600. ख – साध्यासिद्ध्यार्थान्तर प्रसङ्गादिति भावः
601. ख – वह्नित्वाद्यवच्छिन्ने

602. ख – भासेत
603. ख – तन्निश्चय सम्पादनम्
604. ख – सिद्धानुवादत्वञ्च पुनरुक्तत्वम्
605. ख – व्यञ्जकत्वमप्यनुपपन्नं स्यादित्याशयेनाह
606. ख – सिद्धतासिद्धानुवादत्वम्
607. ख – लक्षणं स्वातन्त्र्येष प्राङ्
608. ख – प्रतिज्ञादीनां तथैव लक्षणान्याह
609. ख – मुख्यविशेष्यकान्वयबोधजनकत्वं
610. ख – विशेष्यकान्व बोध
611. ख – प्रवेशेनाननुगमात्
612. ख – स्वत्वप्रवेशेनानुगतकल्पं
613. ख – वारणाय तत्रापि धूमादिति
614. ख – वारणायान्त्यपदवत्त्वे सतीति
615. ख – इतरान्वितस्वार्थबोधक
616. ख – निगमनीयपदपूर्वत्वात्तद्वारणाय
617. ख – अन्वयबोधक भिन्नेनिगमने
618. ख – हेत्वादय इ सूचितम्
619. ख – उदाहरणमित्यभिप्रेतम्
620. ख – प्राग्वर्तिमिवभक्त्यन्तार्थ विशेष्यकान्वय
621. ख – सत्यन्ताद्यर्थः
622. ख – विशेषणीयम्
623. ख – इत्यादि प्रतिज्ञायाम्
624. ख – इति निगमने
625. ख – तदर्थे विशेषतया
626. ख – स्वावक्यार्थकत्वात्
627. विशिष्ट्यशाब्दबोधो न्याय
628. ख – न्यायाघटकपदाजन्यो वा
629. ख – विशेषलक्षणमिति अन्व9यव्यतिरेक्युदाहरणम् नास्त्येव
630. ख – अत एवात् एव
631. ख – व्याप्त्युपन्यासोऽपीति
632. ख – प्रदर्शनात्
633. ख – वारयति
634. ख – इत्यवयवमणिदीधित्योमिर्ववरणं समाप्तम्। श्री सिद्धेश्वरी विजयतेतराम्।। शुभमस्तु सर्वजगतः।

द्वितीयस्तबकः

अवयवतत्त्वचिन्तामणिदीधितिगादाधरी विलासिनीसहिता

गङ्गेशोपाध्यायविरचितः

तत्त्वचिन्तामणिः

रघुनाथशिरोमणिविरचिता

अवयवतत्त्वचिन्तामणिदीधितिः

गदाधरभट्टाचार्यविरचिता

अवयवतत्त्वचिन्तामणिदीधितिगादाधरी

श्री ज्वालाप्रसादगौड़विरचिता

अवयवतत्त्वचिन्तामणिदीधितिगादाधरीविलासिनी

गङ्गेशोपाध्यायविरचितः

तत्त्वचिन्तामणिः

तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च

गदाधरभट्टाचार्यविरचिता

अवयवगादाधरी

श्रीरस्तु अनुमानं निरूप्य न्यायतदवयवनिरूपणं प्रतिजानीते तच्चेति। तत् निरूक्तम् अनुमानं परार्थं। विचारदशायां मध्यस्थस्य विवादविषयसाध्य-निश्चयरूपप्रयोजनसाधनम्। न्यायसाध्यमिति। न्यायप्रयोज्यमित्यर्थः। वादि-प्रयुक्तन्यायजन्यशाब्दबोधेन मध्यस्थस्य चरमकारणलिङ्गपरामर्शरूपानुमान-जननादिति भावः। ज्ञायमानलिङ्गस्यानुमानत्वेऽपि तद्विशेषणस्य परामर्शस्य न्यायाधीनत्वात्तद्विशिष्टस्य तथात्वमित्यवधेयम्।

श्रीज्वालाप्रसादगौड़विरचिता

विलासिनीव्याख्या

यत्कारुण्यकणस्पर्शान्मूको वाचस्पतीयति।
ब्रह्मोपेन्द्रशिवैर्वन्द्यां नौमि तां वागधीश्वरीम्।।१।।
मूढान्विवेकिनः कृत्वा लोके सर्वोपदेशिकः।
यस्तिष्ठति च तं श्रीमच्छिवदत्तं गुरुं भजे।।२।।
सहस्रवारं पितरौ प्रणम्य प्रणम्य च श्रीचरणे शिवस्य।
ज्वालाप्रसादः सुविचिन्त्य चैनां गदाधरोक्तिं वितृणोति धीरः।।३।।
तस्य न्यायावयवस्य ग्रन्थस्यैवाऽपरिष्कृताम्।
गादाधरीं परिष्कृत्य तनोति च विलासिनीम्।।४।।

अनुमानमिति द्वितीयार्थो विषयित्वम्, तस्य निरूप्येत्यत्र धात्वर्थ निरूपणघटकज्ञानेऽन्वयः। निरूपणञ्च अनुमानविशेष्यकलक्षणादि-प्रकारकशिष्यसमवेतज्ञानानुकूलो व्यापारः, आनन्तर्यं ल्यबर्थः, तच्च

अथवा अनुमानम्–अनुमितिः परार्थं–मध्यस्थस्य साध्यसंशयनिवृत्ति-रूपप्रयोजनसाधनम् परस्य–प्रतिवादिनोऽर्थः–संशयनिवृत्तिर्यस्मादिति तादृशानु-मितिर्वा। एतेन निरूपपणप्रयोजनमुपदर्शितम्, न्यायप्रयोगद्वारा मध्यस्थानुमितररेव न्यायज्ञानप्रयोजनत्वात् कारणत्वं, स्मरणप्रयोजकसम्बन्धकथनेन प्रसङ्गो वा सङ्गतिरपि दर्शिता।

ध्वंसाधिकरणकालवृत्तित्वम्, तस्याऽग्रिमनिरूपणपदार्थे व्यापारे अन्वयः, निरूपणमित्यत्र धात्वर्थः पूर्ववत् द्वितीयार्थो विषयित्वम् तस्य प्रतिज्ञायामन्वयः प्रतिज्ञा चाऽव्यहितोत्तरकालकर्तव्यत्वप्रकारकज्ञानानुकूलो व्यापारः वर्तमानत्वं-कृतिश्चाऽख्यातार्थः तथाचाऽनुमानविशेष्यकलक्षणादिप्रकारक "शिष्यसमवेत" ज्ञानानुकुलव्यापारध्वंसकालीनो यो न्यायतदवयवविषयकशिष्यसमवेतज्ञानानुकूल-"अनुमितिचरमकरणेत्यादिशब्दात्मक" व्यापारविशेष्यकस्वोत्तरकालवृत्तिकृति-जन्यत्वप्रकारकबोधानुकूलच्चेत्यादिशब्दात्मकव्यापारानुकूलकृतिमान् मूलकार इति बोधः।

विचारदशायामिति। विपरीतोद्**भावकपर**विजिगीषया न्यायप्रयोगो विचारः। **तद्दशायामिति**। तत्प्रयोज्यपरामर्शोत्तरकाले इति यावत्। अस्य च साध्यनिश्चयेऽन्वयः। **साध्यनिश्चयरूपप्रयोजनसाधनमिति**। तथा च परार्थमित्यस्य परः "संशयभिन्नः" निश्चयः अर्थः–"प्रयोजनं यस्येति विग्रहः। परस्य "मध्यस्थस्य" अर्थः "प्रयोजनं" यस्मादिति वा विग्रहः। आदौ न्याय-निरूपणं ततो न्यायज्ञानं शिष्यस्य–ततो न्यायः प्रयुज्यते तस्मान्मध्यस्थस्यानुमितिरूपं प्रयोजनं भवतीति तत्त्वम्। तथा च परार्थत्वं मध्यस्थानुमितिजनकत्वम्। मूले–साध्यपदं न जन्यत्वार्थकमित्याह। **न्यायप्रयोज्यमित्यर्थ** इति। तत्र हेतुमाह। **वादिप्रयुक्तेति**। सविशेषणे हीति न्यायेन विशेषणस्य परामर्शस्य न्यायप्रयोज्यत्वमादाय विशिष्टे तद्व्यवहारसमर्थनेऽपि ज्ञायमानहेतोरनुमानत्वे तस्य वास्तवं न्यायप्रयोज्यत्वं मणिकारोक्तमनुपपन्नमत आह। **अथवेति**। केवलान्वयिग्रन्थादावनुमानस्येवाऽनु-मितेरपि त्रैविध्योक्तेस्तच्चेत्यस्याऽनुमित्यर्थकत्वमाह **अथवेतीति केचित्। तत्**। निरुक्तलक्षणलक्षितमित्यर्थः। अनुमीयते इत्यनुमानमिति व्युत्पत्या भावे ल्युटो विधानादाह। **अनुमानं–अनुमितिरिति**। पूर्वोक्तार्थाऽसम्भवादाह।

प्रतिज्ञाहेतूदाहरणोपनय-निगमनानि निरूप्यन्ते। तत्र न समस्तरूपोपन्नलिङ्गप्रतिपादकवाक्यं न्यायः, अत्रैव वाक्येऽतिव्याप्तेः,

---

समस्तरूपेति। पक्षसत्वादिपञ्चरूपेत्यर्थः। उपनयेन पक्षसत्वस्य उदाहरणेन व्याप्तिघटकसपक्षसत्वविपक्षाऽसत्वयोर्निगमनेन तु अबाधितत्वाऽसत्प्रतिपक्षितत्वयोः प्रतिपादनाल्लक्षणसमन्वयः।

परार्थमिति। विजयप्रयोजकत्वमपि दर्शयति। **परस्येति। एतेन।** परार्थानुमानस्य न्यायप्रयोज्यत्वकथनेन **निरूपणप्रयोजनमिति।** न्यायतदवयवस्येत्यादिः। **उपदर्शितमिति।** प्रयोजनाऽप्रदर्शने ग्रन्थश्रवणे प्रवृत्यनुपपत्तेरिति भावः। **मध्यस्थानुमितेरेवेति।** एवकारेण स्वार्थानुमितेर्व्यवच्छेदः। सङ्गतिमाह। **कारणत्वमिति।** प्रयोजकत्वमित्यर्थः। तथा चानुमानस्य–अनुमितेर्वा निरूपणानन्तरं न्यायनिरूपणे प्रयोजकत्वं सङ्गतिः। प्रयोजकत्वस्य हेतुतानन्तर्भावेऽप्याह। **स्मरणेति। सम्बन्धकथनेन।** प्रयोजकत्वरूप-सम्बन्धकथनेन। तच्च प्रथमकल्पे स्वप्रयोज्यानुमितिप्रयोजकत्वम्। **स्वं॰** अनुमानम्। द्वितीयकल्पे च स्वप्रयोज्यसंशयनिवृत्तिप्रयोजक "अनुमिति" प्रयोजकत्वम्। **स्वं॰** अनुमितिः। ननु स्वभिन्नत्वे सति स्वप्रयोज्यकार्य-प्रयोजकत्वरूपैककार्यकारित्वसङ्गतिरपि सम्भवति, तथा हि परामर्शभिन्नत्वे सति परामर्श-प्रयोज्यकार्यप्रयोजकत्वस्य न्याये सत्वादिति चेन्न। एककार्यकारित्वं हि स्वभिन्नत्वे सति स्वाद्वारकत्वे सति स्वप्रयोज्यकार्यप्रयोज-कत्वरूपम्, एवं च परामर्शद्वारीकृत्यैव न्यायस्यानुमितिप्रयोजकतया निरुक्तैककार्यकारित्वस्य न्यायेऽसम्भवादिति ध्येयम्।

मूले। **तत्रेति।** न्यायदवयवयोर्मध्ये इत्यर्थः **समस्तेति।** समस्तरूपैः पक्षसत्त्वादिपञ्चरूपैरुपपन्नस्य विशिष्टस्य लिङ्गस्य प्रतिपादकं वाक्यमित्यर्थः। **पक्षसत्त्वादीति।** पक्षसत्त्वं च पक्षसम्बन्धः, एतच्च धूमवानयमित्येवोपनयाकारः इति प्राचीनमताभिप्रायेण! तेनोपनयस्य व्याप्तिबोधकत्वात्तेनैव सपक्षसत्त्ववक्ष्यमाण विपक्षासत्त्वयोर्बोधनादुदाहरणानुधावनमग्रे चोदाहरणादित्रिकेऽतिव्याप्तिकथनं नासङ्गतमिति ध्येयम्। **पक्षसत्त्वादीति।** आदिना सपक्षसत्त्वविपक्षाऽसत्त्वऽ-बाधितत्वाऽसत्प्रतिपक्षितत्वानां परिग्रहः। **उदाहरणेन व्याप्तिघटकसपक्षसत्त्व-**

अत्रैवेति। समस्तरूपोपपन्नं लिङ्गमित्यत्रैवेत्यर्थः अतिव्याप्तेरिति। इदमुपलक्षणम्। उदाहरणादित्रिकस्यापि न्यायत्वापत्तिर्द्रष्टव्या।

विपक्षाऽसत्त्वयोरिति। ननु सपक्षसत्त्वविपक्षाऽसत्त्वयोः कथं व्याप्तिघटकत्वमिति चेन्न। प्राचां मते साध्यवदन्यावृत्तित्वे सति साध्यसामानाधिकरण्यस्यैव व्याप्तित्वात्। तथाचोदाहरणस्य व्याप्तिबोधकत्वे तदुभयबोधकत्वमक्षतमिति भावः। **निगमनेन त्विति।** ननु धूमज्ञानज्ञाप्याऽबाधिताऽसत्प्रतिपक्षितवह्निमानिति निगमनवाक्याद्बोधः तत्राऽबाधितत्वमसत्प्रतिपक्षितत्वं च न वह्नेः धर्मः किन्तु हेतोरेवेति चेन्न। अत्राऽबाधितत्वं पक्षनिष्ठाभावाऽप्रतियोगित्वं तच्च वह्नावक्षतमेव। एवं स्वाभावव्याप्यप्रतिहेतुमत्पक्षवृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववत्त्वमसत्प्रतिपक्षितत्वं तत्र वह्नौ सुलभम्। वस्तुतस्तु निगमनघटकतत्पदस्याऽबाधितत्वादिविशिष्टलिङ्गे लक्षणा, प्रतिज्ञाहेतुभ्यां लिङ्गज्ञानाज्ञाप्यसाध्यबोधेन पुनर्निगमनतस्तादृशबोधे तात्पर्यविरहात्। तथा चाऽबाधितत्वादिकं हेतोरेव धर्म इति ध्येयम्।

ननु पर्वतो वह्निमान् धूमादित्यादौ बाधसत्प्रतिपक्षयोरप्रसिद्ध्या निरुक्तहेतावबाधितत्वादिघटितपञ्चरूपाऽप्रसिद्धिरिति चेन्न। अबाधितत्वपदेन पक्षनिष्ठाभावाप्रतियोगिसाध्यकत्वस्य, असत्प्रतिपक्षितत्वपदेन च स्वाभावव्याप्यप्रतिहेतुमत्त्वसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववत्पक्षस्यैव विवक्षितत्वात्।

न चैवमपि घटोऽभिधेयः प्रमेयत्वादित्यादिकेवलान्वयिसाध्यके विपक्षस्य, एतद्रूपवान् एतद्रसादित्यत्र व्यतिरेकसाध्यके सपक्षस्याऽप्रसिद्ध्या सपक्षसत्त्वविपक्षाऽसत्त्वयोरप्रसिद्धिरिति वाच्यम्। सपक्षसत्त्वविपक्षाऽसत्त्वाभ्यां व्यापकसामानाधिकरण्यस्यैव विवक्षितत्वात्।

समस्तरूपोपन्नमिति। लिङ्गं पक्षसत्त्वादिरूपनानाधर्मवदित्याकारकवाक्ये इत्यर्थः। न्यूनतां परिहरति। **इदमिति। न्यायत्वापत्तिरिति।** उदाहरणादित्रिकेऽतिव्याप्तिरिति भावः[१] ननु प्रतिज्ञाहेत्वोः पक्षसत्त्वाद्यबोधकतया प्रतिज्ञाहेतुघटितपञ्चावयवात्मकन्याये लक्षणाऽगमनेनाऽसम्भवसम्भवेऽतिव्याप्तिरसङ्गतेति चेन्न। पञ्चरूपोपन्नलिङ्गप्रतिपत्तिजनकप्रतिज्ञाहेतूदाहरणादिपञ्चावयवविषयक "यत्किञ्चिद्" समूहालम्बनज्ञानविषयत्वमादाय

किन्त्वनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः।

किन्त्विति। अनुमितीति। अनुमितिचरमकारणं यो लिङ्गपरामर्शः व्याप्तिप्रकारेण पक्षे यल्लिङ्गज्ञानं तत्प्रयोजकं यच्छाब्दज्ञानं तज्जनकं वाक्यमित्यर्थः। अत्र च प्रयोजकान्तं प्रतिज्ञादिसकलावयवार्थविषयकस्य महावाक्यार्थबोधस्य तावदर्थविषयकसमूहालम्बिनात्मकबोधस्य वा परिचायकमात्रं,

लक्षणसमन्वयात्।

स्वार्थविशिष्टं ज्ञानमित्येकत्वोक्तेर्लक्षणे एकज्ञानं निवेशयतामुपाध्यायानां मतं दर्शयति। **अनुमितीत्यादि।** "मूले" घटमानयेति वाक्येऽतिव्याप्तिवारणाय प्रयोजकान्तम्। उपनयेऽतिव्याप्तिवारणाय चरमेति। तस्याऽनुमितिकारणपरामर्शप्रयोजकशाब्दज्ञानजनकत्वात्। **चरमत्वं** चाऽनुमितिजनने स्वोत्तरभावविज्ञानानपेक्षत्वम्। तथा चोपनयप्रयोज्यानुमितिकारणपरामर्शस्य स्वोत्तरोत्पन्ननिगमनजन्याऽबाधितत्वादिज्ञानापेक्षणान्नातिव्याप्तिः। न चाऽनुमितिचरमकारणशाब्दज्ञानजनकत्वमित्येवोच्यतां किं लिङ्गपरामर्शप्रयोजकेत्यनेनेति वाच्यम्। तथा सत्यसम्भवापत्तेः। न्यायजन्यज्ञानस्य पक्षतावच्छेदकविशिष्टे साध्यव्याप्यवदभेदस्यैव विषयीकरणात्। नामार्थयोर्भेदान्वयस्याऽव्युत्पन्नतया पक्षे साध्यव्याप्यवैशिष्ट्यानवगाहित्वेन तादृशज्ञानस्यानुमित्यजनकत्वात्। तादृशपरामर्शप्रयोजकत्वं च तादृशपरामर्शजनकत्वम्। केचित्तु परामर्शप्रयोजकत्वं परामर्शजनकजनकत्वम्, अन्यथाऽसम्भवापत्तेः। न्यायजन्यज्ञानस्य वादिवाक्यजन्यत्वेनाऽप्रामाण्यज्ञानास्कन्दितत्वेन परामर्शजनकत्वादतोऽप्रामाण्यज्ञानानास्कन्दितविशेषणतावच्छेदकप्रकारकनिश्चयात्मकं "व्याप्तिज्ञानं" तादृश "न्यायज्ञानजन्यज्ञानान्तरमपेक्षणीयं तच्चाऽग्रे स्फुटीभविष्यतीति प्राहुः।

यत्र समयबन्धेनाऽयं नाभास इत्यादिरूपकण्टकोद्धारसहित एव न्यायप्रयोगः कृतः तत्र कण्टकोद्धारवाक्येऽतिव्याप्तिवारणाय **शाब्देति।** तथा च तत्पदमहिम्ना तादृशपरामर्शं प्रति तज्जन्यज्ञानस्य शाब्दत्वेन प्रयोजकत्वमित्यर्थः पर्यवस्यति। कण्टकोद्धारवाक्यस्य च योग्यताज्ञानमात्रसम्पादकत्वात्,

न तु परामर्शप्रयोजकत्वेन शाब्दज्ञानस्य लक्षणघटकता, किन्तु तावदर्थविषयकबोधत्वेनैव, अतो धूमवान्पर्वत इत्यादिवाक्यमात्रजन्याया अपि बुद्धेरुपनायकज्ञानादिविधया मानसपरामर्शप्रयोजकतया तत्रातिव्याप्तिरिति निरस्तम्।

योग्यताज्ञानस्य च शाब्दऽशाब्दसाधारणमेव हेतुत्वमिति नातिप्रसङ्गः। न्यायजन्यज्ञानस्य च प्रतिवादिपरामर्शं प्रति तादृशशाब्दत्वेन हेतुत्वमन्वय-व्यतिरेकादिति ध्येयम्।

महावाक्यार्थबोधस्येति। विशिष्टैकार्थतापन्नबोधस्येत्यर्थः। स चाऽनुषङ्ग-पक्षे धूमज्ञानज्ञाप्यवह्निमत्पर्वताऽभिन्न-धूमव्यापकवह्निमदभिन्नधूमवद-भिन्नवह्निव्याप्यधूमवदभिन्नःपर्वतोऽबाधिताऽसत्प्रतिपक्षित "धूमज्ञानज्ञाप्य" वह्निमत्पर्वताभिन्नः इत्याकारकः (केवलनिगमनार्थविधेयकः) अननुषङ्गपक्षे निगमनैकार्थतापन्नो य उपनयार्थस्तद्विधेयकः उदाहरणार्थान्वितो यो हेत्वर्थान्वितप्रतिज्ञार्थस्तदुद्देश्यको वा बोधः अत्रेदं बोध्यम्। उदाहरणवाक्ये यो य इत्यस्य स इत्यस्य-यथा महानसमित्यस्य च तात्पर्यग्राहकत्वमात्रम् वह्निपदस्य धूमव्यापकवह्नौ लक्षणा तद्वतोधूमवत्पदार्थेऽभेदान्वयः! तथा च धूमव्यापकवह्निमदभिन्नो धूमवान् उदाहरणार्थ इति। एतादृशमहावाक्यार्थबोधे च प्रतिज्ञादिपञ्चकस्यैव कारणतेत्याशयः। वक्ष्यमाणरीत्या तादृशबोधाऽसम्भव-मभिप्रेत्याह। **समूहालम्बनात्मकबोधस्य वेति।** वह्निमदभिन्नः पर्वतः-धूमज्ञानज्ञाप्यो वह्निःधूमव्यापकवह्निमदभिन्नो धूमवान्वह्निव्याप्यधूमवदभिन्नःपर्वतः-धूमज्ञानज्ञाप्याऽबाधिताऽसत्प्रतिपक्षितवह्निमदभिन्नः पर्वत इत्याकारकस्य वेत्यर्थः। **परिचायकमात्रमिति।** उपलक्षणमिति यावत्। तदेवाह **नत्विति।** नन्वेवं घटमानयेति वाक्येऽतिव्याप्तिरत आह। **किन्त्विति। तावदर्थविषयक-बोधत्वेनैवेति।** प्रतिज्ञार्थविषयकबोधत्वेन हेत्वर्थविषयकबोधत्वेन उदाहरणार्थ-विषयकबोधत्वेन उपनयार्थविषयकबोधत्वेन निगमनार्थविषयकबोधत्वेनेत्यर्थः एवकारेण तादृशपरामर्शप्रयोजकत्वव्यवच्छेदः। प्रयोजकत्वान्तपरित्यागे बीजमाह। **अत इति।** एतेनेति यावत्। तावदर्थविषयकबोधत्वेन निवेशादिति परमार्थः। अस्य निरस्तमित्यनेनाऽन्वयः। **उपनायकज्ञानादिविधया।** ज्ञानलक्षणासन्निकर्षविधया। **मानसपरामर्शप्रयोजकतयेति।** तद्विषयकमानसबोधे

तादृशयत्किञ्चिच्छाब्दबोधं प्रति यादृशयादृशधर्मप्रकारकत्वेन शब्दज्ञानस्य कारणता प्रत्येकं तत्तद्धर्मावच्छिन्न वाक्यसमुदायत्वस्य तादृशयत्किञ्चिच्छाब्द-बोधनिरूपिता शब्दज्ञाननिष्ठा या या कारणता प्रत्येकं तत्तदवच्छेदककोटि-प्रविष्टयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वपर्यवसितस्य विवक्षितत्वान्नास्माकं न्यायैकदेशेऽतिव्याप्तिः। तादृशधर्माश्च प्रतिज्ञादीनामानु-पूर्वीविशेषा एव।

तद्ज्ञानमात्रस्य हेतुत्वादित्यर्थः।

ननु मूलोक्तलक्षणस्याऽसम्भवः, तादृशशाब्दज्ञानजनकत्वस्य वाक्ये ऽसत्वात्, प्रत्युत वाक्यज्ञाने एव सत्त्वात्। न च तादृशशाब्दज्ञानजनकज्ञानविषयत्वं वाक्ये विवक्षणीयमिति वाच्यम्। तथाप्येकदेशातिव्याप्तेर्दुर्वारत्वात्, तादृशविषयताव्यापकत्वोक्तावसम्भव इत्यत आह। **तादृशेति।** प्रतिज्ञाद्यर्थविषय-केत्यर्थः। तथा च प्रतिज्ञाद्यर्थविषयकसमूहालम्बबोधं प्रति प्रतिज्ञादिवृत्ति आनुपूर्वी-प्रकारकज्ञानत्वेन प्रतिज्ञादिविशेष्यकज्ञानस्य कारणता अस्ति प्रत्येकं तादृशानुपूर्वीमद्वाक्यसमुदायत्वस्य प्रतिज्ञादिसमुदायरूपन्याये सत्वाल्लक्षण-समन्वयः। अत्रेदं बोध्यम्। घटमानयेति वाक्येऽतिव्याप्तिवारणाय तादृशत्वं शाब्दबोधविशेषणम्। न च यादृशयादृशेति वीप्सा किमर्थेति वाच्यम्। तथा सति एकैककारणतामादाय प्रतिज्ञादौ न्यायैकदेशेऽतिव्याप्तेः, न्यायज्ञाने एककारणता विरहात्। तात्पर्यज्ञानयोग्यताज्ञानादीनां व्यावृत्तये **शब्दज्ञानस्येति।** तत्तद्धर्मावच्छिन्नैकवाक्याऽप्रसिद्धिरतः **प्रत्येकमिति।** तथा च प्रतिज्ञाद्यर्थविषयक यत्किञ्चिच्छाब्दबोधनिष्ठजन्यतानिरूपितशब्दज्ञाननिष्ठजनकता यादृशयादृशधर्म प्रकारकत्वावच्छिन्ना तादृशतादृशधर्मसमानाधिकरणसमुदायत्वं पर्यवसितम्।

अत्र पर्वतो वह्निमानिति प्रतिज्ञाज्ञानस्याऽव्यवहितोत्तरत्वसम्बन्धेन तत्तद्वर्णविशिष्टचरमवर्णवृत्तिधर्मप्रकारकज्ञानत्वेन हेतुत्वाद् (वर्णानुपूर्वी एव तादृशो धर्मः स च पविशिष्टनत्व-धविशिष्टतत्व-यविशिष्टनत्व-तविशिष्टमत्व-तविशिष्टनत्व रूपः] तदवच्छिन्नत्वं पञ्चवर्णस्यैवेति तादृशवाक्यगतचरमवर्णपञ्चकेऽतिव्याप्तिः। यद्यपि तादृशशाब्दबोधं प्रति पूर्वपूर्ववर्णविशिष्टोत्तरोत्तरवर्णत्वप्रकारकज्ञानस्य हेतुत्वेऽसम्भव एव,

पर्वतो वह्निमानित्याकारकबोधे पर्वतो वह्निमान् पर्वतो दहनवानित्याकारकविविधानुपूर्वीप्रकारकज्ञानानामेव हेतुतया तथाविधैकैकानुपूर्व्यवच्छिन्नवाक्यपञ्चकस्य न्यायत्वानुपपत्तिरतो यत्किञ्चिच्छाब्दबोधनिवेशः।

तत्तदवच्छिन्नमात्रवृत्तित्वस्य न्यायगतसमुदायत्वेऽसत्त्वात्, उदासीनवाक्यान्तरसाधारणसमुदायत्वमादायोदासीनवाक्यघटितसमुदायेऽतिव्याप्तिवारणाय मात्रपदार्थान्तर्भावस्याऽऽवश्यकत्वात्। एवं चाऽसम्भववारणाय तादृशयत्किञ्चिच्छाब्दबोधं प्रति शब्दज्ञानस्य यादृशयादृशधर्मप्रकारकत्वेन हेतुत्वं तादृशतादृशधर्मप्रकारकज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वं विवक्षणीयमतो नातिव्याप्तिरपि। तथापि गौरवमस्त्येवातो लघुलक्षणान्तरमाह। **तादृशेति।**

वस्तुतः पत्वादिना घटाद्यवगाहिज्ञानस्यापि हेतुत्वानुरोधेन पूर्वपूर्ववर्णविशिष्टोत्तरोत्तरवर्णत्वप्रकारकज्ञानत्वेन न हेतुत्वं किन्तु अव्यवहितोत्तरत्वसम्बन्धावच्छिन्नपत्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाभिन्नाऽव्यवहितोत्तरत्वसम्बन्धावच्छिन्नाऽत्वावच्छिन्नप्रकारतानिरूपितेत्यादिक्रमेण निरूप्यनिरूपकभावापन्ननत्वावच्छिन्नविशेष्यताकज्ञानत्वेनैव प्रतिज्ञादिज्ञानस्य कारणताकल्पनमावश्यकम्, तत्र च विनिगमनाविरहेणाऽव्यवहितपूर्वत्वसम्बन्धावच्छिन्ननत्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाभिन्नऽव्यवहितपूर्वत्वसम्बन्धावच्छिन्नाऽऽत्वावच्छिन्नप्रकारतानिरूपितेत्यादिक्रमेण पत्वावच्छिन्नविषयताकत्वस्यापि कारणतावच्छेदकतया पत्वादिरपि तादृशो धर्म इति तत्तद्धर्मावच्छिन्नसमुदायत्वं न चरमवर्णपञ्चकस्येति न तत्रातिव्याप्तिः परन्तु यादृशवर्णस्यानेकधाप्रतिज्ञादिघटकत्वं तादृशैकैकवर्णघटितप्रतिज्ञादिसमुदायेऽतिव्याप्तिदुर्वारैवेत्यतः कल्पान्तरानुसरणमिति परमगुरवः।

तादृशयत्किञ्चिच्छाब्दपदं च प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थपञ्चविषयकसमूहालम्बनपरम्। तादृशसमूहालम्बनशाब्दबोधनिरूपितजनकतान्तर्गताः प्रतिज्ञादिवृत्ति आनुपूर्वीविषयकज्ञानत्वावच्छिन्नपञ्चजनकताः एव तासां प्रत्येकमवच्छेदककोटिप्रविष्टा या प्रतिज्ञादिविषयकयत्किञ्चिद्ज्ञानीयविषयता तदाश्रयवर्णत्वव्यापकसमुदायत्वस्य प्रतिज्ञादिपञ्चके सत्वाल्लक्षणसमन्वयः। तादृशसमुदायत्वस्य केवलप्रतिज्ञायां विरहान्नातिव्याप्तिरित्याशयेनाऽऽह। **नास्माकमिति** पूर्ववदत्रापि कल्पे घटमानयेति[2] वाक्येऽतिव्याप्तिवारणाय

तादृशत्वं शाब्दबोधविशेषणम्।

शाब्दबोधे यत्किञ्चित्त्वनिवेशस्य फलमाह। **पर्वतो वह्निमानित्याकारकबोधे** इति। वह्निमदभिन्नः पर्वत इत्याकारकबोधे इत्यर्थः **न्यायात्वानुपत्तिरिति।** एकविधानुपूर्व्यवच्छिन्नवाक्यपञ्चकस्य विविधानुपूर्व्यवच्छिन्नवर्णत्वव्यापकत्वाभावादिति भावः। तथा च यत्किञ्चित्पदेन पर्वतो वह्निमानित्याद्येकैकवाक्यपञ्चकज्ञानाव्यवहितोत्तरजायमानस्तन्मात्रविषयकः शाब्दबोधो विवक्षणीयः। **इदमुपलक्षणम्।** हेत्वर्थादिविषयकबोधमादायाऽप्यसम्भवोबोध्यः। तादृशबोधं प्रत्यपि विविधानुपूर्वीप्रकारकज्ञानानां हेतुत्वात्।[3]

तादृशयकिञ्चिद्ज्ञाननिवेशे यत्र पर्वतपदप्रतिपाद्यत्वादिशब्दघटितहेतुभिः प्रतिज्ञाद्यर्थविषयकानुमितिः वह्निमदभिन्नपर्वतविषयकं ज्ञानं प्रतिज्ञार्थविषयकं पर्वतादिपदप्रतिपाद्यत्वादित्याकारिका, तत्र तादृशानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयताश्रयवर्णत्वव्यापकत्वस्य परामर्शविषयपर्वतधूमवह्निपदसमुदायत्वे सत्वात्तादृशसमुदायेऽतिव्याप्तिरिति शाब्दबोधनिवेशः, शाब्दत्वावच्छिन्नजन्यतालाभाय।

अत्र कारणतायां शब्दज्ञाननिष्ठत्वाऽनिवेशे तादृशयत्किञ्चिच्छाब्दबोधनिरूपिता या योग्यताज्ञाननिष्ठकारणता तदवच्छेदकविषयताश्रयवर्णाऽप्रसिद्ध्याऽसम्भवः स्यादत**स्तदुपात्तम्।**[4]

तादृशकारणतावच्छेदकीभूतप्रतिज्ञाद्येकैकमात्रविषयकयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकत्वस्य प्रतिज्ञादिघटकवर्णमात्रवृत्तिसमुदायत्वेऽपि सत्वात्प्रतिज्ञाद्येकैकावयवेऽतिव्याप्तिः, तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वाऽसत्वान्न्यायमात्रेऽसम्भवो वा स्यादतो **या येति।** तथा च प्रत्येकवृत्तिसमुदायत्वस्य तावद्यकिञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वाऽव्यापकत्वान्न दोषः। न च कस्याश्चिदपि विषयताव्यक्तेस्तावज्जनकतावच्छेदकत्वाभावादुक्तलक्षणाऽसम्भव इति वाच्यम्। यत्किञ्चिच्छाब्दनिरूपितशब्दज्ञाननिष्ठजनकतात्वव्यापकयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वे तात्पर्यात्। यत्किञ्चिद्ज्ञाने जनकतात्वव्यापकता च स्वनिरूपितविषयत्वावच्छेद्यत्वसम्बन्धेन[5]। स्वं-ज्ञानम्।

अथ तादृशशाब्दबोधनिष्ठा या याऽव्यवहितोत्तरत्वसम्बन्धेन ज्ञानावच्छिन्नजन्यता प्रत्येकं तत्तदवच्छेदकीभूतयत्किञ्चिद्ज्ञानीयविषयताश्रय-

वर्णत्वव्यापकसमुदायत्वमित्यस्यैव सम्यक्त्वे **किं तादृशजन्यतानिरूपितजनकतायां प्रत्येकावच्छेदकयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वनिवेशेन।** जन्यतायां ज्ञानावच्छिन्नत्वनिवेशाद् योग्यताज्ञानकारणतानिरूपिततज्जन्यताव्यावृत्तिरिति चेन्न। यादृशधर्मिणि यादृशधर्मस्य शाब्दबोधः एकानुपूर्वीज्ञानादेव भवति तादृशशाब्दबोधे तादृशज्ञानानन्तर्यस्य कार्यतावच्छेदककोटौ निवेशे प्रयोजनविरहेण तादृशधर्मिणि तादृशधर्मसाध्यकस्थलीयन्यायेऽव्याप्तिः स्यादिति।

अत्र समूहालम्बनशाब्दबोधनिरूपितशब्दज्ञाननिष्ठा या या कारणता तत्तत्कूटवद्यत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्व[६] निवेशे स्वरूपसम्बन्धरूपजनकताया जनकज्ञानभेदाद्भिन्नत्वे प्रतिज्ञाद्यानुपूर्वीविशेषप्रकारकज्ञानत्वावच्छिन्नजनकतानामाश्रयत्वस्य प्रतिज्ञाद्येकैकविषयकज्ञानेऽसम्भवादसम्भवोऽतो**ऽवच्छेदकत्वनिवेशः।** तथा च जनकताया जनकभेदेन भिन्नत्वेऽपि एकैकप्रतिज्ञाविषयकज्ञाननिष्ठजनकताया अवच्छेदकत्वं अपरप्रतिज्ञाविषयकज्ञानीयविषयतायामपि प्रतिज्ञाद्यानुपूर्व्यवच्छिन्नविषयतात्वेनाऽक्षतमिति एकप्रतिज्ञाविषयकज्ञानेऽपि अपरप्रतिज्ञाविषयकज्ञाननिष्ठजनकतावच्छेदकीभूतविषयतानिरूपकत्वनिर्वाहः।

यद्वा "जनकताया ऐक्ये" यत्र यस्य पुरुषस्य नियमतोऽप्रामाण्यज्ञानास्कन्दितमेव न्यायविषयकं ज्ञानं जायते तत्र न्यायेऽव्याप्तिः, तादृशन्यायविषयकज्ञानस्य तादृशकारणताकूटवत्त्वविरहात्। स्वमते चाऽप्रामाण्यज्ञानास्कन्दितज्ञाने जनकताविरहेऽपि तादृशज्ञानीयविषयताया "वर्णनिष्ठायाः" जनकतावच्छेदकत्वोपगमान्नाव्याप्तिरिति। वस्तुतो यादृशप्रतिज्ञाज्ञानस्य नियमतो वर्णान्तरविषयकत्वं-तद्वर्णघटिततादृशप्रतिज्ञाघटितन्यायेऽव्याप्तिः, तादृशन्यायगतसमुदायत्वस्य तादृशजनकताकूटवद्ज्ञानीयविषयतावद्वर्णत्वाऽव्यापकत्वात्। "तादृशजनकता" अवच्छेदकत्वनिवेशे तु उदासीनवर्णविषयता न जनकतावच्छेदिकेति नाव्याप्तिः। एतेन तादृशी या या कारणता प्रत्येकं तत्तदाश्रयीभूतयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदात्वनिवेशेऽपि अप्रामाण्यज्ञानानास्कन्दितप्रतिज्ञादिप्रत्येकमात्रविषयकयत्किञ्चिद्ज्ञानमादाय लक्षणसमन्वयादवच्छेदकत्वनिवेशो व्यर्थ इत्यपि निरस्तम्।

समानानुपूर्वीकनानावाक्यविषयतानामेवाऽनुगतरूपेणैककारणतायामवच्छेदकत्वात् पर्वतो वह्निमानित्याद्येकैकवाक्यव्यक्तिघटितवाक्यपञ्चकवृत्तिसमुदायत्वस्य न तादृशकारणतावच्छेदकविषयताश्रयवर्णत्वव्यापकत्वमिति यत्किञ्चिद्-ज्ञानीयविषयतानिवेशः।

तादृशयावत्कारणतानिरूपितावच्छेदकत्वाऽप्रसिद्ध्याऽसम्भवापत्तिरतः **प्रत्येक**मिति। तादृशकारणतायां प्रत्येकमेकावच्छेदकत्वाऽप्रसिद्ध्या तद्दोषः स्याद**तस्तत्तदिति।**

तादृशयावत्कारणतान्तर्गताऽऽनुपूर्वीप्रकारकत्वविशिष्टज्ञानत्वावच्छिन्नकारणताया अवच्छेदकं न विषयत्वमित्यसम्भववारणाय **कोटिप्रविष्टेति।** साक्षात्परंपरा-साधारणावच्छेदकत्वलाभाय।

अस्मद्गुरुचरणास्तु तादृशयत्किञ्चिच्छाब्दबोधनिरूपितशब्दज्ञाननिष्ठा या या कारणता प्रत्येकं तत्तदवच्छेदकीभूतविषयताश्रयवर्णत्वव्यापकत्व-निवेशेऽसम्भवः। तथाहि पर्वतो वह्निमानित्याकारकशाब्दबोधे यथा अव्यवहितोत्तरत्वसम्बन्धेन पकारादितत्तद्वर्णविशिष्टचरमवर्णविषयकज्ञानत्वेन कारणत्वं-तथा विनिगमनाविरहेण पकारादितत्तद्वर्णविशिष्टनिष्ठ विशेष्यता-निरूपितवर्णत्वव्याप्यनत्वादिनिष्ठावच्छेदकताकत्वेनापि। एवं च या या कारणता तादृशकारणतायाः साक्षादवच्छेदकत्वं वर्णत्वव्याप्यनत्वादिजातावेवेति कारणतावच्छेदकतादृश विषयत्वाप्रसिद्धेः। अतः साक्षात्परम्परासाधारणा-वच्छेदकतालाभाय कोटिप्रविष्टत्वनिवेशनम्। तथा च तत्तद्वर्णनिष्ठ-प्रकारतानिरूपितविशेष्यत्वावच्छिन्नप्रकारतानिरूपितविशेष्यता-निरूपितवर्णत्वव्याप्यनत्वादिजातिनिष्ठावच्छेदकताकज्ञानत्वावच्छिन्ना या कारणता तस्याः परम्परयाऽवच्छेदकत्वस्य प्रतिज्ञाघटकवर्णविषयतायां सत्वान्नाऽसम्भवः। **एतेन** विषयताविशिष्टज्ञानत्वेन कारणत्वे ज्ञानत्वत्वप्रवेशे गौरवात्, लाघवाद् ज्ञानीयविषयतावत्त्वेनैव कारणत्वस्य स्वीकर्त्तव्यतया विषयतायामेव साक्षादवच्छेदकत्वसत्त्वात्कोटिप्रविष्टेति विशेषणं व्यर्थमिति समाहितम्।

यत्किञ्चिद्ज्ञानीयविषयतेत्यत्र शब्दज्ञाने यत्किञ्चित्त्वनिवेशस्य फलमाह **समानेति।** समानाऽऽनुपूर्वी येषां तेषां नानावाक्यविषयतानामेवेत्यर्थः। एवकारेण

एकैकवाक्यविषयताव्यवच्छेदः। समानाकारकज्ञानीयविषयताया ऐक्यादिति भावः। **अनुगतरूपेणेति**। पर्वतो वह्निमानित्यानुपूर्व्यवच्छिन्नविषयतात्वेनेत्यर्थः। **तादृशेति** तादृशशाब्दबोधनिरूपितशब्दज्ञाननिष्ठेत्यर्थः। तादृशजनकतायाः परम्परयाऽवच्छेदकीभूतविषयताश्रयत्वं पत्वादिजातावप्यस्तीति साक्षादवच्छेकीभूतविषयताश्रयत्वस्याव्यवहितोत्तरत्वेऽप्यस्ति इति तादृशविषयताश्रयत्वव्यापकत्वं न न्यायवृत्तिसमुदायत्वे इत्यसम्भववारणाय **वर्णेति**।

न च तादृशविशेष्यताव्यापकत्वमित्येवोच्यताम् अव्यवहितोत्तरत्वसंसर्गे पत्वादिजातौ वा तादृशविशेष्यताविरहान्नातिव्याप्तिरिति वाच्यम् तथासति पभिन्नसमुदायेऽतिव्याप्तिः। तथाहि अव्यवहितोत्तरसम्बन्धावच्छिन्न-पत्वावच्छिन्नप्रकारतानिरूपितअत्वावच्छिन्नविशेष्यत्वावच्छिन्न "तादृशसम्बन्धावच्छिन्न" प्रकारतानिरूपितरत्वावच्छिन्नविशेष्यतेत्यादिक्रमेण कारणता वक्तव्या न तु पत्वनिष्ठप्रकारतानिरूपितपनिष्ठविशेष्यत्वा-वच्छिन्नप्रकारतेत्यादिक्रमेण गौरवात्। तथा च पनिष्ठविशेष्यतायां जनकतावच्छेदकत्वविरहादिति ध्येयम् एवं तादृशप्रकारताव्यापकत्वमित्युक्तौ नभिन्नसमुदायेऽतिव्याप्तिर्बोध्या।

तादृशी या या कारणता प्रत्येकं तत्तदवच्छेदककोटिप्रविष्टविषयता-श्रयवर्णत्वसामानाधिकरण्यस्याऽन्तिमपचवर्णवृत्तिसमुदायत्वे सत्वेनाऽन्तिमपञ्च-वर्णेऽतिव्याप्तिरतो **व्यापिकेति**।

यथाश्रुतन्यायलक्षणस्यानुगमस्तु तादृशशाब्दबोधविशिष्टसमुदायत्वम् वैं० स्वनिष्ठजन्यतानिरूपितनिश्चयत्वावच्छिन्नकारणतात्वव्यापकत्वसम्बन्धेन व्यापकताऽऽधेयतासम्बन्धेन। आधेयता च स्वनिष्ठनिरूपितत्वसम्बन्धा-वच्छिन्नावच्छेदकतानिरूपिताऽवच्छेदकतानिरूपिता सती ज्ञानवृत्ति उभया-वृत्तिधर्मनिष्ठ-निरवच्छिन्नावच्छिन्नावच्छेदकतानिरूपकनिरूपितत्वसम्बन्धाव-च्छिन्नावच्छेदकतानिरूपिका या विषयतात्वावच्छिन्नावच्छेदकता तन्निरूपक वर्णनिष्ठावच्छेदककता निरूपक वृत्तित्वनिष्ठावच्छेदकता निरूपक भेदनिष्ठा-वच्छेदकता निरूपकप्रतियोगित्वनिष्ठावच्छेदकता निरूपकीभूता याऽवच्छेदक-तात्वावच्छिन्न प्रतियोगिता तन्निरूपकाभाववत्त्वसम्बन्धावच्छिन्ना ग्राह्या अभावप्रतीतिस्तु स्वावच्छेदकीभूततद्ज्ञानीयविषयताश्रयवर्णवृत्तिभेदप्रतियोगिता-

न च वाक्यान्तरसाधारणसमुदायत्वमादाय वाक्यान्तरघटितसमुदायेऽति-व्याप्ति वाच्यम्। तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वेन समुदायत्वस्य विवक्षणीयत्वात्।

वच्छेदकत्वं नास्तीति। स्वं कारणता।[७]

अथ तथापि तादृशयावत्कारणतायां तादृशयत्किञ्चिद्ज्ञानीयविषयत्वा-वच्छिन्नत्वमस्ति तादृशयत्किञ्चिद्ज्ञानीयतत्तत्कारणतानिरूपित साक्षादवच्छेद-कताश्रयप्रमीयविषयतासामानाधिकरण्यं यादृशसमुदायत्वेऽस्ति तादृशसमुदायत्वं न्यायत्वमित्युक्तौ न कुत्रापि दोषः–किं **तादृशवर्णत्वव्यापकत्व**निवेशेन विषयतायां प्रमीयत्वनिवेशात् पत्वादिना घटावगाहिभ्रममादाय नाऽसम्भवः **अनुगमस्तु** तादृशकारणतात्वव्यापकसमुदायत्वम् व्यापकता च स्वसमानाधि-करणविषयतावत्त्वसम्बन्धेन विषयतावत्ता च स्वनिरूपितसाक्षादवच्छेदकता-वत्त्व स्वनिरूपकनिरूपितकारणतात्वव्यापकज्ञानीयत्वैतदुभयसम्बन्धा-वच्छिन्नाधेयत्वसम्बन्धेन ज्ञानव्यापकत्वं च स्वनिरूपितविषयत्वावच्छिन्नत्व-सम्बन्धेनेति चेन्न प्रकृतकल्पापेक्षया एतत्कल्पस्य गुरुत्वात्।

नन्वत्र रमाधवः पूज्यो रमाधवत्वादित्यादौ तादृशप्रतिज्ञाघटकरेफाऽ-घटिततादृशप्रतिज्ञैकदेशमाधवः पूज्य इत्यादिभागघटितहेत्वादिसमुदाये**ऽति-व्याप्तिः**, तद्वृत्तिसमुदायत्वे रमाधवः पूज्य इत्यादिप्रतिज्ञाज्ञानाऽव्यवहितोत्तर-जायमानपूज्यतावदभिन्नो माधव इत्याकारकयत्किञ्चिच्छाब्दबोधनिरूपित-तादृशप्रतिज्ञाविषयकज्ञानत्वावच्छिन्नजनकतावच्छेदकीभूतपूर्वोक्तप्रतिज्ञाघटकीभूत माधवः पूज्य इति भागविषयकयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्व-व्यापकत्वस्य सत्त्वात् एवं तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वस्य न्यायगतसमुदायत्वेऽसत्त्वेन तत्रत्यन्यायेऽव्याप्तेश्चेति चेन्न तादृशयावत्कारणता-न्तर्गतायाःतात्पर्यज्ञानकारणताया अवच्छेदकीभूतयत्किञ्चिद्ज्ञानीय-विषयताश्रयवर्णत्वव्यापकत्वस्य तादृशसमुदायत्वेऽभावात्, रमाधवः पूज्य इति प्रतिज्ञाघटकवर्णसमुदायस्यैव वक्तृतात्पर्यविषयतया तादृशसमुदायविषय-कज्ञानस्यैव कारणत्वेन तदवच्छेदकविषयताश्रयवर्णत्वस्य तद्घटकीभूतरेफादि-वर्णेऽपि सत्त्वात् तदेकदेशमात्रस्य वक्तृतात्पर्यविषयत्वे समुदायप्रयोगानुपपत्तेः, कथञ्चित्प्रयोगेऽपि तत्समुदायघटितहेत्वादिसमुदायस्य न्यायत्वानङ्गीकारात्

न चैवमपि व्युत्क्रमप्रयुक्तप्रतिज्ञादिसमुदायेऽतिव्याप्तिस्तदवस्थैवेति वाच्यम्। व्युत्क्रमप्रयुक्तप्रतिज्ञादिवृत्तियद्यत्समुदायत्वं तावद्भेदकूटेन निरुक्तसमुदायत्वस्य विशेषणीयत्वादिति दिक्।

न चैवमपि एकैकन्यायघटकं यत्प्रतिज्ञादिवाक्यं तत्समुदायेऽतिव्याप्तिरिति वाच्यम्। स्वाश्रयीभूतयत्किञ्चित्प्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तदन्यत्वस्य समुदायत्वे विशेषणीयत्वान्न दोष इति ध्येयम्।

अत एव प्रतिज्ञालक्षणप्रविष्टन्यायावयव घटकाऽवयवाघटकत्वदलसार्थक्यमुपपादयतां केषाञ्चिन्मतदूषणसमये स्वयमेवोक्तमिति ध्येयम्।

ननु घटवद्भूतलादिरूपोदासीनवाक्यघटितन्यायेऽतिव्याप्तिः, प्रतिज्ञादिपञ्चार्थविषयक यत्किञ्चिच्छाब्दबोधनिरूपितप्रतिज्ञादिपञ्चविषयक "शब्द" ज्ञाननिष्ठकारणतावच्छेदकविषयताश्रयवर्णत्वव्यापकसमुदायत्वस्य तत्र सत्वात्। तादृशवाक्यघटितन्यायवृत्तिसमुदायत्वस्य तादृशवर्णत्वव्यापकत्वादित्याशङ्कते। **न चेति। वाक्यान्तरसाधारणेति** घटवद्भूतलसाधारणेत्यर्थः। **वाक्यान्तरघटितसमुदाये** इति। घटवद्भूतलघटितप्रतिज्ञादिसमुदाये इत्यर्थः। **तादृशसमुदायत्वनिष्ठेति** तादृशयत्किञ्चिच्छाब्दबोधनिरूपितशब्दज्ञाननिष्ठसकलकारणतावच्छेदकविषयताश्रयवर्णत्वव्यापकसमुदायत्वनिष्ठेत्यर्थः **न्यूनवृत्तित्वाऽनिरूपकत्वेनेति** यद्यदन्यूनवृत्ति तन्निष्ठन्यूनवृत्तितानिरूपकत्वं तस्येति निरुक्तसमुदायत्वं वाक्यान्तरघटिततादृशसमुदायत्वस्य न्यूनवृत्ति इति निरुक्तसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वं वाक्यान्तरघटिततादृशसमुदायत्वस्येति भावः। तथा च तादृशयत्किञ्चिच्छाब्दबोधनिरूपितशब्दज्ञाननिष्ठसकलजनकतावच्छेदकविषयताश्रयवर्णत्वव्यापकसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकं यद्यत्समुदायत्वं तद्भिन्नं यत्तादृशवर्णत्वव्यापकसमुदायत्वं तद्वत्त्वं समुदितार्थः तथाच वाक्यान्तरघटितसमुदायत्वे तद्भिन्नत्वविरहान्नातिव्याप्तिः।

प्रतिज्ञात्वादिनिष्ठन्यूनवृत्तितानिरूपकत्वादसम्भववारणाय **सकलकारणतानिवेशः।** तादृशवर्णत्वसमानाधिकरणप्रतिज्ञानिष्ठसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वादसम्भववारणाय **व्यापकतानिवेशः।** अत एव वर्णत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वं वर्णत्वे नोक्तम्।

अत्र च तादृशसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वं च यत्किञ्चित्तादृशसमुदायत्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वे सति तदन्यत्वम्। अवच्छेदकता च पर्याप्त्यतिरिक्तस्वरूपसम्बन्धावच्छिन्ना ग्राह्या। **तेन** न्यायगतसमुदायत्वाधिकरणे वाक्यान्तरघटितन्यायवृत्तिसमुदायत्वनिष्ठपर्याप्तिसम्बंन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदसत्त्वेऽपि न क्षतिः। सामान्यतस्तादृशसमुदायत्वनिवेशे पर्वतो वह्निमान् पर्वतो दहनवानित्यादिन्यायत्ववति एकतरन्याये चालनीयन्यायेन वाक्यान्तरसाधारणसमुदायभेदसत्त्वेनातिव्याप्तिरतोयत्किञ्चित्त्वनिवेशः। असम्भववारणाय तदन्यत्वनिवेशः।[८] [स्वसमानाधिकरणयत्किञ्चित्तादृशसमुदायत्वावच्छिन्नभेदसामानाधिकरण्यनिवेशे तु समुदाये एकदेशभेदस्वीकारापत्तेः]

अत्रेदं बोध्यम्। तादृशी या या कारणता तत्तदवच्छेदकीभूतयत्किञ्चिद्ज्ञानीयविषयताश्रय**वर्णत्वसमनियतसमुदायत्वनिवेशे** असम्भवः। तादृशी या या कारणता प्रत्येकं तत्तदवच्छेदकीभूतयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वसामनैयत्यस्य कुत्रापि समुदायत्वेऽसत्त्वात्, अतः सामनैयत्यघटकव्याप्यत्वं परित्यज्य वाक्यान्तरघटितसमुदायवारणाय तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वं समुदायत्वे निवेशितम्।

न च स्वावच्छेदकविषयतावत्त्वसम्बन्धेन तादृशकारणताकूटवद्यत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वसामनैयत्वनिवेशे नासम्भवः- तादृशकारणताकूटवत्त्वस्य न्यायघटकनिखिलवर्णेष्वेव सत्त्वेन तादृशवर्णत्वसामनैयत्यस्य समुदायत्वे सत्त्वादिति वाच्यम्। तादृशकारणताकूटवद्वाक्यान्तरविषयकन्यायविषयकयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वसामनैयत्यस्य वाक्यान्तरसाधारणसमुदायत्वे सत्वेन तद्वत्यतिव्याप्तेर्दुर्वारत्वात्। न च तादृशी या या कारणता प्रत्येकं तत्तदवच्छेदकीभूतयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकत्वे सति प्रत्येकं तत्तदवच्छेदकीभूतविषयत्वाभावकूटवद्वर्णावृत्तित्वस्य विवक्षणान्नोक्तदोष इति वाच्यम्। तत्समानाकारकन्यायान्तरघटकीभूतयकिञ्चिद्वर्णघटितन्यायसमुदायेऽतिव्याप्तेः। न च तथापि तादृशी या या कारणता प्रत्येकं तत्तदवच्छेदकीभूतयादृशयकिञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकत्वं तादृशकारणतानां प्रत्येकावच्छेदकीभूततादृशकिञ्चिद्ज्ञानीयविषयत्वाभावकूटवद्वर्णावृत्तित्वं समुदायत्वे विवक्षणीयमतो

नोक्तदोष इति वाच्यम्। अननुगमात्।

यद्यपि अनुगमः सम्भवति। तथाहि समुदायत्वविशिष्टसमुदायत्ववत्त्वम्। समुदायत्वे समुदायत्ववैशिष्टयञ्चस्वतादात्म्य-स्ववृत्तिर्यो यत्किञ्चिच्छाब्दबोध-निरूपिततादृशजनकतात्वावच्छिन्नानुयोगिताकपर्याप्तिककूटत्वावच्छिन्नत्वे सति निरूपितत्वसम्बन्धावच्छिन्नकिंन्निष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकता निरूपिता या ज्ञानवृत्त्युभयावृत्तिधर्मनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपक "निरूपितत्वसम्बन्धावच्छिन्नज्ञाननिष्ठ" अवच्छेदकतानिरूपिका विषयतात्वा-वच्छिन्ना प्रतियोगिता तन्निरूपकाऽभाव "रूपसम्बन्धावच्छिन्ननिरूपकता तन्निरूपिताधिकरणतावद्वृत्तित्वं नास्तीति प्रतीतिसिद्धाभावस्तदीयवृत्तित्व-त्वावच्छिन्नप्रतियोगितानिरूपितधर्मिनिष्ठावच्छेदकता निरूपिताऽधिकरणता निष्ठावच्छेदकता निरूपितावच्छेदकता विशिष्टनिरूपकता निरूपिताधिकरण-तावत्त्व एतदुभयसम्बन्धेन। निरूपकतायामवच्छेदकतावैं॰ स्वाश्रयनिरूपक-तावच्छेदकरूपावच्छिन्नत्व-स्वनिरूपिताऽवच्छिन्नत्वसम्बन्धावच्छिन्नाऽभावरूपसम्बन्ध-निष्ठावच्छेदकता निरूपितप्रतियोगित्वनिष्ठावच्छेदकतायाः परम्परया निरूपिता या ज्ञानवृत्त्युभयावृत्तिधर्मनिष्ठावच्छेदकता तत्समानाधिकरणाऽवच्छेदकता-निरूपकावच्छेदकतानिरूपिका या यत्किञ्चिन्निरूपितावच्छेदकता-वद्विषयतात्वावच्छिन्नावच्छेदकता तन्निरूपकवर्णनिष्ठावच्छेदकता-निरूपकवृत्तित्वनिष्ठावच्छेदकता निरूपक भेदनिष्ठावच्छेदकता निरूपक प्रतियोगित्वनिष्ठावच्छेदकतानिरूपकाऽवच्छेदकत्वनिष्ठप्रतियोगिताका-भाववत्त्वसम्बन्धावच्छिन्नत्वैतदुभयसम्बन्धेनेति। तथापि यत्किञ्चित्पदेन न्यायद्वयविषयकज्ञानमादाय न्यायद्वये पर्वतो वह्निमानिति प्रतिज्ञाद्वयघटित-हेत्वादिसमुदाये चातिव्याप्तिर्बोध्या।

न च तथापि यत्र न्यायद्वयविषयकज्ञानमेव नियमतो जायते तत्र न्यायद्वयेऽतिव्याप्तिस्तदवस्थैवेति वाच्यम्। तत्राऽगत्या न्यायत्वस्येष्टत्वात्। एतेन स्वाश्रयीभूतयत्किञ्चित्प्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्ति यद्यत्समुदायत्वं तदन्यत्वनिवेशस्याऽवश्यकतया तत्र प्रतिज्ञायां यत्किञ्चित्त्व-निवेशादेवोक्तातिव्याप्तिवारणसम्भवे व्यर्थं तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वा-निरूपकत्वविशेषणमिति निरस्तम्। उक्तन्यायद्वयेऽव्याप्तिभिया स्वाश्रयी-भूतेत्यादिनिवेशस्याऽशक्यत्वात्। पर्वतो वह्निमान् धूमाद् यो यो धूमवान् स स

वह्निमान्-वह्निव्याप्यधूमवानयं-तस्माद्वह्निमान्पर्वत इत्यादिसमुदायेऽतिव्याप्तिश्चाऽतः सामनैयत्यं विहाय तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वन्निवेशितं गदाधरेणेति ध्येयम्।

एवमपि। तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वाऽनिरूपकत्वनिवेशेऽपि। **व्युत्क्रमप्रयुक्तप्रतिज्ञादिसमुदाये इति।** सामान्यतः साध्यवत्पक्षादिबोधक-वाक्याद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तादृशसमुदायत्व-वतीत्यर्थः। तेन तत्र प्रतिज्ञाव्यवहाराभावेऽपि न क्षतिः। **अतिव्याप्तिस्त-दवस्थैवेति।** व्युक्रमप्रयुक्तप्रतिज्ञादिवृत्तिसमुदायत्वे तादृशवर्णत्वव्यापकत्वस्य तादृशन्यूनवृत्तित्वाऽनिरूपकत्वस्य च सत्वादिति भावः। कथायामाकाङ्क्षा-क्रमेणाऽभिधानमिति मूलेऽलक्ष्यत्वं स्फुटमेवेति हृदयम्। **तावद्भेदकूटेनेति।** सामान्यतः प्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तदन्यत्वेनेत्यर्थः। अग्रे चाऽत्रैव प्रतिज्ञायां स्वाश्रयत्वनिवेशोऽधिकः। प्रतिज्ञापदं च तत्समानानुपूर्वीकवाक्यपरम्। अव्यावर्त्तकपदार्थभेदाऽनिवेशलाभाय समुदायत्वमिति।

दिगिति। एकैकन्यायघटकप्रतिज्ञादिवाक्यसमुदायेऽतिव्याप्तिवारणा-याऽऽवश्यकस्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्येत्यादिविशेषणेनैव व्युत्क्रमप्रयुक्तप्रतिज्ञादिपञ्चकेऽतिव्याप्तिवारणसम्भवान्निरुक्तसमुदायत्वे एतादृशसमुदायत्वभेदनिवेशो व्यर्थ एवेति ध्येयम्।

आशङ्कते। **न चेति। एवमपि।** व्युत्क्रमप्रयुक्तप्रतिज्ञादिवृत्तियद्यत्समुदायत्वं तदन्यत्वनिवेशेऽपि। यत्रैकन्यायघटकप्रतिज्ञा-न्यायान्तरघटकं हेत्वादिचतुष्टयम्, एवमेकन्यायघटकप्रतिज्ञाहेतुवाक्यद्वयमपरन्यायघटकवाक्यत्रयम्-एवमेकन्याय घटकप्रतिज्ञादिवाक्यत्रयम् अपरन्यायघटकवाक्यद्वयम्-एवमेकन्यायघटकवाक्य-चतुष्टयम् अपरन्यायघटकनिगमनवाक्यमिति रीत्या तत्तद्वाक्यवृत्तिसमुदायत्वमादाय तत्तत्पञ्चकेऽतिव्याप्तिर्बोध्या। **समुदायत्वस्येति।** प्रतिज्ञाद्यर्थविषयकशाब्द-बोधनिरूपिता शब्दज्ञाननिष्ठा या या कारणता प्रत्येकं तत्तदवच्छेदककोटि-प्रविष्टयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वस्येत्यर्थः। इदं चाव्यावर्त्तक भेदानिवेशलाभाय। **स्वाश्रयीभूतेति।** स्वं-समुदायत्वम्। इदं चाऽसम्भववारणाय। समानाकारकप्रतिज्ञाद्वयघटितहेत्वादिसमुदायेऽति-व्याप्तिवारणाय **यत्किञ्चिदिति। विशेषणीयत्वादिति।** तथाच

स्वाश्रयीभूतयत्किञ्चित्प्रतिज्ञाऽव्यवहितोत्तरत्वशून्यहेतुवृत्तिसमुदायत्व-स्वाश्रयीभूतयत्किञ्चिद्धेत्वव्यवहितोत्तरत्वशून्योदाहरणवृत्तिसमुदायत्व-स्वाश्रयीभूतयत्किञ्चिदुदाहरणाऽव्यवहितोत्तरत्वशून्योपनयवृत्तिसमुदायत्वम् एवं स्वाश्रयीभूतयत्किञ्चिदुपनयाऽव्यवहितोत्तरत्वशून्यनिगमनवृत्तिसमुदायत्वमेतद्भेदकूटस्य समुदायत्वे विशेषणीयत्वादित्यर्थः। तथाच निरुक्तसमुदायत्वे समुदायत्वविशिष्टान्यत्वं निवेशनीयम्। समुदायत्ववैᳬस्वतादात्म्य स्वाश्रयीभूतयत्किञ्चित्प्रतिज्ञाऽव्यवहितोत्तरत्वशून्यहेतुवृत्तित्वस्वाश्रयीभूत-यत्किञ्चिद्धेत्वव्यवहितोत्तरत्वशून्योदाहरणवृत्तित्व-स्वाश्रयीभूतयत्किञ्चिदु-दाहरणाव्यवहितोत्तरत्वशून्योपनयवृत्तित्वस्वाश्रयीभूतयत्किञ्चिदु-पनयाव्यवहितोत्तरत्वशून्यनिगमनवृत्तित्वान्यतम एतदुभयसम्बन्धेनेति।[१] अत्र स्वपदेन समुदायत्वान्तरमादायाऽसम्भववारणाय स्वतादात्म्यनिवेशः। एवं हेतुवृत्तित्वान्ताऽनिवेशे धूमाद् यो धूमवान् स वह्निमान् वह्निव्याप्यधूमवानयं तस्माद्वह्निमान्, पर्वतो वह्निमानिति वाक्यसमुदायेऽतिव्याप्तिःस्यात्। एवमन्येषामपि सार्थक्यं बोध्यम्।

नचाऽत्र न्यायवृत्तिसमुदायत्वस्यापि स्वाश्रयीभूतयत्किञ्चित्प्रतिज्ञाऽ-व्यवहितोत्तरत्वशून्यहेतुघटकद्वितीयादिवर्णवृत्तित्वेन तदन्यत्वस्य तत्राऽसत्त्वेनाऽसम्भव इति वाच्यम्। स्वाश्रयीभूतप्रतिज्ञाव्यवहितोत्तरत्व-शून्यत्वाऽनतिरिक्तवृत्तियद्धेतुत्वं तत्समानाधिकरणं यद्यत्समुदायत्वं तदन्यत्वस्य विवक्षणात्। इत्थं च स्वाश्रयीभूतयत्किञ्चित्प्रतिज्ञेत्यत्र प्रतिज्ञापदानुक्तौ धूमाद्-यो यो धूमवान् स स वह्निमान्-वह्निव्याप्यधूमवानयं-तस्माद् वह्निमान्-पर्वतो वह्निमानिति व्युत्क्रमप्रयुक्तवाक्यपञ्चकेऽतिव्याप्तिः, तद्वृत्तिसमुदायत्व-समानाधिकरणहेतुत्वस्य स्वाश्रयीभूतधकारादिवर्णाव्यवहितोत्तरवृत्तित्वेन स्वाश्रयीभूताऽव्यवहितोत्तरत्वशून्यत्वाऽनतिरिक्तवृत्तित्वाभावेन स्वपदेन तादृश समुदायत्वस्योपादानाऽसम्भवात्, स्वपदोपात्तसमुदायान्तरभेदस्य तत्र सत्वात्। प्रतिज्ञापदोपादाने तु स्वपदेन तस्योपादानसम्भवान्न तत्राऽतिव्याप्तिरिति।

न च तथाप्यसम्भवः, पर्वतो वह्निमान् धूमादित्यादिन्यायवृत्तिसमुदायत्वे स्वाश्रयीभूतप्रतिज्ञात्वाश्रयपकाररूपयत्किञ्चित्प्रतिज्ञाऽव्यवहितोत्तरत्वशून्यत्वस्य हेतौ सत्त्वेन तद्वृत्तिसमुदायत्वभेदस्य निरुक्तसमुदायत्वेऽसत्वादिति वाच्यम्। स्वसमानाधिकरण प्रतिज्ञात्वपर्याप्त्य"नुयोगिता"वच्छेदकयत्किञ्चिद्-

धर्मावच्छिन्नाव्यवहितोत्तरत्वशून्यहेत्वादिवृत्तिसमुदायत्वभेदस्य तादृशसमुदायत्व-विशेषणान्नोक्ताऽसम्भव इति ध्येयम्।

नच तथापि जिज्ञासाद्वाराप्रयुक्ते पञ्चावयवात्मकन्यायेऽव्याप्तिः, तद्वृत्तिसमुदायत्वसमानाधिकरणहेतुत्वस्य स्वाश्रयीभूतप्रतिज्ञाऽव्यवहितोत्तरत्व-शून्यत्वाऽनतिरिक्तवृत्तितया स्वपदेनोपादानसम्भवात्, तद्भेदस्य तत्राऽसत्त्वादिति वाच्यम्। स्वप्रयोज्यजिज्ञासाप्रयोज्यत्व-स्वाव्यवहितोत्तरत्वैतदन्यतर-सम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताक "स्वाश्रयीभूत" प्रतिज्ञावद्-भेदव्याप्यहेतुत्वसमानाधिकरणसमुदायत्वभेदे तात्पर्यात्। एवं हेत्वव्यहितोत्तरत्व-शून्यत्वादिकं निर्वाच्यम्।[१]

अथात्र **नञ्द्वयोपादानं** किमर्थम्। स्वाश्रयीभूतप्रतिपाद्यव्यवहितोत्तरत्व-विशिष्टसमुदायत्वस्यैव संयक्त्वादिति चेन्न। अनुयोगिनि स्वत्वान्तर्भावेणाऽननु-गमापातात्। नञ्द्वयान्तर्भावे तु प्रतियोगिनि स्वत्वान्तर्भावान्नाननुगम इति ध्येयम्। नव्यास्तु एकन्यायस्य प्रतिज्ञाहेतू-अन्यस्य हेतूदाहणे-अपरस्योदा-हरणोपनयौ-अन्यस्योपनयनिगमने इत्यष्टावयवसमुदायेऽतिव्याप्तिवारणाय स्वाश्रयप्रतिज्ञोत्तरहेतुवृत्तित्वे सतीत्याद्यपहाय नञ्द्वयप्रवेश इत्याहुः। तच्चिन्त्यम्।

अत्र तत्तत्समुदायत्वभेदानां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदत्वेन न लक्षणघटकता प्रतियोगिनामानन्त्येनाऽनन्तभेदनिवेशे गौरवात्, किन्तु स्वतादात्म्य-स्वाश्रयीभूतप्रतिज्ञानिरुक्ताऽव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकताक प्रतियोगिताकभेदव्याप्यहेतुत्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नसमुदायत्वनिष्ठा वच्छेदकताकप्रतियोगिताकभेदवत्त्व-स्वतादात्म्य-स्वाश्रयीभूतहेतु-निष्ठता-दृशसम्बन्धावच्छिन्नाऽवच्छेदकताकप्रतियोगिताकभेदव्याप्योदाहरणत्व-सामानाधिकरण्योभयसम्बन्धावच्छिन्नसमुदायत्वनिष्ठावच्छेदकताक-प्रतियोगिताकभेदवत्त्व-स्वतादात्म्य-स्वाश्रयीभूतोदाहरणनिष्ठतादृशसम्बन्धा-वच्छिन्नावच्छेदकताकप्रतियोगिताकभेदव्याप्योपनयत्वसामानाधिकरण्योभयसम्बन्धा-वच्छिन्नसमुदायत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्व-स्वतादात्म्य-स्वाश्रयीभूतोपनयनिष्ठतादृशसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताक-भेदव्याप्यनिगमनत्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नसमुदायत्व-निष्ठावच्छेदकताकप्रतियोगिताकभेदचतुष्टयानां अनुगतरूपावच्छिन्न-प्रतियोगिताकानां तत्तद्व्यक्तित्वेन निवेशः, न तु अननुगतरूपावच्छिन्नप्रति-

योगिताकभेदत्वेन निवेशो गौरवात्।[१०]

अथ नानान्यायघटकप्रतिज्ञाद्येकवाक्यवृत्तिसमुदायत्वस्य प्रकृतन्यायनिष्ठ-समुदायत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वविरहेणातिप्रसङ्ग एव नास्ति किमर्थं स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्येत्यादिनिवेशः। न चैवं विनिगमनाविरहेण नानान्यायघटकप्रतिज्ञाद्येकैकवाक्यवृत्तिसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वस्यैव प्रकृतन्यायत्वे सत्वादसम्भवः, अतः स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्व-शून्येत्वादिवृत्तियद्यत्समुदायत्वं तदन्यत्वविशिष्टसमुदायत्वनिष्ठन्यून-वृत्तित्वानिरूपकत्वनिवेशनमावश्यकमिति वाच्यम्। तथापि तत्राऽतिव्याप्ति-कथनाऽसङ्गतेरिति चेत् सत्यम्। तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्व-निवेशेऽसम्भवः, स्वातिरिक्तं यन्न्यायत्वं तन्निष्ठन्यूनवृत्तितानिरूपकत्वस्यैव स्वस्मिन् सत्वादतो न्यूनवृत्तित्वं स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वससमानाधिकरण्यं वाच्यम्। एवञ्च स्वातिरिक्तन्यायत्वे स्वसमानाधि-करण्यविरहेण न्यूनवृत्तित्वविरहान्नासम्भवः। तथाच स्वावच्छिन्नभेदसामाना-धिकरण्यस्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताक-प्रतियोगिताकभेदवत्त्वसम्बन्धेन तादृशसमुदायत्ववत्त्वं न्यूनवृत्तित्वानिरूपकत्वं पर्यवसितम्। अथवा प्रकृतन्यायत्वे नानान्यायघटकप्रतिज्ञाद्येकैकसमुदायत्व-निष्ठन्यूनवृत्तितानिरूपकत्वसत्त्वेऽपि नाऽसम्भवः। एवञ्च तादृशसमुदायेऽति-प्रसङ्गवारकतयैव स्वाश्रयीभूतेत्यादिनिवेशसार्थक्यम्।

केचितु न्यूनवृत्तित्वमत्र व्याप्यतारूपमेव विवक्षणीयम्। स्वसमानाधिकरण-भेदप्रतियोगितावच्छेदकत्वसहितसामानाधिकरण्यरूपस्य तस्य विवक्षणे न्यायत्वरूपसमुदात्वस्य नानान्यायघटकप्रतिज्ञादिपञ्चकसमुदायत्वनिष्ठ-न्यूनवृत्तितानिरूपकत्वेन न्यायमात्रेऽसम्भवापत्तेः। तथाच न्यायनिष्ठ-समुदायत्वस्य नानान्यायघटकप्रतिज्ञादिपञ्चकसमुदात्वव्याप्यत्वाभावात्ता-दृशविशेषणाऽनपायादतिव्याप्तिसङ्गतिः।

न चाऽसम्भववारणायाऽनिरूपकत्वकुक्षिप्रविष्टसमुदायत्वमेव तादृशभेदकूटै-र्निवेश्यतां, न्यायगतसमुदायत्वस्य नानान्यायघटकप्रतिज्ञादिपञ्चकसमुदायत्व-निष्ठन्यूनवृत्तितानिरूपकत्वेऽपि तादृशप्रतिज्ञादिपञ्चकसमुदायत्वस्य तादृशभेदकूटवत्त्वविरहान्नाऽसम्भवः। न वा नानान्यायघटकप्रतिज्ञादिपञ्चक-समुदायेऽतिव्याप्तिः, तादृशसमुदायत्वस्य तादृशभेदकूटवन्न्यायवृत्तिसमुदायत्व-

प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते तेन च विशिष्टवैशिष्ट्यावगाहिमानान्तरमुत्थाप्यते तेन च चरमपरामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजकता।

न्यायजन्यबोधस्य परामर्शप्रयोजकतां सङ्गमयति। प्रतिज्ञादीति। एकवाक्यतयेति। विशेषणे तृतीया। तथाचैकवाक्यतापन्नैरित्यर्थः। एकवाक्यत्वं च

निष्ठन्यूनवृत्तितानिरूपकत्वात्। व्याप्यत्वरूपन्यूनवृत्तित्वं निवेश्य पुनरतिव्याप्तिवारणार्थमनुयोगिनि भेदकूटनिवेशस्य प्रक्षालनाद्धीति न्यायेन हेयत्वादिति वाच्यम्। प्रतियोगिकुक्षौ भेदकूटनिवेशेऽपि समानाकारकन्यायान्तरवृत्तिसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वस्य प्रकृतन्यायत्वे सत्वेनाऽसम्भववारणाय न्यूनवृत्तित्वस्य सामानाधिकरण्यघटितताध्रौव्ये न्यायसमुदायत्वासामानाधिकरणसमुदायत्ववति व्युत्क्रमप्रयुक्तप्रतिज्ञादिसमुदायेऽतिव्याप्तिवारणायानुयोगिन्यपि भेदकूटनिवेशस्याऽऽवश्यकत्वात्।

न च तथापि अनुयोगिनि व्युत्क्रमप्रतिज्ञादिवृत्तिसमुदायत्वभेदाः, प्रतियोगिनि च नानान्यायघटकप्रतिज्ञादिवृत्तिसमुदायत्वभेदाः, निवेश्यन्ताम्, त्वन्मतेऽनुयोगिन्येव, मम तु अनुयोगिनि एकविधाःप्रतियोगिनि चाऽन्यविधा भेदा इति विभागेन निवेशः, अत उभयत्र तुल्यनिवेशेन न गौरवमपीति वाच्यम्। तावतापि अनुयोगिनि भेदकूटनिवेशापेक्षया प्रतियोगिकुक्षौ निवेशे तावत्सु प्रतियोगितावच्छेदकत्वमावश्यकमिति गौरवस्य जागरूकत्वात्। तस्माद्व्याप्यत्वमेव न्यूनवृत्तित्वम्। एवञ्चाऽतिव्याप्तिवारणायाऽनुयोगिनि भेदकूटनिवेश आवश्यक इति प्राहुः।

अथ एकैकन्यायघटकप्रातिज्ञाद्येकैकवाक्यघटितसमुदायत्वस्य स्वव्यभिचारित्व-स्वसामानाधिकरण्योभयसम्बन्धेन तादृशसमुदायत्वविशिष्टान्यत्वरूपतादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वनिरूपकत्वविरहादेवाऽतिव्याप्तिवारणसम्भवे व्यर्थं स्वाश्रयप्रतिज्ञाद्यव्यवहितोत्तरत्वादिविशेषणम्! न च न्यायत्वरूपसमुदायत्वस्यापि नानान्यायघटकप्रतिज्ञादिपञ्चगततादृशसमुदायत्वनिष्ठसामानाधिकरण्यघटितन्यूनवृत्तितानिरूपकत्वादसम्भव इति वाच्यम्। सामानाधिकरण्यमपहाय व्यापकत्वस्य निवेशनीयत्वादिति चेन्न।

विशिष्टैकार्थप्रतिपादिकत्वम्, तदुत्थाप्याऽऽकांक्षानिवर्तकत्वं-तन्निवर्त्तनीयाऽऽकांक्षोत्थापकत्वाऽन्यतरवत्त्वं वा। तेन पञ्चवाक्यजन्यमहावाक्यार्थबोधाऽसम्भवेऽपि न क्षतिः। स्वार्थविशिष्टज्ञानं। तत्तद्वाक्यार्थविषयकज्ञानं। तच्च समूहालम्बनमन्यथा वेत्यन्यदेतत्। विशिष्टवैशिष्ट्यावगाहिमानान्तरं। विशिष्टवैशिष्ट्यबोधात्मकपरामर्शजनकं मनः उत्थाप्यते। स्वात्मकसहकारिसंपन्नीक्रियते। तेन तथाविधेन मनसा परामर्श उत्पाद्यते इत्युपाध्यायः।

अत्र च तदेव ज्ञानं परामर्शरूपं उपनयार्थविषयकत्वादित्याक्षिप्य उपनयस्य व्याप्त्यंशे न तात्पर्यं, तथासति न्यायजन्यबोधे उदाहरणार्थतया उपनयार्थतया च व्याप्तिभाने पौनरुक्त्यं स्यात् किन्तु पक्षधर्मत्वमेवापनयेन विवक्षितम्। तथाचोदाहरणार्थव्याप्तेरुपनयार्थपक्षधर्मतायाश्च विशृङ्खलमेवभानमिति न न्यायजन्यबोधस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहिता। व्याप्यः पक्षे वर्त्तते न वा इत्याकांक्षानिवर्त्तनानुरोधेनैव वह्निव्याप्यादिपदघटितमुपनयवाक्यं प्रयुज्यत इति स एव समाहितवान्।

तथासति नानान्यायघटकप्रतिज्ञादिपञ्चगतसमुदायत्वेऽव्यापकत्वघटितन्यूनवृत्तितानिरूपकत्वस्याऽक्षततया तादृशसमुदायेऽतिव्याप्तिरतः स्वाश्रयीभूतप्रतिज्ञेत्यादिविशेषणम्।

तदुथाप्येति। प्रतिज्ञानिगमनयोः सङ्ग्रहाय प्रतीकद्वयम्। **तेन**। द्वितीयकल्पानुसरणेन। न्यायार्थबोधपरामर्शयोरन्तराज्ञानाऽभावाद्विशिष्टेत्याद्यसङ्गतिरतो व्याचष्टे। **विशिष्टेति**। मीयते अनेनेति व्युत्पत्तिलब्धज्ञानकरणघटकज्ञाने-विशिष्टवैशिष्ट्यावगाहीत्यस्याऽभेदेना ऽन्वयाद्विशिष्टवैशिष्ट्यावगाह्यभिन्नज्ञानकरणमित्यर्थलाभः। तच्च करणं न्यायजन्यबोधः। करणान्तरं मन इत्यर्थः। उत्थाप्यते इत्यस्य जन्यते इति नार्थो, मनसो नित्यत्वादत आह। **स्वात्मकेति**। स्वं-न्यायजन्यशाब्दज्ञानं। तेनेति तत्पदस्य केवलमनःपरामर्शकत्वेऽसङ्गतिः, तस्य परामर्शानुत्पादकत्वादत आह। **तथाविधेनेति**। तादृशविशिष्टज्ञानसहितेनेत्यर्थः। **तदेव ज्ञानं**। तत्तद्वाक्यार्थविषयकज्ञानमेव। तर्हि तथोपनयः कथं प्रयुज्यते इत्यत आह। **व्याप्यःपक्षे इति**। **स एव**। उपाध्याय एव।

उपाध्यायमतेऽस्वरसम्दर्शयति। **अत्रेदं चिन्त्यते** इत्यादिना। **आकांक्षितं**। जिज्ञासितं। **तादृशाकांक्षां**। वह्निव्याप्यः पर्वते नवेत्याकांक्षां। **तथाविधबोधे**।

अत्रेदं चिन्त्यते। यदि व्याप्तिविशिष्टे पक्षधर्मत्वमेवाऽऽकांक्षितं तदा व्याप्तिविशिष्टविषयक एव बोधस्तादृशाकांक्षां निवर्त्तयिष्यतीति तथाविधबोधे एवोपनयतात्पर्यमावश्यकम्। न चैवमपि आकांक्षानिवृत्तये अवान्तरवाक्यार्थ-बोधस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वोपगमेऽपि न्यायजन्यमहावाक्यार्थबोधे उपनयाद्व्याप्तिभानं नोपेयते, उदाहरणादेव तद्भानात्। अवान्तरवाक्यार्थधियः परामर्शरूपत्वेऽपि निगमनजन्याऽबाधितत्वादिप्रतिपत्तेरनुमितावपेक्षितत्वात्ता-वत्पर्यन्तं तदसत्त्वेन परामर्शान्तरस्याऽपेक्षेति वाच्यम्। अवान्तरवाक्यार्थबोधे व्याप्तिभानानुरोधेन तदंशेऽप्युपनयतात्पर्यकल्पनाया आवश्यकत्वे महावाक्यार्थबोधे तद्भानेऽपि वाधकाभावादिति।

न्यायजन्यज्ञानस्य वादिवाक्यजन्यत्वेनाऽप्रामाण्यशङ्काकवलिततयाऽनु-मितिजननायोग्यतया परामर्शान्तरस्वीकार इति मिश्राः।

नव्यास्तु पक्षांशे व्याप्तिविशिष्टहेतुवैशिष्ट्यावगाहिज्ञानमेवाऽनुमितिहेतुः। न तु व्याप्याऽभिन्नहेतुमदभिन्नज्ञानम्। तादृशविशिष्टवैशिष्ट्यावगाहिता च न न्यायजन्यशाब्दबुद्धेः, नामार्थयोर्भेदेनाऽन्वयबोधस्याऽव्युत्पन्नत्वात्, अतो व्याप्यत्वावच्छिन्नहेतुनिष्ठप्रकारताबोधहेतु हेतुविशेष्यकव्याप्तिरूपविशेषणता-वच्छेदकप्रकारकमानसज्ञानान्मानस एव तादृशपरामर्शोऽवश्यमंगीकर्त्तव्य इत्यभिप्रायेण तेन चेत्याद्यभिहितम्। विशिष्टवैशिष्ट्यावगाहिमानान्तरं-

---

व्याप्तिविशिष्टविषयकबोधे। एवकारेण शुद्धहेतुतावच्छेदकावच्छिन्ने पक्षधर्मत्वस्य व्यावृत्तिः। **तद्भानात्** व्याप्तिभानात्। ननु अवान्तरवाक्यार्थबोधस्य परामर्शरूपत्वे तत एवाऽनुमित्युपपत्तौ परामर्शान्तस्वीकारो व्यर्थ इत्यत आह। **अवान्तरवाक्यार्थधिय** इति। **तावत्पर्यन्तं।** निगमनजन्याऽबाधितत्वादि-प्रतिपत्तिपर्यन्तं। **तदसत्वेनेति।** उपनयवाक्यजन्यव्याप्तिविशिष्टवैशिष्ट्या-वगाहिपरामर्शाऽसत्वेनेत्यर्थः। उपनयजन्यबोधोत्तरनिगमनश्रवणपदार्थोपस्थित्या तन्नाशादिति भावः। **तदंशेऽपि। व्याप्यंशेऽपि तद्भानेऽपि।** व्याप्तिभानेऽपि। **बाधकाभावादिति।** अवान्तरवाक्यार्थबोधे एव साङ्ग्र्यपेक्षिता। महावाक्यार्थबोधश्च सम्भूतसाङ्ग्रीकाऽवान्तरवाक्यार्थबोधाधीन एवेति पुनर्भाने वादितात्पर्यापेक्षाशङ्कानवकाशः। मिश्रसमाधानमाह। **न्यायजन्यज्ञानस्येति। मिश्रा** इति। एवमपि अप्रामाण्यशङ्कानैयत्ये मानाभावात् क्वचित्परामर्शवैयर्थ्यं

विशिष्टवैशिष्ट्यबोधजनकं विशेषणतावच्छेदकीभूतव्याप्तिप्रकारक-धूमत्वावच्छिन्नविशेष्यकज्ञानम् उत्थाप्यते। जन्यते। तेन तादृशविशेषणता-वच्छेदकप्रकारकज्ञानेन परामर्शो जन्यते इत्यर्थः। न चैवं तेन परामर्शस्य जननादिति ग्रन्थाऽसङ्गतिः। तत्र परामर्शपदस्य व्याप्याभिन्नहेतुमदभेदबोध-परत्वादित्याहुः।

शुद्धहेतुतावच्छेदकावच्छिन्ने पक्षधर्मत्वाकांक्षया तत्र पक्षधर्मत्वबोधमात्र-तात्पर्यकं व्याप्त्यर्थकपदाऽघटितमेवोपनयवाक्यं प्रयुज्यते इति प्राचीनमताभि-प्रायकमिदम्, अत एव दीधितिकृता तन्मताभिप्रायेणैवोदाहरणोपनययोरेव तत्पर्यवस्यतीत्यत्रोदाहरणान्तर्भावेणैव परामर्शप्रयोजकत्वपर्यवसानमुक्तम्, न तूपनयमात्रस्येत्यपि वदन्ति।

अत्र परामर्शप्रयोजकत्वेन शाब्दज्ञानस्य लक्षणघटकत्वे स्वयमनुपपत्तेर्वक्ष्य-माणतया शाब्दज्ञानपदं प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थज्ञानपञ्चकपरं, जनकवाक्यपदं च प्रत्येकं तत्तद्बोधजनकवाक्यपञ्चकपरम्, अतःप्रतिज्ञादिवाक्य-पञ्चकलाभः। प्रयोजकान्तं च बोधविशेषाणां परिचायकमात्रम्। यद्यप्येवं

दुर्वारमेवेत्यस्वरसः।

स्वमतेन समाधानमाह **नव्यास्त्विति** एवकारव्यवच्छेद्यमाह। **नत्विति। अत इति।** न्यायजन्यशाब्दबुद्धेर्विशिष्टवैशिष्ट्यावगाहित्वाभावादित्यर्थः। **व्याप्यत्वावच्छिन्नहेतुनिष्ठप्रकारताकबोधहेत्विति।** वह्निव्याप्यधूमवान्पर्वत इत्याकारकबोधहेत्वित्यर्थः। **मानसज्ञानादिति।** वह्निव्याप्यो धूम इत्याकारकमानसज्ञानादित्यर्थः न्यायार्थज्ञानस्य हेतौ व्याप्त्यप्र**कारकत्वान्मान-सानुधावनम्। अभिहितमिति मूलकृतेति शेषः। तेन।** वह्निव्याप्यधूमवानय-मिति वाक्येन। **तत्र।** परामर्शजनकवाक्यमिति लक्षणे।

धूमः पक्षे वर्तते नवेत्याकांक्षा, तथा चाऽयमित्येवोपनय इति व्याप्तिपक्षधर्मतयोर्विशृंखलमेव भानमिति वदतां मतमाह **शुद्धेति। तत्र।** न्याये **इदम्।** चरमःपरामर्श उत्पाद्यते इत्येतत्। **अत एवेति** उपनयस्य व्याप्त्यर्थकपदाऽघटितत्वादेवेत्यर्थः। **तन्मताभिप्रायेणैवेति।** प्राचीनमताभि-प्रायेणैवेत्यर्थः। **तत्** परामर्शप्रयोजकत्वम्।

रघुनाथशिरोमणिविरचिता

अवयवदीधितिः

उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम्।

प्रतिज्ञादिपञ्चवाक्यैरेकज्ञानाऽजननेऽप्येतादृशलक्षणाऽनिर्वाहविरहः। तथापि प्रतिज्ञादिजन्यबोधानां परामर्शप्रयोजकता लाभायैव सम्भवाभिप्रायेण तावदर्थविषयकमेकं ज्ञानं परामर्शप्रयोजकत्वेनाऽभिहितमित्यभिप्रेत्य दीधितिकृत्पर्यवसितन्यायलक्षणमाह। उचितेति। उचितानुपूर्वीकानि प्रतिज्ञादिपञ्च यत्र समुदाये तत्त्वं, तादृशपञ्चपर्याप्तसमुदायत्वमिति यावत्। पञ्चपदं निगमनान्तां विशिष्य निवेशलाभाय, न तु पञ्चत्वेनाऽपि तेषां निवेशः प्रयोजनाभावात्। व्युत्क्रमप्रयुक्तप्रतिज्ञादिपञ्चकेऽतिव्याप्तिवारणायोचितानुपूर्वीकेति। उचितानुपूर्वी प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वरूपा।

ननु किमिदमुचितानुपूर्वीकत्वं, न तावत्तादृशानुपूर्व्याश्रयत्वं, तादृशानुपूर्व्या निगमने एव विश्रान्तेः। नापि तादृशानुपूर्वीघटकत्वं घटकतायाः दुर्वचत्वात्। तद्धि न स्वाविषयकप्रतीत्यविषयतादृशानुपूर्वीकत्वं, प्रतिज्ञाद्यविषयकप्रतीत्या शुद्धनिगमनत्वस्य विषयीकरणात्, विशिष्टनिगमनत्वे तादृशप्रतीत्यविषयत्वानुपपत्तेः। विशेष्यवृत्तेर्विशिष्टानुयोगिकाऽभावानभ्युपगमात्। नापि तादृशानुपूर्वीविषयिताव्यापकविषयिताकत्वं, शब्दव्यक्तिभेदेन प्रतिज्ञादेर्भिन्नतया कस्याश्चिदपि प्रतिज्ञादिव्यक्तेर्विषयितायास्तादृशानुपूर्वीविषयितासामान्यव्या-

---

स्वयं न्यायलक्षणमाहेति जगदीशोक्तावतरणमसङ्गतम्, मूलार्थताया एव तस्य सम्भवादित्याह **अत्रेति। अनुपपत्तेर्वक्ष्यमाणतयेति।** उदाहरणोपनययोरेव तत्पर्यवस्यतीत्यादिनेति भावः। प्रतिज्ञादिपञ्चवाक्यार्थविषयकसमूहालम्बन-बोधस्याप्यसार्वत्रिकतया आह **तत्तद्विशिष्टार्थेति।** तत्तद्विशिष्टार्थविषयकेत्यर्थः। **ज्ञानपञ्चकपरं** यत्र न्यायजन्यसमूहालम्बनबोधोऽसिद्धस्तत्र पूर्वोक्तप्रकारा-भावात्पञ्चकेत्युक्तम् **लाभ इति** उचितानुपूर्वीकत्वं तु पूरितं दीधितिकारेण। सामान्यतो बोधनिवेशे घटमानयेति वाक्येऽतिव्याप्तिः स्यादत आह **प्रयोजकान्तं चेति** ननु परामर्शप्रयोजकशाब्देत्यत्र शाब्दपदस्य पञ्चबोधपरत्वे प्रतिज्ञादिपञ्चवाक्यैरित्यादिमूलाऽसङ्गतिः, एकबोधाजननेऽपि उक्तरीत्या

पकत्वाऽसम्भवात्। प्रतिज्ञादिव्यक्त्यन्तरघटितन्यायविषयकज्ञानेऽपि तादृशानुपूर्वीविषयितासत्त्वात्। यत्किञ्चिदानुपूर्वीविषयिताव्यापकत्वस्य व्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयितासाधारणत्वात्, तादृशप्रतिज्ञादिविषयकन्यायज्ञानीयतथाविधानुपूर्वीविषयिताया एव तादृशप्रतिज्ञादिविषयिताव्याप्यत्वात्। न च ज्ञानभेदेन विषयिताभेदानभ्युपगमान्नैवमिति वाच्यम्। तादृशप्रतिज्ञादिव्यक्तिसमानाधिकरणत्वादिनाऽऽनुपूर्वीविशेषावच्छिन्नन्यायविषयकज्ञानीयाऽऽनुपूर्वीविशेषविषयितायास्तादृशप्रतिज्ञादिव्यक्तिविषयिताशून्यावृत्तित्वात् तस्यास्तद्व्याप्यत्वानपायात्।

पञ्चबोधानादाय लक्षणसमन्वयसम्भवादित्याशयेन शङ्कते **यद्यपीति।** दीधितिकृन्मते स्वार्थविशिष्टज्ञानमित्यत्रैकत्वानुपपत्तिं परिहरति **सम्भवाभिप्रायेणेति।** यत्र प्रतिज्ञादिपञ्चवाक्यानामेकदैव समूहालम्बनोपस्थितिः तत्स्थलाभिप्रायेणेत्यर्थः। तथाच पञ्चार्थविषयकैकबोधे परामर्शप्रयोजकतोपपादनेऽर्थात्पञ्चानां तदुपपादितं भवतीति रहस्यम्। **प्रतिज्ञोत्तरेति।** प्रतिज्ञाऽव्यवहितोत्तरेत्यर्थः। प्रतिज्ञोत्तरवाक्योत्तरहेतोः हेत्वादिनिगमनान्तोत्तरप्रतिज्ञादेश्च वारणायाऽव्यवहितत्वस्य-उत्तरत्वस्य च निवेशः। **एवमग्रेऽपि। तादृशानुपूर्व्या** इति। प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वरूपानुपूर्व्या इत्यर्थः। **निगमने एवेति।** अत्र निगमनपदं निगमनघटकान्त्यवर्णपरम्। **नापीति** तथाचोचितानुपूर्वीकानि प्रतिज्ञादिपञ्च यत्रेत्यत्र सप्तम्यर्थो घटकतवमिति भावः। **तद्धि।** घटकत्वं हि। **स्वाविषयकेति। स्वं** घटकतवेनाऽभिमताः प्रतिज्ञादयः। तथा च स्वं-प्रतिज्ञा तदविषयकप्रतीतिर्हि घटपटाद्युदासीनविषयकप्रतीतिरेव "नत्वानुपूर्वीविषयकप्रतीतिः, तस्या प्रतिज्ञाद्यविषयकत्वाभावात्" **तदविषयतादृशानुपूर्वीकत्वस्य** प्रतिज्ञायां सत्वेन घटकत्वम् एवं हेत्वादावपि घटकत्वं बोध्यम्। तादृशानुपूर्वीविषयिताव्यापकेत्यनेन तादृशानुपूर्वीविषयितासामान्यव्यापकत्वं विवक्षितं, तादृशयत्किञ्चिद्विषयिताव्यापकत्वं वा। आद्ये दूषणमाह। **शब्दव्यक्तिभेदेनेति।** प्रतिज्ञादेरैक्ये ज्ञानभेदेन विषयिताभेदेऽपि प्रतिज्ञाविषयितात्वेनाऽऽनुपूर्वीविषयिताव्यापकत्वं स्यादतः शब्दव्यक्तिभेदेन भिन्नत्वोत्कीर्त्तनम्। **तादृशानुपूर्वीविषयि तासत्वादिति।** आनुपूर्व्याभेदाभावादिति भावः। **यत्किञ्चिदिति।** तच्च विषयिता-

अथ निगमनपूर्वोपनयपूर्वोदाहरणपूर्वहेतुपूर्वत्वरूपानुपूर्व्याश्रयत्वेन प्रतिज्ञायाः तादृशोदाहरणपूर्वत्वे सति प्रतिज्ञोत्तरत्वरूपानुपर्व्याश्रयत्वेन च हेत्ववयवादीनां निवेशान्नानुपपत्तिः।

अथवा तादृशैकविधानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वमेव तादृशानुपूर्वीघटकत्वमिति चेत् एवमप्येकैकन्यायघटकं यत्प्रतिज्ञाद्येकैकवाक्यं तत्समुदायेऽतिप्रसङ्गो दुर्वार एवेति।

विशेषणम्, यत्किञ्चित्तादृशानुपूर्वीविषयितेत्यर्थः। साधारणत्वादिति। क्रमप्रयुक्तव्युत्क्रमप्रयुक्तप्रतिज्ञादिपञ्चकोभयसमूहालम्बनज्ञाने आनुपूर्वीविषयित्वव्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयित्वव्यक्त्योर्व्याप्यव्यापकभावः। **ज्ञानभेदेन।** विषयिताभेदात्केवलन्यायज्ञाने समूहालम्बज्ञानीयन्यायानुपूर्वीविषयताविरहादिति भावः। **तादृशेति।** व्युत्क्रमप्रयुक्तेत्यर्थः। तथाच तादृशसमूहालम्बनज्ञानीयाऽऽनुपूर्वीविषयिताव्यापकत्वस्य व्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयितायां सत्वात्तस्या अपि घटकत्वापत्तिरिति भावः। **नैवमिति।** न पूर्वोक्तदोष इत्यर्थः। आनुपूर्वीविषयतायाः क्रमप्रयुक्तज्ञानमात्रेऽपि सत्वेन तत्र व्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयिताविरहादिति भावः। **न्यायविषयकज्ञानीयेति** व्युत्क्रमप्रयुक्तप्रतिज्ञादिव्यक्तिसमानाधिकरणो न्याय इति ज्ञानीयेत्यर्थः। **आनुपूर्वीविशेषविषयिताया इति।** ज्ञानभेदेन विषयिताभेदस्यानभ्युपगमेऽपि निरूपकभेदेन[११] तद्भेदस्याऽवश्यकत्वादिति भावः। **तस्याः।** आनुपूर्वीविषयतायाः। **तद्व्याप्यत्वानपायादिति।** व्युत्क्रमप्रयुक्तप्रतिज्ञादिविषयताव्याप्यत्वानपायादित्यर्थः।

ननु तादृशानुपूर्वी यथा विशिष्टनिगमनत्वरूपा तथा विशिष्टप्रतिज्ञात्वरूपापीत्यादिरीत्या पञ्चविधा या आनुपूर्वी तदाश्रयत्वरूपं तादृशानुपूर्वीकत्वं वक्तुं शक्यते इत्याशङ्कते। **अथेति। तादृशोदाहरणपूर्वत्वे सतीति।** निगमनपूर्वोपनयपूर्वोदाहरणपूर्वत्वे सतीत्यर्थः। **हेत्ववयवादीनामिति।** आदिना निगमनपूर्वोपनयपूर्वत्वे सति प्रतिज्ञोत्तरहेतूत्तरत्वरूपानुपूर्व्याश्रयत्वेनोदाहरणस्य निगमनपूर्वत्वे सति प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरत्वरूपानुपूर्व्याश्रयत्वेनोपनयस्य, एवं प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वरूपानुपूर्व्याश्रयत्वेन निगमनस्य सङ्ग्रहः।

वक्ष्यमाणदोषेण निरसनीयकल्पान्तरमाह। अथवेति। **पूर्वं पञ्चानुपूर्व्य**

मैवम्। स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्ति यद्यत्समुदायत्वं तदन्यत्वस्य समुदायत्वविशेषणत्वे तात्पर्यात्। व्युत्क्रमप्रयुक्तप्रतिज्ञादिनिष्ठस्य नानान्यायान्तर्गतप्रतिज्ञादिपञ्चनिष्ठस्य च समुदायत्वस्य तदन्यत्वविरहान्नाति-प्रसङ्गः। एवं च घटमानयेति वाक्यवृत्तिसमुदायत्ववारणाय प्रतिज्ञादिवृत्तित्व-विशेषणमपि सार्थकमित्यवधेयम्।

उक्ताः इदानीं तासु एकैव निवेश्येति दर्शयति। **तादृशैकविधेति।** प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वरूपेत्यर्थः। अत्र स्वाश्रयनिगमन-वृत्तित्वसम्बन्धेनोपनयोत्तरत्वविशिष्टनिगमनत्वरूपानुपूर्व्यवच्छिन्नभेदप्रतियोगिता-वच्छेदककोटौ संसर्गघटकतया निगमनप्रवेशान्निगमनसङ्ग्रहो बोध्यः **अन्यथा** साक्षात्प्रतियोगितावच्छेदकत्वस्य निगमनत्वे परम्परया तस्योपनयादौ सत्वेन निगमनाऽसङ्ग्रहप्रसङ्गात्। एतेनोपनयोत्तरत्वं निगमनत्वे न सम्भवतीत्यपि समाहितमिति ध्येयम्। तथाच प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तर-निगमनत्वरूपानुपूर्वीमान्नेति "तादृशानुपूर्व्यवच्छिन्नप्रतियोगिताक" भेदप्रतियोगितानिरूपितसाक्षात्परम्परासाधारणावच्छेदकत्वमेव उचितानुपूर्वीकत्वं फलितम्।

ननु तादृशानुपूर्व्यवच्छिन्नप्रतियोगितावच्छेदकत्वनिवेशेनैवोपपत्तौ भेदनिवेशनं किमर्थमिति चेन्न। धर्मसम्बन्धसाधारणैकावच्छेदकताभ्युगमे स्वसमानकालीनव्युत्क्रमप्रयुक्तप्रतिज्ञासम्बन्धेन तादृशानुपूर्वीमान्नास्तीत्याकार-कात्यन्ताभावीयप्रतियोगितावच्छेदकताया व्युत्क्रमप्रयुक्तप्रतिज्ञात्मकसम्बन्धेऽपि सत्वाद् व्युत्क्रमप्रयुक्तप्रतिज्ञादेरपि उचितानुपूर्वीकत्वापत्तेः।

केचित्तु प्रतियोगितायाः प्रतियोगितावच्छेदकस्वरूपत्वे व्युत्क्रमप्रयुक्त-प्रतिज्ञाकालीननिगमनत्वावच्छिन्नप्रतियोगित्वतादृशरूपावच्छिन्नप्रतियोगित्वयोरैक्यतया तदवच्छेदकत्वस्य व्युत्क्रमप्रयुक्तप्रतिज्ञायामपि सत्त्वादिति व्युत्क्रमप्रयुक्त-प्रतिज्ञाघटितसमुदायेऽतिव्याप्तिरतो भेदप्रतियोगितावच्छेदकत्वपर्यन्तानुधावनम्। एवं च भेदनिरूपिततद्व्यक्तिनिरूपितत्व-प्रतियोगितात्वोभयधर्मावच्छिन्न-निरूपकतानिरूपितविलक्षणनिरूप्यतावच्छेदकत्वलाभान्न तादृशसमुदायेऽति-व्याप्तिरिति प्राहुः।

ननु तादृशानुपूर्वीभेदप्रतियोगितावच्छेदकत्वनिवेशेनैवोपपत्तौ तादृशानुपूर्व्य-

प्रतिज्ञादिवृत्तित्वं च प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मपञ्चक-व्यापकत्वम्। अतः प्रतिज्ञादिपञ्चकैकदेशसमुदाये नातिप्रसङ्गः। प्रतिज्ञात्वा-

---

वच्छिन्नभेदप्रतियोगितावच्छेदकत्वनिवेशः किमर्थं इति चेन्न। साक्षात्प्रतियोगितावच्छेदकताया व्यासज्यवृत्तित्वानुपगमे तादृशानुपूर्वीभेदप्रतियोगितावच्छेदकत्वाप्रसिद्धेः, तादृशोपनयोत्तरत्वविशिष्टनिगमनत्वं नेति भेदप्रतियोगितावच्छेदकताया उपनयोत्तरत्ववैशिष्ट्यनिगमनत्वत्वद्वयोरेव सत्वात्। अतः तादृशोपनयोत्तरत्ववैशिष्ट्यं निगमनत्वे सामानाधिकरण्यसम्बन्धेन न दातुं शक्यते अपि तु समानाधिकरणवृत्तित्वसम्बन्धेन निगमनत्वत्वे एवेति गौरवमतस्तादृशानुपूर्व्यवच्छिन्नभेदो निवेशितः।

स्वं समुदायत्वम् तथा च स्वतादात्म्य-स्वाश्रयीभूतप्रतिज्ञाऽव्यवहितोत्तरत्वशून्योहेतुवृत्तित्वस्वाश्रयीभूतहेत्वव्यवहितोत्तरत्वशून्योदाहरणवृत्तित्व-स्वाश्रयीभूतहेत्वव्यवहितोत्तरत्वशून्योपनयवृत्तित्वस्वाश्रयीभूतोपनयाव्यवहितोतरत्व-शून्यनिगमनवृत्तित्वान्यतम एतदुभयसम्बन्धेन समुदायत्वविशिष्टान्यत्वं निरुक्तसमुदायत्वे विशेषणीयमिति भावः। न च स्वाश्रयीभूतप्रतिज्ञादिपदं व्यर्थम्। तथासति स्वाश्रयोभूतयत्किञ्चिदव्यवहितोतरत्वशून्यत्वादेर्विवक्षणीयतयाऽसम्भवापत्तेः, स्वाश्रयीभूतयत्किञ्चित्पदेन निगमनमादाय तदव्यवहितोत्तरशून्यत्वस्य प्रतिज्ञादौ सत्वात्। **तात्पर्यादिति** उचितानुपूर्वीकेत्यस्येत्यादिः। **एवञ्चेति।** उचितानुपूर्वीकेत्यस्य स्वाश्रयीभूतेत्यादिविशेषणतात्मकत्वे चेत्यर्थः। **वारणायेति** घटमानयेति वाक्यवृत्तिसमुदायत्वस्यापि तदन्यत्वादिति भावः। **प्रतिज्ञादिवृत्तित्वविशेषणमपीति** प्रतिज्ञादिपञ्चकसमुदायत्वमित्यस्य प्रतिज्ञादिपञ्चवृत्तिसमुदायत्वमर्थः। **अपि भिन्नक्रमे** घटमानयेति वाक्यवृत्तिसमुदायत्ववारणायापीत्यर्थः। तथा च तादृशानुपूर्व्यवच्छिन्नप्रतियोगितावच्छेदकत्वमिति पूर्वकल्पेऽपि न्यायघटककतिपयवर्णवृत्तिसमुदायत्ववारणायापि प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकधर्मपञ्चकव्यापकत्वस्वरूपस्य विशेष्यदलस्य सार्थक्यमिति सूचितम्। **एतेन** "नन्वत्र सन्दर्भविरोधः, तथाहि-एवं चेत्यादिग्रन्थेन पूर्वकल्पे विशेष्यदलसार्थक्यमिति भावार्थो ज्ञायते, तन्न सङ्गच्छते तादृशानुपूर्व्यवच्छिन्नभेदप्रतियोगितावच्छेदकत्वरूपोचितानुपूर्वीकत्वनिवेशेऽपि न्यायघटक-

प्रतिज्ञात्वादिकं पुनरुदासीनवाक्यवारकन्यायान्तर्गततत्व-शून्यमेवाऽत्रोपादेयमिति नान्योन्याश्रयः। साध्यादिभेदनियंत्रिताश्च प्रतिज्ञादयो वाच्या इति विभिन्नसाध्यादिपक्षकप्रतिज्ञादिसमुदाये नातिव्याप्तिः। व्याप्त्यादेरिव साध्यादेरप्यननुगमादननुगगो न्यायादेरपीष्यत एव।

देर्व्यासज्यवृत्तितया तदाश्रयैकदेशमात्रवृत्तेस्तत्पर्याप्त्यनवच्छेदकत्वात्। समुदायत्वं चाऽनेकपर्याप्तो धर्मः तस्य च पर्याप्तिसम्बन्धेन न्यायपदप्रवृत्तिनिमित्त-त्वान्नैकदेशे न्यायव्यवहार इति तु विभावनीयम्।

कतिपयवर्णवृत्तिसमुदायत्ववारणाय प्रतिज्ञात्वपर्याप्त्यवच्छेदकधर्म-पञ्चकव्यापकत्वरूपस्य विशेष्यदलस्य सार्थक्यसम्भवात्, असम्भवभयेन तादृशानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकवर्णत्वव्यापकतानिवेशायोगात्, समानानुपूर्वीकयावन्न्यायघटकवर्णानामेव तादृशानुपूर्व्यवच्छिन्नभेद-प्रतियोगितावच्छेदकत्वादिति निरस्तम्। **वस्तुतस्तु** तादृशानुपूर्वीविशेषा-वच्छिन्नभेदप्रतियोगितावच्छेदकत्वस्याऽवच्छेदकतावच्छेदकसाधारण-स्याऽप्रामाणिकत्वे तादृशानुपूर्व्यवच्छिन्नभेदप्रतियोगितावच्छेदकत्वमपहाय तादृशानुपूर्वीविशेषप्रकारकनिश्चयत्वसमनियतकारणतावच्छेदक-यत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वस्य निवेशनीयतया एकदेशवृत्तिसमुदायत्ववारणसम्भवे प्रतिज्ञादिपञ्चवृत्तित्वरूपदलवैयर्थ्यमेवेति न एवं चेत्यादिग्रन्थस्य सन्दर्भविरोध इति ध्येयम्।

अवधेयमिति। ननु धूमादालोकवान् पर्वतो वह्निमानित्यादौ हेत्ववयवातिरिक्तचतुरवयवमात्रवृत्तिसमुदायत्वमादायाऽतिव्याप्तिरिति चेन्न। प्रकृतपक्षतावच्छेदकावच्छिन्नविशेषणतापन्नप्रकृतसाध्यतावच्छेदकावच्छिन्ना-न्वितस्वार्थबोधकत्वे सति प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्व-विषयिताबहिर्भूतविषयिताशून्यबोधजनकत्वरूपहेतुत्वव्यापकत्वसमुदायत्वनिवेशान्नाति-प्रसङ्गः। एतच्च स्वयमग्रे वक्ष्यमाणत्वात्।

प्रतिज्ञादिवृत्तित्वं चेति प्रतिज्ञादिपञ्चकसमुदायत्वमित्यनेन विवक्षितं तच्चेति शेषः। तथा च प्रतिज्ञात्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदको यो

ननु प्रतिज्ञादिलक्षणे न्यायान्तर्गतत्वविशेषणस्य प्रवेशनीयतयाऽन्योन्याश्रयप्रसङ्ग इत्यत आह। प्रतिज्ञात्वादिकमिति। उदासीनवाक्यवारकेति। न्यायानन्तर्गतवाक्यवारणमात्रप्रयोजनकेत्यर्थः। एतेन न्यायान्तर्गतप्रतिज्ञादिपञ्चकसमुदायस्य उचितानुपूर्वीकत्वविरहादेव न्यायत्वाप्रसक्तेर्न्यायघटकप्रतिज्ञादिशरीरे तादृशविशेषणानुपादानेऽपि न क्षतिरिति सूचितम्।

धर्मः एवं हेतुत्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदको यो धर्मः– एवमुदाहरणत्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदको यो धर्मः– एवमुपनयत्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदको यो धर्मः– निगमनत्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदको यो धर्मस्तादृशधर्मपञ्चकसमुदायत्वमित्यर्थः। तादृशधर्मश्च प्रतिज्ञाघटकसकलवर्णगतसमुदायत्वरूपः। एवं हेत्वादावपि। एवं च तादृशसमुदायत्वव्यापकत्वं न्यायगतसमुदायत्वे एवेति सर्वत्र लक्षणसमन्वयः।

नन्वत्र प्रतिज्ञात्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदधर्मव्यापकत्वमेवोच्यतां किं **यत्किञ्चित्पदे**नेति चेन्न। तथासति असम्भवापत्तेः। तथाहि प्रतिज्ञात्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदधर्मव्यापकत्वस्य समानानुपूर्वीकाऽन्यन्यायघटकसमुदायत्वेऽपि सत्त्वेन तद्व्यापकत्वस्यैतत्प्रतिज्ञाघटितन्यायगतसमुदायत्वे विरहात्, एतत्प्रतिज्ञात्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकसमुदायत्वव्यापकत्वस्य तादृशप्रतिज्ञाघटितसमुदायत्वे विरहात्। तदुपादाने तु यत्किञ्चित्प्रतिज्ञागतसमुदायत्वव्यापकत्वस्य यत्किञ्चिन्न्यायगतसमुदायत्वे सत्वाल्लक्षणसमन्वयः।

अथात्र प्रतिज्ञात्वादिधर्मपञ्चकव्यापकत्वनिवेशेनैव सामञ्जस्ये किं पर्याप्त्यवच्छेदकत्वनिवेशेनेति चेन्न। स्वनिष्ठानुमित्यन्यूनानतिरिक्तविषयकशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदक यत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्ववत्त्वसम्बन्धेन शाब्दबोधविशिष्टत्वरूपप्रतिज्ञात्वस्य सकलप्रतिज्ञासाधारणतया कस्यचिदपि न्यायस्य तादृशप्रतिज्ञाव्यापकत्वाभावेनाऽसम्भवभिया तादृशनिवेशाऽयोगात्। न च सर्वसाधारणप्रतिज्ञात्वस्यैक्येन यत्किञ्चित्प्रतिज्ञादिवृत्तिसमुदायत्वस्य तादृशप्रतिज्ञात्वपर्याप्त्यवच्छेदकतया तद्दोषतादवस्थ्यमिति वाच्यम्। यत्किञ्चित्प्रतिज्ञादावपि

एतेन प्रतिज्ञानिगमनयोरुदाहरणावयवान्तरयोश्च न संभूयैकार्थ-प्रतिपादकत्वम्, द्रागेव तु पञ्चानामवयवानाम्,

---

"अत्र केचित्। असाधकतास्थलीयन्यायेऽव्याप्तिः, तत्राव्याप्तेरुभयवादि-सिद्धत्वेनोदाहरणाभावेन पञ्चावयवाभावादिति। तन्न। साध्यसाधनभेदेन न्यायभेदाच्चतुरवयवस्यैव ग्राह्यत्वादिति। यदि च सर्वत्रैव समयबन्धस्थले पञ्चावयवप्रयोग इति मन्यते तदाभिमतनिर्वाहाय समयबन्धं विना सर्वत्रैव पञ्चावयवप्रयोग इति स्वीकरणीयमिति।" क्रमप्रयुक्तविभिन्नपक्षसाध्यहेतुक-प्रतिज्ञादिपञ्चकेऽतिव्याप्तिशङ्कां निरस्यति। साध्यादीति। तत्साध्यपक्षहेतुकन्याय-लक्षणे तत्साध्यपक्षकप्रतिज्ञा-तत्साधनकहेतु-तत्साध्यसाधनकोदाहरण-तत्साध्यपक्षसाधनकोपनयतत्साध्यसाधनकनिगमनानि निवेशनीयानीत्यर्थः। नन्वेवं न्यायपदार्थस्याननुगततया न्यायपदस्य नानार्थताकापत्तिरित्यत्रेष्टापत्तिमाह। व्याप्त्यादेरिवेति व्याप्त्यादिपदार्थस्येवेत्यर्थः। साध्यादेरननुगमात्। स्वघटक-साध्यादीनां भिन्नरूपेण निवेशनीयत्वात्। अननुगमः। अनुगतप्रवृत्तिनिमित्तविरहः। न्यायादेः। न्यायादिपदार्थस्य। आदिपदादवयवपरिग्रहः। इष्यते एवेति। गत्यन्तराभावादिति भावः।

यथाश्रुतमूलस्वरससिद्धवाक्यपञ्चकजन्यमहावाक्यार्थबोधमादाय लक्षणमन्वयं निराचिकीर्षुर्वाक्यपञ्चकस्यैकविशिष्टार्थबोधकतां खण्डयति। प्रतिज्ञानिगमनयोरिति। न सम्भूयैकार्थप्रतिपादकत्वमित्यग्रेतनेनाऽन्वयः। प्रतिज्ञार्थे वह्निमति पर्वते निगमनार्थस्य विशिष्टहेतुज्ञानज्ञाप्यसाध्यवत्त्वस्यान्वयोपगमे साध्यवत्त्वांशमादाय पौनरुक्त्यप्रसङ्गात्। दण्डवान् रक्तदण्डवानित्यादाविव विधेयांशेऽधिकावगाहिनस्तादृशान्वयबोधस्य सम्भवेऽपि शुद्धपक्षतावच्छेदक-विशिष्टेऽबाधितत्वादिविशिष्टसाध्यवत्तावगाहिन्याः प्रतीतेरेवोपयोगित्वेन साध्यविशिष्टपक्षे तादृशसाध्यवत्त्वान्वयबोधस्याऽनाकांक्षिततया वादितात्पर्या-विषयत्वाच्च।

प्रतिज्ञात्वादिव्यवहारबलात्तत्समुदायत्वस्यापि प्रतिज्ञात्वपर्याप्त्यवच्छेदकत्वादिति ध्येयम्।

यत्तु वह्निविशिष्टपर्वतोद्देश्यकबोधे वह्निमत्पदोत्तरपर्वतपदोपस्थितिरपेक्षिता। नीले घटः सुन्दर इत्यादाविव घटो नीलः सुन्दर इत्यादौ नीलान्वितघटाद्यंशे विधेयाऽभानात् उद्देश्यतावच्छेदकवाचकपदस्योद्देश्यवाचकपदपूर्ववर्त्तिताया अपेक्षणीयत्वादतो न तादृशान्वयबोधसम्भव इति। न च शुद्धपर्वतत्वावच्छिन्ने एव शुद्धवह्निमत्त्व-निगमनोपस्थाप्यविशिष्टवह्निमत्त्वयोर्युगपद्विधेयतयाऽन्वयोपगमेन एकवाक्यत्वं निर्वहति वाच्यम्। गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यादिति न्यायेन भासमानयोः शुद्धवह्निमत्त्वविशिष्टवह्निमत्त्वयोरवच्छेद्यावच्छेदकभावापन्नविषयिताकत्वरूपसम्बन्धाभावेन एकवाक्यत्वानिर्वाहात्। अत एव विधेयभेदे सर्वत्र वाक्यभेदः। केवलोपनयजन्यबोधे पक्षे साध्यव्याप्यहेतुमत्त्वस्य विधेयत्वेऽपि उपनयनिगमनाधीनबोधे उद्देश्यपदपूर्वनिर्दिष्टस्य व्याप्यवत्पदार्थस्योद्देश्यतावच्छेदकतयैव भानेन तद्विषयकत्व-

---

न चैवमपि प्रतिज्ञादिपर्याप्त्यनुयोगितावच्छेदकधर्मसामान्यव्यापकत्वस्य न्यायत्वेऽप्यसत्त्वात्तादृशधर्मसामान्यव्यापकतानिवेशाऽयोगः, प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकीभूतयत्किञ्चिद्धर्मव्यापकतानिवेशे च तादृशधर्मस्य विषयतात्मकतया विषयतायाश्च वर्णभेदेन भिन्नतया प्रतिज्ञादिघटकीभूतवर्णवृत्तिपञ्चविषयतामादाय वर्णपञ्चकेऽतिव्याप्तितादवस्थ्यमेवेति वाच्यम्। प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकताविशिष्टसमुदायत्वस्य विवक्षितत्वात्। वैशिष्टयञ्च व्यापकतासम्बन्धेन। व्यापकता च पर्याप्तिसम्बन्धावच्छिन्ना। वस्तुतो धीविशेषविषयतात्मकस्य प्रतिज्ञात्वादेर्वाक्यभेदेन नानात्वात् यत्किञ्चित्प्रतिज्ञात्वादिव्यापकत्वमेव निवेशनीयम्। यत्किञ्चित्प्रतिज्ञात्वव्यापकतालाभायैव पर्याप्त्यवच्छेदकत्वोपादानमपीति न काप्यनुपपत्तिरिति ध्येयम्।

न च तथापि प्रतिज्ञेतराऽवृत्तित्वे सति प्रतिज्ञावृत्तित्वं यथाश्रुतमेवास्तु। एवं हेतुवृत्तित्वादिकमपीति चेन्न। प्रतिज्ञाघटककतिपयवर्णवृत्तिसमुदायत्वस्यापि प्रतिज्ञावृत्तित्वात् एवं हेत्वादिघटककतिपयवर्णवृत्तिसमुदायत्वस्यापि हेत्वादिवृत्तित्वात्, तदितरावृत्तित्वाच्च तादृशसमुदायत्वविशिष्टेऽतिव्याप्तेः।

तत्पर्याप्त्यनवच्छेदकत्वादिति। न्यूनपर्याप्तस्याऽधिकपर्याप्त्यनवच्छेदकत्वादिति भावः। **तस्य चे ति।** समुदायत्वस्य चेत्यर्थः। **न्यायपदप्रवृत्तिनिमित्तत्वादिति** न्यायपदशक्यत्वावच्छेदकत्वादित्यर्थः। **एकदेशे।** प्रतिज्ञादौ। **न्यायान्तर्गतत्वशून्यमेवेति।** प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्या-

निगमनार्थविषयकत्वयोरवच्छेद्यावच्छेकभावात्तदुभयैकवाक्यतेति उपनयोपेक्षेति। तन्न। तात्पर्यसत्वे योजनयापि तादृशबोधसम्भवात्। उद्देश्यवाचकपदस्य विधेयवाचकपदपूर्वत्वेन प्रतिसन्धानस्याऽपेक्षणीयतया योजनयैवोपनयेन पक्षेऽयं पदार्थे साध्यव्याप्यवत्त्वबोधनात्, तात्पर्यसत्वे वादिवाक्ये योजनायाः दूषणानर्हत्वात्। तात्पर्यविरहस्यैव तत्र बीजत्वात्। इदमुपलक्षणम्। उपनयेनापि समं प्रतिज्ञायाः न विशिष्टैकार्थप्रतिपादकत्वं, वह्निमति पर्वते उपनयार्थस्य साध्यव्याप्यहेतुमत्पक्षस्याऽप्राप्ततादृशहेतुमत्त्वांशघटिततया विधेयत्वसम्भवेऽपि अनुमित्युपयोगिनः पक्षतावच्छेदकविशिष्टे हेतुमत्त्वस्याऽकाङ्क्षयैवोपनयप्रतिपादनाकाङ्क्षितस्य पर्वते पर्वताऽभेदबोधस्य तात्पर्याऽविषयत्वात्। उदाहरणावयवान्तरयोरिति। उदाहरणघटकयोर्यत्तत्पदघटितभागयोरपि नैकविशिष्टार्थबोधकत्वं तत्र द्विरुक्तयत्पदेन महानसत्व-महानसान्यत्वादिनोद्देश्योपस्थापनात्। तत्पदेनापि तद्रूपावच्छिन्नपरामर्शाद् महानसं धूमवद्वह्निमच्च महानसान्यद् धूमवद् वह्निमच्चेति वाक्यार्थचतुष्टयविषयकसमूहालम्बनबोधस्यैवोदयात्।

न च वीप्सया व्यापकत्वबोधनाद् धूमवान् धूमव्यापकवह्निमानित्याकारक एकविशिष्टार्थबोध एव तत्रोत्पद्यते इति वाच्यम्। यो य इत्यादेरनन्वितार्थकत्वप्रसङ्गात्। न च द्विरुक्तयत्पदस्यैव व्यापकत्वमर्थः स च साध्यांशेऽन्वेतीति वाच्यम्। नामार्थयोर्भेदान्वयबोधस्याऽव्युत्पन्नत्वात्। व्यापकत्वावच्छिन्नस्य

वगाह्यनुमित्यन्यूनानतिरिक्तविषयकशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वमात्रमित्यर्थः।[१२]

न्यायान्तर्गतेति। उचितानुपूर्वीरहितेत्यर्थः। **क्रमप्रयुक्तविभिन्नपक्षसाध्यहेतुकप्रतिज्ञादिपञ्चके इति**। पर्वतो वह्निमान्, पृथिवीत्वात्, यो यो रसवान् स रूपवान् यथा घटः, सत्ताव्याप्यद्रव्यत्ववानयं, तस्माद् गुणवानित्यादावित्यर्थः। **तत्साध्येति**। शुद्धन्यायत्वं नास्त्येवेति भावः। **नानार्थकतापत्तिरिति**। नानाधर्मप्रकारकबोधजनकत्वापत्तिरित्यर्थः।

यथाश्रुतमूलेति। एकवचनान्तस्वार्थविशिष्टज्ञानमिति मूले इत्यर्थः। अवयवलक्षणानुरोधेन समूहालम्बनात्मकतल्लाभसूचनाय **स्वरसेति**। तात्पर्येत्यर्थः। उद्देश्यतावच्छेदकविधेययोरैक्येन शाब्दबोध इत्याह। **पौनरुक्त्यप्रसङ्गादिति**। प्रतीतेरेवेति। एवकारेण विशिष्टपक्षव्यावृत्तिः। **शुद्धपक्षे**

तदर्थस्याऽभेदेनाऽन्वय इत्यपि न सम्भवति। सुन्दरो दण्डीत्यादौ दण्डाद्यंशे सुन्दराद्यभेदानन्वयवत्समानविभक्तिकत्वाभावेन मत्वर्थीयप्रकृत्युपस्थाप्येऽर्थे असमस्तनामार्थाऽभेदान्वयस्याऽसम्भवात्। अभेदान्वयप्रतियोगिसापेक्षतयाऽसामर्थ्येन साध्यवाचकपदोत्तरं तद्धिताऽसम्भवाच्च। तत्पदस्य तावतापि सार्थक्याऽसम्भवाच्च। तस्माद्यत्पदार्थे हेतोस्तत्पदार्थे च तस्मिन् साध्यस्य विधेयतया भानमेव समूहालम्बनरूपं तत्र जायते तदुत्तरं व्यापकताबोधो मानसः। स एव वा शाब्दबोधः, साध्यवाचकपदस्य प्रकृतसाधनव्यापकता-विशिष्टसाध्ये लाक्षणिकतया तत्पदार्थे व्यापकताविशिष्टसाध्यवत्तामवगाहते इत्युपेयम्। वीप्सासमभिव्याहारस्थले व्यापकतातात्पर्यस्याऽनादितया तादृशलक्षणाया निरूढलक्षणात्वेन वादिवाक्ये तत्स्वीकारे क्षतिविरहात्।

न च व्यापकताबोधस्याऽऽवश्यकत्वे नानाहेत्वधिकरणे वह्न्यादि-मत्वबोधस्याऽप्रयोजनकतया धूमादिकमुद्देश्यतावच्छेदकीकृत्य समूहालम्ब-नानात्मक एव व्यापकताविशिष्टसाध्यबोध उपेयतां, यत्तत्पदं तु तादृशलक्ष्यार्थतात्पर्यग्राहकमेवास्त्विति वाच्यम्। अर्थबोधकत्वसम्भवे

उपयोगित्वेनेति। अन्यथा बा धानुवृत्या मध्यस्थस्याऽनुमित्यनापत्तेरिति भावः। **साध्यविशिष्टपक्षे**। वह्निमदभिन्नपर्वते। **तादृशेति**। विशिष्टहेतुज्ञानज्ञाप्येत्यर्थः।

सम्भूयैकार्थप्रतिपादकत्वे आकाङ्क्षाविरहोबीजं वदतां मतमुत्थापयति **यत्त्विति तादृशान्वयबोधसम्भव इति**। वह्निमत्पर्वते निगमनार्थविधेयक-बोधसम्भव इत्यर्थः **युगपद्विधेयतयेति** एकत्र द्वयमिति रीत्येति भावः। **एकवाक्यत्वं** विशिष्टैकार्थप्रतिपादकत्वम्। **गुणानां च परार्थत्वात् असम्बन्धसमत्वात्स्यादिति** जैमिनिसूत्रम्। तदर्थश्च **गुणानां**-विधेयानां **परार्थत्वात्** उद्देश्यमात्रसाकाङ्क्षत्वात् उद्देश्यमात्रनिष्ठविषयतानिरूपित-विषयताश्रयत्वादिति यावत्। **असम्बन्धः**-अवच्छेद्यावच्छेदकभावापन्न-विषयिताकत्वरूपसम्बन्धाभावः। **समत्वात्** तुल्यत्वेन भानादिति। तथा च परस्परधर्मितावच्छेदकप्रकारभावापन्नयोरेव विषयतयोरवच्छेद्यावच्छेदकभावो न तदन्नापन्नयोरिति भावः। **अत एव**। एकवाक्यत्वविरहेणैव।

नन्वेवं कथञ्चिदित्यादिपङ्क्त्यसङ्गतिः, निगमने साध्यस्य उपनये साध्यव्याप्यहेतुमत्त्वस्य च विधेयत्वादित्यत आह। **केवलोपनयेति**।

परन्तु प्रतिज्ञाहेत्वोः कथञ्चिदुपनयनिगमनयोः।

तत्परित्यागाऽसम्भवात्। यो यो न वह्निमान् स न धूमवानित्यादौ व्यतिरेक्युदाहरणे, वह्निमद्भेदादिहेतुके धूमवद्भेदादिसाध्यके तादृशान्वय्युदाहरणे वा यत्तत्पदार्थाऽविवक्षायां प्रतियोगिवाचकपदसमानविभक्तिकपदोपस्थाप्य- स्याऽनुपयोगिनोऽप्रवेशेन तत्र नञाऽन्योन्याभावबोधनाऽसम्भवाच्च। एवं चैत्रो जानाति कर्तृत्वादित्यादौ न्यायान्तर्गते यो यः करोति स जानातीत्युदाहरणे यत्तत्पदार्थाऽविवक्षायां धर्मिणोऽलाभेन साध्याश्रयविकलतयोदाहरणाऽऽ- भासताप्रसङ्गाच्चेति। एवं चोदाहरणसमुदायस्याऽवयवान्तरेण समं विशिष्टार्थप्रतिपादकत्वं सुतरामेव न सम्भवति इति भावः। एतेन हेतूदाहरणयोर्धूमवान् धूमाद्धूमव्यापकवह्निमानित्येतादृशविशिष्टार्थबोध- जनकत्वसम्भवादुदाहरणावयवान्तरयोरित्यनुपपन्नमित्यपि निरस्तम्। प्रागेव। सुतरामेव। न सम्भूयैकार्थप्रतिपादकत्वमित्यनुषज्यते। प्रतिज्ञाहेत्वोरित्यत्रापि नकारं विहाय। ताभ्यां पर्वतो धूमज्ञानज्ञाप्यवह्निमानित्येतादृशविशिष्टज्ञानजननादिति भावः!

अथ प्रतिज्ञाजन्यबोधानन्तरं कुत इति साध्यज्ञापकाकाङ्क्षायां तन्निवर्तकं हेतुवाक्यं प्रयुज्यते, तन्निवर्त्तकता च पक्षविशेषणतानापन्नसाध्यांशे हेतुज्ञानज्ञाप्यत्वबोधनेनापि निर्वहतीति पक्षांशे हेतुज्ञानज्ञाप्यत्वविशिष्ट- साध्यवैशिष्ट्यावगाहिबोधस्याऽनुपयोगितया न तात्पर्यविषयत्वमिति चेन्न। पर्वते वह्निबोधानन्तरं पर्वते यद्वह्निज्ञापकं तत्रैवाऽऽकांक्षा जायते, तन्निवृत्तिश्च साध्ये धूमादिज्ञानजन्यपर्वतविशेष्यकज्ञानविषयत्वप्रतिपादनेनैव, धूमाद्वह्नि- मन्महानसमित्यादिवाक्यस्य पर्वते त्रह्निमत्त्वं कुत इत्याकांक्षानिवर्त्तकत्वाभावात्।

योजनयापि। उद्देश्यतावच्छेदकवाचकपदस्योद्देश्यवाचकपदपूर्वत्वानु- सन्धानेनाऽपि। **तत्र।** प्रतिज्ञानिगमनाधीनबोधे। **बीजत्वात्।** योजनाविरह- प्रयोजनकत्वात्। तथा च शाब्दबोधविरहे तात्पर्यविरह एव बीजं किं योजनाविरहकल्पनेनेति भावः। **अप्राप्तेति।** प्रतिज्ञावाक्यजन्यज्ञानाऽविषयेत्यर्थः। **तादृशहेतुमत्त्वांशस्येति।** साध्यव्याप्यहेतुमत्त्वांशस्येत्यर्थः। **विधेयत्वसम्भवेऽपीति।** विधेयकोटावाधिक्यात्, द्वयोरविधेयत्वादपरार्थत्वाच्चेति भावः।

पञ्चमीतस्तादृशपर्वतविशेष्यकज्ञानविषयत्वभानं च तद्विशेषणतापन्नसाध्यांशे एव, उक्तवाक्यान्महानसादिविशेषणतयोपस्थिते तदप्रतीतेः, एकधर्मिविशेषणतापन्नेऽन्यविशेष्यकहेतुविशेषज्ञानाधीनज्ञानविषयत्वबोधकतायाः पञ्चम्या अव्युत्पन्नत्वादिति धूमाद्वह्निमान्पर्वत इति विशिष्टवैशिष्ट्यबोधस्याऽऽवश्यकत्वात्।

कथञ्चिदिति। निगमनेऽयं पदाननुषंगपक्षे वह्निव्याप्यधूमवत्पर्वतादिरूपोपनयार्थे निगमनार्थधूमज्ञानज्ञाप्यवह्निमत्त्वाद्यन्वयबोधसम्भवादिति भावः। अनुषंगपक्षे तु तादृशवह्न्यादिमत्पक्षरूपनिगमनार्थमात्रबोधेनैवाऽऽकाङ्क्षानिवृत्तेरुपनयार्थे विशिष्टपक्षे निगमनार्थीभूतविशिष्टपक्षबोधस्यानुपयुक्तस्य न तात्पर्यविषयतेति कथञ्चिदित्युक्तम्। इदं त्ववधेयम्। अननुषंगपक्षेऽपि उपनयार्थैकदेशेऽयं पदार्थे पक्षमात्रे निगमनार्थान्वयमात्रेणैव कृतकृत्यतया तत्समुदायार्थे विशिष्टपक्षे निगमनार्थविधेयकबोधेऽपि तात्पर्यमप्रामाणिकमिति।

तदर्थस्य। द्विरुक्तयत्पदार्थस्य। **सुन्दरो दण्डीति।** अभेदान्वयबोधे क्वचिद्विशेषणवाचकपदाव्यवहितोत्तरत्वविशिष्टविशेष्यवाचकपदज्ञानं कारणम्, यथा नीलघट इत्यादौ। क्वचिच्च विशेष्यविशेषणवाचकपदयोः समानविभक्तिकत्वज्ञानं कारणम् यथा नीलो घट इत्यादौ। सुन्दरो दण्डी इत्यादौ द्विविधस्याप्यभावाच्छाब्दबोधो वारणीयः। प्रकृतेऽपि भवन्मते सैव दुरवस्थेति भावः। **मत्वर्थीय प्रकृत्युपस्थाप्येऽर्थे** इति। मत्वर्थीयप्रकृतिः दण्ड-वह्न्यादिपदम्। सुन्दरदण्डीत्यादौ अभेदबोधनादाह। **असमस्तेति** समासाघटकेत्यर्थः। **प्रतियोगीति।** प्रतियोगिवाचकपदेत्यर्थः। **सापेक्षतयेति।** तृतीयार्थोऽभेदः। सापेक्षत्वं च तद्धितानिविष्ट पदार्थाऽन्वितस्वार्थबोधकत्वम्। सापेक्षे न कृत्तद्धितसमासा इत्यनुशासनम्।[१३] सर्वमिदं वीप्साविरहस्थले एव इत्युक्तौ त्वाह। **तत्पदस्येति। इत्युपेयमिति।** तथा च महानसं धूमवत् धूमव्यापकवह्निमत्, महानसान्यद् धूमवद् धूमव्यापकवह्निमच्चेति समूहालम्वनबोध इति भावः।

उपेयतां। 'स्वीक्रियतां। धूमवान् धूमव्यापकवह्निमानित्याकारक एकबोधः स्वीक्रियतामिति भावः। **धूमवद्भेदादिसाध्यके** इति। ह्रदो धूमवद्भिन्नो वह्निमद्भेदादित्यादौ। **तादृशान्वय्युदाहरणे वेति।** यो यो न वह्निमान् स न

एकवाक्यताव्यवहारस्तु विशिष्टैकार्थप्रतिपत्तिपरतामात्रेण। तादृशपरामर्शप्रयोजकत्वं च यदि तद्विषयतत्तत्पदार्थोपस्थापकतया तदा उदाहरणोपनययोरेव तत्पर्यवस्यति।

अथ तदानुकूल्यमात्रेण। तदा को वह्निमान्, कुतो धूमत्त्वादित्यादेरपि तथात्वमित्यादिकं समाहितम्।

नन्वेवं प्रतिज्ञादीनां पञ्चानां कथमेकवाक्यताव्यवहार इत्यत आह। एकेति विशिष्टेति। विशिष्टैकार्थप्रतीतीच्छाप्रयोज्यत्वमात्रेणेत्यर्थः। मात्रपदेन तादृशप्रतीतिजनकत्वव्यवच्छेदः। तादृशी च प्रतिपत्तिर्निगमनरूपचरम-वाक्यार्थबुद्धिः, तदुदीच्यो वा मानसः परामर्शः। तत्परता च तामजनयतोऽ-प्युत्तरोत्तरवाक्यप्रयोजिकामाकांक्षामुत्थापयतः प्रतिज्ञादेरिह धूम इति वचसामानुमानिकवह्न्यादिधीपरतावन्निर्वहत्येव, तत्प्रयोजकतयैष। ननु

धूमवानित्यन्वय्युदाहरणे इत्यर्थः। **तत्र**। उदाहरणे। **अन्योन्याभावबोधना-ऽसम्भवाच्चेति**। अनुयोग्यविषयकनञर्थबोधस्याऽप्रसिद्धत्वादिति भावः। **विकलतयेति**। अबोधकत्वेनेत्यर्थः। **उदाहरणाभासताप्रसङ्गाच्चेति**। उदाहरणत्वं न स्यादिति भावः। जानातीत्यादौ त्वन्यत्राश्रयविकलबोधेऽपि उदाहरणे तदसम्भव इति पूर्वत्माद्भेद इति बोध्यम्। अत एव ज्ञानवानिति नोक्तम्; तत्र मत्वर्थाश्रयत्वभानेनोक्तानुपपत्त्यभावात्। **एतेन**। अर्थबोधकत्वसम्भवे तत्परित्यागासम्भवादित्याद्युक्तदूषणेन।

ताभ्यां। प्रतिज्ञाहेतुभ्यां। स्वार्थोपस्थितिद्वारा इति शेषः। ननु वह्नेर्ज्ञापकं किं- वह्निः किं ज्ञानज्ञाप्य इति वाऽऽकांक्षा जायते। तथाच पक्षविशेषणता-नापन्नसाध्ये हेतुज्ञानज्ञाप्यत्त्वस्यान्वयादेव तन्निवृत्तिसम्भवात् पक्षविशेषणतानापन्नसाध्ये तद्बोधोऽनुपयोगीत्याशङ्कते। **अथेति**। **तत्रैव**। पर्वतविशेष्यकवह्निप्रकारकज्ञानजनके एव। **आकांक्षा जायते इति**। आकाङ्क्ष च किञ्चिद्ज्ञानजन्यपर्वतविशेष्यकज्ञानविषयो वह्निरित्याकारिका। **साध्ये इति**। धूमादिज्ञानजन्यं यत्पर्वतविशेष्यक "वह्निप्रकारकं" ज्ञानं तद्विषयत्वप्रति--पादनेनैवेत्यर्थः। विषयता च प्रकारतारूपा बोध्या। एवकारव्यवच्छेद्यमाह।

तावद्भिरवयवैः सम्भूयैकमहावाक्यार्थधीजननेऽपि परामर्शप्रयोजकीभूतस्वीयतत्तद्विशिष्टार्थधीजनकतायाः सर्वावयवेष्वेव सत्त्वेन निरुक्तलक्षणसमन्वयो नानुपपन्न इत्यत आह। परामर्शप्रयोजकत्वञ्चेति। परामर्शप्रयोजकज्ञानजनकत्वं चेत्यर्थः। तद्विषयेति। तत्तत्पदार्थोपस्थापकतयेति। अभेदे तृतीया। तथा च तदुपस्थापकत्वरूपमित्यर्थः। विवक्षितमिति शेषः। तथा च यादृशयादृशवाक्यैः परामर्शविषयसकलपदार्था उपस्थाप्यन्ते तावत्समुदायत्वं विवक्षितमिति पर्यवसितोऽर्थः। उदाहरणोपनययोरेवेति। उपनयस्य व्याप्त्यबोधकतामताभिप्रायेणोदाहरणान्तर्भावः। तत्। न्यायत्वम्। पर्यवस्यतीति। ताभ्यामेव परामर्शविषयसकलपदार्थोपस्थापनादिति भावः।

अथ यथा कथञ्चित्परामर्शानुकूलत्वं यादृशयादृशवाक्यानां तादृशतादृशवाक्यसमुदायत्वं विवक्षितमतो नोदाहरणोपनयमात्रेऽतिव्याप्तिरित्याशङ्कते। अथेति तदानुकूल्यमात्रेणेति। पूर्ववदभेदे तृतीया। परामर्शप्रयोजकत्वमित्यनुषज्यते। इत्यादेः। इत्यादिसमुदायस्य। तथात्वम्। स्यादिति शेषः को वह्निमानित्यादिवाक्यानामपि जिज्ञासाज्ञापनद्वारा अवयवप्रयोजकत्वेन यथाकथञ्चित्परामर्शानुकूलत्वसम्भवादिति भावः। इत्यादीत्यादिपदात्

धूमादिति। पर्वते वह्निमत्त्वं कुत इति। कुत इत्याकारकमेव प्रश्नवाक्यं प्रतिज्ञावाक्यैकवाक्यतयैव विशिष्टाकाङ्क्षाबोधनात्, पर्वते वह्निमत्त्वं कुत इति तु विशिष्टाकाङ्क्षाप्रतिपादनाय लिखितम्, अन्यथा एतस्य प्रश्नवाक्यत्वे तेनैवैकवाक्यतया धूमादित्यस्य विशिष्टार्थबोधकत्वसम्भवे प्रतिज्ञयैकवाक्यताविरहादिति ध्येयम्। अथ धूमज्ञानजन्यपर्वतविशेष्यकज्ञानविषयत्वं पक्षविशेषणतानापन्नसाध्ये कुतो न भासते इत्याशङ्क्य तद्धर्मिविशेषणतापन्ने एव साध्ये तद्विशेष्यकज्ञानविषयत्वभानमिति नियममङ्गीकृत्य निराकुरुते। **पञ्चमीत** इति। तादृशेति। धूमादिज्ञानजन्येत्यर्थः। अस्य च पर्वतविशेष्यकज्ञानेऽन्वयः। **तद्विशेषणतापन्नेति।** पर्वतविशेषणतापन्नेत्यर्थः। **उपस्थिते** इति साध्यांशे इत्यनुषज्यते। **तदप्रतीतेः।** धूमादिज्ञानजन्यज्ञानविषयत्वाऽप्रतीतेः। तथा च धूमादित्यत्र धूमपदस्य धूमज्ञानमर्थः। पञ्चम्याः समभिव्याहृतप्रतिज्ञाघटकपक्षपदार्थतावच्छेदकावच्छिन्नविशेष्यकज्ञानजन्यज्ञानविषयत्वमर्थः। तदेवाह। **एकधर्मीति।**

अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनक-शाब्दज्ञानजनकवाक्यत्वमवयवत्वम्, अत एव वह्निव्याप्य-

---

अवयवत्वन्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम्।

व्युत्क्रमप्रयुक्तप्रतिज्ञादावतिव्याप्त्यादे:परिग्रह:।

मूलोक्तावयवलक्षणे शाब्दज्ञानस्याऽनुमितिचरमकारणलिङ्गपरामर्श-प्रयोजकशाब्दज्ञानजनकत्वाभिधानं पञ्चवाक्यानामेकमहावाक्यार्थधी-जनकत्वाभिमानेन प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थगोचरशाब्दधीविशेषाणां परिचयायैव, तेषां निवेशस्तु विशिष्य तत्तदर्थविषयकशाब्दबुद्धित्वेन न तु तादृशशाब्दधीजनकत्वेन, तथासत्येकैकावयवजन्यशाब्दबुद्धेरपि परामर्श-प्रयोजकतया तज्जनकाऽवान्तरवाक्यार्थज्ञानजनकेऽवयवावयवेऽतिप्रसङ्गस्य दुर्वारत्वात्। न च साध्यविशिष्टपक्षादिविषयकशाब्दबुद्धित्वेन बोधपञ्चकस्य निवेशेऽननुगम:। जनकान्तस्य तत्तद्बोधजनकान्यतमत्वादिरूपानुगतधर्मा-वच्छिन्नपरत्वात्। न चैवं सति न्यायानन्तर्गते पर्वतो वह्निमानित्यादिवाक्येऽति-व्याप्ति:। न चैवं सति न्यायानन्तर्गते पर्वतो वह्निमानित्यादिवाक्येऽतिव्याप्ति:। वाक्यपदस्य न्यायान्तर्गतत्वार्थकत्वादित्यभिप्रेत्य पर्यवसितं तल्लक्षणार्थमाह।

अन्वयबोधसम्भवादिति। उपनयायोद्देश्यकनिगमनार्थविधेयक-बोधसम्भवादिति यावत्। **अनुषङ्गपक्षे तु** इति। निगमनेऽयं पदानुषङ्गपक्षेत्वित्यर्थ:। तथाच अयं पदार्थशुद्धपर्वतत्वावच्छिन्ने एव धूमज्ञानज्ञाप्यवह्निमतोऽभेदान्वये-नैवाऽऽकाङ्क्षानिवृत्तिरित्याह। **तादृशेति।** धूमज्ञानज्ञाप्येत्यर्थ:। **विशिष्टपक्षे।** वह्निव्याप्यधूमवदभिन्ने पर्वते। **विशिष्टपक्षबोधस्य।** धूमज्ञानज्ञाप्यवह्निमदभिन्न-पर्वताभेदबोधस्य।

तत्परता च। तादृशेच्छाप्रयोज्यता च। **पदार्थोपस्थापकत्वरूपमिति।** वाक्यांतरघटितन्यायेऽतिप्रसङ्गवारणाय तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वा-निरूपकत्वं विशेषणं देयम्, एवं चोदाहरणोपनययोरेव तत्पर्यवसानमिति बोध्यम्।

पर्यवसितोऽर्थ इति। अथ यादृशयादृशवाक्यानां परामर्शविषयपदार्थोप-

न्यायेति। (अधिकपाठः) यद्यप्युदासीने न्यायान्तर्गतत्वघटितप्रतिज्ञाद्यन्यतमत्वमेव नास्ति तथापि तदघटितप्रतिज्ञाद्युपादानाऽभिप्रायेणेदम्।

अथ किमिदं न्यायान्तर्गतत्वं, न तावत्स्वाविषयकप्रतीत्यविषयन्यायकत्वम्, प्रतिज्ञाद्यविषयकप्रतीत्यापि हेत्वादिरूपन्यायैकदेशस्य विषयीकरणात् तद्घटितसमुदायात्मके न्याये प्रतिज्ञाद्यविषयकप्रतीत्यविषयत्वस्य दुर्घटत्वात्, एकदेशवृत्तेर्व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावानङ्गीकारात्। नापि न्यायविषयिताव्यापकविषयिताकत्वम्, उच्चारणभेदेनैकानुपूर्व्यवच्छिन्नवाक्यानामपि भेदात्कस्याश्चिदपि प्रतिज्ञाव्यक्तेर्विषयिताया एकविधमपि न्यायमवगाहमानेषु सर्वेषु ज्ञानेषु वृत्त्यसम्भवात्। मैवम्। स्वाविषयकप्रतीत्यविषयन्यायकत्वमेव तत्। न्यायत्वसामानाधिकरण्यमात्रेण तादृशप्रतीत्यविषयत्वं विवक्षणीयम्। एकैकप्रतिज्ञादिव्यक्त्यविषयकप्रतीत्या व्यक्तयन्तरघटितन्यायस्य तन्न्यायैकदेशहेत्वादेश्चाऽवगाहनेऽपि न्यायत्वाधिकरणे तत्प्रतिज्ञाव्यक्तौ तत्प्रतिज्ञाव्यक्त्यविषयकप्रतीत्यविषयत्वसत्त्वेन तासां तथात्वमव्याहतमेव अथवा न्यायत्वाश्रयत्वमेव तथा। पर्याप्त्यविवक्षया एकदेशस्यापि तथात्वोपपत्तिः।

स्थापकत्वमिति निर्वचने सकलन्यायघटकप्रतिज्ञादिघटकपदानामपि परामर्शप्रयोजकतया तावद्वृत्तिसमुदायत्वस्य कस्मिन्नपि न्यायेऽसत्त्वेनाऽसम्भवः। उदाहरणोपनययोरतिव्याप्त्यसङ्गतिश्चेति चेन्न। यादृशयादृशेत्यस्य यादृशसमुदायत्वाश्रयप्रयोज्यस्मृतिविषयत्वं परामर्शविषयताव्यापकं तादृशसमुदायत्वाश्रयत्वमर्थः। एतेन वाक्यानां पदार्थोपस्थापकत्वाभावात्कथमतिव्यातिदानमिति निरस्तम्।

विवक्षितमिति। तथा च प्रतिज्ञादिपञ्चवाक्यानामपि तादृशपरामर्शप्रयोजकतया तावद्वृत्तिसमुदायत्वस्योदाहरणोपनयोरसत्त्वान्न तादृशवाक्यद्वयेऽतिव्याप्तिरिति भावः।[१४]

पूर्ववदिति। तत्तत्पदार्थोपस्थापकतयेति वदित्यर्थः। **अनुषज्यते** इति। तथा च परामर्शानुकूलत्वं परामर्शप्रयोजकत्वमिति भावः। **तथात्वम्** न्यायत्वम्।

मूले। न्यायेऽतिव्याप्तिवारणाय **द्वितीयशाब्दज्ञानजनकेति। शाब्दज्ञानस्येति। द्वितीयशाब्दज्ञानस्येत्यर्थः। अभिमानेनेति।** तथा च प्रथमशाब्दज्ञानपदं न तावदर्थविषयकबोधपरं, प्रत्येकावयवार्थविषयक-

वस्तुतो न्यायत्वघटकस्य समुदायत्वांशस्याऽत्र निष्प्रयोजनकत्वेनाऽनिवेशादुचितानुपूर्वीकत्वमात्रं निवेशितं, तदेव च न्यायान्तर्गतत्वमेकदेशसाधारणम्। उचितानुपूर्वीकत्वं च प्रतिज्ञोत्तरहेत्वादिघटितवाक्यपञ्चकानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगितावच्छेदकत्वम्। विशिष्टधर्मावच्छिन्नप्रतियोगिताच्छेदकतायास्तद्घटकसमुदायपर्याप्ततया एकदेशस्यापि तदाश्रयत्वात्, प्रतिज्ञादेस्तद्वत्त्वमक्षतम्। उपनयविशेषोत्तरत्वाविशिष्टनिगमनत्वशरीरे च वैशिष्ट्यघटकतया निगमनस्यान्तर्भावात्तत्साधारण्यमक्षतमेवोक्तधर्मस्य।

विशिष्टस्याऽवच्छेदकतास्थले एकमवच्छेदकमपरं च तद्विशेषणं तन्निष्ठावच्छेदकतावच्छेदकं न तु समुदायेऽवच्छेदकत्वं पर्याप्तमित्युपगमे च तादृशानुपूर्वीविशेषप्रकारकनिश्चयत्वसमनियतकारणतावच्छेदकविषयिताकत्वं विवक्षणीयम्। तादृशी च तादृशानुपूर्वीविशिष्टवैशिष्ट्यावगाहि बुद्धित्वावच्छिन्नकार्यतानिरूपितकारणता तदवच्छेदकत्वं च हेत्वादिनिष्ठानन्तर्यप्रकारतापन्नप्रतिज्ञादिविषयितानामपि अव्याहतम्। विनिगमनाविरहादितरविषयितानिरूपितत्वेन निश्चयविशिष्टत्वेन च कारणीभूतज्ञानविषयसकलनिरूपितविषयितानां कारणतावच्छेदकत्वात्।

प्रतिज्ञोत्तरहेत्वादिविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नकार्यतानिरूपितां प्रतिज्ञोत्तरो हेतुरित्यादिज्ञानसाधारणकारणतां– तादृशानुपूर्व्यवच्छिन्नभिन्नवाक्यत्वाद्यवच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वाद्यवच्छिन्नकार्यतानिरूपितां तादृशवाक्यत्वादिप्रकारकज्ञानकारणतां चादायोदासीनेऽतिप्रसङ्गवारणाय कारणतायां तादृशधर्मव्याप्यत्वव्यापकत्वयोर्निवेशनम्।

शाब्दबोधस्य तदजनकत्वात्। **तेषां**। तादृशपरामर्शप्रयोजकशाब्दज्ञानजनकानां। **तथासति**। तादृशशाब्दधीजनकत्वेन निवेशे सति। **तज्जनकेति**। एकैकावयवजन्यशाब्दबोधजनकेत्यर्थः। **अननुगम** इति। तथा च तादृशैकैकविषयकबोधजनकत्वस्य लक्षणत्वेऽवयवेऽव्याप्तिः। तादृशबोधपञ्चजनकत्वस्य लक्षणत्वेऽसम्भवः स्यादिति भावः। **जनकान्तस्य**। द्वितीयजनकान्तस्य।

स्वाविषयकेति! स्वं-प्रतिज्ञादि (तत्तदवयवाः) तदविषयकप्रतीतिर्हि न्यायविषयकप्रतीतिर्न भवितुमर्हति किन्तूदासीनप्रतीतिः– तदविषयो यो

न्यायस्तत्कत्वं प्रतिज्ञादौ इति समन्वयः। **तद्घटितेति।** हेतुघटितेत्यर्थः। **एकदेशवृत्तेः।** हेत्वादिवृत्तेः। स्वाविषयकप्रतीतिविषयत्वस्येति शेषः। विषयत्वमव्यासज्यवृत्तिधर्मः। समुदायत्वरूपं न्यायत्वम्, तच्च व्यासज्यवृत्ति। तथाचाऽसम्भव इति भावः। एकैकप्रतिज्ञादिव्यक्त्यविषयकप्रतीत्या तादृशप्रतिज्ञाव्यक्त्यन्तरघटितन्यायस्य विषयीकरणाच्चेत्यपि बोध्यम्। **वृत्त्यसम्भवादिति।** तथाचाऽसम्भवस्तदवस्थ एवेति भावः। **स्वेति।** स्वं न्यायान्तर्गतत्वेनाभिमतप्रतिज्ञादि। ननु यत्किञ्चिन्न्यायविषयिताव्यापकत्वमस्त्येवेति नोक्तदोष इति चेन्न। उदासीनप्रतिज्ञासमानाधिकरणत्वादिना न्यायविषयितायास्तद्व्याप्यत्वादुदासीनेऽतिप्रसङ्गस्य दुर्वारत्वादिति ध्येयम्। **तासां** तत्प्रतिज्ञाव्यक्तीनां। **तथात्वं।** तादृशप्रतीत्यविषयत्वं। **तथा** न्यायान्तर्गत्वम्। **एकदेशस्यापि।** प्रतिज्ञादेरपि। **तथात्वोपपत्तिः।** न्यायत्वाश्रयत्वोपपत्तिः।

समुदायत्वांशस्येति। स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादि-वृत्तिभिन्नत्वविशिष्ट-प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मपञ्चकव्यापकत्व-विशिष्टसमुदायत्वांशस्येत्यर्थः। **अत्र।** न्यायत्वाश्रयत्वरूपन्यायान्तर्गतत्वघटके। **मात्रपदेन** प्रतिज्ञादिपञ्चकसमुदायत्वस्य "प्रतिज्ञात्वादिपर्याप्त्यवच्छेदक-यत्किञ्चिद्धर्मव्यापकत्वविशिष्टसमुदायत्वपरस्य" व्यावृत्तिः। **ननु** स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वशून्यहेत्वादिवृत्ति यद्यत्समुदायत्वं तदन्यत्वरूपोचितानुपूर्वीकत्वमात्रोक्तावुदासीनेऽतिव्याप्तिरित्यत आह। **उचितानुपूर्वीकत्वं चेति। आनुपूर्वीविशेषावच्छिन्नभेदेति।** भेदश्च प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरत्वविशिष्टनिगमनत्वरूपानुपूर्वीमान्नेति प्रतीतिसाक्षिको ग्राह्यः। निगमनत्वे उपनयोत्तरत्व वैशिष्ट्यञ्च सामानाधिकरण्य-सम्बन्धेन **उक्तधर्मस्येति।** संसर्गसाधारणप्रतियोगितावच्छेदकत्वं निविष्टमिति भावः।

विशिष्टस्येति। अवच्छेदकतावच्छेदकसाधारणाऽवच्छेदकत्वाऽस्वीकारे त्वाह **तादृशानुपूर्वीविशेषप्रकारकेति।** प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्त-रोपनयोत्तरत्वविशिष्टनिगमनत्वरूपाऽऽनुपूर्वीविशेषप्रकारकेत्यर्थः। तथा च प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वरूपानुपूर्वीविशेषप्रकारक-निश्चयत्वसमनियतकारणतावच्छेदकविषयताश्रयत्वं तदर्थः। **बुद्धित्वा-वच्छिन्नेति।** तादृशानुपूर्वीमद्वाक्यवद् गगनमिति बुद्धिनिष्ठेति यावत्।

तदवच्छेदकत्वं चेति। कारणतावच्छेदकत्वं चेत्यर्थः। ननु एतन्मते निगमनविषयिताया एव कारणतावच्छेदकत्वं उपनयादिविषयितानां च तदवच्छेदकत्वमिति कथं प्रतिज्ञादिनिष्ठत्वमुचितानुपूर्वीकत्वस्येत्यत आह। **विनिगमनाविरहादिति।** प्रतिज्ञात्वावच्छिन्नविषयितानिरूपितेत्यादिक्रमेण निगमनत्वावच्छिन्नविषयिताया इव निगमनत्वावच्छिन्न विषयितानिरूपितेत्यारभ्य प्रतिज्ञात्वावच्छिन्नविषयिताया एवं हेत्वादिविषयितायाः कारणतावच्छेदकत्वं बोध्यम्।

अथ हेत्वादिविषयितायां कारणतावच्छेदकत्वं दुर्घटं, तथाहि। हेतुप्रकारतांशे विशेषणीभूतप्रतिज्ञानिरूपितत्व उदाहरणविशेष्यतानिरूपितत्वोभयस्य कारणतावच्छेदकत्वस्वीकारे व्यासज्यवृत्तिकारणतावच्छेदकत्वापत्तिः अतः सामानाधिकरण्यसम्बन्धेन प्रतिज्ञाप्रकारतानिरूपितत्वविशिष्टोदाहरण-विशेष्यतानिरूपिते तु प्रकारताशालिनिश्चयत्वेन कारणता वाच्या। तथा च कारणतावच्छेदककोटौ सामानाधिकरण्यांशस्याधिकस्य निवेशनमेव विनिगमकमिति चेन्न। प्रतिज्ञाप्रकारतानिरूपितहेतुप्रकारतानिरूपितोदाहरण-प्रकारतानिरूपितेत्यादिक्रमेण कार्यकारणभावेऽपि हेतुप्रकारतांशे विशेषणीभूतप्रतिज्ञाप्रकारतानिरूपितत्व-हेतुप्रकारतात्वोभयस्योक्तयुक्तया कारणतावच्छेदकत्त्वेन सामानाधिकरण्यसम्बन्धेन प्रतिज्ञाप्रकारतानिरूपितत्वादि-वैशिष्ट्यनिवेशस्याऽऽवश्यकत्वे उभयत्र सामानाधिकरण्यनिवेशे विनिगमकाभावादिति।

कारणतायां निश्चयत्वसमनैयत्यं च निश्चयत्वव्याप्यत्वे सति व्यापकत्वम्। तत्र व्याप्यत्वनिवेशस्य फलमाह। **प्रतिज्ञोत्तरेति।** प्रतिज्ञोत्तरहेतुमद्गगनमिति विशिष्टवैशिष्ट्यबुद्धीत्यर्थः। **प्रतिज्ञोत्तरहेतुरि-त्यादीति।** आदिना प्रतिज्ञोत्तरहेतूत्तरोदाहरणम्। एवं तादृशोदाहरणोत्तरोपनयः तादृशोपनयोत्तरनिगमनमिति परिग्रहः। **ज्ञानसाधारणेति।** तादृशानुपूर्वीविशेष-प्रकारकनिश्चयत्वव्यापिकामिति यावत्। **कारणतामिति।** अस्य आदायेत्यनेनाऽन्वयः। **तथा च** व्याप्यत्वाऽनिवेशे तादृशानुपूर्वीविशेषप्रकारक-निश्चये प्रतिज्ञोत्तरहेतुविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नकार्यता-निरूपितकारणतासत्त्वात्, "तादृशानुपूर्वीविशेषप्रकारकनिश्चयेनाऽपि प्रतिज्ञोत्तरहेतुविशिष्टवैशिष्ट्यावगाहिबोधजननात्"अतस्तादृशकारणतावच्छेदक-

न च तादृशानुपूर्वीविशेषावच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्न-कार्यतानिरूपितकारणताया अपि न तादृशानुपूर्वी विशेषप्रकारकनिश्चयत्व-समनैयत्यसम्भवः, तादृशकारणतायाःप्रतिज्ञात्वादिना पदार्थान्तरावगाहितादृशानु-पूर्वीप्रकारकज्ञानसमानारकाकज्ञानसाधारणत्वात्, तादृशज्ञानस्य वास्तवप्रतिज्ञा-विषयत्वेन तद्घटितानुपूर्वीप्रकारकत्वाभावादिति वाच्यम्। प्रतिज्ञात्वाद्यवच्छिन्न-प्रकारतानिरूपितहेतुत्वाद्यवच्छिन्नप्रकारतेति क्रमेण निगमनत्वावच्छिन्नविषयता-पर्यन्तं निवेश्य तच्छालिनिश्चयत्वसमनैयत्यस्यैव विवक्षितत्वात्। तादृश-निश्चयत्वस्योक्तश्च य साधारण्येन क्षतिविरहात्। न चैवमुदासीनप्रतिज्ञाद्यानन्तर्यं हेत्वाद्यंशेऽवगाहते यो भ्रमस्तन्निष्ठतादृशप्रतिज्ञाविषयिताया अपि निरुक्त-कारणतावच्छेदकतयाऽतिप्रसङ्गो दुर्वार एवेति वाच्यम्। भ्रमाऽवृत्तिविषयिताया अपि निवेशनीयत्वादिति कृतं पल्लवितेन।

अवयवैकदेशस्य अवयवद्वयात्मकसमुदायस्य च वारणाय प्रतिज्ञाद्यन्यत-मत्वमिति। अथ धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादिन्यायान्तर्गतप्रतिज्ञैकदेशे धूमादिति भागेऽतिव्याप्तिः, तस्यापि हेतुप्रतिपाद्यो यादृशविशिष्टार्थ-स्तन्मात्रबोधकत्वेन हेतुलक्षणाक्रान्ततया प्रतिज्ञाद्यन्यतमत्वाक्रान्तत्वात्।

विषयताश्रयत्वमादायोदासीनप्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिरतोव्याप्यत्वनिवेशः।[१५] **निवेशे तु** तादृशकारणतायाः प्रतिज्ञोत्तरहेतुरिति ज्ञानेऽपि सत्वात्तत्र तादृशानुपूर्वीविशेषप्रकारकनिश्चयत्वाऽसत्वान्न तादृशकारणतायां तन्निश्चयत्वव्याप्यत्वमतस्तामादाय नातिव्याप्तिरिति भावः। तादृशनिश्चयत्वव्यापकत्वनिवेशस्य **प्रयोजनमाह। तादृशानु-पूर्व्यवच्छिन्नभिन्नेति। बुद्धित्वावच्छिन्नेति।** तादृशानुपूर्व्यवच्छिन्नभिन्नवाक्य "प्रतिज्ञाहेतूदाहरणोपनयनिगमनपर्वतो वह्निमानिति वाक्य"वद् गगनमिति बुद्धित्वावच्छिन्नेत्यर्थः। **तादृशवाक्यत्वादिप्रकारकेति।** तादृशानुपूर्व्यवच्छिन्नभिन्नं वाक्यं "प्रतिज्ञाहेतूदाहरणोपनयनिगमन-पर्वतोवह्निमानितिवाक्य" मित्याकारकेत्यर्थः। **उदासीने।** प्रतिज्ञादौ। तथा च **व्यापकत्वाऽनिवेशे** [तादृशानुपूर्वीप्रकारकनिश्चये तादृशानुपूर्व्य-वच्छिन्नभिन्नवाक्यत्वावच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नकार्यता-निरूपितकारणतायाः सत्त्वात्, "विशिष्टबुद्धिं प्रति विशेषणतावच्छेदकप्रकारक-

न च तद्घटकपञ्चम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्त्वाभावान्न वक्ष्यमाणहेतुलक्षणाक्रान्तत्वं तस्येति वाच्यम्। एवमपि धूमाद्वह्निमतःसधर्मा पर्वतो वह्निमानित्यादिप्रतिज्ञाघटकतादृशभागेऽतिप्रसङ्गस्य दुर्वारत्वादिति चेन्न। प्रकृतपक्षतावच्छेदकावच्छिन्नविशेषणतापन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नान्वितस्वार्थबोधजनकत्वे सति प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयिताबहिर्भूतविषयिताशून्यबोधजनकवाक्यत्वरूपहेतुत्वस्यैव निवेशनीयतयाऽनतिप्रसङ्गात्। निगमनघटकस्य तस्मादिति भागस्य वारणाय विशेष्यदलम्। तज्जन्यबोधे तादृशविशिष्टविषयिताबहिर्भूतव्याप्त्यादिविषयितासत्त्वेन तद्वारणात्।

ननु प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञादिभिन्नभिन्नत्वरूपं, प्रतिज्ञाद्येकदेशसाधारणम् भेदस्याऽव्यासज्यवृत्तितया समुदायवृत्तित्वे एकदेशवृत्तिताया अपि दुर्वारत्वात्।

अथ प्रतिज्ञादिभिन्नभेदानुयोगितावच्छेदकरूपवत्वं तत्। तादृशं च रूपं

निश्चयत्वेन कारणत्वात्"] तादृशानुपूर्व्यवच्छिन्नभिन्नं वाक्यमिति निश्चयनिष्ठकारणतायाः तादृशानुपूर्वीप्रकारकनिश्चयत्वव्याप्यत्वात् तादृशकारणतावच्छेदकविषयताश्रयत्वस्योदासीनप्रतिज्ञादौ सत्त्वाद**तिव्याप्तिरतोव्यापकत्व**निवेशः। निवेशे तु तादृशकारणतायां, तादृशानुपूर्वीप्रकारकनिश्चयत्वव्यापकत्वविरहान्ना**तिव्याप्तिः**। तादृशनिश्चयत्वावच्छिन्नकारणतानिवेशे**ऽप्ययमेव** दोषो बोध्यः। भ्रमप्रमासाधारणनिरूप्यनिरूपकभावापन्नविषयिताया एव कारणतावच्छेदकत्वेन तादृशानुपूर्वीप्रकारकनिश्यचत्वस्य तादृशनिश्चयत्व**पर्याप्तावच्छेदकता**ककारणतायाः प्रवेशा**ऽसम्भव**ादिति ध्येयम्।[१५]

शङ्कते। **नचेति समनैयत्यसम्भव इति**। वास्तवप्रतिज्ञादिघटिततादृशानुपूर्वीप्रकारकनिश्चयत्वव्याप्यत्वस्य तादृशकारणतायामसम्भवात्। तदेवाऽह। **तादृशकारणताया** इति। **विवक्षितत्वादिति**। तथा चाऽवयवहितोत्तरत्वसम्बन्धावच्छिन्नप्रतिज्ञात्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नतादृशसम्बन्धावच्छिन्नहेतुत्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नतादृशसम्बन्धावच्छिन्नोदाहरणत्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नतादृशसम्बन्धावच्छिन्नोपनयत्वावच्छिन्नप्रकारतानिरूपितनिगमनत्वावच्छिन्नविशेष्यताशालिनिश्चयत्व-

प्रतिज्ञात्वादिकमेव, न तु तदेकदेशपर्याप्तपर्वतपदत्वादिकम्, तदवच्छिन्ने व्यासज्यवृत्तिप्रतिज्ञात्वाद्यवच्छिन्नभेदसत्त्वादिति चेन्न। प्रतिज्ञाद्येकदेशे प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्वे तादृशभेदावच्छिन्नभेदस्य प्रतिज्ञात्वाद्यवच्छिन्नेऽपि सत्वाऽसम्भवात्' प्रतिज्ञात्वपर्याप्त्यधिकरणसमुदायस्यैकदेशानतिरिक्तत्वात् नहि व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताक एकदेशभेदः प्रामाणिकः घटपटौ न घट इति प्रतीतेरसिद्धेः।

प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं यद्यद्रूपं तदवच्छिन्नानुयोगिताक-भेदप्रतियोगितावच्छेदकधर्मवत्त्वविवक्षणे च प्रतिज्ञाहेत्वादिसमुदायेऽतिव्याप्तिः, तादृशसमुदायत्वावच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्नभेदाऽसत्वात्, तादृशसमुदायत्वस्य निरुक्तरूपानन्तर्गतत्वेन तादृशसकलधर्मावच्छिन्नानुयोगिताकभेदप्रतियोगिता-वच्छेदकत्वात्। प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकं यद्यत्तदवच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वेनाऽपि तादृशधर्मविशेषणेऽ-तिगौरवमतो लघुलक्षणान्तरमाह।

समनैयत्यस्य विवक्षणादिति भावः। **तन्निष्ठेति।** भ्रमनिष्ठेत्यर्थः। **अतिप्रसङ्गोदुर्वार एवेति।** उदासीनप्रतिज्ञायामित्यादिः। **भ्रमाऽवृत्तिविषयिताया इति।** न चोक्ताऽसम्भवो दुर्वारः, तादृशविषयिताः भ्रमप्रमासाधाण्येन भ्रमाऽवृत्तित्वविरहादिति वाच्यम्। भ्रमान्यवृत्तित्वस्य तदर्थत्वात्। **वारणायेति।** तस्य न्यायान्तर्गतत्वादिति भावः। तथापि स्थलविशेषे प्रतिज्ञैकदेशेऽति-व्याप्तिमाशङ्कते। **अथेति।** प्रतिज्ञाद्यन्यतमत्वमुपपादयति। **तस्यापीति** धूमादिति भागस्यापीत्यर्थः। **तन्मात्रेति।** मात्रपदेन निगमनव्युदासः। स्वार्थबोधकत्वाभावादिति। स्वं हेतुः। **तस्य।** धूमादिति भागस्य। **एवमपि।** साध्यान्वितस्वार्थबोधकत्वनिवेशेऽपि। **तादृशभागे।** धूमादिति भागे। **प्रकृतेति।** प्रतिज्ञैकदेशे हेत्वर्थबोधकभागेऽतिव्याप्तिवारणाय सत्यन्तम्। तथा च प्रकृतपक्षतावच्छेदकावच्छिन्नबोधकपदसांकाङ्क्ष प्रकृतसाध्यता वच्छेदका-वच्छिन्नबोधकपदसाकाङ्क्षप्रकृतसाध्यतावच्छेदकावच्छिन्नबोधकपद-साकाङ्क्षपञ्चमीपदघटितप्रकृतहेतुतावच्छेदकावच्छिन्नबोधकपदत्वे सतीत्यर्थः। तेन पक्षघटकधूमादित्यस्य पक्षविशेषणतापन्नवह्न्यन्वितस्वार्थबोधकत्वेऽपि न क्षतिः। **हेतुविशिष्टेति।** वैशिष्ट्यञ्च आधेयतासम्बन्धेन। तथा च

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकारत्वावच्छेद्या या साध्यतावच्छेदकावच्छिन्नविशेष्यता तदवच्छेद्यप्रकारताप्रयोजकत्वे सति प्रकृतिहेतुविशिष्टहेतुत्वविषयताशालिनिश्चयत्वव्यापकप्रतिबन्धकतानवच्छेदकविषयिताशून्यशाब्दनिष्ठजन्यतानिरूपितजनकतावच्छेदकीभूतयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वं हेतुत्वं फलितम्।

प्रतिज्ञाद्यन्यतमत्वनिवेशेऽपि प्रतिज्ञाद्येकदेशेऽतिव्याप्तिर्दुवारैवेत्याशङ्कते। **नन्विति**। अन्यतमत्वं च भेदकूटावच्छिन्नप्रतियोगिताकभेदवत्त्वम्। प्रकृताभिप्रायेणाह। **प्रतिज्ञादिभिन्नभिन्नत्वरूपमिति**। प्रतिज्ञाभिन्नत्वे सति हेतुभिन्नत्वे सति उदाहरणभिन्नत्वे सति उपनयभिन्नत्वे सति निगमनभिन्नो यो यस्तद्भिन्नत्वरूपमित्यर्थः। **प्रतिज्ञाद्येकदेशसाधारणमपीति**। प्रतिज्ञादिभिन्नो यः तद्भिन्नत्वं यथा प्रतिज्ञायां तथा प्रतिज्ञैकदेशेऽपीति भावः। तत्र हेतुमाह-**भेदस्येति**। अन्यतमत्वरूपभेदस्येत्यर्थः। **अव्यासज्यवृत्तितयेति**। व्यासज्यवृत्तित्वे तु अन्यतमत्वस्य प्रतिज्ञादावप्यवृत्तित्वप्रसङ्गादिति भावः। **समुदायवृत्तित्वे**। प्रतिज्ञावृत्तित्वे। **एकदेशवृत्तितायाः**। प्रतिज्ञैकदेशवृत्तितायाः। **दुर्वारत्वादिति**। तथा च प्रतिज्ञैकदेशेऽतिव्याप्तिरिति भावः। प्रतिज्ञादिभेदो यथाऽन्यत्र वर्त्तते तथा प्रतिज्ञैकदेशेऽपि, तथा च प्रतिज्ञादिभिन्नः प्रतिज्ञैकदेशेऽपि तद्भेदस्य प्रतिज्ञैकदेशे विरहान्नातिव्याप्तिरित्याशयेन समाधत्ते **अथेति**। **प्रतिज्ञादिभिन्नभेदेति**। प्रतिज्ञादिभिन्नप्रतियोगिकभेदेत्यर्थः। **तत्**। प्रतिज्ञाद्यन्यमत्वम्। **तदवच्छिन्ने**। पर्वतपदत्वाद्यवच्छिन्ने। **सत्त्वाऽसम्भवादिति**। तथा चाऽसम्भव इति भावः।

न च प्रतिज्ञात्वाद्यवच्छिन्नभेदस्य प्रतिज्ञैकदेशे सर्वत्र तत्तदेकदेशपर्याप्तधर्मावच्छिन्ने सत्त्वेऽपि विरोधेन प्रतिज्ञात्वादेस्तदनुयोगितानवच्छेदकतया प्रतिज्ञात्वाद्यवच्छिन्ने तदवच्छिन्नभेदावच्छिन्नभेदसत्त्वमविरुद्धमिति वाच्यम्। व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताक एकदेशभेदस्याऽप्रामाणिकत्वात्" **इति पाठान्तरम्**।

विवक्षणे चेति। प्रतिज्ञाद्यन्यतमत्वमित्यनेनेति शेषः। यद्यद्रूपदेन "प्रतिज्ञाद्येकदेशस्य" पर्वतपदत्वादेर्धारणसम्भवेन तदवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकधर्मत्त्ववस्य पर्वतपदादौ विरहेण प्रतिज्ञाद्येकदेशेऽतिव्याप्तिविरहः। तादृशधर्मवत्त्वस्य प्रतिज्ञादौ सत्वाल्लक्ष**णसमन्वयः**।

प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाऽघटितत्वं वा वक्तव्यम्।

प्रतिज्ञाद्यघटकत्वे इति। अत्रापि न्यायान्तर्गतत्वे सतीत्यनुषज्यते। अतो न्यायबहिर्भूतवाक्यव्युदासः। प्रतिज्ञाद्येकदेशवारणाय प्रतिज्ञाद्यघटकत्वनिवेशनम्

तादृशसमुदायत्वावच्छिन्ने। प्रतिज्ञाहेतुसमुदायत्वावच्छिन्ने। **प्रतिज्ञात्वाद्यवच्छिन्नभेदाऽसत्त्वादिति।** व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताक एकदेशभेदाऽनङ्गीकारादिति भावः। **तादृशसमुदायत्वस्य।** प्रतिज्ञाहेतुसमुदायत्वस्य। **निरुक्तरूपानन्तर्गतत्वेन।** प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकयद्यद्रूपानन्तर्गतत्वेन। **तादृशधर्मविशेषणे।** प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं यद्यद्रूपं तदवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकधर्मविशेषणे। तथा च प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकयद्रूपमध्ये प्रतिज्ञाहेतुसमुदायत्वस्यापि धारणसम्भवेन तादृशसमुदायत्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वस्य तादृशसमुदायत्वे विरहान्नाति**व्याप्तिरिति** भाव।[१६]

एवं च प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकं यद्यत्तदवच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं यद्यद्रूपं तदवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदको यो धर्मस्तद्वत्त्वं प्रतिज्ञाद्यन्यतमत्वं फलितम्। प्रतिज्ञाहेतुसमुदायवारणााय **सत्यन्तम्।** तदर्थश्च प्रतिज्ञात्वावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकताव्यापकत्वं—व्यापकता च स्वावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वसम्बन्धेन।

प्रतिज्ञाद्येकदेशेऽतिव्याप्तिवारणाय **विशेष्यदलम्।** एवं च प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं यत्पर्वतपदत्वादिकं तद्धर्मावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वस्य पर्वतपदत्वेऽसत्त्वान्न पर्वतपदत्वमादायैकदेशेऽतिव्याप्तिः। अत्र प्रतिज्ञादिभेदपञ्चकानुयोगितानवच्छेदकत्वस्य धर्मविशेषणत्वे पर्वतपदत्वादेर्वारणसम्भवेऽपि प्रतिज्ञाघटकतावद्वर्णवृत्यन्यतमत्वस्य ''प्रतिज्ञात्ववत्'' प्रतिज्ञादिपञ्चकानुयोगितानवच्छेदकतया तादृशान्यतमत्वमादायैकदेशेऽतिव्याप्तिरतः प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं

तदर्थश्च प्रतिज्ञादिघटकतानवच्छेदकधर्मवत्त्वम्। तेन प्रतिज्ञादिघटकत्वदेशभेदस्य प्रतिज्ञात्वादिरूपव्यासज्यवृत्तिधर्मावच्छिन्नेऽनभ्युपगमेऽपि न क्षतिः। प्रतिज्ञादिघटकतावच्छेदकत्वं तु प्रतिज्ञात्वादिन्यूनवृत्तित्वम्। तच्च प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वादिसमानाधिकरणत्वम्। तथात्वं च तदेकदेशवृत्तिपर्वतपदत्वादेः, तदवच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्वान्न तु प्रतिज्ञात्वादेः।

यद्यत्तद्धर्मान्यत्वमुपेक्ष्य तत्तद्धर्मावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वं धर्मे **निवेशितम्। तथा च** प्रतिज्ञादिपञ्चकानुयोगितावच्छेदकं यत्पर्वतपदत्वादिकं तदवच्छिन्नानुयोगिताको न तादृशान्यतमत्वावच्छिन्नप्रतियोगिताको भेदः किन्तु प्रतिज्ञात्वावच्छिन्नानुयोगिताकभेद एव तत्प्रतियोगितावच्छेदकत्वस्याऽन्यतमत्वे विरहेण नाऽन्यतमत्वमादायैकदेशेऽतिव्याप्तिः। तादृशधर्मवत्त्वं **च पर्याप्तिसम्बन्धेन।** तेनैकदेशे प्रतिज्ञात्वादिसत्त्वेऽपि नातिव्याप्तिः। **एकदेशेऽतिव्याप्तिवारणाय यद्यदिति वीप्सा,** व्यापकत्वनिवेशसूचनाय।

तथा च प्रतिज्ञात्वाद्यवच्छिन्नप्रतियोगिताकभेदपञ्चकानुयोगितावच्छेदकताव्यापकत्वं **तदर्थः।** व्यापकता च स्वावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वसम्बन्धेन।[१७]

अनुगमस्तु प्रतिज्ञात्वादिविशिष्टधर्मवत्त्वम्। वैशिष्ट्यञ्च स्वावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकताव्यापकत्व–स्वावच्छिन्नाप्रतियोगिताकभेदपञ्चकानुयोगिताकभेदप्रतियोगितावच्छेदकताव्यापकत्वोभयसम्बन्धेन।[१८] व्यापकताद्वयं पूर्ववत्। अथवा प्रतिज्ञादिभेदविशिष्टधर्मवत्त्वम्। वैशिष्ट्यञ्च स्वनिरूपितप्रतियोगितावच्छेदकीभूतप्रतिज्ञात्वाद्यवच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकताव्यापकावच्छेदकताकानुयोगिताकभेदप्रतियोगितावच्छेदकत्व–स्वनिरूपितप्रतियोगितावच्छेदकीभूतप्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकताव्यापकावच्छेदकताकभेदानुयोगितावच्छेदकत्वोभयसम्बन्धेनेति।

अत्रापि। लक्षणेऽपि तथा च न्यायान्तर्गते सति प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाऽघटितत्वम् अवयवत्वं फलितम्। सत्यन्तनिवेशस्य फलमाह। **प्रतिज्ञाद्येकदेशवारणायेति।** प्रतिज्ञाद्येकदेशस्य पर्वतपदादेः

हेतुत्वादेः प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वात्तत्सङ्ग्रहाय विशेष्यदलम्। न च मिलितभेदपञ्चकानुयोगितावच्छेदकभिन्नत्वनिवेशे हेतुत्वादेर्हेतुत्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वविरहात्तादृशानुयोगितावच्छेदक-भिन्नत्वमव्याहतमेवे तिविशेष्यदलमनर्थकमेवेति वाच्यम्। धूमादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञाघटकधूमादित्यादिभागसाधारणस्य हेतुत्वस्य निवेशे तत्रातिप्रसङ्गभयेन मिलितभेदपञ्चकानुयोगितावच्छेदकत्वस्यैकत्र निवेशाऽ-सम्भवात्।

न्यायाऽवयवत्ववारणायेत्यर्थः। तस्य न्यायान्तर्गतत्वादुभयघटक-भागद्वयाऽघटितत्वाच्चेति भावः। तस्य प्रतिज्ञादिघटकत्वाद्वारणम्। ननु प्रतिज्ञाघटकत्वं यदि प्रतिज्ञादिघटकभिन्नत्वं तदाऽसम्भवः, प्रतिज्ञादिघटक "पर्वतपदादि" भेदस्य प्रतिज्ञादावसत्त्वात्, व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिक-एकदेशभेदस्याऽप्रामाणिकत्वादित्यत आह। **तदर्थश्चेति। तेन।** एतादृशार्थकरणेन अनभ्युपगमे**ऽपीति।** व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकैकदेशभेदस्याऽनभ्यु-पगमेऽपीत्यर्थः। **न क्षतिः।** नाऽसम्भवः। प्रतिज्ञात्वादेः प्रतिज्ञादिघटकता-नवच्छेदकत्वात्। **तच्च।** प्रतिज्ञात्वादिन्यूनवृत्तित्वं च। **तथात्वं च।** प्रतिज्ञात्वाद्यवच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वादि-समानाधिकरणत्वं **च। तदेकदेशवृत्तीति।** प्रतिज्ञाद्येकदेशवृत्तीत्यर्थः **तदवच्छिन्ने।** पर्वतपदत्वावच्छिन्ने। **प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्त्वादिति।** प्रतिज्ञात्वाद्य-वच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वस्य पर्वतपदत्वे सत्वादिति यावत्। प्रतिज्ञात्वसामानाधिकरण्यस्य च सत्वात् इत्यपि पूरणीयम्। **न तु प्रतिज्ञात्वादेरिति।** तथात्वमित्यनेनान्वयः। प्रतिज्ञात्वे प्रतिज्ञात्वसामानाधिकरण्य-सत्त्वेऽपि प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वविरहादिति भावः। तथा च प्रतिज्ञात्वादेः प्रतिज्ञात्वन्यूनवृत्तित्ववारणाय सत्यन्तम्।

तथा च प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वादिसमानाधिकरणत्वं प्रतिज्ञात्वन्यूनवृत्तित्वम्। सत्यन्तानुपादाने प्रतिज्ञात्वस्य प्रतिज्ञात्वन्यूनवृत्तित्वापत्तिः, तस्य प्रतिज्ञात्वसमानाधिकरणत्वात्। विशेष्यदलप्रयोजनमाह। **हेतुत्वादेरिति। तत्सङ्ग्रहाय।** हेतुत्वसङ्ग्रहाय। **तत्साधारणहेतुत्वं** तु हेतुप्रतिपाद्ययादृशविशिष्टार्थबोधजनकवाक्यत्व**म्।**

वस्तुतस्तु तद्व्यावृत्तपूर्वोपदर्शितहेतुत्वनिवेशेनैव तादृशभागवारणसम्भवान्मिलितभेदपञ्चकानुयोगितावच्छेदकभिन्नत्वस्यैव निवेशनीयतया नोपादेयमेव विशेष्यदलम्।

मिलितभेदपञ्चकानुयोगितावच्छेदकत्वस्य प्रतिज्ञादिघटकतावच्छेदकतानात्मकत्वे विशेष्यदले उभयाघटितत्वनिवेशेनैवोपपत्तौ तद्घटकभागद्वयाऽघटितत्वपयन्तनिवेशवैयर्थ्यात्। प्रतिज्ञादिघटकभागहेतुवृत्तिसमुदायत्वस्य प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वेन प्रतिज्ञाघटकतानवच्छेदकत्वदलेनैव वारणसम्भवात्।

मिलितभेदपञ्चकानुयोगितावच्छेदकत्वस्य प्रतिज्ञादिघटकतावच्छेदकत्वे तु प्रतिज्ञात्वपर्याप्त्यधिकरणहेत्वेकदेशहेतुत्वपर्याप्त्यधिकरणप्रतिज्ञैकदेशवृत्तिसमुदायत्वस्य प्रतिज्ञात्वहेतुत्वावच्छिन्नभेदानुयोगितानवच्छेदकतया तत्समुदायत्वमादायाऽतिप्रसङ्गस्य वारणाय भागद्वयपर्यन्तनिवेशसार्थक्यात्।

न च विभिन्नप्रतिज्ञादिव्यक्तिनिष्ठाबुद्धिविशेषविषयत्वरूपसमुदायत्वात्मकप्रतिज्ञात्वादिकं विभिन्नमेव, एकसाध्यहेतुकसकलप्रतिज्ञासमुदायत्वस्य प्रतिज्ञात्वे प्रत्येकं प्रतिज्ञादिव्यवहारस्यानुपपत्तेः। तथाचैवमेकप्रतिज्ञात्वव्यक्तेरपरप्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकतया प्रतिज्ञादिघटकतावच्छेदकत्वं दुर्वारमेवेति वाच्यम्। स्वसमानाधिकरणप्रतिज्ञात्वाद्यवच्छिन्नभेदानाम् अनुगतरूपावच्छिन्नभेदानां वाऽनुयोगितावच्छेदकत्वस्यैव विवक्षणीयत्वात्। घटकतानवच्छेदकधर्मश्च व्यासज्यवृत्तित्वेन विशेषणीयः। तेन प्रतिज्ञादिघटकवर्णान्यतमत्वादिकमादाय न तदेकदेशातिव्याप्तिः।

तादृशभागवारणसम्भवादिति। प्रतिज्ञाघटक धूमादिति भागवारणसम्भवादित्यर्थः। तादृशभागे एतादृशहेतुत्वविरहेण हेतुत्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वस्यापि सत्त्वेन तादृशानुयोगितावच्छेदकभिन्नत्वविरहेण" हेतुत्वादेः प्रतिज्ञादिघटकतानवच्छेदकत्वसिद्धये। **विशेष्यदलम्।** न्यूनवृत्तित्वघटकप्रतिज्ञात्वसामानाधिकरण्यदलम्। ननु प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वादिसामानाधिकरणो यो धर्मस्तद्भिन्नधर्मवत्त्वं प्रतिज्ञाद्यघटकत्वम्। एवं च प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वसमानाधिकरणं यत्तद्भिन्नत्वे सति—हेतुत्वावच्छिन्न-

केचित्तु प्रतिज्ञादिघटकतावच्छेदकत्वं स्वाश्रयाविषयकप्रतीत्यविषय-प्रतिज्ञादिकत्वे सति प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वम्। सत्यन्तमनिवेश्य प्रतिज्ञादिविषयकत्वाभावकूटवत्प्रतीतिविषयतावच्छेदकत्वनिवेशे

प्रतियोगिताकभेदानुयोगितावच्छेकत्वे सति हेतुत्वसमानाधिकरणं यत्तद्भिन्नत्वे सति–उदाहरणत्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति उदाहरणत्वसमानाधिकरणं यत्तद्भिन्नत्वे सति–उपनयत्वावच्छिन्नप्रतियोगिता-कभेदानुयोगितावच्छेदकत्वे सति उपनयत्वसमानाधिकरणं यत्तद्भिन्नत्वे सति–निगमनत्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति-निगमनत्वसमानाधिकरणं यत्तद्भिन्नो यः प्रतिज्ञात्वादिरूपोधर्मस्तद्वत्त्वं प्रतिज्ञाद्यघटकत्वं फलितम्। इदानीं समानाधिकरण्यानुपादाने प्रतिज्ञात्वावच्छिन्न-प्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति हेतुत्वावच्छिन्नप्रतियोगिता-कभेदानुयोगितावच्छेदकत्वे सति इति क्रमेण निगमनत्वावच्छिन्नप्रति-योगिताकभेदानुयोगितावच्छेदको यो धर्मस्तद्भिन्नधर्मवत्त्वं प्रतिज्ञाद्यघटकत्वमिति विवक्षणेऽपि हेत्वादेः सङ्ग्रहेण विशेष्यदलं किमर्थमित्याशङ्कते। **न चेति। तत्र।** प्रतिज्ञाघटकधूमादिति भागे। **अतिप्रसङ्गभयेनेति।** हेतुत्वावच्छिन्नप्रतियो-गिताकभेदानुयोगितावच्छेदकत्वविरहेण। मिलितभेदपञ्चकानुयोगितावच्छेदक-भिन्नत्वस्य तादृशभागे सत्त्वादिति भावः। **तद्व्यावृत्तेति।** प्रतिज्ञाद्यघटकधूमा-दित्यादिभागव्यावृत्तेत्यर्थः। **पूर्वोपदर्शितेति।** प्रकृतपक्षतावच्छेदकावच्छिन्न-विशेषणतापन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नान्वितस्वार्थबोधजनकत्वे सति हेतुविशिष्टहेतुत्वविषयिताबहिर्भूतविषयिताशून्यबोधजनकवाक्यत्वरूपेत्यर्थः। प्रतिज्ञाद्यघटकत्वविरहा**न्नातिव्याप्तिः। एवं च** वास्तविकहेतुत्वादौ मिलितभेदपञ्चकानुयोगितावच्छेदकभिन्नत्वसत्त्वात्तदाश्रयस्यावयवत्वोपपत्तेः सामानाधिकरण्यदलं व्यर्थमेवेत्याह। **नोपादेयमेवेति। प्रतिज्ञादीति।** प्रतिज्ञाहेत्वेकदेशसमुदायत्वस्य प्रतिज्ञैकदेशहेतुसमुदायत्वस्य वा क्रमेण हेतुत्वावच्छिन्नप्रतियोगितावच्छेदकत्वे सति हेतुत्वसमानाधिकरणतया प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वसमानाधिकरणतया च तद्वद्भेदाऽसत्त्वेनैव वारणादिति भावः।

विशेष्यदलमिति। समानाधिकरणदलमित्यर्थः। मिलितभेदपञ्चकानु-

धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमान्धूमादित्यादिन्यायान्तर्गतप्रतिज्ञैकदेशधूमादिति भागेऽतिव्याप्तिः। तत्र प्रकृतहेतुतावच्छेदकावच्छिन्नविशिष्टहेतुत्वप्रतिपादकत्वरूपहेतुत्वसत्त्वेन तत्प्रतीतेर्हेतुविषयकत्वघटिताऽभावकूटवत्त्वाभावादतः प्रतिज्ञाऽविषयकप्रतीतिविषयतावच्छेदकत्वावच्छिन्नभेदहेत्वविषयकप्रतीतिविषयतावच्छेदकत्वावच्छिन्नभेदकूटवद्धर्मवत्त्वमेव प्रतिज्ञाद्यघटकत्वमित्यनेन विवक्षणीयम्। तथा चाऽसम्भववारणाय सत्यन्तमवच्छेदकविशेषणम्।

योगितावच्छेकत्वरूपविशेषणदलानुपादाने तु अग्रिमग्रन्थासङ्गतिरित्याह। विशेष्यदले इति।

उभयघटकभागद्वयाघटितत्वदले। उपपत्त्या। निर्वाहे। एवकारव्यवच्छेदद्यमाह। **तद्घटकेति।** उभयघटकेत्यर्थः। **वैयर्थ्यादिति। निष्प्रयोजन**कत्यादित्यर्थः। उभयघटकभागपर्यन्ताऽनिवेशेऽतिव्याप्तिरपि नास्तीत्याह। **प्रतिज्ञाघटकभागेति। प्रतिज्ञात्वावच्छिन्नभेदानुयोगितावच्छेदकत्वेनेति।** प्रतिज्ञाघटकतावच्छेदकत्वादिति भावः। एवं हेत्वेकदेशप्रतिज्ञावृत्तिसमुदायत्वस्य हेतुत्वावच्छिन्नभेदानुयोगितावच्छेदकत्वेन हेतुघटकतावच्छेदकत्वाद् हेतुघटकतानवच्छेदकत्वदलेन वारणसम्भवादित्यपि बोध्यम्। एवमग्रेऽपि। हेत्वेकदेशप्रतिज्ञावृत्तिसमुदायत्वस्य प्रतिज्ञात्वावच्छिन्नभेदानुयोगितावच्छेदकतया एवं प्रतिज्ञैकदेशहेतुवृत्तिसमुदायत्वस्य हेतुत्वावच्छिन्नभेदानुयोगितानवच्छेदकतया प्रतिज्ञाद्यघटकतानवच्छेदकत्वस्याव्याहततयाऽतिव्याप्तिवारणाय घटकभागनिवेशस्य प्रयोजनमाह **मिलितेति विवक्षणीयत्वादिति।** तथा च प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति हेतुत्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति उदाहरणत्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे सति उपनयत्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वे निगमनत्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदको यो धर्मः तद्भिन्नत्वं प्रतिज्ञाद्यघटकत्वम्। **नातिव्याप्तिरिति।** अन्यतमत्वादेर्व्यासज्यवृत्तित्वाभावादिति भावः।

केचित्त्विति। प्रतिज्ञादीति आदिना हेत्वादेः परिग्रहः। तथा च

प्रतिज्ञाद्येकदेशाविषयकप्रतीतिविषयत्वस्य प्रतिज्ञात्वाश्रयतदेकदेशान्तरे सत्त्वेन तदाश्रयसमुदायस्य तादृशप्रतीत्यविषयत्वाऽसम्भवेऽपि प्रतिज्ञात्वाद्याश्रयतत्तदेकदेशवृत्तिधर्मे सत्यन्तनिर्वाहः। प्रतिज्ञादिपदस्य पर्याप्त्यतिरिक्तस्वरूपसम्बन्धेन प्रतिज्ञात्वाद्याश्रयपरत्वात्।

सत्यन्तस्थस्वपदेन प्रतिज्ञात्वादेरप्युपादातुं शक्यतयाऽसम्भव इति विशेष्यदलम्। तच्च प्रतिज्ञाद्येकदेशमात्रवृत्तिपर्वतपदत्वादावेव, तदाश्रयमात्रविषयकप्रतीतेस्तत्समुदायरूपप्रतिज्ञाद्यविषयकत्वस्याऽव्याहतत्वात्। न तु प्रतिज्ञात्वादेः, एकदेशमात्रविषयकप्रतीतिविषयतायामतिप्रसक्तस्य तस्याऽवच्छेदकत्वाऽसम्भवात्। न चैकदेशमात्रविषयिकाया अपि प्रतीतेः प्रतिज्ञात्वाश्रयाऽविषयकत्वासम्भवेन तदाश्रयसमुदायाऽविषयकत्वविवक्षणे एकैकप्रतिज्ञादिविषयिकाया अपि प्रतीतेः प्रतिज्ञात्वाश्रयाऽपरव्यक्त्यविषयकत्वेन तदाश्रयसमुदायाविषयकतया एकैकप्रतिज्ञादिव्यक्तिपर्याप्तप्रतिज्ञात्वादिकं तादृशप्रतीतिविषयतावच्छेदकमेव तदनतिप्रसक्तत्वादिति वाच्यम्। स्वाश्रयाविषयकप्रतीत्यविषयता यादृशप्रतिज्ञात्वाद्याश्रये तादृशप्रतिज्ञात्वाद्याश्रयवर्णसमुदायाऽविषयकप्रतीतिविषयतावच्छेदकत्वविवक्षया प्रतिज्ञादिविषयकसकलप्रत्ययानामेव तादृशसमुदायविषयकत्वेनाऽदोषात्।

प्रतिज्ञाद्यघटकतावच्छेदकत्वं स्वाश्रयाऽविषयकप्रतीत्यविषयप्रतिज्ञाकत्वे सति प्रतिज्ञाऽविषयकप्रतीतिविषयतावच्छेदकत्वम्। **स्वं** पर्वतपदत्वादि। अत्र हेतुत्वादेः। प्रतिज्ञाघटकतावच्छेदकत्ववारणाय सत्यन्तम्। स्वपदेन प्रतिज्ञात्वस्याप्युपादातुं शक्यतया प्रतिज्ञात्वस्य तथात्ववारणाय विशेष्यदलम्। एवं स्वाश्रयाऽविषयकप्रतीत्यविषयहेतुकत्वे **सति** हेत्वविषयकप्रतीतिविषयतावच्छेदकत्वं हेतुघटकतावच्छेदकत्वं बोध्यम्। एवमुदाहरणादिघटकतावच्छेदकत्वं बोध्यम्। तथा च तत्तद्धर्मभेदकूटधर्मवत्त्वमेव प्रतिज्ञाद्यघटकत्वमुपसंहरिष्यति। अत्र सत्यन्तमनिवेश्यविशेष्यदलमात्रनिवेशेऽसम्भवो वाच्यः, स च विशेष्यदलस्य प्रतिज्ञादिपञ्चविषयकत्वाभावकूटवत्प्रतीतिविषयतावच्छेदकत्वार्थकत्वे न सम्भवति, पर्वतपदत्वादेरेव प्रतिज्ञादिपञ्चविषयकत्वाभावकूटवत्प्रतीतिविषयतावच्छेदकत्वार्थकत्वेन तद्भिन्नत्वस्य प्रतिज्ञात्वादावक्षतत्वादित्यतस्तादृशार्थनिराकरणायाऽतिव्याप्तिमाह।

अवच्छेदकत्वं चेहानतिरिक्तवृत्तित्वमेव-न तु स्वरूपसम्बन्धविशेषः। तेन प्रतिज्ञात्वादिना तदेकदेशमात्रविषयकज्ञानविषयतायां प्रतिज्ञात्वादेस्तथाविधावच्छेदकत्वसत्त्वेऽपि न क्षतिः। तथाविधयत्किञ्चिद्ज्ञानीयविषयतात्वावच्छिन्नाऽनतिरिक्तवृत्तित्वमिह विवक्षणीयम्। तेन प्रतिज्ञादिघटकसकलवर्णेष्वेव प्रतिज्ञाद्यविषयकप्रतीतिविषयत्वसत्त्वेन तादृशविषयतासामान्यशून्याऽप्रसिद्धावपि स्वव्यापकतादृशविषयतात्वावच्छिन्नकत्वस्य प्रतिज्ञात्वादिसाधारणत्वेऽपि न क्षतिरिति वदन्ति। तदसत्। एतदपेक्षयोक्तप्रतिज्ञाद्यन्यतमत्वस्यैव लघुत्वात्। तत्राऽनिर्भरस्य निर्बीजतापातात्। एतेन प्रतिज्ञादिघटकतावच्छेदकत्वं स्वसमानाधिकरणस्वानधिकरणवृत्तिप्रतिज्ञात्वादिकत्वमित्यपि हेयम्। स्वत्वाननुगमेन तादृशं स्वं यद्यद्विशिष्य तावतामनन्तभेदानां निवेशनीयतया महागौरवात्।

प्रतिज्ञाहेत्वादिसमुदायवारणायोभयेत्यादि। उभयघटकभागद्वयाऽवृत्तिधर्मवत्त्वार्थकम्। तथा च प्रतिज्ञादिघटकतानवच्छेदकत्वे सति उभयघटकभागद्वयावृत्तिर्यो धर्मस्तद्वत्त्वं दलद्वयार्थः। प्रतिज्ञाद्येकैकघटकभागद्वयस्यापि यत्किञ्चिदुभयघटकत्वादसम्भव इत्यतः प्रतिज्ञाहेतुचतुष्टयस्य विशिष्योभयपदार्थतामाह। उभयञ्चेति। इति विशिष्य वक्तव्यमित्यग्रिमेणाऽन्वयः। इति इति रीत्या। प्रतिज्ञाहेत्वाद्योरपि प्रतिज्ञाहेतूभयत्वादिना न घटकत्वांशे विशेषणता, तादृशोभयघटकभागाप्रसिद्धेः, किन्तु प्रतिज्ञात्वहेतुत्वादिना, तथा च प्रतिज्ञाघटको

सत्यन्तमनिवेश्येति। स्वाश्रयाविषयकप्रतीत्यविषयप्रतिज्ञादिकत्वे सतीत्यन्यतमनिवेश्येत्यर्थः। **तत्र**-धूमादिति भागे। **हेत्वविषयकत्वघटिताभावकूटवत्त्वभावादिति।** तादृशाभावकूटवती या प्रतीतिस्तद्विषयतावच्छेदकभिन्नत्वसत्त्वादिति भावः। अतः। अतिव्याप्तिवारणायेति यावत्। **विवक्षणीयमिति। तथा** च प्रतिज्ञाघटकधूमादिति भागवृत्तिहेतुत्वे प्रतिज्ञाऽविषयकप्रतीतिविषयतावच्छेदकत्वविरहप्रयुक्ततादृशभेदकूटवत्त्वविरहेण नोक्तातिव्याप्तिः। **तथा च। विवक्षिते च। असम्भवेति।** प्रतिज्ञात्वादेर्हेत्वाद्यविषयकप्रतीतिविषयतावच्छेदकत्वादिति भावः। **अवच्छेदकविशेषणमिति।** तथा च स्वाश्रयाविषयकप्रतीत्यविषयप्रतिज्ञाकत्वे सति प्रतिज्ञाऽविषयकप्रतीतिविषयतावच्छेदकं यद्यत्तद्भेदकूटवत्त्वे सति इत्यादिक्रमेण भेदकूटवत्त्वं

उभयं च प्रतिज्ञाहेतू–हेतूदाहरणे–उदाहरणोपनयौ–उपनयनिगमने इति विशिष्य वक्तव्यमिति।

यो भागःयश्च हेतुघटकस्तदुभयाघटितत्वमिति क्रमेणाऽघटितत्वचतुष्टयं निवेशनीयम्। प्रतिज्ञाहेत्वाद्येकदेशघटितसमुदायस्य वारणाय घटकभागनिवेशनम्। प्रतिज्ञादिघटकत्वं चैकदेशसाधारणं प्रतिज्ञात्वाद्याश्रयत्वम्, तथा च प्रतिज्ञात्वाश्रयहेतुत्वाश्रयोभयावृत्तित्वादिरूपविशेषणचतुष्टयं धर्मविशेषणं पर्यवसितम्।

न चैवं धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादौ न्यायघटकप्रतिज्ञायामव्याप्तिः, तस्या हेतुलक्षणाक्रान्तभागघटितत्वात्। तद्व्यावृत्तस्य पूर्वोपदर्शितस्य हेतुत्वस्य निवेशेऽपि निगमनेऽयं पदानुषङ्गपक्षे तत्र, उपनये चाऽव्याप्तिदुर्वारैव, तस्योपनयघटकेनाऽयंपदेन, उपनयस्य च तद्घटकेन तेन घटितत्वादिति वाच्यम्। अनुषङ्गपक्षे उपनयघटकभागनिगमन-घटकभागद्वयाघटितत्वशरीरे उपनयाघटकत्वेन निगमनघटकस्य, निगमना-घटकत्वेन चोपनयघटकस्य भागस्य, विशेष्यवाचकपदातिरिक्तत्वेन वा

प्रतिज्ञाद्यघटकत्त्वं निर्वाच्यमिति भावः। **प्रतिज्ञाद्येकदेशेति**। पर्वतपदेत्यर्थः। **तदेकदेशान्तरे**। वह्निमत्पदे। **तदाश्रयसमुदायस्य**। वह्निमत्पदघटितसमुदायस्य। **तादृशेति**। स्वाश्रयविषयकेत्यर्थः। **तत्तदेकदेशस्य**। पर्वतपदस्य। **तत्तदेकदेशाविषयकेति**। पर्वतपदाविषयकेत्यर्थः। **तत्तदेकदेशवृत्तिधर्मे**। पर्वतपदत्वे। तत्तदेकदेशस्य प्रतिज्ञात्वाश्रयत्वं न प्रतिज्ञात्वपर्याप्त्यधि-करणत्वमित्याह प्रतिज्ञादिपदस्येति।

स्वाश्रयविषयकप्रतीत्यविषयप्रतिज्ञादिकत्वस्यैव प्रतिज्ञादिघटकता-वच्छेदकत्वेऽसम्भवमाह। **सत्यन्तस्थस्वपदेनेति**। **प्रतिज्ञात्वादेरपीति**। आदिना हेतुत्वादेः परिग्रहः अपिना पर्वतपदत्वादेः समुच्चयः। **उपादातुं शक्यतयेति**। गृहीतुं शक्यतयेत्यर्थः। तथा च प्रतिज्ञात्वमपि प्रतिज्ञादिघटकतावच्छेदकतयेति यावत्। **असम्भव** इति। प्रतिज्ञाद्यघटकत्वविरहादिति भावः। **तच्चेति**। विशेष्यदलं चेत्यर्थः। प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वं चेति यावत्। **पर्वत पदत्वादावेवेति** उपपादयति। **तदाश्रयमात्रविषयकप्रतीतेरिति**। पर्वतपदत्वाश्रयमात्रविषयकप्रतीतेरित्यर्थः। मात्रपदेन वह्निमत्पदव्यावृत्तिः पर्वत

प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकज्ञानपञ्चकान्यतमज्ञान-जनकवाक्यत्वमिति केचित्।

भागद्वयस्य विशेषणीयत्वात्। अयं तस्मादित्यादिभागस्य च सत्यन्तेनैव वारणात्। स्वानाश्रयान्तरितभागद्वयवृत्त्यन्यत्वेन च धर्मो विशेषणीयः। तेन हेत्वाद्यंश-परित्यागेन प्रतिज्ञोदाहरणसमुदाये न्यायान्तर्गते नातिप्रसङ्गः। वस्तुतस्तु प्रतिज्ञाहेतू इत्यादौ हेत्वादिपदं प्रतिज्ञाद्यतिरिक्तपरम्, तथाचोदाहरणादेः प्रतिज्ञाद्यतिरिक्तत्वान्न दोषः। प्रतिज्ञाद्यतिरिक्तघटकत्वं च प्रतिज्ञाद्येकदेशव्यावृत्तं प्रतिज्ञात्वाद्यनाश्रयत्वमेव पर्यवसितमिति दिक्।

मूलस्थं शाब्दज्ञानजनकशाब्दज्ञानान्तं अन्यतमत्वेनाऽनुगतरूपेणावयव-प्रतिपाद्यतत्तद्विशिष्टार्थविषयकशाब्दबोधपरम्, अतो नाऽननुगमः। तादृशशाब्द-बोधजनकानां वाक्यानाम् अन्यतमत्वेनाऽनुगमे व्यासज्यवृत्तिधर्मावच्छिन्ना-नुयोगिताकान्योन्याभावानभ्युपगमे पूर्वोपदर्शितानुपपत्तिप्रसङ्गात्, शाब्दबोधाना-मन्यतमत्वेनोपात्तुं युक्तत्वादित्यभिप्रायेण मूलोक्तावयवलक्षणमन्यथाव्याचक्षाणानां केषाञ्चिन्मतमाह-प्रतिज्ञादिप्रतिपाद्येति। विशिष्य निवेश्यानां विशिष्टार्थविशेषाणां साध्यविशिष्टपक्षादीनां परिचायकमात्रमेतत्। न तु प्रतिज्ञादिप्रतिपाद्यत्वेन तेषां निवेशः, विशिष्टार्थविशेषमनन्तर्भाव्य प्रतिज्ञात्वादीनां दुर्वचतया तेषां विशिष्य निवेशनस्यावश्यकत्वेन तत्तद्विशिष्टार्थबोधजनकवाक्यप्रतिपाद्यत्वेन तत्तद्विशिष्टार्थनिवेशस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात्। एतत्सूचनायैव

इत्याकारकप्रतीतेरिति यावत्। **तत्समुदायरूपेति**। पर्वतो वह्निमानिति समुदायरूपेत्यर्थः। **अव्याहतत्वात्**। सत्त्वात्। तथा च पर्वतपदत्वादौ प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वस्य सत्त्वादिति भावः। एवकारेण प्रतिज्ञात्वस्य व्यवच्छेदः तदेवाह। **नत्विति**। **प्रतिज्ञात्वादेरिति**। प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वमिति शेषः। तत्र हेतुमाह। **एकदेशमात्रविषयकप्रतीतिविषयतायां**। पर्वत इत्यादिप्रतीतिविषयतायां। **तस्य**। प्रतिज्ञात्वस्य। प्रतिज्ञाद्यविषयकेत्यनेन सामान्यतः। प्रतिज्ञात्वाश्रयाविषयकत्वं विवक्षणीयं, प्रतिज्ञात्वाश्रयसमुदायाविषयकत्वं वा। **आद्ये न चेति** तथा च पर्वतपदत्वादावपि प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वं दुर्घटमिति भावः।

तत्तदित्युक्तम्।

न चाऽत्र नानावयवजन्यसमूहालम्बनबोधं प्रतिज्ञाहेत्वादिजन्यविशिष्टार्थबोधं चादाय तज्जनकसमुदायेऽतिव्याप्तिः, तत्तद्विशिष्टार्थबोधनिष्ठतत्तदेकदेशबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकताश्रये अवयवैकदेशे चाऽतिव्याप्तिः'। तत्तद्विशिष्टार्थविषयकशाब्दबुद्धित्वावच्छिन्नजन्यता अन्यतमत्वेनोपादाय तत्तन्निरूपितजनकतावच्छेदकधर्मपर्याप्त्यधिकरणताया निवेशनीयत्वात्। तादृशधर्मः पर्वतो वह्निमानित्यादिवाक्यत्वमेव, वाक्यत्वस्य व्यासज्यवृत्तित्वान्नैकदेशाऽतिव्याप्तिः। तादृशशाब्दबुद्धित्वावच्छिन्नत्वं च तादृशशाब्दबुद्धित्वपर्याप्तावच्छेदकताकत्वम्। अतः प्रतिज्ञाहेतुसमुदायादेः साध्यविशिष्टपक्षावगाहिशाब्दत्वघटितधर्मावच्छिन्नजनकत्वेऽपि नातिप्रसङ्गः। वाक्यज्ञानस्य जनकतामते तु तादृशजनकतायां विषयितासम्बन्धेन यादृशधर्मावच्छिन्नं-यादृशधर्मावच्छिन्नविषयकत्वं वाऽवच्छेदकं तादृशधर्मपर्याप्त्याश्रयत्वं विवक्षणीयमिति नाऽसम्भवः। तादृशोऽपि धर्मः पर्वतो वह्निमानित्यादिवाक्यत्वमेव।

द्वितीये त्वाह। **तदाश्रयेति**। प्रतिज्ञात्वाश्रयेत्यर्थः। **प्रतिज्ञादिपर्याप्तप्रतिज्ञात्वादिकं तादृशप्रतीतिविषयतावच्छेदकमेवेति**। तथा च सम्भवस्तदवस्थ एवेति भावः। **स्वाश्रयाविषयकेति** तथा च स्वविशिष्टप्रतिज्ञात्वविशिष्टत्वम्। स्ववैशिष्ट्यञ्च स्वाश्रयविषयकप्रतीत्यविषयत्वसम्बन्धेन प्रतिज्ञात्ववैशिष्ट्यञ्च स्वाश्रयवर्णसमुदायाविषयकप्रतीतिविषयतावच्छेदकसम्बन्धेन। **न क्षतिः** नाव्याप्तिः **तथाविधेति**। प्रतिज्ञाद्यविषयकेत्यर्थः। **इह** प्रतिज्ञाद्यविषयकप्रतीतिविषयतावच्छेदकत्वमित्यत्र। **अप्रसिद्धावपीति**। प्रतिज्ञाघटकवर्णेषु प्रतिज्ञाद्यविषयकप्रतीतिविषयत्वोपपादनेन तद्भिन्नेषु तत्सत्त्वेन च जगन्मात्रस्य तथात्वात्। **एतेन**। उक्तप्रतिज्ञाद्यन्यतमत्वस्य लघुत्वेन। **स्वं** पर्वतपदत्वादिः। असम्भववारणाय स्वानधिकरणेति। **महागौरवादिति**। अत्रोभयघटकभागद्वयाघटितत्वमित्यत्र घटकभागांशवैयर्थ्यमनुक्त्वा केवलगौरवप्रतिपादनमसङ्गतं तथाहि अग्रे प्रतिज्ञाहेत्वाद्येकदेशघटितसमुदायेऽतिव्याप्तिवारणार्थं घटकभागनिवेशः, परन्तु एतादृशप्रतिज्ञाघटकतावच्छेदकत्वस्य तादृशसमुदायत्वे सत्वात्तत्रातिव्याप्तिर्न सम्भवति, इति उभयाघटितत्वनिवेशनमेव सम्यगिति तु विभावनीयम्।

अथाऽऽकाङ्क्षादिमत्पदकदंबत्वरूपवाक्यत्वमेव व्यासज्यवृत्तितदवच्छिन्नविषयकज्ञानत्वेन च न शाब्दबुद्धिजनकत्वं, समूहत्वज्ञानस्याऽनुपयुक्तत्वात्। किन्वानुपूर्वीविशेषात्मकाकांक्षावच्छिन्नविषयकज्ञानत्वेनैव तथात्वम्, आनुपूर्वी विशेषाश्चैकवर्णनिष्ठापरवर्णानन्तर्यरूपो न व्याज्यवृत्तिरिति एकदेशेऽतिप्रसङ्गो दुर्वारः। न च तादृशजनकतावच्छेदकीभूतविषयितानिरूपकवर्णसमुदायत्वमेव विवक्षणीयमतो नातिप्रसङ्ग इति वाच्यम्। तत्त्वप्रतिज्ञादिव्यक्तिभिन्नप्रतिज्ञादि-

---

प्रतिज्ञाहेत्वादिसमुदायेति। आदिना हेतूदाहरणसमुदाय-उदाहरणोपनयसमुदाय-उपनयनिगमनसमुदायानां परिग्रहः। अनुपदं वक्ष्यति **विशिष्य वक्तव्यमिति।** विशिष्य कथनस्य प्रयोजनमाह। **प्रतिज्ञादिघटकैकघटकभागद्वयस्यापीति।** पर्वतः वह्निमानिति भागद्वयस्यापीत्यर्थः। **यत्किञ्चिदुभयेति।** पर्वतः वह्निमानित्युभयेत्यर्थः। **असम्भव** इति। तद्घटितत्वस्य प्रतिज्ञायामसत्त्वादिति भावः। एवं हेत्वादावपि। ननु प्रतिज्ञाहेत्वाद्येकदेशसमुदायस्य हेतुत्वपर्याप्त्याश्रयत्वाभावात् घटकभागनिवेशो व्यर्थ इत्यत आह। **प्रतिज्ञादिघटकत्वं चेति। एकदेशसाधारणमिति।** पर्याप्त्यतिरिक्तसम्बन्धेनेत्यर्थः।

एवम्। उभयघटकभागद्वयाऽघटितत्वनिवेशे। **तस्याः।** धूमाद्वह्निमतःसधर्मा पर्वतो वह्निमानिति प्रतिज्ञायाः। **हेतुलक्षणाक्रान्तेति।** हेतुविशिष्टहेतुत्वविषयकबोधजनकत्वरूपलक्षणाक्रान्तेत्यर्थः। **भागेति।** धूमादिति भागेत्यर्थः। **तद्व्यावृत्तस्येति।** प्रतिज्ञाघटकधूमादिति भागावृत्तेरित्यर्थः। **पूर्वोपदर्शितस्येति।** पक्षविशेषणतापन्नसाध्यान्वितस्वार्थबोधजनकत्वे सति हेतुविशिष्टहेतुत्वविषयताबहिर्भूतविषयताशून्यबोधजनकवाक्यत्वरूपस्येत्यर्थः। **तत्र।** निगमने। **तस्य।** निगमनस्य। **तद्घटकेन।** निगमनघटकेन। **तेन।** अयंपदेन। **विशेषणीयत्वादिति।** तथा च उपनयाऽघटको यो निगमनघटको भागः, यश्च निगमनाघटक उपनयघटकोभागस्तदुभयावृत्तिधर्मत्वस्य विवक्षणादित्यर्थः। **स्वानाश्रयेति।** स्व-प्रतिज्ञोदाहरणवृत्तिसमुदायत्वम्। स्वानाश्रयाऽन्तरितत्वं च स्वानाश्रयप्रागभावध्वंसाधिकरणवृत्तित्वम्। **नातिप्रसङ्ग** इति। **स्वं**-प्रतिज्ञोदाहरणसमुदायत्वं। तदनाश्रयेण हेतुनाऽन्तरितं यत्प्रतिज्ञोदाहरणात्मकभागद्वयं तद्वृत्तित्वात्तादृशसमुदायत्वस्येति भावः। अत्र चोपनयाऽघटकं सन्निगमनघटकं

यत्, यच्च निगमनाऽघटकं सदुपनयघटकमित्यत्रोपनयघटकमित्यस्य वैयर्थ्यम्, उपनयघटकं निगमनघटकं यत् यच्च निगमनाऽघटकमित्यस्यैव सम्यक्त्वात्। एवं स्वानाश्रयान्तरितेत्याद्यर्थविवेचने चातिगौरवमत आह **वस्तुतस्त्विति। दिगिति।** तथा च प्रतिज्ञात्वाद्याश्रयो यः यश्च प्रतिज्ञात्वाद्यना-श्रयस्तदुभयवृत्तिभिन्नत्वमर्थः।

दीधितिकृता जनकत्वान्तस्य परिचायकतया प्रतिज्ञाजन्यबोधान् विशिष्य निवेश्य वाक्यानामेव "अनुगमकेन" अन्यतमत्वेन निवेशः कृतः। ये तु बोधानामेवाऽन्यतमत्वेन निवेशं वदन्ति तन्मतमवतारयति। **मूलस्थेति।** दीधितिकृन्मतं खण्डयति। **तादृशेति** साध्यवत्पक्षविषयकेत्यर्थः। **पूर्वोपदर्शितानुपपत्तिप्रसङ्गादिति।** असम्भवप्रसङ्गादित्यर्थः। प्रतिज्ञादिभिन्नत्वस्य पर्वतपदे सत्त्वेन तद्भिन्नत्वस्य प्रतिज्ञायामसत्त्वादिति भावः। **एतत्।** प्रतिज्ञाप्रतिपाद्येति विशेषणम्। **तेषां** साध्यविशिष्टपक्षादीनां। **तद्विशिष्टार्थेति।** साध्यविशिष्टपक्षविषयकेत्यर्थः। **वाक्यप्रतिपाद्यत्वेनेति।** वाक्यजन्यबोधविषयत्वेनेत्यर्थः। **तत्तद्विशिष्टार्थनिवेशस्येति।** साध्यविशिष्टपक्षादिनिवेशस्येत्यर्थः।

न चेति। अस्याऽतिव्याप्तिद्वयेन सहाऽन्वयः। **अतिव्याप्तिरिति।** तादृशसमुदायजन्यबोधस्यापि तादृशान्यतममध्ये प्रवेशात्। **अथ** केवलप्रतिज्ञाद्यर्थ-विषयकज्ञानव्यक्तीस्तत्त्वेनोपादाय तादृशज्ञानपञ्चकान्यतमजनकत्वनिवेशान्नैष-दोष इत्यतो विभिन्नानुपूर्वीकप्रतिज्ञादिज्ञानजन्यज्ञानानामेकोपादानेऽन्यानुपूर्वीक-ज्ञाने तदजनकतयाऽव्याप्तिः, सकलोपादाने तु अन्यतमशरीरे गौरवमिति दोषस्य स्फुटतयोपेक्ष्य स्थलान्तरे दोषमाह। **अवयवैकदेशे चेति। अन्यतमत्वेनोपादायेति। अत्रेदं बोध्यम्।** तादृशबोधपञ्चकान्य-तमबोधनिष्ठ-जन्यतानिरूपितजकतावच्छेदकीभूत-यत्किञ्चिद्ज्ञानीयविषयता-श्रयवर्णत्वव्यापकसमुदायत्वघटकीभूतयत्किञ्चिद्ज्ञाने स्वानवच्छेदकीभूत-विषयिताविशिष्टतादृशजनकताशून्यत्वनिवेशेन प्रतिज्ञाहेतुसमुदायेऽतिव्याप्ति-वारणेऽपि धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यत्र प्रतिज्ञार्थविषयकबोधनिष्ठ-पर्वतधर्मिकधूमज्ञानज्ञाप्याऽलोकप्रकारकबुद्धित्वावच्छिन्नजन्यतामादाय धूमादालोकवान्पर्वत इति भागेऽतिव्याप्तिः, एवं वह्निव्याप्यधूमवान-यमित्युपनयजन्यबोधनिष्ठजन्यतानिरूपितजनकतामादाय धूमवांश्चायमिति

घटकवर्णानामपि तादृशसमुदायघटकतया क्वचिदपि अवयवव्यक्तौ तादृशसमुदायत्वापर्याप्तेः प्रत्येकमवयवव्यवहारानुपपत्तेः। मैवम्। तादृश-बोधजनकतावच्छेदकीभूत यत्किञ्चिद्ज्ञानीयविषयितानिरूपकवर्णसमुदायत्वस्य विवक्षणीयत्वात्। तादृशं च ज्ञानं तथाविधजनकताद्वयशून्यत्वेन विवक्षणीयम्, तेन प्रतिज्ञाहेत्वादिसमुदाये नातिव्याप्तिः। न चैवं हेत्वर्थप्रतिपादकभाग-

---

वाक्येऽतिव्याप्तिरतस्तादृशबोधेऽन्यतमत्वं विहाय तत्तद्विशिष्टार्थविषयकबुद्धित्वा-वच्छिन्नजन्यताऽन्यतमत्वेन निवेशनीयेति ध्येयम्। **निवेशनीयत्वादिति।** तथा च प्रतिज्ञैकदेशविषयकशाब्दबुद्धित्वावच्छिन्नजन्यताम्—उपनयार्थैक-देशविषयकशाब्दबुद्धित्वावच्छिन्नजन्यतां चादाय न तत्तदेकदेशेऽतिव्याप्तिः। **अतः** जन्यतायां तादृशावच्छेदकताकत्वनिवेशात्। **नातिप्रसङ्ग** इति। पर्वतधर्मिकधूमज्ञानज्ञाप्यवह्निप्रकारकशाब्दबोधनिष्ठजन्यतायाः साध्यविशिष्टपक्षा-वगाहिशाब्दत्वपर्याप्तावच्छेदकताकत्वाभावादिति भावः। ननु वाक्यज्ञानस्य जनकतामते प्रतिज्ञादिविषयकज्ञानत्वमेव जनकतावच्छेदकं, तत्पर्याप्त्यधिकरण-त्वस्य वाक्येऽ सत्वादसम्भव इत्यत आह। **वाक्यज्ञानस्येति। जनकताया-मिति।** तत्तद्विशिष्टार्थविषयकशाब्दबुद्धित्वपर्याप्तावच्छेदकताका ऽन्यतमजन्यता-निरूपितजनकतामित्यर्थः।

तथा च तत्तद्विशिष्टार्थविषयकशाब्दबुद्धित्वपर्याप्तावच्छेदकताका **या** जन्यताऽन्यतमजन्यता तत्तन्निरूपितजनकतावच्छेदकविषयतानिरूपकता-वच्छेदकधर्मपर्याप्त्यधिकरणत्वमवयवत्वं फलितम्।[१९]

पदकदम्बत्वरूपेति। पदसमूहत्वरूपेत्यर्थः। **तथात्वं।** जनकत्वम्। **एकदेशे।** एकैकवर्णे। **अवयवव्यवहारानुपपत्तिरिति।** अव्याप्तिरित्यर्थः। **तादृशबोधजनकतेति।** तत्तद्विशिष्टार्थबुद्धित्वावच्छिन्नजन्यतान्यतम-जन्यतानिरूपितजनकतेत्यर्थः। यत्किञ्चित्त्वनिवेशेन प्रत्येकमवयवव्यवहारोप-पत्तिः। न च तादृशबोधजनकताश्रयत्किञ्चिद्ज्ञानीयेत्ययेवोच्यतां किमवच्छेदकीभूतपदोपादानेनेति वाच्यम्। तादृशान्यतमबोधस्वरूपयोग्यावय-वसङ्ग्रहाय तदुपादानात्। नन्वेवमपि पर्वतो वह्निमानिति प्रतिज्ञाविषयकधूमादिति हेतुविषयकसमूहालम्बनशब्दज्ञाननादाय प्रतिज्ञाहेतुस[२०]मुदायेऽतिव्याप्तिरत आह। **तादृशं च ज्ञानमिति।** जनकतावच्छेदकविषयिताश्रययत्किञ्चिद्ज्ञानमित्यर्थः।

घटितप्रतिज्ञाविशेषेऽव्याप्तिः तद्विषयकज्ञाने हेत्वर्थबोधकतानियमादिति वाच्यम्। व्याप्यव्यापकभावानापन्नजनकताद्वयशून्यताया निवेशनीयत्वात्। वस्तुतस्तु स्वानवच्छेदकविषयिताविशिष्टतादृशजनकतानाश्रयत्वं ज्ञाने विशेषणम्। स्वं जनकता।

प्रतिज्ञाहेतूभयादिविषयकज्ञानं च प्रतिज्ञार्थजनकतावच्छेदकीभूतहेत्वादिविषयिताविशिष्टतादृशजनकताश्रयः, एवं धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादिप्रतिज्ञामात्रविषयकज्ञानं च न तादृशविशिष्टजनकताश्रयः, तन्निष्ठहेत्वर्थबोधजनकतावच्छेदकविषयिताया अपि विशिष्टप्रतिज्ञार्थबोधजनकतायाम् अवच्छेदकत्वात्।

तथाविधजनकतेति। तत्तद्विशिष्टार्थविषयकबुद्धित्वावच्छिन्नजन्यताऽन्यतमजन्यतानिरूपितजनकतेत्यर्थः। **तेन** तथाविधजनकताद्वयशून्यत्वनिवेशेन। **नातिव्याप्तिरिति।** प्रतिज्ञाहेतूभयविषयकज्ञानस्य तथाविधजनकताद्वयशून्यत्वविरहादिति भावः। तथा च तथाविधजनकताविशिष्टतादृशजनकताशून्यत्वं तादृशज्ञाने विवक्षणीयमित्यर्थः। वैशिष्ट्यञ्च स्वाभाववद्वृत्तित्वस्वसामानाधिकरण्योभयसम्बन्धेन। **एवं।** तथाविधजनकताद्वयशून्यत्वनिवेशेऽपि। **प्रतिज्ञाविशेषे।** धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमानित्यत्र। **तद्विषयकज्ञाने।** प्रतिज्ञाविषयकज्ञाने। **नियमादिति।** तथाविधजनकताद्वयसत्त्वादिति यावत्। जनकतायां व्याप्यव्यापकभावानापन्नत्वं निवेश्य समाधत्ते। **व्याप्येति।** तथा च तथाविधजनकताविशिष्टं यत् तदन्यत्वं ज्ञाने निवेशनीयमित्यर्थः। जनकतावैशिष्ट्यञ्च स्वाश्रयत्व-स्वविशिष्टतथाविधजनकताश्रयत्वोभयसम्बन्धेन। स्ववैशिष्ट्यञ्च स्वव्यभिचारित्व-स्वाव्यापकत्वोभयसम्बन्धेन। स्वं-जनकता। तथाच प्रतिज्ञाहेतुविषयकसमूहालम्बनज्ञाने निरुक्तोभयसम्बन्धेन प्रतिज्ञाजनकताविशिष्टहेतुजनकतायाः सत्त्वान्न निरुक्तोभयसम्बन्धेन तथाविधजनकतावदन्यत्वम्। धूमाद्वह्निमतःसधर्मा पर्वतो वह्निमानिति ज्ञाने तथाविधप्रतिज्ञाजनकतायाः सत्त्वेऽपि हेतुजनकतायां तद्व्यभिचारित्वसत्त्वेऽपि तदव्यापकत्वविरहान्निरुक्तोभयसम्बन्धेन तथाविधजनकताविशिष्टान्यत्वमक्षतमेव।

यद्यपि पर्वतो वह्निमानिति प्रतिज्ञाविषयकज्ञानेऽपि विनिगमनाविरहेण प्रतिज्ञाज्ञानीयविषयतासमसंख्याजनकतानां सत्त्वात्, तथाविधजनकतायां

एतेन व्याप्यव्यापकभावानापन्नतथाविधजनकताद्वयशून्यत्वप्रवेशे-धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादिसमुदायेऽतिव्याप्तिः। तादृशसमुदाय-विषयकज्ञाननिष्ठप्रतिज्ञार्थबोधकत्वहेत्वर्थबोधजनकतयोर्व्याप्यव्यापकभावात्, व्याप्यव्यापकभावानापन्नतथाविधजनकताद्वयशून्यत्वादिति निरस्तम्।

व्याप्यव्यापकभावानापन्नत्वाऽनिवेशेऽसम्भव एव सम्भवति, तथापि निरुक्तसम्बन्धघटकजनकतावैशिष्ट्यस्य स्वव्यभिचारित्वसम्बन्धेन स्वाऽव्यापकत्वसम्बन्धेन वा निवेशेनैवाऽसम्भववारणसम्भवादुभयसम्बन्धेन जनकतावैशिष्ट्यनिवेशप्रयोजनं धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमानित्यादावव्याप्तिवारणमेव। स्वाश्रयत्व-स्वनिरूपिजन्यतावच्छदेक-धर्मावच्छिन्नजन्यतानिरूपितजनकताभिन्नजनकतावत्त्व एतदुभयसम्बन्धेन तथाविधजनकताविशिष्टान्यत्वोक्तावपि असम्भववारणसम्भवात्। तथा च पर्वतधर्मिकवह्निप्रकारकशाब्दत्वावच्छिन्नजन्यतानिरूपिता या पर्वतो वह्निमा-नित्यानुपूर्वीज्ञाननिष्ठा जनकता तस्यास्तद्ज्ञानीयविषयताभेदेन भेदेऽपि तासां सर्वासां पर्वतधर्मिकवह्निप्रकारकशाब्दत्वरूपैकधर्मावच्छिन्नकार्यता-निरूपितत्वात्। स्वाश्रयत्वसम्बन्धेन एतज्जनकतावैशिष्ट्यं पर्वतो वह्निमानिति ज्ञानेऽस्ति तज्जनकतानिरूपितजन्यतावच्छेदकधर्मावच्छिन्नजन्यतानिरूपित-जनकतावत्त्वविरहान्निरुक्तोभयसम्बन्धेन न तादृशजनकतावत्त्वमिति ध्येयम्। **निवेशनीयत्वादिति।** गौरवेण पर्याप्तावच्छेदकताकत्वनिवेशासम्भवादिति तत्त्वम्।

वस्तुतस्त्विति। वैशिष्ट्यञ्च सामानाधिकरण्यसम्बन्धेन। **तादृशजनकतेति।** तत्तद्विशिष्टार्थबुद्धित्वावच्छिन्नजन्यतान्यतमजन्यतानिरूपितजनकेत्यर्थः। तथा च स्वा[२१]नवच्छेदकविषयिताविशिष्टतादृशजनकताशून्ययत्किञ्चिद्ज्ञानीयत-त्तद्विशिष्टार्थबोधजन्यतान्यतमजन्यतानिरूपितस्वावच्छेदकविषयितानिरूपकवर्ण-समुदायत्वमिति समुदितार्थः। सर्वत्र स्वपदेनैकैव जनकतोपादेया। प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिं वारयति। **प्रतिज्ञाहेतूभयादिविषयकज्ञानं चेति।** तथा च **स्वं**-केवलप्रतिज्ञाज्ञाननिष्ठजनकता तदनवच्छेदिका हेतु**ज्ञान**विषयितातत्समानाधिकरणा या प्रतिज्ञाज्ञानजनकता तच्छून्यं ज्ञानं प्रतिज्ञामात्रविषयकं ज्ञानं "न तु प्रतिज्ञाहेतुसमुदायविषयकं ज्ञानं" तस्य

तादृशवाक्यविषयकज्ञानीयप्रतिज्ञाघटकहेतुसमानाकारकवाक्यविषयिताया विशिष्टप्रतिज्ञार्थबोधजनकतावच्छेदकत्वेऽपि प्रतिज्ञावाक्यविषयितानन्तःपातिन्या हेतुविषयितायास्तादृशजनकतानवच्छेदकत्वात्। यदि चोदासीनपदार्थविषयिता-नियतविषयिताकाऽवयवव्यक्तिः प्रामाणिकी तदा स्वानवच्छेदकविषयिता तथाविधजनकतावच्छेदकत्वेन विशेषणीया। तादृशावयवव्यक्तिविषयकज्ञानेऽ-वयवान्तरविषयितानैयत्यस्य प्रामाणिकत्वे त्वगतिरेवेति ध्येयम्। समानाकारक-प्रतिज्ञाद्वयात्मकसमुदायस्याऽवयवत्वपर्याप्त्याश्रयत्वमिष्टमेव, तस्याऽतथात्वे तद्वारणप्रकारोपि चिन्तनीयः। न्यायान्तर्गतत्वस्यापि निवेशनीयतया नोदासीन-वाक्यसाधारण्यमिति बोध्यम्।

तच्छून्यत्वविरहात्। तदीय प्रतिज्ञार्थबोधजन्यतानिरूपितजनकतावच्छेद-कविषयितानिरूपकवर्णसमुदायत्वस्य प्रतिज्ञाहेतुसमुदाये विरहान्नातिव्याप्तिः। प्रतिज्ञाविशेषेऽव्याप्तिं वारयति। **एवमिति।** तत्र प्रतिज्ञाघटकहेत्वर्थ-बोधजनकतावच्छेदकविषयितायाः प्रतिज्ञार्थबोधजनकानवच्छेदकत्व-विरहान्नाव्याप्तिरिति भावः। **अनुगमस्तु** विषयिताविशिष्टजनकतानाश्रयत्वम्। **वैशिष्ट्यञ्च** स्वानवच्छिन्नत्व स्वसामानाधिकरण्योभयसम्बन्धेन।

एतेन। वस्तुतस्तु इति कल्पादरेण। **व्याप्यव्यापकभावानापन्नेति।** स्वव्यभिचारीत्यर्थः। तथा च स्वाभाववद्वृत्तित्व-स्वसमानाधिकरणाभाव-प्रतियोगित्व-स्वसामानाधिकरण्य एतत्त्रितयसम्बन्धेन तादृशजनकताविशिष्ट-जनकताशून्यत्वं पर्यवसितार्थः। **तथाविधेति।** तत्तद्विशिष्टार्थबुद्धित्वा-वच्छिन्नजन्यताऽन्यतमजन्यतानिरूपितेत्यर्थः। यादृशप्रतिज्ञादिज्ञानमुदासीन-पदार्थविषयकमेव जायते तादृशप्रतिज्ञादिव्यक्तौ अव्याप्तिमाशङ्कते। **यदि चेति।** समाधत्ते **तदेत्यादि।** एवं च स्वानवच्छेदिका या तत्तद्विशिष्टार्थबोध-जनकतावच्छेदकविषयिता तद्विशिष्टतादृशजनकताशून्यत्वं ज्ञानविशेषणमित्यर्थः। असमानाकारकप्रतिज्ञाद्वये जन्यताभेदमते दोषाऽसक्तेः **समानेति।** एकप्रतिज्ञा प्रतिज्ञाद्वयं नेति प्रत्ययसम्भवेऽपि नावयव इति प्रत्ययाऽसम्भवात्। **तस्याऽतथात्वे।** प्रतिज्ञाद्वयस्याऽवयवत्वास्वीकारे। **चिन्तनीय इति।** प्रतिज्ञाद्वयस्याऽलक्ष्यतापक्षे तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वं देयमिति चिन्ताबीजम्।

अत्र च यत्किञ्चित्त्वनिवेशादननुगमोदुर्वारः। एवं प्रतिज्ञादिघटकहेत्वर्थप्रतिपादकभागेऽतिव्याप्तिः। एवमुदाहरणस्य वाक्यद्वयात्मकस्य सङ्गहाय तत्प्रतिपाद्यसाध्यविशिष्टधर्मिविषयकशाब्दत्वावच्छिन्नजन्यता तथाविधहेतुविशिष्टविषयकशाब्दत्वावच्छिन्नजन्यता वा ऽन्यतमजन्यतागर्भे निवेशनीया, तथा च तद्धटकप्रत्येकवाक्येऽतिव्याप्तिः। एतादृशार्थद्वयविषयकबुद्धित्वं च न समुदायस्यापि जन्यतावच्छेदकमिति तदवच्छिन्नैकजन्यतानिवेशाऽसम्भवात्। न च जनकता एवाऽन्यतमत्वेन निवेशनीयाः, तच्छरीरे चोदाहरणप्रतिपाद्यतत्तद्विशिष्टार्थबुद्धित्वावच्छिन्ननिरूपितजनकताद्वयं द्वित्वेन निवेशनीयम्। अत एकैकजनकताश्रयप्रत्येकभागाविषयकज्ञानमादाय न प्रत्येकभागेऽतिव्याप्तिरिति वाच्यम्।

ननु एतेनैव प्रतिज्ञाहेतुसमुदायातिव्याप्तिवारणे स्वानवच्छेदकेत्यादेर्वैयर्थ्यप्रसङ्ग इति चेद्—एतत्कल्प इष्टत्वात्।

अत्र च। लक्षणे च। ननु यत्किञ्चित्त्वं एकमात्रवृत्तिधर्मः तथा च स्वाधिकरणैकमात्रवृत्तित्वसम्बन्धेन ज्ञानत्वविशिष्टविषयिताया निवेशान्न दोष इत्यत आह। **एवमिति।** दोषद्वय जन्यतानिवेशपक्षे। **भागे।** धूमादालोकवान् पर्वतो वह्निमानिति प्रतिज्ञाघटकधूमादित्येकदेशे न तु पर्वतो वह्निमानिति प्रतिज्ञाघटकपर्वतपदे तन्मात्रज्ञानस्य तथाविधजनकतानाश्रयत्वादत उक्तं **हेत्वर्थेति।** नन्वत्र साध्यवत्पक्षविषयिताद्यन्यतमनिष्ठप्रयोज्यतानिरूपितप्रयोजकतावच्छेदकयत्किञ्चिद्विषयिताकवर्णसमुदायत्वं वाच्यं, तत्र च प्रकृतपक्षविशेषणतापन्नप्रकृतसाध्यान्वितहेतुविशिष्टहेतुत्वविषयितानिवेशान्न प्रतिज्ञाघटकहेत्वर्थबोधकभागेऽतिव्याप्तिः। हेतुविषयतायां व्याप्त्यादिविषयित्वानिरूपितत्वं देयम्, तेन निगमनघटकतस्मात्पदे नातिव्याप्तिरित्यत आह। **एवमिति। वाक्यद्वयात्मकस्य।** वाक्यचतुष्टयात्मकस्य। **तत्प्रतिपाद्येति** उदाहरणप्रतिपाद्येत्यर्थः। **तथाविधेति।** उदाहरणप्रतिपाद्येत्यर्थः। **तथा च।** तादृशजन्यताऽन्यतमगर्भे जन्यताद्वयस्यैव प्रत्रेशे च। **तद्धटकवाक्ये।** उदाहरणघटकवाक्यद्वये, यो यो धूमवान् स स वह्निमानिति वाक्यद्वये इति यावत्। **इदमुपलक्षणम्।** महानसं धूमवत्, महानसान्यद्धूमवत्, महानसं वह्निमत्, महानसान्यद्वह्निमच्चेति वाक्यचतुष्टयेऽपि बोध्या। **अतिव्याप्तिरिति।**

उभयभिन्नत्वस्य प्रत्येकमुभयस्मिन्सत्त्वात् उभयभिन्नभिन्नत्वस्योभयत्राऽसम्भवादन्यतमत्वेनोभयोपादानाऽसम्भवात्। व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदोपगमे तु तादृशान्यतमत्वाश्रयप्रत्येकजनकतामादायाऽतिप्रसङ्गस्य दुर्वारत्वात्। पूर्वकल्पे तु प्रतिज्ञाद्यघटकत्वविशेषणेनैव नातिप्रसङ्गावकाशः, यो यो धूमवानिति प्रत्येकवाक्यस्य वाक्यद्वयात्मकोदाहरणघटकत्वात्। न च वाक्यद्वयपर्याप्तमुदाहरणत्वं दुर्वचम्। स्वघटकयत्पदोपस्थाप्यधर्मिणि हेतुमत्त्वबोधकं यत्, यच्च तदनन्तरप्रयुक्तस्वघटकतत्पदोपस्थाप्यतादृशधर्मिणि साध्यवत्ताबोधकं वाक्यं तदुभयत्वस्यैव तथात्वात्। अत्रापि प्रतिज्ञाद्यघटकत्वं निवेशनीयमिति चेत्तर्हि गुरुशरीरस्य तादृशविषयितानिरूपकवर्णसमुदायत्वस्य निवेशापेक्षया निरुक्तोभयघटकभागद्वयाघटितत्वनिवेशनमेवोचितमित्यरुचिबीजमवधेयम्।

तादृशजन्यताऽन्यतमजन्यतानिरूपितजनकतावच्छेदकयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वस्य तत्र तत्र सत्त्वादिति भावः। ननु उदाहरणसमुदायनिरूपितैकजन्यतामादाय तादृशजन्यतानिरूपितजनकतावच्छेदकविषयताश्रयवर्णत्वव्यापकसमुदायत्वस्य उदाहरणसमुदाये एव सत्वान्नोदाहरणघटकप्रत्येकवाक्येऽतिव्याप्तिरित्यत आह। **तादृशेति।** उदाहरणप्रतिपाद्येत्यर्थः। **तदवच्छिन्नेति।** तादृशार्थद्वयविषयकबुद्धित्वावच्छिन्नेत्यर्थः **आशङ्कते। नचेति। जनकता एवेति।** एवकारेण जन्यताव्यवच्छेदः। **द्वित्वेन निवेशनीयमिति।** उदाहरणघटकवाक्यचतुष्टयविषयकप्रत्येकज्ञानचतुष्टयनिष्ठजनकतामादाय तन्निष्ठचतुष्टयावच्छिन्नभेदस्यैवान्यतमकुक्षौ निवेशात्तादृशजनकताचतुष्टयावच्छेदकविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वस्य सम्पूर्णे एव सत्वान्नैकदेशेऽतिव्याप्तिरिति भावः। यद्यपि द्वित्वेन निवेशेऽपि वाक्यचतुष्टयसमुदायत्वस्य सङ्ग्रहः। तथापि तथानिवेशे तस्य वाक्यद्वयवृत्तिसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वमिति चतुष्टयानुधावनम्। **अतः।** जनकताद्वयस्य द्वित्वेन निवेशात्। **उभयत्राऽसम्भवादिति।** व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताक एकदेशभेदानङ्गीकारादिति भावः। **दुर्वारत्वादिति।** अन्यतमत्वस्याऽव्यासज्यवृत्तितया पर्याप्तिविवक्षायाः असम्भवात्। ननु दीधितिकृन्मतेऽपि उभयघटकभागद्वयाऽघटितत्वस्य

ननु न्यायजन्यज्ञानस्यापि उपनयार्थव्याप्यवत्पक्षावगाहितया परामर्शरूपत्वात्परामर्शजनकवाक्यत्वमेव न्यायत्वं कुतो नोच्यते, एवं तादृशवाक्यघटकवाक्यत्वमेवाऽवयवत्वमस्तु किमुक्तगुरुतरन्यायतदवयव-लक्षणानुसरणेनेति प्रतिज्ञादिपञ्चकस्य विशिष्टैकार्थप्रतिपादकत्वाभिमानिनामाशङ्कां मूलकृन्निराकरोति। अत एवेति। तादृशलक्षणमुपेक्ष्य यथोक्तलक्षणानुसरणा-देवेत्यर्थः। परामर्शस्य। परामर्शमात्रस्य। परामर्शजनकस्य। परामर्शजनकमात्रस्य। मात्रपदात्पूर्वोपदर्शितन्यायतदवयवलक्षणघटकशाब्दबोधविशेषौ क्रमेण व्यवच्छेद्यौ।

एकदेशसाधारणतयाऽतिव्याप्तिर्दुवारेत्यत आह। **पूर्वकल्पे त्विति।** ननु उदाहरणत्वस्य दुर्वचतया कथं तदवच्छिन्नभेदानुयोगितावच्छेदकत्वमित्याशयेन शङ्कते। **न चेति वाक्यद्वयेति।** यो यो धूमवान् स स वह्निमान् इति वाक्यद्वयेत्यर्थः। **दुर्वचमिति।** इतरावयवानन्वितस्वार्थबोधकत्वं नोदाहरणत्वम् आत्माश्रयात्। अतो व्याप्यत्वाभिमतवन्निष्ठव्यापकत्वाभितसम्बन्धबोधकत्व-मुदाहरणत्वमिति मूलोक्तलक्षणं परिष्करोति। **स्वघटकेति** स्वं वाक्यं। **हेतुमत्त्वबोधकं यदिति।** वाक्यमित्युत्तरेणान्वयि। तच्च यो यो धूमवानित्याकारकं। **साध्यवत्ताबोधकं वाक्यमिति।** तच्च स स वह्निमानित्याकारकं। तथा च **तदुभयस्यैव।** तदुभयवाक्यत्वस्यैव। **तथात्वात्** उदाहरणत्वात्। तथा च स्वघटकयत्पदोपस्थाप्यतावच्छेदकदृष्टान्तता-वच्छेदकधर्मावच्छिन्नविशेष्यतानिरूपितप्रकृतहेतुप्रकारताशालिशाब्दबोध-जनकतावच्छेदकत्वं, तथाविधधर्मावच्छिन्नभेदावच्छिन्नविशेष्यतानिरूपितप्रकृत-हेतुप्रकारताशालिशाब्दजनकतावच्छेदकत्वोभयवत्प्रकारताश्रयानुपूर्वीघटक-वर्णत्वव्यापकतदाश्रयाधिकरणकालध्वंसोत्पत्त्यधिकरणक्षणध्वंसोत्पत्य-धिकरणक्षणो**त्पत्तिकध्वंस**प्रतियोगिक्षणवृत्तिवृत्ति स्वघटकतत्पदोपस्थाप्यता-वच्छेदकदृष्टान्ततावच्छेदकधर्मतदवच्छिन्नभेदावच्छिन्नविशेष्यतानिरूपित-प्रकृतसाध्यप्रकारताद्वयशालिशाब्दबोधजनकतावच्छेदकप्रकारताश्रयानु-पूर्वीघटकवर्णत्वव्यापकं समुदायत्वमित्यर्थः। **स्वं**—आनुपूर्वी। महानसत्व-चत्वरादिना भाने तु तादृशभेदानुयोगितावच्छेदकावच्छिन्नविशेष्यतानिवेश्या। यद्यपि प्रकृतहेतुविशिष्टतत्तदन्यप्रकृतसाध्यविशिष्टतत्तदन्यधर्मिविषयकसमूहा-लम्बनबोधीययावत्कारणतावच्छेदकयत्किंञ्चिद्विषयताश्रयवर्णत्वव्यापक-

धूमवानयमिति वाक्ये तदवयवे च न न्यायतदवयवलक्षणातिव्याप्तिः तेन परामर्शस्य तदवयवेन परामर्शजनकस्य जननात्।

यत्तु संक्षेपतः परामर्शप्रयोजकवाक्यत्वेन विशेषाभावात् सोऽपि न्याय एवेति, तन्न, कथायामाकाङ्क्षाक्रमेणाभिधानमिति

समुदायवाक्यस्येव प्रत्येकवाक्यस्यापि न्यायत्वमिष्टमेव, परामर्शप्रयोजकवाक्ये एव न्यायत्वव्यवहारात् तत्त्वस्य समुदायवत्प्रत्येकवाक्येऽपि सत्वात्। एवं च परामर्शप्रयोजकवाक्यत्वमेव न्यायत्वमिति केचित् तन्मतमुपन्यस्यति। यत्त्विति। संक्षेपतः। लाघवतः। सोऽपि न्याय एवेत्यनेनाऽन्वयः। परामर्शप्रयोजकेति। वह्निव्याप्यधूमवानयमिति वाक्यस्यापीत्यादिः। विशेषेति। वाक्यपञ्चात्मकसमुदायादित्यादिः। यादृशवाक्यप्रयोगो नार्थान्तरादिनिबन्धननिग्रहप्रयोजकः तदेव न्यायव्यवहारविषय इति नियमाभिप्रायेण दूषयति। तन्नेति। कथायां। विचारसमये। आकांक्षाक्रमेणैवाऽभिधानं, निग्रहाप्रयोजकमिति शेषः। इति। अतः तदभिधाने निग्रहादित्यग्रिमेणाऽन्वयः। विशिष्टवैशिष्ट्ये। पक्षस्य व्याप्तिविशिष्टहेतुमत्त्वे। आकाङ्क्षा। जिज्ञासा। नास्तीति। विप्रतिपत्तितः साध्यतदभावसंशयतस्तदेकतरकोटिजिज्ञासा प्रथममुदेति। ततः प्रतिज्ञावाक्यात्तन्निश्चये तद्धेतौ-तत्प्रतीतौ च तद्गमकतौपयिकव्याप्तौ। तदनन्तरमेव च पक्षस्य तादृशहेतुमत्त्वे इति भावः।

समुदायत्वमुपाध्यायानामुदाहरणत्वं सम्भवति-तथापि स स वह्निमान् यो यो धूमवानिति वाक्यस्य वारणाय स्वाश्रयीभूतसाध्यविशिष्टबोधकवाक्याव्यवहितोत्तरत्वशून्य हेतुविशिष्टबोधकवाक्यवृत्ति यत्समुदायत्वं तद्भिन्नत्वनिवेशे गौरवात्तन्नोक्तमिति संक्षेपः।

ननु उदाहरणैकदेशवारणाय मयापि प्रतिज्ञाद्यघटकत्वं निवेश्यत इत्यत आह। अत्रापीति।

न्यायजन्यज्ञानस्यापि। महावाक्यार्थबोधस्यापि। **परामर्शरूपत्वादिति।** परामर्शजनकत्वादिति यावत्। तेनोपनजन्यबोधस्य परामर्शरूपत्वविरहेऽपि न

प्रथमं विशिष्टवैशिष्ट्य आकाङ्क्षा नास्तीति तदभिधाने निग्रहादिति वक्ष्यते, अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्तिः आकाङ्क्षाविरहस्तुल्य एव।

अन्ये तु पञ्चावयववाक्याद्विजातीयमेव शाब्दज्ञानमुत्पद्यत इति तद्विजनकवाक्यत्वं न्यायत्वम्, एवं प्रतिज्ञाद्यवयवादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्धीजनकशाब्दत्वमेव तत्तल्लक्षणमिति, तन्न, ज्ञानविशेषजनकत्वं तत्तज्ज्ञानजनकत्वं

तस्यैवेति। तथा च तादृशजातौ साधकाभाव इति भावः। बाधकमप्याह। अन्यथेति। न्यायजन्यज्ञाने पंचावयवजन्यत्वात्पञ्च, द्वित्रादिजन्ये द्वित्राद्या, एकैकजन्ये चैकैका जातय इति जातिसंकर इत्यर्थः। तत्र तत्र भिन्नभिन्नजातिकल्पने च सुतरां मानाभाव इति भावः।

तदभिधाने विशिष्टवैशिष्ट्यप्रतिपादकवाक्योच्चारणे। अत्रापि प्रथममित्यनुषज्यते। अन्यथा। लाघवमात्रमादृत्य तस्य लक्ष्यतोपगमे। परामर्शजनकतयेति। लाघवाद्वाक्यत्वमप्यनन्तर्भाव्य परामर्शप्रयोजकत्वमात्रस्य लक्षणत्वौचित्यादिति भावः। ननु मध्यस्थाऽऽकांक्षा यतो निवर्त्तते स एव न्यायः। सा च शाब्दत्वप्रकारिका विषयसिद्धिनिर्वाहकशब्दादेव निवर्त्तते न तु प्रमाणान्तरादिति न चक्षुरादेर्न्यायत्वमित्यतआह। आकांक्षेति। आकाङ्क्षानिवृत्तिविरह इत्यर्थः। तुल्य एवेति। व्याप्यवत्ताबोधकवाक्यस्य प्रथमं प्रयोगेऽपि साध्यसंदेहाद्यधीनानां मध्यस्थाऽऽकाङ्क्षानामनिवृत्तिरिति भावः।

क्षतिः। **परामर्शजनकेति।** परामर्शजनकशाब्दबोधजनकेत्यर्थः। जनकत्वं च विनिगमकाभावात्सर्वेषां वाक्यानामेव, एवं तादृशवाक्यघटकत्वं च प्रत्येकवाक्यानामिति न्याये तदवयवे च लक्षणसमन्वयः। **आशङ्कामिति।** प्रतिज्ञादिपञ्चवाक्यजन्यमहावाक्यार्थबोधस्योपनयार्थविषयकत्वेन परामर्शरूपतया न्यायादौ क्रमेण लक्षणसमन्वय इत्याशङ्कामित्यर्थः। **मूलकृन्निराकरोतीति।**

वा न्याये प्रतिज्ञादौ चानतिप्रसक्तमनुगतरूपमन्तरेण दुर्निरूपमिति तत्स्वीकारे तस्यैव लक्षणत्वात् अन्यथा जातिसङ्करप्रसङ्गः।

दुर्निरूपम्। असम्भवि। जनकताया अवच्छेदकनियतत्वात्तज्ज्ञानस्यावच्छेदकज्ञानाधीनत्वादिति भावः।

लक्षणान्तरसम्भवस्य लक्षणान्तराऽदोषतया तस्यैव लक्षणत्वादिति मूलमसङ्गतमतो दीधितिकृद्भावं व्याचष्टे। तथाचेति। तादृशानुगतरूपस्वीकारे चेत्यर्थः। साधकाभाव इति। तादृशधर्मस्यैव न्यायादिपदप्रवृत्तिनिमित्तत्वसम्भवेन तत्प्रवृत्तिनिमित्ततया ज्ञाननिष्ठजातिविशेषसिद्ध्यसम्भवात् युक्त्यन्तरस्य चाऽसत्वादिति भावः। बाधकमित्यस्य प्रतिज्ञादिजन्यतावच्छेदकजातावित्यादिः। तेन वक्ष्यमाणसङ्करस्य न्यायजन्यतावच्छेदकजातासम्भवेन न क्षतिः। अन्यथेति मूलस्य प्रतिज्ञादिजन्यतावच्छेदकजातिस्वीकारे सङ्कीर्णजातिस्वीकारप्रसङ्ग इत्यर्थकत्वमभिप्रेत्य सङ्करं विवृणोति। न्यायेति। न्यायजन्यं च ज्ञानं विशिष्टैकार्थविषयकं तावद्वाक्यार्थविषयकसमूहालम्बनरूपं वेत्यन्यदेतत्। पञ्चेति। जातय इत्यग्रिमेणाऽन्वयः। तथा च तत्रैव प्रतिज्ञाजन्यतावच्छेदकपञ्चजातीनां समावेश इति भावः। अन्यत्रापि सामानाधिकरण्यमाह। द्वित्रादीति। मिथो व्यभिचारितामाह। एकैकेति। नन्वेकैकजन्यनानाऽवयवजन्यबोधगततत्तदवयवजन्यतावच्छेदकजातीनां नानात्वोपगमान्न सङ्करावकाश इत्यत आह। तत्र तत्रेति।

तस्मिन्निराकृते स्वीयलक्षणद्वयस्याऽतिव्याप्तिनिराकरोतीत्यर्थः। तथा च मूलस्थाऽतिव्याप्तिपदस्य परामर्शप्रयोजकवाक्यत्वस्य न्यायत्वमते वह्निव्याप्यधूमवानयमिति वाक्येऽतिव्याप्तिः, एवं तादृशवाक्यघटकत्वस्याऽवयवलक्षणत्वमते तदेकदेशेऽतिव्याप्तिरित्यर्थः। स्वमतेऽतिव्याप्तिशङ्कैव नास्तीत्याह। **मूले। तेनेति।** वह्निव्याप्यधूमवानयमिति वाक्येनेत्यर्थः। **परामर्शमात्रस्येति।** तथा च मूले परामर्शपदं सावधारणं बोध्यम्। परामर्शपदं परामर्शप्रयोजकशाब्दज्ञानपरम्। शाब्दबोधविशेषौ। प्रयोजकान्तपरिचेयाविति शेषः। तथा च यथोक्तलक्षणसत्त्वलाभः। **तत्त्वस्य** प्रयोजकवाक्यत्वस्य। तथा च

केचित्तु यदि चानुगतकारणमन्तरेणापि तादृशजातिमत्त्वसंभवस्तदा कदाचित्प्रतिज्ञाजन्येऽपि हेत्वादिजन्यवृत्तिर्हेत्वादिजन्ये प्रतिज्ञादिजन्यवृत्तिर्जातिः स्यादिति संकर एवेत्यर्थः। एवं सर्वेषां सर्वजातीयत्वमेकजातीयत्वं वा स्यादित्यपि द्रष्टव्यमित्याहुः।

सुतरां मानाभाव इति। प्रतिज्ञाहेत्वादिनानावयवजन्यबोधनिष्ठप्रतिज्ञाजन्यतावच्छेदकजातेर्हेत्वादिजन्यतावच्छेदकतया हेत्वादावपि प्रतिज्ञालक्षणाऽतिव्याप्त्या तादृशजातिघटितलक्षणकरणाऽसम्भवेन तादृशजातौ लक्षणानुरोधरूपयुक्त्यनवकाशात्। एकैकावयवजन्यबोधवृत्तिजातीरुपादाय स्वरूपयोग्यताघटितलक्षणस्य निर्दोषत्वेऽपि उभयादिजन्यबोधेतत्तज्जात्यभावनिर्वाहकप्रतिबध्यप्रतिबन्धकभावकल्पने महागौरवात्। तत्तज्जात्यवच्छिन्नजनकतावच्छेदकत्वेनाऽभिमतानां गुरुशरीराणामपि यथोक्तधर्माणां प्रतिज्ञादिपदप्रवृत्तिनिमित्ततौचित्येन तत्तज्जातिकल्पने प्रवृत्तिनिमित्तलाघवरूपाया युक्तेरप्यनवकाशादिति भावः। अननुगमने तत्तज्जातिघटितलक्षणाऽसम्भवाल्लक्षणाऽनुपपत्तिरूपयुक्तेः सुदूरपराहतत्वादिति भाववर्णनमनुपादेयम्। एकैकजन्यबोधवृत्तिजातिमादायैव स्वरूपयोग्यताघटितलक्षणसम्भवात्।

अन्यथेत्यादिमूलमन्यथा व्याचक्षाणानां मतमाह। केचित्त्विति। तदेत्यन्तमन्यथेत्यस्यार्थः। कदाचिदिति। हेत्वादिजन्ये इत्यत्राप्यनुषज्यते। न

व्यवहर्तव्यतावच्छेदकसत्तानिबन्धनो व्यवहारोऽभ्युपेय इति भावः। **न्याय एव।** न्यायव्यवहारविषय एव, सोऽपीत्यस्योपनयोऽपीत्यर्थः, अतःपरामर्शनीयं पूरयति। **वह्नीति। सद्धेताविति।** जिज्ञासोदेतीत्यनुवर्तते। एवग्रेपि। उपनयप्रयोगानुपपत्तिं निरस्यति। **अत्रापीति।** ननु आकाङ्क्षाविरह इति मूलाऽसङ्गतिः, चाक्षुषादेर्वह्निव्याप्यवत्ताबोधकवाक्यस्येव जिज्ञासिताविषयकत्वादित्यतस्तन्मूलमवरचयति। **नन्विति।**

ननु विजातीयबोधजनकत्वमेव न्यायत्वम्, विजातीयबोधजनकत्वमेव च प्रतिज्ञात्वादिकम्। एतादृशवैजात्यस्य परामर्शादावकल्पनान्नोपनयेऽतिव्याप्तिरित्यन्येषां मतमुपन्यस्यति। मूले अन्ये त्विति।

परस्परव्यभिचारितालाभः। स्यादिति। वर्त्तेत इत्यर्थः। नियामकाभावादिति भावः। ननु नियमेन सर्वत्रैव प्रतिज्ञादिजन्यबोधे हेत्वादिजन्यवृत्ति-जातिमत्त्वसम्भवेन परस्परव्यभिचारिताया दुर्घटत्वान्न सङ्करावकाश इत्यतो बोधकान्तरं पूरयति। सर्वेषामिति। सर्वत्र सर्वजातिसत्त्वे जातीनां समनैयत्याद् भेद एव दुर्लभ इति सर्वजातीयत्वप्रसङ्गोऽसङ्गत इत्यत आह। एकेति। इत्थं च विजातीयशाब्दबोधजनकत्वघटितं प्रतिज्ञालक्षणमसम्भवदुक्तिकमेवेति भावः। अत्र चाऽनुगतकारणाऽभावेऽपि अननुगतकारणघटितसामग्रीणां जातिविशेषनियामकत्वं न सम्भवतीति नोक्तरीत्या जातिसङ्कराद्यवकाशः। अन्यथाऽनुमितित्वादिजातेरपि अनियमेन प्रत्यक्षादिसाधारण्यापत्तेः। तत्रापि वह्निव्याप्यवत्तापरामर्शादीनामननुगतत्वात्। अनुगतस्य कस्यचित्कारणस्य सम्भवेऽपि तस्याऽतिप्रसक्तत्वात्तादृशस्य प्रकृतेऽपि सम्भवाच्च। न च व्यभिचारेण तादृशजात्यवच्छिन्नशाब्दबोधं प्रति अनुगतस्य कारणत्वाऽ-सम्भवात्तादृशजातीनां कारणनियम्यत्वं न सम्भवतीत्येकस्यान्य-जातीयताप्रसङ्गोदुर्वार इति वाच्यम्। अनुमितौ परामर्शस्येव प्रकृतेऽनुगतकारणस्य कार्यतावच्छेदकसङ्कोचेन व्यभिचारवारणसम्भवादित्यस्वरसबीजमवधेयम्।

तद्बीजनकेति। विजातीयशाब्दधीनिरूपितकारणतायां विषयिता-सम्बन्धेनाऽवच्छेदकं यद्वाक्यं तत्त्वमित्यर्थः। एवमग्रेऽपि। वह्निव्याप्यधूमवान-यमित्येतावान्मात्रजन्यज्ञाने च न तद्वैजात्यमिति नातिप्रसङ्गः। तथा च विजातीयशाब्दबोधजनकत्वं न्यायपदशक्यतावच्छेदकम् एवं पर्वतो वह्निमानिति वाक्यनिष्ठं यद्विजातीयशाब्दबोधजनकत्वं तदेव प्रतिज्ञापदशक्यतावच्छेदक-मित्याशयः।

अत्र प्रतिज्ञादिपदप्रतिपाद्यानां पर्वतो वह्निमानित्यादिवाक्यानां तत्तद्व्यक्तित्वेन कारणत्वे चालिनीयन्यायेन व्यभिचारात्, अनुगताऽनतिप्रसक्तरूपस्य च दुर्लभतया विजातीयशाब्दबोधजनकत्वस्याऽसम्भावितया वैजात्यस्याप्यसिद्धेः, तद्घटितलक्षणस्याऽसम्भव इत्याशयेन दूषयति। मूले। **ज्ञानविशेषेति। अनतिप्रसक्तम्।** उदासीनवाक्यव्यावृत्तम्। **अनुगतम्।** सकलन्यायसाधारणम्। **अवच्छेदकनियतत्वादिति।** तथा च किञ्चिद्धर्मावच्छिन्नकारणता-निरूपितकार्यतावच्छेदकतयैव वैजात्यसिद्धेर्वक्तव्यतया कारणतावच्छेदकत्वस्य

न चानुगतनियामकाभावस्याकिञ्चित्करत्वे, "ऽनुगताऽनतिप्रसक्तरूपमन्तरेण दुर्निरूपमिति" मूलाऽसङ्गतिरिति वाच्यम्। स्वमतेऽनुगतनियामकाभावे निर्भरः। अपि तु न्यायजन्यबोधादौ सङ्कररूपबाधक एवेति वक्तुं शक्यतया तादृशबाधकस्य विचाराऽसहत्वेऽपि क्षत्यभावात्। इदं पुनरिहावधेयम्। प्रतिज्ञाद्यवयववाक्यादित्यादिमूलं न जातिविशेषघटितप्रतिज्ञादिलक्षणाभि-प्रायकम्। तथासति तादृशप्रतिज्ञादिलक्षणस्याऽत्रैव निराकृतत्वेन प्रतिज्ञादिग्रन्थे प्रतिज्ञाजन्यं विजातीयज्ञानमित्यादिना जातिघटितप्रतिज्ञालक्षणमाशंक्यानेनैव दोषेण तन्निराकरणस्य पौनरुक्त्यापत्तेः, किंतु अवयवसामान्यलक्षणपरम्। प्रत्येकमित्यस्याऽवयवान्तराऽसहकारेणेत्यर्थः। तेन न्यायजन्यबोधतो वाक्यैकवाक्यताधीनप्रतिज्ञाहेत्वादिजन्यबोधतश्च वैलक्षण्यलाभेन तदात्मक-समुदायेऽतिव्याप्तिशङ्कानिरासः। विजातीयत्वं च प्रतिज्ञाद्येकदेशजन्य-बोधावृत्तिजातिमत्त्वम्। एतेनावयवैकदेशेऽतिव्याप्तिशङ्कानिरासः। मूले तज्जनकशब्दत्वं तल्लक्षणमिति पाठः। तल्लक्षणमित्यस्यावयवलक्षणमित्यर्थः। एवञ्चाऽन्यथेत्यादिमूलस्य प्रतिज्ञाहेत्वादिजन्यतावच्छेदकजातीनां परस्परसङ्करपरत्वं न घटते इति। यदि लक्षणानुरोधमात्रेण जातिस्वीकारस्तदा तत्साध्यपक्षहेतुकन्यायादिलक्षणानुरोधेनापि विभिन्नसाध्यादिकन्यायजन्यबोधेषु विभिन्नानां प्रतिज्ञाद्येकदेशजन्यबोधावृत्तिजातीनां स्वीकरणीयतया तासां च तथाविधद्वित्रादिन्यायजन्यबोधे समावेशेन सङ्कीर्णजातेः स्वीकारप्रसङ्ग इति तादृशमूलार्थः।

दुर्निरूपत्वे वैजात्यसिद्धेरसम्भवेन लक्षणमसम्भवग्रस्तमिति भावः। ननु पर्वतो वह्निमानिति वाक्यनिष्ठानुपूर्वीमत्त्वस्यैवाऽनुगताननतिप्रसक्तस्य सत्त्वेन तेन रूपेण विजातीयशाब्दं, प्रति जनकतासम्भवात्तथाविधजनकत्वं न्यायादिपदशक्यता-वच्छेदकं भविष्यतीत्यत आह। मूले–**तत्स्वीकारे** इति। **तस्यैव** तादृशानुपूर्वीमत्त्वस्यैव। एवकारेण वैजात्यघटितस्य व्यवच्छेदः। **लक्षणान्तरेति।** उभयोरपि लक्षणत्वसम्भवादिति भावः। **तादृशधर्मस्यैवेति।** तादृशानुपूर्वीमत्त्व-स्यैवेत्यर्थः। **न्यायादीति।** लाघवादित्यादिः। **तत्प्रवृत्ति इति।** न्यायादिप्रवृत्तीत्यर्थः। **ज्ञाननिष्ठेति।** शाब्दबोधनिष्ठेत्यर्थः। एवं च विजातीयबोधजनकत्वस्य तथात्वं नोपगम्यते इति तद्घटकतया वैजात्यसिद्ध्योसम्भव इति भावः। ननु प्रतिज्ञादौ

तत्र प्रतिज्ञा न साध्यनिर्देशः साध्यपदेऽतिव्याप्तेः(६)**।**

साध्यनिर्देशः प्रतिज्ञेति सूत्रम्। साध्यो विधेयधर्मविशिष्टोधर्मी।

यदि च सङ्करूपबाधकभयेन जातिकल्पनाऽसम्भवाज्जातिघटित-न्यायलक्षणाऽसम्भवादन्यथैव तत्पक्षसाध्यहेतुकन्यायादयो निर्वचनीया इत्युच्यते तदा व्याप्त्यादिपदवन्न्यायादिपदस्यापि नानार्थत्वे क्षतिविरहात्सर्वसाधारण-न्यायत्वादिनिर्वचनानुरोधेन जातिस्वीकारोऽप्यनुचित इति भावः।

दीधितिकारस्तु तत्तद्धीजनकवाक्यत्वं तत्तल्लक्षणमिति मूलपाठाभिप्रायेण प्रतिज्ञाहेत्वादिजन्यतावच्छेदकजातीनां न्यायजन्यबोधादौ सङ्करपरतया जातिसङ्करप्रसङ्ग इति मूलं व्याख्यातवान्। तादृशपाठे तद्ग्रन्थस्यावयव-सामान्यलक्षणपरत्वानुपपत्तेः।

एवं च सति अगत्याऽभिन्नप्रस्तावे जातिघटितप्रतिज्ञालक्षणं विस्मृत्य प्रतिज्ञाग्रन्थे पुनस्तदाशङ्केति यथाकथञ्चिदग्रिमग्रन्थावतारो बोध्यः।

इति ***गादाधर्यामवयवलक्षणम्।***

साध्यपदमनुमितिविधेयवाचकमित्यभिप्रायेण मणिकारदूषितं सूत्रकारीय-प्रतिज्ञालक्षणं साध्यपदस्य प्रकृतानुमितिविधेयविशिष्टार्थपरतां स्वीकृत्य

विजातीयबोधजनकत्वाऽनुपूर्वीरूपधर्मयोरुभयोरपि विनिगमनाविरहेण शक्यतावच्छेदकताया आवश्यकतया वैजात्यसिद्धिर्दुवारैवेत्याशंक्य तत्स्वीकारे बाधकमाह। **मूले-अन्यथेति।** ननु वैजात्यस्य नानात्वस्वीकारान्न सङ्करावकाश इति चेन्न। तथा सति। प्रतिज्ञाहेतूभयजन्यबोधे प्रतिज्ञाजन्यतावच्छेदकवैजात्य-स्वीकारापत्तेः। अन्यथा प्रतिबन्धकताकल्पनारूपमहागौरवापातात्। तथा च तदवच्छिन्नबोधजनकत्वस्य हेतावतिप्रसक्तेः। एतद्भयेन गुरुभूतमपि प्रतिबन्धकत्वमुपगम्य तत्र वैजात्यानुपगमे तत्प्रतिज्ञायामव्याप्तिः। न च तादृशबोधे तादृशवैजात्यानुपगमेऽपि न क्षतिः। विजातीयबोधजनकत्वरूपलक्षणे जनकत्वं न फलोपधानम् अपि तु स्वरूपयोग्यतेति केवलप्रतिज्ञाव्यक्त्य-न्तरजन्यबोधं प्रति तत्तत्प्रतिज्ञाव्यक्तेः फलोपहितत्वाभावेऽपि स्वरूपयोग्यता-सद्भावेन लक्षणसमन्वयादिति वाच्यम्। स्वरूपयोग्यता हि तादृशवैजात्या-

तथा च पक्षतावच्छेदकपर्वतत्वादिविशिष्टे साध्यतावच्छेदक-वह्नित्वविशिष्टवैशिष्ट्यज्ञानजनको न्यायावयव इति पर्यवसितार्थः।

परिष्कर्तुमारभते। सामान्यतो विधेयत्वस्य धर्मित्वस्य च केवलान्वयितयाऽव-यवान्तरे विधेयविशिष्टधर्मिबोधकत्वमतिप्रसक्तम्। एवं प्रतिज्ञासमानाकारन्याया-बहिर्भूतवाक्येऽपीत्यतः साध्यपदस्य तद्विशेषपरत्वं निर्देशपदस्य च बोधजनकन्यायावयवरूपवाक्यविशेषपरत्वमनुसृत्य पर्यवसितार्थमाह। तथा चेति। पक्षतावच्छेदकसाध्यतावच्छेदकयोर्न तत्त्वेन निवेशः, अपितु विशिष्यैवेति सूचनाय पर्वतत्वादीति वह्नित्वादीति च। तादृशविशिष्टवैशिष्ट्याव-गाहिशाब्दत्वावच्छिन्नजनकयत्किञ्चिद्ज्ञानीयवर्णसमुदायत्वमिह विवक्षणीयम्, अतो हेत्वर्थादिविषयकप्रतिज्ञार्थबोधजनकताया हेत्ववयवादिमात्रविषयक-बोधसाधारण्येऽपि न हेत्ववयवादावतिव्याप्तिः। न्यायान्तर्गतत्वमुपेक्ष्य न्यायावयवत्वप्रवेशात्प्रतिज्ञार्थबोधजनकप्रतिज्ञाहेत्वादिविषयकज्ञानमादाय प्रतिज्ञाहेत्वादिसमुदाये नातिव्याप्तिः।

वच्छिन्नबोधजनकतावच्छेदकधर्मवत्त्वम्, एवं च कारणतावच्छेदकत्वे-नाऽभिमतस्य धर्मस्यैव लाघवेन लक्षणत्वस्य प्रतिज्ञापदशक्यतावच्छेदकत्वस्य च सम्भवादुक्तवैजात्यावच्छिन्नबोधजनकतावच्छेदकधर्मवत्त्वस्य गुरुतया लक्षणत्वस्य शक्यतावच्छेदकत्वस्य वाऽसम्भवात्तद्घटकतया वैजात्यसिद्धेर-भावान्न वैजात्यस्य नानात्वस्वीकारः समुचित इति भावः। कारणतावच्छेदकस्य दुर्निरूपत्वेऽपि जातिसिद्धिस्वीकारे बाधकमाह। **अन्यथेति**। एतदेव दीधितिकृता केचित्तु इत्यादिना वक्ष्यते। **युक्त्यन्तस्येति**। प्रवृत्तिनिमित्तानुपपत्तिभिन्नयुक्तेः। मानाभावरूपयुक्त्यभाव इत्याह। **प्रतिज्ञेति**।

अन्यथा व्याचक्षाणानामिति। पूर्वं तु प्रतिज्ञाजन्यतावच्छेदकजातिस्वीकारे संकीर्णजातिस्वीकारप्रसङ्ग इति अन्यथेति मूलस्यार्थो वर्णितः। इदानीं नियामकाभावेऽपि जातिस्वीकारे इति तदर्थो बोध्यः। **अन्यथा**। सामग्र्या अनियामकत्वे। **तत्रापि**। अनुमितावपि। **तस्य**। कारणस्य। **तादृशस्य**। अतिप्रसक्तकारणस्य। **कार्यतावच्छेदसंकोचेनेति**। कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वादिनिवेशेनेत्यर्थः।

उदाहरणाच्च पक्षतावच्छेदकविशिष्टे न साध्यवैशिष्ट्यज्ञानम्।

पक्षतावच्छेदकविशिष्टत्वनिवेशप्रयोजनमाह। यद्यपि उदाहरणाच्चेति। साध्यतावच्छेदकविशिष्टवैशिष्ट्यमात्रनिवेशे उपनयनिगमनयोरप्यतिव्याप्तिः। तथापि यत्किञ्चिद्धर्मविशिष्टे शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञान जनकत्वनिवेशने न तत्रातिप्रसङ्गः। उपनयजन्यबोधे उपनयार्थव्याप्तिशरीरघटक-साध्यस्य धर्मितावच्छेदकाप्रवेशात्। निगमनजन्यबोधे च साध्यांशे हेतुज्ञानज्ञाप्यत्वस्याधिकस्य भानात्। अन्यथा पक्षतावच्छेदकान्तर्भावेऽपि अनुषङ्गपक्षेऽनिस्तारादित्युदाहरणमात्रानुसरणम्। तदप्युदाहरणजन्यबोधे व्यापकत्वं न विधेयतावच्छेदकघटकतया भासते इति प्राचीनमतमनुसृत्य। निगमनेऽयंपदाननुषङ्गपक्षे तु शुद्धसाध्यतावच्छेदकविशिष्टत्वं न निविष्टं विशेषणान्तरावच्छिन्नवह्न्यादिसाध्यकन्यायान्तर्गतप्रतिज्ञायां शुद्धवह्नित्वा-

---

सामग्र्या नियामकत्वे शङ्कते। नचेति **अकिञ्चित्करत्वे। अनियामक**त्वे। सामग्र्या नियामकत्वे इति यावत्। **तादृशेति।** अनुगतनियामकाभावरूपेत्यर्थः। **प्रतिज्ञाद्यवयववाक्यादित्यादीति।** प्रतिज्ञाद्यवयववाक्यादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति मूलवाक्यादित्यर्थः। **तेन।** अवयवाऽसहकारेणेत्यर्थकरणेन। **तदात्मकसमुदाये। न्याये–** प्रतिज्ञाहेतुसमुदाये च। **एतेन** एकदेशजन्यबोधा-वृत्तित्वकथनेन।

एवं च सति। विशेषलक्षणपरत्वे। विस्मृत्येति। विजातीयबोधजनकत्व-मिति लक्षणं विस्मृत्येत्यर्थः। प्रतिज्ञाग्रन्थे प्रतिज्ञाजन्यं विजातीयं ज्ञानमित्यग्रिमग्रन्थे। पुनस्तदाशङ्केति। जातिघटितलक्षणाशङ्केत्यर्थः।

इति विलासिन्यामवयवलक्षणम्।

मूले तत्र। निरूपणे। विषयत्वं सप्तम्यर्थः तथा च निरूपणविषयीभूता प्रतिज्ञेत्यर्थः। साध्यं निर्दिश्यते अनेनेति व्युत्पत्या साध्यप्रतिपादकशब्द इत्यर्थः। **साध्यपदेऽतिव्याप्तेरिति।** तस्यापि साध्यप्रतिपादकत्वादिति भावः। **अवयवान्तरे।** धूमादिहेत्ववयवादौ **अतिप्रसक्तमिति** तस्यापि हेतुत्वोद्देश्यका-धेयतासम्बन्धेन हेतुविधेयकबोधजनकत्वात्। **तद्विशेषपरत्वं।** साध्यवत्पक्षपरत्वम्। तस्य च बोधेऽन्वयः। तथा च साध्यवत्पक्षविषयकबोधजनकत्वे सति न्यायावयवत्वमिति निष्कर्षः। **न तत्त्वेनेति।** न पक्षतावच्छेदकसाध्यता-

वच्छेदकत्वेनेत्यर्थः। तथासति पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिबोधजनकत्वं लक्षणार्थः, तच्च हेत्वादौ अवयवान्तरेऽतिव्याप्तम्, पक्षतावच्छेदकत्वादेः केवलान्वयित्वात् अतो विशिष्यैव तयोर्निवेश इति भावः। **विवक्षणीयमिति।** तथा च न्यायावयवत्वे सति पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकतावद्यत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णसमुदायत्वं विवक्षणीयमित्यर्थः। **अतः** तादृशशाब्दत्वावच्छिन्नजन्यतानिवेशात्। नन्वेवमेकदेशार्थविषयकबुद्धित्वावच्छिन्नजन्यतावारणेन एकदेशवारणसम्भवान्न्यायान्तर्गतत्वमेव निवेश्यतामित्यत आह **न्यायान्तर्गतत्वमुपेक्ष्येति। नातिव्याप्तिरिति** प्रतिज्ञाहेतुसमुदायस्य न्यायान्तर्गत्वेऽपि न्यायाऽवयवत्वाभावादिति भावः। न च न्यायान्तर्गतत्वे सति तादृशशाब्दबोधत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वस्य यत्किञ्चिद्ज्ञानीयविषयतायां निवेशेनैवं प्रतिज्ञाहेत्वादिविषयकसमूहालम्बनबोधमादाय तादृशसमुदायेऽतिव्याप्तिवारणसम्भवे न्यायावयवत्वनिवेशे गौरवमिति वाच्यम्। तादृशसमुदायत्वस्यापि तादृशजनकतावच्छेदकविषयताप्रतिज्ञाघटकवर्णसमुदायवृत्तित्वेनोक्तातिव्याप्तितादवस्थ्यात्, तद्वारणाय तादृशवर्णत्वसमनियतसमुदायत्वनिवेशे तु लाघवानवकाशादिति ध्येयम्। पर्वतो वह्निमानित्याद्येकैकप्रतिज्ञाया अपि न तादृशजनकज्ञानविषयवर्णत्वव्यापकसमुदायत्ववत्त्वं, तादृशवर्णत्वस्य तज्जातीयप्रतिज्ञान्तरेऽपि सत्त्वात्प्रत्येकं प्रतिज्ञाव्यवहारोऽनुपपन्नोऽतो यत्किञ्चित्त्वनिवेशः।

अत्रेदं बोध्यम् तादृशविशिष्टवैशिष्ट्यावगाहिशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतयत्किञ्चिद्ज्ञानीयविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वं प्रतिज्ञात्वम्। अन्यथा प्रतिज्ञैकदेशवृत्तिसमुदायत्वस्यापि तादृशयत्किञ्चिद्ज्ञानीयविषयितानिरूपकवर्णत्वसमानाधिकरणतया तादृशसमुदायत्वमादायप्रतिज्ञैकदेशेऽतिव्याप्तेः, न्यायावयवत्वशरीरे प्रतिज्ञाद्यघटकत्वविशेषणं प्रक्षिप्य एकदेशाऽतिव्याप्तिवारणे गौरवात्, अत एवोत्तरग्रन्थे एतल्लक्षणे एव न्यायावयवत्वशरीरे प्रतिज्ञाद्यघटकत्वं न निविष्टं किन्तूभयघटकभागद्वयाऽघटितत्वमात्रमेवेति वक्ष्यति। अत्र कल्पे तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वं न निवेशनीयम् अधिकदेशवृत्तिसमुदायत्वस्यापि उभयघटकभागद्वयाऽघटितत्वरूपन्याया-

वच्छिन्नसाध्यकप्रतिज्ञालक्षणाऽतिव्याप्तेः प्रकृतन्यायान्तर्गतत्वाभावेनैव वारणादित्यभिप्रायकमिदं, अतो व्यापकत्वस्याधिकस्योदाहरणजन्यबोधे भानेऽपि न क्षतिरिति केचित्। तन्मते निगमनोपेक्षाबीजं चिन्तनीयम्। यत्तत्पदस्योदाहरणस्थस्य न पक्षतावच्छेदकावच्छिन्नपरत्वम् अपि तु पक्षान्यसाध्यवत्साधारणरूपावच्छिन्नपरत्वमेव। पक्षतावच्छेदकावच्छिन्ने हेतुमत्त्वस्य ततो लाभे उपनयानुत्थानात्, तदवच्छिन्ने साध्यवत्त्वस्य च प्रतिज्ञात एव लाभेनाऽनाकांक्षितत्वाच्चेति पक्षतावच्छेदकप्रवेशे नोदाहरणाऽतिप्रसङ्गः।

वयवत्वनिवेशेनैव वारणात् अत्र उभयघटकभागद्वयाघटितत्वन्तु प्रतिज्ञाहेतु एतदुभयघटकद्वयाऽघटितत्वमेव, अन्यस्य निवेशे प्रयोजनाभावात्। तदपि प्रतिज्ञाघटकप्रतिज्ञान्यघटक एतदुभयाऽवृत्तिधर्मवत्त्वम्, अधिकदेशवृत्तिसमुदाय-त्वस्य प्रतिज्ञाघटकप्रतिज्ञान्यघटक एतदुभयावृत्तित्वादिति। **उदाहरणाच्चेतीति** उदाहरणस्थयत्तत्पदेन महानसत्वमहानसान्यत्वेन पक्षस्यापि बोधनात्पक्षतावच्छेद-कांशनिवेशस्यापि व्यावृत्तिर्बोध्या **मात्रस्यैव निवेशे इति।** मात्रपदेन पक्षतावच्छेदकविशिष्टेति समुदायस्यैव व्यवच्छेदः। **उपनयनिगमनयोर-प्यतिव्याप्तिरिति।** तयोरपि साध्यतावच्छेदकविशिष्टवैशिष्ट्यबोध-जनकत्वादिति भावः। **तथापीति।** तथा च यत्किञ्चिद्धर्मविशिष्टे शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिबोधजनको न्यायावयवः प्रतिज्ञेति फलितम्। यत्किञ्चिद्धर्मविशिष्टे इति कथनादुपनये नातिव्याप्तिसम्भव इत्याह। **उपजन्यबोधे** इति। **धर्मितावच्छेदकाऽप्रवेशादिति।** हेतुव्यापकसाध्य-सामानाधिकरण्यमित्यत्र साध्याधिकरणत्वेन साध्येनैव वाऽधिकरणस्य भानात्। ननु उपनयेऽतिव्याप्तिः शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यबोधजनकत्व-मात्रनिवेशादेव वारणीया, उपनयघटकसाध्यांशेऽपि व्यापकत्वस्याऽधिकस्य भानात् **किं यत्किञ्चिद्धर्मविशिष्टे** इत्यनेन। न च साध्यवदन्यावृत्तित्व-रूपव्याप्तिविशिष्टहेतुमत्ताबोधकोपनयेऽतिव्याप्ति; तादृशोपनयजन्यबोधे साध्यतावच्छेदकनिष्ठनिरवच्छिन्नावच्छेदकताकप्रकारताकत्वसत्त्वादतो यत्किञ्चिद्धर्मविशिष्टे इत्युक्तमिति वाच्यम्। उदाहरणवाक्याद्यादृशव्याप्तिभानं तादृशव्याप्तिविशिष्टस्यैव पक्षसत्त्वाऽऽकाङ्क्षया उपनयप्रयोगात्, अन्वय्युदाहरणतो

अत्र च यत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहिशाब्दबुद्धित्वावच्छिन्नजनकत्वमुदाहरणैकदेशे स वह्निमानित्यादिवाक्ये एव न तु तस्य न्यायावयवत्वं तच्च समुदाये एव न तत्र तादृशजनकत्वमिति विशिष्टपक्षतावच्छेदकानन्तर्भावेऽपि नोदाहरणेऽतिप्रसङ्ग इति नाशङ्कनीयम्। जनकत्वस्य जनकयत्किञ्चिद्ज्ञानविषयवर्णसमुदायत्वरूपस्य विवक्षितत्वात्, उदाहरणसमुदायविषयकज्ञानविषयत्वमादाय उदाहरणसमुदायेऽतिप्रसक्तेः। एवमेतल्लक्षणप्रविष्टन्यायावयवत्वशरीरे प्रतिज्ञाहेत्वादिसमुदायेऽतिप्रसङ्गवारणायोभयघटकभागद्वयाऽघटितत्वमेव निवेशनीयम्, न तु प्रतिज्ञाद्यघटकत्वमपि, प्रयोजनविरहात्।

व्यतिरेक्युदाहरणतश्च साध्यवदन्यावृत्तित्वरूपव्याप्तेरनवगमात्। "तादृशव्याप्तेः वह्निमानेव धूमवानिति वाक्यताऽवगमात्" तद्विशिष्यहेतुमत्ताबोधकोपनयवाक्याऽसम्भवादिति चेन्न। शुद्धसाध्यतावच्छेदकावच्छिन्नप्रकारकबोधजनकत्वनिवेशे पर्वतो वह्निमान्धूमादित्यत्र यो यो न वह्निमान् स स न धूमवानिति व्यतिरेक्युदाहरणघटितन्यायान्तर्गतवह्निमद्भेदव्यापकीभूतभेदप्रतियोगितावच्छेदकधूमवानित्युपनये शुद्धसाध्यतावच्छेदकावच्छिन्नप्रकारकबोधजनकेऽतिव्याप्तिवारणाय यत्किञ्चिद्धर्मविशिष्टे इत्युक्तमिति ध्येयम्।

शुद्धत्वनिवेशान्निगमने नातिव्याप्तिः। अतिव्याप्त्यभावे हेतुमाह। **निगमनजन्यबोधे चेति। अधिकस्य भानादिति।** तथा च साध्यांशेऽन्याप्रकारकत्वरूपशुद्धत्वविरहेण शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिबोधजनकत्वस्य निगमने विरहादिति भावः। अथैवं उपनये व्यापकताविशिष्टवह्नेर्भानाच्छुद्धसाध्यतावच्छेदकविशिष्टदलेनैव वारणात् यत्किञ्चिद्धर्मविशिष्टे इत्यस्य वैयर्थ्यं दुर्वारमेवेति चेन्न। शुद्धत्वं साध्यांशेऽन्याऽप्रकारकत्वमेव व्यापकसामानाधिकरण्यरूपव्याप्तिभाने साध्यतावच्छेदके व्यापकतावच्छेदकत्वं भासते ततो व्यापकतावच्छेदकत्वविशिष्टसाध्यतावच्छेदकविशिष्टवह्नेर्भानम् न तु व्यापकताविशिष्टवह्नेरिति। तथा च शुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यबोधजनकत्वस्योपनये सत्त्वादव्याप्तिवारणाय **यत्किञ्चिद्धर्मविशिष्टे**

उपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदकविशिष्ट-वैशिष्ट्यज्ञानमिति तयोर्व्युदासः।

उदाहरणैकदेशे तादृशवाक्येऽतिप्रसङ्गस्य लघुतरप्रकृतपक्षतावच्छेदक-वैशिष्ट्यनिवेशेनैव वारयितुमुचितत्वात्। यद्यप्येवं नीलपर्वतो वह्निमानित्यादि-प्रतिज्ञैकदेशे पर्वतो वह्निमानित्यादिभागेऽपि व्यावृत्तिः सम्भवति, तथापि सकलप्रतिज्ञैकदेशे न तथेति विशेषोपादाने प्रयासाधिक्येनोदाहरणानुधावनमिति ध्येयम्।

साध्यतावच्छेदकावच्छिन्नप्रकारकत्वनिवेशप्रयोजनमाह। उपनयाच्चेति। साध्यवैशिष्ट्यमात्रनिवेशेऽपि पर्वतो द्रव्यवान् धूमादित्यादिन्यायान्तर्गतोपनये तत्स्थलीयप्रतिज्ञालक्षणाऽतिव्याप्तिरिति साध्यतावच्छेदकविशिष्टवैशिष्ट्याव-गाहित्वनिवेश इत्यवधेयम्।

इत्युक्तम्। न च तथासति "व्यापकत्वं न विधेयतावच्छेदकघटकतया भासते इत्युत्तरग्रन्थाऽसङ्गतिः, तत्र विधेयतावच्छेदकघटकतया भानेऽपि न क्षतिः, साध्यतावच्छेदके एव व्यापकतावच्छेदकत्वावगाहितया तदीयसाध्यप्रकारतायां साध्यतावच्छेदकातिरिक्तानवच्छिन्नत्वस्याऽक्षतत्वादिति वाच्यम्। तत्र व्यापकत्वं न विधेयतावच्छेदकतया साध्यांशे भासते इत्येव तदर्थत्वादिति ध्येयम्।

अन्यथा। निगमनजन्यबोधे धूमज्ञानज्ञाप्यत्वस्याऽधिकस्याऽभाने। **उदाहरणमात्रानुसरणमिति।** उदाहरणमात्रमादाय दूषणमित्यर्थः। **तदपि।** उदाहरणमात्रानुसरणमपि। **प्राचीनमतमनुसृत्येति।** अन्यथा। शुद्धत्वनिवेशनैव वारणादिति भावः।"

पक्षतावच्छेदकावच्छिन्नेत्यस्याऽनिवेशे यत्किञ्चिद्धर्मावच्छिन्ने साध्यतावच्छेदकावच्छिन्नसाध्यावगाहित्वनिवेशे शुद्धत्वाऽनिवेशेऽपि निगमनेऽननुषङ्गपक्षे नातिव्याप्तिः, अत उदाहरणमात्रानुसरणमिति वदतां मतमाह। **अननुषङ्गपक्षेत्विति। न निविष्टमिति।** शुद्धत्वं न निविष्टमिति यावत्। यत्किञ्चिद्धर्मावच्छिन्ने इत्यनेनैवोपनयनिगमनयोर्वारणात्। शुद्धत्वाऽनिवेशे पर्वतःसुन्दरवह्निमानिति वाक्येऽतिव्याप्तिमाशंक्य निराकरोति। **विशेषणान्तरा-**

यथाश्रुतसत्यन्तार्थस्योदासीनवाक्यसाधारण्यमक्षतमेव, न्यायान्तर्गतवाक्यजन्यस्येव तदनन्तर्गततादृशवाक्यजन्यस्यापि शाब्दबोधस्योपनायकज्ञानादिविधया परामर्शप्रयोजकत्वादतस्तदर्थमाह। प्रकृतन्यायावयवत्वेति। वह्निव्याप्यधूमसाध्यकानुमितेरपि कदाचिदुद्देश्यतया वक्ष्यमाणाऽतिप्रसङ्गवारणाऽसम्भवादुद्देश्यपदं प्रकृतार्थकतया व्याचष्टे। उद्देश्येतीति।

वच्छिन्नेति सुन्दरत्वावच्छिन्नेत्यर्थः **प्रकृतन्यायान्तर्गतत्वाभावेनैवेति।** एतन्मते तादृशशाब्दत्वावच्छिन्नजनकयत्किञ्चिद्ज्ञाने तादृशजनकताद्वयशून्यत्वं निवेशनीयम्, अन्यथा प्रतिज्ञाहेतुसमुदायादौ तादृशशाब्दबोधजनकयत्किञ्चिद्ज्ञानविषयवर्णसमुदायत्वे, न्यायावयवत्वयोःसत्वेनाऽतिव्याप्तेः, पूर्वमते तु न्यायावयवत्वाभावादेव नातिव्याप्तिरित्यवधेयम्। **अतः।** शुद्धत्वाऽनिवेशात्। **न क्षतिः**नातिव्याप्त्यसङ्गतिः। केचिदित्यनेन सूचितमस्वरसं कथयति। **तन्मते।** अननुषङ्गपक्षे। **अयम्भावः।** अननुषङ्गपक्षे केवलनिगमनान्न शाब्दबोधः, निधर्मितावच्छेदकशाब्दबोधानङ्गीकारात्। किन्तूपनयार्थेन सममेवेति निगमनेऽप्यतिव्याप्तिसम्भवादुदाहरणमात्रानुसरणमसङ्गतमेव स्यादिति। **श्री परमगुरुचरणास्तु** अत्र पर्वतः सुन्दरवह्निमान् धूमादित्यत्र यो यो धूमवान् स स वह्निमानित्यादिपञ्चवाक्यान्तर्गतप्रथमवाक्ये उदाहरणे चाऽतिव्याप्तिवारणार्थं शुद्धत्वादिकं निविष्टम्। तत्र न्यायान्तर्गतप्रविष्टप्रतिज्ञाशरीरे पक्षतावच्छेदकविशिष्टे शुद्धसाध्यतावच्छेदकावच्छिन्नप्रकारकबोधजनकत्वनिवेशेनैव पूर्वोक्तपञ्चवाक्यान्तर्गतसुन्दरवह्निमानिति प्रथमवाक्ये उदाहरणे चातिव्याप्तिवारणसम्भवात्पक्षतावच्छेदकवैशिष्ट्येत्यादिकमफलमित्यस्वरसः केचिदित्युक्त्या सूचित इति पाठयामासुः। पक्षतावच्छेदकावच्छिन्नत्वनिवेशेऽप्युदाहरणे कथमतिव्याप्तिवारणमित्यत आह। **यत्तत्पदस्येति। ततः।** उदाहरणवाक्यात्। **उपनयानुत्थानादिति।** व्याप्यः पक्षे नवेत्याकाङ्क्षाविरहादिति भावः। **तदवच्छिन्ने।** पक्षतावच्छेदकावच्छिन्ने। **अनाकाङ्क्षितत्वाच्चेति।** को वह्निमानित्याकाङ्क्षाया असम्भवादिति भावः। शब्दस्य जनकतामते पक्षतावच्छेदकप्रवेशवैयर्थ्यं शङ्कते। **अत्र चेति। तच्च** न्यायावयवत्वं च एवकारेण एकदेशव्यावृत्तिः। **तत्र** समुदाये। **नोदाहरणाऽतिप्रसङ्ग इति। न च** जनकतायाः प्रत्येकपर्यवसिततया तादृशजनकताश्रयवर्णत्वव्यापकसमुदायत्वं

किन्तूद्देश्यानुमिति- हेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यम्।(७)

किन्त्वित्यादि। प्रकृतन्यायबहिर्भूतवाक्यवारणाय सत्यन्तम्, प्रकृतन्यायावयवत्वपर्यवसितम्। उद्देश्येति। प्रकृतेत्यर्थः।

वह्निसाध्यकोपनयस्य वह्निव्याप्यधूमसाध्यकाऽनुमित्य-न्यूनाऽनतिरिक्तविषयकशाब्दबोधजनकस्य वारणाय प्रकृतद्वयं। तथा च यादृशपक्षसाध्यक न्यायावयवत्वं तादृशपक्षसाध्यकानुमित्य-न्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वं पर्यवसितोऽर्थः।

वह्निसाध्यकोपनयस्य। तत्साध्यकन्यायान्तर्गतोपनयस्य। एतेनाऽन्यसाध्यक-न्यायमादाय सत्यन्तदलमाविष्कृतम्। वह्निव्याप्यधूमसाध्यकेत्यादिना विशेष्यदलसत्त्वं स्फुटीकृतम्। वारणाय प्रतिज्ञाव्यवहारविषयतावारणाय। प्रकृतद्वयं। प्रतिज्ञापदार्थघटकन्यायानुमित्योरेकसाध्यादिमत्त्वप्रापकं प्रकृतद्वयम्। प्रकृतन्यायावयवत्वपर्यन्तानिवेशे वह्निव्याप्यधूमसाध्यकप्रतिज्ञानुरोधेन तत्साध्यकानुमितेरपि प्रकृतपदेन विवक्षणीयतया तामादायोपदर्शितोपनये। प्रकृतानुमितिपर्यन्ताऽनिवेशे वह्निसाध्यकन्यायस्यापि प्रकृतन्यायेत्यनेन विवक्षणीयतया तदवयवत्वमादाय तंत्र प्रतिज्ञाव्यवहारस्य दुर्वारत्वादुभयत्र प्रकृतत्वनिवेशः। तथा च सति अभिन्नसाध्यपक्षकन्यायानुमित्यन्तर्भावे यादृशो लक्षणार्थस्तं स्फुटयति। तथा चेति।

विवक्षणीयम्, तथा चोदाहरणाऽतिव्याप्तिर्दुर्वारैव, स्वनिष्ठन्यूनवृत्तित्वा-निरूपकत्वस्य निवेशेन तद्वारणे तु उभयघटभागद्वयाऽघटितत्वस्य वैयर्थ्यापातादिति वाच्यम्। उभयघटकेत्यादिविशेषणस्य त्याज्यत्वात्। अत एव सिद्धान्ते तन्निवेशयिष्यतीति। एतन्मते यत्किञ्चित्त्वं न निवेशनीयम्। ज्ञायमानशब्दस्य हेतुतयाऽसम्भवानवकाशादिति ध्येयम्।

यत्तु तादृशोपनये वह्निव्याप्यधूमसाध्यकप्रतिज्ञाव्यवहारवारणाय न्याये, वह्निसाध्यकप्रतिज्ञाव्यवहारवारणाय चाऽनुमितौ प्रकृतत्वनिवेशनमिति प्रकृतद्वयमित्यन्तार्थ इति। तच्चिन्त्यम्।

तत्साध्यपक्षकप्रज्ञिाव्यवहारविषयस्याऽत्र निर्वाच्यत्वे प्रतिज्ञापदार्थघटक-न्यायाऽनुमित्योरुभयत्र समभिव्याहृतसाध्यपक्षान्वयनिवेशसूचनाय प्रकृतद्वयं, तत्साध्यपक्षकार्थमित्यस्यैवाऽभिधातुमुचिततया तदुपेक्ष्य प्रतिज्ञाव्यवहारविषयता-वच्छेदकीभूतैकधर्मशरीरे द्विधानिविष्टयोः साध्यपक्षयोरभेदमात्रलाभाय तथा चेत्यभिधाने संदर्भविरोधात्। यादृशेत्यादेः स्वस्येत्यादिः। तादृशेत्यादेः स्वनिष्ठमित्यादिः पर्यवसितोऽर्थः। प्रतिज्ञापदप्रतिपाद्यतावच्छेदकतया

ज्ञायमानशब्दहेतुतायाः अप्रामाणिकतेत्यभिप्रायेण समाधत्ते। **जनकत्वस्येति।** **विवक्षितत्वादिति** उदाहरणैकदेशेऽप्यतिव्याप्तिं दर्शयति। **एवमिति।** तथाच यत्किञ्चिद्धर्मावच्छिन्ने साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहि-शाब्दत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किञ्चिद्ज्ञानीयविषयिता-निरूपकवर्णत्वव्यापकसमुदायत्वस्य विवक्षितत्वादित्यर्थः। **अतिप्रसक्तेरिति।** तद्वारणाय पक्षतावच्छेदकावच्छिन्नत्वनिवेश आवश्यक इति शेषः। ननु स वह्निमानिति भागे प्रतिज्ञाद्यघटकत्वनिवेशेनाऽप्यतिव्याप्तिवारणसम्भवात्पक्षता-वच्छेदकनिवेशो व्यर्थ इत्यत आह। **नन्विति।** एवं च गुरुतरप्रतिज्ञाद्यघटकत्व-निवेशोऽन्याय्य इति भावः।

अथ न्यायान्तर्गतत्वे सति उभयघटकभागद्वयाऽघटितत्वरूपस्यैव न्यायावयवत्वस्य निवेशे रमाधवः पूज्यः सदाशिवो वन्द्य इति प्रतिज्ञैकदेशे माधवः पूज्यः, शिवो वन्द्यः, इति भागेऽतिव्याप्तिः, न च तल्लक्ष्यमेवेति वाच्यम्। तस्य लक्ष्यत्वे तत्राऽवयवलक्षणलक्ष्यताया आवश्यकतयाऽवयव-लक्षणाऽव्याप्तिः, रमाधवः पूज्य इत्यादिसमुदायत्वावच्छिन्नभेदस्य माधवः पूज्य इति भागे सत्त्वेन स्वस्मिन् स्वभेदाऽसत्त्वेन प्रतिज्ञाद्यन्यतमत्वरूपाऽवयवत्वा-भावात्। प्रतिज्ञाद्यघटकत्वघटिताऽवयवत्वाभावाच्च। तस्माद् यादृशानुपूर्वी-विशिष्टवाक्ये न्यायावयवत्वव्यवहारस्तादृशन्यायावयवविशेष एव प्रतिज्ञेति वक्तव्यम्। एवं च रमाधवः पूज्य इति वाक्ये एव न्यायावयवत्वव्यवहारेण तस्यैव प्रतिज्ञात्वं न तु तदेकदेशस्येति तदेकदेशस्य प्रतिज्ञालक्षणाऽलक्ष्यतयाऽति-

मूलाभिप्रायविषयः। एवं च सति प्रतिज्ञापदस्य नानार्थत्वं न दोषाय गत्यन्तरविरहादिति प्रागेवोक्तं ग्रन्थकृतैव। तत्साध्यतावच्छेदकावच्छिन्नसाध्यकत्वस्य न्यायाद्यंशेऽनिवेशने उक्तोपनये एवाऽतिप्रसङ्गः यत्पक्षकाऽनुमितिसमानविषयकत्वं तत्पक्षकन्यायान्तर्गतत्वस्याऽक्षतत्वादिति तन्निवेशनम्। द्रव्यव्याप्यधूमवानयमित्याकारकद्रव्यत्वावच्छिन्नसाध्यकोपनयवारणाय साध्यतावच्छेदकनिवेशनम्। एतल्लक्षणघटकन्यायावयवत्वशरीरे उदाहरणाद्यघटकत्वनिवेशस्य सिषाधयिषाधीनन्यायप्रयोगानङ्गीकारपक्षे प्रयोजनान्तरविरहात्। प्रतिज्ञाऽघटकत्वमात्रस्य तदेकदेशवारणाय निवेशनीयतया वह्न्यादिसाध्यकन्यायान्तगर्तस्य यत्किञ्चिद्धर्मिकवह्न्यादिसाध्यकानुमित्यन्यूनाऽनतिरिक्तविषयकबोधजनकस्य स वह्निमानित्युदाहरणैकदेशस्य वारणायैकधर्मावच्छिन्नपक्षकत्वनिवेशनम्।

वस्तुतोऽनुमित्यन्यूनाऽनतिरिक्तविषयकत्वं प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वे सति तादृशवैशिष्ट्यविषयताविलक्षणविषयताशून्यत्वरूपमनुमितिमनन्तर्भाव्यैवाऽग्रे निर्वचनीयम्। तत्र प्रकृतपक्षादिनिवेशव्यावृत्तिरग्रे प्रदर्शनीया, किं व्यावृत्तिस्थलान्तरानुसरणेनेति। यत्तु पक्षविशेषमनन्तर्भाव्याऽन-

---

व्याप्तेः। न चाऽत्र प्रतिज्ञाघटकत्वनिवेशान्नातिव्याप्तिरिति वाच्यम्। "न तु प्रतिज्ञाद्यघटकत्वमपी"ति सन्दर्भविरोधापत्तेः, स वह्निमानिति भागस्य तत एव वारणे पक्षतावच्छेदकानुसरणवैयर्थ्यापत्तेश्चेति चेन्न। ईदृशैकदेशेऽतिव्याप्तिवारणाय प्रतिज्ञामात्राऽघटकत्वमेव निवेश्यं नतूदाहरणाऽघटकत्वमपि, प्रयोजनाभावात्। नन्वेवं स वह्निमानिति भागेऽतिव्याप्तिरित्यत आह। **उदाहरणैकदेशे** इति। ननु यदि प्रतिज्ञाद्यघटकत्वं न निवेश्यते तदा नीलपर्वतो वह्निमानित्यादिस्थलीयप्रतिज्ञालक्षणस्य पर्वतो वह्निमानिति तदेकदेशेऽतिव्याप्तिः। न च प्रतिज्ञामात्राऽघटकत्वमुक्तमेवेति वाच्यम्। यत्र भागतद्वतोः समानार्थकतया पक्षतावच्छेदकानिवेशेऽपि नातिव्याप्तिर्वारयितुं शक्यते तत्रत्यप्रतिज्ञाविशेषे एव तदुपादानं न सर्वत्रेत्याशयेन शङ्कते। **यद्यपीति। एवं।** प्रतिज्ञाद्यघटकत्वनिवेशे। नन्वनुषङ्गपक्षे निगमनैकदेशेऽयं वह्निमानिति भागेऽतिव्याप्तिः, अतः सर्वत्रैव प्रतिज्ञाद्यघटकत्वनिवेशनमावश्यकमिति चेन्न। पक्षविशेष्यकसाध्यप्रकारकबोधेऽयं वह्निमानित्यानुपूर्वीप्रकारकज्ञानस्यैव हेतुतया

तिप्रसक्तस्य न्यायत्वस्य दुर्निर्वचतया पक्षनिवेशनमिति। तदसत्। तथा सति हेतुविशेषमनन्तर्भाव्यापि तस्य दुर्वचतया तादृशहेतुकेत्यस्यापि वक्तुमुचितत्वात्। यदि च न्यायपदादेव पक्षविशेषनियन्त्रितन्यायलाभ इति न तदभिहितमित्युच्यते तदा पक्षाप्रवेशस्याऽऽवश्यकत्वेऽपि न्यायपदादेव पक्षविशेषनियन्त्रितन्यायलाभ इति तादृशपक्षकेत्यभिधानस्याऽनुपयुक्ततेति।

हेतोर्वारणयेति। अनतिरिक्तविषयकत्वं पक्षतावच्छेदकविशिष्टपक्षे यत्साध्यताच्छेदकविशिष्टवैशिष्ट्यविषयत्वं तद्भिलक्षणविषयताशून्यत्वम्, न तु प्रकृतानुमित्यविषयाविषयकत्वम्, स्वयमग्रे दूषणीयत्वात्। तादृशविषयता-

---

निगमने तादृशानुपूर्व्या एवाऽभावेन नातिव्याप्तिरिति ध्येयम्। **व्यावृत्तिः-सम्भवतीति।** पक्षतावच्छेदकविशिष्टेत्यस्येत्यादिः। **विशेषोपादाने।** प्रतिज्ञाविशेषोपादाने।

न्यायान्तर्गतोपनये। द्रव्यव्याप्यधूमवानिति वाक्ये। **अतिव्याप्तिरिति।** द्रव्यव्याप्यधूमस्यापि द्रव्यत्वेन साध्यत्वादिति भावः।

वक्ष्यमाणातिप्रसङ्गवारणाऽसम्भवादिति। वह्निसाध्यकोपनयेऽति-प्रसङ्गादित्यर्थः।

प्रकृतन्यायावयवत्वे सति प्रकृतानुमित्यन्यूनाऽनतिरिक्तविषयक शाब्दबोधजनकवाक्यत्वं प्रतिज्ञात्वं पर्यवसितम् **प्रतिज्ञाव्यवहारविषयता-वारणायेति।** पक्षविशेषाऽनियन्त्रितसामान्यतः प्रतिज्ञाव्यवहारविषयता-वारणायेत्यर्थः। तथा च वह्निसाध्यकोपनयस्य वह्निव्याप्यसाध्यकप्रतिज्ञाभिन्नतया सामान्यतोऽपि प्रतिज्ञाव्यवहाराभावादिति भावः। **एकसाध्यादिमत्त्वप्रापकमिति।** यादृशतादृशेत्यर्थकमित्यर्थः। दीधितिकारेण एकदैव प्रकृतपदद्वयप्रयोजनं दर्शितम्, यादृशेत्यस्य निष्कासनेऽन्यत्र तादृशेत्यस्यापि निष्कासनात्। स्वयं पृथक्-पृथक्तयोःप्रयोजनमभिधाय उक्तार्थे एव पर्यवसानमाह। **प्रकृतन्यायाऽव-यवत्वपर्यन्ताऽनिवेशे इति।** केवलमनुमितिदिशि दत्ते। **प्रकृतानुमिति-पर्यन्तानिवेशे।** तथा च केवलं न्यायदिशि निवेशे इत्यर्थः। न चैवं वह्निसाध्यकोदाहरणेऽपि प्रकृतद्वयनिवेशव्यावृत्तिसम्भवेन उपनयपर्यन्तानुसरणं व्यर्थमिति वाच्यम्। साध्यनिवेशव्यावृत्तेरपि तत्रैव सुलभतया तदुपेक्ष्य तदनुसरणादिति ध्येयम्। **इदन्त्ववधातव्यम्।** साध्यादिभेदेन प्रतिज्ञालक्षणस्य

धूमादालोकवान्पर्वतोवन्हिमान्धूमादित्यादावनतिरिक्तविषयकज्ञान-जनकस्य हेतोर्वारणायाऽन्यूनेति। निगमनवारणायाऽनतिरिक्तेति।

विलक्षणत्वं च तादृशविषयिताशालिनिश्चयत्वावच्छिन्नानिवर्त्यसंशय-निवर्त्तकतावच्छेदकत्वं निर्वक्ष्यते। एवं चोक्तहेत्ववयवजन्यबोधस्यानुमित्य-विषयवह्निनिष्ठधूमज्ञानज्ञाप्यत्वविषयकत्वेऽपि तादृशविषयताविलक्षणविषयता-शून्यत्वमक्षतमेवेत्यतिव्याप्तिप्रसक्तिरिति भावः। निगमनवारणायेति। निगमनजन्यबोधस्यापि पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्ट-वैशिष्ट्यावगाहित्वेनाऽन्यूनविषयकतयाऽतिव्याप्तिप्रसक्तिरिति भावः।

भिन्नतया वह्निव्याप्यधूमसाध्यकप्रतिज्ञालक्षणे न्यायानुमित्योरुभयत्र प्रकृतत्वनिवेशनेऽपि वह्निसाध्यकप्रतिज्ञालक्षणेऽनुमित्यंशे प्रकृतत्वनिवेशनमेव संयक् न तु तत्रापि न्याये इति ध्येयम्। तत्र। उपनये। उभयत्रप्रकृत्वनिवेश इति। न्याये प्रकृतत्वानिवेशे अनुमितौ केवलं तन्निवेशे अनुमितिपदेन वह्निव्याप्यसाध्यकानुमितिमादाय तत्समनियतशाब्दबोधजनकत्वस्य पर्वतपक्षकवह्निसाध्यकन्यायावयवत्वस्य च पर्वतो वह्निव्याप्यवानिति प्रतिज्ञायां सत्त्वात्, तस्याः पर्वतपक्षकवह्निसाध्यकस्थलीयोपनयत्वात्। न्याये प्रकृतत्वनिवेशनायाह। **प्रकृतानुमितिपर्यन्तानिवेशे** इति। प्रकृतन्यायपदेन पर्वतपक्षकवह्निसाध्यकन्यायमादाय तदवयवत्वस्य-अनुमितिसामान्यान्तर्गत-वह्निव्याप्यसाध्यकानुमितिसमनियतबोधजनकत्वस्य च सत्वात्तथैवाऽति-व्याप्तिरिति भावः।

प्रतिज्ञासामान्यलक्षणाऽभिप्रायेण दीधितिं व्याख्यातवान्, ये तु प्रतिज्ञाविशेषलक्षणाभिप्रायकतया दीधिति लापयन्ति तन्मतमुत्थापयति। **यत्त्विति। तादृशोपनये।** वह्निसाध्यकोपनये। **समभिव्याहृतेति।** समभिव्याहृतस्वोपस्थाप्येत्यर्थः। **स्वं**-प्रकृतपदद्वयम्। तथा च पर्वतपक्षक-वह्निसाध्यकस्थले पर्वतो वह्निमानिति वाक्यं प्रतिज्ञेति "भवत्सम्मते" व्यवहारेऽनुमित्यन्यूनाऽनतिरिक्तविषयकशाब्दज्ञानजनकत्वे सति न्यायावयवत्व "रूपप्रतिज्ञापदार्थ" घटकयोर्न्यायानुमित्योः पर्वतपक्षकवह्निसाध्यकत्वयोरन्वयान्न तादृशोपनये उक्तप्रतिज्ञाद्वयव्यवहार इति भावः। **इत्यस्यैवाऽभिधातुमुचितत-**

यद्यपि निगमने साक्षात्पक्षवाचकपदं न श्रूयते तथापि न्यूनताभंगायोपनयस्थाऽयमादिपदस्याऽनुषङ्गात्तथा बोध्यम्। इत्थमेव च प्रसक्तामतिप्रसक्तिनिगमनंचेत्यादिना निराकरिष्यति।

निगमने। तस्माद्वह्निमानित्यादिवाक्यसन्निधाने। साक्षादिति। अवयवान्तरबहिभावेणेत्यर्थः। न श्रूयते इति। तथा च कथं तज्जन्यबोधस्याऽन्यूनविषयकत्वमिति भावः। न्यूनताभङ्गाय। आकाङ्क्षापूरणाय। पक्षतावच्छेदकविशिष्टे पक्षे साध्यवत्ताबाधेन कस्तादृशवह्निमानिति जिज्ञासा निवर्त्तते। वह्निमानित्यभिधाने च तादृशाकांक्षा उत्सर्गतो जायते इत्यनुभव-सिद्धमेवेति भावः। अनुषङ्गादिति। निगमनस्थसाध्यवाचकपदसमभिव्याहृत-त्वेनाऽनुसन्धानोपगमादित्यर्थः तथा च तदन्तर्भाव्यैव निगमनावयवत्वं पर्यवस्यतीत्यन्यूनविषयकबोधजनकन्यायावयवत्वमादायाऽतिव्याप्तिप्रसक्ति-रिति भावः। निगमनं च न परामर्शहेतुरिति यथाश्रुताऽग्रिममूलग्रन्थस्य

येति। एवकारेणाऽभेदमात्रार्थकत्वव्यवच्छेदः। अनुमितौ न्याये प्रकृतपदयोस्त-त्साध्यपक्षकत्वनिवेशार्थकत्वे तत एवोपनये तत्स्थलीयप्रतिज्ञाव्यवहार-वारणसम्भवात्। यादृशपक्षकेत्यादिना सामान्यरूपेणाऽनु- मितिन्याय-घटकशाब्दबोधविषयसाध्यादीनामैक्यविवक्षाया निर्बीजत्वापत्तेरिति भावः। नन्वेवमुक्तोपनयेऽतिव्याप्तिर्दुर्वारैव, सति सप्तम्यभावेन पूर्वदलस्य यत्र कुत्रचित्सत्त्वे तत्रोत्तरदलस्य सत्वात्'। यत्र कुत्रचिदुत्तरदलसत्वे पूर्वदलसत्वं चेत्यतः **स्वस्येति। स्वनिष्ठमिति च पूरितम्। स्वं**-प्रतिज्ञात्वेनाभिमतम्। **उक्तोपनये।** वह्निसाध्यकोपनये। यादृशसाध्यकत्वस्य न्यायांशेऽनिवेशेऽनु-मितावपि तादृशसाध्यकत्वं नास्त्येव एकदैव तस्य निवेशात् तथाच यादृशलक्षणमवशिष्टं तादृशलक्षणमुपनयवाक्ये उपपादयति। **यत्पक्षकेति। अनुमितिसमानविषयकत्वमिति।** अनुमितिसमानविषयकशाब्दजनकज्ञान-विषयत्वमित्यर्थः। तेनानुमितिसमानविषयकत्वस्य "शाब्दे एव सत्वेन" उपनयवाक्ये विरहेऽपि न क्षतिः। **उपनयवारणायेति।** द्रव्यव्याप्यधूमोऽपि द्रव्यत्वेन साध्य इति भावः। एकधर्मावच्छिन्नपक्षकत्वनिवेशस्य व्यावृत्ति वक्तुमुपक्रमते। **एतदिति। अनङ्गीकारपक्षे** इति। अङ्गीकारे तु यो धूमवान्

तदर्थश्च निगमनमन्यूनाऽनतिरिक्तविषयकशाब्दज्ञानजनकं सन्न परामर्शहेतुःयेन निरुक्तन्यायावयवत्वरूपं प्रतिज्ञात्वं तदपि व्याप्नुयात्। अबाधितत्वादेस्तद्बोधौपयिकविशिष्टहेतुसंबन्धस्य च बोधकतया तस्यातिरिक्तविषयकज्ञानजनकत्वादिति।

यत्तु पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ यन्न पृथिवीतरेभ्यो भिद्यते तन्न पृथिवीत्युदाहरणवारणाय तदिति।

सत्यन्तदलविरहेण निगमने नातिव्याप्तिरित्यर्थपरत्वं प्रतीयते तच्च न घटते सत्यन्तस्य न्यायावयवत्वार्थकत्वात्तस्य च निगमनसाधारण्यात्। यथाश्रुतस्याऽपि सत्यन्तार्थस्य प्रतिज्ञायामिव तत्राप्यक्षतत्वात्। अनतिरिक्तविषयकत्वविशेषणेनैव तद्वारणाच्चेत्यनतिरिक्तविषयकत्वविशेषणस्य निगमनातिव्याप्तिवारकतापरत्वेन तादृशग्रन्थमत्रैव व्याख्यातुं भूमिकामारचयति। इत्थमेव चेति। अन्यूनानतिरिक्तेति। तथा च न्यायावयवत्वेपर्यवसिततादृशपरामर्शप्रयोजकशाब्दज्ञानजनकत्वसत्त्वेऽपि अन्यूनाऽनतिरिक्तविषयकज्ञानजनकत्वं नास्तीति पर्यवसितोऽर्थः। अबाधि त्वादिपरताया उदीच्य तद्बोधेनापि निर्वाहान्निगमनजन्यशाब्दबोधे तद्भानार्थं

स वह्निमान् यथा पर्वत इत्युदाहरणसम्भवेन स वह्निमानिति भागस्यापि पक्षतावच्छेदकावच्छिन्ने प्रकृतसाध्यप्रकारकबोधजनकत्वसत्त्वेन एकधर्मा-वच्छिन्नपक्षकत्वनिवेशेऽपि अतिव्याप्तिवारणायोदाहरणाऽघटकत्वस्याऽऽव-श्यकतया तत एव एकधर्मावच्छिन्नपक्षकत्वनिवेशव्यावृत्तिर्न सम्भवत्येवेति तदनङ्गीकारपक्षानुसरणम्। एवं च तत्पक्षे प्रयोजनाभावेन तदनिवेशादुदाहरणैक-देशेऽतिव्याप्तिवारणायैकधर्मावच्छिन्नपक्षकत्वनिवेश इति भावः। **प्रतिज्ञाऽघटकत्वमात्रस्येति।** मात्रपदेन हेतूपनयनिगमनाऽघटकत्वव्यवच्छेदः। प्रतिज्ञाऽघटकत्वं च प्रतिज्ञादिघटकतानवच्छेदकधर्मवत्त्वम्। घटकतावच्छेदकत्वं च प्रतिज्ञात्वन्यूनवृत्तित्वे सति प्रतिज्ञावृत्तित्त्वम्। **तेन** प्रतिज्ञाभेदानुयोगितावच्छेद-कत्वोक्तौ प्रकृतपक्षकत्वनिवेशवैयर्थ्येऽपि न क्षतिः। **तदेकदेशवारणायेति।** प्रतिज्ञैकदेशवारणायेत्यर्थः। रमाधवः पूज्य इति प्रतिज्ञैकदेशे माधवः पूज्य इतिभागेऽतिव्याप्तिवारणायेति यावत्। **एकधर्मावच्छिन्नेति। वस्तुत** इति।

तत्तुच्छम्। तेन पृथिव्यामितरभेदस्याऽविषयीकरणात्। तात्पर्यभ्रमेण तादृशबोधजनकत्वस्याऽतिप्रसक्तत्वात्।

न च तावताप्युदाहरणस्य तथात्वसंभवः। यन्नेत्यादेरनन्वयात्।

लक्षणाऽऽदरो न युक्त इति मूलोक्ततद्विषयकतयातिरिक्त विषयकत्वं न विचारसहम्। एवं पञ्चम्यर्थभागार्थस्याऽतिरिक्तस्य विषयतया तथात्वाऽप्रतिपादने न्यूनत्वं चेत्यतः पूरयति। तद्बोधौपयिकेति। अबाधितत्वादिबोधौपयिकेत्यर्थः। विशिष्टहेतुसम्बन्धस्य। व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानज्ञाप्यत्वस्य। अस्य चाऽबाधितत्वादिव्याप्यतया तद्बोधौपयिकत्वं बोध्यम्।

मिश्रमतमुपन्यस्यति। यत्त्विति। पृथिवीतरेभ्यो भिद्यते इत्यसमस्तम् इतरपदं पृथिवीतरपरम्। इतरादिसम्बन्धिकार्थबोधकपदानां समभिव्याहृततत्तत-पदोपस्थाप्यतत्तदर्थेतरत्वादिना निरूढलक्षणा, अतो वादिवाक्ये स्वारसिकलक्षणा-विरहेऽपि न क्षतिः।

प्रतिज्ञादौ सर्वत्रैकेनैव पदेन साध्यनिर्देश इति न नियमः। तेनाऽग्रे यन्न पृथिवीतरेभ्यो भिद्यते इत्युदाहरणप्रयोगाऽविरोधः।

विशेष्यवाचकं पृथिवीति पदान्तरं पूरणीयम्। श्रुतपदं समस्तमित्येव वा। उदाहरणवारणायेति। तज्जन्यबोधेऽपि पक्षसाध्याऽश्रयत्वात्मकतत्सम्बन्ध-रूपानुमितिविषयसकलपदार्थभानेनान्यूनविषयकत्वसत्त्वादित्यभिमानः। तत् अनतिरिक्तेति पदम्।

अन्यूनविषयकत्वं हि न प्रकृतानुमितिविषयताव्यापकविषयताकत्वम्

अत्र सत्यन्तमन्यूनविषयकत्वदलस्यार्थः। अनतिरिक्तविषयकत्वदलस्यार्थो विशेष्यदलम्। **अनुमितिमनन्तर्भाव्यैवेति।** तथा चैकसाध्यादिमत्त्वप्रापकं प्रकृतद्वयमिति कल्पनामात्रमेव। एवं च प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वे सति तादृशवैशिष्ट्यविषयताविलक्षणविषयताशून्यबोधजनकवाक्यत्वं प्रतिज्ञात्वं फलितम्। **अग्रे प्रदर्शनीयेति।** धूमादालोकवान् पर्वतो वह्निमान्धूमादित्यत्र हेतावतिव्याप्तिवारणायाऽन्यूनविषयकत्वनिवेशः। प्रकृतपक्षपदानुपादाने प्रमेयः

सर्वस्मात्कालत्ववान्महाकालः कालपरिमाणवान् सर्वस्मादित्यत्र हेत्ववयवेऽतिव्याप्तेः। नापि पक्षतावच्छेदकविशिष्टविषयकत्वं, हेतुत्वं प्रमेयाद्वाच्यत्ववत् प्रमेयादित्यादौ हेत्ववयवेऽतिव्याप्तेः।

नापि पक्षतावच्छेदकविशिष्टविषयकत्वे सति साध्यतावच्छेदकविशिष्ट-विषयकत्वं तद्वैशिष्ट्यविषयकत्वं वा। प्रमेयनिष्ठहेतुत्वं प्रमेयं प्रमेयादित्यत्र हेत्ववयवेऽतिव्याप्तेः। तज्जन्यबोधे प्रमेयत्वत्वरूपसाध्यतावच्छेदकविशिष्टस्य प्रमेयपदार्थतावच्छेदकस्य धर्मिणि वैशिष्ट्यभानादिति पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वं तद्वाच्यम्। तथा च नोक्तोदाहरणेऽतिव्याप्तिरित्याशयेन दूषयति। तत्तुच्छमिति।

ननु भ्रान्तः पृथिवीपदस्यं विशेष्यपरत्वम्-इतरपदस्य च पृथिवीतपरत्व-मवगत्य तादृशोदाहरणात्पृथिवीत्वविशिष्टे साध्यवत्त्रं प्रत्येतीति तत्राऽति-प्रसक्तिरित्यत आह। तात्पर्यभ्रमेणेति। तादृशेति। अन्यूनविषयकेत्यर्थः। अतिप्रसक्तत्वात्। तथा चाऽयमित्याकारकसाध्यवत्त्वतात्पर्यभ्रमविषयसर्वनाम-पदघटितोपनयेऽतिव्याप्तत्वात्। तात्पर्यभ्रमदशायामपि नातिव्याप्तिप्रसक्तिरित्याह। न चेति। उदाहरणस्य उदाहरणत्वपर्याप्त्यधिकरणस्य। यन्नेत्यादेः। तन्नेत्यादि-भागार्थस्य अनन्वयात्। पृथिवीतरेभ्यो भिद्यते इत्येतादृशबोधेऽप्रवेशात्। तथा चाऽन्यूनविषयकतादृशबोधजनकत्वमेकदेशस्यैव न तु यन्नेत्यादिघटित-समुदायस्य। एकदेशस्य तु न्यायावयवत्वाभावादेव नातिप्रसक्तिशङ्का। न्यायान्तर्गतत्वस्यैकदेशसाधारणस्य निवेशे चाऽनतिरिक्तविषयकत्वनिवेशेऽपि तादृशोदाहरणैकदेशे एवाऽतिव्याप्तिरिति भावः।

प्रमेयादित्यत्र हेवावतिव्याप्तिः। पञ्चम्यर्थहेतुत्वे प्रकृत्यर्थप्रमेयस्य प्रकारत्वात्। हेतुत्वं प्रमेयाद्वाच्यत्ववत्प्रमेयादित्यत्र हेतावतिव्याप्तिः पक्षीभूतविभक्त्यर्थहेतुत्व-विषयकबोधजनकत्वादिति भावः।

हेतोरिति। प्रतिज्ञाऽघटकस्वतन्त्रहेतोरित्यर्थः। **दूषणीयत्वादिति।** सर्वमभिधेयं प्रमेयत्वादित्यत्र प्रकृतानुमित्यविषयाऽप्रसिद्ध्येत्यादिः। **तादृशविषयताविलक्षणेति।** साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्न-विषयताविलक्षणेत्यर्थः। अथाऽत्र तादृशविषयताविलक्षणत्वं यदि

तात्पर्यभ्रमेण यन्नेत्यादिकमन्तर्भाव्य यद्भिन्ना पृथिवीतरेभ्यो भिद्यते इत्यन्वयबोधः सम्भवतीति नाशङ्कनीयम्। जलं न द्रव्यं गन्धवदित्यादौ जलभिन्नं द्रव्यं गन्धवदित्यादौ जलभिन्नं द्रव्यं गन्धवदित्यन्वयबोधस्याऽनुभवविरुद्धतया नञर्थोद्देश्यतावच्छेदककबोधस्याऽव्युत्पन्नत्वात्। यदितरभिन्नपृथिव्यन्यदित्याकारको यदर्थविशेष्यकबोधोपि न सम्भवति, अयं न पचति पुरुष इत्यत्रेदं पदार्थे पाककर्तृपुरुषभेदबोधस्यानुभवविरुद्धतयाऽभावप्रतियोगितावच्छेदकत्वेनाऽऽख्यातार्थभानस्य पचति चैत्र इवाऽयमित्यादितः पाककर्तृचैत्रादिसादृश्यबोधस्याऽननुभवेनेतरविशेषणविशेषणतया तद्भानस्यैवाऽव्युत्पन्नत्वात्।

अत्र केचित्। अन्यूनविषयकत्वं पक्षतावच्छेदकविशिष्टविषयकत्वे सति साध्यतावच्छेदकविशिष्टविषयकत्वमेव न तु पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वम्। एवं च दर्शितव्यतिरेक्युदाहरणजन्यबोधस्यापि तादृशाऽन्यूनविषयकत्वादतिव्याप्तिः प्रसज्यते। न चैवमपि साध्यतावच्छेदकविशिष्टसाध्यपक्षतावच्छेदकविशिष्टपक्षघटितवाक्यार्थबोधकत्वमुदाहरणैकदेशस्यैव, न तु तन्न पृथिवीत्यादिभागघदितसमुदायरूपोदाहरणस्येत्यवयवत्वविशेषणप्रवेशादेव नातिव्याप्तिशङ्केति वाच्यम्। तादृशान्यूनविषयकत्वघटितधर्मावच्छिन्नजनकतापर्यन्ताऽनिवेशाद्वाक्यार्थद्वयविषयक-

---

तादृशविषयताभिन्नत्वं तदाऽसम्भवः, प्रतिज्ञाजन्यबोधीयसाध्यादिविषयतायास्तद्भिन्नत्वात्। नापि तादृशविषयताभिन्नमुख्यविशेष्यताशून्यत्वं समुदितार्थः, धूमादालोकवान्पर्वतो वह्निमानित्यत्र हेतुजन्यबोधे तादृशविषयताभिन्नमुख्यविशेष्यताशून्यत्वाभावाद्धेतुवाक्येऽतिव्याप्तिविरहादन्यूनविषयकत्वस्य वैयर्थ्यादित्यत आह। **विलक्षणत्वं** चेति। **एवं चेति** एतादृशविलक्षणत्वनिवेशे चेत्यर्थः। **विषयकत्वेपीति।** ज्ञानज्ञाप्यत्वं धूमीयमित्यत्र ज्ञानज्ञाप्यतात्वरूपेण वह्निनिष्ठतादृशज्ञानज्ञाप्यत्वस्यापि विषयीकरणादिति भावः। **अक्षतमेवेति।** वह्नित्वावच्छिन्नप्रकारतानिरूपिततादृशपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताया ज्ञानज्ञाप्यत्वं धूमीयं न वेति संशयेऽपि सत्त्वात् तादृशनिश्चयत्वाऽवच्छिन्नाऽनिवर्त्त्यो य संशयः उदासीनसंशयः तन्निवर्त्तकतावच्छेदकविषयताशून्यत्वं हेतुजन्यबोधेऽक्षतमेवेति

समूहालम्बनबोधजनकतामादायाऽतिव्याप्तेः प्रसञ्जनात्। न हि तादृश-समूहालम्बनबोधजनकत्वमेकदेशे पर्यवस्यति। अपि तु समुदाय एव। अथवा न्यायान्तर्गतत्वमेव सत्यन्तार्थः। अत एव मिश्राणां घटशब्दो गुणः द्रव्यकर्मान्यत्वे सति सत्वादित्यत्रोदाहरणे यदि प्रतिज्ञारूपशब्द एव दृष्टान्तत्वेनोपादीयते तदा तत्राऽतिव्याप्तिवारणार्थत्वादित्यादिना शाब्दज्ञानपदस्य व्यावृत्तिसङ्गतिः। तददाने तत्रातिव्याप्तिप्रसक्तिः, विषयविधया श्रावणप्रत्यक्षजनकत्वात्ता-दृशदृष्टान्तरूपशब्दस्येति। पक्षतावच्छेदकविशिष्टविषयकत्वमेवान्यून-विषयकत्वम्।

एवं च तादृशोदाहरणैकदेशाऽतिव्याप्तिवारणायैव साध्यतावच्छेद-कसम्बन्धेन साध्यतावच्छेदकमात्रविशिष्टसाध्यप्रकारकत्वार्थकमनतिरिक्त-विषयकेति। तज्जन्यबोधस्य साध्यातावच्छेदकसम्बन्धेन साध्याप्रकारकत्वात्। मात्रपदार्थान्तिर्भावान्निगमनव्युदासः। तज्जन्यबोधे विशिष्टहेतुसम्बन्धस्याधिकस्य साध्यांशे भानेन शुद्धसाध्यतावच्छेदकावच्छिन्नसाध्याऽप्रकारकत्वात्। एवं च वह्निव्याप्यधूमवानयमित्याद्युपनयजन्यबोधस्य व्याप्तिघटकाधिकरणांशे साध्यतावच्छेदकावच्छिन्नप्रकारकत्वेऽपि साध्यांशे व्यापकत्वस्याधिकस्य भानेन तत्रापि नातिप्रसङ्गः।

न चैवमपि यन्न पृथिवीतरान्यदित्युदाहरणैकदेशेऽतिप्रसङ्गः, तज्जन्यबोधे पक्षतावच्छेदकविशिष्टपक्षविषयकत्वस्य शुद्धसाध्यतावच्छेदकविशिष्टसाध्य-प्रकारकत्वस्य च सत्वादिति वाच्यम्।

भावः। अन्यूनविषयकत्वनिवेशे हेतुजन्यबोधस्य प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वविरहान्नातिव्याप्तिः। **अन्यूनविषयकतयेति।** अनतिरिक्तविषयकत्वनिवेशे च निगमनबोधस्य पक्षे साध्यवैशिष्ट्यावगाहिविषयताशालिनिश्चयत्वावच्छिन्नाऽनिवर्त्यो यः संशयः "वह्निधूमज्ञानज्ञाप्यो नवा अबाधितो न वा असत्प्रतिपक्षितो नवेत्यादयः तन्निर्वत्तकतावच्छेदकविषयिताशालित्वान्नातिव्याप्तिः। **तथा च** प्रकृतपक्षसाध्यकन्यायावयवत्वे सति प्रकृतपक्षे प्रकृतसाध्यतावच्छेदक-विशिष्टवैशिष्ट्यावगाहित्वे सति प्रकृतसाध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यता-

यदि च निगमने नायमादिपदं निविशते वाक्यैकवाक्यतयैव विशिष्टार्थभानादिति विभाव्यते, तदा हेतौ साध्यसामानाधिकरण्यभाने सामान्यतः पक्षेऽपि साध्यवत्त्वभानात्पक्षे हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताबोधकस्योपनयस्य यत्र च पक्षसाध्ययोस्ताद्रूप्येण

पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वावच्छेदेन तादृशसाध्यप्रकारकत्वस्य दलद्वयनिष्कृष्टार्थत्वात्। तादृशोदाहरणभागजन्यबोधस्येतरभेदांशे निर्धर्मितावच्छेदकतया तादृशसाध्यप्रकारकत्वविरहात्। साध्यतावच्छेदकसम्बन्धनिवेशनं च यत्र कालिकसम्बन्धेन कालपरिमाणस्पन्दत्वादेः साध्यता समवायेन च तस्यैव हेतुता तत्रत्योपनीयव्याप्यान्तातिरिक्तभागवारणाय। सिषाधयिषया च न्यायप्रयोगो नाभ्युपेयते इति यत्र साध्यतावच्छेदकसम्बन्धेनैव साध्यतावच्छेदकविशिष्टसाध्यस्य हेतुता तत्रत्योपनयीतादृशभागेऽतिप्रसङ्ग इत्यस्य नावकाशः। न चैवमपि निगमनीयतस्मादित्यंशातिरिक्तांशेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम्। तस्मादित्यंशार्थमनन्तर्भाव्य व्यवहितयोः पक्षसाध्यवद्वाचकपदयोरन्वयबोधाजनकत्वादिति रीत्योक्तस्थलेऽपि व्यावृत्तिदानं सङ्गमयन्ति।

अयं पदाननुषङ्गपक्षे निगमनेऽनतिरिक्तविषयकत्वव्यावृत्तिर्न सङ्गच्छते इत्याशङ्कते। यदि चेति। अयमादीत्यादिना इदमियमित्यादेःपरिग्रहः। वाक्यैकवाक्यतयेति। उपनयनिगमनयोरेकवाक्यतयेत्यर्थः। विशिष्टार्थभानात्।

शालिनिश्चयत्वावच्छिन्नाऽनिवर्त्त्यो यः संशयस्तन्निवर्त्तकतावच्छेदकविषयिताशून्यज्ञानजनकवाक्यत्वं पर्यवसितम्।"

अयं पदान्तर्भावेणैव निगमनत्वस्य वक्तव्यतया व्याचष्टे। **तस्मादिति।** अवयवान्तबहिर्भावः स्वभिन्नावयवाऽघटकत्वम्। **तथा च** अयं पदस्य निगमनाऽघटकत्वे **च। कथमन्यूनविषयकत्वमिति।** तज्जन्यबोधस्य पक्षे साध्यवैशिष्ट्यावगाहित्वाभावादिति भावः। मणिकारस्याप्ययं पदानुषङ्गपक्षोऽभिप्रेत इत्यभिप्रायकमित्थंमेवेति दीधितिग्रन्थमवतारयति। **निगमनं चेति।** ननु तर्हि कथं निगमनेऽतिव्याप्तिवारणमत आह। **अनतिरिक्तविषयकत्वविशेषणेनैवेति।** एतद्विशेषणमेवाऽतिव्याप्तिवारणक्षममिति भावः। एवकारेणाऽन्यूनविषयकत्वदलेन वारणं नास्तीति सूचितं, तच्चाऽयं पदानुषङ्गपक्षे

दृष्टान्तत्वहेतुत्वाभ्यामुपन्यासः तादृशसिषाधयिषया च न्यायप्रयोगस्त्रोदाहरणोपनययोः।

पक्षतावच्छेदकविशिष्टे साध्यवत्तालाभात्, विशेषाकाङ्क्षानिवृत्तेः। न च पक्षवाचकपदाननुषङ्गे तस्मान्नेतराणीत्यादिनिगमनविरोधः अनुयोग्यमिश्रितनञर्थशाब्दबोधस्याऽव्युत्पन्नतया तन्मात्रस्याऽबोधकत्वेन वाक्यत्वाभावादिति वाच्यम्। एतन्मते तादृशनिगमनानभ्युपगमात्। यद्यप्यनतिरिक्तविषयकत्वाऽनिवेशेऽन्यूनविषयकबोधजनकत्वं तज्जनकज्ञानविषयत्वं वा न्यायावयवत्वं विशेषितं प्रतिज्ञाहेत्वादिजन्यबोधमादाय हेत्वादावतिप्रसक्तम्। तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वरूपाऽन्यूनविषयकत्वावच्छिन्नजन्यतानिरूपिजनकतावच्छेदकयत्किञ्चिद्ज्ञानविषयताश्रयवर्णसमुदायत्वनिवेशे नायं दोष इति स्थलान्तरे व्यावृत्तिमाह। तदेत्यादिना। भाने। ज्ञाने। सामान्यतः। अधिकरणत्वरूपसामान्यधर्मावच्छिन्ने-विशेषरूपानवच्छिन्ने इति वा। साध्यवत्त्वभानात्। साध्यवत्त्वविषयकत्वात्। उपनयस्य वारणाय तदिति योजना। पक्षे साध्यवैशिष्ट्यावगाहित्वमेवाऽन्यूनविषयकत्वं, न तु पक्षतावच्छेदकवैशिष्ट्यान्तर्भाव इत्यभिप्रायेणेदम्।

प्रमेयाद्वाच्यत्ववानयं प्रमेयः प्रमेयादित्यादिवक्ष्यमाणहेतुवारणाय पक्षतावच्छेदकवैशिष्ट्यान्तर्भाव आवश्यक इति तदन्तर्भावाभिप्रायेणस्थलान्तरे व्यावृत्तिमाह। यत्रेति। पक्षेति। पक्षस्य ताद्रूप्येण पक्षतावच्छेदकप्रकारेण यत्र दृष्टान्ततयोपन्यासस्तत्रोदाहरणस्य-साध्यस्य वा ताद्रूप्येण-साध्यतावच्छेकरूपेण

एवेति मणिकारस्वरसलाभः। ननु निगमनस्याबाधितत्वादिबोधजनकत्वं न युक्तं, निगमने तद्वाचकपदाभावादित्यत आह। **उदीच्यतद्बोधेनापीति। लक्षणादरः** लक्षणावृत्तेरादरः। **तद्विषयकतया।** अबाधितत्वादिविषयकतया। **पञ्चम्यर्थभागस्य।** विशिष्टधूमज्ञानज्ञाप्यत्वस्य **तथात्वाप्रतिपादने।** अतिरिक्तविषयकत्वाप्रतिपादने। **तस्य चेति।** विशिष्टहेतुसम्बन्धस्य चेत्यर्थः।

इतरत्वस्य केवलान्वयितया बाधमाशंक्याह। **इतरादीति।**

अत्र च इतरपदादेव साध्यनिर्देशः, उदाहरणे च पृथिवीतरपदात्, इति वैषम्यात्कथं तस्य न्यायावयवत्वमित्यत आह। **प्रतिज्ञादाविति।** एकेनैव

यत्र वा पर्वतत्वाद्यवच्छेदेन साध्यसिद्धेरुद्देश्यतायामेतत्पर्वतत्वादिना दृष्टान्तस्योपन्यासस्तत्रोदाहरणस्य।

हेतुतया यत्रोपन्यासस्तत्रोपनयस्य वारणाय तदित्यर्थः। रूपान्तरेण पक्षसाध्ययोर्दृष्टान्तहेतुत्वाभ्यामुपन्यासे दर्शिताऽन्यूनविषयकत्वाऽसम्भव इति ताद्रूप्येणेति। ननु पक्षे साध्यस्य निश्चयदशायामेव तादृशदृष्टान्तहेतुत्वसम्भव इति तत्र संशयाभावान्न्याय एव न सम्भवतीत्यत आह। तादृशसिषाधयिषयेति। जल्पस्थले संशयस्याऽऽवश्यकत्वेऽपवादस्थले न तथेति संशयमन्तरेणाऽपि अनुमित्साधीनानुमितिनिर्वाहाय न्यायप्रयोगसम्भवादिति भावः।

ननु सिषाधयिषया न्यायप्रयोगोपगमे पञ्चम्यर्थहेतुत्वे यादृशसम्बन्धेन प्रकृत्यर्थस्याऽन्वयस्तत्सम्बन्धेन वह्निसाध्यकहेतुत्वपक्षकवह्निहेतुक न्यायान्तर्गत-हेत्ववयवेऽतिव्याप्तिदुर्वारैवेति सिषाधयिषया न्यायप्रयोगो नाङ्गीकर्त्तव्य इत्यत उक्तव्यावृत्तिर्न सङ्गच्छते इत्यतः स्थलान्तरमनुसरति यत्र वेति। पर्वतत्वसामानाधिकरण्येन साध्यसिद्धेर्यत्रोद्देश्यता तत्रैतत्पर्वतत्वेनापि दृष्टान्तता न सम्भवति एतत्पर्वतत्वेन साध्यवत्तानिश्चयस्यापि तादृशानुमिति-विरोधित्वादतः पर्वतत्वावच्छेदेनेति। तत्रोदाहरणस्येति। यद्यपि पर्वतत्वावच्छेदेन वह्निमत्तावगाहिन्यामनुमितौ पर्वतत्वव्यापकत्वस्य वह्न्यंशे भानात्तादृशदृष्टान्त-घटितोदाहरणजन्यबोधे च तदभानादुद्देश्यानुमितिन्यूनविषयकत्वमेव तथापि पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूप-निर्वाच्यमन्यूनविषयकत्वमक्षतमेवेति भावः।

समानानुपूर्वीकपदेनैव साध्यादिनिर्देश इति नियमो न सर्वत्रेत्यर्थः। प्रकृतानुमित्यनिवर्त्त्यसंशयाऽनिवर्त्तकत्वरूपाऽनतिरिक्तविषयकत्वस्य सत्त्वदशायां कीदृशमन्यूनविषयकत्वं निवेश्यते इति पृच्छति। **अन्यूनविषयकत्वं हीति सर्वस्मादिति।** अस्य च पक्षतावच्छेदककोटावनिवेशे हेत्ववयवेऽतिव्याप्तिर्न सम्भवति, तज्जन्यबोधे सर्वज्ञानज्ञाप्यत्वस्य प्रकृतानुमित्यतिरिक्तस्य भानादतः सर्वस्मादिति तत्रोक्तम्। एवं च प्रकृतानुमितावपि सर्वज्ञानज्ञाप्यत्व-भानाद्धेतुजन्यबोधेऽपि तद्भानेऽनतिरिक्तविषयकत्वमक्षतमिति भावः। एवं पञ्चम्यर्थस्यापि तत्कोटौ निवेशे इदमेव प्रयोजनं बोध्यम्। **अतिव्याप्तेरिति।** हेत्ववयवमात्रविषयकज्ञानेऽपि पक्षतावच्छेदकविशिष्टविषयकत्वसत्त्वात्।

यद्यपि पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छि-वैशिष्ट्यावगाहित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयतानिवेशे उदाहरणैकदेशे एव तादृशविषयता न तु समुदाये इति न्यायाऽवयवत्व-निवेशान्नातिप्रसङ्गः। तथापि प्रतिज्ञामात्राऽघटकत्वगर्भ न्यायावयवत्वं प्रकृतलक्षणे प्रविष्टम्, तच्च यथायं पर्वत इत्युदाहरणैकदेशेऽपीत्याशयः।

अवच्छेदकावच्छेदेनाऽनुमितिस्थलीयन्यायनिविष्टप्रतिज्ञालक्षणेऽवच्छेदका-वच्छेदेन साध्यवैशिष्ट्यावगाहित्वरूपाऽन्यूनविषयकत्वनिवेशने नैतद्द्वयावृत्ति-सङ्गतिरित्यपरितोषेण व्यावृत्त्यन्तरमाह। सत्यन्तस्येति। अयमाशयः। एतल्लक्षणघटकन्यायावयवत्वशरीरे उभयघटकभागद्वयाऽघटितत्वं न निवेशनीयम्, अनतिरिक्तविषयकत्वनिवेशेनैवं तादृशभागद्वयघटितसमुदायेऽति-प्रसङ्गवारणात्।

न च शब्दज्ञानस्यैव शाब्दबोधजनकतया जनकत्वमत्र जनकज्ञानविषयत्व-मेव वाच्यम्, एवं च तादृशसमुदायविषयकज्ञानमप्येकदेशप्रतिज्ञाविषयकत्वेन तथाविधबोधजनकमिति समुदायेऽतिप्रसङ्ग इति वाच्यम्। तादृशबोधजनकता-वच्छेदकीभूतयत्किञ्चिदेकज्ञानविषयितानिरूपकवर्णसमुदायत्वस्यैव

तथाच। पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्ट-वैशिष्ट्यावगाहित्वरूपाऽन्यूनविषयकत्वनिवेशे। दीधितौ **तेन।** यन्न पृथिवीतरेभ्यो भिद्यते तन्न पृथिवीत्युदाहरणेन। **अतिव्याप्तत्वादिति।** अनतिरिक्तविषयकत्वनिवेशेऽपि शक्तिभ्रमादिजन्यतादृशबोधजनकत्व-मादायोपनयादावतिव्याप्तिवारणाय शक्तिभ्रमाजन्यत्वनिवेशस्याऽवश्यकत्वात्। **दीधितौ। तात्पर्यभ्रमेणेति।** नञ्पदं यत्पदार्थजलादिविशेषितस्वार्थं बोधयतु इति तात्पर्यभ्रमेणेत्यर्थः। भूतलं यद्भिन्नं तमानयेत्यादौ तात्पर्यं प्रसिद्धम्।

दीधितौ। **तथात्वसम्भवः।** पक्षतावच्छेदकविशिष्टे प्रकृतसाध्यता-वच्छेदकविशिष्टवैशिष्ट्यविषयकबोधजनकत्वसम्भवः। **अनुभवविरुद्धतयेति।** जलं गन्धवद्द्रव्यभिन्नमित्येवान्वयबोध इति चिन्त्यम्। **अनुभवविरुद्धतयेति।** पाकानुकूलकृत्यभाववांश्चैत्र इत्यन्वयबोधः। **आख्यातार्थभानस्येति।** अभावप्रतियोगितावच्छेदकतया भासमानस्वातिरिक्तो यो धर्मस्तद्धर्मावच्छिन्नांशे आख्यातार्थोऽभावप्रतियोगितावच्छेदकतया न भासते इत्यर्थः। **इतरविशेषणतया।**

विवक्षणीयत्वात्। न च तादृशवर्णसमुदायत्वं तादृशवर्णत्वव्यापकसमुदायत्वं, तादृशं च प्रतिज्ञाहेतुसमुदायत्वमपीति तत्समुदायेऽतिप्रसङ्ग एवेति तादृशभागद्वयघटितत्वमवश्यमेव निवेश्यमिति वाच्यम्। अनतिरिक्त-पदसार्थक्याय तादृशयत्किञ्चिद्ज्ञानविषयताशालिवर्णत्वसमनैयत्यमेव निवेश्य प्रतिज्ञाहेत्वादिसमुदायत्वस्य वारणीयत्वात्। समानार्थकप्रतिज्ञाद्वयादि-विषयकयत्किञ्चिद्ज्ञानविषयताश्रयवर्णत्वसमनैयत्यस्य तादृशप्रतिज्ञाद्वयादि-पर्याप्तसमुदायत्वे सत्वेऽपि न क्षतिः, तदुभयादावपि प्रतिज्ञाव्यवहारात्। अपि तु प्रतिज्ञैकदेशस्यापि तादृशबोधनिष्ठवह्निसम्वन्धिबुद्धित्वाद्य-वच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतयत्किञ्चिदेकज्ञानविषयता-श्रयवर्णसमुदायत्वमादायैव प्रतिज्ञात्वप्रसङ्ग इति प्रतिज्ञाद्यघटकत्वं प्रतिज्ञामात्राऽघटकत्वं वा निवेशनीयम्। अन्यूनाऽनतिरिक्तविषयकशाब्द-बुद्धित्वस्य किञ्चिज्जन्यतानवच्छेदकतया तदवच्छिन्ननिरूपितजनकता-निवेशाऽसम्भवात्।

इतरो-भेदसादृश्यादि**तद्विशेषणं**-पृथिवी चैत्रादि-तद्विशेषणतयेत्यर्थः। **तद्भानस्येति**। आख्यातार्थभानस्येत्यर्थः।

एवकारव्यवच्छेद्यमाह। **नन्विति**। ननु एतादृशाऽन्यूनविषयकत्वोक्तौ प्रमेयनिष्ठं हेतुत्वं प्रमेयं प्रमेयादित्यत्र हेत्ववयवेऽतिव्याप्तिःप्रागभिहितैवेति कथं पुनस्तादृशाऽन्यूनविषयकत्वोक्तिःसङ्गच्छते इति चेन्न। नवीनमते ज्ञाप्यत्वस्यैव पञ्चम्यर्थत्वात्, तन्मते प्रमेयादिति हेतुवाक्यात्प्रमेयनिष्ठहेतुत्व-बोधाभावान्न तत्रातिव्याप्तिरिति तन्मताबलम्बनेन तदुक्तिसङ्गतिः। न च तन्मतेऽपि प्रमेयज्ञाप्यत्वं प्रमेयं प्रमेयादित्यत्र हेत्ववयवेऽतिव्याप्तिःशंक्या, नामार्थधात्वर्थयोरभेदातिरिक्तसम्बन्धेन साक्षादन्वयाभावात्प्रमेयपदस्य प्रमेयविषयके लाक्षणिकतया तदर्थस्य धात्वर्थज्ञानेऽभेदान्वयावश्यकत्वेन यादृशधर्मावच्छिन्नः प्रतिज्ञया बोध्यस्तादृशधर्मावच्छिन्नविषयकबोधजनकत्वस्य तादृशहेत्ववयववाक्येऽसम्भवात्। विषयत्वं प्रमेयं प्रमेयादिति हेतुवाक्यस्या-तिरिक्तविषयकबोधजनकतयैव वारणादिति ध्येयम्। **एवञ्च**। पक्षतावच्छेदक-विशिष्टविषयकत्वे सति साध्यतावच्छेदकविशिष्टविषयकत्वरूपाऽन्यून-विषयकत्वनिवेशे च। **दर्शितव्यतिरेक्युदाहरणेति**। यन्न पृथिवीतरेभ्यो

सत्यन्तस्य चाऽवयवाऽघटकन्यायान्तर्गतत्वपरतया हेत्वन्तस्याऽयमादिनिगमनान्तभागस्य वारणाय तत्।

इत्थं चाऽननुषङ्गपक्षेऽप्ययं तस्माद्वह्निमानिति भागे प्रतिज्ञादिहेत्वन्तभागेऽपि व्यावृत्तिः सम्भवतीत्याशयेनाह सत्यन्तस्य चेति। अवयवाऽघटकेति। न च तदुपादानेऽपि धूमादालोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञार्थमात्रविषयकबोधनिष्ठ-धूमविशेषितहेतुत्वविषयकशाब्दत्वावच्छिन्नकारणधूमादिहेतुविषयकज्ञान-विषयतामादायाऽवयवाऽघटके तादृशहेतावतिव्याप्तिवारणायाऽनतिरिक्तविषयक-बोधनिष्ठपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्ट-वैशिष्ट्यावगाहित्वरूपाऽन्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकता-वच्छेदकयत्किञ्चिद्ज्ञानविषयितानिरूपकवर्णसमुदायत्वनिवेशस्याऽवश्यकतयाऽवयवाऽघटकत्वनिवेशनं निष्प्रयोजनमिति वाच्यम्। तादृशहेतुवारणायाऽवयवाऽघटकेत्यनेनाऽवयवैकदेशमात्रविषयकज्ञाननिष्ठजनकताव्यावृत्तावयवत्व-पर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मव्यापकविषयताकान्यज्ञानवृत्तित्वावच्छिन्नभेदस्यैवा-न्यूनानतिरिक्तविषयकबोधजनकतायां विवक्षणीयत्वात्।

भिद्यते तन्नपृथिवीत्युदादाहरेणेत्यर्थः। अनिवेशादिति। पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिशाब्दत्वस्य कदाचित्कार्यता-वच्छेदकत्वेऽपि निरुक्तान्यूनविषयकशाब्दत्वस्यातथात्वेन निवेशाऽसम्भवा-दित्यर्थः। नन्वेतादृशान्यूनविषयकत्वनिवेशे उक्तातिव्याप्तिरत आह। **अथवेति। न्यायान्तर्गतत्वमेवेति।** एवकारेण न्यायावयवत्वव्यवच्छेदः। तथा च तादृशोदाहरणैकदेशेऽतिव्याप्तिवारणायाऽनतिरिक्तविषयकत्वनिवेश इति भावः। **उदाहरणे।** यो यो द्रव्यकर्मान्यत्वे सति सत्तावान् स गुणो यथा घटशब्दो गुण इत्याकारके। **तत्र।** दृष्टान्तघटकघटशब्दे। तथाचानुमित्यन्यूनाऽनतिरिक्तविषयक-ज्ञानजनकत्वस्यैवोपादाने उक्तदृष्टान्तघटक घटशब्देऽतिव्याप्तिः, तद्विशेष्यकगुणत्वप्रकारकप्रत्यक्षे विषयविधया तादृशशब्दस्य जनकत्वात्। शाब्दपदे दत्ते च शाब्दबोधस्य हेतुवैशिष्ट्यावगाहित्वान्नातिव्याप्तिः **तादृशोदाहरणैकदेशे यन्न** पृथिवीतरेभ्यो भिद्यते तन्न पृथिवीत्युदाहरणैकदेशे। **तज्जन्यबोधस्य।** उदाहरणजन्यबोधस्य। **साध्याऽप्रकारकत्वादिति।** अभावे प्रतियोगितासम्बन्धेन भेदस्य प्रकारत्वात्।

अवयवत्वं चेह न्यायान्तर्गतत्वविशेषणशून्यम्। तेन प्रतिज्ञासमानाकारोदासीनवाक्यज्ञाने प्रतिज्ञाज्ञानीयकारणतायाः सत्वेऽपि तत्सङ्ग्रहः, तादृशोदासीनवाक्येऽपि तथाविधावयवत्वपर्याप्तेः। वस्तुतस्तु अवयवत्वघटकविशेष्यदलपरित्यागमात्रेणैव व्यावृत्तिः सङ्गच्छते इति तादृशजनकतापर्यन्तनिवेशने प्रतिज्ञाघटकत्वदलपरित्यागसम्भवेऽपि तत्परित्यागस्य प्रकृतानुपयुक्तत्वमित्येतल्लाभायैवाऽवयवाघटकेत्यभिहितम्।

एवमपि। साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकमात्रविशिष्टसाध्यप्रकारकत्वनिवेशेऽपीत्यर्थः। अतिप्रसङ्ग इति। यन्न पृथिवीतरान्यदित्युदाहरणैकदेशात्मकवाक्यजन्यबोधस्य स्वरूपसंम्सर्गेण पृथिवीतरभेदवद्भिन्नं यद् भवति इत्याकारकतया साध्यीभूतस्य पृथिवीतरभेदस्य साध्यतावच्छेदकीभूतस्वरूपसम्सर्गेणाधिकरणे प्रकारतया भासमानत्वात् अन्यपदस्य भेदाधिकरणार्थकत्वात् इति तु न युक्तम्, किन्तु इतरभेदो निरूपितत्वसंसर्गेणाख्यातार्थाश्रयत्वे प्रकारः इतरभेदाश्रयत्वाभाववद् यद् भवति तन्न पृथिवीतिबोधस्य सर्वानुभवसिद्धत्वात्, तथाच साध्यतावच्छेदकसम्सर्गेण साध्यप्रकारकत्वाभावान्नातिव्याप्त्यवसर इति ध्येयम्। **विशेष्यकत्वावच्छेदेनेति**। अन्यूनविषयकं सदनतिरिक्तविषयकमित्युद्देश्यविधेयभावमहिम्नाऽवच्छेद्यावच्छेदकभावलाभः। **तादृशोदाहरणेति**। यन्न पृथिवीतरान्यत् तन्न पृथिवीत्युदाहरणेत्यर्थः। **भागजन्यबोधस्येति**। पृथिवीतरान्यदिति भागजन्यबोधस्येत्यर्थः। **तादृशेति**। पक्षविशेष्यकत्वावच्छिन्नेत्यर्थः। **भागवारणायेति**। स्पन्दत्वव्याप्यस्पन्दत्ववानयमित्युपनयस्य स्पन्दत्ववानयमिति भागस्येत्यर्थः। **तस्मादित्यतिरिक्तांशे इति**। अयं तस्माद्वह्निमानिति निगमनीयेऽयं वह्निमानित्यंशे इत्यर्थः। **व्यवहितयोरिति**। आसत्त्यभावेनेत्याशयः। **उक्तस्थलेऽपि**। निगमनेऽपि।

साध्यवत्तालाभादिति। साध्यवत्ताज्ञानादित्यर्थः। **एतन्मते**। अननुषङ्गपक्षे। तस्मादितरेभ्यो भिद्यते इत्येव निगमनोपगमात्। इयं तस्मान्नेतराणि इति तु न, पक्षपदघटिततया सम्प्रदायविरोधात्। न्यूनतां शङ्कते। **यद्यपीति**। साध्यसामानाधिकरण्यघटकाऽधिकरणस्य साध्याधिकरणत्वेन निवेशेऽधिकरणत्वावच्छिन्ने साध्यभानं व्युत्पाद्य साध्येन रूपेण तन्निवेशे

केचित्तु यत्र प्रतिज्ञैकदेशस्यापि कथञ्चित्प्रतिज्ञासमानार्थकत्वं सम्भवति तत्रैकदेशेऽतिप्रसङ्गवारणायाऽवयवाऽघटकत्वनिवेशनमावश्यकमित्याहुः।

निरवच्छिन्ने तद्भानमाह। **विशेषरूपानवच्छिन्ने इति। वक्ष्यमाणहेतुवारणायेति।** तज्जन्यबोधे च पञ्चम्यर्थे प्रमेयभाने प्रमेयत्वस्यापि भानेन साध्यतावच्छेदकीभूतप्रमेयत्वत्वविशिष्टप्रमेयत्वरूपसाध्यस्य प्रमेयरूपपक्षे वैशिष्ट्यावगाहिजनकत्वस्य हेतौ सत्त्वादतिव्याप्तिवारणायेत्यर्थः। **आवश्यक इति।** तथा च हेतुजन्यबोधस्य प्रमेयांशे निधर्मितावच्छेदकतया पक्षतावच्छेदकवैशिष्ट्यविरहान्नातिव्याप्तिरिति भावः। **यत्तु** पक्षमुख्यविशेष्यकत्वनिवेशान्नातिव्याप्तिरिति। तन्न। प्रमेयाद्वाच्यवद्धेतुत्वं तादात्म्येन "स्वरूपसम्बन्धेन वा" प्रमेयवत् प्रमेयादित्यत्र प्रमेयादिति हेत्ववयवेऽतिव्याप्तेः। साध्यतावच्छेदकसम्बन्धनिवेशस्यैतद्दलेऽनिवेशस्य वक्ष्यमाणत्वात्। अस्मन्मते पक्षतावच्छेदकतापर्याप्तिनिवेशान्नातिव्याप्तिः। **तदन्तर्भावेण।** पक्षतावच्छेदकान्तर्भावेण। **संशयाऽभावादिति।** संशये सत्येव जिज्ञासोदयादिति भावः। सन्दिग्धेऽर्थे न्यायः प्रवर्तते इति सिद्धान्तात्। **जल्पेति।** विपरीतोद्भावकपरविजिगीषया न्यायप्रयोगो जल्पः। **वादेति।** तत्वबुभुत्सोः कथा वादः। प्रथमतः संशयनिवर्तकसाध्यनिश्चयसत्त्वेऽपि अनुमित्सैवाऽनुमितिचरमकारणपरामर्शप्रयोजकन्यायसम्पादिकेति भावः।

यादृशसम्बन्धेनेति। हेतुत्वं वह्निमद्वह्नेरित्यादौ निरूपितत्वं सम्बन्धः। **उक्तव्यावृत्तिरिति।** अनतिरिक्तविषयकत्वव्यावृत्तिरित्यर्थः। **निर्वाच्यमिति।** अन्यूनविषयकत्वशरीरे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्याऽनिवेशादिति भावः।

यद्यपीति। जन्यतेति। उदाहरणवारणाय जन्यताविषयतयोर्निवेशः। **प्रतिज्ञामात्रेति।** प्रतिज्ञात्वसमानाधिकरणत्वे सति प्रतिज्ञात्वावच्छिन्नभेदानुयोगितानवच्छेदकधर्मवत्त्वमर्थः। हेत्वाद्यघटकत्वं तु न निवेश्यते प्रयोजनाभावादिति भावः। ननु धूमज्ञानज्ञाप्यवह्निवैशिष्ट्यावगाहिबोधमादाय प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिरत आह। **अनतिरिक्तेति। समुदाये।** प्रतिज्ञाहेतुसमुदाये।

तथाविधबोधजनकमिति। अन्यूनाऽनतिरिक्तविषयकबोधजनकमित्यर्थः। प्रतिज्ञामात्रविषयकेति यावत्। स च प्रतिबन्धकवशाद्धेत्वर्थाविषयको बोध्यः।

यद्यपि सर्वमभिधेयं प्रमेयमित्यादावतिरिक्ताऽप्रसिद्धिः

न च कोटयप्रसिद्ध्या प्रमेयं न वेति विप्रतिपत्तेः संशयस्य

तदसत्। प्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधकताया एकदेशे सम्भवेऽपि तन्मात्रस्य तथाविधबोधपरत्वाभावात्, तथात्वे समुदायप्रयोगानुपपत्तेः। कथञ्चित्प्रयोगेऽपि वैयर्थ्येन तत्र समुदायमन्तर्भाव्यन्यायत्वानङ्गीकारात्। अप्रकृतार्थपरवाक्यवारणाय च वास्तवतथाविधतात्पर्यसत्ताया लक्षणे निवेशनीयतया एकदेशमात्रस्य तादृशार्थपरत्वाभावेनाऽतिप्रसङ्गानवकाशादिति। हेत्वन्तस्येति। कथिताऽन्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितजनकता-निवेशेन तत्तद्भागप्रतिपाद्यविशिष्टार्थबोधजनकत्वमादाय केवलहेत्वादावति-व्याप्तिर्न सम्भवति तादृशजनकताश्रयत्किञ्चिज्ज्ञानविषयवर्णसमुदायत्वस्य तत्रापर्याप्तेरतो निगमनमात्रं हेतुमात्रं चोपेक्षितम्।

अन्यूनाऽनतिरिक्तविषयकेत्यस्य प्रकृतानुमितिविषयस्यान्यूनविषयः सन्ननतिरिक्तो विषयो यस्येति व्युत्पत्तेरनुमितिविषयनिष्ठभेदप्रतियोगिता-नवच्छेदकत्वे सति अनुमितिविषयातिरिक्तावृत्ति यद्विषयत्वं तत्त्वमिति यथाश्रुतार्थमाक्षिपति। यद्यपीति। यद्यपि प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृत-

---

तादृशबोधेति। अन्यूनाऽनतिरिक्तविषयकबोधेत्यर्थः। **वर्णत्वव्यापकेति।** एतन्निवेशनन्तु प्रतिज्ञैकदेशाऽतिव्याप्तिवारणायैवेति ध्येयम्।

तादृशं चेति। तादृशवर्णत्वव्यापकं चेत्यर्थः। **अवश्यमेवेति।** तथा वाऽनतिरिक्तपदवैयर्थ्यमिति भावः। **अनतिरिक्तपदसार्थक्यायेति।** तथा च तादृशान्यूनविषयकबोधे अनतिरिक्तविषयकत्वविशेषणदाने एव तादृशसमुदायत्वे समनैयत्यनिवेशनप्रयोजनमन्यथा प्रतिज्ञाहेतुसमुदायस्य तेनैव वारणे वक्ष्यमाणव्यावृत्त्यसङ्गतेः तत्पदं व्यर्थं स्यादिति भावः। **वर्णत्वसमनैयत्यमेवेति।** न तु व्यापकत्वमित्यर्थः। ननु तादृशवर्णत्वव्याप्यत्वमेव कुतो न निवेश्यं, एकदेशातिव्याप्तिवारणन्तु प्रतिज्ञाद्यघटकत्वदलेनैव सम्भवतीति वाच्यम्। एकप्रतिज्ञाऽपरप्रतिज्ञैकदेशघटितसमुदायेऽतिव्याप्तेः, तत्समुदायत्वे तादृशप्रतिज्ञाद्वयविषयकसमूहालम्बनज्ञानीयतादृशजनकतावच्छेदकविषयता-श्रयवर्णत्वव्याप्यत्वसत्त्वात् प्रतिज्ञाद्यघटकत्वाच्च। यद्वा वक्ष्यमाणप्रतिज्ञा-

साध्यतावच्छेदकावच्छिन्नसाध्यकयत्किञ्चिदनुमित्यविषयविषयकत्वं पवतो वह्निमानित्यादिप्रतिज्ञाजन्यनिखिलबोधानामेवेति तादृशानुमितिविषयत्व-सामान्याभावो विवक्षणीयः, तथा च केवलाभिधेयत्वाद्यवच्छिन्नपक्षक-स्थलेऽप्यतिरिक्ताऽप्रसिद्धिरस्त्येव। तथापि अप्रसिद्धि स्फुटीकतुम् अभिधेयत्वाद्य-वच्छिन्नपक्षकप्रमेयत्वादिसाध्यकस्थले विश्वमेवाऽनुमितिविषय इत्येतल्लाभाय सर्वमित्युक्तम्। सर्वेभ्यो दर्शपूर्णमासावित्यत्रेव प्रकान्तकतिपयपदार्थमात्रवृत्ति-सर्वत्वावच्छिन्नतात्पर्येणाऽपि विशेष्यवाचकपदान्तराऽसमभिव्याहृतसर्वपद-प्रयोगसम्भवात्सर्वं प्रमेयमित्युक्तावनुमितिविषयतायाः केवलान्वयित्वाऽलाभाद-भिधेयमित्युक्तम्। एवं च किञ्चिद्धर्मावच्छिन्नांशेऽभेदेन स्वार्थविशेषण-कबोधपरसर्वशब्दस्य तद्धर्मव्यापकविधेयव्याप्यसर्वत्वबोधकताव्युत्पत्तेरभिधेयत्व-व्यापकसर्वत्वलाभान्नानुमितेः कतिपयवस्तुमात्रविषयकत्वशङ्केति भावः। अतिरिक्ताप्रसिद्धिः। प्रकृतानुमितिविषयातिरिक्ताऽप्रसिद्धिः।

मात्राऽघटकत्वनिवेशकल्पे धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादि-न्यायीयहेतुघटकैकदेशेऽतिव्याप्तिवारणाय समनैयत्यशरीरे व्यापकत्वनिवेशः।

निवेश्येति। अन्यथा प्रतिज्ञाहेतुसमुदायस्योक्तरीत्यैव वारणे तन्निवेश नमनर्थकं स्यादित्यर्थः। **अत्रेदं बोध्यम्।** एतत्कल्पे प्रतिज्ञाहेतूभयघटक भागद्वयाघटितत्वमात्रं निवेश्यं, न तु उभयघटकभागद्वयाघटितत्वचतुष्टयं, प्रयोजनाभावात्। तथा च यद्यपि तदुपादानेऽपि अयमादिनिगमनान्त-वारकतयाऽनतिरिक्तविषयकत्वसार्थक्यसम्भवाद् हेत्वन्तावारणेऽपि न क्षतिरिति तत्त्यागप्रदर्शनं व्यर्थम्, तथापि तेनैव हेत्वन्तवारणात्पश्चात्तद्वैयर्थ्यमभिप्रेत्य प्रथमत एव तत्त्यागो दर्शितः। नन्वेवं समानार्थकप्रतिज्ञाद्वयादिविषयकज्ञानस्य निर्वाच्याऽन्यूनाऽनतिरिक्तविषयकयत्किञ्चिच्छाब्दबोधजनकतया तत्रातिव्याप्ति-रित्याशङ्कामिष्टापत्त्या निराकुरुते। **समानार्थकेति। उभयघटकेत्यादि-निवेशकल्पेऽपि।** तस्य लक्ष्यताया एव स्वीकारात्। तादृशसमुदायत्व-निष्ठन्यूनवृत्तित्वानिरूपकत्वविशेषणं तु अनतिरिक्तपदवैयर्थ्यभिया न मणिकृत्सम्मतमिति भावः। **तादृशबोधनिष्ठेति।** प्रकृतानुमित्य-न्यूनानतिरिक्तविषयकप्रतिज्ञाप्रतिपाद्यसम्पूर्णार्थविषयकबोधनिष्ठेत्यर्थः। **प्रतिज्ञामात्राऽघटकत्वमेवेति।** प्रतिज्ञात्वसमानाधिकरणत्वे सति प्रतिज्ञात्वाव-

चाऽयोगान्न तादृशी प्रतिज्ञा, प्रकृतानुमितिविषयतासमव्याप्तविषयताकत्वं, प्रकृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वा वक्तव्यमिति वाच्यम्। सकलाभिधेयवृत्तिधर्मवत् सकलाभिधेय-

---

प्रमेयत्वं पक्षनिष्ठाभावप्रतियोगि नवेति संशयसम्भव इत्यतस्तत्सङ्ग्रहायाऽन्यूनानतिरिक्तविषयकत्वमन्यथा निर्वक्ति। प्रकृतेति। स्वविषयताव्यापकप्रकृतानुमितिविषयताव्यापकविषयिताकत्वमित्यर्थः। स्वविषये अनुमितिविषयान्यूनत्वस्य स्वविषयत्वे तद्विषयताव्यापकत्वपर्यवसितत्वात्, स्वविषये अनुमितिविषयानतिरिक्तत्वस्य च तद्विषयत्वे स्वविषयताव्यापकत्वपर्यवसितत्वादिति भावः।

यद्यपि समूहालम्बनात्मकपर्वतपक्षकवह्निविधेयकानुमितिविषयतायाः विश्ववृत्तितया पर्वतो वह्निमानिति प्रतिज्ञाजन्यबोधो न तादृशानुमितिविषयतासमनियतविषयताक वाक्यान्तरसहिततद्ज्ञानस्य समूहालम्बनबोधजनकयत्किञ्चिद्ज्ञानविषयवर्णसमुदायत्वं न तन्मात्रपर्याप्तं यत्किञ्चित् प्रकृतानुमितिव्यक्तिविषयतासमनैयत्यस्य विवक्षणेऽपि च निगमनाद्यतिव्याप्तिर्दुर्वारैव, तज्जन्यबोधस्यापि पर्वतो वह्निमान् धूमज्ञानज्ञाप्यवह्निमांश्चेत्याकारकसमूहालम्बनानुमितिविषयतासमनियतविषयताकत्वात्। तथापि प्रकृतपक्षकप्रकृतसाध्यव्याप्यवत्तापरामर्शत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकविषयतात्वेन यद्विषयतासमनैयत्यं तत्त्वस्य विवक्षितत्वान्न दोषः।

च्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदको यो धर्मस्तद्भिन्नधर्मवत्त्वमेवेत्यर्थः। ननु अन्यूनाऽनतिरिक्तविषयकत्वावच्छिन्नजन्यतानिवेशेनैवैकदेशातिव्याप्तिवारणसम्भवे प्रतिज्ञामात्राघटकत्वनिवेशः किमर्थम् इत्याशङ्कां निराकरोति। **अन्यूनेति।**

इत्थं च। प्रतिज्ञामात्राऽघटकत्वमात्रस्य न्यायावयवत्वे च। अवयवाऽघटकत्वं च प्रतिज्ञाद्यघटकत्वं, प्रतिज्ञामात्राऽघटकत्वं वा। अत्राऽनतिरिक्तविषयकत्वोपादानेऽपि अन्यूनविषयकत्वावच्छिन्नजन्यतानिवेशावश्यकतां प्रदर्श्याऽवयवाघटकत्वनिवेशस्य वैयर्थ्यमाशङ्कते। **न चेति। तदुपादानेऽपि।** अवयवाऽघटकत्वोपादानेऽपि। अत्राऽनतिरिक्त-

विषयकत्वोपादानेऽपि अन्यूनविषयकत्वावच्छिन्नजन्यतानिवेशावश्यकतां प्रदर्श्याऽवयवाघटकत्वनिवेशवैयर्थ्यमाशङ्कते। **न चेति।** अन्यूनविषयकत्व-निष्ठावच्छेदकताकत्वमेव अन्यतायां निवेशनीयम्, नत्ववच्छेदकतापर्याप्तिरिति वक्ष्यते। अन्यथा प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिप्रसक्तेः, तादृशसमुदायजनितो यो विशिष्टवैशिष्ट्यावगाहिबोधस्तन्निष्ठविशिष्टवैशिष्ट्यावच्छिन्नजन्यताया निरुक्ताऽन्यूनविषयकत्वपर्याप्तजन्यतावच्छेदकताकत्वाभावात्।

व्यावृत्तेति। व्यावृत्तान्तमुपलक्षणम्। एकदेशवारणाय पर्याप्तिनिवेशः। अवयवत्वपर्याप्त्यवच्छेदकन्यायत्वप्रमेयत्वादिव्यापकविषयताकान्यत्वस्य प्रतिज्ञाज्ञाने सत्त्वेनाऽसम्भवः स्यादतो यत्किञ्चिदिति। तथा च प्रतिज्ञात्वावच्छिन्नविषयताया अवयवत्वपर्याप्त्यवच्छेदकीभूतप्रतिज्ञात्व-रूपयत्किञ्चिद्धर्मव्यापकतया प्रतिज्ञाज्ञाने तादृशविषयताकत्वसत्त्वेन न तादृशविषयताकान्यत्वमस्तीति हेत्वादिनिष्ठसमुदायत्वव्यापकविषयताक-भेदकूटनिवेशान्नासम्भवः।

न च पूर्वोक्तप्रतिज्ञामात्राघटकत्वदले प्रतिज्ञात्वसामानाधिकरण्याप्रवेशा-न्नातिव्याप्तिप्रसक्तिरिति किं तथाविवक्षणेनेति वाच्यम्। प्रतिज्ञामात्राऽघटकत्वं सम्पूर्णमेव निवेश्यमित्यभिप्रायात्। असम्भववारणाय व्यापकत्वनिवेशः। आनुपूर्व्यवच्छिन्नविषयताया व्यापकत्वानवच्छिन्नविषयताकान्यत्वनिवृत्तिः।

तथा च प्रकृतानुमित्यनतिरिक्तविषयकबोधनिष्ठप्रकृतपक्षतावच्छेदा-वच्छिन्नविशेष्यकप्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपान्यून-विषयकत्वावच्छिन्न" जन्यतानिरूपिता अथ चाऽवयवत्वपर्याप्त्यवच्छेदकय-त्किञ्चिद्धर्मव्यापकविषयताकान्यज्ञानवृत्तित्वावच्छिन्नभिन्ना या जनकता तदवच्छेदकविषयतेत्यादिः।

ननु धूमादालोकवान्पर्वतो वह्निमानित्यादौ धूमादिति हेत्ववयवेऽतिव्याप्तिः, धूमज्ञानज्ञाप्यत्वविषयकशाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकताया अपि तत्र हेतुत्वरूपयत्किञ्चिद्धर्मव्यापकविषयिताकान्यज्ञानवृत्तित्वावच्छिन्नभिन्नत्वात् इति चेन्न। हेत्ववयवसमानाकारप्रतिज्ञाघटकधूमादिति भागस्य विवक्षितहेतुत्वानाक्रान्तत्वेन तद्विषयकज्ञानस्य हेतुत्वव्यापकविषयताकान्यत्वात्। प्रतिज्ञाघटकधूमादिति भागज्ञानवृत्तिजनकतामपेक्ष्य धूमादिति हेत्ववयवविषयक-ज्ञानवृत्तिजनकताया अभेदात्। तथा च तादृशधर्मो हेत्ववयवविषयकज्ञान-

चाऽयोगान्न तादृशी प्रतिज्ञा, प्रकृतानुमितिविषयतासमव्याप्तविषयताकत्वं, प्रकृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वा वक्तव्यमिति वाच्यम्। सकलाभिधेयवृत्तिधर्मवत् सकलाभिधेय-

---

प्रमेयत्वं पक्षनिष्ठाभावप्रतियोगि नवेति संशयसम्भव इत्यतस्तत्सङ्ग्रहायाऽन्यूनानतिरिक्तविषयकत्वमन्यथा निर्वक्ति। प्रकृतेति। स्वविषयताव्यापकप्रकृतानुमितिविषयताव्यापकविषयिताकत्वमित्यर्थः। स्वविषये अनुमितिविषयान्यूनत्वस्य स्वविषयत्वे तद्विषयताव्यापकत्वपर्यवसितत्वात्, स्वविषये अनुमितिविषयानतिरिक्तत्वस्य च तद्विषयत्वे स्वविषयताव्यापकत्वपर्यवसितत्वादिति भावः।

यद्यपि समूहालम्बनात्मकपर्वतपक्षकवह्निविधेयकानुमितिविषयतायाः विश्ववृत्तितया पर्वतो वह्निमानिति प्रतिज्ञाजन्यबोधो न तादृशानुमितिविषयतासमनियतविषयताक वाक्यान्तरसहिततद्ज्ञानस्य समूहालम्बनबोधजनकयत्किञ्चिद्ज्ञानविषयवर्णसमुदायत्वं न तन्मात्रपर्याप्तं यत्किञ्चित् प्रकृतानुमितिव्यक्तिविषयतासमनैयत्यस्य विवक्षणेऽपि च निगमनाद्यतिव्याप्तिर्दुर्वारैव, तज्जन्यबोधस्यापि पर्वतो वह्निमान् धूमज्ञानज्ञाप्यवह्निमांश्चेत्याकारकसमूहालम्बनानुमितिविषयतासमनियतविषयताकत्वात्। तथापि प्रकृतपक्षकप्रकृतसाध्यव्याप्यवत्तापरामर्शत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकविषयतात्वेन यद्विषयतासमनैयत्यं तत्त्वस्य विवक्षितत्वान्न दोषः।

च्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदको यो धर्मस्तद्भिन्नधर्मवत्त्वमेवेत्यर्थः। ननु अन्यूनाऽनतिरिक्तविषयकत्वावच्छिन्नजन्यतानिवेशेनैवैकदेशातिव्याप्तिवारणसम्भवे प्रतिज्ञामात्राघटकत्वनिवेशः किमर्थम् इत्याशङ्कां निराकरोति। **अन्यूनेति।**

इत्थं च। प्रतिज्ञामात्राऽघटकत्वमात्रस्य न्यायावयवत्वे च। अवयवाऽघटकत्वं च प्रतिज्ञाद्यघटकत्वं, प्रतिज्ञामात्राऽघटकत्वं वा। अत्राऽनतिरिक्तविषयकत्वोपादानेऽपि अन्यूनविषयकत्वावच्छिन्नजन्यतानिवेशावश्यकतां प्रदर्श्याऽवयवाघटकत्वनिवेशस्य वैयर्थ्यमाशङ्कते। **न चेति। तदुपादानेऽपि।** अवयवाऽघटकत्वोपादानेऽपि। अत्राऽनतिरिक्त-

विषयकत्वोपादानेऽपि अन्यूनविषयकत्वावच्छिन्नजन्यतानिवेशावश्यकतां प्रदर्श्याऽवयवाघटकत्वनिवेशवैयर्थ्यमाशङ्कते। **न चेति।** अन्यूनविषयकत्व-निष्ठावच्छेदकताकत्वमेव अन्यतायां निवेशनीयम्, नत्ववच्छेदकतापर्याप्तिरिति वक्ष्यते। अन्यथा प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिप्रसक्तेः, तादृशसमुदायजनितो यो विशिष्टवैशिष्ट्यावगाहिबोधस्तन्निष्ठविशिष्टवैशिष्ट्यावच्छिन्नजन्यताया निरुक्ताऽन्यूनविषयकत्वपर्याप्तजन्यतावच्छेदकताकत्वाभावात्।

व्यावृत्तेति। व्यावृत्तान्तमुपलक्षणम्। एकदेशवारणाय पर्याप्तिनिवेशः। अवयवत्वपर्याप्त्यवच्छेदकन्यायत्वप्रमेयत्वादिव्यापकविषयताकान्यत्वस्य प्रतिज्ञाज्ञाने सत्त्वेनाऽसम्भवः स्यादतो यत्किञ्चिदिति। तथा च प्रतिज्ञात्वावच्छिन्नविषयताया अवयवत्वपर्याप्त्यवच्छेदकीभूतप्रतिज्ञात्व-रूपयत्किञ्चिद्धर्मव्यापकतया प्रतिज्ञाज्ञाने तादृशविषयताकत्वसत्त्वेन न तादृशविषयताकान्यत्वमस्तीति हेत्वादिनिष्ठसमुदायत्वव्यापकविषयताक-भेदकूटनिवेशान्नासम्भवः।

न च पूर्वोक्तप्रतिज्ञामात्राघटकत्वदले प्रतिज्ञात्वसामानाधिकरण्याप्रवेशा-न्नातिव्याप्तिप्रसक्तिरिति किं तथाविवक्षणेनेति वाच्यम्। प्रतिज्ञामात्राऽघटकत्वं सम्पूर्णमेव निवेश्यमित्यभिप्रायात्। असम्भववारणाय व्यापकत्वनिवेशः। आनुपूर्व्यवच्छिन्नविषयताया व्यापकत्वानवच्छिन्नविषयताकान्यत्वनिवृत्तिः।

तथा च प्रकृतानुमित्यनतिरिक्तविषयकबोधनिष्ठप्रकृतपक्षतावच्छेदा-वच्छिन्नविशेष्यकप्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपान्यून-विषयकत्वावच्छिन्न" जन्यतानिरूपिता अथ चाऽवयवत्वपर्याप्त्यवच्छेदकय-त्किञ्चिद्धर्मव्यापकविषयताकान्यज्ञानवृत्तित्वावच्छिन्नभिन्ना या जनकता तदवच्छेदकविषयतेत्यादिः।

ननु धूमादालोकवान्पर्वतो वह्निमानित्यादौ धूमादिति हेत्ववयवेऽतिव्याप्तिः, धूमज्ञानज्ञाप्यत्वविषयकशाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकताया अपि तत्र हेतुत्वरूपयत्किञ्चिद्धर्मव्यापकविषयिताकान्यज्ञानवृत्तित्वावच्छिन्नभिन्नत्वात् इति चेन्न। हेत्ववयवसमानाकारप्रतिज्ञाघटकधूमादिति भागस्य विवक्षितहेतुत्वानाक्रान्तत्वेन तद्विषयकज्ञानस्य हेतुत्वव्यापकविषयताकान्यत्वात्। प्रतिज्ञाघटकधूमादिति भागज्ञानवृत्तिजनकतामपेक्ष्य धूमादिति हेत्ववयवविषयक-ज्ञानवृत्तिजनकताया अभेदात्। तथा च तादृशधर्मो हेत्ववयवविषयकज्ञान-

निष्ठात्यन्ताभावाप्रतियोगि आकाशाभाववद्वा इदं द्रव्यमित्यादौ विशिष्टपक्षबोधके उपनयेऽतिव्याप्तेः।

नन्वेवं सति उक्तस्थलीयोपनयेऽतिव्याप्तिः, तज्जन्यबोधस्यापि विश्वविषयकत्वेन तथाविधानुमितिविषयतासमनियतविषयताकत्वादित्यतो विषयतापदस्य प्रकारत्वाभिप्रायेणान्यथा तदर्थं निर्वक्ति। प्रकृतेति। तादृशोपनय-जन्यबोधे प्रकारीभवतोऽभावत्वादेस्तादृशानुमितावप्रकारत्वान्न तत्प्रकारतायाः समनैयत्यमिति नातिव्याप्तिरिति भावः। सकलेति। सकलाभिधेयवृत्तिधर्मवदिदं द्रव्यमिति योजना। तादृशानुमिताविवैतत्स्थलीयोपनयजन्यबोधे विश्वस्यैवाभि-धेयत्वेन प्रकारतया तत्प्रकारतासमनीयत्वमक्षतमेवेति भवत्यतिव्याप्तिरितिभावः। ननु विशेषणानवच्छिन्नप्रकारतानां समनैयत्यं विवक्षणीयमतो नातिव्याप्तिः, उपनयजन्यबोधे अभावत्वादौ तादृशप्रकारतासत्वादुक्तानुमितेस्तादृशप्रकारता-याश्च तत्राऽसत्वादित्यतोऽनुमितावपि तेषां तथाविधप्रकारताघटनाय स्थलान्तरेऽतिव्याप्तिमाह। सकलाभिधेयेति। अभावत्वप्रतियोगित्वत्वादीनां स्वरूपतः पक्षतावच्छेदकत्वाद् भवति तथानुमितिरिति भावः।

वृत्तिजनकताया अभेदात्। तथा च तादृशधर्मो ·हेत्ववयवादिवृत्तिसमुदायत्वं, तत्र च न प्रतिज्ञाद्येकदेशमात्रविषयकज्ञानविषयत्वम्, आनुपूर्वीसाम्येऽपि समुदायत्वस्य भिन्नत्वात्।

ननु अवयवत्वं न्यायान्तर्गतत्वघटितं तत्पर्याप्त्यवच्छेदकं च न पर्वतो वह्निमानिति वाक्यत्वं तस्योदासीनसाधारण्यात्, किंतु तत्तद्वाक्यत्वं तथा च तत्तत्प्रतिज्ञाविषयतानामेव तद्व्यापकत्वात्तन्निरूपकान्यज्ञानवृत्तित्व-स्योदासीनज्ञानसाधारणकारणतायां सत्त्वादसम्भव इत्यत आह। **अवयवत्वं चेदमिति।** प्रतिज्ञाद्यघटकत्वदलसत्त्वेन धूमादित्येकदेशसमुदायत्वस्याऽवयवत्व-पर्याप्त्यवच्छेदकत्वेऽपि तद्व्यावृत्तिः। न चोदासीनवाक्यवृत्तिविषयताया अपि तादृशानुपूर्व्यवच्छिन्न विषयतात्वेन व्यापकत्वसम्भवान्न्यायान्तर्गतत्वोपादानेऽपि न क्षतिरिति वाच्यम्। एकदेशविषयताया विषयतात्वेन व्यापकतया प्रतिज्ञाघटकधूमादिति भागविषयताया वा तादृशानुपूर्व्यवच्छिन्नविषयतात्वेन व्यापकत्वादतिप्रसङ्ग इति स्वविषयतात्वेन व्यापकतानिवेशाद्वा, वाक्यभेदेन

द्रव्यमिति विपरीतकोटिप्रसिद्ध्यर्थम्। विशिष्टपक्षबोधक इति। उपनयस्थेदंपदेन विशेष्यमात्रपरामर्शेऽन्यूनविषयकत्वं न सम्भवतीति भ्रमनिराकरणाय। व्याप्तिशरीरे साध्यसाधनप्रकारेणैव तदधिकरणान्तर्भावः नत्वधिकरणत्वेनापि इत्यनुमितौ तस्य तत्त्वस्य वा स्वरूपतः प्रकारत्वविरहेऽपि नासङ्गतिः। हेतुरप्यत्रेदन्त्वं, समवायेन द्रव्यमेव वा बोध्यम्। गुणादेस्तत्त्वे हेतुतावच्छेदकगुणत्वादेः स्वरूपत उपनयजन्यबोधे भाने कथितप्रकारतासमनैयत्यानुपपत्तेः।

विषयताभेदात्।

केचित्तु तादृशजन्यतायामेवाऽवयवाघटकत्वं, तच्च तादृशबोधवृत्तियत्किञ्चिजन्यताशून्यज्ञानवृत्तिजन्यत्वानिरूपकत्वं, तत्प्रतिज्ञैकदेशधूमादिति पदज्ञानवृत्तिजनकतायास्तादृशजन्यताशून्यधूमविशिष्टहेतुत्वमात्रज्ञानवृत्तिजन्यतानिरूपकत्वान्नातिप्रसङ्ग इत्याहुः।

नन्वेवमग्रे पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहि अनुमित्यन्यूनविषयकत्वनिर्वचनविरोध इत्यत आह। **विशेष्यदलेति।** उभयघटकभागद्वयाघटितत्वेत्यर्थः। **व्यावृत्तिरिति।** अनतिरिक्तविषयकत्वेत्यादिः। **तादृशेति।** पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपाऽन्यूनविषयकत्वावच्छिन्नजन्यतानिरूपितेत्यर्थः। **तत्परित्यागस्य।** प्रतिज्ञाघटकत्वदलपरित्यागस्य। **प्रकृतानुपयुक्तत्वमिति।** तथाचाऽवयवाघटकेत्यपि व्यर्थमेव, परन्तु इदानीं उभयघटकेत्यादिदलवैयर्थ्यकथनेन व्यावृत्तिःसम्भवतीति अवयवाघटकत्ववैयर्थ्यसम्भवेऽपि तत्कथनमिदानीमनुपयुक्तं तदकथनेऽपि व्यावृत्तिसम्भवादित्यर्थः।

केचित्त्विति। अदितिः पुत्रवतीत्यादौ दितिः पुत्रवतीत्येकदेशवारणाय **समानेति। यत्र** रमाधवः पूज्यः, सदाशिवो वन्द्यः इत्यादौ। प्रतिज्ञैकदेशस्यापि। माधवः पूज्यः, शिवो वन्द्य इत्यस्यापि। रमेश्वरः पूज्य इत्यादौ मेश्वरः पूज्य इत्यादि तथाविधबोधजनकतावच्छेदकत्वेन तत्रेच्छाविषयविषयितां निवेश्य दूषयति। **प्रतिज्ञेति। तन्मात्रस्य। एकदेशमात्रस्य। तथाविधबोधपरत्वात्।** प्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधपरत्वाभावात्। **तथात्वे।** तादृशविशिष्टार्थबोधपरत्वे।

तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयत्वं तदन्यूनविषयत्वम्।

नचाऽभेदेन विषयतासमनैयत्यस्योक्तावनुमितिविषयतात्वसमनियतस्व-विषयतात्वकत्वोक्तौ नायं दोष इति वाच्यम्। हेत्वर्थघटितार्थकप्रतिज्ञाघटकन्या-यान्तर्गतहेतुजन्यबोधविषयतायामनुमितिनिरूपितविषयतात्वाभावादनुमितिविषयतात्व-व्याप्यस्वविषयतात्वकत्वाभावादेव तादृशबोधवारणसम्भवेनान्यूनविषयकत्वांश-वैयर्थ्यापत्तेः।

यदि मेश्वरः पूज्यः इत्यादिवाक्यात्तादृशबोधो जायतामितीच्छायामपि रमेश्वरः पूज्य इति प्रतिज्ञा तत्र तत्सार्थक्यशङ्कां निराचष्टे। **कथञ्चिदिति।** अनवधानतयेत्यर्थः। **न्यायत्वानङ्गीकारादिति।** तथाचाऽवयवा घटकत्वं व्यर्थमेवेति भावः। ननु तत्परत्वानिवेशे तत्पदसार्थक्यं स्यादित्यतस्तत्परत्वस्या-वश्यकतामाह। **अप्रकृतार्थपरेति।** तच्च नानार्थकहर्यादिपदघटितं लक्षणया जलाद्यर्थकवह्न्यादिपदघटितं च बोध्यम्।

वास्तवतथाविधतात्पर्यसत्ताया इति। तत्तदर्थबोधकत्वप्रकारकस्वानुकूल-कृतिसमानाधिकरणेच्छाविशेष्यताया इत्यर्थः इदं वाक्यममुमर्थं बोधयतु इति वक्तुरिच्छयैव वाक्यप्रयोगाद्वाक्ये तादृशतात्पर्यसत्तानिर्वाहः। **दीधितौ-हेत्वन्तस्याऽयमादिनिगमनान्तस्येति।** अयं तस्मात्तथेत्यस्येत्यर्थः। **वारणायेति।** तस्य पक्षे साध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकबोधजनकत्वादिति भावः। **तत्।** अनतिरिक्तपदम्।

दीधितौ—हेतोर्निगमनस्य च वारणाय इत्येव कथं नोक्तमित्यत आह। **कथितेति।** पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्ट-वैशिष्ट्यावगाहित्वरूपेत्यर्थः। **तत्तद्भागेति।** धूमादालोकवान्पर्वतो वह्निमानिति प्रतिज्ञाघटकहेतुसमानार्थकभागेत्यर्थः। तथाचाऽन्यूनानतिरिक्तविषयकेत्यादिनिरुक्तौ पक्षे साध्यविषयकत्वावच्छिन्नजन्यतोपादानस्यावश्यकतयाऽनतिरिक्तविषयक-त्वानुपादाने न कुत्रापि हेतावतिव्याप्तिरित्यर्थः। तत्तद्भागेत्यस्य तत्तद्धेत्वित्यर्थः। एतच्च प्रतिज्ञाद्यघटकत्वकथनं निरुक्तान्यूनविषयकत्वावच्छिन्नजन्यता-निवेशलाभायैव। तत्र पर्याप्त्यनिवेशान्नाऽनतिरिक्तपदवैयर्थ्यम्।

सर्वमभिधेयं प्रमेयमिति दीधितिकृदुक्तसर्वपदवैयर्थ्यं शङ्कते। **यद्यपीति।** **सामान्याभावोऽविवक्षणीय** इति। तथा च सामान्याभावविवक्षणे सर्वपदं

नहि साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयताबहिर्भूतविषयता अनुमितिनिरूपिता। समूहालम्बनानुमितिनिरूपितत्वमादाय नातिप्रसङ्गावकाशः प्रकृतपरामर्शजन्यतावच्छेदकविषयतात्वस्यैव निवेशनीयत्वादन्यथाऽसम्भवापातादिति।

उपनयविशेषेऽतिव्याप्त्यभिधानं चोपलक्षणपरम्। अन्यूनविषयकेत्यस्य निरुक्तार्थकत्वे सर्वस्मात्कालत्ववानयं कालपरिमाणवान् सर्वस्मादित्यत्र हेत्ववयवेऽप्यतिव्याप्तिर्बोध्या तज्जन्यबोधविषयताया विश्ववृत्तित्वेनानुमितिविषयताव्यापकत्वात्। एवं तादृशान्यूनानतिरिक्तविषयकत्वस्य किञ्चिज्जन्यतानवच्छेदकत्वेन तदवच्छिन्नजन्यताविवक्षणाऽसम्भवेन प्रतिज्ञाहेतुजन्यसमूहालम्बनबोधमादाय तन्निष्ठहेत्वर्थविषयकत्वावच्छिन्नजन्यतानिरूपितजनकताश्रये धूमादालोकवान् पर्वतो वह्निमानित्यादौ हेत्ववयवेऽतिव्याप्तिर्दुर्वारा, तस्या अनवच्छिन्नप्रकारताव्यापक तादृशप्रकारताकत्वविवक्षयापि वारणाऽसम्भवादित्यपि बोध्यम्। एतद्दोषवारणाय प्रथमतोऽन्यूनविषयकत्वमन्यथा निर्वक्ति। तथापि प्रकृतेति।

व्यर्थमिति भावः। **तथा च**। सामान्याभावविवक्षणे च। **केवलेति**। अभिधेयत्वसामानाधिकरण्येन तत्तदभिधेयेऽनुमितिसम्भवेऽपि तादृशानुमितिविषयत्वसामान्याभावस्याऽप्रसिद्धेरित्यर्थः। **स्फुटीकर्तुमिति**। सामान्याभावपर्यन्तविवक्षणेऽपि शिष्येण ग्राहयितुमित्यर्थः। सर्वमभिधेयमित्यत्राऽभिधेयपदप्रयोजनमाह। **सर्वेभ्य** इति। पुत्रपौत्रादिस्वर्गपश्वादिसर्वफलोद्देश्येनेत्यर्थः। कर्तव्यमिति शेषः। **प्रक्रान्तेति**। पूर्ववाक्यजन्यशाब्दबोधविषयत्वं पूर्वोपस्थितत्वं वा प्रक्रान्तत्वम्। यद्यपि मिलितानां तावत्फलानां न दर्शपौर्णमासकर्तव्यताप्रयोजककामनाविषयत्वं, सर्वपदेन मिलितत्वेन फलानुपस्थापनात्। तथापि यावद्धर्मावच्छिन्नाः प्रक्रान्ताः प्रत्येकं तावद्धर्मावच्छिन्नामेवोपस्थितौ वाक्यभेदप्रसङ्ग इति तावत्समुदायत्वरूपसर्वत्वेनोपस्थितिमात्रं फलता तु प्रातिस्विकरूपेणेति बोध्यम्। अत एव प्रत्येकफलकामस्यैव तत्राधिकार इति सिद्धान्तः। **सर्वत्वावच्छिन्नेति**। यावत्वावच्छिन्नेत्यर्थः। **केवलान्वयित्वाऽलाभादिति**। विशेष्यवाचकपदाऽसमभिव्याहृतसर्वपदस्य अन्योन्याभावप्रतियोगितानवच्छेदकविधेयव्याप्यपर्याप्तिकयावत्त्वावच्छिन्ने

एतच्च प्रकृतपक्षतावच्छेदकविशिष्टेत्वर्थकम्, तदनुपादाने प्रमेयाद्वाच्यत्ववानयं प्रमेयः प्रमेयादित्यादौ हेत्ववयवे, यत्किञ्चिद्धर्मावच्छिन्नत्वोपादानेऽपि घटान्यत्ववद्रूपघटान्यतरस्माद् घटान्यत्ववत्सधर्मा घटो घटान्यत्ववानित्याकारिका या सामानाधिकरण्यसम्बन्धेन घटान्यत्वसाध्यकप्रतिज्ञा तद्घटितन्यायान्तर्गते रूपघटान्यतरत्वावच्छिन्नांशे सामानाधिकरण्यसम्बन्धेन विशेषणतापन्नघटान्यत्वघटिततादृशसम्बन्धावच्छिन्नहेतुताके विशिष्टान्यतर-रूपहेतुप्रतिपादके हेत्ववयवेऽतिव्याप्तिः।

शक्तिः। सर्वं प्रमेयमित्यत्र अन्योन्याभावप्रतियोगितानवच्छेदकप्रमेयत्वव्याप्य-पर्याप्तिकयावत्त्ववन्तः प्रमेयाऽभिन्ना इति बोधः। एवं च अन्योन्याभाव-प्रतियोगितानवच्छेदकप्रमेयत्वव्याप्यपर्याप्तिकयावत्त्वस्य कतिपयपदार्थेष्वपि सत्त्वान्न केवलान्वयित्वलाभ इति भावः। **एवञ्चेति।** अभिधेयपदोपादाने चेत्यर्थः। **किञ्चिद्धर्मावच्छिन्नांशे।** अभिधेयत्वावच्छिन्ने उद्देश्यतावच्छेदका-वच्छिन्ने इति यावत्। स्वं सर्वपदं। तद्धर्मव्यापकेति उद्देश्यतावच्छेदक-व्यापकेत्यर्थः **व्युत्पत्तेरिति।** उद्देश्यवाचकपदसमभिव्याहृतसर्वशब्दस्य उद्देश्यतावच्छेदकव्यापकविधेयव्याप्यपर्याप्तिकयावत्त्वाच्छिन्ने शक्तिरिति व्युत्पत्तिः। **इति भाव इति।** सर्वमभिधेयं प्रमेयमित्यत्र अभिधेयत्वव्यापक-प्रमेयत्वव्याप्यपर्याप्तिकयावत्त्वाश्रयोऽभिधेयं प्रमेयाभिन्नमिति बोधः। तथा च जगन्मात्रवृत्तियावत्त्वमेवाऽभिधेयत्वव्यापकं, न कतिपयपदार्थमात्रवृत्तिया वत्त्वमिति तादृशसर्वपदस्य न कतिपयवृत्तियावत्त्वबोधकत्वमिति तत्त्वम्।

दीधितौ—न चेति। वाच्यमित्यनेनान्वयः। **कोटीति।** प्रमेयत्वाभाव-रूपेत्यादिः। सन्दिग्धे एव न्यायप्रवृत्तेर्विप्रतिपत्तेरनावश्यकत्वादाह। **संशयस्य चेति।** सन्दिग्धसाध्यके धर्मिण्येव न्यायप्रवृत्तेरिति भावः। संशयमाह। **प्रमेयत्वमिति। तत्सङ्ग्रहाय।** सर्वमभिधेयं प्रमेयमिति प्रतिज्ञासङ्ग्रहाय। द्विधाऽनुमितिविषयतानिवेशे गौरवादाह। **स्वेति।** स्वं शाब्दबोधः। अनुमिति-विषयताव्यापकत्वसम्पत्तये प्रकृतेति। तादृशविषयिताकशाब्दबोधजनकवाक्यत्वं फलितम्। **समूहालम्बनात्मकेति।** पर्वतो वह्निमान् सर्वमभिधेयं प्रमेयमित्याकारकेत्यर्थः। **तादृशानुमितीति।** समूहालम्बनानुमितीत्यर्थः। समूहालम्बनशाब्दबोधविषयतायास्तत्समनैयत्येऽप्याह। **वाक्यान्तरसहितेति।**

सर्वमभिधेयं प्रमेयमिति वाक्यसहितेत्यर्थः। **तज्ज्ञानस्य।** पर्वतो वह्निमानिति प्रतिज्ञाज्ञानस्य। निष्ठत्वं षष्ठ्यर्थः, अन्वयश्चास्य समुदायत्वे। **न तन्मात्र पर्याप्त।** न प्रतिज्ञामात्रपर्याप्तं किन्तु वाक्यान्तरसहितप्रतिज्ञायां। तथा च न प्रतिज्ञासङ्ग्रह इति भावः। **अथेदमसङ्गतम्,** वाक्यान्तरसहित प्रतिज्ञाजन्यसमूहालम्बनबोधनिष्ठसाध्यविशिष्टपक्षविषयकत्वावच्छिन्नजन्यतानिरूपित- जनकतावच्छेदकप्रतिज्ञामात्रविषयकयत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णसमुदायत्वस्य प्रतिज्ञामात्रे सत्त्वात्। मैवम्। तादृशबोधनिष्ठवह्निसम्बन्धिविषयकत्वावच्छिन्न- जन्यतामादायैकदेशेऽतिव्याप्तिवारणाय तादृशबोधनिष्ठा या या जन्यतेति विवक्षणावश्यकतया प्रतिज्ञासङ्ग्रहो दुःशक एव। नचैकदेशस्य न्यायावयववदलेनैव वारणं शंक्यम्। प्रतिज्ञाद्यघटकत्वाघटितस्यैव तस्य निवेश इत्यभिप्रायात्। **यत्किञ्चित्प्रकृतेति।** असमूहालम्बनप्रकृतेत्यर्थः। **तथापीति। यद्विषयतेति।** यत्पदं प्रतिज्ञाजन्यशाब्दबोधसामान्यपरम्। तथा च यादृशशाब्दबोधविषयत्वं प्रकृतपक्षकप्रकृतसाध्यव्याप्यवत्तापरामर्शजन्यता- वच्छेदकविषयतासमनियतं तादृशविषयत्वावच्छिन्नजन्यतानिरूपित- जनकतावच्छेदकविषयताश्रयवर्णसमुदायत्वं फलितम्।

एवं सति। अनुमितिविषयतासमव्याप्तविषयताकत्वनिवेशे सति। **उक्तस्थलीयोपनये।** सर्वमभिधेयं प्रमेयमित्यादिस्थलीयोपनये। प्रमेयत्वव्याप्य- हेतुमत्सर्वमभिधेयमित्याकारके। **तज्जन्यबोधे।** उपनयजन्यबोधे। **तथाविधेति।** सर्वमभिधेयं प्रमेयमित्याकारकेत्यर्थः। **तदर्थौ।** अन्यूनानतिरिक्तत्वदलार्थौ। **प्रकृतेति।** प्रकृतपक्षसाध्यकेत्यर्थः। **दीधितौ वक्तव्यमिति।** अन्यूनानति- रिक्तत्वदलेनेत्यादिः। **तादृशेति।** प्रमेयत्वव्याप्यहेतुमत्सर्वमभिधेयमित्या- कारकेत्यर्थः। **प्रकारीभवतः।** व्याप्तिघटकतयेत्यादिः। **तादृशेति।** सर्वमभिधेयं प्रमेयमित्याकारकेत्यर्थः। **तत्प्रकारतायाः।** अभावत्वप्रकारतायाः। **समनैयत्यमिति** अनुमितिप्रकारतासमनैयत्यमित्यर्थः। **तादृशानुमिताविवेति।** सर्वमभिधेयं प्रमेयमित्यनुमिताविवेत्यर्थः। व्याप्तिघटकीभूताऽभावत्वादीनामपि अनुमितौ अभिधेयत्वेन प्रकारत्वमिति सूचनाय दृष्टान्तकथनं। **एतत्स्थलीयो- पनयजन्यबोधे** इति। सकलाभिधेयवृत्तिधर्मवदिदं द्रव्यमिति स्थलीयतादृश- धर्मवदिदं द्रव्यत्वव्याप्यवदित्युपनयजन्यबोधे इत्यर्थः। **विश्वस्यैवाभिधेयत्वेन**

घटत्वादौ सामानाधिकरण्यसम्बन्धेन रूपवति व्यभिचारवारकतया घटान्यत्वात्मकविशेषणस्य धर्मिभेदेन विशेष्यस्य घटान्यत्वसमानाधिकरण-सत्तासमानाधिकरणे घटरूपादौ व्यभिचारवारकतया च विशेष्यतावच्छेदकस्य सार्थक्यमित्यवधेयम्।

प्रकारतयेति। उक्तस्थले तादृशवृत्तिधर्मनिष्ठाधेयत्वे निरूपितत्वसम्बन्धेनाऽभिधे-यस्य प्रकारत्वादभिधेयत्वेनैव विश्वस्य प्रकारत्वं बोध्यम्। **तत्प्रकारतासमनै-यत्यं।** अनुमितिप्रकारतासमनैयत्यं। **विशेषणानवच्छिन्नप्रकारतानां।** निरवच्छिन्नानुमितिप्रकारतानां। **तादृशप्रकारतासत्त्वात्।** निरवच्छिन्नप्रकारता-सत्त्वात्। **उक्तानुमितेरिति।** सकलाभिधेयवृत्तिधर्मवदिदं द्रव्यमित्यनुमितेरित्यर्थः। निरूपितत्वं षष्ठ्यर्थः। अन्वयश्चास्य प्रकारतायां। **तादृशप्रकारतायाश्च।** निरवच्छिन्नप्रकारतायाश्चेत्यर्थः। **तत्र।** अभावत्वादौ। **असत्त्वादिति।** अभिधेयत्वेनैव भानादिति भावः। **तेषां। अभावत्वादीनां। तथाविधेति।** विशेषणानवच्छिन्नेत्यर्थः। **दीधितौ—सकलाभिधेयेति सकलाभिधेय-**निष्ठाऽत्यन्ताभावाप्रतियोगि आकाशाभाववदिदं द्रव्यं इत्यादावित्यर्थः। **अत्र।** अनुमितौ। **तथानुमितिरिति।** विशेषणानवच्छिन्नप्रकारताकानुमितिरित्यर्थः। प्रमेयत्वानुषङ्गत्यागे बीजमाह। **विपरीतेति। दीधितौ—विशिष्टपक्षबोधके उपनये इति।** द्रव्यत्वव्याप्यवत्सकलाभिधेयनिष्ठाऽत्यन्ताभावाप्रतियोगि आकाशाभाववदिदमित्याकारके इत्यर्थः। **अतिव्याप्तेरिति।** अनुमितौ उपनये च स्वरूपतः प्रकाराणां तुल्यत्वादिति भावः। पक्षबोधकमित्येव कथं नोक्तमित्यत आह। **विशेष्यमात्रपरामर्शे** इति।

अन्यूनविषयकत्वम् अनुमितिविषयताव्यापकविषयताकत्वं समनैयत्यघटकं। ननु निरवच्छिन्नप्रकारतानां समनैयत्यनिवेशे उक्तोपनयेऽतिव्याप्तिर्न सम्भवति, तस्य व्याप्तिबोधकत्वेन तद्घटकहेतुसामानाधिकरण्यसाध्यसामानाधि-करण्यघटकाधिकरणानां हेत्वधिकरणत्वेन साध्याधिकरणत्वेनैव निवेशे तादृशाधिकरणत्वस्याऽधिकरणतात्वस्य वा उपनयजन्यबोधे स्वरूपतो भानेनाऽनु-मितौ त्वभानेन निरवच्छिन्न "अनुमिति" प्रकारतासमनैयत्याभावात्, इत्याशङ्कां निरस्यति। **व्याप्तिशरीरे** इति। **साध्यसाधनप्रकारेणैवेति।** साध्येन साधनेनैव वेत्यर्थः। **तदधिकरणेति।** साध्याधिकरण-हेत्वधिकरणेत्यर्थः। एवकारव्यवच्छेद्यं

पञ्चम्यर्थपक्षकप्रतिज्ञादिस्थले तु पक्षे प्रकृत्यर्थस्य वैशिष्ट्य-बोधको हेतु र्नतु प्रकृतसाध्यस्य।

सामाधिकरण्यसम्बन्धस्य वृत्त्यनियामकतया व्यापकत्वाघटकत्वेऽपि नित्यद्रव्यावृत्तिधर्मशून्यत्वान्निरवयवं गगनं नित्यं नित्यद्रव्यावृत्तिधर्मशून्यत्वाद्, वह्निमत्पर्वतावृत्तिधर्मशून्यत्वादालोकवान् पर्वतो वह्निमान् वह्निमत्पर्वतावृत्ति-धर्मशून्यत्वादित्यादौ हेत्वयवेऽतिव्याप्तिवारणाय पक्षतावच्छेदकवैशिष्ट्य-निवेशनमावश्यकम्। अखण्डाभावघटकतया हेतुघटकद्रव्यत्वपर्वतत्वादी-नामवैयर्थ्यम्।

स्पष्टयति। **नत्विति। तस्य तत्त्वस्य वेति।** अधिकरणत्वस्य अधिकरणतात्वस्य वेत्यर्थः। **नाऽसङ्गतिः।** नातिव्याप्त्यसङ्गतिः। **तथात्वे।** हेतुत्वे। **कथित-प्रकारतेति।** अनुमितिप्रकारतेत्यर्थः। तथाचानुमितौ गुणत्वादेःस्वरूपतोऽभानेनो-पनयजन्यबोधे च स्वरूपतस्तद्भानेनाऽतिव्याप्त्यलग्नकतापत्तेरिति भावः। उक्तोपनयेऽतिव्याप्ति निराकर्तुं शङ्कते। **न चेति। अभेदेन विषयतासमनैय-त्यस्योक्ताविति।** समानाकारकविषयतायाश्चैक्यमिति मतेनेदम्। एवं चाऽनुमितिविषयत्वोपनयजन्यबोधविषयत्वयोनिरूप्यनिरूपकभावभेदेन महान् भेद इति समनैयत्यविरहान्नातिव्याप्तिरिति भावः। एवं निरूपकभेदेन विषयताभेदादित्यपि बोध्यम्। स्वं शाब्दबोधः। उक्तोपनयेऽतिव्याप्तिवारणेऽपि अन्यूनविषयकत्वदलवैयर्थ्यं स्यादित्याह। **हेत्वर्थघटितार्थकप्रतिज्ञाघटित-न्यायान्तर्गतेति।** धूमादालोकवान् पर्वतो वह्निमान् धूमादिति न्यायान्तर्गतेत्यर्थः। **हेतुजन्यबोधविषयतायामिति।** धूमादिति वाक्यजन्यबोधविषयतायामित्यर्थः। **अनुमितिनिरूपितेति।** धूमादालोकवान् पर्वतो वह्निमानित्यनुमितिनिरूपितेत्यर्थः। **स्वविषयतात्वकत्वाभावादेवेति।** अनतिरिक्तत्वाभावादेवेत्यर्थः। **तादृशबोधेति।** हेत्ववयवजन्यबोधेत्यर्थः। **अन्यूनविषयकत्वांशवैयर्थ्यापत्तेरिति।** निगमनार्थबोधस्य सर्वस्यापि अनुमितिविषयताशालित्वेनाऽन्यून-विषयकत्वमात्रोपादाने निगमनवारणाऽसम्भवादनतिरिक्तविषयकत्व-मावश्यकमित्याशयेनाऽन्यूनविषयकत्वमात्रवैयर्थ्याभिधानं बोध्यम्। प्रतिज्ञाहेत्वर्थसमूहालम्बनमादाय हेत्वन्त वारणायपि अनतिशिक्त विषयकत्वं बोध्यम् हेतुजन्यबोधविषयतायां अनुमितिनिरूपितविषयतात्वाभावं द्रढयति।

तादृशविषयताविलक्षणविषयताशून्यत्वम् प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौपयिकव्याप्तिविषयकत्वं वा तदनतिरिक्तविषयकत्वम्।

साध्यतावच्छेदकविशिष्टसाध्यनिवेशप्रयोजनमाह—पञ्चम्यर्थेति। हेतुत्वं प्रमेयाद्वाच्यत्ववत्प्रमेयादित्यादौ हेतुजन्यबोधस्य विभक्त्यर्थहेतुत्वे प्रमेयाद्यात्मकप्रकृत्यर्थवैशिष्ट्यावगाहित्वेऽपि प्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यानवगाहित्वान्नातिव्याप्तिरित्यर्थः।

पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वमेव पर्यवसितार्थः। सम्बन्धविशेषश्चैतद्दले न प्रवेश्यः प्रयोजनविरहात् अतः पञ्चम्यर्थे प्रकृत्यर्थस्य यादृशसम्बन्धेनान्वयस्तस्य वृत्त्यनियामकतया व्यापकत्वाघटकत्वेऽपि नैतद्व्यावृत्त्यसङ्गतिः। यदि च जन्यग्रहविषयत्वरूपपञ्चम्यर्थैकदेशे जन्यत्वे प्रकृत्यर्थस्य हेतुज्ञानस्यान्वयः, न तु परम्परासम्बन्धेन तादृशविषयत्वे तदा जन्यत्वपक्षकोक्तसाध्यहेतुकस्थले व्यावृत्तिर्बोध्या, पक्षमुख्यविशेष्यकत्वपर्यन्तानिवेशात्। न तु तादृशविषयत्वत्वावच्छिन्नपक्षकस्थले, हेतुजन्यबोधे तादृशविशिष्टपक्षे इतरवैशिष्ट्यानवगाहित्वात्।

तादृशविषयताविलक्षणेति। साध्यतावच्छेदकसम्बन्धावच्छिन्न-

न हीति। बहिर्भूतविषयता। केवलहेत्वर्थविषयता **अनुमितिनिरूपितेति।** तथा च नातिव्याप्तिरिति भावः। **समूहालम्बनेति।** धूमादालोकवान् पर्वतो वह्निमान् इति समूहालम्बनेत्यर्थः। **अनुमितिनिरूपितत्वमादायेति।** तथा च वहिर्भूतविषयतायामपि अनुमितिनिरूपितत्वं सुलभमिति भावः। **अन्यथा।** प्रकृतपरामर्शजन्यतावच्छेदकविषयत्वानिवेशे। **असम्भवापातादिति।** पूर्वोक्तसमूहालम्बनानुमितिमादायेत्यादिः। **उपनयविशेषे।** द्रव्यत्वव्याप्यवत्सकलाभिधेयनिष्ठात्यन्ताभावाप्रतियोग्याकाशाभाववदिदमित्युपनये। **निरुक्तार्थकत्वे।** अनुमितिविषयताव्यापकविषयताकत्वरूपत्वे। **तज्जन्येति।** हेत्ववयवजन्येत्यर्थः। पूर्वोक्तसमूहालम्बनमादाय दूषणान्तरमाह। **एवमिति। तदवच्छिन्नेति।** अन्यूनविषयकत्वावच्छिन्नेत्यर्थः। **तन्निष्ठेति।** तादृशसमूहालम्बनबोधनिष्ठेत्यर्थः। **तस्य।** अतिप्रसङ्गस्य। **एतद्दोषवारणाय।**

साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्देदकावच्छिन्न-विषयताविलक्षणेत्यर्थकम् तद्विलक्षणत्वं च न तद्भिन्नत्वम्, प्रतिज्ञाजन्यबोधीय साध्यादिविषयतायास्तद्भिन्नत्वेनाऽसम्भवापातात्। तादृशविषयताभिन्न-मुख्यविशेष्यताशून्यत्वानिवेशेनाऽसम्भववारणेऽपि निगमनेऽतिव्याप्तितादवस्थ्यात्, अन्यूनविषयकत्वदलवैयर्थ्याच्च, धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादौ हेत्ववयवजन्यबोधीयहेतुत्वनिष्ठमुख्यविशेष्यतायास्तादृशविषयताभिन्नत्वात्।

एतेन तादृशविषयतानन्तःपातित्वं प्रकृतपरामर्शजन्यतानवच्छेदकत्वं वा तदित्यपि परास्तम्। उक्तस्थले आलोकाद्यंशे हेतुत्वप्रकारताया एव तादृशविषयतान्तःपातित्वात्प्रकृतपरामर्शजन्यतावच्छेदकत्वाच्च, हेतुजन्य-बोधीयतद्विषयताया अतथात्वात्।

न च तथाविधविषयतावच्छेदककोट्यप्रविष्टधर्मावच्छिन्नविषयताशून्यत्व-निवेशान्न दोष इत्यपि साधु। यत्र प्रमेयसामान्यस्य पक्षतावच्छेदकादिघटकता तत्र तादृशविषयतावच्छेदककोट्यप्रविष्टा प्रसिद्धेः। विलक्षणावच्छेदकतानिवेशेऽपि

सर्वस्मात्कालत्ववानयं कालपरिमाणवान् सर्वस्मादित्यत्र हेत्ववयवेऽति-व्याप्तिवारणाय। प्रकृतानुमितिविषयताव्यापकत्वस्य तज्जन्यबोधीयविषयतायां सत्त्वात्।

प्रथमत इति। अनतिरिक्तविषयकत्वनिर्वचनात्पूर्वमित्यर्थः। यद्यपि अतिरिक्ताप्रसिद्धिनिबन्धनदोषोद्धाराय प्रथमतोऽनतिरिक्तविषय- कत्वनिर्वचनमेवोचितम्। तथापि अन्यूनविषयकत्वस्य प्रकृतानुमितिविषयताव्यापक-विषयताकत्वरूपत्वे वक्ष्यमाणाऽनतिरिक्तविषयकत्वनिवेशेऽपि अनिस्तारात्प्रथमतोऽन्यूनविषयकत्वं निर्वक्तुमुपक्रान्तम्। अत्र अन्यूनविषयकत्वं अनुमितिविषयताकत्वम्। अनतिरिक्तविषयकत्वं च शाब्दविषयिताव्यापकानुमितिविषयिताकत्वम्। **एतच्च। प्रकृतेति च।** तथा च प्रकृतपक्षतावच्छेदकविशिष्टपक्षे प्रकृतसाध्यता- वच्छेदकविशिष्टवैशिष्ट्या-वगाहित्वमर्थः। एवं च नोक्तहेत्ववयवेऽतिव्याप्तिः, तज्जन्यबोधस्य विशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यावगाहित्वादिति भावः। **दीधितौ-तदन्यूनविषयकत्वं** प्रकृतानुमित्यन्यूनविषयकत्वम्। **तदनुपादाने।** पक्षतावच्छेदकवैशिष्ट्यानुपादाने।

द्रव्यव्याप्यधूमादालोकवान् पर्वतो वह्निमान्धूमादित्यादिन्यायान्तर्गतनिगमनादावतिव्याप्तिः, तज्जन्यबोधविषयतावच्छेदकधूमत्वादेस्तादृशविषयतावच्छेदककोटिप्रविष्टत्वनियमात्। अपि तु तादृशविषयताशालिनिश्चयत्वावच्छिन्नानिवर्त्यसंशयनिवर्तकतावच्छेदकत्वमेव तत्। निगमनादिजन्यबोधीयज्ञानज्ञाप्यत्वादिविषयतायास्तादृशनिश्चयत्वावच्छिन्नानिवर्त्यज्ञानज्ञाप्यत्वादिसंशयच्छिनाप्रतिबन्धकतावच्छेदकतया तद्वारणम्। उक्तहेत्ववयवजन्यबोधनिर्वत्यस्य हेतुत्वं धूमीयं नवेत्यादिसंशयस्य धूमादिज्ञानज्ञाप्यत्वघटितपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयनिवर्त्यतया तादृशबोधविषयतायाः न तथाविधविषयताविलक्षणतेति अन्यूनपदस्य व्यावृत्तिसङ्गतिः। सर्वेषामेव संशयानां स्वविरोधिविषयकतथाविधविषयताशालिसमूहालम्बननिश्चयनिवर्तनीयतया तादृशनिश्चयाऽनिवर्त्यसंशयाऽप्रसिद्धिरतस्तादृशनिश्चयत्वावच्छिन्नेति। इत्थं चाऽधिकमवगाहमनेऽपि निगमनजन्यबोधे साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयकत्वस्याऽक्षततया धूमज्ञानज्ञाप्यत्वादिसंशयस्य तादृशविषयताशालिनिश्चयानिर्वत्त्यत्वानुपपत्तिरित्यपि समाहितम्। अवच्छिन्नत्वं चाऽन्यूनवृत्तित्वं व्यापकत्वपर्यवसितम्, अतो ज्ञानज्ञाप्यत्वं धूमीयं नवेति संशयनिरूपितप्रतिबन्धकतायां धूमज्ञानज्ञाप्यत्वातिरिक्तप्रतिज्ञाप्रतिपाद्यभागविषयताघटितधर्मस्य स्वरूपसम्बन्धरूपावच्छेदकत्वविरहेऽपि नान्यूनपदस्य

हेत्ववयवे। प्रमेयादित्याकारकहेतुवाक्यघटक "प्रमेय" इत्येकदेशे इत्यर्थः। अतिव्याप्तिरिति परेणान्वयः। तज्जन्यबोधे पञ्चम्यर्थे प्रमेयभाने प्रमेयत्वस्यापि भानेन साध्यतावच्छेदकीभूतप्रमेयत्वत्वविशिष्टप्रमेयत्वस्वरूपसाध्यस्य प्रमेयरूपपक्षे वैशिष्ट्यावगाहिजनकत्वस्य प्रमेयादिति भागघटक "प्रमेये" इतिभागे सत्त्वाद् भवत्यतिव्याप्तिरिति भावः। वस्तुतः तादात्म्येन प्रमेयस्य साध्यत्वे प्रमेयादिति हेतावेवाऽतिव्याप्तिः अन्यूनविषयकत्वदले सम्बन्धविशेषानिवेशस्य वक्ष्यमाणत्वात्। पक्षतावच्छेदकवैशिष्ट्यानिवेशेऽसम्भवः, पक्षे साध्यवैशिष्ट्यविषयताविलक्षणत्वस्य पक्षतावच्छेदकवैशिष्ट्यविषयतायां सत्त्वेन तादृशविषयताशालित्वस्यैव प्रतिज्ञाजन्यबोधमात्रे सत्त्वादित्यस्मद्गुरुचरणाः।

व्यावृत्त्यसङ्गतिः।

अप्रामाण्यज्ञानास्कन्दितस्य निगमनादिजन्यबोधस्य संशयाऽप्रतिबन्धकतया तज्जनकत्वमादायातिप्रसङ्गस्य वारणाय तादृशसंशयाऽनिवर्तकत्वमुपेक्ष्य तन्निवर्त्तकतावच्छेदकविषयताशून्यत्वेन बोधो विशेषितः।

पक्षतावच्छेदकाद्यनिवेशे तदनवच्छिन्नपक्षादिविषयताशालिनिश्चय-समुदायस्य कमपि संशयं प्रति अप्रतिबन्धकतया तादृशनिवर्त्याऽप्रसिद्धि-रतस्तन्निवेश इति।

इत्थं चानतिरिक्तविषयकत्वघटकसाध्यतावच्छेदकावच्छिन्न-साध्यविशिष्टपक्षतावच्छेदकावच्छिन्नविषयतायां स्वनिष्ठत्वनिवेशेनैव न्यूनविषयकदर्शितहेतुजन्यबोधवारणसम्भवे पृथगन्यूनविषयकत्वविशेषण-मनर्थकमित्यपि समाहितम्। तादृशविषयतायां स्वनिष्ठत्वविशेषणे निगमनादिजन्यबोधस्य ज्ञानज्ञाप्यत्वविशेषितसाध्यविशिष्टपक्षविषयता-शालित्वनियमात्स्वनिष्ठनिरुक्तविषयताशालिनिश्चयत्वव्यापकप्रतिबन्ध-कताकज्ञानज्ञाप्यत्वादिसंशयान्यसंशयाऽप्रतिबन्धकतयाऽनतिरिक्तविषयता-

---

ननु हेतुजन्यबोधस्य प्रमेयांशे निर्धर्मितावच्छेदकतया किञ्चिद्धर्माव-च्छिन्नविशेष्यकत्वं निवेश्यापि हेतावतिव्याप्तिर्वारयितुं शक्यते इत्यतः पक्षतावच्छेदकवैशिष्ट्यनिवेशस्य स्थलान्तरे व्यावृत्तिमाह **घटान्यत्वेति**। तथा च पक्षतावच्छेदकवैशिष्ट्यानिवेशे यत्किञ्चिद्धर्मावच्छिन्नत्वनिवेशेऽपि घटान्यत्ववद्रूपघटान्यतरस्माद् घटान्यत्ववत्सधर्मा घटो घटान्यत्ववान् घटान्यत्ववद्रूपघटान्यतरस्मादित्यत्र हेतौ "घटान्यत्ववद्रूपघटान्यतरस्मादित्यत्र" अतिव्याप्तिः, तत्र रूपघटान्यतरत्वरूपयत्किञ्चिद्धर्मावच्छिन्ने घटान्यत्वरूप-साध्यस्य भानेन यत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्ट-वैशिष्ट्यावगाहिबोधजनकत्वस्य स सत्त्वात् अतस्तन्निवेशः। **घटान्यत्ववदिति**। अत्र घटान्यत्ववत्ता च स्वरूपसमवायोभयघटितसामानाधिकरण्य-सम्बन्धेन–तच्च स्वरूपेण घटभेदाधिकरणे समवायेन वृत्तित्वरूपं, घटान्यत्वं कपाले वर्तते, तत्र कपालरूपं घटश्च वर्तते, एवं च स्वरूपसमवायो-भयघटितसामानाधिकरण्यसम्बन्धेन घटान्यत्वविशिष्टं घटकपालरूपान्यतरत् तादृशान्यतरत्वावच्छिन्नज्ञानज्ञाप्यघटान्यत्वस्य सामानाधिकरण्यसम्बन्धेन

वह्निव्याप्यालोकवत्सधर्मा पर्वतो वन्हिमान्धूमात्, इन्धनव्याप्यधूमवान्पर्वतो वन्हिमान्धूमादित्यादौ तस्याः संग्रहाय प्रकृतहेतु-

---

कत्वापत्तेर्दुर्वारत्वात्।

सत्यन्तस्य न्यायावयवत्वमर्थः—निगमने च पक्षवाचकपदमनुषज्यते इति तद्वारणमनतिरिक्तपदप्रयोजनमिति मतमनुसृत्य लघुशरीरमनतिरिक्तविषयकत्वं निर्वक्ति। प्रकृतेति। प्रकृतहेतुका या प्रकृतसाध्यसिद्ध्यौपिकी व्याप्तिस्तदविषयकत्वमर्थः। यद्रूपावच्छिन्नविशेषितप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयकनिश्चयत्वं प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकानुमितिजनकताननतिरिक्तवृत्ति तद्रूपावच्छिन्नाऽविषयकत्वमिति तु पर्यवसितम्। तादृशं रूपं तद्धेतुतावच्छेदकावच्छिन्नतद्धेतुव्यापकप्रकृतसाध्यसामानाधिकरण्यत्वं तत्तत्साध्यतावच्छेदकावच्छिन्नसाध्याभावव्यापकाभावप्रतियोगितात्वं च। निगमनस्थतत्पदस्य च व्याप्तिपक्षधर्मताविशिष्टहेतुपरतया तज्जन्यबोधस्य तादृशरूपावच्छिन्नविषयकत्वान्नातिव्याप्तिः। अन्वयव्यतिरेकव्याप्त्योर्विशिष्यैकतरनिवेशेऽन्वयिनि व्यतिरेकिणि वा निगमनेऽतिव्याप्तिरिति निरुक्तरूपावच्छिन्नत्वेन द्वयोरनुगमः। यदि च यत्त्वतत्त्वयोर्निवेशान्नानुगमसम्भव इति विभाव्यते, तदाऽभावद्वयमेव बोधे निवेशनीयम्। एतल्लाभायैवौपयिकान्तमिति ध्येयम्। यद्यप्युदाहरणजन्यबोधस्य न निरुक्तरूपावच्छिन्नविषयकत्वं—तथापि सिषाधयिषाधीनन्यायप्रयोगानुपगमेन तत्र पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्व-

---

पक्षतावच्छेदक "घटक" त्वम्। **सामानाधिकरण्यसम्बन्धेनेति।** स्वरूपसमवायोभयघटितसामानाधिकरण्यसम्बन्धेनेत्यर्थः। **घटान्यत्वसाध्यिकेति।** स्वरूपेण साध्यत्वे बाधः स्यात्। **तद्घटितेति। प्रतिज्ञाघटितेत्यर्थः न्यायान्तर्गते।** अस्य हेत्ववयवे इत्यनेनाऽन्वयः। **रूपघटाऽन्यतरत्वावच्छिन्नांशे।** कपालरूपघटान्यतरस्मिन्। सामानाधिकरण्यसम्बन्धेन। स्वरूपसमवायोभयघटितसामानाधिकरण्यसम्बन्धेन। **विशेषणतापन्नेति।** विशेषणीभूतेत्यर्थः। **घटान्यत्वघटितेति।** तथा च सामानाधिकरण्यसम्बन्धेन। घटान्यत्वं हेतुतावच्छेदकघटकम्। हेतुतावच्छेदकसम्बन्धमाह। **तादृशसम्बन्धावच्छिन्नेति।**

रूपाऽन्यूनविषयकत्वविरहादेव नातिप्रसङ्गः। हेत्वन्तभागे च सत्यन्ताभावान्नातिव्याप्तिरित्यवधेयम्।

वह्निव्याप्तिविशिष्टस्यालोकस्य पर्वतत्वावच्छिन्नविशेषणत्वे तद्विशिष्टेऽपि पर्वते तद्वृत्तेरर्थतो लाभेनार्थतस्तत्र प्रकृतसाध्यगमकतालाभान्न हेत्ववयवाभिधानप्रयोजकाऽऽकांक्षावसर इत्यतः सधर्मेति। तस्याः। प्रतिज्ञायाः। ननु यत्र प्रकृतहेतुकप्रकृतसाध्यकव्याप्तिरेवान्तर्भवति पक्षगर्भे, तत्रत्यप्रतिज्ञाया असङ्ग्रह इत्याशङ्कां परिहरति। वह्नीति। विशिष्टपक्षेति। पक्षतावच्छेदकविशिष्टपक्षेत्यर्थः। तादृशव्याप्तीति। प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौपयिकव्याप्तीत्यर्थः। उदाहरणेति। यद्यपि दर्शितस्थले विशिष्टपक्षोपस्थापकपदात्प्रकृतहेतौ विशिष्टपक्षवृत्तित्वस्याप्यर्थतः प्रतीत्या उपनयादिप्रयोजकाकाङ्क्षाया अप्यनवकाशः। तथापि धूमवत्त्वस्थाने धूमवत्साधर्म्यनिवेशे तस्याः सम्भव इति उदाहरणमात्रोपादानम्। अन्यथा। आकाङ्क्षाविरहेऽप्यभिधाने। अतिप्रसङ्गात्। हेतुद्वयादेरप्यभिधानप्रसङ्गात्। अत एव। अनाकाङ्क्षितानभिधानादेव। एकदा। एकन्यायप्रयोगदशायाम्। उभयव्याप्तीति। अन्वयव्याप्तिव्यतिरेकव्याप्तिद्वयेत्यर्थः।

समवायघटितसामानाधिकरण्यसम्बन्धावच्छिन्नेत्यर्थः। समवायसम्बन्धेनाऽन्यतररूपहेतोः स्वरूपासिद्धत्वादिति ध्येयम्। **विशिष्टेति। घटान्यत्वविशिष्टेति। हेत्ववयवे।** हेतौ। घटान्यत्ववद्रूपघटान्यतरस्मादित्याकारके इति यावत्। **अतिव्याप्तिरिति।** रूपघटान्यतरत्वरूपयत्किञ्चिद्धर्मावच्छिन्ने घटान्यत्वरूपसाध्यस्य भानेन यत्किञ्चिद्धर्मावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिबोधजनकत्वस्य सत्वादित्युक्तमुपरिष्टात्। सामानाधिकरण्यसम्बन्धेन रूपघटान्यतरमात्रस्य हेतुत्वे व्यभिचारमाह। **घटत्वादाविति।** रूपवतीत्यनेन हेतुसत्त्वं सूचितम्। तथा च घटादिरूपस्यापि अन्यतरान्तर्गततया सामानाधिकरण्येन तस्य घटत्वादौ सत्त्वेन तत्र च सामानाधिकरण्यसम्बन्धेन घटान्यत्वरूपसाध्यविरहाद् भवति व्यभिचारः। **व्यभिचारवारकतयेति।** तथा च घटान्यत्वरूपविशेषणे दत्ते तद्वैशिष्ट्यं कपालादिरूपस्यैव, तस्य सामानाधिकरण्यसम्बन्धेन घटत्वादावसत्वान्न व्यभिचार इति भावः। **घटान्यत्वात्मकविशेषणस्येति।** सार्थयमिति परेणान्वयः। घटान्यत्वमात्रं न हेतुःसिषाधयिषाया अनुसरणापत्तेः। घटान्यत्वविशिष्टरूपस्य घटान्यत्वविशिष्ट-

साध्ययोरुपादानम्। वह्निव्याप्यधूमवान्पर्वतो वह्निमान्धूमात्, सत्तादिव्याप्यद्रव्यवदिदं सत्तादिमद्द्र व्यत्वादित्यादयस्तु न प्रयोगाः। विशिष्टपक्षोपस्थापकादेव तादृशव्याप्तिप्रतीतौ आकांक्षाविरहेणो-दाहरणानुत्थानात्, अन्यथाऽतिप्रसङ्गात्। अत एव नैकदोभय-व्यात्युपन्यासोऽपि।

व्याप्तिद्वयस्य क्रमेणैवाभिधातुं शक्यत या प्रथमोपस्थितव्याप्तिप्रतीत्यैव समीहितनिर्वाहेण व्याप्त्यन्तराकाङ्क्षानुदयादिति भावः।

एतेनाऽन्वयव्यतिरेकोनाहरणाकांक्षाघटितान्वययतिरेकिहेतुलक्षणानन्तरमपरं तल्लक्षणमभिधास्यतोमणिकृतः प्रथमलक्षणानिर्भरंबीजमाविष्कृतम्। अत एवैतादृशातिप्रसङ्गस्य पृथगभिधानम्।

वह्न्यादिसाध्यकप्रतिज्ञायामव्याप्त्या यथोपवर्णितलक्षणमाक्षिपति। यदि चेति। अत्र चाऽसम्भवाभावमाविष्कर्तुं कतिपयप्रतिज्ञाजन्यबोधस्य यथोपवर्णितानुमित्यन्यूनाऽनतिरिक्तविषयकत्वं व्यवस्थापयति। चैत्र इत्यादिना।

घटस्य वा तादृशसामानाधिकरण्यसम्बन्धेन हेतुत्वे त्वाहे। **धर्मिभेदेनेति।** रूपभिन्नस्य घटस्यापि प्रवेशेनेत्यर्थः। **विशेष्यस्य।** रूपघटान्यतरस्य। सार्थक्यमिति परेणान्वयः। तादृशघटमात्रस्य विशेष्यत्वे घटान्यत्वं व्यर्थम्, तादृशसम्बन्धेन घटस्य घटत्वे विरहेण व्यभिचारविरहात्। व्यर्थविशेषणघटित-धर्मावच्छेदेन व्याप्तेरसिद्धेः। तादृशरूपमात्रस्य विशेष्यत्वे पक्षमात्रविशेष्य-कत्वनिवेशेनापि अतिव्याप्तिवारणं सम्भवतीत्यन्तरदुपात्तम्।

ननु सामानाधिकरण्यसम्बन्धेन घटान्यत्वविशिष्टस्यैव तादृशसम्बन्धेन हेतुत्वमस्तु, एवं च रूपघटान्यतरस्यैव घटान्यत्ववैशिष्ट्यरूपेण हेतुत्वसम्भवे किमन्यतरत्वेन हेतुत्वेनेत्याशङ्कां समाधत्ते। **घटान्यत्वसमानाधिकरणेति। व्यभिचारवारणायेति।** तथा सति सत्ताया अपि कपालान्तर्भावेण घटान्यत्वविशिष्टतया तस्याः घटत्वघटरूपादौ सत्त्वेन व्यभिचारः स्यादिति भावः। घटान्यत्वविशिष्टस्यैव हेतुत्वे तु सामानाधिकरण्यसम्बन्धेनापि न घटत्व-घटरूपादौ व्यभिचारः इति घटान्यत्वोपलक्षितस्यैवान्यतरस्य हेतुत्वं बोध्यम्, विशिष्टहेतुके च न प्रयोजनमित्यवधेयम्। **विशेष्यतावच्छेदकस्य।**

यदि च मैत्रः पचति अयं गौरित्यादेरेव प्रतिज्ञाया तथोपवर्णितविशिष्टज्ञानजनकत्वसंभवः तादात्म्येन गोः साध्यत्वात् गोत्वत्वाद्यनुपस्थित्या गोत्वादेः साध्यत्वानुपपत्तेः पदार्थतावच्छेदकजातौ

अयं गौरित्यत्र गोत्वस्य साध्यत्वे पक्षे साध्यतावच्छेदकगोत्वत्वविशिष्ट "गोत्वं" प्रकारकज्ञानजनकत्वाऽसम्भवादाह। तादात्म्येनेति। ननु भवतु गोसाध्यकप्रतिज्ञा तादृशी। तथापि यदि समवायेन गोत्वस्य साध्यत्वेति तथाविधप्रतिज्ञा संप्रदायानुमता तदा तत्साध्यकतादृशप्रतिज्ञायाः दर्शितबोधजनकत्वाऽसम्भवात्सामान्यतस्तदाकारप्रतिज्ञायास्तथात्वाभिधानमसङ्गतमित्याशङ्कायां तस्या गोत्वादिसाध्यकत्वं निराकरोति। गोत्वत्वाद्यनुपस्थित्येति। तादृशप्रतिज्ञावाक्यादित्यादिः। अत्रेति शेषः। अनुपपत्तेरिति। प्रतिज्ञायाःसाध्यतावच्छेदकोपस्थापकत्वनियमात्, अन्यथा सुन्दरवह्नित्वावच्छिन्नसाध्यकस्थलेऽपि वह्निमानित्याकारकप्रतिज्ञाप्रसङ्गादिति भावः। यद्यपि समवायेन रक्तत्वविशिष्टदण्डावच्छिन्नसाध्यकरक्तदण्डिमानित्यादिप्रतिज्ञायाः न समवायेन रक्तत्वविशिष्टसाध्यतावच्छेदकबोधकत्वसम्भवः–तथापि तत्र साध्यतावच्छेदकघटसकलपदार्थानामेव विशकलितानां तादृशवाक्यादुपस्थितेस्तदधीनसाध्यतावच्छेदकविशिष्टसाध्यविषयकमानसबोधेनापि तत्र विशिष्टसाध्यसंशयप्रयोज्यजिज्ञासाविषर्यसिद्धिसम्भवः–प्रकृते तु विशकलितानामपि गोत्वत्वादिघटकपदार्थानां नोपस्थितिरिति विशेषः।

रूपघटान्यतरत्वस्य **अवधेयमिति।** रूपघटयोरेकतरमादाय हेतुत्वसम्भवेऽपि अन्यतरत्वेनोपादानस्य धर्मिभेदान्न वैयर्थ्यम्। **व्यापकत्वाघटकत्वेऽपीति।** सामानाधिकरण्यसम्बन्धेन साध्यत्वे व्याप्तिरेव न सम्भवति तस्य वृत्त्यनियामकतया हेतुसमानाधिकरणाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेरित्याशयः। पक्षतावच्छेदकतापर्याप्तिनिवेशनायाह। **वह्निमदिति।** पक्षमुख्यविशेष्यता न निविष्टेति हृदयम्। ननु नित्यावृत्तिधर्मशून्यत्वात्, एवं वह्निमदवृत्तिधर्मशून्यत्वादिति च कथं नोक्तं द्रव्यपदं पर्वतपदं चानर्थकमित्यत आह। **अखण्डेति।**

इदमत्रावधेयम्। अत्र हेतुकोटौ यावतां निवेशस्तेषां तेषां पक्षकोटौ निवेशो हेतुवाक्यजन्यबोधस्याऽनतिरिक्तविषयकत्वसम्पादनार्थम्। पक्षे

सधर्मेत्यनुपादाने पक्षनिश्चयकाले एव पक्षे साध्यनिश्चयसम्पत्तेः, संशयाभावान्न्यायप्रयोगानुपपत्तिरतस्तन्निवेशः। बाधवारणाय स्वरूपसमवायोभय-सम्बन्धघटितसामानाधिकरण्यसम्बन्धेन घटान्यत्वस्य साध्यत्वं बोध्यम्। घटान्यत्ववद्रूपघटोभयत्वावच्छिन्नहेतुत्वे घटान्यत्वस्य वैयर्थ्यापत्तिः, उभयत्वावच्छिन्नस्य सामानाधिकरण्यसम्बन्धेन घटत्वादावाभावेन व्यभिचारा-भावात्। तथा च तादृशहेतुवाक्यजन्यबोधस्य पक्षे साध्यवैशिष्ट्यावगाहित्वाभावेन न हेतुवाक्येऽतिव्याप्तिरतोघटान्यत्ववत्तादृशान्यतरत्वावच्छिन्नस्य हेतुत्वमिति सङ्क्षेपः।

हेतुजन्यबोधस्य। हेतुत्वं प्रमेयोऽयमित्याकारकस्य। **साध्यतावच्छेदक-विशिष्टेति।** तादृशवाच्यत्वविशिष्टेत्यर्थः। अत्र वाच्यस्यैव साध्यत्वं न तु वाच्यत्वस्य, तथा सति "जन्यत्वपक्षकोक्तसाध्यहेतुकस्थले" इत्यनेन वाच्यत्वसाध्यकस्थलस्यैव परामर्शे तत्स्थलीयहेतौ व्यावृत्तिदानाऽसङ्गतिः स्यात्, प्रमेयादित्यत्र प्रमेयपदस्य लक्षणया प्रमेयपदस्य ज्ञानपरतया वाच्यत्वबोध-कत्वाऽसम्भवात्, वाच्यस्य साध्यत्वे तु प्रमेयज्ञानस्यापि वाच्यतया साध्यबोधकत्वात्। अत एव प्रमेयाद्वाच्यत्ववदित्यस्यापि सङ्गतिः, अन्यथा हेतोनिराकाङ्क्षत्वं स्यात्। इदानीं तु साध्यघटकप्रमेयज्ञानज्ञाप्यत्वस्य वाच्यत्वेऽन्वयः हेत्वर्थस्य तस्य वाच्यत्ववति अन्वय इति ध्येयम्। नन्वत्र साध्यतावच्छेद-वैशिष्ट्यप्रवेशो व्यर्थः, उक्तातिव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धेन साध्यप्रकारताया एव निवेशनीयत्वात्। न चोक्तसम्बन्धानिवेशेऽपि निरूपितत्वसम्बन्धेन यत्र वाच्यस्य साध्यता तत्रोक्तहेतावतिव्याप्तिरतः साध्यतावच्छेदकवैशिष्ट्यनिवेश आवश्यक इति वाच्यम्। निरूपितत्वसम्बन्धस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेर्न्यायस्यैवाऽभावादि-त्याशङ्कां निरस्यति। **सम्बन्धविशेषश्चेति। अतः**—साध्यतावच्छेदकसम्बन्धा-निवेशात्। **यादृशसम्बन्धेन** निरूपितत्वसम्बन्धेन। **नैतद्व्यावृत्त्यसङ्गतिः।** न साध्यतावच्छेदकवैशिष्ट्यव्यावृत्यसङ्गतिः। ननूक्तस्थलीयप्रमेयादिति हेतौ प्रमेयपदं लक्षणया प्रमेयज्ञानपरम्। पञ्चम्यर्थो जन्यज्ञानविषयत्वं। तत्र विभक्त्यर्थैकदेशे जन्यत्वे एव प्रकृत्यर्थस्य "प्रमेयज्ञानस्य" अन्वयः। तथा च पक्षतावच्छेदकीभूत "हेतुत्वत्वात्मक" विषयत्वत्वावच्छिन्ने साध्यस्याऽ-न्वयाद्धेतावतिव्याप्तिविरहेण साध्यतावच्छेदकवैशिष्ट्यनिवेशो व्यर्थ इत्याशङ्कते।

यदि चेति। परम्परासम्बन्धेन। स्वज्ञाननिरूपितत्वसम्बन्धेन पक्षमुख्यविशेष्यकत्वोपादानेऽपि व्यावृत्तिरित्यभिमानं निराकरोति। **न त्विति। इतरेति।** साध्येत्यर्थः। एतादृशान्यूनविषयकत्वोपादाने निगमनेऽतिव्याप्तिवारणायाऽनतिरिक्तविषयकेति। तस्य चाऽनुमितिविषयातिरिक्ताऽवृत्तिविषयत्वार्थकत्वे सर्वमभिधेयं प्रमेयमित्यादावतिरिक्ताऽप्रसिद्धिरतस्तदर्थमाह-दीधितौ-**तादृशविषयताविलक्षणविषयताशून्यत्वमिति।** अस्य तदनतिरिक्तविषयकत्वमित्येनेनान्वयः। **तद्भिन्नत्वेन** पक्षविषयताभिन्नत्वेन।

पूर्वमनतिरिक्तविषयकत्वानुपादानेऽयंपदानुषङ्गपक्षे निगमनेऽतिव्याप्तिरुक्ता, सा इदानीं तन्निवेशेऽपि अस्त्येवेत्याह। अतिव्याप्तितादवस्थ्यादिति। ननु प्रकारतावच्छेदकतापर्याप्तिनिवेशान्न निगमनेऽतिव्याप्तिरित्यत आह। **अन्यूनविषयकत्ववैयर्थ्याच्चेति।** निगमनवारकं प्रकारान्तरमपि निरस्यति। **एतेनेति।** अन्यूनविषयकत्वस्य वैयर्थ्येनेत्यर्थः। **उक्तस्थले।** धूमादालोकवान् पर्वतः वह्निमान् धूमादित्यादौ। **अतथात्वादिति। अनन्तःपातित्वात्,** जन्यतानवच्छेदकत्वाच्चेत्यर्थः। **तथाविधेति।** साध्यतावच्छेदकावच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नेत्यर्थः। **न दोष इति।** नान्यूनविषयकत्ववैयर्थ्यम्। उक्तस्थले हेतुत्वादिविषयतायास्तथाविधविषयतावच्छेदककोटिप्रविष्टत्वादिति भावः। **यत्र। सकलाभिधेयवृत्तिधर्मवदित्यादौ। कोट्यप्रविष्टाऽप्रसिद्धेरिति** विश्वस्यैव कोटिप्रविष्टत्वादिति भावः।

विलक्षणेति। वैलक्षण्यं निरवच्छिन्नम्। तथा च तथाविधविषयतानिरूपितनिरवच्छिन्नावच्छेदकताशून्यधर्मनिष्ठनिरवच्छिन्नावच्छेदकताकविषयताशून्यत्वमर्थः। **द्रव्यव्याप्येति। अतिव्याप्तिरिति।** इदं च निगमनजन्यबोधेऽबाधितत्वादिभानं नास्तीत्याशयेन। **उक्तेति।** धूमादालोकवान् पर्वतो वह्निमानित्यादिस्थलीयेत्यर्थः।

नान्यूनपदस्य व्यावृत्त्यसङ्गतिरिति। अत्रेदं बोध्यम्। पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकताकप्रतिबन्धकतानिवेशे धूमादालोकवान्पर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तिः, हेतुत्वं धूमीयं नवेत्यादिसंशयस्य तादृशप्रतिबन्धकतानिरूपितप्रतिबध्यताशून्यत्वात्। एतादृशव्याप्तिवारणायैव व्यापकत्वरूपावच्छिन्नत्वं निवेश्यं नत्वन्यूनपदव्यावृत्त्यसङ्गतिनिराकरणायैवेति। **विशेषित** इति। तथा च निगमने

गोत्वादेः साध्यत्वे दोषान्तरमाह। पदार्थेति। जातेः पदार्थतावच्छेदकत्वं पदार्थान्तराऽन्वयित्वाऽसम्भवप्रयोजकत्वेनाभिहितम्। इदमुपलक्षणम्। अन्वयितावच्छेदकरूपेणानुपस्थितत्वमपि तथा बोध्यम्। ननु पर्वतो वह्निमानित्याद्याकारकप्रतिज्ञा न वह्निसाधिका अपितु अभेदेन वह्निमत्साध्यिकैव तथा च तज्जन्यबोधविषयतायाः अभेदेन वह्निमत्साध्यकानुमितिविषयतातो न वैलक्षण्यमतो न तत्राव्याप्त्यवकाश इत्यत आह। तथैवेति। तादृशप्रतिज्ञाया वह्निसाध्यकत्वेनैवेत्यर्थः। इत्युपनयसङ्गमात्-इत्याकारकस्योपयनस्य तादृशप्रतिज्ञाघटितन्यायान्तर्गतत्वोपपत्तेः। वह्निमतः साध्यत्वे वह्निमद्व्याप्यवानित्याकारस्यैवोपनयस्य सम्भवादिति भावः।

नातिव्याप्तिः, तज्जन्यबोधे उक्तसंशयनिवर्तकतावच्छेदकविषयितावत्त्वादिति भावः।

समुदायस्येति। केवलपक्षविशेष्यकत्वस्य द्रव्यत्व-पृथिवीत्व-मेयत्वादिना पक्षविशेष्यकज्ञानसाधारणतया तादृशपक्षविषयकनिश्चयत्वव्यापक-प्रतिबन्धकत्वाप्रसिद्धिरित्यर्थः। **स्वनिष्ठत्वेति। स्वपदं-यादृशशाब्दबोधमादाय** लक्षणं सङ्गमनीयं तादृशशाब्दबोधपरम्। निगमनजन्यबोधवृत्तित्वविशिष्टता-दृशप्रकारतामादाय दूषयति **तादृशेति।**

तथा च न्यायावयवत्वे सति पक्षतावच्छेदकविशिष्टबोधजनकवाक्यत्वं प्रतिज्ञात्वं फलितम्। बोधे पक्षतावच्छेदकवैशिष्ट्यञ्च स्वावच्छिन्नविशेष्यता-निरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्व-तादृशप्रकारताशालि-निश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यताशून्यसंशयनिवर्तकता-वच्छेदकविषयिताशून्यत्वोभयसंसम्बन्धेन व्याप्त्यविषयकत्वकल्पे हेत्वन्तेऽतिव्याप्तिशङ्कां परिहर्तुं तं कल्पमवतारयति। **सत्यन्तस्येति। अनुषज्यते इति।** तथाचाऽन्यूनविषयकत्वनिर्वाहः। **अभावद्वयम्**– अन्वयव्याप्तिविषय-कत्वाभावव्यतिरेकव्याप्तिविषयकत्वाभावोभयम्। एतत्कल्पे औपयिकान्त-वैयर्थ्यमाशंक्याह। **एतल्लाभायैवेति। न निरुक्तरूपावच्छिन्न-विषयकत्वमिति।** न तद्धेतुव्यापकसाध्यसामानाधिकरण्यत्वाद्यवच्छिन्न-विषयकत्वमित्यर्थः। तथा च व्याप्तिबोधने तात्पर्याभावा-दुदाहरणेऽतिव्याप्तिर्दुवारैवेति भावः। **नातिप्रसङ्ग इति।** तथा च एतत्कल्पे

हेत्वर्थान्वयायोगाच्च।

वह्निमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य वह्नेः संयोगात्मकः संबन्धो भासते तथैव वह्निव्याप्यधूमवानयमित्युपनयसङ्गमात्,

शाब्दबोधे तु वह्निमतोऽभेदः एवं भेदे साध्ये भिद्यते भिन्नमित्यादावपि वैलक्षण्यमिति सूक्ष्ममीक्ष्यते–

शाब्दबोधे वह्निमानित्येतादृशवाक्यजन्यज्ञाने। अभेद इति। भासते इत्यनुषज्यते। न तु वह्नेः संयोग इति शेषः। नामार्थयोर्भेदान्वयस्याऽव्युत्पन्नत्वादिति हृदयम्। तथा च तादृशप्रतिज्ञाजन्यबोधे निरुक्तमन्यूनविषयकत्वम् अनतिरिक्तविषयकत्वं च न सम्भवतीति भावः। भेदे–शुद्धे प्रतियोगिविशेषिते वा साध्ये–इत्यादौ–इत्यादिप्रतिज्ञायाम्। आदिपदात्पृथिवी इतरेभ्यो भिद्यते इतरभिन्नमित्यादिपरिग्रहः। वैलक्षणम् अनुमितिविलक्षणबोधजनकत्वम्।

शुद्धभेदसाध्यकानुमितौ भेदस्यानुयोगितया, इतरावच्छिन्नभेदसाध्यकानुमितौ अनुयोगितया, इतरविशेषितस्य तस्य विशेषणताविशेषेण, भिद्यते इति प्रतिज्ञाजन्ये च बोधे आख्यातान्तोपस्थाप्यस्य भेदाश्रयत्वस्य, इतरेभ्यो भिद्यते इत्यादिजन्यबोधे च पञ्चम्यन्तार्थेतरप्रतियोगिकत्वविशेषितभेदाश्रयत्वस्य स्वरूपसम्बन्धेन भिन्नमित्यादिजन्ये च निष्ठान्तोपस्थाप्यस्य भेदाश्रयत्वावच्छिन्नस्य इतरेभ्यो भिन्नमित्यादिजन्ये चाऽभेदेनेतरप्रतियोगिकत्वविशेषितभेदाश्रयत्वावच्छिन्नस्य इतरेभ्योऽन्यादित्यादिजन्ये चेतरप्रतियोगिकत्वविशेषितभेदावच्छिन्नस्य

यो यो धूमवान् स स वह्निमान् यथा पर्वत इत्युदाहरणं न स्वीकार्यम्, अन्यथा तस्य निरुक्तान्यूनविषयकत्वेन चातिव्याप्तेदुर्वारत्वपातादिति तस्य शुद्धपर्वतवृत्तित्वलाभेऽपि न प्रकृतपक्षवृतित्वलाभ इत्यतो **विशिष्टेति। तद्वृत्तेः।** विशिष्टालोकवृत्तेः। **सधर्मेतीति।** एतेन व्याप्तिविशिष्टस्यालोकादेर्विशिष्ट-पक्षावृत्तित्वशङ्कानुच्छेदाद्धेत्वाकाङ्क्षेति सूचितम्। **तस्याः।** उपनयप्रयोज-काकाङ्क्षायाः। **एतेन।** एकदा न व्याप्तिद्वयाभिधानमिति दीधितिकारोक्त्या। **लक्षणानन्तरमिति।** अन्वयव्यतिरेकोदाहरणाकाङ्क्षाजनकशाब्दज्ञानजनक-वाक्यत्वरूपलक्षणानन्तरमित्यर्थः। अपरं पक्षसपक्षसतोविपक्षाऽसतो

तदा यादृशपक्षसाध्यिका: पक्षे यादृशयादृशविशिष्टार्थबोधिका: प्रतिज्ञा सम्प्रदायसिद्धाः तादृशानां बोधानामन्यतमेनाप्यनिवर्त्यत्वस्य संशयस्यानिवर्तको यस्तावद्बोधानामन्यतमो बोधस्तज्जनकत्वं

इतरान्यदित्यादिजन्ये चाभेदेनेतरप्रतियोगिकत्वविशेषितभेदावच्छिन्नस्य भेदेन पक्षांशे विशेषणत्वादिति अनुमितेस्तादृशबोधवैलक्षण्यादिति भावः। इदमुपलक्षणम्। ईदृशदिशा प्रकृते विधेयांशे भान इवोद्देश्यतावच्छेदकांशे भानेऽपि वैलक्षण्यमवसेयम्। गन्धाद्यवच्छिन्नपक्षकानुमितौ गन्धादेः साक्षाद्विधेयधर्मितावच्छेदकत्वात्, गन्धवती इतरेभ्यो भिद्यते इत्याकारकतादृशप्रतिज्ञाजन्यबोधे च गन्धादिसम्बन्धस्यैव तथात्वात् इति।

उद्देश्यानुमितिपदस्य यादृशविशिष्टार्थबोधप्रतिज्ञया जन्यते तादृशविशिष्टार्थबोधपरतेत्यभिप्रेत्य समाधत्ते। यादृशेति यादृशरूपावच्छिन्नपक्षकयादृशरूपावच्छिन्नसाध्यकसंप्रदायसिद्धप्रतिज्ञाः यादृशरूपावच्छिन्नपक्षे यादृशरूपावच्छिन्नप्रकारकबोधजनिकाः तादृशरूपावच्छिन्ने तादृशरूपावच्छिन्नप्रकारकबोधानिवर्त्यसंशयाऽनिवर्त्तकतादृशबोधान्यतमबोधजनकत्वे सति तादृशरूपावच्छिन्नपक्षकतादृशरूपावच्छिन्नसाध्यकन्यायान्तर्गतत्वं प्रतिज्ञात्वमित्यर्थः। अत्र च जनिकेत्यन्तं बोधविशेषपरिचायकमात्रम्। न तु तदर्थस्य लक्षणे निवेशः। बोधाश्च विषयविशेषान्निवेश्य विशिष्यैवोपादेयाः, न तु प्रतिज्ञाप्रतिपाद्यत्वेन अतो नात्माश्रयशङ्कावकाशः।

हेतुवचनमित्येवं रूपं। तल्लक्षणम्। अन्वयव्यतिरेकिहेतुलक्षणम्।

वह्निसाध्यकप्रतिज्ञायाम्। पर्वतो वह्निमानित्याकारिकायाम्। **अव्याप्त्या।** तज्जन्यबोधस्य वह्निमदभिन्नपर्वतविषयकत्वेनाऽनुमित्यन्यूनानतिरिक्तविषयकत्वाभावादिति भावः। तच्चानुपदं स्फुटीभविष्यति। **यथोपवर्णितमिति।** न्यायावयवत्वे सति पक्षतावच्छेदकावच्छिन्नविशेष्यता निरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वे सति तादृशप्रकारता शालिनिश्चयत्वावच्छिन्नानिवर्त्यसंशयनिवर्तकतावच्छेदकविषयताशून्यः (अथवा तादृशप्रकारताशाल्यनुमितिजनकत्वं यद्रूपावच्छिन्नविशेषितप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुप्रकारकप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्च-

एवं च प्रतिज्ञाप्रतिपाद्यविशिष्टार्थानामननुगमेन एकधर्मावच्छिन्न पक्षसाध्यकनिखिलप्रतिज्ञासाधारणमपि प्रतिज्ञात्वं नैकं सम्भवतीति बोधानामन्यतमत्वेनानुगमः तेन रूपेण जनकत्वांशे एव बोधानां विशेषणता, न तु निवर्त्यत्वांशेऽपीति बोधानामननुगमेऽपि तादृशतादृशबोध-निवर्त्यत्वाभावकूटघटितधर्मस्यानुगतत्वान् तादृशबोधभेदकूटवद्भिन्नत्व-रूपान्यतमत्ववन्निवर्त्यत्वसामान्याभावस्थले तादृशतादृशबोधनिवर्त्यत्वा-भावकूटस्यैव लाघवेन निवेशयितुमुचितत्वात्।

एवं च तादृशाभावकूटनिवेशसूचनायैवाऽन्यतमेनापीत्युक्तम्। एतेन सामान्याभावनिवेशसूचनायाऽपि कार इति व्याख्यानमनादेयम्। विशेष्यदले अन्यतमत्वनिवेशनमपि यत्र प्रतिज्ञार्थानां नानाविधत्वं तत्रैव, पर्वतादिपक्षकवह्न्यादिसाध्यकस्थले पर्वतादौ वह्न्यादिमदभेदरूपेणैक-विधबोधस्यैव प्रतिज्ञया जननान्न तत्र तन्निवेशः। एतेनैकमादायाऽन्यत-मत्वस्याऽसम्भवेऽपि न क्षतिः। शब्दाभेदस्याप्यप्रयोजकत्वात्।

यत्वव्यापकं तद्रूपावच्छिन्नाविषयकः) यो बोधस्तज्जनकवाक्यत्वं लक्षणमित्यर्थः। **दीधितौ यदि चेति**। अस्य सूक्ष्ममीक्ष्यते इत्यनेनाऽन्वयः। अत्र च। लक्षणे च। **असम्भवाभावम्** अव्याप्तिमित्यर्थः। **यथोवपर्णितेति**। अस्य अन्यूनानतिरिक्तविषयकत्वेऽन्वयः। **दीधितौ-मैत्रःपचतीति**। अत्र मैत्रविशेष्यककृतिप्रकारिकाऽनुमितिः, तथैव च प्रतिज्ञाजन्यो बोधः। एवं च तादृशबोधस्योपवर्णितानुमित्यन्यूनानतिरिक्तविषयकत्वाल्लक्षणसमन्वयः। एवमयं गौरित्यत्रापि। ननु व्युत्पत्तिविरोधादयं गौरित्यादिप्रतिज्ञायाः पक्षे साध्यी भूतगोत्वविशिष्टज्ञानजनकत्वात्कथं तत्र गोत्वप्रकारकज्ञानजनकत्वम्। एवं गोत्वस्य साध्यत्वे अयं गौरित्यत्र अनुल्लिख्यमानजातेः स्वरूपतो भानेन साध्यतावच्छेदकरूपेण साध्यवत्त्वबोधकवाक्यस्यैव प्रतिज्ञात्वाद् अयं गौरिति वाक्यस्य न गोत्वसाध्यकप्रतिज्ञात्वसम्भव इत्याह। **पक्षे साध्यतावच्छेद-कगोत्वत्वविशिष्टप्रकारकज्ञानजनकत्वासम्भवादिति। दीधितौ-तादात्म्येन गोसाध्यत्वादिति**। तथा च प्रतिज्ञायाः अनुमित्यन्यूनान- तिरिक्त-विषयकबोधजनकत्वाल्लक्षणसमन्वयः।

अथ गोत्वसाध्यकस्थलेऽपि यदि अयं गौरित्याकारिकैव प्रतिज्ञा तदा

वह्नित्वावच्छिन्नसाध्यकप्रतिज्ञया घटवद्भूतलादिघटितधर्मावच्छिन्नविशेष्यकः पर्वतत्वावच्छिन्नपक्षकप्रतिज्ञया च तादृशधर्मावच्छिन्नप्रकारकोऽपि बोधो जन्यते तन्निवर्त्यश्च भूतलं घटवन्नवेति संशयोऽपीति प्रतिज्ञायां प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकत्वस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकत्वस्य वाऽनुपादाने तावद्बोधानिवर्त्यसंशयाऽप्रसिद्धिरतस्तदुपादानम्।

तस्याः प्रतिज्ञात्वं न सम्भवतीत्याशङ्कते। **नन्विति।** तादृशी। अयं गौरित्याकारिका। **तथाविधेति।** अयं गौरित्याकारिकेत्यर्थः। **तत्साध्यकेति।** गोत्वसाध्यकेत्यर्थः। **दर्शितबोधेति।** साध्यतावच्छेदकीभूतगोत्वत्वविशिष्टगोत्वप्रकारकबोधेत्यर्थः। **तदाकारप्रतिज्ञायाः।** अयं गौरित्याकारकप्रतिज्ञायाः। **तथात्वाभिधानम्।** प्रतिज्ञात्वाभिधानम्। **असङ्गतमिति।** अयं गोत्ववानिति प्रतिज्ञैव सङ्गता सा च सम्प्रदायानुमतेति भावः। **तस्याः।** अयं गौरिति प्रतिज्ञायाः। **तादृशेति।** अयं गौरितीत्यर्थः। **नियमादिति।** तथा च साध्यतावच्छेदकरूपेण साध्यवत्त्वबोधकवाक्यस्यैव वाक्यस्य प्रतिज्ञात्वान्न तस्य गोत्वसाध्यकप्रतिज्ञात्वसम्भव इति भावः। **अन्यथा।** तादृशनियमानङ्गीकारे। प्रतिज्ञायाः साध्यतावच्छेदकरूपेण साध्यवत्त्वबोधकत्वनियमे व्यभिचारमाह। **यद्यपीति।** प्रतिज्ञायाः रक्ताऽभेदावगाहिशाब्दबोधजनकत्वे इति शेषः। **न समवायेन रक्तत्वविशिष्टसाध्यतावच्छेदकबोधकत्वसम्भव इति।** किन्तु रक्तरूपसम्बन्ध्यभिन्नदण्डबोधकः। अन्यथा नामार्थयोरिति व्युत्पत्तिभंगापत्तेः। तादृशस्तु नः, साध्यतावच्छेदक तथाच व्यभिचार इति भावः। रक्तदण्डिमानिति वाक्याद्रक्तत्वविशिष्टाभिन्नदण्डसम्बन्ध्यभिन्नः, इति बोधः। अनुमितिस्तुसमवायेन रक्तत्वविशिष्टदण्डसाध्यतावच्छेदककेति तत्त्वम्। समाधत्ते। तथापीति **तत्र।** रक्तदण्डिमानित्यत्र।

प्रकृते त्विति। अयं गौरित्यत्र त्वित्यर्थः। **नोपस्थितिरिति।** उपस्थापकाभावादिति भावः। **दोषान्तरं।** बाधकं। **दीधितौ—पदार्थतावच्छेदकजाताविति।** पदार्थतावच्छेदकीभूतगोत्वे साध्ये इत्यर्थः। **हेत्वर्थाऽन्वययोगादिति।** हेत्वर्थस्य ज्ञानज्ञाप्यत्वस्याऽन्वयाऽसम्भवादित्यर्थः। विशेष्यतासम्बन्धेन इतरपदार्थप्रकारकशाब्दबोधं प्रति विशेष्यतासम्बन्धेनोपस्थितेः

यत्किञ्चिद्रूपावच्छिन्नपक्षसाध्यकप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधजनकत्वस्य यत्किञ्चिद्रूपावच्छिन्नपक्षसाध्यकन्यायान्तर्गतत्वस्य निवेशनेऽतिप्रसङ्गः प्रागुपदर्शित एवेति यादृशरूपावच्छिन्नपक्षसाध्यकप्रतिज्ञाप्रतिपाद्यविशिष्टार्थ-बोधनिवर्त्यसंशयानिवर्तकबोधाजनकत्वं तादृशरूपावच्छिन्नपक्षसाध्यकन्याया-न्तर्गतत्वं निवेशितम्।

अधिकं तु इति न्यायेन साध्यांशे हेतुज्ञानज्ञाप्यत्वमवगाहमानेऽपि निगमनादिजन्यबोधे प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकत्वस्याक्षतत्वान्नि-गमनाद्यतिव्याप्तिवारणाय तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्न-प्रकारकबोधानिवर्त्यसंशयानिवर्तकत्वरूपतादृशबाधानतिरिक्तविषयकत्वं बोधविशेषणम्, इत्थं च प्रतिज्ञाजन्यबोधानिवर्त्यस्य वह्निर्धूमज्ञानज्ञाप्यो नवेत्यादि-संशयस्य निवर्तकतया तादृशबोधवारणम्।

न च प्रतिज्ञाजन्यबोधस्य पर्वतत्वावच्छिन्नविशेष्यकवह्निमत्वाद्य-वच्छिन्नप्रकारकबोधत्वेनैवोपादेयतया निगमनादिजन्यबोधस्यापि तथात्वात्तन्नि-वर्त्यत्वमुक्तसंशयस्याऽक्षतमेवेति वाच्यम्।

कारणत्वादिति भावः। घटादन्य इत्यादावेकदेशेऽपि पञ्चम्यर्थप्रतियोगित्वान्व-याज्जाताविल्युक्तम्। जातौ पदार्थतावच्छेदकत्वविशेषणस्य फलमाह। **पदार्थान्तरेति। पदार्थान्तरस्य** ज्ञानज्ञाप्यत्वस्य। **अन्वयित्वाऽसम्भवप्रयोज-कत्वेनेति।** अन्वयाभावप्रयोजकत्वेनेत्यर्थः। पदार्थतावच्छेदके पदार्थान्तरान्वयस्य व्युत्पत्तिविरुद्धत्वादिति भावः। इतरपदार्थप्रकारकबोधं प्रति स्वातन्त्र्येणोपस्थितेः कारणत्वेऽपि ससम्बन्धिकस्थलवदनुभवानुरोधेनैतादृशस्थलेऽपि कथञ्चिदु-पस्थितेरुपयोग इत्युक्तावप्याह। **इदमिति। तथा।** पदार्थान्तराऽन्वयित्वा-सम्भवप्रयोजकम्। अन्यथा बाधाऽप्रतिबध्यत्वापत्तेः। तथा च गोत्वस्य जातिरूपत्वेन स्वरूपतो भानेन स्वरूपतो भासमानपदार्थे पदार्थान्तरस्य ज्ञानज्ञाप्यत्वस्यान्वयो न सम्भवतीत्यर्थः। एतावता तादात्म्येन गोरेव साध्यत्वं दृढीकृतम्, तथा चाऽसम्भवाभावोऽपि आविष्कृतः, किन्तु अव्याप्तिमाह। **दीधितौ वह्निमानित्यादाविति।** पर्वतो वह्निमानित्यत्रेत्यर्थः। **पक्षे।** पर्वते। **साध्यस्य।** वह्नेः। **संयोगात्मकः सम्बन्धो भासते इति।** तथा च प्रतिज्ञाजन्यबोधस्य "वह्निमदभिन्नः पर्वतः" इत्याकारकस्य अनुमित्य-

अप्रामाण्यज्ञानानास्कन्दिततादृशविशिष्टार्थविषयकनिश्चयत्वावच्छिन्नानिवर्त्यत्वस्यैव निवेशनीयत्वात्, उक्तसंशयस्य धूमज्ञानज्ञाप्यत्वाविषयकवह्निमत्पर्वतविषयकनिश्चयानिवर्त्यत्वेन तथाविधनिश्चयत्वावच्छिन्नाऽनिवर्त्यत्वाऽक्षतेः।

एतेन सर्वेषामेव संशयानां वह्निमत्पर्वतादिविषयकसमूहालम्बनात्मकस्वविरोधिनिश्चयनिवर्त्तनीयतया तादृशबोधानिवर्त्यसंशयाऽप्रसिद्धिरित्यपि निरस्तम्। तादृशनिश्चयत्वनिष्ठं निवर्त्तकतावच्छेदकत्वं च न स्वरूपसम्बन्धविशेषः किन्त्वनतिरिक्तवृत्तित्वम्, तेन सम्बन्धी वह्निमान्नवेत्याकारकैकदेशसंशयं प्रति वह्निसम्बन्ध्यभिन्नपर्वतादिनिश्चयत्वेनाऽप्रतिबन्धकत्वेऽपि तादृशसंशयनिवर्तकप्रतिज्ञाजन्यबोधस्य नाऽसङ्ग्रहः। अत एव धूमादालोकवान् पर्वतो वह्निमान्धूमादित्यादौ हेतुजन्यबोधनिवर्त्यहेतुत्वं धूमीयं नवेति संशयं प्रति प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकनिश्चयत्वेनाऽप्रतिबन्धकत्वेऽपि न विशेष्यदलवैयर्थ्यम्।

न्यूनानतिरिक्तविषयकत्वाभावादव्याप्तिरिति भावः। पर्वतो वह्निमानित्यनुमितौ तादात्म्येन वह्निमाने व साध्यमित्याशङ्कते। **नन्विति। तथा च।** अभेदेन वह्निमत्साध्यकत्वे च। **तज्जन्येति** प्रतिज्ञाजन्येत्यर्थः। **वह्निमद्व्याप्यवानित्याकारस्यैवेति।** एवकारेण वह्निव्याप्यवानित्यस्य व्यावृत्तिः। प्रतिज्ञोपनययोरेकरूपावच्छिन्नसाध्यबोधकत्वनियमादिति भावः। **शाब्दबोधे त्विति।** प्रतिज्ञाजन्यशाब्दबोधे तु इत्यर्थः। **नन्विति।** तथा च वह्निमत्साध्यकप्रतिज्ञाया वह्निमत्साध्यकानुमित्यन्यूनाऽनतिरिक्तविषयकज्ञानाऽजनकत्वात्तत्राव्याप्तिरिति भावः। ननु प्रतिज्ञाजन्यबोधे वह्नेः संयोगः कथं न भासते इत्यत आह। **नामार्थयोरिति। भेदस्येति।** अस्य विशेषणताविशेषेण पक्षांशेऽन्वयादित्यन्वयः। एवं तस्येत्यत्रापि। शाब्दबोधस्य भेदाश्रयत्वप्रकारकतया अनुमित्यपेक्षया एकं वैलक्षण्यम्, अपरं च पञ्चम्यन्तार्थभूतेतरप्रतियोगिकत्वप्रकारकतयेत्यादिकमुह्यम्।

प्रतिज्ञाजन्यबोधजनकत्वस्य प्रतिज्ञात्वे आत्माश्रयादाह। **अत्र चेति। एवं चेति।** भिद्यते भिन्नमित्यादौ प्रतिज्ञार्थबोधानां विशिष्योपादाने चेत्यर्थः। अन्यतमत्वेनानुगमः सफलो भवतीति शेषः। अन्यथा प्रतिज्ञार्थत्वेनानुगमय्य

वह्निमत्त्वाद्यवच्छिन्नप्रकारकनिश्चयत्वावच्छिन्ननिवर्त्यस्य पर्वतत्वाद्यवच्छिन्नविशेष्यकनिश्चयत्वावच्छिन्ननिवर्त्यस्य चाऽप्रसिद्धिरतो विशिष्य विशेष्यप्रकारकोभयनिवेशनम्।

यद्यप्यत्र प्रतिज्ञाप्रतिपाद्यस्य विधेयविशिष्टधर्मिण एव यादृशविशिष्टार्थेत्युपादानसम्भव इति यादृशविशिष्टार्थबोधिका इत्युपेक्ष्य विशेष्यप्रकारयोः खण्डश उपादानसूचनाय पक्षे यादृशविशिष्टार्थबोधिका इत्यभिधानमनुचितम्। तथापि धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादौ प्रतिज्ञार्थहेत्वर्थविषयकसमूहालम्बनबोधजनकहेत्वन्ते हेतौ वा न्यायावयवत्वं परित्यज्य न्यायान्तर्गतत्वनिवेशनपक्षे प्रतिज्ञाजन्यबोधनिष्ठैकदेशबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतामादायैकदेशे चातिप्रसङ्गवारणाय विशिष्टार्थविषयकबोधत्वावच्छिन्नजन्यताप्रतियोगिकजनकतानिवेशे पर्वतो वह्निमानित्यादिप्रतिज्ञाया असङ्ग्रहः, वह्न्यादिशून्यपर्वतादौ वह्निमत्त्वाद्यवगाहिभ्रमात्मकशाब्दबोधसाधारण्यानुरोधेन तत्तत्पदार्थानां परस्परमुपश्लेषावगाहित्वस्यैव तादृशप्रतिज्ञाजन्यतावच्छेदकत्वोपगमात् तत्तद्विशिष्टार्थविषयकत्वस्याऽतथात्वादिति। अनतिरिक्तविषयकबोधनिष्ठतादृशपरस्परोपश्लेषावगाहित्वावच्छिन्नजन्यताप्रतियोगिकजनकताया निवेशसूचनाय तथाभिधानम्। परस्परोपश्लेषावगाहिशाब्दत्वे जन्यतावच्छेदकतापर्याप्त्यनिवेशान्नानतिरिक्तविषयकत्वदलवैयर्थ्यमित्यवधेयम्।

तादृशार्थविषयकबोधानिवर्त्यसंशयानिवर्तकप्रतिज्ञार्थबोधजनकत्वमित्यस्यैव सम्यक्त्वेऽन्यतमत्वनिवेशो व्यर्थ एव स्यादिति भावः। **एकधर्मावच्छिन्नपक्षसाध्यकेति।** विभिन्नसाध्यादिस्थलीयप्रतिज्ञासाधारणमनुगतं लक्षणं तु नास्त्येव, इदानीमेकधर्मावच्छिन्नसाध्यकनिखिलप्रतिज्ञासाधारणलक्षणमप्यनुगतं निर्वक्तुमशक्यमेव स्यादतोऽन्यतमत्वनिवेशनमित्यर्थः। **तेन रूपेणेति।** अन्यतमत्वेनेत्यर्थः। **तादृशतादृशबोधनिवर्त्यत्वाभावकूटघटितधर्मस्येति।** तादृशकूटवत्संशयप्रतिबन्धकत्वसामान्याभावविशिष्टबोधनिष्ठान्यमत्वस्येत्यर्थः। **लाघवेनेति।** यद्यपि तादृशतादृशबोधान्यतमबोधानिवर्त्यत्वस्य तादृशान्यतमत्वसमानाधिकरणप्रतिबन्धकतानिरूपितप्रतिबध्यत्वसामान्याभावरूपत्वे सर्वेषामेव संशयानां स्वविरोधिसमूहालम्बनात्मकतद्बोधान्यतममादाय तन्निवर्त्यत्वेन

भेदादिसाध्यकस्थले पृथिवीतरेभ्यो भिद्यते इत्यादिप्रतिज्ञाप्रतिपाद्य-भेदाश्रयत्वादिरूपयत्किञ्चिदेकार्थविषयकनिश्चयाप्रतिबध्यभेदादिकोटिकसंशयं प्रति पृथिवी नेतराणीत्यादिप्रतिज्ञाजन्यभेदादिप्रकारकनिश्चयस्य प्रतिबन्धकतया न कस्याश्चिदपि प्रतिज्ञायास्तादृशसंशयानिवर्तकबोधजनकत्वमतस्तद्विशिष्टार्थ-निश्चयनिवर्त्यत्वाभावकूटनिवेशनम्। प्रतिज्ञाबोधस्य स्वसमानाकारानुमितौ सिद्धिविषया प्रतिबन्धकत्वात्तादृशानुमितेश्च सिषाधयिषाकालीनतादृशबोधा-प्रतिबध्यतया तादृशाऽप्रामाण्यज्ञानानास्कन्दितप्रतिज्ञाप्रतिपाद्यविशिष्टार्थ-निश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यत्वादसम्भव इत्यतो ज्ञानसामान्यमुपेक्ष्य संशयपर्यन्तानुधावनम्।

तदभावविशिष्टसंशयाऽप्रसिद्धिः। तादृशतादृशबोधान्यतमत्वव्यापक-प्रतिबन्धकतानिरूपितप्रतिबध्यत्वसामान्याभावरूपत्वे च तादृशप्रतिबन्धकताया अप्रसिद्धत्वेनाव्याप्तेर्जागरूकत्वेन निवर्त्यत्वांशेऽन्यतमत्वेन बोधानां निवेशे गौरवकथनमसङ्गतम्। तथापि तादृशतादृशविशिष्टार्थविषयक-निश्चयत्वव्यापकप्रतिबन्धकतान्यतमप्रतिबन्धकतानिरूपितप्रति-बध्यतासामान्याभावस्यैव तेन विवक्षणान्नाव्याप्त्यादिकम्। परन्तु एवं विवक्षणे तादृशतादृशबोधभेदकूटावच्छिन्नत्वरूपान्यतमत्वेत्याद्युक्तिर्विचारणीयैवेति ध्येयम्। **तादृशाभावकूटनिवेशेति।** तादृशतादृशनिश्चयत्वव्यापकप्रतिबन्धकता-निरूपितप्रतिबध्यत्वाभावकूटनिवेशनेत्यर्थः। अन्यतमत्वघटितलक्षणं तु भेदादिसाध्यकस्थले एवादरणीयम्, न तु वह्न्यादिसाध्यकस्थलेऽपि तत्र तादृशशाब्दबोधानिवर्त्यसंशयानिवर्तकबोधजनकत्वस्यैव सम्यक्त्वात्। अन्यथा तादृशशाब्दबोधान्यतमत्वाप्रसिद्ध्याव्याप्तिरित्याह। **विशेष्यदले** इति अन्यतमबोधदले इत्यर्थः।

अत्र यादृशपक्षसाध्यका इत्यादिपरिचायकघटकस्य प्रकृतपक्षसाध्य-कार्थकत्वे एव तत्र यादृशरूपावच्छिन्नपक्षे यादृशरूपावच्छिन्नप्रकारक-बोधलाभान्निवर्तकत्वान्वयिनां जनकतान्वयिनां च बोधानां यादृशरूपावच्छिन्न-पक्षसाध्यविषयकत्वस्य लाभःइति प्रथमतःपरिचायकप्रविष्टयोः पक्षसाध्ययोःप्रत्येकप्रयोजनमाह। **वह्नित्वावच्छिन्नसाध्यकप्रतिज्ञयेति।** वह्निमानित्यारिकेत्यर्थः। **घटवद्भूतलादिघटितधर्मावच्छिन्नविशेष्यक** इति।

न चाऽनुमितेस्तादृशनिश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यत्वेऽपि तदप्रतिबन्धकसिषाधयिषाकालीनबोधजनकत्वमादाय प्रतिज्ञायां लक्षणसमन्वयः सम्भवतीति संशयपदमनर्थकं स्वरूपयोग्यतारूपजनकताया एव निवेशनीयतयाऽव्याप्तेरप्यनवकाशादिति वाच्यम्। अनिवर्तकत्वं हि प्रतिबन्धकतावच्छेदकीभूतविषयिताशून्यत्वं न तु प्रतिबन्धकत्वाभावः, तथा सति अप्रामाण्यज्ञानास्कन्दितबोधमादाय निगमनातिव्याप्तितादवस्थ्यात्। तथा च सिषाधयिषाकालीनसिद्धेरप्रतिबन्कत्वेऽपि प्रतिबन्धकतावच्छेदकविषयिताशालित्वेनानुमित्यनिवर्तकत्वाऽसम्भवात्।

न च सिद्धेः पूर्वं परतो वा सिषाधयिषाया उत्पादस्थले द्वितीयक्षणे प्रथमक्षणे वा सिषाधयिषाविरहविशिष्टत्वमक्षतमेवेति सिषाधयिषायामपि सिद्धौ अनुमितिप्रतिबन्धकत्वमक्षतमेवेति कथं तस्या अप्रामाण्यज्ञानास्कन्दितता-

---

अस्य बोधो जन्यते इत्यनेनान्वयः। **तादृशधर्मावच्छिन्नेति**। घटवद्भूतलादिघटितवह्नित्वावच्छिन्नेत्यर्थः। **संशयोऽपीति** संशयाऽप्रसिद्धौ हेतुः। तथा च यादृशरूपावच्छिन्नपक्षकत्वानुक्तौ यादृशरूपावच्छिन्नसाध्यकप्रतिज्ञाः सम्प्रदायसिद्धाः यादृशरूपावच्छिन्नप्रकारकबोधजनिकाः तादृशरूपावच्छिन्नप्रकारकबोधानिवर्त्यसंशयानिवर्तकबोधान्यतमबोधाजनकत्वे सति तत्तद्रूपावच्छिन्नसाध्यकन्यायान्तर्गतत्वं प्रतिज्ञात्वम् इत्युक्तौ घटवद्भूतलसमानकालीनः पर्वतो वह्निमानिति प्रतिज्ञाजन्यो वह्निमदभिन्नस्तादृशपर्वत इति बोधस्तन्निवर्त्यश्च भूतलं घटवन्नवेति संशयोऽपि, एवं रीत्या तदनिवर्त्यसंशयाप्रसिद्ध्याऽसम्भवः स्यादतस्तदुपात्तमिति भावः। एवं प्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकत्वानिवेशे घटवद्भूतलकालीनवह्निमदभिन्नः पर्वत इति बोधमादायाऽसम्भवो बोध्यः। ननु पक्षसाध्ययोरेकतरस्य निवेशे तादृशशाब्दत्वावच्छिन्ननिवर्त्तकतानिवेशेऽवच्छिन्नत्वं व्यापकतारूपमेव वाच्यम्, एवं च तादृशबोधत्वव्यापकनिवर्तकताया अप्रसिद्धिरेव वक्तुमुचितेति संशयाऽप्रसिद्धिकथनमसङ्गतमिति चेन्न। निवर्तकतायां स्वरूपसम्बन्धरूपावच्छिन्नत्वं निविष्टमित्यभिप्रायात्।

दृशविशिष्टार्थनिश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यत्वमिति वाच्यम्।

यादृशसिद्धेः पूर्वं परतश्च सिषाधयिषोत्पादस्तादृशसिद्धेरेवाऽप्रतिबन्धकत्वात्। प्रत्यक्षनिश्चयेऽपि विशेषदर्शनकालीनविपरीतनिश्चयस्याऽप्रतिबन्धकतामते तस्यापि प्रतिज्ञार्थनिश्चयत्वावच्छिन्नाप्रतिबध्यतया उक्तदिशाऽसम्भव इति प्रत्यक्षसामान्यमुपेक्ष्य संशयपर्यन्तानुधावनम्।

अत्र च तत्तद्विशिष्टार्थविषयकनिश्चयत्वावच्छिन्नसंशयप्रतिबन्धकताशून्यत्वस्य ज्ञानविशेषणत्वोपगमेनैवाऽतिरिक्तविषयकस्य हेत्वन्तादिभागजन्यबोधस्य तथाविधधूमज्ञानज्ञाप्यत्वादिसंशयप्रतिबन्धकताश्रयस्य वारणसम्भवात्तादृशप्रतिबन्धकतात्वेनैव तथाविधनिश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यसंशयप्रतिबन्धकतानिवेशो न तु तथाविधनिश्चयत्वावच्छिन्नप्रतिबंधकताकान्यसंशयप्रतिबन्धकतात्वेन गौरवादित्यवधेयम्।

ननु प्रकृतपक्षसाध्यतावच्छेदकावच्छिन्नत्वनिवेशो व्यर्थः, एवं तादृशबोधानिवर्त्यसंशयानिवर्तकत्वमपि अफलमित्याशंक्य समाधत्ते। **यत्किञ्चिद्रूपावच्छिन्नेति। निवेशने** इति **प्रागुपदर्शित** एवेति। अतिप्रसङ्ग इति योजना। वह्निसाध्यकोपनयस्य वह्निव्याप्यधूमसाध्यकप्रतिज्ञार्थबोधजनकत्वाद् वह्निसाध्यकन्यायान्तर्गतत्वाच्च प्रतिज्ञात्वापत्तिप्रसङ्ग इत्यर्थः। ननु तादृशान्यतमबाधजनकत्वमेवास्तु किं तादृशबोधानिवर्त्यसंशयानिवर्तकत्वनिवेशनेत्यत आह। **अधिकं त्विति। साध्यांशे।** वह्न्यंशे। **हेतुज्ञानज्ञाप्यत्वं।** धूमज्ञानज्ञाप्यत्वं। **निगमनादिजन्यबोधे।** धूमज्ञानज्ञाप्यवह्निमदभिन्नःपर्वत इत्याकारके। अक्षततयेति। पर्याप्त्यनिवेशादिति भावः। निगमनादीत्यादिपदात्। अनतिरिक्तविषयकत्वघटकसाध्यतावच्छेदकसम्बन्धनिवेशव्यावृत्तिस्थलस्य हेतुत्वं प्रमेयं प्रमेयादित्यादौ हेत्ववयवस्य परिग्रहः। **इत्थं च।** बोधे तादृशविशेषणे च। तथापि निगमनेऽतिव्याप्तिमाशङ्कते। **न चेति। प्रतिज्ञाजन्यबोधस्य।** वह्निमदभिन्नः पर्वत इत्याकारकस्य। **बोधत्वेनैवेति।** बोधत्वनिष्ठं प्रतिबन्धकतावच्छेदकत्वत्वम् स्वरूपसम्बन्धरूपमित्यभिमानः। **उपादेयता।** प्रविष्टतया। **निगमनादिजन्यबोधस्यापीति।** धूमज्ञानज्ञाप्यवह्निमदभिन्नःपर्वत इति बोधस्यापीत्यर्थः। अपिना प्रतिज्ञाजन्यबोधसमुच्चयः। **तथात्वात्।**

वक्तव्यम्। एवं च तादात्म्येन गवि साध्ये पक्षे गवाभेदस्य, संयोगेन

उक्तहेतुवारणाय तादृशबोधान्यतमेति। प्रकृतप्रतिज्ञाजन्यतावच्छेदकीभूतं यादृशयादृशबुद्धित्वं तादृशतादृशबुद्धित्वावच्छिन्नान्यतमजन्यतानिरूपित-जनकतापर्यन्तस्य विवक्षणीयतयोक्तसमूहालम्बनबोधमादाय न तत्रातिप्रसङ्ग इत्युक्तप्रायम्।

पर्वतत्वावच्छिन्नविशेष्यकवह्निमत्त्वावच्छिन्नप्रकारकत्वात्। **तन्निवर्त्यत्वं।** निगमनजन्यबोधनिवर्त्यत्वं **उक्तसंशयस्येति।** वह्निर्धूमज्ञानज्ञाप्ये नवेति संशयस्य। **अक्षतमेवेति।** तथा च निगमनेऽतिव्याप्तिस्तदवस्थैवेति भावः। प्रसक्तामतिव्याप्तिं निराकरोति। **अप्रामाण्यज्ञानानास्कन्दितेत्यादिना। तादृशविशिष्टार्थविषयकेति।** प्रतिज्ञार्थविषयकेत्यर्थः। **निश्चयत्वा-वच्छिन्नाऽनिवर्त्यत्वस्यैवेति।** प्रतिज्ञार्थविषयकनिश्चयत्वव्यापकप्रतिबन्धकता-निरूपितप्रतिबध्यतावच्छेदकविषयताशून्यत्वस्यैवेति समुदितार्थः। निश्चयत्वावच्छिन्नत्वं न स्वरूपसम्बन्धविशेषः इत्यनुपदमेव वक्ष्यति। **उक्तसंशयस्य।** वह्निर्धूमज्ञानज्ञाप्ये नवेति संशयस्य। **तथाविधेति।** वह्निमत्पर्वतविषयकेत्यर्थः। **निश्चयत्वावच्छिंनाऽनिवर्त्यत्वाऽक्षतेरिति।** वह्निमत्पर्वतविषयकनिश्चयत्वावच्छिन्नाऽनिवर्त्त्यत्वनिवेशेन। **स्वं**-संशयः। **तादृशेति।** वह्निमत्पर्वतविषयकेत्यर्थः। **निरस्तमिति।** पर्वतो वह्निमान्नवेति-संशयातिरिक्तसंशयं प्रति वह्निमत्पर्वतविषयकनिश्चयत्वेन न प्रतिबन्धकत्वं-किन्तु घटवद्भूतलादिविषयकनिश्चयत्वेन प्रतिबन्धकत्वादिति भावः। **तेन।** अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेन। **नाऽसङ्ग्रह इति।** तादृशनिश्चयत्वस्य तादृशसंशयनिरूपितप्रतिबन्धकताव्यापकत्वादिति भावः। **अत एव।** तादृशनिश्चयत्वव्यापकत्वनिवेशादेव। **हेतुजन्यबोधनिवर्त्येति।** हेतुत्वं धूमीयमिति बोधनिवर्त्येत्यर्थः। एतेन हेतुजन्यबोधे तादृशसंशय-निवर्तकत्वस्यैव सत्त्वादतिव्याप्तिविरहः सूचितः। **अप्रतिबन्धकत्वेपीति।** एतेन तादृशसंशये तादृशनिश्चयानिवर्त्यत्वं सूचितम्। **न विशेष्यदलवैयर्थ्यम्। विशेष्यदलं**–तादृशबोधान्यतमदलम्। **वैयर्थ्यमिति।** विशेष्यदलासत्त्वे धूमादालोकवान्पर्वतवह्निमानिति प्रतिज्ञाजन्यबोधत्वस्य हेतुत्वं धूमीयं नवेति संशयनिरूपितप्रतिबन्धकताव्यापकत्वादतिव्याप्तिः स्यादिति भावः।

गवाभेदस्येत्यादि। सकलषष्ठ्यन्तैः समं बोधा विशिष्य धर्तव्या इत्यग्रिमस्याऽन्वयः। यद्यपि तादात्म्येन गोसाध्यकस्थले अनुमित्यन्यूनानतिरिक्तविषयकबोधजनकत्वं प्रतिज्ञायाः सम्भवतीति प्रागभिहितं, तावतैव गवाभेदः प्रतिज्ञाप्रतिपाद्य इत्यस्य लाभात्तत्र तादृशबोधमादाय लक्षणं कर्तव्यमिति स्फुटमेव, तथापि तत्र तादृश एव बोधो लक्षणघटकः नत्वन्यविधो बोध इति स्फुटीकर्तुं तदुपादानम्।

उभयनिवेशनमिति। पूर्वमेकतरधर्मावच्छिन्नविषयताकत्वावच्छिन्ननिवर्तकताया, इदानीं च तादृशविषयताकत्वव्यापकनिवर्त्तकताया निवेश इति भेदः।

ननु अभेदसम्बन्धेन साध्यवद्विशिष्टपक्षविषयकत्वरूपविशिष्टविषयकत्वमेवाऽनतिरिक्तविषयकत्वघटबोधविशेषणमिति भ्रमसाधारणनिरूप्यनिरूपकभावापन्नविषयिताशालित्वेन बोधानां निवेशस्य पक्षे यादृशविशिष्टवत्त्वबोधिका इति ग्रन्थेन दीधितिकृतां प्रदर्शनवैयर्थ्यमित्याशङ्कते **यद्यपीति।** यादृशविशिष्टार्थबोधजनिका इत्युक्तौ वास्तवविशिष्टविषयिताशालिबोधप्रदर्शने जनकतास्वपि बोधेऽपि वास्तवविशिष्टविषयताशालित्वलाभादसम्भवं वक्तुं भूमिकामारचयति **तथापीत्यादिना।** हेत्वर्थमात्रविषयकबोधापादाने तस्य वास्तवप्रतिज्ञार्थाविषयकत्वेनाऽन्यतमान्तर्गतत्वाभाव इत्यग्रिमरीत्या हेत्यर्थविशिष्टसाध्यवैशिष्ट्यावगाहिबोधस्य नानतिरिक्तविषयकत्वमितिसमूहालम्बनानुधावनम्। न्यायावयवत्वमुभयघटकेत्यादिविशेषणघटितमित्याशयेन हेत्वन्ते, तन्निवेशमभिप्रेत्य च हेतावित्युक्तम्। एकदेशेऽप्यतिव्याप्तिमाह। **प्रतिज्ञाजन्येति। एकदेशे चेति।** प्रतिज्ञाघटके धूमादिति भागे, आलोकवानिति भागे वह्निमानिति भागे चेत्यर्थः। **अतथात्वादिति।** येन रूपेण विषयिताया अवच्छेदकत्वं तस्यास्तेनैव रूपेण स्वरूपसम्बन्धरूपावच्छेदकतया निवेशः। अन्यथा विशिष्टविषयितानिवेशे कथंता स्यात्तन्निवेशेऽपि अग्रिमाया योग्यताया निर्वह्निपर्वतपरपर्वतो वह्निमानिति वाक्यवारणायावश्यकत्वादिति बोध्यम्। **तथात्वाभिधानमिति।** पक्षे यादृशविशिष्टार्थबोधिका इत्यभिधानम्। **वैयर्थ्यमिति।** पर्याप्त्युपादाने च निगमनजन्यबोधस्याधिकावगाहितया तद्वैयर्थ्यं स्यादिति भावः। ननु पर्याप्त्यनिवेशे धूमादालोकवान् पर्वतो वह्निमान्धूमादित्यादौ प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिर्दुवारैव

समवायेन वा वह्नौ वह्निमदभेदस्य, समवायेन पाकस्य कृतौ पाककृतिमत्त्वस्य, पाककर्त्रभेदस्य,

विशेषणतया इतरेभ्योभेदे, इतरभेदवत्ववत्त्वस्य, इतरान्याभेदस्य, इतरभेदवत्त्वस्य, इतरभिन्नाभेदस्य बोधा विशिष्य धर्तव्या इति दिक्।

तादात्म्येन वह्नौ साध्येऽयं वह्निरित्येव प्रतिज्ञा जायते तत्र च वह्निमदभेदबोधो न लक्षणघटकः इत्यतः संयोगेन सभवायेन वेति। तादात्म्यातिरिक्तसम्बन्धेनेत्यर्थः। वह्नौ इत्यादिसप्तम्यन्तत्रयं साध्ये इति प्राक्तनेनान्वितम्। वह्निमदभेदस्येति। तत्राप्येतादृशबोधस्य तादृशप्रतिज्ञाजन्यतायाः प्रागुपदर्शितत्वेऽपि अन्यविधबोधासम्भवमाविष्कर्तुमेतदुपादानम्। पाककृतिमत्वस्येति। पाककृतिसमवायस्येत्यर्थः। पचतीति प्रतिज्ञातस्तद्बोधादिति भावः। पाककर्त्रभेदस्येति। पाककृत्यवछिन्नाभेदस्य पाककृतिमत्त्वावच्छिन्नाभेदस्य चेत्यर्थः। पक्ता पाककृतिमानित्यादितस्तद्बोधादिति भावः।

इतरभेदवत्त्ववत्वस्येति। इतरभेदाश्रयतासम्बन्धस्येत्यर्थः। इतरेभ्यो भिद्यते इत्यादितस्तादृशबोधोदयादिति भावः। इतरान्याभेदस्येति। इतरभेदावच्छिन्नाभेदस्येत्यर्थः। इतरान्येति प्रतिज्ञातस्तद्बोधादिति भावः। इतरभेदवत्त्वस्येति। इतरभेदसंसर्गस्येत्यर्थः। नेतराणीत्यतस्तद्बोधादिति भावः। इतरभिन्नाभेदस्येति।

तादृशवाक्यद्वयजन्यविशिष्टवैशिष्ट्यावगाहिबोधनिष्ठहेत्वर्थविशिष्टप्रतिज्ञार्थविषयकत्वावच्छिन्नजन्यतायाः प्रतिज्ञार्थविषयकत्वावच्छिन्नतया तन्निरूपितजनकताशालित्वात्। न च तादृशविशिष्टवैशिष्ट्यबोधो नानतिरिक्तविषयकः, वह्निर्धूमज्ञानज्ञाप्यो नवेति संशयस्यैव प्रतिज्ञार्थबोधानिवर्त्त्यतया तन्निवर्त्तकत्वादिति वाच्यम्। एवमपि धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमान्धूमादित्यादौ हेत्वन्तेऽतिव्याप्तिः, विशिष्टवैशिष्ट्यावगाहिबोधनिवर्त्यत्वस्य वह्निर्धूमज्ञानज्ञाप्यो नवेति संशये सत्त्वेन तदनिवर्त्यसंशयाऽनिवर्तकत्वस्याक्षतत्वादिति चेन्न। एवमपि तादृशप्रतिज्ञार्थविषयकनिश्चयत्वव्यापकनिवर्त्तकतान्यस्य पर्वतो धूमज्ञानज्ञाप्यवह्निमान्नवेति संशयस्य निवर्तकतयैवाऽदोषादिति न पर्याप्तिनिवेश आवश्यक इति।

ननु धूमाद्वह्निमत्पर्वतसधर्मा पर्वतो वह्निमान्धूमादित्यादौ हेत्वन्तेऽतिव्याप्तिः,

इतरभेदाश्रयत्वावच्छिन्नाभेदस्येत्यर्थः। इतरभिन्नेत्यादिप्रतिज्ञातस्तद्बोधादिति भावः।

अनतिरिक्तविषयकत्वदलार्थः पूर्ववदेव, अयूनविषयकत्वं तावद्बोधनिवर्त्ययावत्संशयनिवर्तकत्वं, दर्शितहेतुजन्यबोधस्य ज्ञानज्ञाप्यत्वं धूमीयं न वेत्यादिप्रतिज्ञाजन्यबोधनिवर्तनीयसंशयप्रतिबन्धकत्वेऽपि तादृशयावत्संशयान्तर्गतपर्वतो वह्निमान्नवेत्यादिसंशयानिवर्त्तकत्वेन वारणसम्भवादिति वदतो मतमाह। तावदिति। तत्तद्विशिष्टार्थविषयकेत्यर्थः। तावद्बोधनिवर्त्ययावत्संशयेति। तत्तद्विशिष्टार्थबोधान्यतमयत्किञ्चिद्बोधनिवर्त्ययावत्संशयेत्यर्थः। तेन भेदादिसाध्यकस्थले भेदतदाश्रयत्वादिकोटिकनानाविधसंशयानामेव प्रकृतसाध्यपक्षक-

---

तत्र विशिष्टवैशिष्ट्यावगाहिबोधनिवर्त्यताया उक्तसंशयेऽक्षतत्वादिति चेन्न। उपनयानुत्थानेन तादृशप्रतिज्ञाया एवाऽसत्त्वात्।

ननु पर्वतो वह्निमान्धूमादित्यादौ हेत्वर्थविशिष्टप्रतिज्ञार्थविषयकबोधजनकहेत्वन्तेऽतिव्याप्तिरेव नास्ति साध्यतावच्छेदके प्रकारतावच्छेदकतापर्याप्तिनिवेशादिति चेन्न। अनतिरिक्तविषयकत्वदलेनैव वारणात्तत्पर्याप्तिरपि न निवेश्यते इत्यभिप्रायात्। **तद्विशिष्टार्थनिश्चयनिवर्त्यत्वाभावकूटनिवेशनमिति।** तथा च भेदप्रकारकनिश्चयनिवर्त्यत्वस्यैव सत्त्वान्नाव्याप्तिरिति भावः। तादृशनिश्चयाऽनिवर्त्यज्ञानसामान्यनिवर्तकत्वमित्युक्तौ असम्भवः स्यात्–तथाहि–पक्षधर्मिकसाध्यवत्तानिश्चयाऽनिवर्त्त्या या सिषाधयिषाकालीननिश्चयसमानाकारानुमितिः तन्निवर्तकत्वस्यैव बोधे सत्त्वादित्याह। **प्रतिज्ञाजन्यबोधस्येति।** तादृशबोधस्य कथं तादृशानुमितिनिवर्तकत्वमित्याशङ्कते। **न चेति। अनुमितेः।** सिषाधयिषाकालीनानुमितेः। **तादृशनिश्चयप्रतिबन्धकताकान्यत्वेऽपीति।** तादृशनिश्चयानिवर्त्यत्वेऽपीत्यर्थः। **तदप्रतिबन्धकेति।** तादृशानुमित्यप्रतिबन्धकेत्यर्थः। **अव्याप्तेरपीति।** सिधाधयिषाविरहकालीनबोधजनके इत्यर्थः। **तथासति।** प्रतिबन्धकताशून्यत्वनिवेशे सति। **तथा च।** प्रतिबन्धकतावच्छेदकीभूतविषयिताशून्यत्वनिवेशे च **सिद्धेः।** प्रतिज्ञाजन्यबोधस्य। **अप्रतिबन्धकत्वेऽपि।** अनुमित्यप्रतिबन्धकत्वेऽपि। **अनुमित्यनिवर्त्तकत्वाऽसम्भवादिति।** तथा च संशयपदानुपादानेऽसम्भवः-स्यादिति भावः। पुनः संशयत्वनिवेशवैयर्थ्यं शङ्कते। **न चेति। तस्याः।** अनुमितेः। **तस्यापि।** प्रत्यक्षस्यापि। प्रतिज्ञार्थनिश्चयसत्त्वेऽपि प्रतिज्ञार्थाभाव-

तावद्बोधानिवर्त्यसंशयानिवर्तकतावद्बोधनिवर्त्ययावत्संशयनिवर्त्तक-बोधजनकत्वं वाच्यमित्यपि कश्चित्।

प्रतिज्ञार्थबोधनिवर्त्त्ययावत्संशयान्तर्गततया तावत्संशयनिवर्त्तकत्वं न कस्यापीति निरस्तम्। तावत्संशयनिवर्त्तकतायाः पृथिवी नेतराणि पृथिवी इतरेभ्यो भिद्यते इत्यादि प्रत्येकप्रतिज्ञाजन्यबोधेऽसत्वेऽपि एतादृशसकलवाक्यजन्यसमूहालम्बनबोधस्य तावत्संशयनिवर्तकत्वात्, तत्र च निरुक्ताऽनतिरिक्तविषयकत्वस्यापि सत्त्वात्, तज्जनकत्वमादायैव प्रत्येकप्रतिज्ञासु लक्षणसमन्वयो बोध्यः। अत्र च स्वमतापेक्षया गौरवमेवाऽस्वरसबीजं बोध्यम्।

व्याप्यवत्तानिश्चयादिना जनिते तदभावप्रत्यक्षे तादृशप्रतिबन्धकताकान्यत्वं बोध्यम्। **उक्तदिशेति।** अनिवर्तकत्वस्य प्रतिबन्धकतावच्छेदकविषयिताशून्यत्वरूपस्य निवेशावश्यकत्वप्रदर्शनदिशेत्यर्थः।

ननु प्रतिबन्धकत्वाभावस्यैव निवेशः सम्यक्, प्रतिबन्धकतावच्छेदकविषयितापर्यन्तनिवेशेऽसम्भवात्। वह्निमत्त्वाद्यवच्छेदेन घटाभावावगाहिग्रहेण वह्निमत्त्वादौ घटव्याप्त्यवगाहिग्रहेण वा सहितस्य प्रतिज्ञार्थबोधस्य पर्वतो घटवान्नवेति संशयनिवर्तकत्वात्। प्रतिबन्धकत्वाभावनिवेशे तु अवच्छेदकधर्मदर्शनशून्यकालीनप्रतिज्ञाजन्यबोधमादाय लक्षणसमन्वयसम्भवादिति चेन्न। ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकताया एवोपादानात्।

प्रतिबन्धकत्वाभावनिवेशपक्षं रोचयन्तोऽत्र संशयांशे विशिष्टभेदकूटनिवेशमपेक्ष्य प्रतिबन्धकतायां तादृशनिश्चयत्वानवच्छिन्नत्वनिवेशे लाघवमादर्शयन्ति **अत्र चेत्यादिना।**

निश्चयत्वानवच्छिन्नत्वं-निश्चयत्वाऽव्यापकत्वं, तादृशनिश्चयनिष्ठभेदप्रतियोगितावच्छेदकत्वकूटम्, कूटोपादानप्रयोजनं स्फुटमेव।[२३] स्वरूसम्बन्धावच्छिन्नत्वाभावनिवेशे विशेष्यदलवैयर्थ्यापत्तेः, सम्बन्धो वह्निमान्नवेत्यादिसंशयप्रतिबन्धकतामादायाऽव्याप्तेश्च। **ज्ञानविशेषणत्वोपगमेनैवेति। ज्ञानं** बोधः। **हेत्वन्तादिभागजन्येति।** निगमनघटकहेतुभागे इत्यर्थः। **तथाविधेति।** तत्तद्विशिष्टार्थविषयकनिश्चयत्वानवच्छिन्नेत्यर्थः। **तादृशेति।** तत्तद्विशिष्टार्थविषयकनिश्चयत्वानवच्छिन्नसंशयेत्यर्थः। **तथाविधेति।** तत्तद्विशिष्टार्थविषयकेत्यर्थः। **उक्तेति।** धूमादालोकवानित्यादिस्थलीयेत्यर्थः। बोधान्यतमत्व-

चैत्रः पचति, घटो नेतराणीति प्रतिज्ञायां साध्ये विषयत्वानुयोगित्वयोः संबन्धविधयैवानुप्रवेशात् यथोपदर्शितसाध्यगमतौपयिकव्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षे उपनेयत्वात्तथा चाऽयमित्याकारकः सुवच एव प्राचामुपनयः।

नव्यानां पुनरनन्यगतिकतया तद्व्याप्यहेतुमान् तद्वान्वेत्याकारो योग्यतावशाच्च तदा साध्यस्य तद्व्याप्यस्य वा परामर्शः।

ननु विषयतासम्बन्धेन पाकाद्यवच्छिन्नकृत्यादेर्यत्र साध्यता तत्र कीदृशोपनयः, न तावत्पाककृतिव्याप्यवानित्याकारकः, तत्र तत्पुरुषघटकपाकादिपदस्य पाकादिविषयकादिलाक्षणिकतया पाकविषयकाभिन्नकृतित्वावच्छिन्नव्याप्तेरेव लाभात् प्रकृतसाध्यतावच्छेदकावच्छिन्ननिरूपिताया व्याप्तेरलाभेनाऽर्थान्तरप्रसङ्गादित्यत आह। चैत्र इति। साध्ये। विशिष्टसाध्यशरीरे। विषयत्वाऽनुयोगित्वयोरिति। कृति–भेदांशे इत्यादिः। सम्बन्धविधयैवेत्येवकारेण विशेषणविधया व्यवच्छेदः। निपातार्थेन नामार्थस्य भेदान्वयधियोव्युत्पत्त्यविरुद्धतया नेतराणीत्यादौ प्रथमाया अनुयोगित्वार्थकत्वमसिद्धमिति हृदयम्। यथोपदर्शितेति। प्रतिज्ञोपस्थापितेत्यर्थः। उपनेयत्वात्। उपनयेन बोधनीयत्वात्। तादृशव्याप्तेरेवाऽऽकांक्षिततत्वेन यः पाककृतिसामग्रीमान् स पचतीत्युदाहरणेन प्रतिपादनात्तादृशव्याप्तिविशिष्टस्य पक्षधर्मताकांक्षयैवोपनयप्रयोग इति भावः।

निवेशे हेत्वर्थबोधकभागघटितप्रतिज्ञास्थलीय- हेतावतिव्याप्तिरतस्तत्परित्यज्य जन्यतान्यतमत्त्वं निवेशयति। **प्रकृतेति।** पक्षे साध्यवैशिष्ट्यावगाहित्वं नान्यूनविषयकत्वं किन्तु तादृशतादृशबुद्धित्वमिति भावः। **उक्तेति।** धूमादालोकवान्पर्वतोवह्निमान् हेतुत्वं च धूमीयमित्युक्तेत्यर्थः। जन्यतायां तादृशविषयित्वावच्छिन्नत्वं निवेश्यमिति प्रागभिधानेनैव जन्यतासु अन्यतमत्वं लब्धमित्येतद्दर्शयति **उक्तप्रायमिति।**

इदमत्रावधेयम्। अनिवर्तकेत्यनेनाऽनतिरिक्तविषयकत्वं व्युत्पादितम्। तत्प्रयोजनं च हेत्वन्तस्य वारणमित्युक्तमेव, तावद्बोधानिवर्त्यो यो वह्निर्धूमज्ञानज्ञाप्यो न वा इति संशयः तन्निवर्तकत्वाद्धेत्वन्तभागस्य। यद्यपि

केचित्तु वह्निमान्नवेति विप्रतिपत्ती संशये च वह्निमत्तदन्योन्याभावयोस्तादात्म्यविशेषणत्वाभ्यां कोटित्वेन जिज्ञासितत्वादिति तादात्म्येन वह्निमानेव साधयितुमुचितः, न तु वह्निरजिज्ञासितत्वात्।

सुवच एवेति। तथाशब्देन तादृशव्याप्तिविशिष्टहेतुमत एवोपस्थापनादिति भावः।

ननु मणिकृता थाल्प्रत्ययार्थं वितर्क्य तस्मात्तथेति निगमनस्य निराकरणीयतया तथापदघटितोपनयेऽपि तद्दोषग्रास इति अस्याननुमतस्तादृशोपनय इत्यत एतन्मतमनुसृत्याह। नव्यानामिति। ननु तत्पदेन यथोपदर्शितसाध्यस्येव तादृशसाध्यव्याप्तिविशिष्टहेतोरपि परामर्शसम्भव इति व्याप्त्यादिपदप्रयोगवैयर्थ्यमित्याशयेनाह तद्व्यान्वेति। ननु पक्षादेरपि प्रकान्तत्वात्तस्यैव कथं नोपनयस्थतच्छब्देन परामर्श इत्यत आह। योग्यतेति। तात्पर्यवशादित्यर्थः। व्याप्तिविशिष्टहेतुमत्त्वस्यैवाकाङ्क्षितत्वेन तत्परताया एव तत्र ग्रहादिति भावः। तदा। तच्छब्देन। साध्यस्येति प्रथमकल्पं, तद्व्याप्यस्येति द्वितीयकल्पमभिप्रेत्य।

पर्वतो वह्निमानित्यादेर्न्यायस्य वह्निसाध्यकत्वं निराकृत्य वह्निव्याप्यधूमवांश्चायमित्याद्याकारकोपनयं निराकुर्वतां मतमाह। केचित्त्विति। विप्रतिपत्तौ कोटित्वं तज्जन्यस्मृतिविषयत्वं तज्जन्यप्रत्येकशाब्दबोधप्रकारत्वं, वा, न तु तदधीनसंशयप्रकारत्वं, अतो न संशये चेत्यस्य वैयर्थ्यम्। तत्प्रदर्शनं च संशये कोटितानिर्वाहकत्वेन तस्य स्वतो जिज्ञासायामतन्त्रत्वादित्यवधेयम्।

हेत्वन्तभागजनितस्य पर्वतो धूमज्ञानज्ञाप्यवह्निमानिति बोधस्यापि तावदन्यतमबोधान्तर्गतत्वात्, वह्निधूमज्ञानज्ञाप्यो न वेति संशयस्यापि। तावदन्यतमबोधनिवर्त्त्यत्वादतिव्याप्तितादवस्थ्यम्। तथापि केवलप्रतिज्ञाव्यक्तीनां यादृशयादृशशाब्दधीजनकत्वं तादृशशाब्दसामान्यं यत्र यत्र प्रतिबन्धकं तदन्यसंशयाऽनिवर्तकत्वं विवक्षितम्, तथा च वह्निर्धूमज्ञानज्ञाप्यो नवेति संशयस्य केवलप्रतिज्ञाजन्यबोधेनाऽप्रतिबन्धान्न हेत्वन्तभागेऽतिव्याप्तिः।

अथैवमपि संशयपदं व्यर्थं प्रकृतपक्षसाध्यकप्रतिज्ञाव्यक्तीनां यादृशयादृशशाब्दधीजनकत्वं तादृशतादृशशाब्दसामान्यं यत्र यत्र प्रतिबन्धकं तदन्याऽनिवर्तकत्वमात्रस्यैव सम्यक्त्वात्। न चैतत्कालीनं वह्निमत्पर्वतस्य

तथाचायमित्याकारको वह्निमद्व्याप्यधूमवांश्चायमित्याकारको वा उपनयः। न तु वह्निव्याप्यधूमवांश्चायमित्याकारकः, अर्थान्तरत्वादिति प्राहुः।

यद्यपि वह्निमत उपस्थितिदशायां वह्नेप्युपस्थिततया तादृशविप्रतिपत्तिवाक्याद् वह्निकोटिसंशयो भवितुमर्हति। तथापि स्वातन्त्र्येण कोट्युपस्थितिः संशयप्रयोजिका इत्यभिप्रायेणेदमित्यवधेयम्। अथवा विप्रतिपत्तिवाक्याच्छाब्द एव संशय इति मतानुसारेणेदम्। वस्तुतो वह्न्यभावस्य कोटितायामेव वह्निकोटिसंशय उपपद्यते, न तु वह्निमद्भेदस्य, स्व–स्वाभावप्रकारकज्ञानस्यैव स्वसंशयत्वात्। प्रकृते च वह्न्यभावो नोपस्थितः, अपि तु तद्वद्भेद एवेति वह्न्यभावस्य कोटित्वाऽसम्भवाद् वह्निसंशयो न सम्भवतीत्यभिप्रायः। एतत्सूचनायैव वह्निमद्भेदस्य कोटित्वमभिहितम्। तदभिधानस्य प्रयोजनान्तराभावात्।

यद्वा धर्मिणि तत्प्रकारकबोधौपयिकांक्षावत्पदजन्यतदुपस्थितिरेव धर्मिणि तत्कोटिकसंशयजनिका, पर्वतो वह्न्यरभाव इत्यादितो वाक्याद्वह्न्याद्युपस्थितौ पर्वतादौ वह्न्यादिसंशयानुदयात्, तथा च पर्वतो वह्निमानित्यादिवाक्यस्थवह्न्यादिपदमपि न पर्वतादौ वह्न्यादेर्भेदान्वयौपयिकाकाङ्क्षावदिति न तादृशविप्रतिपत्तिवाक्याद् वह्न्यादिकोटिकसंशय इति परमार्थः। नवीनमतमनुसृत्याह। वह्निमद्व्याप्येति। प्राहुरिति प्रशब्देनाऽत्राऽस्वरसाभावः। सूचितः।

शाब्दज्ञानं जायतामितीच्छाया अपि प्रतिज्ञाजन्यशाब्दसामान्याप्रतिबध्यत्वात्तन्निवर्तकं यदेतत्कालीनं वह्निमत्पर्वतस्य शाब्दज्ञानं तज्जनिकायामिदानीन्तनप्रतिज्ञायामव्याप्तिवारणार्थं संशयपदमिति वाच्यम्। ज्ञानपदेनापि उक्तेच्छामादायाव्याप्तिवारणादिति चेत्, प्रागुक्तत्वात्।

धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादौ हेत्ववयवस्य वारणाय लक्षणोपात्तस्यान्यूनविषयकत्वदलस्य फलितार्थमाह **तावतां बोधानामन्यतमेनाप्यनिवर्त्त्यस्येति। वक्तव्यमिति।** अन्यूनानतिरिक्तविषयकत्वदलेनेत्यादिः। अत्र कल्पे सत्यन्तस्य न्यायान्तर्गतत्वमेवार्थो न तु न्यायावयवोऽर्थः,

यत्र चाऽन्तरा तादृशबोधो न जनितस्तत्रापि तादृशाकाङ्क्षा-योग्यताशालित्वरूपं तज्जननयोग्यत्वमक्षतम्।

फलोपधायकतारूपजनकतानिवेशशङ्कया प्रसक्तां तादृशशाब्द-बोधानुपधायकप्रतिज्ञायामव्याप्तिं योग्यताविवक्षया निराकरोति। यत्र चेति। अन्तरेति। हेत्वर्थादिविषयकशाब्दबोधसामग्र्या अनुत्तरमित्यर्थः। एतेन फलोपधानविवक्षणेऽवयवान्तरार्थविषयकशाब्दबोधमात्रोपधायकप्रतिज्ञायाम-व्याप्तिः प्रसज्यते अनतिरिक्तविषयकशाब्दबोधानुपधायकत्वादिति सूचितम्।

तादृशेति। तादृशशाब्दबोधजनकज्ञानविषयेत्यर्थः। आकाङ्क्षानिवेशात्पर्वतो वह्निः सम्बन्धीत्यादिनिराकाङ्क्षवाक्यव्युदासः। न च पर्वतो वह्निमानित्यादिशाब्दं प्रति निराकांक्षतादृशवाक्यविषयकज्ञानत्वेनाऽजनकत्वात्तादृशशाब्दबोध-जनकतावच्छेकविषयताकत्वनिवेशनैवोपपत्तौ आकांक्षानिवेशनमफलमिति वाच्यम्। पर्वतो वह्निमानित्यादिवाक्यानुपूर्वीप्रकारकभ्रमात्मकतादृश-निराकांक्षविषयकज्ञानस्यापि तथाविधशाब्दधीजनकतया तदीयविषयताया अपि जनकतावच्छेदकत्वेन तज्जनकतावच्छेदकप्रकारताश्रयानुपूर्वीरूपाकाङ्क्षाशालित्व-निवेशस्यावश्यकत्वात् तच्छालित्वं च तद्घटितवर्णसमुदायत्वं, तज्जनकता-वच्छेदकीभूतभ्रमान्ययत्किञ्चिज्ज्ञानवृत्तिविषयितानिरूपकवर्णसमुदायत्वमिति तु पर्यवसितोऽर्थः। ह्रदो वह्निमानित्यादिभ्रमानुमितिसमानविषयकतादृशबोध-जनकवाक्यस्य वारणाय योग्यता निवेशनीया। योग्यत्वं चाबाधितार्थकत्वं प्रकृतसाध्यविशिष्टप्रकृतपक्षबोधकत्वमिति यावत्। वैशिष्ट्यं च वास्तवं न तु वैज्ञानिकम्।

तावदन्यतमबोधानिवर्त्यसंशयानिवर्त्तकत्वदलस्य वैयर्थ्यापत्तेः, अवयवान्तरस्य तावद्बोधान्यतमबोधजनकत्वविरहाद्विशेष्यदलेनैव वारणसम्भवात्। सत्यन्तस्य न्यायावयवत्वार्थकत्वे तु प्रागुक्तैव गतिः।

यादृशत्वतादृशत्वयोरनुगतयोरभावाद्विशेषतः पर्यवसन्नं लक्षणमाह। दीधितौ-**एवं चेति**। पक्षे। इदन्त्वादिविशिष्टे। **गवाभेदस्येति**। अभेदसम्बन्धेन गोरित्यर्थः। **बोधाः विशिष्य धर्त्तव्या** इत्यग्रिमेणान्वयः। तदेवाह। **पष्ठयन्तैः सममित्यादिना**। तथा च तादात्म्येन गोप्रकारकेदन्त्वावच्छिन्नधर्मिकशाब्द-

तल्लाभश्च जातिविशेषोपस्थापकशाब्दवाक्यपदयोरूपसन्धानादेवेति।

यद्यपि स्वातन्त्र्येण योग्यतानिवेशो निरर्थकः, अन्यूनविषयकत्वावच्छिन्न-जन्यताप्रतियोगिकजनकताया अवश्यं विवक्षणीयतया वास्तववैशिष्ट्यघटित-साध्यविशिष्टपक्षविषयकत्वरूपान्यूनविषयकत्वनिवेशाऽसम्भवेऽपि अयोग्य-वाक्यप्रतिपाद्यविशिष्टार्थाप्रसिद्ध्या संप्रदायसिद्धप्रतिज्ञाप्रतिपाद्यविशिष्टार्थ-बोधाऽनिवर्त्यसंशयाऽनिवर्तकत्वरूपाऽनतिरिक्तविषयकत्वघटितलक्षणस्य तत्राऽतिव्याप्त्यप्रसक्तेः। तथापि वास्तववैशिष्ट्यघटिताऽनतिरिक्तविषयकत्व-निवेशसूचनाय योग्यतोपादानम्। आदिपदात्तात्पर्यविशेषपरिग्रहः। तेन निस्तात्पर्यकस्य शुकाद्युच्चरितप्रतिज्ञासमानाकारकवाक्यस्याऽर्थान्तर-परतादृशवाक्यस्य च व्युदासः।

ननु आकाङ्क्षादिनिवेशे शाब्दवाक्यपदयोर्वैयर्थ्यम् आकांक्षादेर्ज्ञाना-नान्तरौपयिकत्वविरहात् वाक्यातिरिक्ते असत्वाच्च अनुमितिजनकपरामर्शादौ शाब्दधीजनकयोग्यताज्ञानादौ अतिप्रसङ्गानवकाशादित्यत आकाङ्क्षादिमत्त्व-लाभार्थकतया तादृशपदोपादानं सार्थकयति तल्लाभश्चेति। तल्लाभः–शाब्दबोधं प्रति आकांक्षादिमत एव वाक्यस्य जनकतया आकाङ्क्षादिमत्त्वलाभः। तादृशपदद्वयोपादानादिति भावः। शाब्दपदस्य योगेन शब्दजन्यार्थकत्वे न तल्लाभः आकाङ्क्षादिरहितस्यापि शब्दस्य शब्दजन्यस्मृतिहेतुत्वादतो जातिविशेषोपस्थापकेति। रूढ्याऽनुभवनिष्ठशाब्दत्वरूपजात्यवच्छिन्नोपस्था-पकार्थकम्। शाब्दबोधं प्रति आकांक्षादिरहितस्यापि योग्यताज्ञानादेर्हेतुतया वाक्यपदानुपादाने केवलशाब्दपदान्न तल्लाभ इति वाक्यपदोपादानाऽपेक्षा इति भावः।

सामान्यानिवर्त्यसंशयानिवर्तकबोधाजनकत्वे सति अवयवाघटकप्रकृत-प्रकृतन्यायान्तर्गतत्वं प्रकृतन्यायावयवत्वं वा तादात्म्येन गोसाध्यकेदत्यावच्छिन्न पक्षप्रतिज्ञात्वम् इदन्त्वावच्छिन्न धर्मिकतादृशगोप्रकारकत्वरूपाऽन्यूनविषयकत्वं बोधविशेषणं न देयम्, प्रयोजनविरहात्, धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिस्थलीयनिरूक्तावेव हेतुवारणार्थं तस्य प्रवेश्यत्वात्। **स्फुटीकर्तुमिति।**

यत्तु तल्लाभश्चेति अन्यूनानतिरिक्तविषयकशाब्दत्वावच्छिन्नौपयिकाऽऽकाङ्क्षादिमत्त्वलाभश्चेत्यर्थः। शाब्दपदस्यावयवशक्त्या शब्दजन्यज्ञानत्वावच्छिन्नार्थकत्वे शब्दजन्यतावच्छेदकजातिविशेषानुपस्थित्या तदवच्छिन्नजन्यताप्रतियोगिकजनकतालाभो न भवतीत्युक्तं जातिविशेषोपस्थाकेति। तथा च कार्यदिशि शाब्दपदेन शाब्दत्वजातेः, कारणदिशि च वाक्यपदेनाऽकाङ्क्षादिमत्त्वस्य लाभात्तादृशशाब्दत्वावच्छिन्नौपयिकाऽऽकाङ्क्षादिमत्त्वलाभ इति व्याख्यानम्। तदसत्। अवच्छेदकतापर्याप्त्यनिवेशान्निरुक्तान्यूनविषयकत्वावच्छिन्नजन्यतानिवेशमात्रेणैवोपपत्या शाब्दत्वनिवेशने प्रयोजनाभावात्तदुपस्थितेरप्रयोजकत्वात्। न च तत्तदर्थविषयकत्वस्य शाब्दत्वनिष्ठजन्यतावच्छेदकतायामेवावच्छेदकतया जन्यतायां तदवच्छिन्नत्वविरहादन्यूनविषयकशाब्दत्वावच्छिन्नत्वेनैव जन्यता निवेशनीयेति वाच्यम्। विनिगमनाविरहेण शाब्दत्वविशिष्टतत्तदर्थविषयकत्वस्यापि जन्यतावच्छेदकत्वात्।

एतादृशस्थले अन्यतमत्वं न लक्षणघटकमिति दीधितिकृता व्यञ्जितम्। तदात्म्यातिरिक्तसम्बन्धेनेति। तेन कालिकेन वह्नेः साध्यत्वे कालो वह्निमानिति प्रतिज्ञाया अपि वह्निमदभेदमादायैव निर्वाह्यत्वान्न न्यूनतेतिध्येयम्। वह्नाविति। साध्येइति पूर्वेणान्वयः। एवमग्रेऽपि तदेवाह **सवह्नाविति सप्तम्यन्तत्रयमिति।** वन्हौ-कृतौ-इतरेभ्यो भेदे इति सप्तम्यन्तत्रयमित्यर्थः। **दीधितौ-वह्निमदभेदस्येति।** बोधो विशिष्य धर्त्तव्या इत्यनेन वचनविपरिणतेनाऽन्वयः। तथा च पर्वतधर्मिकवह्निमत्प्रकारकशाब्दसामान्यानिवर्त्यसंशयानिवर्तकबोधजनकत्वे सति प्रकृतन्यायावयवत्वं संयोगेन वह्निसाध्यक पर्वतपक्षकप्रतिज्ञात्वम्। **प्रागुपदर्शितत्वेऽपीति।** वह्निमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य वह्नेः संयोगात्मकः सम्बन्धो भासते इति ग्रन्थेनेति भावः। पाककृतेः साध्यतायां चैत्रः पचति चैत्रः पक्ता इत्येवं प्रतिज्ञाद्वैविध्याद् बोधद्वयं दर्शयति। **समवायेन पाकस्य कृताविति।** साध्ये इत्यनुवर्तते। **पाककृतिमत्त्वस्येति। बोधा विशिष्य धर्तव्या इत्यनेनाऽन्वयः। पचतीति प्रतिज्ञातस्तद्बोधादिति।** पाककृतिमत्त्वबोधादित्यर्थः। आख्यातार्थकृतेरेव चैत्रे प्रकारत्वादिति भावः। **पाककर्त्रभेदस्येति।** बोधा विशिष्य धर्तव्या इत्यनेनाऽन्वयः। **पक्ता-पाककृतिमानित्यादितस्तद्बोधादिति।** चैत्रः पक्ता इत्यत्र कृदर्थस्य, चैत्रः कृतिमानित्यत्र च मतुबर्थस्य कर्त्तुरेव चैत्रे प्रकारत्वात्।

अन्यूनानतिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणं तेनोदाहरणादिव्युदासः, निगमनञ्च न परामर्शहेतुः अबाधितासत्प्रतिपक्षितत्वज्ञानजनकत्वात्।

अन्यूनेत्यादि। तथा चोद्देश्यानुमितिसमानविषयकलिङ्गाविषयक-शाब्दज्ञानजनकन्यायावयत्वमर्थः। व्यतिरेकिणि ह्रदो निर्धूम इत्यादौ निर्वह्नित्वहेतुके यथा ह्रदभिन्नमिति दृष्टान्तवतो ह्रदावृत्तिधर्म-शून्यत्वादिहेतुके वा उदाहरणस्य वारणाय समानविषयकान्तम् पक्षमुख्यविशेष्यकार्थकम्। उपनयवारणाय लिङ्गाविषयकेति।

ननु अन्यूनानरिक्तपदपरित्यागे अनुमितिविषयकशाब्दधीजनकम-वशिष्यते तथा च पर्वतो वह्निमानित्यादिप्रतिज्ञावाक्यस्यानुमित्यबोधकतया अव्याप्तिरित्याशङ्कां परिजिहीर्षुरनुमितेर्विषयोयस्येति मध्यमपदलोपि-समासाभिप्रायेण समुदितलक्षणपर्यवसितार्थं व्याचष्टे तथा चेति।

दृष्टान्तवत इति। अस्याग्रिमेणोदाहरणस्येत्यादिनाऽन्वयः। अन्वय्युदाहरणस्य लिङ्गबोधकत्वाद्व्यतिरेकिपर्यन्तानुधावनम्। यो यो धूमवान् स वह्निमानिति व्यतिरेक्युदाहरणस्य वह्न्यभावादिरूपलिङ्गाबोधकत्वात् पक्षविषयकत्वमात्र-निवेशेनैव तादृशोदाहरणवारणसम्भवेन पक्षमुख्यविशेष्यकत्वपर्यन्तस्य

तथा च चैत्रधर्मिको यः पाककृतिप्रकारको यश्च तादात्म्येन पाककर्तृप्रकारको बोधस्तदन्यतरानिवर्तनीयसंशयानिवर्तकतदन्यतरबोधजनकत्वे सति प्रकृतन्यायावयवत्वं चैत्रपक्षकपाककृतिसाध्यकप्रतिज्ञात्वमिति भावः। पृथिव्यामितरभेदस्य साध्यतायां चतुर्विधस्यैव प्रतिज्ञाजन्यबोधस्य सम्भवात्तत्राऽन्यतमत्वेन बोधा उपादेया इत्याह। **दाधितौ-विशेषणतयेत्यादिना। इतरेभ्यो भेदे इति।** साध्ये इत्यनुवर्तते। **इतरभेदवत्त्ववत्त्वस्येति।** बोधा विशिष्यधर्त्तव्या इत्यनेनान्वयः। **इतरेभ्यो भिद्यते इत्यतस्तादृशबोधोदयादिति।** पृथिवी इतरेभ्यो भिद्यते इत्यत्राऽऽख्यातार्थाऽऽश्रयत्वस्य पृथिव्यां प्रकारत्वात्, **इतरान्याभेदस्येति।** बोधा विशिष्य धर्त्तव्या इत्यनेनाऽन्वयः। **इतरान्येति प्रतिज्ञातस्तद्बोधादिति।** पृथिवी इतरान्या इत्यत्र तादात्म्यसम्बन्धेन

विवक्षणीयस्य व्यावृत्तिदानाय यथा ह्रदभिन्नमित्यादिदृष्टान्तघटिततदनुसरणम्। दृष्टान्तघटितोदाहरणे व्यावृत्तिमाह। ह्रदावृत्तीति। उपनयवारणायेति। पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वनिवेशस्य प्रयोजनान्तरविरहेऽप्येतदर्थमेव तन्निवेशेऽननुषङ्गपक्षे निगमनातिव्याप्तिर्न सम्भवतीत्यभिप्रायेण निगमनोपेक्षा तस्मात् इतरेभ्यो भिद्यत इत्यादिनिगमनस्य पक्षविशेष्यकबोधजनकत्वाभावान्नि-

---

पृथिव्यामितरान्यस्यैव प्रकारत्वादिति भावः। **इतरभेदवत्त्वस्येति**। बोधा विशिष्य धर्त्तव्या इत्यनेनान्वयः। **नेतराणीत्यतस्तवत्वस्येति**। बोधा विशिष्य धर्त्तव्या इत्यनेनान्वयः। **नेतराणीत्यतस्तद्बोधादिति**। पृथिवी नेतराणीत्यत्र पृथिव्यामितरभेदस्य नञर्थस्य साक्षात्प्रकारत्वादिति भावः। **इतरभिन्नाभेदस्येति**। अस्यापि बोधाविशिष्य धर्तव्या इत्यनेनाऽन्वयः। **इतरभिन्नेत्यादि-प्रतिज्ञातस्तद्बोधादिति**। पृथिवी इतरभिन्ना इत्यत्र तादात्म्यसम्बन्धेन पृथिव्यामितरभिन्नस्य प्रकारत्वादिति भावः।

न च पृथिवी इतरान्येति प्रागुक्तक्रमेणैवाऽस्य गतार्थत्वम्। तत्राऽन्यत्वप्रकारेणैव भिन्नस्योपस्थापनात्, इह तु भिदधात्वर्थभिदाश्रयत्वस्येव निष्ठार्थाश्रयस्यैवाश्रयत्वरूपेण पृथिव्यामभेदेन भानात्ततो वैलक्षण्यादिति भावः।

तथा च पृथिवीधर्मिक इतरभेदाश्रयत्वप्रकारको यश्च तादात्म्येन इतरान्य-प्रकारकः, एवं इतरभेदप्रकारकः, तथा तादात्म्येन इतरभिन्नप्रकारको बोधः तदन्यतमानिवर्तनीयसंशयानिवर्तकतदन्यतमबोधजनकत्वे सति प्रकृतन्यायाव-यवत्त्वं पृथिवीपक्षक इतरभेदसाध्यकप्रतिज्ञात्वम्।

मतान्तरमवतारयति। **अनतिरिक्तविषयकत्वेति**। **पूर्ववदेवेति**। तावद्बोधाऽनिवर्त्य यावत्संशयानिवर्तकत्वरूप एवेत्यर्थः। **दर्शित हेत्विति**। धूमादालोकवान् पर्वतो वह्निमानित्यादिनेत्यादिः। **बोधस्य**। ज्ञानज्ञाप्यत्वं धूमीयमित्याकारकस्य। **तेन**। यत्किञ्चित्त्वनिवेशेन। यत्किञ्चित्त्वनिवेशे नाव्याप्तिरित्याह। **तावदिति**। **तत्र च**। समूहालम्बनबाधे च। **तज्जनकत्व-मादायैवेति**। तादृशबोधजनकत्वमादायैवेत्यर्थः। **अत्र च**। अस्मिन्मते च। **गौरवमेवेति**।

अथ धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञाहेतूभयजन्य-समूहालम्बनबोधस्यापि तावद्बोधानिवर्त्ययावत्संशयाऽनिवर्त्तकत्वे सति

गमनस्य पक्षविशेष्यकबोधजनकत्वाभावान्निगमनसामान्ये नातिव्याप्तेस्सम्भव इत्यभिप्रायेण वा। वस्तुतः पक्षमुख्यविशेष्यकत्वनिवेशेऽपि गोत्वं सास्नाभाववत् गोत्वाभावादित्यत्र यत्र सास्ना तत्र गोत्वमित्युदाहरणे पक्षमुख्यविशेष्यकबोध-जनकेऽतिव्याप्तिर्दुर्वारैव पक्षमात्रमुख्यविशेष्यकत्वनिवेशे च विश्वपक्षकस्थले मात्रार्थाप्रसिद्ध्याऽव्याप्तिरिति पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यत्वानिरूपक-त्वमेव विवक्षणीयं तथा च निगमनेऽननुषङ्गपक्षेऽतिव्याप्तिर्न सम्भवत्येवेत्यवधेयं

तत्तद्विशिष्टार्थविषयकबोधान्यतमयत्किञ्चिद्बोधनिवर्त्यनिवर्तकत्वरूपऽन्यूना-नतिरिक्तविषयकत्वविशिष्टत्वेन तन्निष्ठहेत्वर्थविषयकत्वावच्छिन्न-जन्यतानिरूपितजनकताश्रये हेतावतिव्याप्तिसम्भवे गौरवाभिधानं निर्बीजमिति चेन्न। निरुक्ताऽन्यूनाऽनतिरिक्तविषयकत्वव्यापकमुख्यविशेष्यत्वाव-च्छिन्नत्वस्य जन्यतायां विवक्षणे तादृशहेतौ नातिव्याप्तिः, तज्जन्यबोधीयमुख्यविशेष्यतायास्तादृशकेवलप्रतिज्ञाजन्यबोधसाधारणता-दृशबोधत्वव्यापकत्वाभावात्। विशेष्यतायां मुख्यत्वनिवेशान्न प्रतिज्ञाजन्यबोधीयाऽऽलोकविशेषणतापन्नधूमज्ञानज्ञाप्यत्वविषयतामादाय हेतावतिव्याप्तिः। दर्शितावच्छेदकतायाः प्रकारतान्यत्वमते प्रतिज्ञाजन्यबोधीयाया धूमविशिष्टज्ञानज्ञाप्यत्वनिष्ठधर्मितावच्छेदकप्रकारतानिरूपितविषयताया इतरविशेषणतानापन्नत्वरूपमुख्यविशेष्यत्वाक्रान्तायास्तादृशबोधत्वव्यापकत्वेऽपि तस्या जन्यतानवच्छेदकतया तदवच्छिन्नजन्यताया अप्रसिद्धेर्न तामादाय हेतुवाक्येऽतिव्याप्तिरिति गौरवाभिधानं सबीजमिति ध्येयम्।

ननु चैत्रः पचतीत्यादौ उपनयस्य दुर्वचत्वेन न्यायाभावाच्चैत्रः पचतीत्यस्य प्रतिज्ञात्वमेव न सम्भवतीति तत्र लक्षणसङ्गमनं दीधितिकृतामफलमेवेत्याशयेन शङ्कते। **नन्विति। तत्र।** उपनये। **अर्थान्तरप्रसङ्गादिति।** यद्रूपावच्छिन्न-साध्यबोधिका प्रतिज्ञा तद्रूपावच्छिन्नसाध्यव्याप्यस्यैव पक्षे उपनयत्वादिति भावः। **निपातार्थेनेति।** निपातातिरिक्तनामार्थस्य तादृशनामार्थे भेदसम्बन्धेनाऽन्वयोऽव्युत्पन्न इति नञो निपातेन तदर्थाभावे इतरपदार्थस्य भेदेनाऽन्वये बाधकाभावात्। **व्युत्पत्यविरुद्धतयेति।** नञो निपातत्वादिति भावः। **हृदयमिति।** अनुयोगितायाः संसर्गतावादिना नेतराणीति वाक्यजन्यबोधसामग्र्याः अनुयोगिता नेतरीया इदं भेदानुयोगित्वाभाववदिति,

यद्यपि प्रकृतलिङ्गाविषयकत्वं पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् (गन्धवती तथा गन्धादित्यादावव्यापकम्। न चात्रोपनयासम्भवः इदमा गन्धवत्त्वेन परामृष्टे हेतुभूतगन्धवत्वान्वयायोगादिति वाच्यम्। साध्याभावव्यापकगन्धाभावाभावत्त्वेनान्वयात्।

लिङ्गत्वस्य केवलान्वयितया सामान्यतो लिङ्गाविषयकत्वं ज्ञानेऽप्रसिद्धमिति प्रकृतलिङ्गाविषयकत्वं विवक्षणीयं तथापि न निस्तार इत्याशयेनाह यद्यपि प्रकृतेति। लिङ्गतावच्छेदकावच्छिन्नाविषयकत्वविवक्षणे पृथिवी इतरेभ्यो भिद्यत इत्यादिप्रतिज्ञाया नासङ्ग्रहः तज्जन्यबोधे स्वरूपत एव पृथिवीत्वादि-रूपलिङ्गभानादित्याशयेन स्थलान्तरे दोषमाह। गन्धवतीति। तथेति। तथा-इतरेभ्यो भिद्यते। न चात्र उपनयासम्भव इति। तथा च तादृशप्रतिज्ञादिघटितन्याय एव न सम्भवतीति काव्यातिशङ्केति भावः। इदमा इदंशब्देन। गन्धवत्त्वेनेति। उपनयस्थेदं शब्दस्य प्रतिज्ञोपदर्शितपक्षतावच्छेदका-वच्छिन्नपरत्वादिति भावः। गन्धवत्त्वान्वयेति गन्धवदभेदान्वयस्येत्यर्थः। अयोगादिति उद्देश्यत्वविधेयत्वयोरवच्छेदकयोरैक्ये अभेदान्वयबोधस्याव्युत्पन्न-त्वात्। अन्यथा घटो घट इत्यादावन्वयबोधप्रसङ्गादिति भावः। साध्याभावेति। साध्याभावव्यापको यो गन्धाभावः तदभावत्वेनेत्यर्थः। तथाच भिन्नरूपेण गन्धादेरुद्देश्यत्वविधेयत्वावच्छेदकगर्भेऽन्तर्भावान्नान्वयबोधानुपपत्तिरिति भावः।

द्विविधप्रत्यक्षे प्रतिबन्धकत्वं वाच्यं, भिन्नविषयकत्वात्, अनुयोगितायाः प्रकारतावादिना तु अनुयोगितासम्बन्धेनेतरभेदाभाववदित्येकविधप्रत्यक्षं प्रत्येवेति षठ्यर्थस्वत्वस्य प्रकारत्वाव्यवस्थापनदिशा अनुयोगितायाः प्रकारत्वे लाघवमस्वरसः। यः पाककृतिसाङ्ग्रीमान् सः पाककृतिमानित्युदाहरणोपद-र्शितपाकविषयकाभिन्नकृतिव्याप्यत्वविशिष्टे पक्षधर्मत्वोपदर्शकः पाककृतिव्याप्यवानित्युपनयः सुवच इत्याशङ्कां वारयितुमस्य तत्रानुदाहरणत्वं सूचयन्नाह। प्रतिज्ञोपस्थापितेति। अस्य साध्येऽऽन्वयः।

वितर्क्येति। यदि तथाशब्दस्य प्रक्रान्तं यद्विशेष्यं स एवार्थस्तदोपनयजन्यबुद्धौ हेतुमत एव विशेष्यत्वेन प्रक्रान्तत्वात्तस्माद्धेतुमानित्यर्थः स्यात्, हेतुमति हेतौ वा हेतुज्ञानज्ञाप्यत्वान्वयो न सम्भवति, न हि हेतुमत्त्वादेव

अत एव व्यतिरेकिणि न च नेयं पृथिवीत्यादिकः प्राचां प्रयोगः।

ननु हेत्वभावाभावत्वेन हेतूपस्थापकपदाभावात्कथमुपनयवाक्यात्तेन रूपेण पक्षे हेतुभानमत आह। अत एवेति साध्याभावव्यापकतावच्छेदक-हेत्वभावत्वाद्यवच्छिन्नाभावत्वेन हेत्वन्वयानुरोधादेवेत्यर्थः। न च नेयं पृथ्वीति। नञ्‌ द्वयेनाभावाभावत्वेन हेतुबोधनादिति भावः। यद्यपि पृथिवीत्वहेतुकस्थले तादृशोपनयप्रयोगो न युज्यते पृथिवीपदात्स्वरूपत एवोपस्थितस्य पृथिवीत्वरूप-पदार्थतावच्छेदकस्य नञर्थाभावे अन्वयासम्भवेन हेत्वभावाभावत्वेन हेत्वलाभात्। न च हेतुमद्भेदाभावोऽपि हेतुरेवान्योन्याभावाभावस्य प्रतियोगितावच्छेदकरूपत्वात् एवं (च) हेतुमद्‌भेद एव साध्याभावव्यापकता—यत्र नेतरभेदस्तन्न पृथिवीत्युदाहरणेन बोध्या इति पृथिवीभेदाभावत्वेन पृथिवीत्वबोधकस्तादृशोपनयो युज्यत एवेति वाच्यम्। एवमपि पृथिवीत्वादिहेतुवाक्योपस्थित-

---

हेतुमत्त्वम्, अननुभवात्। यदि प्रक्रान्तप्रकारोऽर्थः तदोपनयजन्यबोधविशेष्यस्य पक्षस्य सामान्यतोऽन्वयव्याप्तौ प्रवेशेन प्रकारतया उक्त एव दोषः। यदि प्रकान्तसादृश्यं, तदाऽभिधेयं प्रमेयं ज्ञेयत्वादित्यादौ प्रक्रान्तं यदुपनजन्यबोधविशेष्यमभिधेयं तद्‌भेदघटिततत्सादृश्याप्रसिद्धिरिति रीत्या वितर्क्येत्यर्थः। तादात्म्येन वह्निमतः साध्यतायामेव पर्वतो वह्निमानिति प्रतिज्ञा वह्नेः साध्यतायान्तु पर्वतस्तथा इत्याकारिका तथा च यादृशेत्यादिविवक्षां विनाऽन्यूनाऽनतिरिक्तविषयकत्वं यथाश्रुतमस्तीति स्वरसत एव दीधितिकृता केचित्तु इत्युक्तं तदवतारयति। **पर्वत** इति। एवं च तत्तद्विशिष्टार्थबोधगर्भलक्षणं तु प्रतिज्ञार्थानां नानात्वे एवेत्याशयः। **न्यायस्य।** प्रतिज्ञायाः। **निराकृत्येति।** वह्निमतः सिद्धौ अर्थत एव च वह्निसिद्धेर्वह्न्यभावसंशयनिवृत्तिसम्भवात्। **तज्जन्येति।** विप्रतिपत्तिजन्येत्यर्थः। वाक्यद्वयाभिप्रायेणाह। **तज्जन्येति।** यथाश्रुतार्थं निरस्यति **नत्विति। तदधीनेति।** विप्रतिपत्त्यधीनेत्यर्थः। ननु विप्रतिपत्तौ कोटिप्रदर्शनं किमर्थमित्यत आह। **तत्प्रदर्शनं चे ति।** विप्रतिपत्तौ कोटिप्रदर्शनं चेत्यर्थः। तथा च साधारणधर्माद्यसत्त्वेऽपि न क्षतिः। **तस्य।** विप्रतिपत्तिकोटित्वस्य। **स्यातन्त्र्येणेति।** तद्विशिष्टबुद्धौ तन्मुख्यविशेष्यकज्ञानत्वेन हेतुत्वादिति भावः। ननु शाब्दबोधजनकवह्निपदार्थोपस्थितेरेव स्वातन्त्र्येण कोट्युपस्थितिरूपायाः सत्त्वात्कुतो न वह्निकोटिकसंशय इत्यत आह। **अथवेति।** विप्रतिपत्तिकोटित्वं

पृथिवीत्वत्वविशिष्टहेतुकानुमित्यौपयिकतद्रूपविशिष्टवद्भेदत्वावच्छिन्ने साध्याभावव्यापकताया एवाकाङ्क्षिततया तस्या एव यत्रेतरभेदाभावस्तन्न पृथिवीत्युदाहरणेनोपदर्शनीयतया तद्रूपविशिष्टवद्भेदत्वावच्छिन्नाभावत्वेन हेतुमत्ताया एवोपनयत्वात्तादृशोपनयासङ्गतेः अन्यथा पृथिवीतरेभ्यो भिद्यते गन्धंसमवायिकारणतावच्छेदकरूपवत्त्वादित्यादावपि तथोपनयप्रयोगापत्तेरिति। तथापि तादात्म्येन पृथिवीहेतुकस्थलाभिप्रायेणेदम्। आदिपदान्न च नेयं गन्धवतीत्याकारकस्य न च नात्र गन्ध इत्याकारकस्योपनयस्य परिग्रहः। अत्र हेत्वभावादौ साध्याभावव्यापकत्वाभानेऽपि न क्षतिः प्राचीनमते उदाहरणादेव व्याप्तिलाभेन पक्षधर्मतामात्रस्योपनयत्वादत एव प्राचामित्युक्तम्। साध्याभावव्यापकेत्यादौ च व्यापकान्तमुपलक्षणार्थकम्।

च तद्घटकपदजन्यस्मृतिकोटित्वम्, परोक्षज्ञानं निश्चयात्मकमेवेति सिद्धान्तमनुरुध्याह। **वस्तुत** इति। ननु तथापि वह्निमद्भेदं कोटिं कृत्वा वह्निकोटिकसंशयो नानुपपन्नो वाधकाभावादत आह। यद्वेति।

तादृशेति। प्रतिबन्धकवशादित्यादिः। ननु यया प्रतिज्ञयाऽवयवान्तर-सहकारेणैव बोधो जनितस्तादृशप्रतिज्ञायामतिरिक्तविषयकबोधजनकत्वात्तत्राव्याप्तिदीधितावनुक्तत्वान्न्यूनतेत्याशङ्क्य तत्सङ्ग्रहार्थमन्तरापदस्यार्थमाह। **हेत्वर्थेति।** न्यूनतां स्फुटीकरोति। **एतेन।** अन्तरा कथनेन।

निराकांक्षवाक्यव्युदास इति। ननु निराकाङ्क्षवाक्यत्वं न्यायान्तर्गतत्वमेव न सम्भवतीति आकाङ्क्षापदं किमर्थमिति चेत्—उपनयघटकवह्निपदसम्बन्धिपदाऽयंपदानामेव न्यायान्तर्गततया तेष्वेवानुपूर्वीभ्रमस्याभिप्रेतत्वात्। तादृशानुपूर्वी-रूपाऽऽकाङ्क्षाशालित्वस्याऽन्तिमवर्णे एव विश्रान्तेराह। **तच्छालित्वं** चेति। आनुपूर्वीघटकवर्णत्वव्यापकसमुदायत्वं च न प्रत्येकं प्रतिज्ञासु तथासति यत्किञ्चिज्ज्ञानविषयवर्णत्वव्यापकत्वभेकदेशेऽपीत्यतः प्रतिज्ञाघटकवर्णे तद्घटकवर्णत्वभ्रमात्मकाकाङ्क्षावारणाय भ्रमान्यत्वं प्रागुक्तरीत्या यत्किञ्चित्प्रकारतास्थाने विषयतां च निवेशयन् गुरुतरमाकाङ्क्षाघटकत्वं परित्यजति। **तज्जनकेति।** तथाविधशाब्दधीजनकेत्यर्थः। भ्रमावृत्तित्वनिवेशे विशिष्टप्रतिज्ञाविषयतायाः अपि भ्रमवृत्तित्वादसम्भव इति **भ्रमान्येति।** तत्किञ्चित्त्वनिवेशव्यावृत्तिःपूर्ववत्।

यदि च दण्डवान् रक्तदण्डवानित्यस्यान्वयो नानुपपन्नः तद्विशिष्टे शुद्धत द्विशिष्टान्वयस्यैवाव्युत्पन्नत्वादित्युच्यते। तदा नानुपपत्तिगन्धोऽपि।

पक्षाविशेषणत्वेन तदविषयकत्वञ्चायं वह्निसामग्रीमान् वह्नेरित्यादौ पक्षाविशेषणत्वेन साध्याविशेषणत्वेन तदविषयकत्वञ्च,

---

ननु न च नेयं पृथिवीत्यादिकः प्राचीनानुमतोपनयोऽसङ्गतः नञर्थाभावस्य प्रतियोग्यनुयोग्युपरागेणैव शाब्दानुभवभानादन्योन्याभावबोधे समानविभक्तिक-प्रतियोग्यनुयोगिवाचकपदसमभिव्याहारस्य, संसर्गाभावबोधे च सप्तम्यन्तानुयोगि-वाचकपदसमभिव्याहारस्यापेक्षिततत्वात् प्रकृते चानुयोगिवाचकपदाभावेन पृथिवीभेदगन्धाभावादिबोधसम्भवादिति नवीनानुमत इतरव्यापकीभूताभाव-प्रतियोगिगन्धवती चेयमित्याद्याकारकोपनय एवादरणीयः तत्र हेतोः पक्षतावच्छेदककत्वे दर्शितव्युत्पत्तिविरोधो दुष्परिहर एवेत्यालोच्य नव्यमते समाधानमाह। यदि चेति उच्यत इत्यग्रिमेणान्वयः तद्विशिष्ट इति तद्धर्मं धर्मितावच्छेदकीकृत्य इतराविशेषिततद्धर्मावच्छिन्नाभेदान्वयबोधस्यैव व्युत्पत्तिविरुद्धत्वादित्यर्थः। नानुपपत्तीति। प्रकृते उद्देश्यतावच्छेदकाद्यघटकव्याप्ते विधेयतावच्छेदकघटकतया भानादिति भावः। तथाच गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादिन्यायस्यापि निष्प्रत्यूहतया लिङ्गविषयकतादृशन्यायान्तर्गत-प्रतिज्ञायामव्याप्तिर्दुर्वारैवेति भावः। ननु पक्षाविशेषणतया यल्लिङ्गविषयत्वं

अन्यूनविषयकत्वदले वास्तववैशिष्ट्यनिवेशे भ्रमसाधारणप्रतिज्ञायाम-सम्भवमाह। **अन्यूनेति। अवश्यं विवक्षणीयतयेति।** धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादौ प्रतिज्ञार्थविषयकबोधनिष्ठहेतुविशिष्टहेतुत्वविषयकत्वा-वच्छिन्नजन्यतानिरूपितजनकताश्रये हेतुवाक्येऽतिव्याप्तिवारणायेत्यादिः। **निवेशाऽसम्भवेऽपीति।** पर्वतो वह्निमानिति वाक्यस्य वह्न्यादिशून्यपर्वतादौ वह्निमत्त्वावगाहिबोधत्वावच्छिन्नजनकत्वानुरोधादिति भावः। **तत्र** अयोग्यवाक्ये। **तादृशवाक्यस्य।** प्रतिज्ञासमानाकारकवाक्यस्य।

वाक्यपदेनाऽऽकांक्षादिमत्त्वलाभे शाब्दपदापेक्षा दीधितिकृदुक्ता ता स्फुटीकरोति। **शाब्देति। आकाङ्क्षादेः।** तादृशबोधजनकतावच्छेदक-

दधि द्रव्यं दध्नः प्रमेयत्वमभिधेयं प्रमेयत्वात् गोत्वाभावो न सास्नादिमान् गोत्वाभावादित्यादावव्यापकमतिव्यापकञ्चोपनयस्य।

तच्छून्यत्वं विवक्षणीयमतो नोक्ताव्याप्तिरुक्तस्थले पक्षविशेषणतयैव लिङ्गविषयतासत्त्वेन विशिष्टाभावसत्त्वादित्यत आह। पक्षविशेषणत्वेनेति। अयं वह्निसामग्रीमान्वह्नेरित्यादाविति। अव्यापकमित्यग्रिमेणान्वयः। अथ पक्षाविशेषणत्वं पक्षनिरूपितविशेषणताभिन्नत्वं तस्य लिङ्गविषयताविशेषणत्वे चायं वह्निसामग्रीमान्वह्नेरित्यादावव्याप्त्याशङ्कानवकाशः तत्रापि पक्षविशेषणतापन्नसाध्यनिरूपितविशेषणतात्मकलिङ्गविषतायाः परम्परया पक्षनिरूपितत्वात् गन्धवतो पृथिवीतरेभ्यो भिद्यत इत्यादावपि मत्वर्थसम्बन्धांशे विशेषणीभूतगन्धविषयतायाः गन्धसमानकालीनरूपवती पृथिवीतरेभ्यो भिद्यत इत्यादौ तद्विषयतायाः साक्षात्पक्षनिरूपितविशेषणत्वानात्मकत्वेन साक्षात्परम्परासाधारणनिरूपितत्वस्यैव निवेशनीयत्वादिति चेन्न।

प्रकारताश्रयानुपूर्वीरूपाऽऽकाङ्क्षादिमत्त्वस्य। **तादृशपदोपादानं।** शाब्दवाक्य-पदोपादानम्।

जात्युपस्थापकेति वक्तव्ये विशेषपदोपादानफलं दर्शयति। **शाब्दपदस्येति।** आकाङ्क्षादिकं चोचितानुपूर्वीकत्वघटकप्रतिज्ञायां विशेष्यदले वा निवेश्यम्। इदं तु बोध्यम्। प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वाव-च्छिन्नभेदप्रतियोगितावच्छेदकत्वं नोचितानुपूवीकत्वं किन्तु निगमनपूर्वोपनय-पूर्वोदाहरणपूर्वहेतुपूर्वत्वावच्छिन्नप्रतियोगिताकभेदप्रतियोगितावच्छेदकत्व-हेतुपूर्वत्वान्तं वा, प्रतिज्ञात्वाऽनिवेशलाघवात्। एवं च पर्वतो वह्निः सम्बन्धात् निराकाङ्क्षवाक्यव्युदास इति पंक्तिर्यथाश्रुतैव सङ्गच्छते न्यायानन्तर्गत-तादृशवाक्येऽपि उचितानुपूर्वीकत्वसम्भवात्। न च प्रागभावानुपगमे तत्पूर्वत्वं तदुत्पत्तिक्षणोत्पत्तिकध्वंसक्षणवृत्तित्वमुत्पत्तिघटिततया गुरु इति वाच्यम्। संसर्गतया तन्निवेशेन लक्षणग्रहस्य तद्ग्रहं विनापि भावात्। सामान्यलक्षणाया-मुत्पत्त्यनुगमप्रकारस्य दर्शितत्वाच्च। तस्माद्विशेष्यदलनिवेशः।

स्वमते शाब्दपदवाक्यपदयोरुभयोरेवाकाङ्क्षादिमत्त्वलाभार्थकत्वं यत्तु मते च वाक्यपदादाकाङ्क्षादिलाभः, शाब्दपदाद्विजातीयशाब्दलाभः इति मतयोरुभयोर्भेद इति मतयोरुभयोर्भेद इति ध्येयम्। उक्तरीत्या कारणानन्तर्यस्य जन्यतावच्छेदक-

पक्षाविशेषणत्वं यद्युक्तार्थकं तदा निगमनातिव्याप्तिः। न च निगमने अयं पदाननुषङ्गपक्षे उक्तयुक्त्या पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यताकान्यत्वपर्यन्तस्यैतदनुरोधेनैव वा पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यकत्वस्य विषयकान्तार्थस्य विवक्षणीयतया नातिव्याप्तिरिति वाच्यम्। एवमप्यनुषङ्गपक्षे तत्रातिव्याप्तेर्दुर्वारत्वात् अतः पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारतान्यत्वमेव तदर्थो वाच्यः पक्षतावच्छेदकप्रकारतान्तःपातिनी सर्वैव प्रकारता तादृशविशेष्यतानिरूपिता इयांस्तु विशेषः काचित्साक्षात्काचित्परम्परया तथेति। विधेयकोटिप्रविष्टपदार्थप्रकारता च धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपिता विधेयनिरूपितविशेष्यताया धर्मितावच्छेदकावच्छिन्नतया धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतायाश्च स्वस्य स्वधर्मितानवच्छेदकत्वेन तदनवच्छिन्नतया विधेयतद्धर्मितावच्छेदकप्रकारतानिरूपकविशेष्यतयोर्भेदादिति निगमनादिजन्यबोधीयविधेयकोटिप्रविष्टलिङ्गविषयता न पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितविशेषणात्मिकेति न निगमनाद्यतिव्याप्तिः एवं च वह्निसामग्रीमान्वह्नेरित्यादावव्याप्तिः प्रसज्यत एवेति।

कोटिप्रवेशमतेऽन्यूनविषयकत्वस्यापि न जन्यतावच्छेदकत्वमित्यनुशयेनाह। **मूले-अन्यूनानतिरिक्तपदं विहायेति।** उद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सति उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वमिति लक्षणवाक्ये इत्यादिः। **अव्याप्तिरिति।** अनुमितिर्ज्ञानमिति प्रतिज्ञायां लक्षणगमनान्नासम्भव इति ध्येयम्। ननु न्यायावयवत्वे सति लिङ्गाविषयकशाब्दधीजनकवाक्यत्वमेव कथं नोक्तमित्यत आह। **दीधितौ-व्यतिरेकिणीत्यादि। अन्वय्युदाहरणस्येति।** यो यो निर्वह्निः स स निर्धूमो यथा ह्रद इत्युदाहरणस्येत्यर्थः। **व्यतिरेकिपर्यन्तानुधावनमिति।** तथा च यो यो धूमवान् स स वह्निमान् यथा ह्रदभिन्नमिति व्यतिरेक्युदाहरणस्य निर्वह्नित्वरूपलिङ्गाविषयकत्वमस्त्येवेति भावः एवं च लिङ्गाविषयकत्वरक्षार्थं व्यतिरेकिणीत्युक्तमिति ध्येयम्। **व्यतिरेक्युदाहरणस्येति।** व्यतिरेक्युदाहरणमात्रस्येत्यर्थः। दृष्टान्तरहितस्येति यावत्। एवं यो यो धूमवान् स स वह्निमान् यथा पर्वत इत्युदाहरणस्यापि बोध्यम्। **पक्षविषयकत्वमात्रनिवेशनैवेति।** एवकारेण पक्षमुख्यविशेष्यकत्वव्यवच्छेदः। **तादृशोदाहरणवारण-**

एतेन पर्वतो वह्निमान् धूमादित्यादिप्रसिद्धन्यायान्तर्गतोपनयेऽतिव्याप्ति-प्रसञ्जकत्वेन नैतद्विवक्षणं शङ्कापथमारोहति। न चायं दोषोऽतिव्यापकं चोपनयस्येत्यनेन स्वयमेव वक्ष्यत इति नानुपपत्तिरिति वाच्यम्। उपनय-वारणार्थकतयैव लिङ्गाविषयकत्वविशेषणस्य स्वयं प्राग्व्याख्याततया उपनयमात्र एव यादृशविवक्षायामतिव्याप्तिस्तादृशविवक्षायां सन्दर्भाविरोधस्य जागरूकत्वादि-त्यपि समाहितम्। न चैवमतिव्यापकञ्चोपनयस्येति ग्रन्थासङ्गतिः। तादृशग्रन्थस्य धूमवान् वह्निमान् धूमादित्यादिन्यायान्तर्गतोपनयविशेषपरत्वात् तत्र हेतोरेव पक्षतावच्छेदकतया पक्षतावच्छेदकावच्छिन्नांशे यद्विशेषणत्वं तस्यापि पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वात्। एवं व्यापकत्व-निरूपकतया हेतुविषयताया अपि स्वात्मकपक्षतावच्छेदकप्रकारतानिरूपकाधि-करणनिष्ठविशेष्यतानिरूपितप्रकारतात्मकतया अतिव्याप्तिसङ्गतिः। यत्तु पक्षतावच्छेदकहेतुकव्यतिरेक्युपनयपर्यन्तपरतया तादृशग्रन्थसङ्गमनमप्यन्व-य्युपनयजन्यबोधे व्याप्तिघटकतया लिङ्गविषयत्वसत्त्वेनातिव्याप्तिर्न सम्भवतीत्यभिमानेन केषाञ्चिन्मतम्। तदेतेन न श्रद्धेयम्।

पक्षाविशेषणत्वेन साध्याविशेषणत्वेन चेति। पक्षतावच्छेदक-प्रकारतानिरूपितविशेष्यतानिरूपितप्रकारताभिन्नत्वे सति साध्यतावच्छेदक-प्रकारतानिरूपितविशेष्यतानिरूपितप्रकारताभिन्नं यल्लिङ्गविषयत्वं तच्छून्यत्वमित्यर्थः। साध्यविशेषणतयेत्यस्य यथाश्रुतार्थकत्वे निगमने परम्परया साध्यविशेषणतयैव लिङ्गभानादतिव्याप्त्यापत्तेः। न चैवमपि ज्ञानविषयवान्

सम्भवेनेति। यो यो धूमवान् स स वह्निमानित्युदाहरणस्य यो यो धूमवान् स स वह्निमान् यथा पर्वत इत्युदाहरणस्य च वारणसम्भवादित्यर्थः। तथा च पक्षमुख्यविशेष्यकत्वप्रवेशो व्यर्थ इति भावः। **व्यावृत्तिदानायेति। तदनुसरणमिति।** उदाहरणानुसरणमित्यर्थः। तथा च प्रतियोगिविधयैव निरुक्तोदाहरणस्यापि उदाहरणानुसरणमित्यर्थः। तथा च प्रतियोगिविधयैव निरुक्तोदाहरणस्यापि पक्षविषयकत्वात् पक्षमुख्यविशेष्यकत्वमवश्यं वाच्यमिति भावः। दृष्टान्तप्रयोगस्याऽसार्वत्रिकत्वादाह। **दृष्टान्ताऽघटितेत्युदाहरणे** इति। दृष्टान्तमन्तर्भाव्यैवोदाहरणशरीरमिति मतेऽपीत्यादिः। **व्यावृत्तिमाहेति।** पक्षमुख्यविशेष्यकत्वव्यावृत्यर्थं स्थलान्तरमाहेत्यर्थः। तथा च ह्रदो निर्धूमो-

तथापि पक्षतावच्छेदकविशिष्टपक्षे यत्साध्यतावच्छेदकविशिष्ट-साध्यवैशिष्ट्यावगाहित्वं तद्बहिर्भावेण लिङ्गविषयत्वस्याभावो वाच्यः।

धूमादित्यादिन्यायान्तर्गतनिगमनेतिव्याप्तिस्तदवस्थैव ज्ञानविषयत्वरूप-साध्यतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वस्य हेतुप्रकारतायां सत्त्वात्, एवं वह्निसाध्यकनिगमनजन्यबोधीयहेतुज्ञानज्ञाप्यत्वविशिष्टवह्नित्वादि-प्रकारघटकविषयतायां साध्यतावच्छेदकावच्छिन्नादिनिरूपितप्रकारतात्व-स्याधिकं त्वित्यादिन्यायेनाक्षततया तादृशप्रकारघटकहेतुविषयतायाः निरुक्त-विशेष्यतानिरूपितप्रकारताकान्यत्वविरहात्तत्राप्यतिव्याप्तितादवस्थ्यमिति वाच्यम्। शुद्धसाध्यतावच्छेदकप्रकारतानिरूपकविशेष्यताया एव विवक्षणीयत्वात्। ननु पक्षधर्मलिङ्गाविषयकत्वविवक्षणे दधि द्रव्यं दध्न इत्यादौ नाव्याप्त्यवकाशः दधि द्रव्यमिति बोधस्य दधिद्व्यणुकविषयकस्य दधिसमवेतदध्यविषयकत्व-सम्भवादतः स्थलान्तरमाह प्रमेत्वमिति। ननु प्रमेयत्वं प्रमाविषयत्वं तच्च विषयभेदाद्भिन्नं, एवं च घटादिनिष्ठप्रमेयत्वाविषयकस्य प्रमेयत्व मभिधेयमिति बोधस्य प्रमेयत्वरूपपक्षनिष्ठप्रमेयत्वाविषयकस्य सम्भवान्न तत्राव्याप्तिरतः स्थलान्तरमनुसरति। गोत्वाभाव इति। ननु पक्षतावच्छेदकविशिष्टपक्षविषयतानन्तः पातिलिङ्गविषयताशून्यत्वनिवेशे नोपदर्शितहेतुपक्षकप्रतिज्ञाया असङ्ग्रहः। तदन्तःपातित्वं च पक्षतावच्छेदकप्रकारतानिरूपितसंसर्गतानिरूपकत्वं पक्षतावच्छेदकप्रकारता पक्षविशेष्यतासाधारणमित्यालोच्य अतिव्याप्तिमाह अतिव्यापकं चेति।

ह्रदावृत्तिधर्मशून्यत्वाादित्यादौ यो यो धूमवान् स स ह्रदावृत्तिधर्मवानित्युदाहरण-स्यापि लिङ्गाविषयकस्य ह्रदात्मकपक्षविषयकत्वात्तद्वारणार्थं पक्षमुख्य-विशेष्यकत्वमवश्यं निवेश्यमिति भावः। **उपनयवारणायेति।** उपनयेऽति-व्याप्तिवारणायेत्यर्थः तस्य पक्षमुख्यविशेष्यकबोधजनकत्वादिति भावः। ननु निगमनस्यापि पक्षविशेष्यकबोधजनकत्वादुपनयमात्रोक्तिरयुक्ता तस्माद्वह्निमा-नित्यादौ वह्निमत्त्वेन पर्वतस्यैव विशेष्यत्वात्, पक्षतावच्छेदकविशिष्टविशेष्यकत्वं तु गौरवान्न विवक्षणीयम्, इतरेषाम् अन्वय्युदाहरणादीनां लिङ्गाविषयकत्वेनैव निरासादित्यत आह। **पक्षतावच्छेदकावच्छिन्नेति। प्रयोजनान्तरविरहेऽपीति।**

लिङ्गाविषयकत्वनिवेशात्पश्चादिति शेषः। इदमापाततः—वस्तुत इत्यादिना वक्ष्यमाणोदाहरणेऽतिव्याप्तिवारणरूपप्रयोजनसत्त्वादिति ध्येयम्। पक्षतावच्छेक-निवेशेऽपि लिङ्गाविषयकोक्तव्यतिरक्युदाहरणेऽतिव्याप्तेर्मुख्यत्वनिवेश-स्यावश्यकत्वे तद्वैयर्थ्यात्। **एतदर्थमेव** निगमनेऽतिव्याप्तिवारणायैव। एवकारेण उपनयातिव्याप्तेर्वारणव्यवच्छेदः। निगमने मतुबर्थसम्बन्धित्वेन पक्षभानमभि-प्रेत्येदम्। **तन्निवेशे।** पक्षतावच्छेदकनिवेशे। **अतिव्याप्तिर्न सम्भवतीति।** पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यकबोधाजनकत्वात्। निगमनविशेषेऽति-व्याप्तिसत्त्वेऽपि निगमनसामान्ये नातिव्याप्तिरित्यतो निगमनमुपेक्षितमित्याह। **तस्मादीति।** गन्धवत्त्वादित्यर्थः। **पक्षविशेष्यकबोधजनकत्वाभावादिति।** आश्रयत्वं भेदवदित्याकारकस्तत्र बोधः। आख्यातार्थाश्रयत्वस्यैव मुख्यविशेष्यत्वात्। **निगमनसामान्ये नातिव्याप्तिसम्भव** इति। उपनयस्य तु पक्षमुख्यविशेष्यकबोधजनकत्वादुपनयसामान्येऽतिव्याप्तिर्भवत्येवेति तन्मात्राभिधानमिति भावः। **पक्षमात्रमुख्यविशेष्यकत्वनिवेशे चेति।** तत्रातिव्याप्तिवारणेऽपीति शेषः। सास्नाया अपि मुख्यविशेष्यत्वादिति भावः। **मात्रार्थाऽप्रसिद्धया।** विश्वेतराऽप्रसिद्धया। हेतुत्वं प्रमेयं ज्ञेयत्वादित्यत्र हेत्ववयवेऽतिव्याप्तिः कथं नोक्तेति **विभावनीयम्। तथा च।** पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यत्वानिरूपकत्वनिवेशे च। **निगमने।** निगमनविशेषे। न **सम्भवत्येवेति।** अत्रापि सम्बन्धित्वेन रूपेण पक्षभानादिति भावः।

ननु तथापि यत्र गोत्वस्य पक्षत्वं समवायावच्छिन्नतदभावस्य साध्यत्वं कालिकसम्बन्धावच्छिन्न तदभावस्य स्वरूपेण हेतुत्वं तत्र व्यतिरेक्युदाहरणे यत्र गोत्वं तत्र गोत्वमित्यत्रातिव्याप्तिः, तज्जन्यज्ञाने तादृशमुख्यविशेष्यत्वा-निरूपकत्वसत्त्वादिति चेन्न—मुख्यविशेष्यताद्वयानिरूपकत्वस्य विवक्षणीयत्वात्। न च निगमनपरित्यागे बीजाभाव इति वाच्यम्। पक्षतावच्छेदकावच्छिन्न मुख्यविशेष्यकत्वस्यापि निवेशनीयत्वादिति।

केचित्तु स्वनिरूपकत्वस्वभिन्नस्वावच्छेदकावच्छिन्नविशेष्यता-निरूपकत्वोभयसम्बन्धेन पक्षतावच्छेदकावच्छिन्नविशेष्यताविशिष्टं यत्तदन्यत्वं ज्ञाने विशेषणीयम्, उक्तस्थले च समवायावच्छिन्नाधेयत्व, कालिकसम्बन्धावच्छिन्नाधेयत्वरूपप्रकारताभेदेन गोत्वत्वावच्छिन्न-

पक्षतावच्छेदकविशिष्टे इति। पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यता-निरूपिता या साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितवैशिष्ट्यविषयता तद्बहिर्भूतलिङ्गविषयताशून्यत्वमित्यर्थः। अथ तद्बहिर्भूतत्वं न साक्षात्परम्परासाधारण तन्निरूपकत्वशून्यत्वम्। पक्षतावच्छेदकप्रकारताया उक्तयुक्तया तदनिरूपकत्वात् कथञ्चिन्निरूपकत्वोपपादनेऽपि यत्र संयोगेन वह्नेस्साध्यता वह्निसंयोगत्वेन हेतुता तत्रत्यप्रतिज्ञायामव्याप्तिः। हेतुभूतवैशिष्ट्य-विषयतायाः स्वनिरूपकत्वविरहात्, एवं साक्षात्परम्परासाधारणानुगत-निरूप्यनिरूपकभावोऽपि दुर्वचः परम्परया निरूपितत्वस्य तन्निरूपितनिरूपित-त्वाद्यात्मकत्वात्।

विशेष्यतयोर्भेदान्निरुक्तोभयसम्बन्धेन गोत्वत्वावच्छिन्नविशेष्यता-वत्त्वान्नातिव्याप्तिः।

न्यायावयवत्वे सति लिङ्गाविषयकत्वे सति पक्ष मुख्यविशेष्यकाशाब्दधी-जनकवाक्यत्वं प्रतिज्ञालक्षणम्। **केवलान्वयितयेति।** वस्तुमात्रस्यैव लिङ्गत्वादिति भावः। **तथापि** प्रकृतपदप्रक्षेपेऽपि। **दीधितौ तथा** इतरभेदवती। अव्यापकमिति। अव्याप्तमित्यर्थः, प्रतिज्ञाद्वयस्य क्रमेण पृथिवीत्वं गन्धरूपलिङ्गविषयकत्वादिति भावः। **तज्जन्यबोधे।** पृथिवी इतरभेदवतीति प्रतिज्ञाजन्यबोधे। **स्वरूपत एवेति** एवकारेण लिङ्गतावच्छेदकीभूतपृथिवीत्व-त्वादेर्व्यवच्छेदः। **स्थलान्तरे दोषमाहेति।** लिङ्गतावच्छेदकीभूतं यद्गन्धत्वं ताद्रूप्येणैव लिङ्गस्य (गन्धस्य) प्रतिज्ञाजन्यबोधो भानादिति भावः। ननूक्तस्थले न्यायाऽसम्भ वात्प्रतिज्ञैव न सम्भवतीति कुत्राव्याप्तिरित्यशंक्य निराचष्टे। **दीधितौ-न चेति। परामृष्टे। पक्षे। दीधितौ गन्धवत्वान्वयायोगादिति।** इतरभेदव्याप्यगन्धवत्त्वाऽन्वयायोगादित्यर्थः। **अव्युत्पन्नत्वादिति।** गन्धवत्त्वेनोपस्थितस्य (इदं पदार्थस्तु) गन्धवत्त्वान्वये निराकाङ्क्षत्वादिति भावः। **तथाचेति।** इतरभेदाभावव्यापकीभूतस्य गन्धाभावस्याभाववती चेयमित्युपनयशरीरे चेत्यर्थः। **भिन्नरूपेण।** गन्धत्वेन-गन्धाभावाभावत्वेन **नान्वयबोधानुपपत्तिरिति।** गन्धवत्त्वेनोपस्थिते गन्धवत्त्वेनान्वये निराकाङ्क्षत्वम्, न तु गन्धाभावाभावत्वेनापि प्रकारभेदादिति भावः। **हेतूपस्थापकपदाभावा-दिति।** उपनयघटकतथाशब्दस्य सर्वत्र हेतुतावच्छेदकरूपेणैव हेतुपरत्वादिति

एतेन तादृशवैशिष्ट्यविषयतानिरूपकविषयत्वानिरूपितत्वं तादृशविषयताबहिर्भूतत्वं तच्च वैशिष्ट्यविषयतासाधारणं तन्निरूपक-प्रकारताविशेष्यतानिरूपितत्वमादाय तन्निरूपकविशेष्यताप्रकारतासाधारणं चेत्युक्तावपि न निस्तार इति चेन्न। तथाविधवैशिष्ट्यविषयताशालिनिश्चयत्व-समनियतप्रतिबन्धकतानवच्छेदकत्वमेव—तद्बहिर्भूतत्वम्। निगमनजन्य-बोधीयहेतुविषयता च यादृशप्रतिबन्धकतावच्छेदककोटौ निवेश्यते तादृशी न कापि प्रतिबंधकता तथाविधनिश्चयत्वव्यापिका हेत्वविषयकतादृश-वैशिष्ट्यविषयताशालिज्ञानसाधारण्यात्।

भावः। शङ्कते **यद्यपीति तादृशोपनयप्रयोग इति।** "इतरभेदाभावव्यापकीभूत" पृथिवीत्वाभावस्याभाववती चेयमित्यर्थक न च नैयं पृथिवीत्याकारकोपनय-प्रयोग इत्यर्थः **न युज्यते इति।** अयुक्तत्वे हेतुमाह **पृथ्वीपदादिति।** पृथिवीत्वजातेरन्वयितावच्छेदकरूपेणानुपस्थिततया तस्याः अभावांशेऽनुयोगिता-सम्बन्धेनाऽन्वयो न सम्भवतीति सूचनायाह **स्वरूपत एवेति। पृथिवीत्वरूप-पदार्थतावच्छेदकस्येति।** एतेन एकत्रान्वितस्यापरत्रान्वयो न सम्भवतीति सूचितम्। **हेत्वभावाभावत्वेन।** पृथिवीत्वाभावाभावत्वेन। **हेत्वलाभात्।** पृथिवीत्वालाभात् इतरभेदाभावव्यापकीभूतपृथिवीत्वाभावस्याभाववती चेयमित्युपनयप्रयोगो न युज्यते इति भावः। शङ्कते। **न चेति। हेतुमद्भेद एवेति।** पृथिवीत्ववद्भेदे एवेत्यर्थः। एवकारेण **पृथिवीत्वाभावव्यवच्छेदः। साध्याभावव्यापकता।** इतरभेदाभावव्यापकता। **बोध्यते** इति। इतरभेदा-भावव्यापकः पृथिवी भेद इति बोध इति भावः। **पृथिवीत्वबोधक** इति। इतरभेदाभावव्यापकीभूतस्य पृथिवीभेदस्याभाववती चेयं इति बोधजनक इत्यर्थः। **तादृशोपनय** इति। न च नेयं पृथिवीभेदस्याभाववती चेयं इति बोधजनक इत्यर्थः। **तादृशोपनय** इति। नच नेयं पृथिवीत्युपनय इत्यर्थः। **साध्यताभावव्यापकताया एवेति।** इतरभेदाभावव्यापकताया एवेत्यर्थः। एवकारोभिन्नक्रमः। तद्रूपविशिष्टवद्भेदत्वावच्छिन्ने एवेत्यर्थः। पृथिवीत्वत्व-विशिष्टवद्भेदत्वावच्छिन्ने एवेति यावत्। एवकारेण पृथिवीभेदव्यवच्छेदः। **तस्या एवेति।** पृथिवीत्वत्वविशिष्टवद्भेदत्वावच्छिन्ने इतरभेदाभावव्यापकताया एवेत्यर्थः। **तद्रूपविशिष्टवद्भेदत्वावच्छिन्नाभावत्वेन।** पृथिवीत्वत्वविशिष्ट-

अतस्तथाविधहेतुविषयतायास्तद्बहिर्भूतत्वोपपत्तिरित्यनुषङ्गपक्षेऽपि न निगमनातिव्याप्तिः तादृशनिश्चयत्वव्यापकत्वमात्रस्य प्रतिबन्धकताविशेषणत्वे धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यत्र हेत्ववयवेऽतिव्याप्तिः, तादृशहेतुनिष्ठायाः हेतुत्वं धूमीयं न वेति संशयप्रतिबन्धकतावच्छेदकतादृश-बोधविषयताया निरुक्तविषयताबहिर्भूतत्वानुपपत्तेः अतस्तादृशनिश्चयत्वव्याप्य-त्वमपि प्रतिबन्धकताविशेषणम्।

वद्भेदत्वावच्छिन्नाभावत्त्वेन। **हेतुमत्ताया एवेति।** पृथिवीत्ववत्ताया एवेत्यर्थः। एवकारेण पृथिवीभेदत्वावच्छिन्नाभावत्वेन पृथिवीत्वस्य व्यवच्छेदः। उपनेयत्वादिति। उपनयजन्यबोधविषयत्वादित्यर्थः। **तादृशोपनयाऽसङ्गतेरिति।** पृथिवीत्वत्वानुपस्थापकोपनयाऽसङ्गतेरित्यर्थः। इतरभेदाभावव्यापकीभूतस्य पृथिवीभेदस्याभाववती पृथिवीत्युपनयाऽसङ्गतेरिति यावत् **अन्यथा।** येन रूपेण यस्य हेतुवाक्यादुपस्थितिस्तद्रूपावच्छिन्नत्वाविशेषिततदवच्छिन्नभेदे साध्याभावव्यापकताया एवाकाङ्क्षितत्वोपगमे। **तथोपनयप्रयोगापत्तेरिति।** इतरभेदाभावव्यापकीभूतपृथिवीभेदस्याभाववती चेयमित्युपनयप्रयोगापत्तेरित्यर्थः। यत्र नेतरभेदस्तन्न पृथिवीत्युदाहरणद्वारापत्तिर्बोध्या। **तथापीति।** पृथिवीत्वहेतुक-स्थले इतरभेदाभावव्यापकीभूतपृथिवीत्वाभावाभाववती चेयमित्युपनयप्रयोगाऽ-सम्भवेऽपीत्यर्थः। **पृथिवीहेतुकस्थलाभिप्रायेणेति।** इदमपि प्रतियोगितावच्छेदक-वत्प्रतियोग्यपि अन्योन्याभावाभाव इति मतेन। अन्यथा पृथिवीभानानुपपत्तेः। **इदम्**-उपनयप्रयोगाभिधानम्। गन्धवद्धेतुकमुपनयं प्रदर्श्य गन्धहेतुकं तमाह। **न च नात्रेति।** नन्वेवमपि न च नेयं पृथिवीत्युपनयोऽसङ्गतः, साध्याभाव-व्यापकतायाः तद्बोधकशब्दाभावेनाऽभानादित्यत आह। **अत्रेति।** साध्याभाव-व्यापकहेतुमद्भेदाभाववती चेयमित्युपनये इत्यर्थः। **प्राचीनमते** इति। यथाऽन्वय्युपनेयं पक्षधर्मतामात्रं, तथा व्यतिरेक्युपनेयमपि तदेवेति भावः। ननु दीधितो–साध्याभावव्यापकेत्यसङ्गतमित्यत आह। **साध्याभावव्यापकेत्यादौ** चेति। आदिना साध्यव्याप्यस्य सङ्ग्रहः। **व्यापकान्तमिति।** एवं व्याप्यान्तमित्यपि बोध्यम्। न च पृथिवी नेयमिति योजना। तत्र न च पृथिवीत्यत्र न पृथिवीभेदोऽर्थः, प्रथमान्तानुयोगिताकपदाभावात्। नेयमिति नञर्थो नाऽत्यन्ताभावः सप्तम्यन्तानुयोगिवाचकपदाभावादित्याशङ्कते। **नन्विति।**

न च पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यताकत्वनिवेशस्यावश्यकतया नैतादृशातिव्याप्तिसम्भावनेति व्यर्थं व्याप्यत्वनिवेशनमिति वाच्यम्। तथाप्यनुषङ्गपक्षे धूमाद्वह्निमतस्सधर्मा पर्वतो वह्निमान् धूमादित्यादिन्याय-स्थलीयनिगमने हेतुत्वं प्रमेयाद्वाच्यत्ववत् प्रमेयादित्यादिन्यायस्थलीयहेत्ववयवे चातिव्याप्तेर्दुर्वारत्वात्तन्निवेशस्यावश्यकत्वादिति। न च धर्मितावच्छेदकनिष्ठं प्रकारत्वं न प्रतिबन्धकतावच्छेदकमपि तु तत्तन्निष्ठविशेष्यतावच्छेदकत्वमेव तथा च गन्धवतीतरेभ्यो भिद्यते इत्यादिप्रतिज्ञाजन्यबोधीयहेतुप्रकारता-यास्तद्बहिर्भूतत्वादव्याप्तिरिति वाच्यम्। विशेष्यतावच्छेदकताया एव प्रकारतात्वोपगमेन तादृशबोधे तदन्यप्रकारतानभ्युपगमात्। एवं सति प्रसक्तस्य भूतलं घटवदित्यादिज्ञानस्य भूतलत्वांशे तद्धर्मितावच्छेदकत्वस्य प्रकारान्तरेण वारणसम्भवात्।

तथाच। दर्शितोपनयजन्यबोधे च। **हेतोः**-पृथिवीत्वस्य-गन्धस्य च। **दर्शितव्युत्पत्तिविरोध** इति। तद्धर्मावच्छिन्न प्रकारतानिरूपितविशेष्यतावच्छे-दकतासम्बन्धेन शाब्दबोधं प्रति तद्धर्मभेदः कारणमिति व्युत्पत्तिविरोध इत्यर्थः। **इतराविशेषितेति।** विशेषणान्तरानवच्छिन्नेत्यर्थः। **तद्धर्मावच्छिन्नान्वयबोध-स्यैवेति।** एवकारेण धर्मान्तरविशेषिततद्धर्मावच्छिन्नाभेदान्वयबोधस्य व्यवच्छेदः। **व्युत्पत्तिविरुद्धत्वादिति।** तद्धर्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदक-ताकप्रकारतानिरूपितविशेष्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिता-वच्छेदकत्वसम्बन्धेन शाब्दबोधं प्रति तद्धर्मभेदः कारणमित्येव व्युत्पत्तिरिति भावः। उक्तव्युत्पत्तिविरोधो नास्तीत्याह। **प्रकृते** इति। विधेयता**वच्छेद-कघटकतयेति।** विधेयांशेऽधिकावगाहित्वादित्यर्थः। **गन्धविशिष्टे।** "विशेषणान्तरावच्छिन्न" व्यतिरेकव्याप्तिविशिष्टगन्धस्य वान्वयेन व्युत्पत्त्यविरोधादिति भावः। **दीधितौ नानुपपत्तिगन्धोऽपीति।** यथा दण्डवान् रक्तदण्डवानित्यत्र नानुपपत्तिस्तथा प्रकृते गन्धविशिष्टे व्याप्तिविशिष्टगन्धवत एवान्वयादिति भावः। **तथाचेति।** तादृशोपनयस्य न्यायत्वे चेत्यर्थः। **अव्याप्तिर्दुवारैवेति।** प्रतिज्ञाया लिङ्गाविषयकबोधजनकत्वाभावादिति भावः।

गन्धवती इतरेभ्यो भिद्यते गन्धादित्यत्र प्रतिज्ञायामव्याप्ति परिहर्त्तुं प्रक्रमते। **नन्विति।** विवक्षणीयमिति। पक्षनिरूपितविशेषणत्वाभिन्ना या

अस्तु वा विशेष्यतावच्छेदकताख्य, विषयता प्रकारतातोऽन्यैव, तथापि न क्षतिः। तादृशविषयताबहिर्भूतविषयताशून्यत्वं विशेषणमुपेक्ष्य तादृशबहिर्भूतविषयतानवच्छिन्नजन्यतानिरूपितजनकताया वाक्यविशेषणत्वोपगमेन विशेष्यतावच्छेदकताभिन्नगन्धादिविषयतायाः प्रतिज्ञाजन्यबोधे सत्त्वेऽपि तस्याः प्रतिज्ञाजन्यतावच्छेदककोटिनिवेशे प्रयोजनाभावेन तन्निष्ठधर्मितावच्छेदकताया एव तत्र निवेशनीयतया अव्याप्त्यनवकाशात्। तादृशबहिर्भूतविषयतासामान्यशून्यत्वनिवेशे अनुमितिसमानविषयकत्वनिवेशनस्य मूलोपात्तस्य वैयर्थ्यप्रसङ्ग इति ईदृशलिङ्गविषयताशून्यत्वनिवेशनम्। अखण्डाभावस्य घटकतया न लिङ्गांशवैयर्थ्यम्। उक्तरीत्या बहिर्भूतत्वनिर्वचनाया सविद्वेषात्कल्पान्तरमाश्रयते। वस्तुत इति। लिङ्गत्वमिति—व्याप्तिरित्यर्थः। नन्वत्राननुगतयोरन्वयव्यतिरेकव्याप्तयोस्तद्धटकव्यापकतयोर्वा एकतरमात्रविषयताया उपादाने अन्यतरबोधकोपनयादावतिव्याप्तिरित्याशङ्क्या तादृशव्याप्तिघटकव्यापकताद्वयविषयत्वयोरनुगतरूपेणाभावं निवेशयति। तथा चेति। प्रकृतहेतुतावच्छेदका-

---

लिङ्गविषयता तच्छून्यत्वं विवक्षणीयमित्यर्थः। **उक्तस्थले।** गन्धवती इतरेभ्यो भिद्यत इत्यत्र। **पक्षविशेषणतयैवेति।** एवकारेण पक्षाऽविशेषणत्वस्य व्यवच्छेदः। तथा च विशेषणाभावसत्त्वं सूचितम्। एवं च पक्षनिरूपितविषयताभिन्ना या लिङ्गविषयता तच्छून्यबोधजनकवाक्यत्वं प्रतिज्ञात्वं फलितम्। **विशिष्टाभावसत्त्वादिति।** विशेषणाभावप्रयुक्तेत्यादि। **अव्यापकमिति।** अव्याप्तमित्यर्थः। पक्षीभूतेदं पदार्थे साक्षादविशेषणतया "साध्यघटक" लिङ्गविषयताशून्यत्वस्य प्रतिज्ञाजन्यबोधे विरहादिति भावः। अत्र साक्षात्पक्षनिरूपितत्वं यदि निवेश्यते तदा गन्धवती इतरेभ्यो भिद्यते इत्यत्र प्रतिज्ञायाः असङ्ग्रहः स्यात् गन्धविषयतायाः साक्षात्पक्षनिरूपितत्वाभावात्' मत्वर्थ सम्बन्धविषयतानिरूपितत्वात्। परम्परया पक्षनिरूपितविषयताभिन्नत्वं यदि निवेश्यते तदा अयं वह्निसाङ्ग्रीमान् वह्ने रित्यादौ प्रतिज्ञायाम् अव्याप्त्यसङ्गतिःस्यात् परम्परया पक्षनिरूपितत्वाद्वह्निविषयतायाः, अतः पक्षाऽविशेषणत्वं परिष्करोति। **तस्य।** तादृशभेदस्य। अव्याप्तिं निराकरोति। **तत्रापीति।** अयं वह्निसाङ्ग्रीमानित्यत्रापीत्यर्थः। **पक्षांशे**-अयं पदार्थे। **साध्यनिरूपितेति।** साङ्ग्रीनिरूपितेत्यर्थः। **परम्परया पक्षनिरूपितत्वादिति।**

वच्छिन्नस्येति गमकत्वान्वितम्। व्याप्तिविषयकत्वमित्यत्र व्याप्तिपदं व्यापकत्वविषयतानिष्ठसाध्यतावच्छेदकादिविषयताव्यावृत्तविलक्षणौपयिकता-निवेशसूचनाय। अथ किमिदं तादृशगमकतौपयिकत्वं न तावत्प्रकृतहेतुता-वच्छेदकावच्छिन्नहेतुकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकानुमितित्वा-वच्छिन्नजनकतावच्छेदकत्वम्, पक्षधर्मत्वाविषयकोदाहरणजन्यबोधीय-व्यापकत्वादिविषयताया अनुमितिजनकतावच्छेदककोट्यप्रविष्टतया तत्रातिव्याप्तेः। न च हेतुव्यापकत्वादिविषयतात्वेनैव तद्विषयतानां जनकतावच्छेदककोटौ निवेशादनुमित्यजनकस्यापि तादृशज्ञानस्य विषयतानां तादृशरूपाक्रान्तानां तथात्वमक्षतमेवेति वाच्यम्।

तथा च पक्षाऽविशेषणतया लिङ्गविषयताशून्यत्वस्य प्रतिज्ञाजन्यबोधे सत्त्वेनाऽव्याप्तिविरहादिति भावः साक्षात्पक्षनिरूपितविशेषणताभिन्नत्व-निवेशेऽव्याप्तिसङ्गमने तु अव्याप्तिमाह। **गन्धवतीत्यादि**। मतुपो निरर्थकत्व-पक्षेऽप्याह। **गन्धसभानेति। तद्विषतायाः**। गन्धविषयतायाः। **साक्षात्पक्ष-निरूपितविशेषणत्वानात्मकत्वेनेति**। तादृशविशेषणताभिन्नत्वेनेत्यर्थः। तथा च साक्षात्पक्षनिरूपितविषयताभिन्नलिङ्गविषयताशून्यत्वविरहादव्याप्तिवारणायेति भावः। **साक्षात्परम्परासाधारणनिरूपितत्वस्यैति**। एवकारेण साक्षात्पक्ष-निरूपितत्वस्य व्यवच्छेदः। **निवेशनीयत्वादिति**। तथा च अयं वह्निसाङ्ग्रीमान् इति प्रतिज्ञायामव्याप्तिरसङ्गतैवेति भावः। **यद्युक्तार्थकमिति**। साक्षात्परम्परासाधारणपक्षनिरूपितविशेषणताभिन्नार्थकमित्यर्थः। **निगमनातिव्याप्तिरिति**। निगमनजन्यबोधीयलिङ्गविषयतायाः "वह्निमत्त्वेन" पक्षनिरूपितत्वादिति भावः। **उक्तयुक्त्या**। यत्र सास्ना तत्र गोत्वमित्यत्राति-व्याप्तिभयेन। **विषयकान्तार्थस्येति**। उद्देश्यानुमितिसमानविषयकान्तार्थस्येत्यर्थः। **नातिव्याप्तिरिति**। पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यताकान्यत्वविरहादिति **एवमपि**। पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यताकान्यत्वविवक्षणेऽपि। भावः। **तत्र**। निगमने। **अतिव्याप्तेर्दुर्वारत्वादिति**। पक्षमुख्यविशेष्यकत्वस्य सत्त्वादिति भावः। **अतः**। अतिव्याप्तिवारणाय। **तदर्थो वाच्य** इति। पक्षाऽविशेषण-तयेत्यस्यार्थो वाच्य इत्यर्थः। **तथेतीति**। पक्षतावच्छेदकप्रकारतानिरूपक-विशेषतानिरूपितेत्यर्थः। **तदनवच्छिन्नतया**। धर्मितावच्छेदकानवच्छिन्नतया।

वस्तुतो लिङ्गं लिङ्गत्वम्। तथा च प्रकृतहेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतौपयिकं यद्व्याप्तिविषयकत्वं तच्छून्यत्वमर्थः।

तादृशविषयतात्वेन पक्षविशेषणतापन्नहेतुविशेषणतापन्न सामानाधिकरण्यविशेषणतापन्नसाध्यादिविषयतानिरूपितव्यापकत्वविषयताया एव कारणतावच्छेदकघटकत्वादतादृश्यास्तदवच्छेदकत्वाभावात्। यद्रूपावच्छिन्नविषयिता जनकतावच्छेदिका तद्रूपावच्छिन्नविषयताशून्यत्वनिवेशे च साध्यतावच्छेदकाद्यवच्छिन्नविषयताया अप्यनुमितिजनकतावच्छेदककोटिप्रविष्टतया तादृशविषयताशून्यत्वस्य तादृशप्रतिज्ञाजन्यबोधेऽप्यसत्त्वादसम्भवः। यद्रूपावच्छिन्ननिरूपितव्यापकत्वविषयिताजनकतावच्छेदिका तद्रूपावच्छिन्न निरूपित व्यापकत्वानवगाहित्वनिवेशे च किञ्चिद्रूपावच्छिन्नव्यापकत्वं साध्यस्य पक्षस्य वा घटकं यत्र तत्स्थलीयप्रतिज्ञाया असङ्ग्रहः। यत्त्वतत्त्वनिवेशादनुगमनावकाशश्चेति चेन्न

विधेयतद्धर्मितावच्छेदकप्रकारतानिरूपकविशेष्यतयोरिति। विधेयनिष्ठप्रकारतानिरूपकविशेष्यतायाःधर्मितावच्छेदकप्रकारतानिरूपकविशेष्यतायाश्चेत्यर्थः। **अव्याप्तिः प्रसज्यत एवेति।** लिङ्गविषयतायाः पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारताभिन्नत्वादिति भावः।

पक्षाविशेषणत्वं यथाश्रुतमेवेत्यभिमानेन केषाञ्चिद्दूषणमुद्धरति। **एतेनेति।** पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारतान्यत्वनिवेशेनेत्यर्थः। **अतिव्याप्तिप्रसञ्जकत्वेनेति।** सर्वत्रैवोपनये लिङ्गस्य पक्षविशेषणतयैव भानादिति भावः। **एतद्विवक्षणमिति।** साक्षात्परम्परासाधारणपक्षनिरूपितविशेषणतान्यत्वविवक्षणमित्यर्थः। **समाहितमिति।** उक्तरीत्या प्रसिद्धोपनयवारणात्। ननु निरवच्छिन्नविशेष्यतास्वीकारेऽतिव्यापकं चैत्युपनयातिव्याप्तिप्रदर्शकदीधित्यसङ्गतिरित्याशङ्कते। **न चैवमिति। पक्षतावच्छेदकेति।** विधेयतात्मकेत्यादिः। तथा च विधेयीभूतधूमस्य पक्षतावच्छेदकतया पक्षतावच्छेदकनिष्ठप्रकारतेत्यनेन धूमनिष्ठविधेयताया ग्रहणसम्भवादिति भावः। एवमुपनयार्थघटकव्यापकताघटकसामाधिकरण्यघटकधूमप्रकारतायाः

पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयतानिरूपिता या विषयता तन्निरूपितविषयतानिरूपितविषयतांशे विशेषणविधया प्रकृतानुमितिजनकतावच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मवत्त्वेन हेतुव्यापकताविशिष्टसाध्यविषयत्वसाध्याभावव्यापकत्वविशिष्ट-हेत्वभावविषयत्वेऽनुगमय्य तदभावस्य निवेशनेनानुपपत्त्यभावात्। तथाहि प्रकृतानुमितिजनकतावच्छेदिकायाः अन्वयिपरामर्शीयहेतुव्यापकत्वा-वच्छिन्नसाध्यविषयताया पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपित-

---

पक्षतावच्छेदकनिष्ठप्रकारताशब्देनोपादानमाह। **एवमिति। यथाश्रुतार्थकत्वे** इति। साक्षात्साध्यनिरूपितविशेषणताभिन्नत्वोक्तौ वह्निकालीनद्रव्यसाङ्मग्रीमान् वह्नेरित्यादावव्याप्तेः। शङ्कते। **न चेति। एवमपि।** साध्यतावच्छेदकप्रकारता-निरूपकविशेष्यतानिरूपितप्रकारताभिन्नत्वनिवेशेऽपि। **हेतुप्रकारतायां सत्त्वादिति।** न च पञ्चम्यर्थ "जन्य" ज्ञानविषयत्वांशे धूमस्य विधेयतया उक्तयुक्तया "जन्य" ज्ञानविषयवत्त्वप्रकारतानिरूपकविशेष्यतानिरूपितत्वं हेतुप्रकारतायां न सम्भवतीति वाच्यम्। धूमज्ञानज्ञाप्यत्वप्रकारतानिरूपक-विशेष्यतानिरूपितत्वे बाधकाभावाद् धूमानन्वितपञ्चम्यर्थाऽभाना-च्चाऽतिव्याप्तिसङ्गतिः। एवं जन्यज्ञानविषयसाध्यकेऽपि बोध्यम्। **साध्यतावच्छेदकादिप्रकारतात्वस्येति।** विधेयकोटिप्रविष्टत्वेऽपि साध्यतावच्छेदकवृत्तिप्रकारताशब्देन विशिष्टवह्नित्वग्रहो भवत्येवेति सूचनायेदम्। **शुद्धसाध्यतावच्छेदकेति।** उक्तस्थले ज्ञानविषयात्मकसाध्यांशे धूमादित्यन्तार्थधूमज्ञानजन्यज्ञानविषयत्वरूपधूमादिविशिष्टसाध्यतावच्छेदक-प्रकारतानिरूपकविशेष्यतानिरूपितत्वस्य हेतुप्रकारतायां सत्वान्न दोषः।

दीधितौ—पक्षाविशेषणत्वेनेति। तथा च गन्धवती इतरेभ्यो भिद्यते गन्धादित्यत्र प्रतिज्ञायां पक्षविशेषणतयैव लिङ्गस्य विषयत्वान्नाव्याप्तिः। **साध्याविशेषणत्वेनेति। तदविषयत्वं चेति।** लिङ्गाविषयत्वं चेत्यर्थः। तथा च अयं वह्निसामग्रीमान् वह्नेरित्यत्र प्रतिज्ञायां साध्यविशेषणतयैव लिङ्गस्य विषयत्वान्नाव्याप्तिः। दधि द्रव्यं दध्न इत्यत्र प्रतिज्ञायां विशेष्यत्वेनैव लिङ्गस्य भानात्पक्षसाध्ययोरविशेषणत्वेन यल्लिङ्गविषयत्वं तच्छून्यत्वविरहाद् भवत्यव्याप्तिः। एवमुत्तरत्र। **अतिव्यापकं चेति।** उपनयजन्यबोधे

हेतुविषयतानिरूपिताऽऽधेयत्वविषयतानिरूपिताऽधिकरणविषयता-निरूपितत्ववत् व्यतिरेकिपरामर्शीयसाध्याभावव्यापकत्वावच्छिन्नहेत्व-भावविषयताया अपि तादृशविशेष्यतानिरूपितसंसर्गीयविषयतानिरूपितहेतु-विषयता निरूपित प्रतियोगित्वविषयता निरूपितसाध्याभावव्यापकताविशिष्ट-हेत्वभावविषयतात्वस्यापि हेतुव्यापकताविशिष्टसाध्यविषयतात्ववन्निरुक्त-विषयत्वे विशेषणविधया अनुमितिजनकतावच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणत्वात्। यद्यपि यथा परम्परया पक्षविशेष्यतया अनिरूपितोदा-हरणजन्यबोधीयविशिष्टसाध्यादिविषयता नानुमितिज्ञनकतावच्छेदिका तथा तन्निरूपितव्यापकत्वादिविषयतापि न तथेति तदीयसाध्यादिविषयताविशेषणतया व्यापकत्वादिविषयतानिरूपितत्वस्यानुमितिजनकतावच्छेदकतावच्छेदके प्रवेशो न सम्भवति जनकतावच्छेदकविषयतावृत्तेरेव धर्मस्य तादृशविषयताविशेषणतया

लिङ्गविषयतायाः पक्षविशेषणतयैव भानादिति भावः। ननु पक्षाविशेषणत्वेन साध्याविशेषणत्वेन पक्षधर्मलिङ्गाविषयकत्वं विवक्षणीयम्, द्रव्यत्वव्याप्य-व्याप्यजातेः परमाणावनङ्गीकारेण दधिद्व्यणुकस्य दधिसमवेताभावात्पक्षधर्म-लिङ्गपदेन दधित्रसरेण्वादीनामेव ग्रहणम्, तथा च "प्रतिज्ञाजन्य" द्व्यणुकविषयकबोधस्य पक्षधर्मलिङ्गाविषयकत्वान्नाव्याप्तिरित्याशङ्कते। **नन्विति। बोधस्य।** प्रतिज्ञाजन्यबोधस्य। **दधिसमवेतदध्यविषयकत्वसम्भवादिति।** दधित्वाश्रयद्व्यणुकसमवेतत्रसरेणुरूपदध्यविषयकत्वसम्भवादित्यर्थः। पक्षधर्मलिङ्गाविषयकत्वादिति यावत्। **अतः** पक्षधर्मलिङ्गाविषयकत्वात्। **प्रमेयत्वरूपपक्षनिष्ठप्रमेयत्वाविषयकस्येति।** पक्षधर्मलिङ्गाविषयकस्येत्यर्थः।

केचित्तु नीलधूमत्वेनेव प्रमेयत्वत्वेन हेतूकृत्यापि न न्यायो, व्यर्थविशेषणत्वात्, विषयतात्वस्यैव व्याप्यतावच्छेदकत्वादिति कुतस्तत्प्रतिज्ञायामव्याप्तिरत आह। **गोत्वाभाव** इति। अत्र च गोत्वाभावस्य स्वरूपसम्बन्धेन स्वस्मिन्नपि सत्वान्न पक्षधर्मताहानिरिति प्राहुः।

उपदर्शितप्रतिज्ञाया इति। गोत्वाभावो न सास्नादिमान् इति प्रतिज्ञाया इत्यर्थः। **नाऽसङ्ग्रह** इति। लिङ्गविषयतायाः पक्षतावच्छेदकविशिष्ट-पक्षविषयतान्तःपातित्वान्नाव्याप्तिरित्यर्थः। **पक्षतावच्छेदकावच्छिन्नेति।** गोत्वाभावपक्षकोक्तप्रतिज्ञायाः सङ्ग्रहाय तद्वैशिष्ट्यनिवेशः। **तन्निरूपकत्व-**

जनकतावच्छेदकतावच्छेदकत्वसम्भवादिति निरुक्तपक्षविषयता पञ्चमविषयतांशे विशेषणतया अवच्छेदकताऽवच्छेदकत्वपर्याप्त्यधिकरणं यत्साधनादिव्यापकत्वविषयतानिरूपितत्वसहितं साध्यादिविषयतात्वं तन्नोदाहरणजन्यबोधीयसाध्यादिविषयतासाधारणं तथाचोदाहरणेऽतिव्याप्तिर्दुर्वारैव। तथापि निरुक्तजनकतावच्छेदकतावच्छेदकता पर्याप्त्यधिकरणधर्मावच्छिन्नविषयत्वावच्छिन्ना या प्रतिबन्धकता तदवच्छेकविषयतात्वेनोदाहरणजन्यबोधीयहेतुव्यापकसाध्यादिविषयतायाः सङ्ग्रहो बोध्यः। अनुमितिजनकतावच्छेदकपरामर्शीयसाध्यादिविषयतायाः हेतुव्यापकत्वादिविषयतानिरूपितसाध्यादिविषयतात्वेन साध्यं हेतुव्यापकं नवेत्यादिसंशयप्रतिबन्धकतावच्छेदकत्वात् तादृशप्रतिबन्धकतायां तादृशरूपेणोदाहरणजन्यबोधीयसाध्यादिविषयताया अप्यवच्छेदकत्वात्।

शून्यत्वमिति। वैशिष्ट्यविषयतानिरूपकत्वशून्यत्वमित्यर्थः। गोत्वाभावपृथिवीत्वहेतुकोक्तप्रतिज्ञयोः सङ्ग्रहाय साक्षात्परम्परयेत्युभयोपादानम्। **उक्तयुक्तया।** स्वस्य स्वधर्मितावच्छेदकत्वापत्त्या। पक्षतावच्छेदकनिष्ठावच्छेदकताख्य्विषयताया एव निरूपकत्वेनेति यावत्। **तदनिरूपकत्वादिति** वैशिष्ट्यविषयत्वानिरूपकत्वादित्यर्थः। तथा च स्वस्य स्वधर्मितावच्छेदकतावारणायाऽतिरिक्तप्रकारता स्वीकरणीया। तस्याः सांसर्गिकविषयत्वानिरूपकत्वेन हेतुधर्मितावच्छेदककप्रतिज्ञायामव्याप्तिरिति भावः। **कथञ्चिदिति।** धर्मितावच्छेदकत्वप्रकारत्वयोरभेदाभ्युपगमेनेत्यर्थः। तच्चाग्रे व्यक्तीभविष्यति। **स्वनिरूपकत्वविरहादिति।** स्वस्मिन्परम्परयापि स्वनिरूपकत्वानङ्गीकारादिति भावः।

तादृशविषयत्वानिरूपकप्रकारताशून्यत्वनिवेशे दोषमाह। **एवमिति। तन्निरूपितनिरूपितत्वाद्यात्मकत्वादिति।** उभयसाधारणानुगतरूपाभावादिति भावः।

पर्वतो वह्निमान् वह्निसंयोगादित्यत्राव्याप्तिमुद्धरतां मतमाह। **एतेनेति।** साक्षात्परम्परासाधारणनिरूप्यनिरूपकभावस्य दुर्वचत्वेनेत्यर्थः। **तच्च।** तादृशवैशिष्ट्यविषयतानिरूपकत्वं च। **न निस्तार** इति। विषयत्वाऽनिरूपितेत्यत्र निरूपितनिरूपित्वादिप्रवेशे गोत्वाभावादिपक्षकप्रतिज्ञायां, साक्षान्निरूपितत्व-

प्रवेशे गन्धसमानकालीनरूपवदादिपक्षकप्रतिज्ञायामव्याप्तिरित्यर्थः।

तथाविधेति। पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितेत्यर्थः। **तद्बहिर्भूतत्वमिति।** तथाविधवैशिष्ट्यविषयताबहिर्भूतत्वमित्यर्थः। तथा च पक्षमुख्यविशेष्यकत्वे सति न्यायावयवत्वे सति पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपिता या साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितवैशिष्ट्यविषयताया तच्छालिनिश्चयत्वसमनियतप्रतिबन्धकतानवच्छेदकलिङ्गविषयताशून्यबोधजनकवाक्यत्वं प्रतिज्ञात्वम्। पर्वतो वह्निमान्नवेति संशय निरूपिता प्रतिबन्धकता ग्राह्या। तादृशप्रतिबन्धकतानवच्छेदकीभूता या लिङ्गविषयता तच्छून्यत्वस्य बोधे सत्वाल्लक्षणसमन्वयः। उक्तव्यतिरेक्युदाहरणेऽतिव्याप्तिवारणाय प्रथमसत्यन्तम्। उदासीनेऽतिव्याप्तिवारणाय द्वितीयं तत्। उपनयेऽतिव्याप्तिवारणाय शून्यान्तम्। निश्चयत्वसमनियत्वं निश्चयत्वव्यापकत्वे सति निश्चयत्वव्याप्यत्वम्, तत्र व्यापकत्वनिवेशस्य प्रयोजनमाह। **निगमनजन्येति।** निगमनजन्यो यो बोधः धूमज्ञानज्ञाप्यवह्निमदभिन्नःपर्वत इत्याकारकः "अनुषङ्गपक्षे" तदीयायाः हेतुविषयतायाः धूमज्ञानज्ञाप्यवह्निमान्न वा पर्वत इति संशयप्रतिबन्धकतावच्छेदककोटिप्रविष्टतया (तादृशनिश्चयत्वव्याप्यतया च तादृशप्रतिबन्धकतायाः) तदनवच्छेदकीभूतलिङ्गविषयताशून्यबोधमादाय निगमनेऽतिव्याप्तिरतोव्यापकत्वनिवेशः, एवं च तादृशप्रतिबन्धकता न पक्षे साध्यवैशिष्ट्यावगाहिनिश्चयत्वव्यापिकेत्याह। **हेत्वविषयकेति।** तस्मादिति। पञ्चम्यन्तार्थाविषयकेत्यर्थः। **तादृशवैशिष्ट्यविषयताशालिज्ञानसाधारण्यादिति।** पक्षे साध्यवैशिष्ट्यावगाहिनिश्चयवृत्तित्वादित्यर्थः। प्रतिज्ञाजन्यबोधवृत्तित्वादिति यावत्। **अतः।** तादृशनिश्चयत्वव्यापकत्वविरहात्। तथाविधहेतुविषयताया इति। निगमनजन्यबोधीयहेतुविषयताया इत्यर्थः। **तद्बहिर्भूतत्वोपपत्तिरिति।** पक्षे साध्यवैशिष्ट्यावगाहिविषयताशालिनिश्चयत्वसमनियतप्रतिबन्धकतानवच्छेदकत्वोपपत्तिरित्यर्थः। अननुषङ्गपक्षे पक्षमुख्यविशेष्यकत्वविरहेणाऽतिव्याप्त्यभावादाह। **अनुषङ्गपक्षेऽपीति। नातिव्याप्तिरिति।** निगमनजन्यबोधस्य तादृशप्रतिबन्धकतानवच्छेदकलिङ्गविषयताशून्यत्वाभावादिति भावः। तादृशनिश्चयत्वव्याप्यत्वस्य व्यावृत्तिमाह। **तादृशनिश्चयत्वव्यापकत्व-**

मुख्यविशेष्यतानिवेशाद् गोत्वाभावः प्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वाभावादित्यत्र तादृशविशिष्टसाध्यकप्रकृतानुमितिजनकपरामर्शीय स्वात्मकपक्षविशेषणतापन्नगोत्वाभावविषयतानिरूपिताधेयत्वविषयतानिरूपिताधिकरणविषयतानिरूपितसास्नाभावविषयतानिरूपितवाच्यत्वविषयतांशे विशेषणविधया अवच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मवत् प्रमेयत्वव्यापकवाच्यत्वविषयतावद् विषयतायाः प्रतिज्ञाजन्यबोधे सत्त्वेऽपि न क्षतिः। (जनकता च साध्यव्याप्यत्वावच्छिन्नधर्मिताकान्यपरामर्शीया ग्राह्या। तेन तद्धर्मिकपरामर्शमादायापि नोक्तप्रतिज्ञायामव्याप्तिः)। न च साध्याभावव्यापकहेत्वभावप्रतियोगिहेतुमानिति परामर्शीयपक्षविशेष्यतानिरूपित हेतुविषयता निरूपित प्रतियोगित्वविषयतानिरूपिताभावविषयतानिरूपित व्यापकत्वविषयताया अपि निरुक्तविषयतात्वात् तादृशविषयत्वविशेषणतयाऽवच्छेदकीभूतं साध्याभावव्यापकविषयतात्वमपीति वह्न्यभावव्यापकप्रमेयत्ववान्पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिरिति वाच्यम्।

मात्रस्येति। पक्षे साध्यवैशिष्ट्यविषयताशालिनिश्चयत्वमात्रस्येत्यर्थः। मात्रपदेन निश्चयत्वव्याप्यत्वस्य व्यवच्छेदः। **हेत्ववयवे।** धूमादिति भागे। अतिव्याप्तौ हेतुमाह। **तादृशहेतुनिष्ठाया** इति। धूमनिष्ठाया इत्यर्थः। **तादृशबोधविषयताया** इति। हेतुत्वं धूमीयमिति बोधविषताया इत्यर्थः। **निरुक्तविषयताबहिर्भूतत्वानुपपत्तेरिति।** हेतुविषयतायाः पक्षे साध्यवैशिष्ट्यविषयताशालिनिश्चयत्वव्यापकप्रतिबन्धकतानवच्छेदकत्वानुपपत्तेरित्यर्थः। तादृशप्रतिबन्धकतावच्छेदकत्वादिति यावत्। तथा च तादृशप्रतिबन्धकतानवच्छेदकलिङ्गविषयताशून्यबोधजनकत्वादतिव्याप्तिरिति भावः। **अतः।** हेत्ववयवेऽतिव्याप्तिवारणाय। **तादृशनिश्चयत्वव्याप्यत्वमपीति।** पक्षे साध्यवैशिष्ट्यविषयताशालिनिश्चयत्वव्याप्यत्वमपीत्यर्थः। **प्रतिबन्धकताविशेषणमिति।** तथा च हेतुत्वं धूमीयं न वेति संशयप्रतिबन्धकतायाः हेतुत्वं धूमीयमिति केवलहेतुजन्यबोधेऽपि सत्त्वेन तादृशनिश्चयत्वव्याप्यत्वविरहादिति भावः।

न चेति आवश्यकतयेति। अन्यथोक्तव्यतिरेक्युदाहरणेऽतिव्याप्तिः स्यादिति भावः। **नैतादृशातिव्याप्तिसम्भवावनेति।** हेतुत्वं धूमीयमिति हेत्ववयवजन्यबोधस्य पक्षमुख्यविशेष्यकत्वविरहादिति भावः। **तथापीति।**

किञ्चिद्व्यापकत्वविशिष्टविषयतांशे विशेषणतयाऽवच्छेदकतावच्छेदत्वस्यैव निवेशनीयत्वात्।

पक्षमुख्यविशेष्यकत्वनिवेशेऽपीत्यर्थः। **निगमने।** इति। अतिव्याप्तेदुर्वारत्वादित्यनेनाऽस्यान्वयः। निगमनजन्यबोधस्य तादृशनिश्चयत्वव्यापकप्रतिबन्धकतानवच्छेदकलिङ्गविषयिताशून्यत्वात् पक्षमुख्यविशेष्यकत्वाच्चेति भावः। **न चेति धर्मितावच्छेदकनिष्ठं प्रकारत्वं न प्रतिबन्धकतावच्छेदकमिति।** केवलगन्धवतीति ज्ञानस्य कुत्राप्यप्रतिबन्धकत्वात्। **तथा चेति।** धर्मितावच्छेदकनिष्ठप्रकारतायाः प्रतिबन्धकतानवच्छेदकत्वे चेत्यर्थः। **तद्बहिर्भूतत्वादिति।** प्रतिबन्धकतानवच्छेदकत्वादित्यर्थः। **तदन्येति।** विशेष्यतावच्छेदकतान्येत्यर्थः। **प्रकारतानभ्युपगमादिति।** तथा च न तस्याः बहिर्भूतत्वमिति भावः। **एवं सति।** प्रकारताया विशेष्यतावच्छेदकतात्मकत्वे। **तद्धर्मितावच्छेदकत्वस्य।** भूतलत्वधर्मितावच्छेदकत्वस्य। **प्रकारान्तरेणेति** प्रकारान्तरं च स्वधर्मितावच्छेदकत्वं स्वप्रकारतानिरूपितविशेष्यतानिरूपितत्वान्यवृत्त्यवच्छेदकत्वम्, स्वप्रकारतानिरूपितविशेष्यतानिरूपितत्व-अवच्छेदकतात्वाश्रयत्वं वा। निरूपितत्वस्याव्यासज्यवृत्तित्वेन स्वनिष्ठप्रकारतात्वेनैव तादृशविशेष्यतानिरूपितत्वं नत्ववच्छेदकतात्वेन। स्वप्रकारतानिरूपितत्वेन स्वावच्छिन्नविशेष्यतात्वस्य नावच्छेद्यावच्छेदकभाव इति वा।

ननु स्वस्य स्वधर्मितावच्छेदकत्वे को दोष इति चेत्—भूतले भूतलत्वप्रकारकानुव्यवसायापत्तेः। **तथापि।** अन्यत्वेऽपि। **न क्षतिः।** न गन्धवती इतरेभ्यो भिद्यते इत्यादिप्रतिज्ञायामव्याप्तिः। **तादृशबहिर्भूतेति।** पक्षे साध्यवैशिष्ट्यविषयताबहिर्भूतेत्यर्थः। तादृशविषयताशालिनिश्चयत्वसमनियतप्रतिबन्धकतावच्छेकेत्यर्थः। **तस्याः।** गन्धप्रकारतायाः। **तत्र।** प्रतिज्ञाजन्यतावच्छेदककोटौ। **अव्याप्त्यनवकाशादिति।** तादृशप्रतिबन्धकतानवच्छेदकीभूतगन्धप्रकारत्वानवच्छिन्नजन्यतानिरूपितजनकता सत्त्वादिति भावः। ननु निरुक्तविषयताबहिर्भूतविषयताशून्यत्वोक्त्यैव सामंजस्ये लिङ्गपदं व्यर्थमत आह। **निवेशे** इति। **अनुमितिसमानविषयकत्वनिवेशनस्येति।** पक्षमुख्यविशेष्यकत्वार्थकस्येत्यर्थः। **वैयर्थ्यप्रसङ्ग** इति।

ह्रदो धूमाभाववान् वह्न्यभावादित्यत्र यत्र धूमस्तत्र वह्निरित्युदाहरणजन्यबोधस्य निरुक्तप्रतिबन्धकतानवच्छेदकविषयताशालित्वेन वारणसम्भवात्। **इति।** अतः **ईदृशेति।** निरुक्तप्रतिबन्धकतानवच्छेदकेत्यर्थः। **लिङ्गविषयताशून्यत्व-निवेशनमिति।** तथा च तादृशलिङ्गविषयिताशून्यत्वादुक्तातिव्याप्तिवारणाय अनुमितिसमानविषयकत्वसार्थक्यम्। लिङ्गनिवेशस्य तु न वैयर्थ्यमित्याह **अखण्डेति।**

कल्पान्तरमवतारयति। **उक्तरीत्येति।** अस्य आयासेऽन्वयः। **विद्वेषादिति।** अस्मिन्कल्पे बहिर्भूतत्वानिवेशादिति भावः। ननु लिङ्गत्वं व्याप्यत्वम्, एवं च व्याप्यवान्पर्वतो वह्निमान् इत्यत्र प्रतिज्ञायामव्याप्तिरत आह। **व्याप्तिरिति। तथा** न्यायावयवत्वे सति व्याप्त्यविषयकबोधजनकत्वं प्रतिज्ञात्वम्। एवं सति उदाहरणेऽतिव्याप्तिः, तज्जन्यबोधे व्यापकत्वावगाहनेऽपि व्याप्त्यविषयकत्वात्, एतत्कल्पे पक्षमुख्यविशेष्यकत्वस्याऽसत्त्वादत आह **तद्घटकव्यापकत्वयोर्वेति। एकतरमात्रविषयताया उपादाने।** अन्वयव्याप्तिघटकव्यापकत्वविषयताया उपादाने। **अन्यतरबोधकोपनयादा-वतिव्याप्तिरिति।** व्यतिरेकव्याप्तिघटकव्यापकत्वबोधकोपनयादावति-व्याप्तिरित्यर्थः। अन्वयव्यातिविषयताशून्यबोधजनकत्वादिति यावत्। एवं व्यतिरेकव्याप्तिघटकव्यापकत्वविषयताया उपादाने अन्वयव्याप्तिघटक-व्यापकत्वबोधकोपनयेऽतिव्याप्तिर्बोध्या। **तादृशव्याप्तिघटकेति।** अन्वयव्याप्तिव्यतिरेकव्याप्तिघटकेत्यर्थः। **व्यापकत्वविषयताद्वयोरिति** साध्ये हेतुव्यापकत्वविषयतायाः, हेत्वभावे साध्याभावव्यापकत्वविषयतायाश्चेत्यर्थः।

गमकत्वमनुमितिजनकत्वम्, औपयिकत्वमवच्छेदकत्वमित्याशयेनाह। **न तावदिति।** तथा च न्यायावयवत्वे सति प्रकृतहेतुकप्रकृतसाध्य-कानुमितिजनकतावच्छेदकविषयताशून्यबोधजनकवाक्यत्वं प्रतिज्ञात्वम्। **तत्र।** उदाहरणे। **अतिव्याप्तेरिति।** उदाहरणस्य तादृशजनकतावच्छेदक-विषयताशून्यबोधजनकत्वादिति भावः। एतत्कल्पे पक्षमुख्यविशेष्यकत्वस्या-निवेशादिति ध्येयम्। अतिव्याप्तिं परिहरति **न चेति। विषयतात्वेनैवेति।** एवकारेण पक्षविषयतात्वस्य व्यवच्छेदः। **तद्विषयतानां।** हेतुव्यापकत्वादि-विषयतानां। **तादृशज्ञानस्य।** उदाहरणजन्यबोधस्य। **विषयतानां।** हेतुव्यापकत्वादिविषयतानां **तादृशरूपाक्रान्तानाम्।** अनुमितिजनकतावच्छे-

तच्च हेतौ साध्यव्याप्यत्वावगाहित्वं, हेतुभूताभावप्रतियोगितावच्छेदकावच्छिन्ने साध्याभावव्यापकत्वावगाहित्वञ्च: द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयं द्रव्यत्ववान् गुणात्। गुणव्याप्यरूपवानयं स्पर्शवान् रूपादित्यादौ प्रतिज्ञासङ्ग्रहायावच्छेदकद्वयोपादानम्।

व्यतिरेकिपरामर्शीयपक्षविषयतापाञ्चमव्यापकत्वविषयताश्चातथात्वात्। वस्तुतस्तु चतुर्थविषयतायां अभावनिष्ठप्रकारताभिन्नत्वस्य निवेशनीयत्वान्न कोऽपि दोषः। अन्वयव्यतिरेकव्याप्तिघटकव्यापकताद्वयविषयताया विशिष्टाभावद्वयनिवेशपरो नायं ग्रन्थः, तथाच सति प्रकृतहेतुतावच्छेदकेत्यनुगतशब्देनोभयोत्कीर्तनवैयर्थ्यापातात्। विशिष्यापि तदुभयावगाहित्वस्य तच्चेत्यादिना दर्शनीयतया प्रथमत एव विशिष्य तदुभयानवगाहित्वार्थकत्वोपवर्णनानौचित्यात्। तच्चेति—तादृशगमकत्वौपयिकविषयत्वं चेत्यर्थः। हेताविति। हेतुव्यापकताविशिष्टसाध्यविषयकत्वमित्यर्थः। अतो नोक्तानुगमविरोधः। हेतूभूताभावप्रतियोगितावच्छेदकेति। तादृशप्रतियोगितावच्छेदकञ्च धूमादिभावहेतुकस्थले धूमाभावत्वादिकं वह्न्यभावादिहेतुकस्थले च वह्नित्वादिकम् एतदसङ्ग्रहभयेनैव हेत्वभावत्वावच्छिन्न इति नोक्तम्। तथासति अयं निर्धूमो निर्वह्नित्वादित्यादौ यत्र धूमस्तत्र वह्निर्धूमव्यापक-

---

रूपाक्रान्तानां **तथात्वम्** अनुमितिजनकतावच्छेदककोटिप्रविष्टत्वम्। **अक्षतमेवेति।** तथा चोदाहरणस्याऽनुमितिजनकतावच्छेदकतावच्छेदकविषयताशून्यबोधजनकत्वाभावान्नातिव्याप्तिरिति भावः।

व्यापकत्वविषयताया एवेति। निरूप्यनिरूपकभावापन्नव्यापकत्वविषयताया एवेत्यर्थः। एवकारव्यवच्छेद्यमाह। **अतादृश्या** इति। पक्षादिविशेषणतानापन्नव्यापकत्वविषयताया इत्यर्थः। **तदवच्छेदकत्वाभावादिति।** तादृशजनकतावच्छेदकत्वाभावादित्यर्थः। तथा चाऽतिव्याप्तिस्तदवस्थैवेति भावः। **व्यापकत्वानवगाहित्वनिवेशे चेति।** अतिव्याप्तिवारणोऽपीति शेषः। **तत्स्थलीयप्रतिज्ञाया असङ्ग्रह** इति। पर्वत आलोकव्यापकद्रव्यकालीनवह्निमान्, आलोकव्यापकद्रव्यवान् पर्वतो वह्निमानित्यादिप्रतिज्ञाया असङ्ग्रह इत्यर्थः। आलोकत्वावच्छिन्ननिरूपितव्यापकत्वावगाहित्वादिति भावः।

वह्न्यभाववांश्चायमित्याद्याकारकयोरेवोदाहरणोपनययोः प्रयोगाद्वह्नित्वाद्यवच्छिन्न एव साध्याभावव्यापकतायास्ततः प्रतीतिर्न तु वह्न्यभावाद्यभावत्वाद्यवच्छिन्न इति तत्रातिव्याप्त्यभावाप्रतिपादनेन न्यूनतापत्तेः, हेतुतावच्छेदकसाध्यतावच्छेदकनिवेशनप्रयोजनमाह द्रव्यत्वेति। प्रतिज्ञासङ्ग्रहायेति। प्रथमोपदर्शितप्रतिज्ञाविषयसंयोगत्वावच्छिन्ननिरूपित व्यापकताया अपि संयोगत्वेन गुणहेतुकद्रव्यत्वत्वाद्यवच्छिन्नानुमितेर्द्वितीयप्रतिज्ञाविषयगुणत्वाद्यवच्छिन्नव्यापकताया गुणत्वेन स्पर्शसाध्यकरूपत्वावच्छिन्नहेतुकानुमितेः प्रयोजकतयाऽवच्छेदकद्वयानुपादाने तत्र तत्राव्याप्तेरिति भावः।

अत्र पञ्चमविषयतायामवच्छेदकत्वं द्विविधम्-कोटिप्रविष्टस्यावच्छेदकत्वम्, स्वातन्त्र्येण विनिगमनाविरहप्रयुक्तं च। तत्र प्रथमे विषयतानिष्ठावच्छेदकतावच्छेदकदको धर्मः व्यापकत्वविषयतानिरूपितत्वं, साध्यतावच्छेदकसम्बन्धाच्छिन्नसाध्यतावच्छेदकावच्छिन्नविषयतात्वं चेत्युभयमेव। द्वितीये चतुर्थविषयतानिरूपितत्वसहितमिति भेदः। मध्यवर्तिविषयतयोरभेदे यथाश्रुत एव निरूप्यनिरूपकभावः, अन्यथामुख्यविशेष्यतानिरूपितविषयत्वावच्छिन्न विषयतानिरूपितविषयत्वावच्छिन्नविषयतानिरूपितविषयत्वावच्छिन्न विषयतानिरूपितविषयत्वांशे इति वक्तव्यम्। न च तादृशावच्छेद्यावच्छेदकभावनिवेशे व्यतिरेकिपरामर्शीयसाध्याभावव्यापकत्वविशिष्टहेत्वभावविषयताया असङ्ग्रहः, संसर्गताख्यद्वितीयविषयत्वावच्छिन्नविषयताया अप्रसिद्धेः। एवं प्रतियोगित्वनिष्ठसांसर्गिकविषयत्वावच्छिन्नविषयताया अपीति वाच्यम्। पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयताविशिष्टविषयताविशिष्टविषयताविशिष्टविषयताविशिष्टविषयत्वांशे इत्यादिरीत्या निवेशनीयत्वात्। वैशिष्ट्यञ्च स्वानिरूपितत्व, स्वनिरूपितविशेष्यतानिरूपितविषयत्वावच्छिन्नविषयत्वानिरूपितत्वोभयसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसंसम्बन्धेन द्वितीयविषयता हिसंसर्गता-प्रकारता वा तस्या एव पक्षविशेष्यता निरूपितत्वात्। अत्र च संसर्गतायाः स्वपदेनोपादाने तन्निरूपित (हेतु) प्रकारतायां स्वाऽनिरूपितत्वासत्त्वेन निरुक्तोभयसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन प्रकारतायाः संसर्गताविशिष्टत्वात्। प्रकारतोपादाने च

तदवच्छिन्नविशेष्यतानिरूपित" प्रकारतायां स्वानिरूपितत्वसत्त्वेऽपि द्वितीयसम्बन्धविरहादेव स्ववैशिष्ट्यसत्त्वाद्विषयतानामनुगमः। स्वावच्छिन्नविषयतानिरूपितत्व स्वनिरूपितत्वैतदन्यतरसम्बन्धेन वा वैशिष्ट्यं बोध्यम्।

अत्र कल्पे प्रकृतपक्षसाध्यकानुमितित्वावच्छिन्नजन्यता निरूपितजनकतानिरूपितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणं यत्पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितविषयतानिरूपितविषयतानिरूपितविषयतानिरूपितविषयतात्वं तद्रूपविशिष्टविषयताशून्यबोधजनकन्यायावयवत्वं प्रतिज्ञात्वम्।

अनुगमस्तु पक्षतावच्छेदकविशिष्टविषयताशून्यबोधजनकन्यायावयवत्वम्। वैशिष्ट्यञ्च स्वावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वावच्छिन्नजनकतावच्छेदकतावच्छेदकतापर्याप्तिमद्विषयतात्ववत्त्व, स्वावच्छिन्नविशेष्यतानिरूपितविषयतानिरूपितता निरूपितविषयता निरूपितत्वोभयसम्बन्धेन संकल्पमाह **पक्षतावच्छेदकावच्छिन्नेति।** पर्याप्त्यधिकरणधर्मत्वेनेत्यस्य अनुगमय्येत्यनेनान्वयः। **तदभावस्येति।** हेतुव्यापकताविशिष्टसाध्यविषयित्वाभावस्य। साध्याभावव्यापकताविशिष्टहेत्वभावविषयित्वाभावस्येत्यर्थः। **अनुपपत्त्यभावादिति।** उक्ताव्याप्तेरभावादित्यर्थः।

ननु संसर्गविषयतायाः पञ्चमविषयतामध्येऽनिवेशे व्यतिरेकपरामर्शीयसाध्याभावव्यापकहेत्वभावविषयतायाः पञ्चमीत्वानुपपत्तिः, तन्निवेशेऽन्वयपरामर्शीयहेतुव्यापकसाध्यविषयतायाः असङ्ग्रह इत्यत आह। **तथाहीति अन्वयपरामर्शीयेति।** अन्वयपरामर्शश्च धूमव्यापकवह्निसमानाधिकरणधूमवान् पर्वत इत्याकारकोऽनुमितिकारणम्। **व्यतिरेकिपरामर्शीयेति।** व्यतिरेकिपरामर्शश्च वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवान्पर्वत इत्याकारकोऽनुमितिजनकः। **साध्याभावव्यापकताविशिष्टहेत्वभावविषयतात्वस्यापीति।** अस्य च पर्याप्त्यधिकरणत्वादित्यनेनान्वयः। **हेतुव्यापकताविशिष्टसाध्यविषयतात्ववदिति।** व्यतिरेकिपरामर्शीयपञ्चमविषयतायाश्चतुर्थविषयतानिरूपितत्वेऽन्वयपरामर्शीयविषयतानिरूपितत्वं दृष्टान्तः। **निरुक्तविषयत्वे** साध्याभावव्यापकताविशिष्टहेत्वभावविषयतायां। तथा च व्यतिरेकिपरामर्शस्थले धूमपर्वतयोर्यः संयोगस्तन्निष्ठाविषयतामन्तर्भाव्य पर्वतविषयतानिरूपितसंयोगविषयतानिरूपित धूमविषयतानिरूपित प्रतियोगित्वविषयतानिरूपित साध्याभावव्यापकहेत्वभावविषयता पञ्चमी। अन्वयपरामर्शस्थले तु संयोगविषयता-

अन्यूनानतिरिक्तपदमिति च मूलमुद्देश्यानुमित्यन्यूनानतिरिक्तविषयभागपरम्। हेतुत्वमभिधेयं प्रमेयत्वादित्यादौ पञ्चम्यर्थपक्षकहेतुवारणाय पञ्चम्यन्तान्यत्वस्य हेत्वन्यत्वस्य वाऽवश्यं वाच्यत्वात्।

नन्वेवं लिङ्गत्वाविषयकत्वविशेषणेनैवोदाहरणस्यापि वारणे पूर्वोक्तानुमितिसमानविषयकत्वविशेषणस्य व्यावृत्तिर्न सङ्गच्छते इति सत्यन्तोत्तरविषयान्तभागत्यागस्यैवावश्यकत्वेनान्यूनानतिरिक्तपदमात्रपरित्यागपरमूलविरोध इत्यालोच्य तादृशमूलस्य च तथाविधसमुदायपरित्यागपरत्वमेवाह। अन्यूनेति। नन्वेतत्कल्पे हेतुवारणायैव पक्षविशेष्यकत्वपर्यवसितं तादृशविशेषणोपादानमावश्यकं तज्जन्यबोधस्य व्यापकत्वाविषयकत्वेन लिङ्गत्वाविषयकत्वदानेनाऽवारणादिति कथं समुदायपरित्याग इत्यत आह। हेतुत्वमिति पञ्चम्यर्थपक्षक इति। तथा च पक्षमुख्यविशेष्यकत्वमपि तादृशहेतुजन्यबोधे अक्षतमिति न तेन तद्वारणसम्भव इति भावः। पञ्चम्यन्तान्यत्वस्य निवेशे घटो दण्डात्पटो न दण्डादित्यादिप्रतिज्ञाया असङ्ग्रहमालोच्य कल्पान्तरमाह। हेत्वन्येति। अवश्यं वाच्यत्वादिति। तथा च अत एव सकलहेतुवारणे समुदायदलपरित्यागो न क्षतिमावहतीति भावः।

मनन्तर्भाव्य पर्वतविषयतानिरूपित धूमविषयता निरूपिताऽऽधेयत्वविषयतानिरूपिताऽधिकरणविषयहेतुव्यापकताविशिष्टसाध्यविषयता पञ्चमी। तथा च विनिगमनाविरहेण पक्षविशेष्यतानिरूपितसांसर्गिकविषयतानिरूपितहेतुविषयतेत्यादिक्रमेण, पक्षविशेष्यतानिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुविषयतेत्यादिक्रमेण च कार्यकारणभावाद् द्वयोरपि पञ्चमीत्वोपपत्तिः।

न च विशेषणविधयेति किमर्थम्, तादृशविषयतात्वं प्रकृतानुमितिजनकतावच्छेदकतापर्याप्तिमदित्यस्यैव सम्यक्त्वादिति वाच्यम्। तथा सति पक्षविषयतानिरूपितत्वसहितहेतुव्यापकसाध्यविषयतात्वस्यैव तादृशजनकतावच्छेदकतावच्छेकतापर्याप्त्यधिकरणतयोदाहरणेऽतिव्याप्तेर्वज्रलेपत्वात् अस्माकं तु चतुर्थविषयतानिरूपित्वविशिष्टे (हेतुव्यापकसाध्यविषयत्वे) विशेषणतापन्नत्वलाभान्न दोषः। चतुर्थविषयता निरूपितत्वहेतुव्यापकताविशिष्टसाध्य-

संख्यातिरिक्तसुबर्थस्य प्रकृत्यर्थविशेष्यत्वेनैवाऽन्वयात्। प्रातिपदिकार्थयोः क्रियाप्रातिपदिकार्थयोश्च साक्षाद्भेदेनाऽन्वयस्याऽव्युत्पत्तेर्वक्ष्यमाणत्वात्।

ननु ज्ञापकत्वं पञ्चम्यर्थः, स च प्रकृत्यर्थस्य विशेषणतयैव भासते न तु विशेष्यतया तथा च कथं पञ्चम्यर्थपक्षक न्यायान्तर्गतहेतोः पक्षमुख्यविशेष्यकबोधजनकत्वमत आह। संख्येति। विभक्त्यर्थस्यैकत्वादेः प्रकृत्यर्थे विशेषणतया बोध आनुभविकः, तस्य विशेष्यत्वे घटमित्यादितः एकत्वं कर्मत्वं च घटीयमित्याकारकस्य सर्वानुभवविरुद्धसमूहालम्बनबोधस्यापत्तेरतः संख्यातिरिक्तेति सुबर्थविशेषणम्। लिङर्थस्येष्टसाधनत्वादेः प्रकृत्यर्थे विशेषणतया भानात् प्रत्ययार्थसामान्योपेक्षा। विशेष्यत्वेनैवेत्यत्र युक्तिमाह। प्रातिपदिकार्थयोरिति। समानविभक्तिकनामार्थयोः क्रियाविशेषणीभूतद्वितीयान्तनामार्थधात्वर्थयोश्चाऽभेदेनान्वयबोधोत्पत्त्या भेदेनेति। तयोरपि विभक्त्यर्थमन्तराकृत्य परंपरया भेदान्वयबोधात्साक्षादिति। अव्युत्पत्तेर्वक्ष्यमाणत्वादिति। भूतलं घट इत्यादौ आधाराधेयभावादिसम्बन्धेन घटभूतलाद्योः, तण्डुलः पचतीत्यादौ च क्रियाकर्मादिभावेन तण्डुलपाकाद्योरन्वयबोधानुदयादिति भावः।

विषयतात्वयोर्धर्मितावच्छेदकप्रकारभावापन्नयोरेव भानात्।

उक्तरीत्याऽनुगमेऽपि उदाहरणेऽतिव्याप्तिमाशङ्कते। **यद्यपीति उदाहरणजन्यबोधीयेति।** उदाहरणजन्यबोधश्च धूमवान् धूमव्यापकवह्निमानित्याकारकः। **नानुमितिजनकतावच्छेदिकेति।** धूमव्यापकवह्निसमानाधिकरण धूमवान्पर्वत इत्येवं जनकं ज्ञानं, तत्र परम्परया पक्षविषयतानिरूपिता या हेतुव्यापकत्वविशिष्टसाध्यविषयतामेव जनकतावच्छेदिका, अतो महानसं धूमवत् धूमव्यापकवह्निमच्च महानसान्यद् धूमवद् धूमव्यापकवह्निमच्चेत्युदाहरणजन्यबोधीया या विषयता सा नावच्छेदिका पक्षविषयत्वाऽनिरूपितत्वादिति भावः। **तन्निरूपितेति।** "पक्षविषयत्वाऽनिरूपित" साध्यविषयतानिरूपितेत्यर्थः। तथा च यथा परम्परया पक्षविषयत्वानिरूपितहेतुव्यापकताविशिष्टसाध्यविषयता न जनकतावच्छेदिका तथा "पक्षविषयत्वानिरूपित" साध्यविषयतानिरूपितव्यापकत्वविषयतापि न

तथा च संख्यातिरिक्तसुबर्थस्य प्रातिपदिकार्थविशेषणत्वे विभक्त्यर्थस्याऽन्तराऽभानेन प्रातिपदिकार्थस्य भूतलतण्डुलादेः घटपाकादौ आधाराधेयत्वकर्मत्वादिसम्बन्धेन साक्षादेवाऽन्वयबोधस्य भूतले घटः-तण्डुलं पचतीत्यादितः स्वीकरणीयतया तादृशव्युत्पत्तिविरोध इत्याशयः।

जनकतावच्छेदिकेति भावः। **तदीयेति।** धूमव्यापको वह्निरित्युदाहरणजन्यबोधीयेत्यर्थः। **तथा च।** तत्साधारण्याभावे च। **निरुक्तेति।** प्रकृतपक्षसाध्यकानुमितीत्यर्थः। **पर्याप्त्यधिकरणधर्मावच्छिन्नेति।** तादृशपर्याप्त्यधिकरणो यो धर्मः हेतुव्यापकसाध्यविषतात्वं तदवच्छिन्नेत्यर्थः। **प्रतिबन्धकतेति।** साध्यं हेतुव्यापकमिति निश्चयनिष्ठा प्रतिबन्धकतेत्यर्थः। **सङ्ग्रहो बोध्य इति।** तथा च प्रतिबन्धकतावच्छेदकविषयताशालित्वेनोदाहरणे नातिव्याप्तिरिति भावः। एवं च प्रकृतपक्षसाध्यकानुमितिजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणं यत्पक्षमुख्यविशेष्यतानिरूपितविषयतानिरूपितविषयतानिरूपित विषयतानिरूपित विषयतात्वं।

तदवच्छिन्नविषयत्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयताशून्यबोधजनकन्यायावयवत्वं प्रतिज्ञात्वं फलितम्। उदाहरणजन्यबोधीयविषयतायाः सङ्ग्रहमेव प्रतिपादयति। **अनुमितीति। तादृशप्रतिबन्धकतायामिति।** तादृशसंशयीयप्रतिबंधकतायामित्यर्थः। **तादृशरूपेणेति** हेतुव्यापकत्वविषयतानिरूपितसाध्यविषयतात्वेनेत्यर्थः। न च तादृशपञ्चमविषयत्वावच्छिन्नत्वमेव प्रतिबन्धकतायां निवेश्यताम् किं तादृशधर्मद्विषयत्वावछिन्नत्वेनेति वाच्यम्। तथासति मुख्यत्वसत्त्वेऽपि गोत्वाभावः प्रमेयत्वव्यापकवाच्यत्ववत्सास्नाभाववान् गोत्वाभावादित्यादौ प्रतिज्ञायामव्याप्तिः। तत्र गोत्वाभावव्यापकतादृशसास्नाभावसमानाधिकरणगोत्वाभाववान् गोत्वाभाव इति परामर्शीयसास्नाभाववृत्तिपञ्चमविषयतानिष्ठा सास्नाभावः प्रमेयत्वव्यापकवाच्यत्ववान्नवेति संशयनिरूपितप्रतिबन्धकतावच्छेदकतापि भवतीति तादृशविषयताशून्यत्वस्य प्रतिज्ञाजन्यबोधेऽसत्त्वादित्यतः प्रतिबन्धकतायां तादृशधर्मवद्विषयत्वावच्छिन्नत्वं निवेशितम्। तथा च तादृशो धर्मः गोत्वाभावव्यापकताविशिष्टतादृशसास्नाभावविषयतात्वं तद्वद्विषयत्वावच्छिन्ना या तादृशसास्नाभावो गोत्वाभावव्यापको नवेति संशयनिरूपितप्रतिबन्धकता

न च भूतले घट इत्यादौ घटाधिकरणं भूतलमित्याद्याकारक एवान्वयबोध उपेयते नात उपदर्शितव्युत्पत्तिविरोध इति वाच्यम्। तथा सति शाब्दबोधे अनुभवसिद्धस्य प्रथमान्तार्थमुख्यविशेष्यकत्वस्य भङ्गप्रसङ्गात्।

ननु विभक्त्यर्थः संसर्गतयैव भासते न तु विशेष्यतया घटादौ आधेयत्वादिसम्बन्धेन भूतलादिप्रकारकबोधे च सप्तम्यादिविभक्त्यन्त भूतलादिवाचकपदसमभिव्याहारस्य नियामकत्वान्नोक्तातिप्रसङ्गः। न चैवं भूतले-धूमादित्यादिभागमात्रस्याननुभावकत्वप्रसङ्गः। इष्टत्वात्।

तदवच्छेदकीभूतगोत्वाभावव्यापकताविशिष्टतादृशसास्नाभावविषयता तच्छून्यत्वस्य प्रतिज्ञाजन्यबोधे सत्वान्नाव्याप्तिरिति भावः।

प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधर्मवान्पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायामव्याप्तिः, धूमव्यापकवह्निसमानाधिकरणधूमवान् तादृशपर्वत इति परामर्शीयपक्षतावच्छेदककोटिप्रविष्टपञ्चमविषयत्वांशविशेषणविधया अनुमितिजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणं यत्प्रमेयत्वव्यापक-वाच्यत्वविषयतात्वं तद्वद्विषयतायाः प्रतिज्ञाजन्यबोधे सत्त्वादिति पक्षतावच्छेदका-वच्छिन्नत्वनिवेशः। तत्रापि पक्षतावच्छेदकनिष्ठावच्छेदकत्वमादाय तद्दोषतादवस्थ्यवारणाय पक्षविषयतानिरूपिताऽवच्छेदकत्वान्यविषयतालाभार्थं तन्निवेशः।

मुख्यत्वनिवेशप्रयोजनमाह। **मुख्यविशेष्यतानिवेशादित्यादिना।** परामर्शीयेति। गोत्वाभावव्यापकतादृशसास्नाभावसमानाधिकरणगोत्वाभाववान् गोत्वाभाव इति परामर्शनिरूपितेत्यर्थः। स्वं गोत्वाभावः। पक्षात्मकेत्यर्थः। अत्र गोत्वाभावरूपहेतुविषयतामादाय पञ्चमी ग्राह्या। तथा च हेतुभूतगोत्वाभावविषयतानिरूपितृवृत्तित्वविषयतानिरूपिताधिकरणविषयता-निरूपितसास्नाभावविषयतानिरूपित "प्रमेयत्वव्यापकं" वाच्यत्वविषयतात्वम् अनुमितिजनकतावच्छेदकतावच्छेदकतापर्याप्तिमत् तद्वद्विषयत्वावच्छिन्ना या "वाच्यत्वं प्रमेयत्वव्यापकं न वेति संशयनिरूपितप्रतिबन्धकता तदवच्छेदकविषयितायाः प्रतिज्ञाजन्यबोधे सत्त्वादव्याप्तिरिति भावः। **प्रमेयत्वव्यापकवाच्यत्वविषयताया** इति। तथा च परामर्शीयायास्तस्याः प्रतिबन्धकतावच्छेदकत्ववत् प्रतिज्ञाजन्यबोधीयप्रमेयत्वव्यापकवाच्यत्वविषयताया

चैत्रस्येदं न मैत्रस्य, मैत्रस्येदं न चैत्रस्य, द्वयोरिदं नेदमेकस्यापीत्यादौ चैत्रादिसंबन्धाभावबोधस्य विभक्त्यर्थविशेष्यतां विनाऽनुपपत्तेः।

अस्तु वा विभक्त्यर्थाधिकरणत्वज्ञापकत्वादिविशेषितस्यैव प्रकृत्यर्थस्य तुल्यवित्तिवेद्याऽऽधेयत्वज्ञाप्यत्वादिसम्बन्धेनान्वयः इत्यतो विभक्त्यर्थस्याविशेष्यत्वे नेदं मैत्रस्येत्यादौ मैत्रादिविशेषितस्वत्वादिरूपस्याभावप्रतियोगिनोऽवान्तरवाक्यादनुपस्थित्या नञर्थान्वयबोधानुपपत्तिमाह। चैत्रस्येदमित्यादि। मैत्रादेरभावो नञा बोध्यत न तु स्वत्वस्येत्याशङ्कां निराचिकीर्षुणा तदुपगमे चैत्रीयधनेऽपि संयोगसमवायादिना चैत्राद्यभावसत्वाद्यत्र चैत्रस्येदमिति व्यवहारस्तत्र न चैत्रस्येत्यपि व्यवहारः स्यादिति सूचयितुं चैत्रस्येत्युक्तम्। ननु चैत्रप्रतियोगिकाभावबोधने प्रथमान्तचैत्रपदसमभिव्याहार एव नियामक इत्यत आह। मैत्रस्येदमित्यादि। न च स्वत्वादिसम्बन्धेनैव प्रकृत्यर्थस्याभावो दर्शितस्थले नञा बोध्यते, तथा च नोक्तातिप्रसङ्ग इति वाच्यम्। वृत्यनियामकतया स्वत्वादेरभावप्रतियोगितावच्छेदकसम्बन्धत्वाभावात् नामार्थप्रतियोगिकस्याभावस्यानुयोगिनि सप्तमीं विना नञा बोधयितुमशक्यत्वाच्च।

वृत्यनियामकसम्बन्धस्याऽभावप्रतियोगितावच्छेदकत्वोपगमेऽपि स्वत्वादिसम्बन्धावच्छिन्नाभावस्य षष्ठ्याद्यन्तसमभिव्याहृतनञा बोधने अनुयोगिनि

अपि प्रतिबन्धकतावच्छेदकत्वमित्याशयः। न च साध्यतावच्छेदकांशे एव हेतुव्यापकतावच्छेदकत्वावगाहिपरामर्शस्यैव जनकतया नाव्याप्तिरिति मुख्यत्वनिवेशो व्यर्थः। एकव्यक्तिसाध्यके भेदघटितव्यापकताभिप्रायेण तदुक्तेः। एवं लिङ्गविशेष्यकपरामर्शस्यापि हेतुत्वे मुख्यत्वनिवेशोऽप्यनिस्तारात्पक्षविशेष्यकपरामर्श एव हेतुरिति नव्यमतेनायमनुगमो बोध्यः। प्रमेयत्वव्यापकवाच्यत्ववत् सास्नाभावव्याप्यगोत्वाभाववान् गोत्वाभाव इति परामर्शीयगोत्वाभावरूपलिङ्गविषयताया उपादानेऽपि न क्षतिः। हेत्वंशे विशेषणीभूतव्याप्तेः प्रकारतावच्छेदकतया तद्विषयतायामवच्छेदकत्वान्यत्वाभावात्। विशेष्यतावच्छेदकताभिन्नत्वं वा निवेशनीयमित्याह। **जनकता चेति। तेन।** साध्यव्याप्यत्वावच्छिन्नधर्मिताकान्यत्वनिवेशनेन।

सप्तम्या अनपेक्षणेऽपि द्वयोरिदं नेदमेकस्येत्यादावगतेश्च। तथाहि—स्वत्वस्य विशेष्यत्वे स्वनिरूपकनिष्ठभेदाप्रतियोगिनिरूपितं यत्स्वत्वं तदभावो धननिष्ठ-स्तत्र प्रतीयते, अप्रतियोग्यन्तमेकपदार्थः, सर्वत्र समभिव्याहृतपदार्थसंसर्गिनिष्ठ-भेदाप्रतियोगित्वरूपसजातीयद्वितीयरहितत्वस्यैकपदार्थत्वात्, स्वत्वं षष्ठ्यर्थः, तथाविधं चैकमात्रनिरूपितं स्वत्वं, नतूभयनिरूपितं, तन्निरूपकस्यैकपुरुषस्य तन्निरूपकपुरुषान्तरनिष्ठभेदप्रतियोगितया तथाविधभेदाऽप्रतियोग्यप्रसिद्धेरिति तादृशस्वत्वाभाव उभयधनेऽबाधितः। स्वत्वसम्बधेन एकपदार्थस्याभावो यदि नञा वोध्यते तदा तु स्वस्वामिनिष्ठभेदाप्रतियोगी एकपदार्थो वाच्यः, तत्र यदि स्वमभावस्यानुयोगिधनं तदाऽप्रसिद्धिः, प्रमेयमात्रस्यैवोभयस्वामिकं यद्धनं तत्स्वामिनिष्ठभेदप्रतियोगित्वात्, यदि धनान्तरमेकमात्रनिरूपितस्वत्ववत् तदा तस्य समभिव्याहृतपदार्थत्वाभावादेकपदस्य तादृशार्थसम्बन्धिनिष्ठ-भेदाप्रतियोगिव्युत्पत्तिभंगः। एकमात्रस्वत्ववद्धनान्तरस्वामिचैत्रमैत्रोभयधने नेदमेकस्येति व्यवहारानुपपत्तिश्च। एतदभिप्रायेणैव द्वयोरिदमित्याद्यनुसृतम्।

तद्धर्मिकेति। साध्यव्याप्यत्वावच्छिन्नधर्मिकेत्यर्थः। **उक्तप्रतिज्ञायां**। गोत्वाभावः तादृशसास्नाभाववानित्यत्र। परन्तु पर्वत आलोकव्यापकवह्निमान् धूमादित्यत्र प्रतिज्ञायामव्याप्तिः, धूमव्यापकतादृशवह्निसमानाधिकरणधूमवान्पर्वत इति परामर्शीय पर्वतत्वावच्छिन्नमुख्यविशेष्यतेत्यादिक्रमेण या पञ्चमी आलोकव्यापकवह्नि-विषयता तदंशे विशेषणविधया जनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणं यदालोकव्यापकवह्निविषयतात्वं तद्वद्विशेष्यताशून्यत्वस्य प्रतिज्ञाजन्य-बोधेऽसत्त्वादिति विभावनीयम्। व्यतिरेकपरामर्शे द्वितीयविषयतापदेन संसर्गविषयताग्रहणे किं गमकमित्याशङ्कते। **न चेति। व्यापकत्वविषयताया अपीति**। अपिना तादृशव्यापकत्वविषयतानिरूपितहेत्वभावविषयतायः समुच्चयः। **निरुक्तविषयतात्वादिति**। पक्षमुख्यविशेष्यतानिरूपितविषयता-निरूपितविषयतानिरूपिताविषयतात्वादित्यर्थः। **तादृशविशेषणतयाऽवच्छेद-कीभूतं**। तादृशव्यापकत्वविषयत्वांशे विशेषणतयावच्छेदकीभूतं। **साध्याभाव-व्यापकविषयतात्वमपीति**। अपिना साध्याभावव्यापकहेत्वभावविषयतात्वस्य समुच्चयः। **अव्याप्तिरिति**। वह्न्यभावव्यापकाभावप्रतियोगिधूमवान् तादृशपर्वत इति परामर्शीयपर्वतविशेष्यतानिरूपितधूमविषयतानिरूपित-प्रतियोगित्वविषयता

चैत्रो न पचतीत्यादौ तिङर्थस्येव विनाप्यनुयोगिनि सप्तमीं सुबर्थस्याप्यभावान्वयात्।

इदमत्रावधेयम्। नेदमेकस्येत्यत्र स्वनिरूपकनिष्ठभेदाप्रतियोगि-निरूपितयत्किञ्चित्स्वत्वस्याभावबोधने एकमात्रधनेऽपि तथाविधधनान्तर निष्ठस्वत्वाभावसत्वात्तादृशप्रयोगप्रसङ्गः, तादृशस्वत्वसामान्यस्य चैकाभावो न सम्भवति प्रतियोगितावच्छेदकस्य स्वत्वघटितत्वेनानुपगमात्, अभावकूटस्य चाऽसर्वज्ञदुर्ज्ञेयत्वमित्येकत्वसंख्यावच्छिन्न एकपदार्थः, तदन्वितस्वत्वस्य चोभयस्वत्वानिरूपितविशेषणताविशेषेण स्वत्वस्य समवेतत्वे तादृशसमवायेन वा अभावः प्रतीयते इत्युपगन्तव्यम्, तथाचोभयानिरूपितस्वत्वसम्बन्धेन प्रकृत्यर्थाभावबोधोऽपि सम्भवति। उभयाऽनिरूपितत्वं च स्वनिरूपितत्वस्वभिन्न-निरूपितत्वोभयसम्बन्धेन किञ्चिद्विशिष्टं यत्तदन्यत्वमिति।

ननु स्वत्वस्य विशेष्यत्वेऽपि नेदं मैत्रस्येत्यादितः कथं स्वत्त्वसंसर्गा-भावबोधः, संसर्गाभावबोधमात्रे एव नञाऽनुयोगिनि सप्तम्यपेक्षणादित्यत आह। चैत्रो न पचतीति। नामार्थप्रतियोगिकाभावबोधे एवाऽनुयोगिनः सप्तम्यपेक्षणादिति भावः।

निरूषिताभावविषयता निरूपित व्यापकत्वविषयत्वांशे विशेषणविधयाऽ-वच्छेदकीभूतं यत्तादृशव्यापकत्वविषयतात्वं तद्वद्विषयताशून्यत्वस्य प्रतिज्ञाजन्यबोधेऽसत्त्वादिति भावः। **किञ्चिद्व्यापकत्वे विशिष्टविषयतांशे** इति। किञ्चिद्व्यापकत्वविषयतानिरूपितविषयतांशे इत्यर्थः। एवं च हेतुपक्षयोः संसर्गविषयतामन्तर्भाव्यैव पञ्चमीति नाव्याप्तिः। ननु पक्षमुख्यविशेष्यतामारभ्य चतुर्थी या विषयता तदंशे विशेषणविधया जनकतावच्छेदकतावच्छेदकता-पर्याप्त्यधिकरणत्वेन धर्मोऽनुगमनीयः स च हेतुव्यापकसाध्यवद्विषयतात्वं-साध्याभावव्यापकहेत्वभावविषयतात्वं चेत्युदाहरणस्यापि वारणम्, एवं च किञ्चिद्व्यापकत्वविशिष्टनिरूपितत्वमपि न देयमिति चेन्नएवं सति यो यो धूमवान् स स वह्निमानित्युदाहरणे धूमवान् धूमव्यापकवह्निमानिति बोधस्य प्राचां मते सिद्धतया तद्वारणेऽपि यत्र धूमस्तत्र वह्निरित्युदाहरणे धूमव्यापको वह्निर्महानसादौ इति बोधस्य तादृशविषयताशून्यस्य

हेतुविषयकज्ञानजनकत्वव्याप्याऽवयवतावच्छेदकरूपशून्यत्वे सति उदाहरणान्यन्यायावयवत्वं तत्त्वम्। तादृशावच्छेदकं हेतुत्वादिकमिति केचित्।

यथाश्रुतलिङ्गाविषयकत्वनिवेशे गन्धवती इतरेभ्यो भिद्यते गन्धादित्यादावव्याप्तिप्रकारान्तरेण वारयतां मतमाह। हेतुविषयकेति। कासां चित्प्रतिज्ञानां हेतुविषयकज्ञानजनकत्वेऽपि प्रतिज्ञात्वस्य हेतुविषयकज्ञान-जनकत्वाऽनियतत्वात्तन्नियतन्यायावयवतावच्छेदकानि हेतुत्वोपनयत्वनिगगम-त्वान्येव न तु प्रतिज्ञात्वमिति नाव्याप्तिः।

हेतुबोधकप्रतिज्ञानिष्ठतत्प्रतिज्ञात्वादेस्तादृशज्ञानजनकत्वनियतत्वाद व्याप्तितादवस्थ्यमतोऽवयवतावच्छेदकेति। अभावहेतुकव्यतिरेक्युदाहरणस्य लिङ्गाविषयकज्ञानजनकस्य सम्भवादुदाहरणस्य तादृशज्ञानजनकत्वाऽ-नियतत्वादुदाहरणेऽतिव्याप्तिवारणाय उदाहरणान्येति।

प्रतिज्ञात्वादेर्हेतुपक्षसाध्यभेदेन भिन्नत्वाद् गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादावव्याप्तिः तदवस्थैव तादृशप्रतिज्ञानिष्ठप्रतिज्ञात्वस्य हेतुविषयक-ज्ञानजनकत्वनियतत्वात्, हेत्वादिभेदेन प्रतिज्ञात्वाद्यभेदे तु प्रकृतहेतुविषयकज्ञान-जनकत्वनियतावयवतावच्छेकस्यैवाऽप्रसिद्धिर्नानाहेतुकहेत्ववयवादिसाधारण-हेतुत्वादेरप्यतथात्वादित्यस्वरससूचनाय केचिदिति।

जनकेऽतिव्याप्तिः। लाघवादाह। **वस्तुतस्त्विति। निवेशनीयत्वादिति।** न चाऽभावोऽभावत्ववान्पटाभावत्वादित्यत्र पटाभावत्वव्यापकाभावत्वसमानाधि-करणपटाभावत्ववानभाव इत्यन्वयपरामर्शीयाऽधिकरणनिष्ठचतुर्थविषताया अभावमात्रनिष्ठत्वेनाऽव्याप्तिरिति वाच्यम्। अभावत्वानवच्छिन्नत्वस्य विषयतायां निवेशनीयत्वात्। न चैवं मुख्यत्वदलं व्यर्थम्, सास्नाभावनिष्ठचतुर्थविषयताया अभावत्वाच्छिन्नत्वादिति वाच्यम्। एवमपि प्रमेयत्वव्यापकवाच्यत्ववज्-ज्ञेयत्वसाध्यकस्थले निरुक्तरीत्याऽव्याप्तेस्तत्सार्थक्यात्। सास्नाभावसाध्यकस्थले प्रयोजनदर्शनं च प्रथमकल्पाभिप्रायेण। **अतथात्वात्।** अभावनिष्ठप्रकारताभिन्न-त्वाभावात्। **पञ्चमविषयताया एवेति।** एवकारेण चतुर्थविषयताव्यवच्छेदः।

तादृशेति। प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकप्रकृतसाध्यता-

हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा।

लिङ्गाविषयकलिङ्गिविषयकज्ञानजनकन्यायावयववाक्यत्वं वा इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात्।

न्यायावयवत्वम्। लिङ्गेत्यादि। लिङ्गाविषयकेति पूर्वोपदर्शितार्थकम्। अभावहेतुकव्यतिरेक्युदाहरणवारणाय लिङ्गीति। लिङ्गी–साध्यं–तद्विषयकं–तद्वद्विशेष्यकम्।

जिज्ञासाफलोपधायकत्वस्याऽव्याप्तिमाशंक्याह। जिज्ञासेति। उदासीनातिव्याप्तिवारणाय न्यायावयवत्वस्यावश्यं निवेशनीयतया वाक्यभिन्नातिव्याप्त्यप्रसक्तेर्वाक्यपदोपादानमनर्थकमित्याह। वाक्यत्वमिति।

गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादावव्याप्तिवारणाय लिङ्गाविषयकेतीति। पूर्वोपदर्शितार्थकमिति। साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयताबहिर्भूतलिङ्गविषयताशून्यार्थकमित्यर्थः। अभावहेतुकेति। वह्न्यभावहेतुकेत्यर्थः। यो यो धूमवान् स स वह्निमानित्युदाहरणस्य लिङ्गाविषयकत्वादिति भावः। भावहेतुकव्यतिरेक्युदाहरणस्य हेत्वभावत्वेनैव व्यतिरेकबोधकतया न लिङ्गाविषयकत्वसम्भवः एवमभावहेतुकाऽन्वयव्यतिरेक्युदाहरणस्य न तथात्वसम्भवः, इत्यभावहेतुकव्यतिरेकित्वानुधावनम्। लिङ्गि–साध्यमिति। लिङ्गमस्यास्तीति व्युत्पत्त्या लिङ्गिपदस्य लिङ्गत्वनिरूपकार्थकत्वादिति भावः।

वच्छेदकावच्छिन्नसाध्यकानुमितीत्यर्थः। तथा च तादृशानुमितिजनकतावच्छेदकविषयत्वं चेति समुदितार्थः। यथाश्रुतार्थपरित्यागे बीजमाह। **अतः**। एतादृशार्थकरणादित्यर्थः। **दीधितौ हेतुभूतेति**। हेतुभूतो योऽभावः "हेत्वभावाभावः" तत्प्रतियोगितावच्छेदकं यद्धेत्वभावत्वादि तदवच्छिन्ने इत्यर्थः **एतदसङ्ग्रहभयेनैवेति**। वह्न्यभावहेतुकस्थलाऽसङ्ग्रहभयेनैवेत्यर्थः। **तथासति**। हेत्वभावत्वावच्छिन्ने इत्युक्तौ च। **इत्याकारकयोरेवेति**। एवकारेण यत्र धूमाभावाभावः तत्र वह्न्यभावाभावः–एवं धूमाभावाभावव्यापकवह्न्यभावाभावाभाववांश्चायमित्युदाहरणोपनययोर्व्यवच्छेदः **वह्नित्वावच्छिन्ने एवेति**।

तेनेदं जलं निःस्नेहत्वप्रकारकप्रमाविषयशून्यत्वत्वात् इदं द्रव्यं जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वादित्यादौ यन्न जलं तन्निःस्नेहत्वप्रकारकप्रमाविषयः इत्युदाहरणे नातिप्रसङ्गः। लिङ्गाविषयकेत्यस्य पूर्वोक्तव्याप्यत्वाविषयकार्थकत्वे तु हेतुवारणाय लिङ्गीति।

तद्वद्विशेष्यकं–तद्वन्मुख्यविशेष्यकं। निःस्नेहशून्यत्वं स्नेह एव तद्धेतुत्वे उदाहरणजन्यबोधस्य न लिङ्गाविषयकत्वसम्भव इति तत्प्रकारकप्रमाविषयत्वशून्यत्वानुधावनम्। तच्च भावप्रतियोगिकतया अतिरिक्तमिति हृदयम्। जलत्वसन्देहदशायां जलान्यत्वस्य सन्दिग्धतया तत्प्रतियोगिकप्रमाविषयत्वमपि सन्दिग्धमिति तच्छून्यत्वस्य हेतुतया उपन्यासो न सम्भवतीति प्रथमसाध्ये तदुपेक्षितम्। उत्पत्तिकाले जलस्यापि निःस्नेहतया द्रव्यत्वसाध्यकजलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वहेतुकस्थलान्तरमनुसृतम्। अत्रोक्तयुक्तया जलत्वसाध्योपेक्षा। यत्तु जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वमपि लाघवाज्जलत्वस्वरूपमेवेति जलत्वस्य साध्यत्वे नोदाहरणजन्यबोधस्य साध्यविषयकस्य लिङ्गाविषयकत्वस्य सम्भव इति द्रव्यत्वसाध्यकानुधावनमिति।

एवकारव्यवच्छेद्यं स्पष्टयति। **नन्विति। तत्रातिव्याप्त्यभावाप्रतिपादनेनेति।** धूमाभाववान् वह्न्यभावादित्यादौ यत्र धूमस्तत्र वह्निरित्युदाहरणेऽतिव्याप्त्यकथनेनेत्यर्थ। **न्यूनतापत्तेरिति।** अन्यथा वह्न्यभावाभावत्वावच्छिन्ने धूमव्यापकतानवगाहित्वेनाऽतिव्याप्त्यापत्तेरिति भावः, इदमुपलक्षणम्। साध्याभावोऽपि साध्यीभूताभावप्रतियोगितावच्छेदकावच्छिन्नत्वेनोपादेयः। तेन धूमाभावाभावत्वेन साध्याभावाप्रवेशेऽपि नोक्तस्थलीयोदाहरणेऽतिव्याप्तिः।

संयोगत्वावच्छिन्ननिरूपितव्यापकताया अपीति। अपिना गुणत्वावच्छिन्ननिरूपितव्यापकतायाः सङ्ग्रहः। **द्रव्यत्वत्वावच्छिन्नानुमितेरिति।** अस्य प्रयोजकतया इत्यनेनाऽन्वयः। हेतुतावच्छेदकावच्छिन्नहेतुकत्वोपादाने तु हेतुतावच्छेदकीभूतं यद्गुणत्वं तदवच्छिन्ने द्रव्यत्वव्याप्त्यलाभान्नाव्याप्तिरिति भावः। अत्र द्रव्यत्वव्याप्यसंयोगवानित्युक्तौ संशयाद्यसम्भवात्संयोगवद्वृत्तीत्युक्तम्। साध्यतावच्छेदकनिवेशनप्रयोजनमाह। **द्वितीयेति। गुणत्वावच्छिन्नव्यापकताया** इति। रूपत्वावच्छिन्ननिरूपिताया इत्यादिः।

लिङ्गिविषयकत्वं च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतु-विशिष्टहेतुत्वविषयताबहिर्भावेण वाच्यम्।

तन्न। जलाद्यन्यत्वप्रकारकप्रमाविषयत्वशून्यत्वस्य जलत्वस्वरूपत्वे यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषयः इत्युदाहरणजन्यबोधस्याप्यन्यत्व-प्रतियोगितावच्छेदकतया लिङ्गविषयकत्वेनाऽसङ्गतेः। पूर्ववद् व्याप्त्य-विषयकत्वस्य लिङ्गाविषयकपदार्थत्वे उदाहरणस्य व्याप्तिबोधकतया तत्र लिङ्गिविषयकत्वविशेषणव्यावृत्तिर्न सम्भवतीत्याशयेन तन्मते स्थलान्तरे व्यावृत्तिमाह। लिङ्गेति। पूर्वोक्तेति। अनुगतरूपावच्छिन्नेत्यर्थः। हेतुवारणायेति। इतरेषां त्रयाणां व्याप्तिविषयकत्वेनैव वारणादिति भावः।

प्रकृतेति। हेतुतावच्छेदकहेतुहेतुत्वविषयतानां भेदनिवेशे साध्यस्य हेतुतावच्छेदकादिरूपत्वे हेतुतावच्छेदकादिविषयताभिन्नसाध्यविषयत्वाऽ-प्रसिद्ध्याऽव्याप्तिरिति विशिष्टविषयताबहिर्भावनिवेशः। तादृशविषयताबहिर्भावः पूर्ववन्निर्वाच्यः।

अवच्छेदकद्वयानुपादाने। हेतुतावच्छेदक–साध्यतावच्छेदकाप्रवेशे। **तत्र तत्र। क्रमेणोक्तप्रतिज्ञाद्वये। अव्याप्तेरिति।** साध्यतावच्छेदकनिवेशे तु अत्र स्पर्शत्वावच्छिन्नं यत्प्रकृतसाध्यं तद्व्याप्त्यलाभान्नाव्याप्तिरिति भावः।

इदन्तु बोध्यम्। उक्तस्थलद्वयेऽव्याप्त्यभिधानं च प्रकृतहेतुतावच्छेद-कावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतौपयिकं यद्व्याप्ति-विषयकत्वं तच्छून्यमिति कल्पाभिप्रायेण। अथ पक्षतावच्छेदकावच्छिन्नमुख्य-विशेष्यतेत्याद्यनुगमस्य भट्टाचार्योक्तस्य दीधितिकृदभिप्रेतत्वे एतद्दीधित्य-सङ्गतिः। प्रथमे द्रव्यत्वव्याप्यगुणवान् "गुणव्यापकद्रव्यत्वसमानाधिकरणगुणवान्" द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवान् अयमिति परामर्शीयजनकतायामवच्छेदकीभूता पञ्चमी विषयता गुणत्वावच्छिन्ननिरूपितव्यापकत्वविशिष्टद्रव्यत्वविषयतैव न तु संयोगत्वावच्छिन्ननिरूपितव्यापकत्वविशिष्टद्रव्यत्वविषयता तच्छून्यत्वं च प्रतिज्ञाजन्यबोधस्येति हेतुतावच्छेदकपदं व्यर्थम्, एवं द्वितीये स्पर्शव्याप्य-रूपवान् "रूपव्यापकस्पर्शसमानाधिकरणरूपवान्" गुणव्याप्यरूपवानयमिति परामर्शीयजनकतायामवच्छेदकीभूता रूपव्यापकताविशिष्टस्पर्शत्वावच्छिन्न-

न च तादृशविषयताबहिर्भूतविषयतामात्रनिवेशेनैव हेतुवारणसम्भवे साध्यांशनिवेशनं व्यर्थमिति वाच्यम्। तादृशविषयतान्तर्भूतसाध्यविषयताभिन्नत्वस्यैवात्र बहिर्भावेणेत्यनेन विवक्षिततया दर्शितहेतौ तादृशसाध्यविषयताभिन्नहेतुत्वादिविषयतामादायातिप्रसङ्गस्य वारकतया तत्सार्थक्यात्। भेदप्रतियोगिकोटौ निविष्टस्य साध्यांशस्य चाऽखण्डाभावघटकतयाऽवैयर्थ्यात्।

यत्र च प्रकृतहेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयतान्तर्भूतसाध्यविषयतायाः अप्रसिद्धिः तत्र बहिर्भूतान्तमनुपादेयमेव शब्दैक्यस्याऽविवक्षितत्वादिति नाव्याप्तिः। तादृशविषयतान्तर्भूतत्वसाध्यीयत्वोभयाभाव एव वा बहिर्भावेत्यन्तार्थः।

विषयतैव, न तु रूपव्यापकताविशिष्टगुणत्वावच्छिन्नविषयतेति साध्यतावच्छेदकपदमपि व्यर्थम्। न च संयोगत्वावच्छिन्नहेतुकायाः गुणत्वावच्छिन्नहेतुकायाश्च द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयं द्रव्यत्ववानित्यनुमितेरेकाकारतया तादृशानुमितिजनकसंयोगत्वावच्छिन्न (गुण) प्रकारकपरामर्शीयपञ्चमविषयतामादायाव्याप्तिवारणाय हेतुतावच्छेदकपदम्। तथा गुणत्वावच्छिन्नप्रकारक परामर्शीयपञ्चमीविषयतामादाय नाव्याप्तिरिति वाच्यम्। संयोगत्वावच्छिन्नहेतुकतादृशानुमित्यप्रसिद्धेर्द्रव्यत्वव्याप्यसंयोगवद्वृतिधर्मवानयं द्रव्यत्ववानयं द्रव्यत्ववान् संयोगादित्यादिन्यायप्रयोगाभावात्। अत एव दीधितिकृता वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यादिर्न न्यायप्रयोग इत्युक्तम्। अत्रोच्यते न्यायप्रयोगाऽसम्भवेन परार्थानुमित्यप्रसिद्ध्या तादृशानुमितिजनकपरामर्शीयनिरुक्तपञ्चमविषयताया अप्रसिद्धत्वेन तच्छून्यबोधजनकत्वस्य प्रतिज्ञालक्षणस्योक्तप्रतिज्ञायामव्याप्तेस्तदुपादानम्। तथा चाऽनुमित्यप्रसिद्धावपि गुणत्वावच्छिन्नहेतुकतादृशपरामर्शानुमितिप्रसिद्ध्या तामादायैव लक्षणगमनान्नाव्याप्तिः।

एवं। लिङ्गत्वस्य व्याप्त्यर्थकत्वे। **पूर्वोक्तेति**। उद्देश्यानुमितिविषयकत्वार्थकेत्यर्थः। **व्यावृत्तिर्न सङ्गच्छते**। इति। उदाहरणस्य लिङ्गत्वाविषयकशाब्दबोधजनकत्वाभावादिति भावः। **सत्यन्तोत्तरविषयान्तेति**। उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकान्तेत्यर्थः। **तादृशमूलस्य चेति**। अन्यूनानतिरिक्तपदं विहायेति मूलस्य चेत्यर्थः। **तथाविधसमुदायेति**। उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकसमुदायेत्यर्थः। **दीधितौ–अन्यूनानतिरिक्तेति च मूलमिति**।

लिङ्गविषयकज्ञानजनकत्वाऽनियतलिङ्गिविषयकज्ञानजनकत्व-नियतावयवताच्छेदकरूपवत्त्वं तत्त्वमित्यादिकं तु तादृशरूपान्तरापरिचये दुर्ग्रहत्वादनुपादेयम्।

हेतुतावच्छेदकहेतुहेतुत्वानां निवेशस्य प्रयोजनं क्रमशः प्रदर्शयति। तेनेति। तत्त्वेनेति। हेतुत्वेनहेतुत्व त्वेन चेत्यर्थः। हेतुहेतुत्वयोस्तादात्म्यसम्बन्धेन साध्यत्वं बोध्यम्। हेतुत्वावच्छिन्नसाध्यकस्थले हेतुत्वेन प्रतीयमानत्वरूपप्रकृतहेतोरपि साध्यतावच्छेदकक्रान्ततया हेतुजन्यबोधस्य साध्यविषयकत्वमक्षतमेव साध्यतावच्छेदकविशिष्टनिरूपितविषयतापर्यन्तस्याविवक्षिततत्वादिति हेतुविषयताबहिर्भावेन व्यावृत्तिसङ्गतिः न च हेतुविषयिताबहिर्भूतत्वनिवेशापेक्षया साध्यतावच्छेदकविशिष्टविषयकत्वनिवेशनमेव लाघवेनोचितमिति वाच्यम्। विशिष्टविषयताबहिर्भावे निवेशनीये हेतुविषयताबहिर्भावस्य स्वातन्त्र्येणाऽ-निवेशनीयतया गौरवानवकाशात्। हेत्वंशमनिवेश्य विशिष्टस्य दुर्निवेशतया विशिष्टनिवेशेनैव तन्निवेशात्। हेत्वंशाप्रवेशे एव हेतुतावच्छेदकविषयत्वहेतुत्व-विषयत्वयोवहिर्भावस्य पृथङ्निवेशनीयतया गौरवात्। एवं च प्रमेयत्वावच्छिन्न-साध्यकस्थलेऽपि हेत्वंशनिवेशनप्रयोजनसम्भवादयं हेतुरित्युपलक्षणपरं बोध्यम्।

लिङ्गिविषयकेत्यस्य पूर्ववत्साध्यवद्विशेष्यकार्थकत्वोपगमे वह्निमान् वह्निसामग्रीमत्त्वात्, अयं हेतुः तत्त्वेन प्रतीयमानत्वात् अनयोरतिप्रसङ्ग वारणसम्भवेऽपि इदं हेतुत्वमित्यादौ पञ्चम्यर्थस्य तादात्म्यसम्बन्धेन साध्यवत्तया

अन्यूनानतिरिक्तपदं विहायेत्यत्रेत्यादिः। तेन जनकत्वे सतीत्यस्य न परित्यागः। तथा च न्यायावयवत्वे सति लिङ्गत्वाविषयकबोधजनकवाक्यत्वं लक्षणम्। **एतत्कल्पे।** लिङ्गत्वाविषयकत्वघटितलक्षणे। **तादृशेति।** अनुमितिसमान-विषयकेत्यर्थः। **तज्जन्यबोधस्य।** हेतुजन्यबोधस्य। हेतुत्वं धूमीयमित्याकारकस्य। **तादृशेति।** प्रमेयत्वादितीत्यर्थः। **हेतुजन्यबोधे।** हेतुत्वं प्रमेयत्वीयमित्याकारके। **तेन।** पक्षमुख्यविशेष्यकत्वनिवेशेन। **तद्वारणसम्भव इति।** पञ्चम्यर्थपक्षकहेतु-वारणसम्भवः इत्यर्थः। घटो दण्डादिति प्रतिज्ञानुपगमे त्वाह। **हेत्वन्यस्येति। तथा च।** हेत्वन्यत्वविशेषणे च। **अत एव।** हेत्वन्यत्वाभावादेव। **उक्तसमुदायदलेति।** उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकेत्यर्थः। **दीधितौ-**

साध्यप्रकारतानिरूपितविशेष्यतार्थकत्वेऽपि स्वरूपसम्बन्धेन हेतुत्वसाध्यकस्थले निरूपितत्वसम्बन्धेन ज्ञानत्वावच्छिन्नसाध्यकजनकतात्वावच्छिन्नपक्षकस्थले च हेतावतिव्याप्तिवारणं न सम्भवति इति गुरुतरारम्भः। लिङ्गिविषयतायाः पूर्वोपदर्शितविषयिताया बहिर्भावनिवेशनं लिङ्गपदस्य धर्मपरतां च विनैव लिङ्गबोधकप्रतिज्ञाविशेषेऽव्याप्तिं लिङ्गिपदविषयपदयोः साध्यवद्विशेष्यपरतां विनैव दर्शितव्यतिरेक्युदाहरणेऽतिव्याप्तिः प्रकारान्तरेण वारयतां मतमुपन्यस्य दूषयति। लिङ्गेति।

निगमनस्योदाहरणस्य च वारणाय नियतान्तद्वयमवयवतावच्छेदक-विशेषणम्। प्रतिज्ञात्वोदाहरणत्वयोरपि लिङ्गलिङ्गिविषयकज्ञानजनकत्व-समानाधिकरणतयाऽसम्भवातिप्रसङ्गौ अतः सामानाधिकरण्यमुपेक्ष्य-नियतत्वप्रवेशनम्। उदाहरणविशेषत्वमादायातिप्रसङ्गवारणायावच्छेदकान्तम्। आदिपदात्पञ्चमीविभक्तिमत्त्वानियतलिङ्गिविषयकज्ञानजनकत्वनियता-वयवतावच्छेदकरूपवत्त्वादिपरिग्रहः। रूपान्तरेति।

संख्यातिरिक्तसुबर्थस्येति। संख्यातिरिक्तप्रत्ययार्थस्येत्युक्तौ तु आह। **लिङर्थस्येति**। स्वर्गकामो यजेते इत्यादौ लिङर्थो विधिः स च इष्टसाधनत्वम् तस्य च प्रकृतिभूतधात्वर्थे भानम्। याग इष्टसाधनमिति बोधः। **प्रातिपदि-कार्थयोरिति**। निपातातिरिक्तसमानविभक्तिकेत्यादिः **साक्षाद्भेदेनेति**। तादात्म्यातिरिक्तसम्बन्धेनेत्यर्थः। निपातातिरिक्तत्वविशेषणाद् घटःपटो नेत्यत्र नञर्थभेदे पटस्य तादात्म्यातिरिक्तप्रतियोगितासम्बन्धेनाऽन्वयेऽपि नान्वयव्यभिचारः। एव मुक्तस्थले एव नञर्थभेदस्य स्वरूपेण घटेऽन्वयेऽपि न क्षतिः। **भेदेनेत्यस्य** फलमाह। **समानविभक्तिकनामार्थयोरिति**। नीलो घट इत्यादौ नीलघटाद्योरित्यर्थः। अस्याऽभेदेनाऽन्वयबोधोत्पत्त्या इत्यनेनाऽन्वयः। **क्रियाविशेषणीभूतद्वितीयान्तनामार्थधात्वर्थयोरिति**। स्तोकं पचतीत्यादौ स्तोकपाकाद्योरित्यर्थः। **तयोरपि**। नामार्थधात्वर्थयोरपि। **विभक्त्यर्थमन्तराकृत्य**। राज्ञः पुरुष इत्यादौ ङस्विभक्त्यर्थसम्बन्धं द्वारीकृत्य भेदान्वयबोधात्, राज्ञो निरूपितत्वसम्बन्धेन षष्ठ्यर्थसम्बन्धं स्वत्वे तस्य च स्वरूपसम्बन्धेन पुरुषेऽन्वयादित्यर्थः। तथा च निरूपितत्वसम्बन्धेन राजविशिष्ट स्वत्ववान्पुरुष इति बोधः। एवं तण्डुलं पचतीत्यादावपि बोध्यम्। तथा च विशेष्यतासम्बन्धेन

तेन वह्निमान् वह्निसामग्रीमत्त्वात् अयं हेतुरिदं वा हेतुत्वं तत्त्वेन प्रतीयमानत्वादित्यादौ नातिप्रसङ्गः।

इति दीधितौ प्रतिज्ञालक्षणम्।

यद्यपि निरुक्तस्यापि रूपस्यापरिचयादन्तरपदमनर्थकम्। तथापि आत्माश्रयभयेन तथाविधरूपान्तरपरिचयोऽपेक्षणीयः। तच्च रूपमनुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकवाक्यत्वादिकमेव, तथा च तस्यैव तद्घटकस्य लक्षणत्वसम्भवाद्व्यर्थविशेषणता। न च तस्य विशिष्याघटकत्वान्न व्यर्थविशेषणतेति वाच्यम्। प्रतिज्ञात्वे हेतुत्वादिसाधारणस्यावच्छेदकत्वस्य दुर्घटतया विशिष्यैव तन्निवेशस्यावश्यकत्वादित्येतल्लाभायान्तरपदम्।

अत्र च साध्यादिभेदेनाऽभिन्नं प्रतिज्ञात्वं यद्यवच्छेदकत्वेन निवेश्यते तदा तस्य प्रकृतसाध्यविषयकत्वनियतत्वसम्भवादप्रसिद्धिः। यदि च साध्यादिभेदेन भिन्नं तत्, तदा यादृशसाध्यपक्षकप्रतिज्ञायां प्रकृतलिङ्गबोधकत्वं नियतं तत्राऽव्याप्तिरित्यपि दूषणं बोध्यम्।

इति गादाधर्यम् अवयवग्रन्थे प्रतिज्ञालक्षणम्।

निपातातिरिक्तनामार्थप्रकारताकशाब्दबोधं प्रति विशेष्यतासम्बन्धेन निपातातिरिक्तनामपदजन्योपस्थितिः कारणमिति भावः। दीधितौ–अव्युत्पत्तेर्वक्ष्यामाणत्वादिति बोधााभावस्य वक्ष्यमाणत्वादित्यर्थः। भेदेनान्वयबोधाभावमाह। **भूतलं घट इत्यादाविति।** आदिना राजा पुरुष इत्यादेः परिग्रहः। अस्याऽन्वयबोधानुदयादित्यनेनाऽन्वयः। तथाचाऽऽधेयतासम्बन्धेन आधारतावद्भूतलविशिष्टो इति बोधाभावादिति भावः। एवं स्वत्वसम्बन्धेन राजविशिष्टः पुरुष इत्यपि बोध्यम्। आधारतासम्बन्धेन घटविशिष्टं भूतलमित्यपि बोध्यम्। प्रातिपदिकार्थे प्रातिपदिकार्थस्य तादात्म्यातिरिक्तसम्बन्धेनान्वये आपत्तिमुक्त्वा प्रातिपदिकार्थे धात्वर्थस्य तेन सम्बन्धेनान्वये आपत्तिमाह। **तण्डुलः पचतीत्यादौ चेति। तण्डुलपाकाद्योरिति।** कर्मत्वसम्बन्धेन तण्डुले पाकस्येत्यर्थः, एवं कर्मकत्वसम्बन्धेन धात्वर्थे पाके प्रातिपदिकार्थस्य तण्डुलस्येत्यपि बोध्यम्। **अन्वयबोधाभावादिति** तथा च तदापत्तिभिया प्रातिपदिकार्थधात्वर्थयोः

प्रत्ययार्थेन क्वचिन्निपातार्थेन सममेव भेदेनान्वयबोधो जायते इति स्वीकार्यम्। एवं च विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितिः कारणमिति कार्यकारणभाव आवश्यकः। तथा च तण्डुलः पचतीत्यत्र स्वकर्मकत्वसम्बन्धेन धात्वर्थपाके न तण्डुलान्वयः, तत्र पाके विशेष्यतया प्रत्ययजन्योपस्थितेरभावात्। न च तण्डुलगतकर्मत्वस्यानुक्तत्वात्तण्डुलपदाद् द्वितीयाया अनुशासनादयं प्रयोगो न युक्त इति वाच्यम्। प्रातिपदिकार्थं प्रति कर्मत्वस्य विशेष्यतयाऽन्वय-बोधतात्पर्ये एव **"कर्मणि द्वितीये"** त्यादिना प्रातिपदिकाद् द्वितीयादेरनुशासनात्। प्रकृते च कर्मत्वस्य संसर्गतया भाने तात्पर्यात्। **तथा च** भूतलं घटः—तण्डुलं पचतीत्यादौ आधेयतासम्बन्धेन आधारतावद्भूतलविशिष्टो घटः एवं कर्मकत्वसम्बन्धेन कर्मत्ववत्तण्डुलविशिष्टपाकानुकूल**कृ**तिमानिति बोधविरहे च। **तादृशव्युत्पत्तिविरोध** इति। **तादृशेति।** निपातातिरिक्तनामार्थयोः क्रियातादृशनामार्थयोश्च भेदेनान्वयस्याव्युत्पन्नत्वादितीत्यर्थः। एवं च प्रकृते हेतुत्वमभिधेयं प्रमेयत्वादित्यत्र हेतावतिव्याप्तिः, पक्षमुख्यविशेष्यकबोध-जनकत्वादतो हेत्वन्यत्वविशेषण**मावश्यकम्**, तथा च समुदायदलपरित्यागो युक्त एवेति ध्येयम्।

सप्तम्यर्थोऽधिकरणत्वमेव तत्र घटान्वयः, घटान्विताधिकरणत्वस्य भूतले इति प्रत्ययार्थाधिकरणत्वस्य विशेषणतया "भेदेन" अन्वयस्वीकारेऽपि न व्युत्पत्तिविरोध इत्याशङ्कते। **न चेति तथा सति।** भूतलस्य विशेष्यत्वे सति। भूतले घट इत्यादौ आधेयतासम्बन्धेनैव घटादौ भूतलाद्यन्वयबोधः स्वीक्रियते। न च विशेष्यतासम्बन्धेन नामार्थप्रकारकभेदान्वयबोधं प्रति विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितिः कारणमिति व्युत्पत्तिविरोध इति वाच्यम्। उक्तव्युत्पत्तेर्निर्युक्तिकत्वात्। एवं च नीलो घट इत्यादौ विशेषणवाचक-पदसमभिव्याहृतविभक्तेरिव सर्वविभक्तीनां साधुत्वमात्रार्थकत्वस्यैवो-चितत्वादित्याशङ्कते। **नन्विति संसर्गतयैवेति**—एवकारव्यवच्छेद्यमाह। **नन्विति।** ननु भूतलं घट इत्यादिवाक्यात्कथं न तादृशो बोध इत्यत आह। **घटादाविति। नोक्तातिप्रसङ्ग इति।** न भूतलं घट इत्यादिवाक्याद् भूतलवान् घट इति बोधप्रसङ्गः, आधेयतासम्बन्धेन भूतलप्रकारकघटविशेष्यकशाब्दबोधे सप्तम्यन्तभूतलपदसमभिव्याहृतघटपदज्ञानस्यैव हेतुत्वादिति भावः। **एवं।** विभक्तेः साधुत्वमात्रार्थकत्वे। प्रकृत्यर्थे विशेषणतयैव विभक्त्यर्थो भासते।

प्रतिज्ञात्वं जातिः अनुगतानतिप्रसक्ततान्त्रिकव्यवहारादिति केचित्, तन्न, देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गात्, प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं वाक्यं प्रतिज्ञेत्यपि न, तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्यानुसरणीयत्वात्।

तथा **च** भूतले इत्यादिभागमात्रादपि अधिकरणतावद् भूतलमिति बोधः। एवं धूमादित्यादौ ज्ञापकतावान् धूम इत्याकारको बोधः। भूतले घटः– धूमाद्वन्हिमानित्यादिपदान्तरसमभिव्याहारस्थले अधिकरणत्वज्ञापकत्व- विशिष्टधूमादेस्तुल्यवित्तिवेद्याऽऽधेयत्वज्ञाप्यत्वादिसम्बन्धेन घटवह्न्यादौ अन्वयबोधः। तथा च निपातातिरिक्तनामार्थयोः क्रियतादृशनामार्थयोश्च तुल्यवित्तिवेद्यसम्बन्धातिरिक्तभेदसम्बन्धेन साक्षान्नान्वय इति व्युत्पत्तिरित्याशयेनाक्षिपति। **अस्तु वेति। अभावप्रतियोगिन** इति। अस्याग्रे नञर्थान्वयानुपपत्तौ अन्वयः। **तदुपगमे** मैत्रादेरभावोपगमे **नियामक इति।** एवं च संयोगादिना चैत्रात्यन्ताभावस्य चैत्रीयधने सत्वेऽपि नेदं चैत्रस्येति न प्रयोग इति भावः **दीधितौमैत्रस्येदमित्यादि।** तथाचोक्तस्थले एव चैत्रात्यन्ताभावबोधस्वीकारे प्रथमान्तत्वव्युत्पत्तौ व्यभिचार इत्यवश्यं चैत्रस्वत्वाभाव एव बोधनीयः, अन्यथोक्तातिप्रसङ्गादिति। **स्वत्वादि- सम्बन्धेनैवेति।** एवकारो संयोगसमवायादिव्यावृत्तिः **तथा च** स्वत्वादिसम्बन्धेन प्रकृत्यर्थाभावबोधने च। **नोक्तातिप्रसङ्ग** इति। यत्र चैत्रस्येदमिति व्यवहारः न तत्र नेदं चैत्रस्येति व्यवहार इत्यर्थः। स्वत्वसम्बन्धावच्छिन्न- प्रतियोगिताकचैत्राभावविरहादिति भावः। स्वत्वस्य षष्ठ्यर्थत्वे द्वयोरिदं नैकस्येत्यादौ बोधमुपपादयति। **तथाहीति स्वनिरूपकेति।** स्वं विशेष्यीभूतं स्वत्वम्। **तत्र** उभयस्वामिकधने। **सर्वत्र।** अयमेको गच्छतीत्यादौ। समभिव्या- हृतपदार्थो गमनकर्तृत्वं तत्संसर्गी इदं पदार्थः तन्निष्ठभेदाप्रतियोगित्वस्य चैत्रे सत्त्वादित्यर्थः। तथा च स्वार्थान्वयितावच्छेदकधर्मावच्छिन्नोद्देश्यता- निरूपितविधेयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नवन्निष्ठभेदाऽप्रतियो- गित्वावच्छिन्ने एकपदस्य शक्तिरिति भावः। स्वं एकपदम्। **तथाविधं चेति।** स्वनिरूपकनिष्ठभेदाप्रतियोगिनिरूपितं चेत्यर्थः। **तन्निरूपकस्येति।**

एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यं प्रतिज्ञेति निरस्तम्।

ननु प्रतिज्ञा न साधनाङ्गं विप्रतिपत्तेः पक्षपरिग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेत्, न, विप्रतिपत्त्यग्रे हि समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनो वाकाङ्क्षायां शब्दानित्यत्वं साध्यं, न च साध्यनिर्देशं विना हेतुप्रवाक्यं निष्प्रतियोगिकमन्वयं बोधयितुमीष्टे। न च वादिवाक्येऽनुपस्थितमपि योग्यतया

स्वत्वनिरूपकस्येत्यर्थः। एवमग्रेऽपि। **तथाविधेति** स्वनिरूपकनिष्ठेत्यर्थः **तादृशेति**। एकमात्रनिरूपितेत्यर्थः। **अबाधित** इति। तथा चोभयनिरूपितस्वत्ववदिदं स्वनिरूपकनिष्ठभेदाप्रतियोगिनिरूपितस्वत्वाभाववदिति "द्वयोरिदं नेदमवस्येति वाक्याद्बोधः स्वत्वस्य विशेष्यत्वपक्षे। अगतिं दर्शयति। **स्वत्वसम्बन्धेनेत्यादिना। स्वस्वामिनिष्ठेति**। निरूपकस्थाने स्वामिपदं योजनीयम्। **तत्र** एकपदार्थे। **प्रमेयमात्रस्यैवेति** अस्य प्रतियोगित्वादित्यनेनाऽन्वयः। **यदीति स्वमित्यनुवर्तते तस्य** धनान्तरस्य। **व्युत्पत्तिभङ्ग** इति। इदमा तस्याऽबोधनात्। यदि सम्बन्धभूतत्वत्वाश्रयस्वामिनिष्ठभेदाप्रतियोगी एकपदार्थस्तदाप्याह। **एकमात्रेति व्यवहारानुपपत्तिश्चेति**। यत्किञ्चिद्धनं न प्रत्येकसाधारणं किञ्चिच्चासाधारणं तत्र यदसाधारणं तत्स्वामिनिष्ठभेदाप्रतियोगी एकोऽपि भवति स्वत्वसम्बन्धेन तदभावो नोभयधने इति भावार्थः।

अथात्र त्रयाणामिदं न द्वयोरित्यत्र कीदृशो बोधः, सजातीयतृतीयराहित्यदस्य दुर्वचत्वादिति चेन्न। तस्य तत्र स्वनिरूपकनिष्ठभेदप्रतियोगितानवच्छेदकीभूतप्रकृत्यर्थतावच्छेदकरूपत्वात्। **एतदभिप्रायेणैवेति** सजातीयद्वितीयराहित्यमेकपदार्थ इत्यभिप्रायेणैवेत्यर्थः। ननु एतावता षष्ठ्यर्थस्य प्रकृत्यर्थविशेष्यतया भानसिद्धावपि पञ्चम्यर्थहेतुत्वस्य विशेष्यत्वं नायातमत

अन्वेति, अतिप्रसङ्गात्। न च विप्रतिपत्तितः साध्योपस्थितिः, तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरितत्वात् परविप्रतिपत्तिं समयबन्धञ्च विना स्थापनाया अभावात् विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण पर्य्यवसितत्वेन निराकाङ्क्ष-त्वाच्च, आवृत्तौ तु सैव प्रतिज्ञा। न चावयवान्तराद्धेत्वन्वययोग्या साध्योपस्थितिः, नाप्यवयवान्तरेणाक्षेपात्, साध्यान्वये तदभिधानं तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात्। तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेहाक्षेपः।

आह। **दीधितौ इत्यादाविति** तथा च पर्वतो वह्निमान् धूमान्न तु जलादित्यादौ वह्न्यादेर्जलादिज्ञाप्यत्वाभावानुरोधादेव तथात्वमिति भावः। **चैत्रादिसम्बन्धाभावबोधस्येति। अत्र** मैत्रादिसम्बन्धाभावबोधस्येति पाठः सम्यक्, तस्यैव पूर्वमुक्तत्वात्। चैत्रादिसम्बन्धाभावेति पाठस्तु चैत्रादिसम्बन्धस्य सान्निध्यात्तदभावस्य बोधग्रहेण सङ्गमनीयः। केचित्तु चैत्रस्येदं न किन्तु मैत्रस्येति योजनया चैत्रसम्बधाभावस्यैव बोधप्रक्रान्तः इति प्राहुः।

अत्र सजातीयद्वितीयान्तर्गतैकनिरूपितस्वत्वाभावपरतयापि द्वयोरिदं नैकस्येति व्यवहार आनुभविकस्तन्निर्वाहाय वक्ष्यमाणप्रकारादरे च दीधितिकारीयस्वत्वसंसर्गतामतदूषणस्याप्युद्धारो भवतीत्याशयेन दूषयति **इदमत्रावधेयमिति** द्वयोरिदं नेदमेकस्येति वाक्यद्वयसमूहालम्बनाभिप्रायेण। **नामार्थप्रतियोगिकाभावबोधे एवेति।** एवकारेण विभक्त्यर्थ-प्रतियोगिकाभावबोधस्य व्यवच्छेदः। **सप्तम्यपेक्षणादिति** अन्यथा घटःपटो नेत्यादावपि पटात्यन्ताभावप्रतीतिप्रसङ्गादिति भावः। **यथाश्रुतलिङ्ग-विषयकत्वनिवेशे** इति उपनयवारणायेत्यादिः। **दाधितौ-हेतुविषयकेत्यादि।** हेतुविषयकज्ञानजनकत्वव्याप्यं यदवयवतावच्छेदकं तच्छून्यत्वे सतीत्यर्थः। हेतुविषयकज्ञानजनकत्वसमानाधिकरणप्रतिज्ञात्वमादायाऽसम्भवः स्यादतोव्याप्यपदमित्याह। **कासाञ्चित्प्रतिज्ञानामिति।** गन्धवती इतरेभ्यो भिद्यते इत्यादिप्रतिज्ञानामित्यर्थः। **अनियतत्वात्** अव्याप्यत्वात्। **तन्नियतेति।** हेतुविषयकज्ञानजनकत्वनियतेत्यर्थः। **तादृशेति।** हेतुविषयकेत्यर्थः। **अभावहेतुकव्यतिरेक्युहाहरणस्येति।** गोत्वं सास्नाभाववदित्यत्र यत्र सास्ना

अन्ये तु(१२) शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा किन्तु विशिष्टे, विशिष्टन्तु विशेषणं साध्यमनभिधाय न शक्याभिधानं। न च वस्तुतो यत्साध्यं तत्र प्रमाणं वदेति मध्यस्थनियोगः, वादिद्वयमध्ये तदसम्भवात् तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा, न वान्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति।

तत्र गोत्वमित्युदाहरणस्येत्यर्थः। **तादृशेति।** हेतुविषयकेत्यर्थः। **अनियतत्वादिति।** अव्याप्यत्वादित्यर्थः हेतुविषयकज्ञानजनकत्वव्याप्यावयवतावच्छेदकरूपशून्यत्वादिति यावत्। उदासीनव्युदासाय न्यायावयवेति। **दीधितौ–तादृशावच्छेदकं चेति।** हेतुविषयकज्ञानजनकत्वव्याप्यावयवतावच्छेदकमित्यर्थः। **अतथात्वादिति।** हेतुविषयकज्ञानजनकत्वाऽनियतत्वादित्यर्थः। **अव्याप्तिमाशंक्येति।** जिज्ञासानुपधायकप्रतिज्ञायामव्याप्तिमशङ्क्येत्यर्थः। **दीधितौ–न्यायावयवत्वमिति।** एतेन वाक्यपदोपादानेऽपि प्रतिज्ञैकदेशस्यापि तादृशवाक्यत्वात्तत्रातिव्याप्तिरिति निरस्तम्। **न तथात्वसम्भवः।** न लिङ्गाविषयकत्वसम्भवः। लिङ्गिपदस्य पक्षपरत्वे पूर्वस्मादभेदापत्तिरतो व्याचष्टे। **दीधितौ–लिङ्गि–साध्यमिति।** यद्यपि लिङ्गाविषयकमित्यनेन लिङ्गवद्विशेष्यकमित्येव व्याख्यातुमुचितं तावतैवाग्रिमदोषव्युदासात्तथापि अग्रिमव्याख्यायां लिङ्गिपदस्य साध्यपरत्वार्थे ग्रन्थगौरवापत्तिभियैवाऽत्र लिङ्गि साध्यमित्युक्तम्।

दीधितौ। तेन। साध्यवन्मुख्यविशेष्यकत्वविवक्षणेन। अन्यथा इदं जलमित्यादिस्थलीयस्य यन्न जलं तन्निःस्नेहत्वप्रकारकप्रमाविषय इत्युदाहरणस्यापि जलत्वं साध्यं जलं च साध्यवत्तमवगाहमानत्त्वात्तत्रातिप्रसङ्गापत्तेरिति भावः। स्नेहत्वप्रकारकप्रमाविषयत्वस्य हेतुत्वे उदाहरणस्य लिङ्गाविषयकत्वदलेनैव वारणसम्भवान्निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावो हेतुरुक्तः। **तच्च** तत्प्रकारकप्रमाविषयत्वशून्यत्वं च। **तत्प्रकारकेति।** जलान्यत्वप्रकारकेत्यर्थः। **तच्छून्यत्वस्य।** जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वस्य। **प्रथमसाध्ये जलत्वसाध्ये। तदुपेक्षितमिति।** जलान्यत्वप्रकारक–

प्रमाविषयत्वशून्यत्वमुपेक्षितमित्यर्थः। **निःस्नेहतयेति।** तथाचोत्पत्तिकालावच्छेदेन जले निःस्नेहत्वप्रकारकप्रमाविषययत्वाभावरूपहेतोरभावाद् भागासिद्धिरिति स्थलान्तरानुसरणमिति भावः। केचित्तु शीतस्पर्शादिसमवायिकारणतावच्छेदकतया सिद्धजलत्वजातेर्द्व्यणुकपर्यन्तस्थायित्वमते जलारम्भकपरमाणौ उक्तहेतोः साध्यव्यभिचारादाह। **इदं द्रव्यमिति प्राहुः। उक्तत्युक्त्या।** साध्यभूतजलत्वस्य सन्दिग्धत्वे जलान्यत्वस्यापि सन्दिग्धतया सन्दिग्धो हेतुरिति युक्त्या। द्रव्यत्वसाध्यानुसरणे बीजान्तरमाह। **यत्त्विति। अन्यत्वप्रतियोगिता-वच्छेदकतयेति।** भेदप्रतियोगितावच्छेदकतयेत्यर्थः। **असङ्गते**रिति अतिव्याप्तिदानाऽसङ्गतेरित्यर्थः। लिङ्गाऽविषयकत्वविरहादिति भावः। अपरे तु निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावो जलत्वमेव स्नेहानामनन्तत्वेन तथात्वायोगात्, तथा च यन्न जलमित्युदाहरणस्य जलत्वलिङ्गविषयकत्वादेव नातिप्रसङ्गः अतः स्थलान्तरमाह। **इदं द्रव्यमितीत्याहुः।** तच्चिन्त्यम्। निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावस्यातिरिक्तत्वात्। अन्यथा तुल्यन्यायेन जलान्यत्वप्रकारकप्रमाविषयत्वाभावास्यापि जलत्वरूपत्वे यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्यापि जलत्वरूपलिङ्गविषयकत्वेनैव वारणसम्भवादित्युक्तमेवोपरिष्टात्। **दीधितौ—नातिप्रसङ्ग इति।** तथा चोक्तस्थलीयस्य यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्य द्रव्यत्वरूपसाध्यविषयकबोधजनकत्वेऽपि तद्वन्मुख्यविशेष्यकत्वाभावादिति भावः। **तत्र** उदाहरणे। **लिंगिविषयकत्वविशेषणेति।** साध्यवत्पक्षमुख्य-विशेष्यकत्वविशेषणेत्यर्थः। **तन्मते** व्याप्त्यविषयकत्वस्य लिङ्गाविषयक-पदार्थत्वमते। **उक्ताऽनुगतरूपेति।** प्रकृतपक्षसाध्यकानुमितित्वावच्छिन्न-जन्यतानिरूपितजनकतानिरूपितावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणं यत्पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितविषयतानिरूपितविषयता-निरूपितविषयतानिरूपितविषयतात्वं तद्रूपविशिष्टविषयतात्वावच्छिन्नेत्यर्थः। **इतरेषाम्।** उदाहरणोपनयनिगमनानां।

ननु साध्यवद्विशेष्यकत्वरूपस्य लिङ्गिविषयकत्वस्य निवेशे घटः प्रमेयो द्रव्यत्वादित्यादौ हेतावतिव्याप्तिः, पञ्चम्यर्थस्यापि प्रमेयत्वेन साध्यवत्त्वादतः साध्यतावच्छेदकरूपेण साध्यविषयकत्वरूपं तद्वाच्यम्। तच्च वह्निमान् वह्निसामग्रीमत्वादित्यादिहेतावतिप्रसक्तमित्यत आह। **लिङ्गिविषयकत्वं** चेति।

न च साध्यवद्विशेष्यकत्वविरहेण नातिव्याप्तिरिति वाच्यम्। अनुपदमेव स्वयं वक्ष्यमाणत्वात्। तथा च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्ट-हेतुत्वविषयताबहिर्भूतसाध्यविषयकत्वं लिङ्गिविषयकत्वम्। **साध्यस्य हेतुतावच्छेदकरूपत्वे** अयं वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ। **तादृशेति।** हेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वेत्यर्थः। **पूर्ववन्निर्वाच्य** इति। प्रकृतहेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वावच्छिन्नविशेष्यताशालिनिश्चयत्व-व्यापकप्रतिबन्धकतानवच्छेदकत्वमित्यर्थः। **तादृशविषयताबहिर्भूतेति** हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुविशिष्टहेतुत्वविषयताबहिर्भूतेत्यर्थः। **विषयतामात्रनिवेशेनैवेति।** विषयताशालिबोधजनकत्वनिवेशेनैवेत्यर्थः। मात्रपदेन साध्यव्यावृत्तिः। **तादृशविषयताबहिर्भूतेति** हेतुतावच्छेदकविशिष्टहेतुविशिष्ट-हेतुविशिष्टहेतुत्वविषयताबहिर्भूतेत्यर्थः। **साध्यविषयताभिन्नत्वस्यैवेति।** तथा च तादृशसाध्यविषयताभिन्नसाध्यविषयता-शालित्वं लिङ्गिविषयकत्वम्। एवकारेण बहिर्भूतविषयताव्यावृत्तिः। अनुयोगिकोटिप्रविष्टसाध्यांशनिवेशनं समर्थयति। **दर्शितहेताविति।** वह्निसामग्रीमत्त्वहेतावित्यर्थः। **तादृशेति** तादृशविषयताबहिर्भूतेत्यर्थः। **तत्सार्थक्यात्।** साध्यांशनिवेशसार्थक्यात्। **अवैयर्थ्यात्।** सार्थक्यात्। वह्निमान् धूमादित्यादौ हेतुतावच्छेदक-विशिष्टहेतुविशिष्टहेतुत्वविषयतान्तर्भूतसाध्यविषयत्वाप्रसिद्ध्याऽ-व्याप्तिमाशंक्याह। **यत्र चेति।** सर्वत्रैकशब्दाभिलप्यं लक्षणमाह। **तादृशेति।** हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वेत्यर्थः। तादृशोभयाभावविशिष्ट-साध्यविषयताशालित्वं लिङ्गिविषयकत्वम्। हेतुतावच्छेदकावच्छिन्नेत्यस्य फलमाह **दीधितौ वह्निमानित्यादि हेतौ नातिप्रसङ्ग इति।** हेतोः हेतुविशिष्टहेतुत्वविषयताबहिर्भूतसाध्यविषयिताकत्वविरहादिति भावः। **अक्षतमेवेति।** ननु साध्यतावच्छेदकविशिष्टसाध्यविषयकत्वविरहान्नाति-व्याप्तिरित्यत आह। **अविवक्षितत्वादिति। व्यावृत्तिसङ्गतिरिति।** तथा च हेतुविषयतायाः साध्यतावच्छेदकक्रान्तत्वेऽपि हेतुविषयताबहिर्भूतत्व-विरहान्नातिव्याप्तिरिति भावः। विशिष्टविषयताबहिर्भावश्च न बहिर्भावत्रयं किन्तु एक एव; तथा च साध्यतावच्छेदकावच्छिन्नविषयतानिवेशमते हेतुतावच्छेदकबहिर्भूतत्वहेतुत्वबहिर्भूतत्वयोरावश्यकत्वेन गौरवमिति विशिष्टविषयतया बहिर्भावनिवेश इत्याशयेनाह। **विशिष्टेति।** हेत्वंशमनिवेश्य

विशिष्टस्य दुर्निवेशतया विशिष्टनिवेशे तन्निवेशादित्याह। **स्वातन्त्र्येणेति। गौरवादिति।** हेतुतावच्छेदकप्रविष्टसाध्यकप्रतिज्ञायामव्याप्तिश्च बोध्या तादात्म्येन प्रमेयसाध्यकं द्रव्यसाध्यकं धूमादित्यादिकं न्यूनतापरिहाराय दर्शयति। **एवं चेति।** ननु लिङ्गिविषयकेत्यस्य साध्यवन्मुख्यविशेष्यकत्वार्थकत्वं परित्यज्य दर्शित विषयताबहिर्भूतसाध्यविशेष्यकत्वरूपगुरुतराम्भः किमर्थम् इत्यत आह। **लिङ्गिविषयकेति। अतिप्रसङ्गवारणसम्भवेऽपीति।** साध्ववन्मुख्य-विशेष्यकत्वविरहादिति भावः। **पञ्चम्यर्थस्य।** हेतुत्वस्य। **साध्यवत्तया।** वास्तविकेत्यादिः। **हेतुत्वत्वसाध्यकस्थल इति।** हेतुत्ववत् तेन प्रतीयमानत्वादित्यत्र हेतावित्यर्थः। जनकता ज्ञानवती तत्वेन प्रतीयमानत्वादित्यत्र न हेतावित्यर्थः। **धर्मपरतां।** लिङ्गत्वपरतां। **दर्शितव्यतिरेक्युदाहरणे।** यन्न जलं तन्निःस्नेहत्वप्रकारकप्रमाविषय इत्यत्र च यन्न द्रव्यं तज्जलान्यत्व-प्रकारकप्रमाविषय इत्यत्र च। **व्युतिरेक्युदाहरणे।** एवं वह्निमान् वह्निसामग्रीमत्वादित्यत्र हेतौ। गन्धवतीतरेभ्यो भिद्यते इत्यत्र प्रतिज्ञायाम् इत्यपि बोध्यम्। **अतिव्याप्तिं।** अव्याप्तिमित्यपि बोध्यम्। **निगमनस्येति।** वारणाय **लिङ्गिविषयकज्ञानजनकत्वानियतेति।** तादृशजनकत्वाव्याप्येत्यर्थः। उपनयत्वस्य तादृशजनकताव्याप्यत्वाद्वारणम् प्रतिज्ञात्वस्यापि गन्धवती इतरेभ्यो भिद्यते गन्धादित्यत्र लिङ्गज्ञानजनकत्वसमानाधिकरणत्वादनियतान्तम्। **उदाहरणस्य चेति लिङ्गिविषयज्ञानजनकत्वनियतेति।** .साध्यवत्पक्ष-विषयकज्ञानजनकत्वव्याप्येत्यर्थः। अत्रापि सामानाधिकरण्यप्रवेशे उदाहरण-विशेषेऽतिव्याप्तिर्बोध्या। हेतूपनययोस्तु एकतरविशेषणेनापि वारणात्त्यागः। तथा च लिङ्गिविषयकज्ञानजनकत्वनियतावयवतावच्छेदकरूपवत्त्वमात्रोक्तौ निगमने, लिङ्गिविषयकज्ञानजनकत्वानियतावयवतावच्छेदकरूपवत्त्वमात्रोक्तौ चोदाहरणेऽतिव्याप्तिरिति दलद्वयनिवेशनमिति समुदितार्थः। **असम्भवाति-प्रसङ्गाविति।** लिङ्गिविषयकज्ञानजनकत्वा नियतेत्यत्र सामानाधिरण्य-प्रवेशेऽसम्भवः। दलान्तरे सामानाधिकण्यप्रवेशे तूदाहरणेऽतिव्याप्तिरित्यर्थः। इदं जलं निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावादित्यादौ यन्न जलं तन्निःस्नेहत्वप्रकारकप्रमाविषय इत्युदाहरणे तत्तदुदाहरणत्वमादायाऽति-प्रसङ्गवारणायावयवतावच्छेदकेति। **निरुक्तस्यापीति।** तादृशावयवता-वच्छेदकरूपस्यापीत्यर्थः। **आत्माश्रयेति।** अवयवतावच्छेदत्त्वविशिष्टविशिष्ट-

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जक-विभक्तिमल्लिङ्गवचनमेवोचितं अन्यथानाकाङ्क्षिताभिधाने

अनुमितीत्यादि। जनकान्तं न्यायावयवार्थकम्। निगमनवारणाय साध्याविषयकेति।

निगमनवारणायेति। प्रतिज्ञोदाहरणोपनयविशेषाणां विवक्षणीयहेतु-विभक्तिमत्त्वविशेषणेन वारणसम्भवान्न तदुक्तम्—ननु साध्याविषयक-बाधजनकत्वनिवेशे वह्निमान् वह्निसामग्रीमत्त्वादित्याद्युक्तहेतावव्याप्तिरत आह। साध्याविषयकत्वं चेति। बहिर्भावेणेति। विवक्षणीयमिति शेषः। साध्यांशोपादानं हेतुविभक्तिमत्त्वदलसार्थक्याय।

रूपग्रहोऽपेक्षित इत्याशयः। **तथाविधेति।** तादृशावयवतावच्छेदके। तच्च रूपमिति। अवयवतावच्छेदकरूपस्यापीत्यर्थः। **तच्च रूपमिति।** तादृशावयवतावच्छेदक-रूपमित्यर्थः। तथाविधरूपान्तरपरिचयवतामेव लक्षणस्य सुग्रहतेत्यत आह। **तथाचेति** तादृशवाक्यत्वस्य तादृशरूपत्वेन। **तस्यैव** तादृशवाक्यत्वस्यैव। **तद्घटकस्य।** तादृशावच्छेदकवत्त्वघटकस्य। **व्यर्थविशेषणतेति।** तादृशावयवतावच्छेदकस्येत्यादिः। **तन्निवेशस्य** तादृशवाक्यत्वनिवेशस्य। स्वयं दूषणान्तरमाह। **अत्र चेति।**

केचित्तु साध्यपक्षविशेषनियन्त्रितं न प्रतिज्ञात्वं तथासति प्रतिज्ञापदस्य नानार्थता स्यात्, किन्तु जातिविशेषः, शक्यतावच्छेदकतया जातिसिद्धेरिति वदन्ति। तन्मतं दूषयति। **मूले-प्रतिज्ञात्वमिति।** अत्र च प्रतिज्ञापद-प्रवृत्तिनिमित्तत्वेन पक्षता। प्रतिज्ञापदप्रवृत्तिनिमित्तत्वं चोभयवादिसिद्धमेव, तत्र जातिरूपाधिर्वेति विवादात् नाश्रयासिद्धिः। **अनुगतेति।** प्रतिज्ञेत्या-कारकहेत्वादिव्यावृत्ततान्त्रिकानुगतबुद्धिजनकत्वादित्यर्थः। न च जातेर्व्यासज्य-वृत्तित्वविरहादेकैकपदेऽपि प्रतिज्ञात्वजातेर्व्यवहारापत्तिरिति वाच्यम्। प्रतिज्ञाघटकतत्तदानुपूर्वीव्यङ्ग्यत्वस्य तादृशजातौ स्वीकारात्। अनतिप्रसक्त-पदोपादानं च न्यायबहिर्भूतप्रतिज्ञासमानाकारकवाक्यवारणाय। **तान्त्रिकेति।** शक्यतावच्छेदकतैव जाति-साधिका, व्यवहारस्तु तान्त्रिकेषु प्रसिद्ध इति भावः। **देवदत्तप्रभवत्वादिनेति।** देवदत्तप्रभवतावच्छेदकवैजात्येनेत्यर्थः।

पुरुषविशेषजन्यतावच्छेदकवैजात्येनेति यावत्। अथैतद्वैजात्यं देवदत्तप्रभवपञ्चाशद्वर्णानुगतं–तथा चैतद्वैजात्यं विहाय प्रतिज्ञात्वं यज्ञदत्तोच्चरितप्रतिज्ञायां। प्रतिज्ञात्वं विहाय निरुक्तवैजात्यमुदासीनवर्णे, देवदत्तोच्चारितप्रतिज्ञायां च तद्द्वयसमावेशरूपसंकर इति न सम्भवति, निरुक्तवैजात्यस्यैव सिद्धान्तेऽङ्गीकर्तुमशक्यत्वात्। तस्य पञ्चाशद्वर्णानुगततया कत्व-गत्वादिना संकरात्। तादृशवैजात्यं विहाय कत्वादि यज्ञदत्तोच्चरितककारादौ कत्वादिकं विहाय तादृशवैजात्यं देवदत्तोच्चरितखकारादौ देवदत्तोच्चरितककारादौ कत्वतादृशवैजात्ययोः समावेशात्। यदि च पञ्चाशद्वर्णेषु देवदत्तप्रभवतावच्छेदकवैजात्यमेकमनुगतं न स्वीक्रियते येनोक्तदोषः स्यात् किन्तु देवदत्तमात्रोच्चरितककारमात्रसामान्ये एव। एवं च देवदत्तमात्रोच्चरितककारसामान्यवृत्तिवैजात्यं विहाय प्रतिज्ञात्वस्य यज्ञदत्तोच्चारितप्रतिज्ञादौ प्रतिज्ञात्वं तादृशवैजात्यस्य देवदत्तमात्रोच्चरितककारे सत्त्वात्, देवदत्तोच्चरितककारघटितप्रतिज्ञायामुभयोः समावेश इति सांकर्यमुच्यते–तदा कत्वादिकमादायैव प्रतिज्ञात्वस्य सांकर्यं सम्भवति–कत्वं विहाय प्रतिज्ञात्वं ककाराऽघटितप्रतिज्ञायां प्रतिज्ञात्वं विहाय कत्वमुदासीनककारे ककारघटितप्रतिज्ञायामुभयोः समावेशादिति देवदत्तप्रभवत्वानुधावनमसङ्गतमेवेति चेत्–मैवम्–प्रतिज्ञात्वस्य जातित्ववादिभिरेकदेशाऽतिव्याप्तिवारणाय व्यासज्यवृत्तित्वं स्वीकार्यम्। आंशिकत्वं च न दोषाय तुल्ययुक्त्या परिकल्प्यम्। एवमपि न्यायान्तर्गतपर्वतो वह्निमानिति वाक्यत्वमुदासीनपर्वतो वह्निमानिति वाक्यसाधारणं देवदत्तमात्रोच्चरितपर्वतो वह्निमानिति वाक्यवृत्ति एकं, एवं च देवदत्तमात्रोच्चरितवाक्यवृत्तितादृशवैजात्यं विहाय प्रतिज्ञात्वं यज्ञदत्तोच्चरितपर्वतो वह्निमानिति प्रतिज्ञायां प्रतिज्ञात्वं तादृशवैजात्यं च देवदत्तोच्चरितपर्वतोवह्निमानिति वाक्ये तदुभयसमावेशेन देवदत्तोच्चरितन्यायान्तर्गतपर्वतो वह्निमानिति प्रतिज्ञायां कल्पितवैजात्यमपि व्यासज्यवृत्त्येवेति एकधर्मावच्छिन्नपर्याप्तत्वं न वैकत्र समावेश इति कल्पितवैजात्यानुसरणम्। एवं च कल्पितवैजात्यस्य प्रतिज्ञात्वस्य च कत्वादिना सह नैकधर्मावच्छिन्नपर्याप्तत्वरूप एकत्र समावेशः। कत्वादिनामव्यासज्यवृत्तित्वादिति न तत्सांकर्यावकाशः। **उक्तस्येति।** अस्मदुक्तलक्षणस्येत्यर्थः। **एतेनेति** अनुगतजनकतावच्छेदकरूपं विना तज्जनकत्वतद्ग्रहयोरसम्भवेनेत्यर्थः। वृत्त्यन्तमवृत्त्यन्तं च परिचायकं,

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचितं अन्यथानाकाङ्क्षिताभिधाने

अनुमितीत्यादि। जनकान्तं न्यायावयवार्थकम्। निगमनवारणाय साध्याविषयकेति।

निगमनवारणायेति। प्रतिज्ञोदाहरणोपनयविशेषाणां विवक्षणीयहेतुविभक्तिमत्त्वविशेषणेन वारणसम्भवान्न तदुक्तम्—ननु साध्याविषयकबाधजनकत्वनिवेशे वह्निमान् वह्निसामग्रीमत्त्वादित्याद्युक्तहेतावव्याप्तिरत आह। साध्याविषयकत्वं चेति। बहिर्भाविणेति। विवक्षणीयमिति शेषः। साध्यांशोपादानं हेतुविभक्तिमत्त्वदलसार्थक्याय।

रूपग्रहोऽपेक्षित इत्याशयः। **तथाविधेति**। तादृशावयवतावच्छेदके। तच्च रूपमिति। अवयवतावच्छेदकरूपस्यापीत्यर्थः। **तच्च रूपमिति**। तादृशावयवतावच्छेदकरूपमित्यर्थः। तथाविधरूपान्तरपरिचयवतामेव लक्षणस्य सुग्रहतेत्यत आह। **तथाचेति** तादृशवाक्यत्वस्य तादृशरूपत्वेन। **तस्यैव** तादृशवाक्यत्वस्यैव। **तद्घटकस्य**। तादृशावच्छेदकवत्त्वघटकस्य। **व्यर्थविशेषणतेति**। तादृशावयवतावच्छेदकस्येत्यादिः। **तन्निवेशस्य** तादृशवाक्यत्वनिवेशस्य। स्वयं दूषणान्तरमाह। **अत्र चेति**।

केचित्तु साध्यपक्षविशेषनियन्त्रितं न प्रतिज्ञात्वं तथासति प्रतिज्ञापदस्य नानार्थता स्यात्, किन्तु जातिविशेषः, शक्यतावच्छेदकतया जातिसिद्धेरिति वदन्ति। तन्मतं दूषयति। **मूले-प्रतिज्ञात्वमिति**। अत्र च प्रतिज्ञापदप्रवृत्तिनिमित्तत्वेन पक्षता। प्रतिज्ञापदप्रवृत्तिनिमित्तत्वं चोभयवादिसिद्धमेव, तत्र जातिरूपाधिर्वेति विवादात् नाश्रयासिद्धिः। **अनुगतेति**। प्रतिज्ञेत्याकारकहेत्वादिव्यावृत्ततान्त्रिकानुगतबुद्धिजनकत्वादित्यर्थः। न च जातेर्व्यासज्यवृत्तित्वविरहादेकैकपदेऽपि प्रतिज्ञात्वजातेर्व्यवहारापत्तिरिति वाच्यम्। प्रतिज्ञाघटकतत्तदानुपूर्वीव्यङ्ग्यत्वस्य तादृशजातौ स्वीकारात्। अनतिप्रसक्तपदोपादानं च न्यायबहिर्भूतप्रतिज्ञासमानाकारकवाक्यवारणाय। **तान्त्रिकेति**। शक्यतावच्छेदकतैव जाति-साधिका, व्यवहारस्तु तान्त्रिकेषु प्रसिद्ध इति भावः। **देवदत्तप्रभवत्वादिनेति**। देवदत्तप्रभवतावच्छेदकवैजात्येनेत्यर्थः।

पुरुषविशेषजन्यतावच्छेदकवैजात्येनेति यावत्। अथैतद्वैजात्यं देवदत्त-प्रभवपञ्चाशद्वर्णानुगतं–तथा चैतद्वैजात्यं विहाय प्रतिज्ञात्वं यज्ञदत्तोच्चरित-प्रतिज्ञायां। प्रतिज्ञात्वं विहाय निरुक्तवैजात्यमुदासीनवर्णे, देवदत्तोच्चारितप्रतिज्ञायां च तद्द्वयसमावेशरूपसंकर इति न सम्भवति, निरुक्तवैजात्यस्यैव सिद्धान्तेऽङ्गीकर्तुमशक्यत्वात्। तस्य पञ्चाशद्वर्णानुगततया कत्व-गत्वादिना संकरात्। तादृशवैजात्यं विहाय कत्वादि यज्ञदत्तोच्चरितककारादौ कत्वादिकं विहाय तादृशवैजात्यं देवदत्तोच्चरितखकारादौ देवदत्तोच्चरितककारादौ कत्वतादृशवैजात्ययोः समावेशात्। यदि च पञ्चाशद्वर्णेषु देवदत्तप्रभवता-वच्छेदकवैजात्यमेकमनुगतं न स्वीक्रियते येनोक्तदोषः स्यात् किन्तु देवदत्तमात्रोच्चरितककारमात्रसामान्ये एव। एवं च देवदत्तमात्रोच्चरित-ककारसामान्यवृत्तिवैजात्यं विहाय प्रतिज्ञात्वस्य यज्ञदत्तोच्चारितप्रतिज्ञादौ प्रतिज्ञात्वं तादृशवैजात्यस्य देवदत्तमात्रोच्चरितककारे सत्त्वात्, देवदत्तोच्चरित-ककारघटितप्रतिज्ञायामुभयोः समावेश इति सांकर्यमुच्यते–तदा कत्वादिकमादायैव प्रतिज्ञात्वस्य सांकर्यं सम्भवति–कत्वं विहाय प्रतिज्ञात्वं ककाराऽघटितप्रतिज्ञायां प्रतिज्ञात्वं विहाय कत्वमुदासीनककारे ककारघटितप्रतिज्ञायामुभयोः समावेशादिति देवदत्तप्रभवत्वानुधावनमसङ्गतमेवेति चेत्–मैवम्–प्रतिज्ञात्वस्य जातित्ववादिभिरेकदेशाऽतिव्याप्तिवारणाय व्यासज्यवृत्तित्वं स्वीकार्यम्। आंशिकत्वं च न दोषाय तुल्ययुक्त्या परिकल्प्यम्। एवमपि न्यायान्तर्गतपर्वतो वह्निमानिति वाक्यत्वमुदासीनपर्वतो वह्निमानिति वाक्यसाधारणं देवदत्तमात्रोच्चरितपर्वतो वह्निमानिति वाक्यवृत्ति एकं, एवं च देवदत्तमात्रोच्चरितवाक्यवृत्तितादृशवैजात्यं विहाय प्रतिज्ञात्वं यज्ञदत्तोच्चरित-पर्वतो वह्निमानिति प्रतिज्ञायां प्रतिज्ञात्वं तादृशवैजात्यं च देवदत्तोच्चरितपर्वतो-वह्निमानिति वाक्ये तदुभयसमावेशेन देवदत्तोच्चरितन्यायान्तर्गतपर्वतो वह्निमानिति प्रतिज्ञायां कल्पितवैजात्यमपि व्यासज्यवृत्त्येवेति एकधर्मावच्छिन्नपर्याप्तत्वं न वैकत्र समावेश इति कल्पितवैजात्यानुसरणम्। एवं च कल्पितवैजात्यस्य प्रतिज्ञात्वस्य च कत्वादिना सह नैकधर्मावच्छिन्नपर्याप्तत्वरूप एकत्र समावेशः। कत्वादिनामव्यासज्यवृत्तित्वादिति न तत्सांकर्यावकाशः। **उक्तस्येति।** अस्मदुक्तलक्षणस्येत्यर्थः। **एतेनेति** अनुगतजनकतावच्छेदकरूपं विना तज्जनकत्वतद्ग्रहयोरसम्भवेनेत्यर्थः। वृत्त्यन्तमवृत्त्यन्तं च परिचायकं,

तेनैकदेशस्य प्रतिज्ञातदितरसमुदायस्य च व्युदासः। **साधनाङ्गम्।** न्यायघटिका। **पक्षपरिग्रहे** पक्षे साध्यग्रहे। शब्दाऽनित्यत्वादिकोटिपरिग्रहे सतीति यावत्। **तत्र।** साध्ये। **प्रमाणाकाङ्क्षायां।** ज्ञापकाकाङ्क्षायां। **प्राथम्यात्** प्रथममुचितत्वात्। **समयबन्धः।** सदृष्टान्तोदाहरणेन शब्दानित्यत्वं साधनीयमित्यादिसंकेताभिप्रायः। **शब्दाऽनित्यत्वं साधयेत्याकाङ्क्षायां** शब्दाऽनित्यत्वं कथमिति प्रश्ने। **वादिनः** प्रतिवादिनः। यद्यपि विप्रतिपत्तिः तत्संशयोत्तरं पर्वते वह्निनिर्णयो जायतामित्येकतरकोटिकनिर्णयेच्छैव युक्ता तथापि प्रतिवादिवन्मध्यस्थस्यापि पर्वतस्य वह्न्यभाववत्व एव निर्भरत्वात्को वह्निमानित्येवाकाङ्क्षेति प्रदर्शनाय वादिन इत्यस्याप्यभिधानम्। तथा चाऽनित्यः क इत्येवाकाङ्क्षा बोध्या। यद्वा हेत्वर्थान्वयाय यदि साध्यवानित्येव प्रतिजानीयात्तदा को वह्निमानिति जिज्ञासा स्यादतः पक्षः साध्यवानिति प्रतिज्ञा कार्या इति दीधितिकाराभिप्रायः। **साध्यं**-हेतुपन्यासेन। **साध्यनिर्देशं।** साध्यस्य प्रतिज्ञां। **निष्प्रतियोगिकं।** निर्विशेष्यकं। तथा हेत्ववयवार्थस्य साध्येऽन्वयं विना जिज्ञासानिवृत्त्यसम्भवात्साध्योपस्थितये प्रतिज्ञाऽऽवश्यकीति भावः। **अतिप्रसङ्गात्।** पदानुपस्थितस्य विशेष्यतयाऽन्वये द्रव्यत्वावच्छिन्नेऽपि धूमादित्यादिहेत्ववयवार्थान्वयप्रसङ्गात्।

तस्याः। साध्योपस्थितेः। **प्रतिवादिविप्रतिपत्त्या।** उक्तविप्रतिपत्तिरभावकोटावेव प्रमाणमिति विरुद्धप्रतिपत्तिजनकवाक्येनेत्यर्थः। यदि च विप्रतिपत्तिपदं तदेकदेशपरं तदाविरुद्धकारकप्रतिवादिवाक्यमेव प्रतिवादिविप्रतिपत्तिरिति बोध्यम्। **प्रमाणादीति।** न्यायमतेन मया शब्दानित्यवे प्रमाणं वक्तव्यमित्यादिसमयबन्धेनेत्यर्थः। सर्वमिदं तयोरावश्यकत्वे स्यात्तदेव **नेत्यत आह। परेति निराकाङ्क्षत्वाच्चेति।** जनितान्वयबोधकत्वादिति भावः। ननु पक्षः साध्यवान्नवेति विप्रतिपत्त्येकदेशस्य पक्षः साध्यवानिति भागस्यैव पुनरावर्त्तनं कार्यमिति तदर्थे एव हेत्वर्थस्यान्वयो भविष्यति इति विफलः प्रतिज्ञोपगम इत्यत आह। **आवृत्ताविति** विप्रतिपत्त्येकदेशस्य पुनरावर्तने तु इत्यर्थः। **सैव।** आवृत्तिरेव। शङ्कते। **न चेति। अवयवान्तरात्।** उदाहरणादितः। **अतदर्थत्वात्।** हेत्वन्वययोग्यसाध्योपस्थापकत्वाभावात्। पक्षविशेषणतापन्नसाध्यस्यैव हेत्वन्वययोग्यत्वादिति भावः। **तदनुपस्थापनात्।** प्राक् निगमनोपस्थापनासम्भवात्। कथायामाकाङ्क्षाक्रमेणैवाभिधानादिति भावः।

साध्याऽविषयकत्वं च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतु-विशिष्टहेतुत्वविषयताबहिर्भावेण, पूर्वोपदर्शितसाक्षात्परंपरासाधारण-प्रकृतपक्षविशेषणत्वेन वा तेन पूर्वोपदर्शितहेतौ नाव्याप्तिः

अवयवान्तरेणेत्यादिमूलं क्वचिन्न दृश्यते। **अवयवान्तरेण।** उपनयेन व्यतिरेक्युदाहरणे साध्यवाचकपदाच्छंकायास्तुच्छत्वमित्युदाहरणत्यागः। **आक्षेपात्।** उपनयेन प्रतीतस्वार्थानुपपत्या साध्यवत्तया पक्षानुमानादित्यर्थः। तथा च तेन हेत्वन्वययोग्यसाध्योपस्थितिरिति भावः। **साध्यान्वये।** इति। साध्ये हेत्ववयवार्थान्वये उदाहरणानन्तरं साध्यव्याप्यवान् क इत्याकांक्षयोपनया-भिधानमित्यर्थः। दूषणान्तरमाह। **तस्मादिति।** उपनयादित्यर्थः। पक्षस्य साध्यवत्त्वं विनापि तद्व्याप्यवत्त्वप्रतीतिसम्भवादिति भावः। निबन्धनकृतां मतमाह। **अन्ये त्विति मध्यस्थस्येति।** इदमुपलक्षणम्। वादिनो वेत्यपि द्रष्टव्यम्। **अनुपयोगः।** प्रश्नः। **नाकाङ्क्षा।** न प्रश्नः। न च शब्दाऽनित्यत्वे प्रमाणं वदेति प्रश्नवाक्यादेव साध्योपस्थितिर्भविष्यतीति वाच्यम्। तदा धूमादिति पञ्चमी न स्यात्, किन्तु धूम इत्येव स्यात्। **विशिष्टे।** शब्दाऽनित्यत्वग्राहकत्वविशिष्टे। **न शक्याभिधानम्।** न विशिष्टबोधाभिप्रायप्रयुक्तहेत्ववयवेन बोधयितुं शक्यम्। वादीति। वादिप्रतिवादिनोः साध्यविवादे वस्तुगत्या यत्साध्यं तत्प्रश्नाभावादित्यर्थः। द्वयोरेकस्यावश्यं बाधितत्वादिति भावः।

इति विलासिन्यां प्रतिज्ञा लक्षणम्।

एतत्कल्पे तादृशसाध्याविषयकत्वप्रतियोगिकोटौ साध्यांशमुपादाय दलान्तरोपादानं प्रक्षालनाद्धीति न्यायेन संदर्भविरुद्धमतः कल्पान्तरमाश्रयति। पूर्वोपदर्शितेति। तस्माद्वह्निमानित्यादिनिगमने मत्वर्थाद्यंशे एव साध्यस्य विशेषणतयाऽतिव्याप्तिरित्यतः साक्षात्परंपरासाधारणेति। तथा च तत्र साध्यस्य परम्परया पक्षविशेषणत्वान्न दोषः। हेतुत्वं प्रमेयं प्रमेयादित्यादौ प्रमेयत्वादिसाध्यके हैत्ववयवेऽव्याप्तिः हेतुतावच्छेदकीभूतसाध्यस्य परम्परया

शाब्दज्ञानजनकत्वे सति साध्याऽविषयकशाब्दज्ञानकारणं यो हेतुमान् शब्दस्तत्त्वं लक्षणार्थः। हेतुसमानानुपूर्वीकोदासीनवाक्यस्य वारणाय जनकान्तमिति। **न्यायावयवत्वार्थकमिति।** तेन प्रतिज्ञैकदेशस्य न्यायान्तर्गतत्वेऽपि न क्षतिः। एतेनोदासीनस्य धूमादिति भागस्य न्यायान्तर्गतत्वनिवेशेनैव वारणसम्भवान्न्याया-वयवत्वनिवेशो न युक्त इति परास्तम्। निगमनैकदेशे तस्मादिति भागेऽतिव्याप्तेश्च। **दीधितौ–साध्याविषयकेतीति।** विषयितासम्बन्धेन साध्यवद्भिन्नेत्यर्थः। निगमनजन्यबोधस्य विषयितासम्बन्धेन साध्यवत्वान्नाति-व्याप्तिरिति भावः।

ननु हेतुविभक्तिमत्त्वमित्यस्य हेतुत्वबोधकविभक्तिमत्त्वमित्यर्थः। तत्र धूमादालोकवान्पर्वतो वह्निमानिति प्रतिज्ञायां। यो यो धूमवान् स स वह्निमान् यथा धूमाद्वह्निमन्महानसमित्युदाहरणे पर्वतो धूमादालोकवद्वृत्तिवह्नि-मानित्यादिस्थलीयधूमादालोकसमानाधिकरणवह्निव्याप्यधूमवानित्युपनये च किंवाऽऽलोकाद्वह्निसाध्यकप्रतिज्ञोदाहरणोपनयेषु चातिव्याप्तेरकथंनेन न्यूनता इत्याशंक्याह–**गादाधर्यां प्रतिज्ञोदाहरणोपनयविशेषाणामिति। विवक्षणीयेति** तथा चोक्तस्थलेषु यथाश्रुतार्थेऽतिव्याप्तेरग्रे "प्रकृतसाध्यान्वितार्थोपस्थिति-जनकहेतुविभक्तिमत्त्वमित्यादिना वक्ष्यमाणपरिष्कृतहेतुविभक्तिमत्त्व-निवेशेऽभावान्निगमनमात्रानुसरणम्। **उक्तहेतौ।** वह्निसाङ्गग्रीमत्त्वहेतौ। **अव्याप्तिरिति।** तस्य साध्याविषयकबोधजनकत्वाभावादिति भावः। **विवक्षणीयमिति।** तथा च हेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्व-विषयताबहिर्भूतं यत्साध्यविषयत्वं तच्छून्यज्ञानजनकत्वं विवक्षणीयमित्यर्थः। ननु तादृशविषयताबहिर्भूतविषयताशून्यत्वमेवास्तु किं साध्यांशनिवेशेनेत्यत आह। **साध्यांशोपादानमिति।** अखण्डाभावघटकतया तत्सार्थक्यादिति भावः।

प्रयोजनमाह। **हेतुविभक्तिमत्त्वदलसार्थक्यायेति।** अन्यथा तद्वारणीये व्यतिरेक्युदाहरणादौ निरुक्तविषयताबहिर्भूतविषयतावत्त्वादेवातिव्याप्तिविरहेण तद्वैयर्थ्यापत्तेः। न च विषयतान्तर्भूतसाध्यविषयताभिन्ना, तादृशविषयतान्तर्भूतत्व-साध्यीयत्वोभयाभाववती या या साध्यविषयता तच्छून्यत्वमित्यर्थोऽस्तु इति वाच्यम्। द्वितीयस्य साध्यस्याऽसम्भववारकत्वेऽपि प्रथमस्य तस्याऽखण्डाभाव-सम्पादकत्वानपायाच्चरमस्याधिक्यात्। **दलान्तरोपादानं।** हेतुविभक्तिमत्त्वो-पादानम्। इदन्तु बोध्यम्। पूर्वोपदर्शितेत्यादि अग्रिमस्यानुषङ्गपक्षाभिप्रायकतया, अननुषंगपक्षे साध्याविषयकत्वमावश्यकम्। अवतरणन्तु अनुषंगपक्षे बोध्यम्। **पूर्वोपदर्शितेति।** प्रतिज्ञालक्षणोपदर्शितेत्यर्थः। तत्र साक्षात्पक्षविशेषणत्वेन यत्साध्यविषयकत्वं तच्छून्यत्वमात्रोक्तौ अतिव्याप्तिमाह। **तस्माद्वह्निमानिति।** एवकारेण पक्षव्यावृत्तिः। **अतिव्याप्तिरिति।** मत्वर्थद्वारैव पक्ष विशेषणत्वेन साध्यविषयकबोधजनकत्वादिति भावः। परम्परया पक्षविशेषणत्वेन यत्साध्यविषयकत्वं तच्छून्यत्वमात्रोक्तौ अव्याप्तिमाह। **हेतुत्वमिति। हेत्ववयवे।** प्रमेयादिति हेतौ। **परम्परया।** प्रमेयद्वारा। **पक्षविशेषणत्वात्।** परम्परया पक्षविशेषणत्वेन यत्साध्यविषयकत्वं तच्छून्यत्वविरहादिति यावत्। दीधितौ—**तेन।** तादृशबहिर्भूतसाध्यविषयताशून्यत्वनिवेशेन, साक्षात्परम्परासाधारणपक्षविशेषणत्वेन साध्यविषयताशून्यत्वनिवेशेन, साक्षात्परम्परासाधारणपक्षविशेषणत्वेन साध्यविषयताशून्यत्वनिवेशेन वा। **पूर्वोपदर्शितहेतौ।** वह्निसामग्रीमत्त्वादिति हेतौ। **नाव्याप्तिः।** तादृशविषयताशून्यत्वादिति भावः। **प्रकृतेति।** अत्र पूर्वोक्तप्रतिज्ञाजन्यबोधीयसाध्यविषयताशून्यत्वं न निवेश्यं, निगमनातिव्याप्तेरित्यत आह। **तच्चेति।** पक्षांशे साध्यस्य विशेषणत्वं चेत्यर्थः। **साक्षात्पक्षनिरूपितं।** अयं गौरित्यादौ। सम्बन्ध्यादिनिरूपितं च पर्वतो वह्निमानित्यादौ। **तादृशविशेषणतात्मकेति।** पक्षविशेष्यतानिरूपितसाध्यतावच्छेदक-सम्बन्धावच्छिन्नप्रकारतात्मिका पक्षविशेष्यतानिरूपितसम्बन्धिप्रकारतानिरूपित-प्रकारतात्मिका वा इत्यर्थः। तादृशसम्बन्धावच्छिन्नपक्षविशेष्यतानिरूपित-साध्यप्रकारतायाः प्रकृतपक्षविशेष्यतानिरूपिताऽभेदसम्बन्धावच्छिन्न-प्रकारतासम्बन्ध्यंशे निरूपितत्वसम्बन्धावच्छिन्नसाध्यप्रकारताया अनुगतरूपेण शून्यत्वम्। तथा निगमनजन्यबोधीयसाध्यविषयतायाः तादृशविषयतानिरूपित-सम्बन्धविषयतानिरूपितविषयतारूपत्वान्नातिव्याप्तिरिति वह्न्यादिसाध्यक-

इदं न दण्डाज्जातं दण्डसंयोगाजन्यद्रव्यत्वात्, अयं न धूमादालोकवान् आर्द्रेन्धनशून्यत्वादित्यादौ व्यतिरेक्युदाहरणस्य,

---

पक्षविशेषणत्वादतः पूर्वोपदर्शितेति।

प्रकृतसाध्यपक्षकप्रतिज्ञाजन्यबोधे यादृशयादृशपक्षांशे साध्यस्य विशेषणत्वं तादृशेत्यर्थः। तच्च साध्यतावच्छेदकसम्बन्धावच्छिन्नं साक्षात्पक्षनिरूपितं, पक्षांशे अभेदादिसम्बन्धेन विशेषणतापन्नसम्बन्ध्यादिनिरूपितं च, तादृशविशेषणतात्मक साध्यविषयताशून्यत्वं समुदितार्थः। अयं वह्निमान् वह्निमत्पर्वतावृत्तिधर्मशून्यत्वादित्यादिहेतावव्याप्तिवारणाय प्रकृतेति, पक्षतावच्छेदकावच्छिन्नार्थकम्। न चैवमननुषङ्गपक्षे निगमनजन्यबोधे साध्यस्य पक्षतावच्छेदकावच्छिन्नाविशेषणत्वादतिव्याप्तितादवस्थ्यमिति वाच्यम्। अननुषङ्गपक्षे पक्षनिष्ठमुख्यविशेष्यतानिरूपितप्रकारतापन्नत्वरूपं पक्षविशेषणतापन्नत्वं यदि निवेश्यते, तदा पक्षतावच्छेदकावच्छिन्नत्वाविवक्षणेऽपि तस्मादितरेभ्यो भिद्यते इत्यादिनिगमनातिव्याप्तेरशक्य परिहारतया एतत्कल्पस्या-

---

निगमनवारणायैकविधसाध्यविषयकत्वनिवेशेऽपीतरभेदादिसाध्यकनिगमनानां वारणाय तादृशतादृशविषयताशून्यत्वकूटं द्रष्टव्यम्। हेतुत्वं प्रमेयं प्रमेयादित्यादौ हेतुजन्यबोधे हेतुत्वे आधेयतासम्बन्धेन विशेषणतापन्नप्रमेयाद्यंशे प्रकारत्वं प्रमेयत्वस्येति नाव्याप्तिः। **साक्षात्**। पचतीत्यादौ। एतच्च परम्परासाधारण-निरूपितत्वं नास्तीति सूचनाय। **पक्षांशे इत्यादि**। वह्निमानित्यादौ। **पक्षतावच्छेदकावच्छिन्नाऽविशेषणत्वादिति**। पक्षविशेषणत्वेन साध्यविषय-कत्वशून्यत्वादिति भावः। इदं च विशेषणमनुषङ्गपक्षे निगमनसामान्यवारकं-नत्वननुषङ्गपक्षे एतत्पक्षे हि पक्षतावच्छेदकावच्छिन्नविवक्षात्यागेऽपि वह्निमद्वृत्तिधर्मशून्यत्वादिति हेतुसङ्ग्रहाय मुख्यविशेष्यतोपादानेऽपि तस्माद्वह्निमानित्यादिकं कपिपयनिगमनमेव वार्यते न सर्वं तस्मादितरेभ्यो भिद्यते इत्यादौ भेदाश्रयताया एवाख्यातार्थस्य मुख्यत्वेन भानादिति भावः। **एतत्कल्पस्य**। द्वितीयकल्पस्य। अयं तस्मादितरेभ्यो भिद्यते इत्यनुषङ्गपक्षः। **वारणसम्भवादिति**। स्थलान्तरानुधावनं व्यर्थम्, तथापीति शेषः। **व्यावृत्तिस्थलमाहेति**। व्यावृत्यर्थं स्थलान्तरमाहेति शेषः।

निग्रहापत्तेः लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः, हेतुत्वञ्चानुमितिकारणीभूतलिङ्ग-परामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतु-विभक्तिमच्छब्दत्वं।

हेतुत्वपक्षकसाध्यान्वितस्वार्थबोधकेदं पदशालिनः उपनयस्य च वारणाय हेतुविभक्तिमदिति। तदर्थश्च प्रकृतसाध्यान्वितस्वार्थ-बोधनक्षमार्थोपस्थितिजनकविभक्तिमत्त्वम्।

ननुषङ्गपक्षाभिप्रायकत्वात्।

अयं धूमाभाववान् वह्न्यभावादित्यादौ यो यो धूमवान् स स वह्निमानित्यादेर्व्यतिरेक्युदाहरणस्य यथाश्रुतहेतुविभक्तिमत्त्वनिवेशनेनापि वारणसम्भवाद्विवक्षणीयस्य प्रकृतसाध्यान्वयबोधनक्षमार्थोपस्थिति-प्रयोजकहेतुविभक्तिमत्त्वस्य व्यावृत्तिस्थलमाह। इदमिति। उदाहरणस्य साध्याविषयकत्वरक्षणाय अभावसाध्यकानुधावनम्। हेतुविभक्तिपदस्य ज्ञापकत्वरूपहेतुत्वबोधकविभक्त्यर्थकत्वे प्रथमोदाहरणे नातिव्याप्तिः, तत्र

दीधितौ–**दण्डसंयोगेति**। संयोगपदं साध्याविशेष्यस्य वारणाय। द्रव्यपदं च दण्डरूपादौ व्यभिचारवारणाय। द्रव्यत्वमात्रस्य घटादौ व्यभिचार **इति** दण्डसंयोगाजन्यत्वनिवेशः। यद्दण्डाज्जातं तद्दण्डसंयोगजन्यद्रव्यमिति तु नोदाहरणं दण्डरूपे व्यभिचारात् हेत्वाभावाऽलाभाच्च दण्डरूपे दण्डसंयोगाजन्य-द्रव्यत्वाभावान्न व्यभिचारः। सिद्धान्ते तु विशिष्टाभावस्यातिरिक्ततया व्यापकत्वम्। अनतिरिक्तत्वे तु वैशिष्ट्यावच्छिन्नप्रतियोगिताकाभावत्वेन वाच्यम्। **प्रथमोदाहरणे**। यद्दण्डाज्जातं तद्दण्डसंयोगाजन्यद्रव्यत्वा-भाववदित्युदाहरणे। **प्रयोज्यत्वस्यैवेति**। एवकारेण ज्ञापकत्वव्यावृत्तिः। तथा च ज्ञापकत्वरूपहेतुत्वप्रतिपादकविभक्तिमत्त्वमात्रेणापि वारणसम्भवात्साध्यान्व-यिस्वार्थबोधजनकेत्यादिव्यर्थमिति भावः। **दीधितौ–व्यतिरेक्युदाहरणस्य। यद्दण्डाज्जातमित्यादि। यद्यपि अन्वय्युदाहरणस्येति**। यद्दण्डसंयोगाऽजन्य-

हेत्विति संपातायातम्।

जनिधात्वर्थोत्पत्त्यन्वितप्रयोज्यत्वस्यैव पञ्चम्यर्थत्वात्। अतः स्थलान्तरमाह। अयमिति। व्यतिरेक्युदाहरणस्येति। यद्दण्डाज्जातं तद्दण्डसंयोगाजन्यद्रव्यत्वाभावात्। यो यो धूमादालोकवान् स स आर्द्रेन्धनवानित्याकारकस्येति शेषः। साध्याविषयकत्वरक्षायै व्यतिरेकिपर्यन्तानुधानम्। यद्यप्यन्वय्युदाहरणस्य साध्याविषयकत्वेऽपि पक्षतावच्छेदकविशिष्टसाध्याविशेषणकत्वादति-व्याप्तिस्तदवस्थैव द्वितीयकल्पे तथापि प्रथमकल्पे व्यावृत्तिघटनाय अभावसाध्यकव्यतिरेकानुसरणम्।

एतादृशोदाहरणस्य साध्यान्वितस्वार्थबोधकपदशालित्वनिवेशेनैव वारणसम्भवात्तादृशविभक्तिमत्त्वपर्यन्तस्य व्यावृत्तिस्थलमाह। हेतुत्वपक्षकेति।

द्रव्यत्वाभाववत् तन्न दण्डाज्जातम्, एवं य आर्द्रेन्धनशून्यः स न धूमादालोकवान् इत्यस्य चेत्यर्थः। **द्वितीयकल्पे।** साक्षात्परम्परासाधारणपक्षविशेषणत्वेन साध्यविषयताशून्यत्वकल्पे। वह्निमान् धूमादित्यादिस्थलीयस्यैव वा। एवं चाऽन्वय्युदाहरणे एवातिव्याप्तिसम्भवे व्यतिरेकिपर्यन्तानुधावनं व्यर्थमित्याशयः। यद्दण्डाज्जातत्वाभाववत् तद्दण्डसंयोगाजन्यद्रव्यत्वाभाववदिति व्यतिरेक्युदाहरण-स्यापि सम्भवादन्वयिपदं चिन्त्यम्। प्रथमकल्पे बहिर्भूतसाध्यविषयतासत्त्वा-देवाऽतिव्याप्त्यत्यभावाद्द्वितीय**कल्पे इति। तथापि।** द्वितीयकल्पेऽतिव्याप्ति-सत्वेपि। **प्रथमकल्पे।** बहिर्भूतसाध्यविषयताशून्यबोधजनकहेतुविभक्ति-मच्छब्दत्वकल्पे। **व्यावृत्तिघटनाय।** हेतुविभक्तिमत्त्वस्य व्यावृत्तिदानाय। यद्यप्युक्तस्थलीयस्य धूमादालोकव्यापकीभूताभावप्रतियोग्याद्रेन्धनशून्यत्व-वानयमित्याकारकोपनयस्यापि वारणसम्भवादुदाहरणमात्रानुसरणमयुक्तम्, तथापि हेतुत्वपक्षकोपनयस्य वारणेनैवोपनयान्तरस्य वारणमर्थतःसिद्धमतो न तस्य पृथगुपन्यासः। **एतादृशोदाहरणस्य।** यो यो धूमादालोकवान् स आद्रेन्धनवानित्याकारकस्य। **स्वं**-हेतुत्वं। **पदशालित्वनिवेशेनैवेति।** एवकारेण विभक्तिमत्त्वव्यावृत्तिः। **वारणसम्भवादिति।** साध्यान्वितस्वार्थोपस्थापक-पदवत्त्वाभावादिति भावः। **दीधितौ-हेतुत्वपक्षकेति।** हेतुत्वं प्रमेयम्-इतरभिन्नं वा हेतुत्वादित्यत्र। **स्वार्थबोधकेति।** हेतुत्वबोधकेत्यर्थः। **इदं पदशालिनः।**

साध्यान्वितेति। निगमनोपस्थाप्यसाध्यान्वितेत्यर्थः। विशेषणतया साध्यान्वितत्वस्याविवक्षणादिति भावः। न चोपनये व्याप्तिघटकतया साध्यविषयकत्वसत्वान्नातिव्याप्तिः प्रसज्यते। अनुषङ्गपक्षे निगमनोपस्थाप्य-साध्येन सममिदं पदार्थस्य हेतुत्वस्यानन्वयाद्व्यावृत्तिदानस्या-ननुषङ्गपक्षाभिप्रायकतया। अननुषङ्गपक्षे च निरुक्तविशिष्टविषयताबहि-र्भूतसाध्यविषयताशून्यत्वस्यैव साध्याविषयकत्वपदार्थतया पक्षविशेषणतया साध्याविषयकत्वस्याप्रयोजकत्वादिति वाच्यम्। उपनयपदस्य इतरत्वव्यापकी-

---

इदं पदवतः। **उपनयस्य।** प्रमेयत्व (इतरभेद) व्याप्यहेतुत्ववद्धेतुत्व-मित्याकारकस्य। **वारणायेति।** साध्यविषयतानिरूपितस्वार्थविषयता-कोपस्थितिजनकपदवत्त्वादिति भावः। **हेतुविभक्तिमदिति।** तथा च तादृशोपस्थितिजनकविभक्तिमत्त्वाभावान्नातिव्याप्तिरिति भावः। ननु साध्यविषयतानिरूपितस्वार्थविषयताकबोधो न निवेश्यते येनोक्तदोषवारणाय विभक्तिनिवेशः स्यात् किन्तु साध्यविशेष्यतानिरूपितस्वार्थप्रकारताकबोध एव, विभक्तित्वाऽनिवेशेन लाघवादित्यत आह **विशेषणतयेति।** प्रकारतयेत्यर्थः। अत्र दीधितिकृतां विभक्तिव्यावृत्तिप्रदर्शनं प्रथमकल्पमभिप्रेत्य द्वितीयकल्पं वा उभयथापि न सम्भवतीत्याशङ्कते **न चेति। उपनये।** उपनयमात्रे। **व्याप्तिघटकतयेति।** इतरभेदसाध्यकेऽपि उपनयेऽन्वयव्याप्ति-प्रवेशमभिप्रेत्य। **साध्यविषयकत्वादिति।** साध्यविषयकत्वविरहादिति भावः। द्वितीयकल्पाभिप्रायकत्वं चेद्व्यावृत्तिदानस्योच्यते तदाऽतिव्याप्तिः ननु प्रतिज्ञोत्तरं हेतुरेवोद्भाव्यते नोदाहरणादिकमित्यत्र किं नियामकमत आह। साध्यनिर्देशानन्तर-मिति। प्रतिज्ञावाक्यात्पक्षतावच्छेदकविशिष्टे साध्यबोधानन्तरं। कुत इत्याकाङ्क्षायां-हेतोराकांक्षया प्रयुक्ते कुत इति प्रश्ने। साधनताभिव्यञ्जकेति। ज्ञापकताबोधकेत्यर्थः। उचितमिति। साधनताभिव्यञ्जकपञ्चमीविभक्ति-मल्लिङ्गप्रतिपादकवाक्यमित्यर्थः। तेन धूमेनेति प्रयोगनिरासः। अन्यथा। अस्यैव विवरणम्। अनाकाङ्क्षिताभिधाने इति। साध्यनिर्देशोत्तरमुदाहरणाद्यभिधाने इति यावत्। **निग्रहापत्तेरिति।** अप्राप्तकालनिग्रहापत्तेरिति यावत्। ननु प्रतिज्ञोत्तरमुदाहरणादेरिव हेतोरपि अनाकाङ्क्षितत्वमविशिष्टमत आह। लोक इति। तथैव। साधनताभिव्यञ्जकविभक्तिमल्लिंगवचनेनैव कुत इत्याकाक्षा-

भूताभावप्रतियोगिमदिदमित्याकारकाभावसाध्यकव्यतिरिक्युपनयपरत्वात्। प्रकृतसाध्येति। प्रकृतसाध्यान्वितस्वार्थबोधप्रयोजकाकाङ्क्षादिमद्धेतुविभक्तिमत्त्वमित्यर्थः। उपदर्शितस्थले च धूमज्ञानज्ञाप्यालोकाभावादिरूपसाध्यांशे पञ्चम्यर्थानन्वयान्नातिव्याप्तिरिति भावः। नन्वेवं हेतुपदमनर्थकं साध्यान्वितस्वार्थबोधकविभक्तिशालिनो हेत्वतिरिक्तावयवस्य साध्यविषयकत्वनियमेनाऽतिप्रसङ्गानवकाशात्। न च पक्षविशेषणतया साध्याविषयकत्वनिवेशपक्षे ज्ञानादिसाध्यके य इच्छति स जानातीत्युदाहरणे ज्ञानादिरूपसाध्यान्वितस्वार्थबोधकाख्यातविभक्तिशालिनि विशेषणविभक्तेरभेदार्थकत्वमते प्रमेयत्वादिपक्षकप्रमेयत्वादिसाध्यकोपनये पक्षीभूतसाध्यान्विताऽभेदबोधकप्रथमाविभक्तिशालिनि चाऽतिव्याप्तिवारणाय हेतुपदोपादानमावश्यकमिति वाच्यम्।

निवृत्तिः इति अनुभवसिद्धत्वादिति भावः। हेतुत्वं चेति। अनुमितिकारणीभूतो यो लिङ्गपरामर्शस्तत्प्रयोजकशाब्दज्ञानलापनं नास्तीत्याह। **अनुषङ्गपक्षे इति। इदं पदार्थस्य।** उपनयघटकेदं-पदार्थस्य। एतेन साध्यान्वितस्वार्थबोधकपदशालित्वमात्रेणैव वारणमुक्तम्। **अनन्वयात्।** भिन्नवाक्यत्वेनेत्यादिः। नतूपनयघटकाऽयं पदस्याऽऽवृत्तिरेवाऽनुषंगः। तथा च निगमनोपस्थाप्यसाध्यान्वितस्वार्थबोधकत्वं हेतुत्वबोधकोक्तोपनयघटकायं पदस्याऽक्षतमेवेति व्यावृत्तिः सम्भवतीति चेन्न। उपनयघटकायं पदसदृशपदान्तरस्याऽऽवृत्तिरेवानुषंगः, नतूपनयघटकस्यैवाऽऽवृत्तिस्तथेति द्वितीयकल्पेऽतिव्याप्त्यलग्नकतेत्याशयः। न च तथापि निगनमघटकायंपदस्य योऽर्थःस एवोनपनयघटकतत्पदस्यापीति द्वितीयकल्पे साध्यान्वितस्वार्थबोधकत्वसम्भवादतिव्याप्तिर्लगत्येवेति वाच्यम्। स्वजन्यपदार्थोपस्थितिसहकारेण साध्यान्वितस्वार्थबोधकत्वासम्भवादतिव्याप्त्यत्यलग्नतैवेत्याशयात्। तथापि पक्षविशेषणतया साध्यविषयत्वमादाय व्यावृत्तिः स्यादित्यत आह। **अननुषङ्गपक्षेति। अप्रयोजकत्वादिति। तस्यानुषङ्गपक्षाभिप्राय**कत्वादिति भावः। **अभावसाध्यकेति।** हेतुत्वपक्षकेतरभेदसाध्यकहेतुत्ववादिहेतुकेत्यर्थः। अयं धूमाद्वह्निमान् आलोकादित्यादिस्थलीयस्य धूमाद्वह्निव्याप्यालोकवानयमित्युपनयस्यापि वह्निस्वरूपसाध्यान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्त्वात्तत्रातिव्याप्तिरतः

पक्षविशेषणतया साध्याविषयकत्वनिवेशपक्षे हेतुपदोपादानेऽपि यो यो धूमवान् स वह्निमान् तथा धूमाद्वह्निमन्महानसमिति दर्शित-सदृष्टान्तोदाहरणेऽतिव्याप्तेः, तद्वारणाय प्रकृतपक्षविशेषणतापन्नसाध्यान्वितार्थ-बोधकत्वस्यावश्यं निवेशनीयतया तादृशोदाहरणोपनययोः तथाविधसाध्यान्वित-स्वार्थबोधकविभक्तिमत्त्वविरहेणातिप्रसङ्गानवकाशादित्यत आह। हेत्वितीति। इदमुपलक्षणम्। पक्षविशेषणतया साध्याविषयकत्वनिवेशकल्पे विभक्तिमत्त्वमपि नोपादेयम्। तत्कल्पस्यानुषङ्गपक्षपरतया तत्पक्षे उपनयस्य निगमनैकवाक्यता-विरहेण साध्यान्वितस्वार्थबोधकपदशालित्वाभावाद्दर्शितविभक्तिपदव्यावृत्तेश्च अनुषङ्गपक्षेऽसङ्गतेस्तत्कल्पे व्यावृत्त्यभावादिति केचित्।

वस्तुतस्तु अनुषङ्गपक्षे उपनयस्थस्यैव पक्षबोधकेदंपदस्य निगमनघटकी भूतसाध्यान्वितस्वार्थबोधकतया तादृशबोधे च प्रयोजनान्तरविरहेण स्वजन्यत्वानिवेशनादुपनये विभक्तिपदव्यावृत्तिसम्भवतीत्यवधेयम्। ननु प्रथमसाध्याविषयकत्वनिर्वचनपक्षे पर्वतः पर्वताभिन्नत्वप्रकारकज्ञानाभाववान् तादृशज्ञानाभावात् यःपर्वतभिन्नत्वेन ज्ञायते स पर्वतभिन्नत्वेन ज्ञायते यथा पर्वतभिन्नत्वज्ञानाभावादुपपन्नं ज्ञानं इत्यादौ विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिता-काभावसाध्यहेतुकव्यतिरेक्युदाहरणेऽतिव्याप्तिः तत्र हेतुतावच्छेदकविशिष्ट-हेतुविशिष्टहेतुत्वविषयतान्तर्भूताया एव साध्यविषयतायास्सत्त्वात्। साध्यीभूततादृशाभावान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्त्वाच्च, प्रथमकल्पे साध्ये पक्षविशेषणतापन्नत्वानिवेशात् दृष्टान्तोपस्थाप्यस्य तादृशसाध्यस्य पक्षानन्वितत्वस्याकिञ्चित्करत्वादित्यत आह यदि चेति। सिषाधयिषया न्यायप्रयोगस्य सविवादतया यदि चेत्युक्तं तस्य चोच्यत इत्यनेनान्वयः। समवायसम्बन्धावच्छिन्नाभावस्य साध्यत्वे ज्ञानस्य समवायेन ज्ञानरूप-

---

प्रकृतपदम्। तथा च तत्र धूमज्ञानज्ञाप्यवह्नित्वावच्छिन्ने पञ्चम्यर्थहेतुत्वस्या-नन्वयान्नातिव्याप्तिः। **स्वार्थबोधप्रयोजकेति।** शाब्दबोधस्वरूपयोग्यहेत्ववयव-समग्रहाय **आकांक्षादीति।** पक्षविशेषणतया साध्यविषयताशून्यबोधकत्वं केवलहेत्वर्थबोधमादाय, साध्यान्वितस्वार्थबोधजनकविभक्तिमत्त्वन्तु प्रतिज्ञाहेत्वर्थविशिष्टवैशिष्ट्यबोधमादायेति एकधाशाब्दबोधनिवेशो न सम्भवतीति ध्येयम्।

यदि च पर्वते पर्वतभिन्नत्वप्रकारकज्ञानस्य विशेष्यतया अभावस्य साध्यत्वं हेतुत्वं च सिषाधयिषया च न्यायप्रयोगः तत्र यथा तादृशज्ञानाभावादुत्पन्नं ज्ञानमिति दृष्टान्तशालिनि व्यतिरेक्युदाहरणेऽति-व्याप्तिरित्युच्यते।

प्रतियोग्यनधिकरणतया न व्यतिरेकदृष्टान्तत्वसम्भव इति विशेष्यतयेत्युक्तम्। अत एव महानसत्वादिप्रकारकज्ञानाभावस्साध्यतया उपेक्षितः विशेष्यतयापि ज्ञानस्य तादृशज्ञानवत्त्वाभावात्। साध्यस्य हेतुतायामेव हेतुत्वविशेषणतापन्न-तथाविधसाध्यविषयतायाः हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयतान्त-र्भावस्सम्भवतीति तदादरः। ज्ञानाभावादुत्पन्नमिति असंसर्गाग्रहविधया तादृशज्ञानाभावस्य पर्वतत्वप्रकारकज्ञानोत्पादकत्वं बोध्यं। व्यतिरेकिपर्यन्तानुधावनं विशिष्टविषयताबहिर्भूतसाध्यविषयत्वाभावनिर्वाहाय। प्रकृतसाध्ये विशेषणतया अन्वितो यस्स्वार्थः तद्बोधकत्वं च दर्शितहेतुत्वपक्षकोपनयस्थेदं पदस्य नास्तीति तद्विवक्षणे विभक्तिपदवैयर्थ्यमिति विशेष्यविशेषणसाधारणमेवान्वितत्वं निवेशनीयम् इत्युक्तोदाहरणजन्यबोधे पञ्चम्यर्थस्य साध्यविशेष्यत्वेऽप्यति-प्रसङ्ग एवेत्यभिप्रायः। अवयवान्तरेति। स्वभिन्नावयवघटकपदजन्यो-पस्थितिसहकारेण स्वाघटकपदजन्योपस्थितिसहकारेण वा तत्पदार्थान्वितस्वार्थ-बोधकविभक्तिमत्त्वमित्यर्थः। तेन तादृशसाध्यस्य प्रतिज्ञाद्यवयवस्थदोष-स्थापितत्वेऽपि नातिव्याप्तिः। न चैवमनुषङ्गपक्षे साध्याविषयकत्वविशेषण-मनर्थकं निगमनस्य तत्पक्षे उपनयैकवाक्यताविरहेणावयवान्तरो-पस्थापितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वाभावाद्व्यावृत्त्यसङ्गतेरिति वाच्यम्। चैत्रःपचति पाककृतिसामग्रीमत्त्वादित्यादौ पाककृत्यादिसाध्यकप्रतिज्ञायां हेत्ववयवस्थपञ्चम्युपस्थाप्यहेतुत्वान्वितस्वार्थबोधकाख्यातविभक्तिमत्त्वादति-व्याप्तिवारणाय साध्याविषयकत्वोपादानस्यावश्यकत्वात्। प्रथमरीत्या साध्याविषयकत्वनिर्वचनस्याननुषङ्गपक्ष इव अनुषङ्गपक्षेऽपि सम्भवात् अननुषङ्गपक्षे एवेयं विवक्षा अनुषङ्गपक्षे तूदाहरणान्यत्वविशेषणे-नानुपदोक्तोदाहरणं वारणीयमित्यपि वदन्ति।

साध्यघटितार्थबोधकोक्तहेतावव्याप्तिं हेतुविभक्तिमदुक्तोदाहरणे ऽतिव्याप्तिञ्च प्रकारान्तरेण वारयतां मतमाह। केचित्त्विति। निगमने

तदा अवयवान्तरोपस्थापितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वं वक्तव्यम्। उदाहरणान्यत्वेन वा विशेषणीयम्। केचित्तु साध्य-विषयकधीजनकत्वानियतहेतुविभक्तिमत्त्वनियतावयवतावच्छेदक-रूपवत्त्वं समुदितलक्षणार्थम् इत्याहुः।

तच्चिन्त्यम्। हेतुत्वप्रतिपादकेति। विभक्त्यर्थहेतुत्वविशेष्यकान्वय-बोधजनकन्यायावयवत्वमर्थः। हेतुत्वं प्रमेयमित्यादिप्रतिज्ञावारणाय विभक्त्यर्थेति। तस्मादितरेभ्यो भिद्यत इत्यादिनिगमनवारणाय हेतुत्वेति विशेष्येति च। घटो दण्डात् वह्निर्धूमादित्यादिकाः न प्रतिज्ञाः।

हेतुविभक्तिमत्त्वनैयत्यादतिव्याप्तिवारणाय अनियतान्तम्। हेतुत्वस्यापि साध्यबोधकोक्तहेतुवृत्त्या असम्भव इति असामानाधिकरण्यमुपेक्ष्य अनियतत्वनिवेशः। उदाहरणोपनययोस्साध्याबोधकयोरपि सम्भवादुदाहरणो-पनयसामान्यवारणाय नियतान्तम्। हेतुविभक्तिमद्दर्शितोदाहरणवृत्त्युदाहरणत्व-मादायातिप्रसङ्गवारणाय सामानाधिकरण्यमुपेक्ष्य नियतत्वनिवेशनम्। विभक्तिमत्त्वमनुपादेयं, हेतुत्वप्रतिपादकपदवत्त्वनैयत्यनिवेशेनैवानतिप्रसङ्गात्, हेतुत्वप्रतिपादकपदवत्त्वनैयत्यार्थप्रतिपादकविभक्तिमत्त्वनैयत्योर्वैकल्पिकमुपादानं वा। तत्र च द्वितीयकल्पे विशेषणविभक्तेर्निरर्थकत्वमताभिप्रायेण। उदाहरणविशेषत्वमादायोक्तोदाहरणेऽतिप्रसङ्गवारणायावयवतावच्छेदकेति। चिन्त्यमिति चिन्ताबीजं पूर्ववत्। यथाश्रुतप्रतीतद्वितीयलक्षणार्थस्य निगमनसाधारणतयाऽन्यथा व्याचष्टे विभक्त्यर्थेति। विभक्तिजन्यहेतुत्वोपस्थितिद्वारा हेतुत्वमुख्यविशेष्यकशाब्दधीजनकन्यायावयवत्वमित्यर्थः। तेन हेतुत्वे विभक्त्यर्थहेतुत्वविशेषणयाव्यावर्तकत्वेऽपि न क्षतिः। निगमनवारणायेति तत्र तिङर्थस्य विशेष्यत्वादिति भावः। विशेष्येतीति हेतुत्वविशेष्यकत्वस्य तत्रापि सत्त्वेन मुख्यविशेष्यतापर्यन्तानिवेशने तत्रातिव्याप्तिरेवेति भावः। ननु घटो दण्डादित्यादिप्रतिज्ञाघटितघटादिपक्षकनिरूपकतासंसर्गकदण्डादिनिष्ठ-हेतुतासाध्यकन्यायान्तर्गते तस्माद्दण्डादित्याकारकनिगमने अननुषङ्गपक्षे विभक्त्यर्थहेतुत्वविशेष्यकबोधजनकेऽतिव्याप्तिरत आह। घटो दण्डादिति। ज्ञापकत्वरूपहेतुत्वस्यैव प्रकृते निवेशनीयतया जनकत्वरूपहेतुत्वसाध्यक-

तदवृत्तेरतदात्मनश्च तद्धर्म व्यापकत्वायोगात् सम्प्रदायविरोधाच्च। तेन तत्रत्यनिगमने नातिप्रसङ्ग इति भावः।

उदाहरणेति क्वचिज्जिज्ञासानुत्पादेऽपि तद्योग्यतासत्त्वान्नाव्याप्तिः।

अनुक्तोदाहरणस्थलेऽपि तादृशस्वरूपयोग्यतासत्त्वात्तद्वारणाय न्यायावयवेति। उदाहरणत्वं चेदं न न्यायावयवत्वगर्भम्। वैयर्थ्यात् (साध्याविषयकेत्यादि अयं न दण्डात् दण्डसंयोगाजन्यद्रव्यत्वानित्यादौ प्रतिज्ञानिगमनयोर्वारणाय साध्याविषयेत्यादिव्याख्यातार्थकम्। उपनयविशेषवारणाय हेतुपञ्चम्यन्तेति)

प्रथमस्थले नातिव्याप्तिप्रसक्तिरित्यतो वह्निपक्षकधूमनिष्ठ हेतुतासाध्यकस्थलान्तरानुसरणम्। तदवृत्तेरिति। तादात्म्यातिरिक्तवृत्त्यनियामकसम्बन्धेन व्यापकत्वानभ्युपगमादिति भावः। तादात्म्येन स्वस्य स्वधर्मव्यापकत्वसत्त्वादाह। अतदात्मन इति। तद्धर्मेति। तद्वृत्तिधर्मेत्यर्थः। ज्ञाप्यताया एव नवीनमते पञ्चम्यर्थतया ज्ञाप्यत्वसाध्यकतादृशप्रतिज्ञासम्भवत्येव, तथाचासम्भववारणाय लक्षणस्थहेतुत्वपदेनापि तादृशस्य हेतुत्वरूपार्थस्यैव विवक्षणीयतया तत्रत्यनिगमनेऽतिव्याप्तितादवस्थ्यमित्याशङ्क्याह सम्प्रदायविरोधाच्चेति। न्यायानन्तर्गतस्य धूमादित्यादिवाक्यस्योदाहरणप्रयोजकजिज्ञासोपधायकत्वविरहेऽपि तत्स्वरूपयोग्यतामादायातिव्याप्तिप्रसज्य न्यायावयवत्वदलं सार्थकीचिकीर्षुर्जनकपदस्य स्वरूपयोग्यतापरत्वं स्फुटयति। क्वचिदिति। अभ्युपेत्य फलोपधाननिवेशेऽपि न्यायावयवत्वनिवेशनमावश्यकमित्याह। उदाहरणत्वं चेति वैयर्थ्यात्। प्रयोजनान्तराभावात्। तथा च यत्रोदाहरणान्तमेव प्रयुक्तं तत्राप्युदाहरणप्रयोजकजिज्ञासाफलोपादानसम्भवेनातिव्याप्तिवारणाय न्यायावयवत्वनिवेशनं जनकपदस्य फलोपधानपरत्वेऽप्यावश्यकमेवेति भावः। चतुर्थलक्षणे प्रसिद्धप्रतिज्ञानिगमनयोस्साध्याविषयकत्वविशेषणव्यावृत्तिर्न घटते पञ्चम्यन्तत्वाभावादिति पञ्चम्यन्ततद्विशेषे तद्व्यावृत्तिमाह अयं न दण्डादिति। अयं दण्डादित्यादिप्रतिज्ञायाःसम्प्रदायविरुद्धत्वं प्रागभिहितमित्यभावसाध्यकानुधावनम्। वह्निमान्वह्निसामग्रीमत्त्वादित्यादौ यथाश्रुताऽव्याप्तेराह–

हेत्विति हेतुत्वबोधकार्थकम्। हेतुपञ्चम्योर्वैकल्पिकमुपादानम्। उपनयस्य चान्तेऽनुसन्धीयमाना प्रथमैवान्तः। एवं दण्डादित्यादेः स्वपरस्यापि दृष्टान्तस्य पञ्चम्यन्तत्वे अन्वयायोगात् कस्यचिद्व्यतिरेकिण उदाहरणस्य पञ्चम्यन्तत्वसम्भवे तु तद्वारणं पूर्ववत्। अत्र चार्थवद्भागस्य हेतुपञ्चम्यन्तत्वं बोध्यम्। तेन निरर्थकतसिलन्ते वह्निप्रमात इत्यादौ नाव्याप्तिः।

व्याख्यातार्थकमिति। हेतुतावच्छेदकविशिष्टेत्यादिनेत्यादिः। उपनयविशेषेति। साध्याविषयकबोधजनकाभावसाध्यकव्यतिरेक्युपनयेत्यर्थः। उदाहरणस्य च पञ्चम्यन्तस्यापि सम्भवात्तद्वारणायोदाहरणान्यत्वस्य निवेशनीयतया तत एवोदाहरणसामान्यवारणसम्भवादुपनयपर्यन्तानुधावनम्। धूमादालोकाभावादिसाध्यके धूमादालोकव्यापकाभावप्रतियोगिमानयमित्याद्युपनयेऽतिव्याप्तिवारकतया तत्पदसार्थक्यं बोध्यम्। उपनयस्य कस्यचिदपि पञ्चम्यन्तत्वासम्भवाद्धेतुपदवैयर्थ्यमाशंक्याह–हेतुत्वबोधकार्थमिति। हेत्विति। तादृशार्थकहेतुपदस्य पञ्चमीपदस्य च वैकल्पिकमुपादानमित्यर्थः। तथाच हेतुत्वबोधकान्तत्वं पञ्चम्यन्तत्वं पृथङ्निवेश्य लक्षणद्वयं करणीयमित्यर्थः। नन्वेवं प्रथमलक्षणे हेतुत्वपक्षके तद्बोधकेदंपदान्तोपनयेऽतिव्याप्तिरित्यत आह– उपनयस्य चेति। श्रूयमाणविभक्त्यन्तत्वाभावादनुसन्धीयमानेति। तथा च तस्य हेतुत्वबोधकत्वाभावादेव नातिव्याप्तिरिति भावः। ननु द्वितीयलक्षणे अयं न गुणो द्रव्यासमवेतत्वादित्यादौ यथा दण्डादित्यादिस्वपरपञ्चम्यन्तपदघटितदृष्टान्तशालिनि व्यतिरेक्युदाहरणे अतिव्याप्तिरित्यत आह एवमिति। दृष्टान्तस्येत्यत्रानुसन्धीयमानप्रथमैवान्त इत्यनुषज्यते–अन्वयायोगादिति। प्रथमान्तत्वं विना समानविभक्तिकत्वाभावेन तादृशशाब्दबोधे प्रथमान्तपदोपस्थाप्यसाध्याभावसाधनाभाववदभेदान्वयानुपपत्तेरित्यर्थः। नन्वेवमपि अयं न घटो दण्डाजन्यत्वात् यो घटस्सदण्डादित्यादौ उदाहरणे लक्षणद्वयातिव्याप्तिर्दुर्वारैव साध्याविषयकबोधजनकत्वात् पञ्चम्यन्तत्वाच्चेत्यत आह कस्यचिदिति पूर्ववदिति। अवयवान्तरोपस्थापितार्थान्वितस्वार्थबोधकत्वोदाहरणान्यत्वयोरन्यतरविशेषणेनेत्यर्थ। ननु पञ्चम्यास्तसिलित्यत्र पञ्चम्या इत्यस्य पञ्चम्यन्त

हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं वा।

उदाहरणप्रयोजकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा।

साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा।

प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्ति-मद्वाक्यत्वं वा।

पञ्चम्यादेः तसिलाद्यादेशत्ववादिनां नये तु नानुपपत्तिगन्धोऽपि। केचित्तु। हेतुपञ्चम्यन्तत्वं हेतुत्वप्रतिपादकपदशालित्वं पूर्ववत्।

साध्याविषयकबोधजनकत्वञ्च इतरनैरपेक्ष्येण प्रकृतहेतुत्वा-विशिष्टसाध्यविषयकज्ञानाजनकत्वं, साध्यं चेह न विवक्षितम्।

इत्यर्थकतापक्षे पर्वतो वह्निमान्वह्निप्रमात इत्यादौ हेत्ववयवस्य तसिलन्तरस्य हेतुपञ्चम्यन्तताविरहादव्याप्तिरित्यत आह अत्र चेति। हेतुपञ्चम्यन्तत्वमिति हेतुत्वबोधकान्तत्वं पञ्चम्यन्तत्वं चेत्यर्थः। अर्थवद्भागस्येति। स्वघटकार्थ-वद्भागपूर्वत्वाभाववद्धेतुत्वबोधकादिघटितत्वमेव तदन्तत्वमिह विवक्षितमिति भावः। अर्थवत्त्वमाकांक्षानिर्वाहकत्वम्। तसिलं विनापि तत्पूर्वपञ्चस्यैव प्रकृतान्वयबोधौपयिकाकाङ्क्षानिर्वाहात् न तसिलादेराकाङ्क्षानिर्वाहकत्वं न तु किञ्चिदर्थकत्वं तसिलादेरवाचकत्वेऽपि तद्घटकप्रत्येकवर्णानां वाचकत्वात् एकाक्षरकोशे सर्वेषां वर्णानां वाचकत्वबोधनात् उक्तसूत्रे पञ्चमीपदस्य षष्ठ्यन्तत्वमपि सम्भवतीत्यभिप्रायेण यथाश्रुतस्यैव साधुतां समर्थयति। पञ्चम्यादेरिति आदिपदाभ्यां सप्तम्यादेस्त्रलादेश्च परिग्रहः। नानुपपत्तिरिति तथासति तसिल एव हेतुत्वप्रतिपादकत्वात् पञ्चमीत्वाच्चेति भावः। तसिलादेः पञ्चम्यनादेशतापक्षे उक्तहेतावव्याप्तिवारणाय पञ्चम्यन्तत्वमविवक्षतां मतमाह केचित्त्वति हेतुत्वप्रतिपादकपदशालित्वमिति। तथा च पञ्चम्यन्तत्वानिवेशात्त-सिलः पञ्चम्यनादेशतापक्षेऽपि न तदन्तहेतावव्याप्तिरिति भावः। ननु हेतुत्वप्रतिपादकपदस्यान्तत्वाविवक्षणे दर्शितव्यतिरेक्युपनये अतिव्याप्तितादव-

वैयर्थ्यादित्याहुः पञ्चम्यन्तेति। अनुमितिपरवाक्यत्वमवयवत्वं हेतुत्वादौ पञ्चमी लाक्षणिकी। वृक्षाद्विभजत इत्यादौ लाघवेनावधित्वे अवधिमत्त्वे वा शक्तत्वात्।

स्थ्यमित्यत आह पूर्ववदिति। प्रकृतसाध्यान्वितस्वार्थबोधकतादृशपदशालित्वरूपमित्यर्थः। एवं च प्रथमलक्षणे तादृशस्वार्थबोधकविभक्तिशालित्वं साध्याविषयकधीजनकत्वं च निरुक्तविशिष्टविषयता बहिर्भूतसाध्यविषयताशून्यधीजनकत्वरूपं निविष्टं तु तादृशहेतुत्वप्रतिपादकपदशालित्वं साध्याविषयकज्ञानजनकत्वं च निर्वक्ष्यमाणमन्यविधं प्रविष्टमिति भेद इत्यवधेयम्। पर्वतो वह्निमानित्यादिन्यायान्तर्गतप्रतिज्ञादेर्निर्वाच्यसाध्याविषयकज्ञानजनकताशालिनो वारणाय हेतुत्वप्रतिपादकपदोपादानम्। वह्नेर्द्रव्यत्ववान् वह्निमान् हेतुत्वं प्रमेयमित्यादिन्यायान्तर्गत प्रतिज्ञादावतिव्याप्तिवारणाय विशेषणतया साध्यान्वितत्वनिवेशनेऽपि सुन्दरवह्निमत्सधर्मा पर्वतो वह्निमानित्यादावतिव्याप्तिवारणाय तदावश्यकत्वम्। न चैवमप्यालोकाद्वह्निमतस्सधर्मा पर्वतो वह्निमानित्यादावतिव्याप्तिर्दुर्वारैव तत्रापि विवक्षणीयप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुताविशिष्टसाध्यविषयकज्ञानाजनकत्वस्याक्षतत्त्वादिति वाच्यम्। हेतुत्वप्रतिपादकेत्यस्य प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपादकार्थकत्वात्। यथाश्रुतं साध्याविषयकज्ञानजनकत्वम् अयं वह्निमान्वह्निसामग्रीमत्त्वादित्यादिन्यायस्थले हेत्ववयवे अव्यापकं, पूर्वनिरुक्तन्निवेशे च साध्यान्वितस्वार्थबोधकहेतुत्वप्रतिपादकपदशालित्वविशेषणे हेतुत्वप्रतिपादकेत्यस्य वैयर्थ्यं प्रतिज्ञाया निरुक्तसाध्याविषयज्ञानजनकत्वाभावादेव वारणादतस्साध्याविषयकज्ञानजनकत्वमन्यथा निर्वक्ति साध्येति। एवं च पर्वतो वह्निमानित्यादिप्रतिज्ञायास्साध्यविषयकज्ञानजनकत्वेऽपीतरनैरपेक्ष्येण हेतुत्वविशिष्टसाध्यविषयकज्ञानजनकतया साध्याविषयकेत्यादिनाऽवारणात् हेतुत्वप्रतिपादकत्वं पदविशेषणमर्थवद्भवति हेत्ववयवस्यापि प्रतिज्ञासहकारेण हेतुत्वविशिष्टसाध्यविषयकज्ञानजनकतया असम्भववारणायेतरनैरपेक्ष्येणेति। स्वाघटकपदासहकारेणेत्यर्थकम् अजनकेत्यस्य प्रतियोगिविशेषणम्। तथा च स्वेतरावयवजन्यहेतुत्वविशिष्टसाध्यविषयकज्ञानजनकं यत्तदन्यत्वमिति समुदायार्थः। जनकपदस्य जनकतावच्छेदकधर्मपर्याप्त्याश्रयसमुदायत्वलाभाये-

द्रव्यनिष्ठावधित्वमिव विभागनिष्ठमवधिमत्त्वमपि सम्बन्धविशेषः। स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत्। तत्सम्बन्धाग्रहेऽपि व्यवहारः, शक्तिभ्रमात्। वृक्षादपैति पततीत्यादौ लाघवाद्विभागे शक्तिः तज्जनकत्वं च क्रियायाः संसर्गमर्यादया भासत इत्यपि वदन्ति।

तरनैरपेक्ष्येणेति। हेत्ववयवस्य प्रतिज्ञासहकारेण तादृशबोधजनकत्वेऽपि तादृशधर्मपर्याप्त्याश्रयसमुदायभेदस्याक्षततया इतरनैरपेक्ष्याप्रवेशेऽपि लक्षणसमन्वयात्, अयं धूमाद्वह्निमान् धूमाद्वह्निमतोऽन्यत्रावर्तमानधर्मादित्यादिहेतोर्धूमनिष्ठहेतुताविशिष्टसाध्याज्ञानजनकस्य सङ्ग्रहाय प्रकृतेति प्रकृतहेतुतावच्छेदकावच्छिन्नविशिष्टेत्यर्थकम्। प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वमितराविशेषणतया अवगाहिन एव ज्ञानस्येतरनिरपेक्षहेतुवाक्येन जननात्तादृशहेतुत्वप्रकारकज्ञानसामान्याजनकत्वस्यैव सकलहेत्ववयवसाधारण्यात् साध्यांशोपादानमनर्थकमिति तत्परित्यजति। साध्यं चेति। अत्र साध्यान्वितस्वार्थबोधकत्वनिवेशेऽपि हेतुत्वपक्षकोपनये साध्यान्वितार्थबोधे स्वजन्यत्वनिवेशे अनुषङ्गपक्षे साध्यान्वितपक्षबोधस्योपनयाजन्यतया तद्वारणेऽप्यनुषङ्गपक्षे निगमनोपस्थापितसाध्यान्वितहेतुत्वबोधकेदं पदशालिन्यतिव्याप्तिः। न च हेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपादकपदशालित्वनिवेशान्न तत्रातिव्याप्तिरिति वाच्यम्। गोत्वाभावविशिष्टहेतुत्वं सास्नाभाववत् गोत्वाभावादित्यादिन्यायान्तर्गतोपनये तथाप्यतिव्याप्तेरवारणात्, अनुषङ्गपक्षेऽप्युक्तन्यायान्तर्गतप्रतिज्ञायामतिव्याप्तेश्च, विशेषणतया साध्यान्वितस्वार्थबोधकत्वं निवेश्य तद्वारणे साध्यांशवैयर्थ्यं, अनुषङ्गपक्षेऽप्युपनयस्थेदं पदार्थस्य कुत्रापि विशेषणताविरहात् पदान्तरोपस्थापितेन प्रकृतहेतुना साक्षाद्विशेषितहेतुत्वप्रतिपादकपदशालित्वं निवेश्योक्तविशिष्टहेतुत्वपक्षकप्रतिज्ञोपनययोः वारणेऽपि प्रकृतहेतुत्वविशिष्टाविषयकज्ञानजनकत्वनिवेशेनैवोपपत्तौ नञ् व्यत्यासस्येतरनैरपेक्ष्येणेत्यभिधानस्याकिञ्चित्करत्वमित्यस्वरसः—पञ्चम्या लाक्षणिकत्वं व्यवस्थाप्य तद्वत्त्वेन निगमनेऽतिव्याप्तिं प्रसञ्जयन् पञ्चम्यन्तपदं सार्थकयति हेतुत्वादाविति। हेतुत्वं जनकत्वम् आदिना ज्ञापकत्वपरिग्रहः जनकत्वोपादानं

अत: पचम्यन्तेति लाक्षणिकविशेषणम्। तस्मादित्यत्र च तत्पदे न लक्षणा।

दृष्टान्तविधया। गुरुशरीरं तत्क्रियानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वरूपमपादानत्वं वा दृष्टान्तविधया आदिपदग्राह्यं हेतुत्वं ज्ञापकत्वमेव तर्हि कुत्र तच्छक्तिरित्यपेक्षायामाह—वृक्षादिति इत्यादौ इत्यादिवाक्यस्थपञ्चमीप्रतिपाद्ये। विनिगमनाविरहं निराकरोति लाघवेनेति। वृक्षादिनिष्ठावधित्वस्य निरूपकत्वादिसम्बन्धेन विभागे अन्वयसम्भवेऽपि न वृक्षादित्यादौ वृक्षादिनिष्ठावधिताया आश्रयतासम्बन्धावच्छिन्नाभावस्य वृक्षाद्यवधिकविभागेऽपि सत्त्वेनातिप्रसङ्गभिया तादृशबोधोपगमासम्भवात् वृत्त्यनियामकनिरूपकत्वसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वाद्विभागनिष्ठवृक्षादिनिरूपितमवधिमत्त्वमेव पञ्चम्या प्रतिपाद्यत इति नव्यमतानुसारेणाह अवधिमत्त्वेनेति। नन्ववधिमत्त्वमवधितानिरूपकत्वमेव तत्र वृक्षादेरवधितायामेवान्वयस्योपगन्तव्यतया एकदेशान्वयदोष:, निरूपकत्वं च तज्ज्ञानजनकज्ञानविषयत्वमिति ज्ञापकत्वापेक्षया गौरवमेवेत्यत आह—द्रव्यनिष्ठमिति। सम्बन्धविशेष:। अवधिमन्निष्ठोऽवधितानिरूपितसम्बन्धविशेष:। अवधिमत्त्वमेव स्वरूपसम्बन्धविशेष: तन्निरूपकत्वमेवावधित्वमिति वैपरीत्यस्यापि सम्भवेन विनिगमनाविरहादिति भाव:। अन्यदेतदिति। अनतिरिक्तत्वेऽप्यवधितात्वादेरनुगमकवर्णस्यानुगतप्रतीत्यनुरोधेनावश्यकत्वात्तस्य प्रवृत्तिनिमित्तत्वेन लाघवादिति भाव:। नन्ववधित्वादावेव पञ्चम्याश्शक्तौ ज्ञापकत्वादावधित्वादिसम्बन्धाग्रहे वृत्त्यग्रहेण पञ्चम्या: ज्ञापकत्वबोधकत्वग्रहासम्भवात् तत्प्रत्यायनेच्छया पञ्चमीप्रयोगो न स्यादित्यत आह—तत्सम्बन्धाग्रहेत्विति। ज्ञापकत्वादाववधित्वसम्बन्धाग्रहेऽपीत्यर्थ:। व्यवहार:। ज्ञापकत्वादिपरपञ्चमीप्रयोग:। शक्तिभ्रमात्। ज्ञापकत्वादौ शक्तिभ्रमात्। अपादानताघटकविभागत्वजात्यवच्छिन्ने शक्तिवादिनां मतमुपन्यस्यति। वृक्षादिति। अपैत्यर्थोऽपगम:, स्पन्दमात्रं न तु विभागावच्छिन्नस्पन्द: तर्हि त्यजितुल्यतया धात्वर्थतावच्छेदकविभागाश्रयतया वृक्षाद्यपादानस्य कर्मताप्रसङ्गात्, नाप्युत्तरसंयोगावच्छिन्नस्पन्द: वृक्षाद्भूमिं प्रयातीतिवत् वृक्षाद्भूमिमपैतीति प्रयोगप्रसङ्गात् पततीत्यत्राधस्संयोगावच्छिन्नस्पन्दस्पन्दत्वावान्तरजात्यवच्छिन्नो वा पतत्यर्थ:,

शक्त्यैव तादृशज्ञानोपस्थितिसम्भवात्। पर्वतो वह्निमान् वह्निसामग्रीमान् वा तस्मादित्यादिकस्तु न प्रयोगः सम्प्रदायविरोधादिति वदन्ति। यत्तु हेत्वन्वयानुरोधात् वह्निमानित्यादावपि ज्ञानलक्षणेति। तदसत्। पञ्चम्याः ज्ञापकत्वे ज्ञाप्यत्वे वा लक्षणयैवोपपत्तौ तत्र लक्षणायां मानाभावात्।

उभयत्र वृक्षादिनिष्ठविभागजनकत्वं पञ्चमीलभ्यमेवेति प्रवृत्तिनिमित्तलाघवाद्विभाग एवैतस्याः शक्तिरित्यर्थः। नन्वेवं जनकत्वं कुतो लब्धं तदन्तर्भावेण शक्तौ च न ज्ञापकत्वाद्यपेक्षया लाघवमित्यत आह जनकत्वं चेति। अथ यत्नादेः स्वनिष्ठविभागानुकूलक्रियाश्रयत्वाद्विभागमात्रस्य पञ्चम्यर्थत्वे स्वं स्वस्मात्पततीत्यादेरपि प्रयोगस्स्यादिति भेदप्रतियोगितावच्छेदकत्वसहित एव विभागः पञ्चम्यर्थो वाच्यः, स्वनिष्ठक्रियायास्स्वनिष्ठविभागजनकत्वेऽपि स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वविरहान्नोक्तातिप्रसङ्ग इति कुतो लाघवमिति चेन्न। भेदप्रतियोगितावच्छेदकत्वे लक्षणयैवोपपत्तौ तदन्तर्भावेण शक्तेरकल्पनादिति तात्पर्यवशाच्छक्यलक्ष्यार्थयोरपि युगपदन्वयोपगमादिति लक्ष्यार्थभेदप्रतियोगितावच्छेदकत्वविनिर्मोकेण पञ्चम्या विभागाबोधकत्वव्युत्पत्तेर्न विभागमात्रतात्पर्येण स्वं स्वस्मात्पततीति प्रयोगप्रसङ्गः। अथवा केवलविभागे पूर्वपूर्वप्रयोगाभावादेव न प्रयोगः। वस्तुतो भेदप्रतियोगितावच्छेदकत्वस्य पञ्चम्यर्थत्वेऽपि वृक्षात् पत्रं पततीत्यत्र पत्रात्पत्रं पततीति प्रयोगे दुर्वार पत्रान्तरनिष्ठभेदमादाय ततःप्रत्येतव्यस्य पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वे सति पत्रनिष्ठविभागजनकत्वस्य पत्रनिष्ठक्रियायामबाधात्। न च भेद एव पञ्चम्यर्थः तस्य स्वप्रतियोगितावच्छेदकत्वस्वाश्रयनिष्ठविभागजनत्वोभयसम्बन्धेन क्रियान्वयो वाच्य इति नोक्तातिप्रसङ्गः तत्पत्रनिष्ठक्रियावच्छिन्नप्रतियोगिताकभेदाश्रयपत्रान्तरनिष्ठविभागजनकतायास्तत्पत्रक्रियामसत्त्वेन तस्या उभयसम्बन्धेन पत्रान्तरान्वितभेदान्वयायोग्यत्वादिति वाच्यम्। पत्रान्तरनिष्ठेतत्क्रियावच्छिन्नभेदस्य वृक्षेऽपि सत्त्वेन तद्भेदाश्रयवृक्षनिष्ठविभागजनकतायास्तत्क्रियायां सत्त्वेन पत्रान्तरनिष्ठभेदस्योक्तसम्बन्धेन तत्क्रियान्वययोग्यताया अक्षतेः, अधिकरणभेदेनाभावभेदाभावात्। अथ

अत एवोक्तमावृत्तौ सैव प्रतिज्ञेति।

अत एव व्याचक्षते यतो द्रव्यं गुणाः कर्मेत्यत्र हेतुत्वं

पत्रादित्यत्राधेयतासम्बन्धेन पत्रविशिष्टभेद उपतिष्ठते विशिष्टस्यैव च स्वाश्रयनिष्ठविभागजनकत्वघटितोभयसम्बन्धेनान्वयः, विशिष्टस्याधिकरणमेव विशिष्टनिरूपितपरम्परासम्बन्धघटकं पत्राधेयत्वविशिष्टस्यैव चाऽधेयतासम्बन्धेन पत्रविशिष्टस्याधिकरणं विशेषणीभूतपत्रमेव न तु वृक्षः अतो नोक्तोभयसम्बन्धेन पत्रविशिष्टभेदस्य तत्क्रियान्वययोग्यता। भेदप्रतियोगितावच्छेदकत्वदलरक्षायै स्वपदेन पत्रान्तरविशिष्टभेदस्यैवोपादेयत्वात्, तदुपादाने तदाश्रयपत्रान्तर-विभागजनकत्वस्य तत्क्रियायां घटयितुमशक्यत्वादिति चेत् तर्हि विभाग एव शक्तिरस्तु तस्यैवाधेयतासम्बन्धेन प्रकृत्यर्थविशिष्टस्य स्वस्वा-श्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वसहितजनकतासम्बन्धेन तत्क्रियायामन्वय उपेयतां तावताप्युक्तस्थले पत्रात्पत्रं पततीति प्रयोगवारणसम्भवात्, आधेयतया यत्पत्रविशिष्टविभागजनकत्वं तत्क्रियायास्तादृशविशिष्टाश्रयतत्पत्रनिष्ठ-भेदप्रतियोगितावच्छेदकत्वस्य तत्क्रियायामभावादित्यलमधिकेन। अत्र जनकतासम्बन्धस्य वृत्त्यनियामकतया पूर्ववदाकाशात्पतति न वृक्षादित्यादा-वनुपपत्तिरिति विभागजनकत्वमेवार्थो वाच्य इति क्व लाघवमित्यस्वरसः। अत इति। निगमनस्थायं तस्मादिति पञ्चम्याः लाक्षणिकत्वान्निगमनवारणायेति शेषः। पञ्चम्यन्तेति। तथा च पञ्चमीपदस्य पञ्चम्यन्तत्वाभावान्नातिव्याप्तिरिति भावः। नन्वेवमपि पञ्चम्यन्ततत्पदस्य तादृशधूमादिपदवद्धूमादिज्ञाने लाक्षणिकत्वाद्दुवरिव निगमनातिव्याप्तिरत आह। तस्मादित्यत्रेति। तत्पदे न लक्षणेति। न धूमादिज्ञाने शक्तिविरह इत्यर्थः। तेन तत्पदशक्यधूमादिना तज्ज्ञानस्य सम्बन्धसत्त्वाच्छक्तिज्ञानशून्यकाले शक्यसम्बन्धग्रहात्पदान्तरस्येव तत्पदस्यापि तादृशार्थबोधकताया अशक्यापलापत्वाच्च तत्पदे लक्षणायास्तथा बोधकत्वस्य च दुरपवादत्वेऽपि न क्षतिः। लक्षणे च लाक्षणिकत्वं शक्यार्थ-तात्पर्यराहित्यम् अतो निगमने तत्पदस्य तात्पर्यविषयीभूतधूमज्ञानलाक्षणिकत्वेऽपि नातिव्याप्तिरित्यवधेयम्। शक्त्यैवेति। तत्पदस्य वक्तृबुद्धिस्थवाचकत्वाद्-धूमादिज्ञाने तात्पर्येण च प्रकृते तत्पदप्रयोगेण ज्ञानस्य वक्तृबुद्धिस्थताया आवश्यकत्वात्। विशिष्टहेतुज्ञानस्याप्रकान्तत्वेऽपि न क्षतिरिति भावः। नन्वेवं

यथासम्भवमुत्पादकत्वं ज्ञापकत्वं चेति। अत एव लोके किं वह्निमदिति पृष्टे तद् गृहं वह्निमदित्युत्तरिते कुत इति जिज्ञासा धूमवत्त्वादित्युत्तरं च। नहि तत्र ज्ञाने प्रश्नः। येन लक्षणया ज्ञानेनोत्तरयेत्।

न वा परकीयभाविप्रश्नानुरोधादजिज्ञासिताभिधानम्। न वा कुत इति प्रश्ने ज्ञातमित्यध्याहारः। मानाभावात्।

तत्पदेन यत्र हेतुनिर्देशः तत्र पञ्चम्यन्तलाक्षणिकपदाभावादव्याप्तिरित्यत आह-पर्वत इति। वह्निमान् तस्मादित्यत्र हेतुभूतधूमादेरप्रकारान्तत्वाद्धेतोः प्रकान्तत्वरक्षायै वह्निसामग्रीमानिति। अत्र वह्निरूपहेतोः प्रकान्तत्वेन तत्पदेन स्फुटतरतत्परामर्शादिति भावः। सम्प्रदायाननुरोधिनां तथा प्रयोगो दुर्वार एवेत्यत्र लक्षणे वदन्तीत्यस्वरसः सूचितः। प्रतिज्ञास्थसाध्यवाचकपदस्य ज्ञानलाक्षणिकत्वात् प्रतिज्ञायामपि पञ्चम्यन्तपदव्यावृत्तिः सम्भवतीति मतमुपन्यस्य दूषयति यत्त्विति। अथवा निगमनस्थवह्न्यादिपदस्य वह्न्यादिज्ञाने लाक्षणिकतया तस्मादिति पञ्चमा जनकत्वं जन्यत्वं वार्थः। तथाच पञ्चमीमादाय निगमने न व्यावृत्तिसङ्गतिः, अवधित्वादेरिव जनकत्वादेरपि स्वरूपसम्बन्धरूपतया-विनिगमकाभावेन जन्यत्वस्यापि वाच्यत्वेन पञ्चम्याऽलाक्षणिकत्वादितिवादिनोमतं दूषयति यत्त्विति एवं चाग्रे जन्यत्वे शक्तावपि ज्ञाप्यत्वे लक्षणैवेत्युपसंहारस्सङ्गच्छते। हेत्वन्वयानुरोधादिति। हेत्वनुशिष्टपञ्चम्या जन्यजनकभाव एवार्थः न तु ज्ञाप्यज्ञापकभावः "हेतुर्ना कारणं बीजमि" ति कोशाद्धेतुकारणपदयोः पर्यायतास्थितेः ज्ञापकार्थकताया हेतुपदस्य कोशादावदर्शनात्। तथा च प्रतिज्ञास्थवह्न्यादिपदस्य मुख्यार्थपरत्वे मुख्यार्थस्य वह्न्यादेर्धूमज्ञानाद्यजन्यत्वेन ज्ञाने लक्षणां विना पञ्चम्यर्थान्वयानुपपत्तिः स्यादिति भावः। ज्ञानलक्षणा। वह्न्यादिज्ञानलक्षणा, तत्पक्षे च तस्य विषयता सम्बन्ध एव मतुबर्थः ज्ञानविषयतापर्यन्तमेव वा वह्न्यादिपदार्थ इति भावः। ज्ञापकत्व इति। प्रकृत्यर्थवृत्तिकर्मत्वादीनां सुबर्थतावादिप्राचीनमतेन। ज्ञाप्यत्वे वेति। नव्यमतेन। तत्र। वह्न्यादिपदे। लक्षणायाम्। लक्षणानिर्वाहकतात्पर्ये। मानाभावादिति। जन्यजनकभावस्य पञ्चम्यर्थत्वेऽपि तल्लाक्षणिकताया आवश्यकत्वात्तत्रैव ज्ञानान्तर्भावेणोपपत्तावुभयत्र लक्षणया अयुक्तत्वादिति भावः। न च

दाहो दहनात् न जलात् जलं स्पर्शवत् रूपात् न गन्धात् नापि शब्दादित्यादौ नञर्थान्वयानुरोधात् जन्यत्वरूपहेतुमत्त्वं जन्यज्ञानविषयत्वरूपज्ञाप्यत्वञ्च पञ्चम्यर्थः। एवञ्च हेतुमत्त्वे शक्तावपि ज्ञाप्यत्वे लक्षणैव।

सुब्विभक्तेरानुशासनिकातिरिक्तार्थेन लक्षणानुशासनं विनापि तल्लक्ष्यार्थे विभक्तेस्साधुत्वे कर्मत्वादिरूपलक्ष्यार्थे षष्ठ्याद्यनुशासनववैयर्थ्यादिति कथमेतदिति वाच्यम्। हेताविति तृतीयाबोधकसूत्रस्थहेतुपदस्य कारणज्ञापकोभयपरतया तदनुवृत्तिमता "विभाषागुणेऽस्त्रियामि" ति सूत्रेण ज्ञापकत्वेऽपि पञ्चम्या अनुशिष्टत्वात्। यदपि तत्र गुणपदं न वैशेषिकसिद्धगुणपरं पुण्याभावान्न सुखीत्यादौ पञ्चम्या अनुपपतिरिति पराश्रितपरं तत्, पराश्रितत्वञ्च साध्यवदधिकरणाश्रितत्वं, तथा सति उक्तस्थले पुण्याभावप्रयोज्यसुखाद्यभावाश्रयवृत्तितया तत्प्रयोजकत्वात्पञ्चम्युपपत्तेः। तथा च ज्ञानकरणतावादिमते धूमादिपदार्थज्ञानरूपहेतुः साध्यवति न समवायादिना वर्त्तते। तथापि विषयतयैव तत्र वृत्तिरिति नानुपपत्तिः। एवं सति धूमज्ञानाद्वह्निमानिति प्रयोगस्स्यादिति तु नोदेश्यम्। ज्ञापकताबोधकपञ्चम्यन्ततत्तदर्थवाचकपदस्य तत्तदर्थज्ञान एवानादितात्पर्यात्। धूमज्ञानपदस्य धूमज्ञानज्ञान एव तात्पर्यात्। ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थतामते च ज्ञानविषयधूमादिरूपहेतोस्संयोगादिनैव साध्यपदाश्रितत्त्वान्नानुपपत्तिगन्धोऽपि। प्रतिज्ञास्थवह्न्यादिपदस्य मुख्यार्थपरत्वे मणिकृतोऽपि स्वरसं दर्शयति अत एवोक्तमिति। आवृत्ताविति। तेन ग्रन्थेन पुनरनुसन्धीयमानस्य प्रतिवादिवाक्यसहकारेण मध्यस्थसंशयजनकस्य पूर्वोक्तसाध्यवद्धर्मिबोधकवादिवाक्यस्य प्रतिज्ञात्वमभ्युपगतं तत्र च वह्न्यादिपदं न तज्ज्ञानादिपरं तथा सति विषयसंशायकत्वासम्भवाद्विप्रतिपत्तिवाक्याभ्यां कोट्युपस्थितिद्वारा मानसस्संशयो जन्यते इति सिद्धान्तिभिरपि वह्निः पर्वताऽभाव इत्यादित आकाङ्क्षादिरहिताच्छब्दात्संशयानुदयेन धर्मिणि तत्तदभावकोट्योः प्रत्येकं शाब्दधीजनकसामग्रीभ्यामेव परस्परविरोधेन शाब्दबोधमनुत्पाद्य मानसस्संशयो जन्यत इत्यभ्युपगमात्, प्रतिवादिनिवृत्तये पर्वते वह्निस्साधनीयः इत्यभिसन्धेः प्रथमतोऽनियमात् शब्दादेव पर्वते वह्निनिश्चयो भविष्यतीत्यभिप्रायेणापि

प्रथमं पर्वतो वह्निमानिति प्रयोगात्पूर्वप्रयुक्तवह्निपदस्य सर्वत्र ज्ञानपरत्वासम्भवाच्चेति भावः। वर्धमानापोध्यायानामपि पञ्चम्या ज्ञापकत्वबोधकत्वे सम्बादमाह अत एवेति। यथासम्भवमिति। समभिव्याहृतद्रव्यादिपदार्थे जन्यनित्यरूपे तत्तदन्वययोग्यतानुसारेणेत्यर्थः। नन्वावृत्तौ सैव प्रतिज्ञेति मणिकृतोऽभ्युपगमवादः न तु तत्र निर्भरः मध्यस्थसंशयात्परतोऽपि हेतुवाक्यसमभिव्याहृतसाध्यनिर्देशस्य साम्प्रदायिकत्वात्। हेतुत्वं यथा सम्भवमित्युपाध्यायग्रन्थोऽपि पञ्चमीप्रतिपाद्य हेतुत्वं क्वचित् समभिव्याहृतपदमुख्यार्थनिरूपितं क्वचिच्च लक्ष्यार्थनिरूपितं कारणत्वमित्यर्थकतयोपपद्यते, यदप्युक्तमुभयपदे लक्षणाऽनौचित्यमिति, तदपि शिथिलं ज्ञापकतायाः पञ्चम्यर्थत्वे सूत्रस्थहेतुपदस्योभयपरतया वाक्यभेदापत्तेः। अनुशासनानुरोधेनोभयत्र लक्षणाया एवोचितत्वादित्यतो युक्त्यन्तरमाह। अत एवेति। जिज्ञासा प्रश्नः। धूमवत्त्वादित्युत्तरं चेति। प्रयुज्यत इति शेषः। उपष्टम्भं विवृणोति। नहीति। ज्ञाने प्रश्न इति प्रश्नस्थवह्निपदं वह्निज्ञानपरमित्यर्थः। वह्नेरेव जिज्ञासितत्वादिति शेषः। लक्षणया ज्ञानेनोत्तरयेदिति। लक्ष्यार्थज्ञानपरमुत्तरं वाक्यमित्यर्थः। अपि तु प्रश्नसमानविषयकत्वानुरोधान्मुख्यार्थवह्निपरमेव तादृशोत्तरं प्रयुक्तमिति शेषः। तथा च तत्र वह्नौ कुत इति धूमादिति च प्रश्नोत्तरवाक्ययोरर्थे पञ्चम्यौ तदर्थान्वयानुरोधेन ज्ञापकत्वं ज्ञाप्यत्वं वा पञ्चम्यर्थो वाच्ये इति भावः। ननु प्रथमप्रश्नानुरोधाद्वह्निपदस्य वह्निपरत्ववत्कुत इति प्रश्नस्थपञ्चम्यर्थान्वयानुरोधात्तदुत्तरधूमादिति पञ्चम्यर्थान्वयानुरोधाच्च ज्ञानपरत्वमप्यविरोधादेकदाशक्यलक्ष्यार्थानन्वयेऽपि वह्निं बोधयित्वा वह्निज्ञानं बोधयिष्यतीत्यभिप्रायेणैवैकपदप्रयोगे बाधकाभावादत एव तथाविधतात्पर्यानुरोधेन नानार्थस्थले व्यांवृत्तिरित्यत आह नवेति। परकीयभाविप्रश्नानुरोधादिति। तादृशप्रश्नस्वीयतदुत्तरवाक्यद्वयस्थपञ्चम्यर्थान्वयानुरोधादित्यर्थः। अजिज्ञासिताभिधानम्। प्रथमजिज्ञासाऽविषयज्ञानप्रत्यायनेच्छया वह्निपदप्रयोगः, परकीयत्वेन भावित्वेन च प्रथमं कुत इति प्रश्नस्याज्ञानात्, परकीयवह्निज्ञानहेतुजिज्ञासाया अज्ञानेन वह्निज्ञान प्रत्यायनेच्छायाः प्रथमसम्भवादिति हेतुसूचनाय परकीयत्वभावित्वाभिधानम्। ननु तत्र ज्ञातमित्यध्याहारात्कुत इत्यादिपञ्चम्यर्थस्य ज्ञानेऽन्वयो न तु वह्न्यादावित्यत आह न चेति। प्रश्नस्थपदस्य उत्तरवाक्येऽनुषङ्गस्य व्युत्पत्तिसिद्धत्वात्कुत इत्यत्र ज्ञातमित्यध्याहारेणैव धूमादित्यत्रापि

ज्ञानान्वयसम्भवात् तत्राध्याहारान्तरविरहेऽपि न क्षतिरित्यतः कुत इत्यत्रैव अध्याहारश्शङ्कितः। मानाभावादिति। पदार्थान्तरान्वयस्य वक्तुरनभिप्रेतत्व-निश्चयेऽपि बोधस्यानुभाविकत्वात् सर्वत्राश्रुतपदकल्पनासम्भवादित्यर्थः। इदं त्ववधेयम्। गृहं वह्निमदिति प्रयोक्तुर्वह्निपदे ज्ञानतात्पर्यं कुत इति वाक्यजन्यज्ञानहेतुजिज्ञासाबोधेऽनुपयुक्तस्वाभिप्रायस्य स्वबोधाहेतुत्वात्, कुत इति पृच्छकपुरुषतात्पर्यस्यैव तत्रोपयोगात्। तथा च स्वजिज्ञासां बोधयितुकामस्य कुत इति प्रयोक्तुः परप्रयुक्तवह्निपदोपस्थापितज्ञानमादाय कुत इति पञ्चम्यर्थान्वयबोधो भवत्वित्यभिप्रायं ज्ञात्वैव प्रतिवक्ता प्रष्टुर्वह्निज्ञानहेतुजिज्ञासां कुत इति शब्दादनुषज्यमानस्वोक्तवह्निपदसहितात् ज्ञास्यति, एवं गृहं वह्निमदिति प्रयोक्तुः प्रथमं वह्निपदे ज्ञानतात्पर्यविरहेऽपि कुत इति प्रश्नानतरं प्रष्टुर्वह्निज्ञानहेतुजिज्ञासाया ज्ञाने किमर्थमन्यद्वह्निपदं प्रयोक्तव्यं पूर्वं वह्निपदाल्लक्षणयोपस्थापितज्ञानमादायैव धूमादिति वाक्यं धूमज्ञाने वह्निज्ञापकतां बोधयत्वित्यभिप्रायसम्भवात् तज्ज्ञानेन धूमादिति पञ्चम्यर्थस्य ज्ञानान्वयो भविष्यतीति किमनुपपन्नम्। नहि प्रयोक्तृपुरुषस्यै-कार्थतात्पर्यं पुरुषान्तरस्यान्यार्थतात्पर्यविरोधि अन्यैरप्यन्यतात्पर्येण प्रयुक्तान्यपि पदान्यादायान्यार्थपरश्लोकस्य मौनिना निबन्धनात्। न वा स्वीयप्राथमिकमन्य-तात्पर्यमुदीच्यमपरतात्पर्यं विरुणद्धि बीजाभावात्। युज्यते च वह्न्यादिपदस्य वह्न्यादिप्रकारकज्ञानविषयत्वे लक्षणा, साध्यान्वयिजन्यज्ञानविषयत्वस्य पञ्चम्यर्थत्वे गुणस्सत्तावान् द्रव्यत्वादित्यादिप्रयोगस्य दुर्वारतापातात्, द्रव्यत्वादिज्ञाप्यसत्त्वादेर्गुणादावपि सत्त्वात्, साध्यवाचकपदस्य लाक्षणिकत्वे पक्षान्वयिसाध्यतावच्छेदकविशिष्टसाध्यप्रकारकज्ञानविषयत्वरूपसाध्यवाचकपदार्थे पञ्चम्यन्तार्थलिङ्गज्ञानप्रयोज्यत्वान्वयात् द्रव्यत्वादिप्रकारकज्ञानप्रयोज्यसत्त्वादि-प्रकारकज्ञानविषयत्वस्य गुणादौ बाधेन कथितातिप्रसङ्गवारणसम्भवात्। न च जन्यज्ञानविषयत्वरूपपञ्चम्यर्थस्य साध्यविशिष्टपक्षेऽन्वयस्स्वीक्रियते सत्तादिरूपसाध्यविशिष्टगुणादिरूपपक्षस्य च न द्रव्यत्वादिलिङ्गज्ञाप्यतेति नातिप्रसङ्गः। वह्न्यादिमतःपर्वतादेः द्रव्यत्वादिरूपसाध्यविशिष्टस्य पृथिवीत्वादि-ज्ञाप्यत्वेऽपि वह्न्यादिविशिष्टस्य न तथात्वमिति विशेषणावच्छिन्न एव पञ्चम्याः ज्ञाप्यत्व बोधकत्वात् न पर्वतो वह्निमान् पृथिवीत्वादित्यादिप्रयोगः। विषयतायाः पर्याप्तिसम्बन्धेन विशिष्टेऽन्वयोपगमात् द्रव्यत्वादिरूपसाध्यवत्त्वेन

न च धूमादालोकवान्पर्वतो वह्निमान् धूमात् धूमाद्वह्निमत्सधर्मा पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायाम्, पर्वतो धूमाद्वह्निमानित्यादौ च तत्रत्यनिगमने चातिव्याप्तिः। प्रकृतपक्षान्वितस्वार्थबोधक-पदोपस्थापित प्रकृतसाध्यान्वितस्वार्थबोधकपञ्चम्यन्तलाक्षणिकपद-वदवयवत्वस्य विवक्षितत्वात्। यत्तु अयमात्मा ज्ञानादित्यत्राव्याप्तिः शक्त्यैव ज्ञानोपस्थितिसम्भवे लक्षणाविरहादिति।

वह्न्यादिरूपपक्षतावच्छेकविशिष्टपर्वतादौ पृथिवीत्वादिज्ञाप्यत्वेऽपि न क्षतिरिति वाच्यम्। एवमपि द्रव्यत्ववान् पर्वतो वह्निमान् धूमान्न पृथिवीत्वादित्यादौ नञर्थान्वयानुपपत्तेर्दुर्वारत्वात् पृथिवीत्वज्ञाप्यतापर्याप्त्यधिकरणद्रव्यत्वविशिष्ट-पर्वतादौ वह्न्यादिरूपविशेषणान्तरावच्छिन्नेऽपि तज्ज्ञाप्यत्वविरहासम्भवात्। अस्मन्मते च तत्र पर्वताद्यन्वयिनि वह्न्यादिप्रकारकज्ञानविषयत्वे पृथिवीत्वादि-रूपलिङ्गज्ञानप्रयोज्यत्वस्य पञ्चम्यन्तार्थस्याभावान्वयात्तदभावस्य तत्राबाधे-नानुपपत्तिविरहात्। एवं साध्ये ज्ञाप्यत्वान्वयपक्षेऽपि उक्तप्रयोगानुपपत्तिर्द्रष्टव्या वह्न्यादेरपि प्रमेयत्वादिना पृथिवीत्वादिज्ञाप्यत्वात्। यदि च प्रयोज्यत्वं समभिव्याहृतपक्षविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नविधेयता च खण्डशो लक्षणया पञ्चम्यर्थः अन्वयबलात्साध्ये पक्षांशे तत्तद्रूपेण हेतुज्ञाप्यतालाभः नञ्समभिव्याहारस्थले च लिङ्गज्ञानान्वितप्रयोज्यत्वरूपैकार्थस्य निरुक्तविधेयतारूपापरपञ्चम्यर्थेऽभावो नञा प्रत्याय्यत इत्युच्यते; तदा साध्यतावच्छेदकपक्षतावच्छेदकादेर्द्विधाभानाद्गौरवं। साध्यान्वयिनी पक्षविशेष्यतानिरूपितविधेयता, पक्षान्वयिनी साध्यविधेयतानिरूपितविशेष्यता वा पञ्चम्यर्थ इति विनिगमनाविरहः, एकपदस्यार्थद्वये खण्डशो लक्षणा, पदद्वयस्यैव वा प्रत्येकमर्थद्वये लक्षणेत्यत्र को विशेष इति। प्रसङ्गतः पञ्चम्याः जनकत्वज्ञापकत्वार्थकत्वं नञर्थान्वयस्थले अनुपपत्तिप्रदर्शनेन निराकुर्वन् जन्यत्वज्ञाप्यत्वार्थकतां व्यवस्थापयति। दाहो दहनादित्यादिना। गन्धस्याज्ञापकत्वं पक्षधर्मताविरहेण शब्दस्यातथात्वं व्याप्तेरपि विरहेणेति प्रदर्शनार्थमुभयोपादानम्। नञर्थान्वयानुरोधादिति। जनकत्वज्ञापकत्वयोः पञ्चम्यर्थत्वे निरूपकतासम्बन्धावच्छिन्नभावाप्रसिद्ध्या आश्रयतासम्बन्धा-वच्छिन्नभावप्रत्यय एव दाहस्पर्शादौ स्वीकार्यः, तथा च तत्र जलगन्धनिष्ठ-

तन्न। यद्विषयकज्ञानस्य हेतुत्वमवगतं तस्य व्याप्त्याद्दिजिज्ञासायां उदाहरणादिप्रयोगः।

न चेह ज्ञानविषयकत्वेनोपस्थितिर्विना लक्षणाम्। अन्यथा सुखादेरपि व्याप्त्याद्युपदर्शनप्रसङ्गात्। केचित्तु पञ्चम्यन्तलाक्षणिकपदवत्त्वनियतावयवताच्छेदकरूपवत्त्वं तादृशपदवत्त्वव्यभिचार्यवयवतावच्छेदकशून्यावयवत्त्वं विवक्षितमित्याहुः।

जनकत्वज्ञापकत्वयोरिव दहनरूपादिनिष्ठयोरपि तयोरभाववत्त्वेन दाहो न दहनात् जलं स्पर्शवन्न रूपादित्यपि स्यादिति भावः। न च दाहादिविशेषितजनकत्वादेरेवाभावः तत्र जलादिरूपप्रकृत्यर्थे प्रतीयत इति वाच्यम्। प्रथमान्तार्थस्य पञ्चम्यर्थविशेष्यतयैव शब्दात्प्रतीतेर्दाहादिविशेषितजनकत्वादिरूपप्रतियोगिनश्शब्दादनुपस्थितस्य नञाऽभावबोधनासम्भवात् पञ्चम्यर्थस्य प्रकृत्यर्थान्यपदार्थविशेषितस्यापि नञ्समभिव्याहारस्थले भानोपगमे व्युत्पत्तिभेदाद्गौरवम्। सर्वत्रैव प्रकृत्यर्थे विभक्त्यर्थो विशेषणं तत्र निरूपकतया समभिव्याहृतपदार्थान्तरमिति चानुभवसिद्धप्रथमान्तपदार्थविशेष्यताभङ्गेनासम्भवदुक्तिकम्। इन्धनस्य दाहो दहनादित्यादौ तुल्ययुक्त्या दहनादेर्दाहजनकत्वादिविशेष्यत्ववदिन्धनादेरपि दाहसम्बन्धादिविशेष्यतया इन्धनं दाहसम्बन्धि दहनो दाहजनक इत्यादिसमूहालम्बनबोधस्य स्वीकारेण वाक्यभेदप्रसङ्गात्। यत्रान्यस्य दाहो दहनान्नैतदिन्धनस्य तत्रैतदिन्धनस्य दाहो न दहनादिति प्रयोगानुपपत्तिश्चेति। अत्र वदन्ति। जन्यतायाः पञ्चम्यर्थत्वे दाहो दहनान्न परमाणुपरिमाणादित्यादिप्रयोगानुपपत्तिः। पारिमाण्डिल्यस्य कार्यसामान्येऽजनकतया परमाणुपरिमाणादिजन्यत्वाप्रसिद्धेः नञर्थे प्रतियोगितया अन्वयासम्भवात्, दाहाद्यन्वयिनि जन्यत्वे प्रकृत्यर्थस्य निरूपितत्वसम्बन्धेनाभावबोधोपगमे च वृत्त्यनियामकसम्बन्धावच्छिन्नाभावाभ्युपगमः, लक्षणया प्रकृत्यर्थनिरूपितत्वस्य प्रकृत्यर्थस्याभावान्वयोपगमेऽपि गगनं न परमाणुपरिमाणादित्यादौ जन्यत्वान्वययोग्यत्वानुपपत्तिः, पारिमाण्डल्यनिरूपितत्वाभाववज्जन्यत्वाभाववद्गगनमित्याकारिकायाः द्विधा नञर्थावगाहिप्रतीतेरुपगमे च घटो न घटजनकादित्यपि स्यात्, घटजनकाद्यनिरूपितजन्यत्वाभावस्य

नव्यास्तु पञ्चम्याः ज्ञानज्ञाप्यत्वे लक्षणयैवोपपत्तौ न प्रातिपदिकेऽपि लक्षणा आकांक्षावैचित्र्याच्च पदार्थैकदेशेऽपि।

घटादावबाधात्, दण्डाद्यनिरूपितजन्यत्वाच्छिन्नाभावस्य पटादौ बाधेन पटो न दण्डादित्यादेरनुपपत्तेश्च, गगनादेर्जन्यत्वभ्रमदशायां गगनं न पारिमाण्डल्यादित्यादिवाक्यस्याबोधकतापत्तेः पञ्चम्यर्थजन्यतासामान्ये लक्षणया प्रकृत्युपस्थाप्यपारिमाण्डल्यनिरूपितत्वगगनवृत्तित्वोभयत्वावच्छिन्नाभावबोधापगमे च जनकतायाः पञ्चम्यर्थत्वेऽपि तत्सामान्ये लक्षणया प्रकृत्युपस्थाप्यपारिमाण्डल्यनिरूपितत्वगगनवृत्तित्वोभयत्वावच्छिन्नाभावबोधोपगमे सामञ्जस्यम्। न च तत्र लक्षणाया आवश्यकत्वेऽपि दाहो न जलादित्यादौ लक्षणां विनैवोपपत्तये जन्यत्वस्य पञ्चम्यर्थत्वमिति वाच्यम्। जलादेरपि कार्यजनकत्वभ्रमदशायां दाहो न पारिमण्डल्यादित्यादाविवान्वयबोधस्यानुभाविकतया तदनुरोधेन तत्रापि जन्यतायां जलादिनिरूपितत्वाभावबोधस्यावश्योपेयत्वादिति। अत्रेदं तत्त्वम् शशविषाणं नास्तीति दाहो न पारिमाण्डल्यादिवाक्यमप्रमाणमेव तद्वाक्यस्य प्रामाण्यानुरोधेन लक्षणया पारिमाण्डल्यादिनिरूतित्वाभावबोधस्य क्वचिदभ्युपगमेऽपि दाहो न जलादित्यादिवाक्यतो लक्षणाज्ञानशून्यकालेऽप्यन्वयबोधस्यानुभाविकतया जन्यत्वाभावबोधकतापि तादृशवाक्यस्योपगन्तव्येति जन्यत्वं पञ्चम्यर्थ इति। जन्यज्ञानविषयत्वेति। जन्यत्वान्वयिप्रकृत्यर्थज्ञानं भ्रमभिन्नं ग्राह्यम् अतो व्याप्तिपक्षधर्मतावगाहिभ्रमरूपह्रदत्वादिज्ञानस्य पर्वतादौ वह्न्याद्यनुमापकत्वेऽपि पर्वतो वह्निमान् ह्रदत्वादित्यादिप्रयोगस्यानापत्तिः, न वा पर्वतो वह्निमान् धूमात् न ह्रदत्वादिप्रयोगानुपपत्तिः। यद्यपि यत्किञ्चिद्विषयकभ्रमान्यत्वं भ्रमसाधारणं भ्रमसामान्यान्यत्वं च तदभाववति तत्प्रकारकत्वरूपभ्रमत्वस्य तत्तत्प्रकारकसम्बन्धविशेषघटितत्वेनाननुगततया जगद्गतयावद्वस्तुभ्रमाणां तत्तद्वस्तुभ्रमत्वावच्छिन्नभेदकूटरूपमिति दुर्ज्ञेयम्। तथापि प्रकृतसाध्यहेतुपक्षकपरामर्शे प्रकारीभूता ये ये तत्तत्प्रकारकभ्रमभिन्नत्वमेव विशेषणं देयम्। यद्यपि धूमादिमत्यपि पर्वतादौ समवायादिसम्बन्धावच्छिन्नधूमाद्यभावसत्त्वात् पर्वतादौ धूमादिप्रमायास्सङ्ग्रहाय यत्सम्बन्धेन हेतुप्रकारकं ज्ञानं यत्र हेतुवाचकपदेन विवक्षितं तत्र तत्सम्बन्धावगाहितत्प्रकारकभ्रमान्यत्वं प्रतीयत इत्युपेयं, तथाच स्वरूपादिसम्बन्धेन

ज्ञाने प्रातिपदिकार्थो विषयित्वेनान्वेति कर्तृकृतीवकृतौ धात्वर्थः।

प्रमेयत्वादेः यत्र हेतुत्वं तत्सम्बन्धेन तद्भ्रमाप्रसिद्ध्या तदन्यत्वं दुर्ग्रहम्। तथापि तत्र तादृशभ्रमान्यत्वप्रतीतिरेव न स्वीक्रियते अतो न दोषः। वस्तुतस्तु स्वानुयोगिनिष्ठविशेष्यतानिरूपितत्व स्वप्रतियोगिनिष्ठत्व स्वावच्छिन्नत्त्वैतत्त्रि-तयसम्बन्धेन सम्बन्धविशिष्टान्यप्रकारताशालित्वमेवानुगतभ्रमत्वं सुवचम् अतो भ्रमविषयतयैव प्रमेयत्वादि वाच्यादि ज्ञापकमिति भ्रमदशायां वाच्यं प्रमेयत्वादित्यादिप्रयोगस्य तादृशप्रयोगाधीनबोधस्य वारणाय प्रमेयत्वादिज्ञान-स्यापि तद्भ्रमान्यत्वेनैव पञ्चमीप्रकृत्यर्थता वाच्या, सा चाप्रसिद्ध्या न सम्भवतीति दूषणमनवकाशम्, निगमनस्थपञ्चम्याः लाक्षणिकत्वमुपसंहरति। एवं चेति। एवं च पञ्चम्या जन्यज्ञाप्यभावार्थकत्वसिद्धौ च। हेतुमत्त्वे। जन्यत्वे। ज्ञाप्यत्वे लक्षणैवेति। जन्यत्वापेक्षया तस्य शरीरगौरवादिति भावः। न चेति। धूमादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञाघटितन्याये आलोकादेर्हेतुत्वे प्रकृतहेत्वन्वितार्थकपञ्चमीनिवेशनेनाव्याप्तिवारणसम्भवाद्धूमादिति हेत्वभिधानम्, अत्र पञ्चम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्वविशेषणमात्रेणातिव्याप्ति-वारणसम्भवात् तादृशसाध्ये विशेषणीयोपस्थापितान्तविशेषणव्यावृत्तये स्थलान्तरेऽतिव्याप्तिं दर्शयति। धूमाद्वह्निमत इति। अत्र वह्निमत्त्वेन पक्षस्यापि भानात् विवक्षणीयविशेषणे पक्षतावच्छेदकपर्यन्तनिवेशस्यात्रैव व्यावृत्तिः, साध्यतावच्छेदकावच्छिन्नत्वांशनिवेशनाय स्थलान्तरेऽतिव्याप्तिं दर्शयति। पर्वतो धूमाद्वह्निमानिति। तत्रत्यनिगमने। तस्माद्धूमाद्वह्निमानित्याकारके। अत्र च पञ्चम्यर्थविशिष्टवह्नित्वमेव साध्यतावच्छेदकमिति तदवच्छिन्ने पञ्चम्यर्थानन्वयात् साध्यतावच्छेदकविशिष्टान्वितस्वार्थबोधकत्वनिवेशने नातिव्याप्तिः धूमाद्वह्निमतस्सधर्मेत्यादौ प्रकृतपक्षतावच्छेदकावच्छिन्ने यस्य साध्यस्य द्वितीयवह्निपदजन्योपस्थितिवशादन्वयः प्रथमवह्निपदोपस्थापिते तत्रैव प्रतिज्ञाघटकपञ्चम्यर्थस्यान्वयात्पक्षान्वितसाध्यान्वित स्वार्थबोधकत्वविशेषणेन तद्वारणासम्भवात्साध्ये प्रकृतपक्षान्वितत्वं विहाय प्रकृतपक्षान्वितस्वार्थबोधक-पदोपस्थापितत्वं निवेशितम्। यद्यपि उभयत्र वह्निपदेनैकमेव साध्यमुपस्थाप्यते अतो नैतावताऽप्युक्तातिव्याप्तिवारणसम्भवः। तथापि प्रकृतपक्षतावच्छेदक कावच्छिन्नविशेष्यतानिरूपिता या विशेषणता तदवच्छिन्नसाध्यतावच्छेद-

यद्धर्मविशिष्टश्च हेतु: प्रयुज्यते आकांक्षादिवशात्तद्धर्मविशिष्टस्यैव व्याप्यत्वमुपदर्श्यते अन्यथा यथार्थधूमज्ञानादित्यादिप्रयोगेऽपि धूमादेर्व्याप्यत्वोपदर्शनप्रसङ्ग इति प्राहु:।

विशिष्टसाध्यीयविशेष्यतानिरूपित स्वार्थविषयताप्रयोजकत्वं बोधकान्तार्थ:। अत: पञ्चमीत्वमनिवेश्यं प्रयोजनाभावात्, उपनयोपस्थापितपक्षविशेषणतापन्नसाध्यान्वितार्थबोधकपञ्चम्यन्ततत्पदमादायाननुषङ्गपक्षेऽपि निगमनेऽतिव्याप्तेर्वारणं लाक्षणिकपदप्रयोजनं। अयमात्मा ज्ञानादित्यादौ ज्ञानपदं मुख्यार्थपरमेव पञ्चम्यर्थान्वयस्य तत्रैव सम्भवेन लक्षणाबीजभूतान्वयानुपपत्तिविरहादित्यभिमानिनामुक्तलक्षणेऽव्याप्तिशङ्कामुद्धर्तुमुपन्यस्यति। यत्त्विति। शुद्धज्ञानत्वावच्छिन्नेन समं पञ्चम्यर्थान्वयसम्भवेऽप्यनुमितिजनकज्ञानविषयतयोपस्थितावेव ज्ञानरूपहेतौ तद्विषयतानिर्वाहकव्याप्त्याकांक्षया यो ज्ञानवान् स आत्मेत्युदाहरणादि प्रयोगसम्भव इति ज्ञानविषयकज्ञानत्वावच्छिन्ने तात्पर्यानुपपत्त्या लक्षणाया आवश्यकत्वमिति समाधत्ते। तन्नेत्यादिना। यद्विषयकज्ञानस्य यद्विषयकज्ञानत्वावच्छिन्नस्य हेतुत्वं अनुमितिजनकत्वम्। तस्य व्याप्त्यादिजिज्ञासायाम्। तुल्यवित्तिवेद्यतया अर्थतो वा तत्र प्रतीतानुमापकज्ञानविषयतानिर्वाहकाकाङ्क्षायामित्यर्थ:। उदाहरणादिप्रयोग:। उदाहरणोपनयाभ्यां तन्निष्ठव्याप्तिपक्षधर्मताप्रदर्शनम्। यद्यपि ज्ञानविषयकज्ञानत्वावच्छिन्ने ज्ञानपदतात्पर्येऽपि मुख्यार्थज्ञानत्वाच्छिन्नपरत्वमक्षतमेवेति पूर्वोपदर्शितमुख्यार्थतात्पर्यराहित्यरूपं लाक्षणिकत्वं नोपपद्यत इति। तथापि शक्यतावच्छेदकविलक्षणरूपावच्छिन्न तात्पर्यकत्वमेव लाक्षणिकत्वमतो न दोष:। न शुद्धज्ञानत्वावच्छिन्नेऽनुमापकत्वबोधेऽपि तन्निर्वाहकव्याप्त्यादिप्रदर्शनसङ्गतिरित्यत आह-। अन्यथेति। जनकज्ञानविषयताऽप्रतीतेऽपि ज्ञाने वास्तवतादृशविषयतां पुरस्कृत्य व्याप्त्युपदर्शने सुखादेरप्यात्मत्वानुमापकज्ञानविषयतया अयमात्मा ज्ञानादित्यत्र यस्सुखी स आत्मेत्युदाहरणप्रयोगप्रसङ्गादित्यर्थ:। तथाच सुखादौ व्याप्त्यादिप्रदर्शनेऽपि ज्ञानेऽनुमापकत्वनिर्वाहकव्याप्त्यादिमद्विषयकत्वपर्यन्तलाभादाकांक्षाया अपूरणात् यथा सुखादौ न तत्प्रदर्शनं तथैवैतन्मते ज्ञानेऽपि न तत्प्रदर्शनमुपपद्यत इति भाव:। उक्तप्रतिज्ञादावतिव्याप्तिवारणाय प्रकारान्तरेण लक्षणं परिष्कुर्वतां मतमाह। केचित्त्विति।

इतरान्वितस्वार्थबोधकत्वे सति, स्वीयं यदन्त्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे सति अन्त्यपदवत्त्वे सति स्वीयानंत्यपदार्थविशेष्यकान्वयबोधाजनकान्यत्वे च सति न्यायावयवत्वं प्रतिज्ञात्वम्। प्रतिज्ञाहेत्वोरुपनयनिगमनयोः स्वार्थौ परम्परमन्वितौ। न तूदाहरणस्य केनापि। पदं विभक्त्यन्तम्। तेन निगमने नातिव्याप्तिः।

पञ्चम्यन्तेति। कस्याश्चित् प्रतिज्ञायाः पञ्चम्यन्तलाक्षणिकपदवत्त्वेऽपि धूमज्ञानज्ञाप्य लोकवान्पर्वतो वह्निमानित्यादिप्रतिज्ञाया व्यभिचारेणावयवतावच्छेदकं प्रतिज्ञात्वं पक्षादिभेदेन भिन्नमपि न तादृशपदवत्त्वनियतमिति नातिप्रसङ्ग इति भावः। तादृशावच्छेकं हेतुत्वं दुर्वचं, सुवचत्वे तदेव लक्षणमित्यन्यथा परिष्कुरुते। तादृशेति। तादृशपदम्। पञ्चम्यन्तलाक्षणिकपदम्। प्रतिज्ञात्वादिकं च तादृशपदाद्यघटितस्यापि प्रतिज्ञादेस्सत्त्वेन तादृशपदवत्त्वव्यभिचारीति तच्छून्यत्वाभावान्न प्रतिज्ञादावतिव्याप्तिः। तादृशपदवत्त्वव्यभिचारिमेयत्वादिशून्यत्वाप्रसिद्ध्याऽवयवतावच्छेदकेति। अत्र प्रतिज्ञात्वहेतुत्वसाधारणस्यावयवतावच्छेदकत्वस्यैकस्याभावात् प्रतिज्ञात्वादिकं विशिष्योपादाय तच्छून्यत्वं निवेश्यम्, तथाच हेतुत्वव्यावर्तनायोपात्तं तादृशपदवत्त्वव्यभिचारित्वविशेषणमनर्थकम्। यदि च प्रतिज्ञात्वहेतुत्वादिसाधारणं प्रतिज्ञात्वादिपञ्चान्यतमत्वावयवतावच्छेदकत्वं तदा तत्र हेतुत्वप्रवेशे तस्यान्यादृशस्य दुर्वचत्वात् सुवचत्वे तदेवास्तु लक्षणम्। अन्यतममध्ये हेतुत्वमन्तर्भाव्य तद्व्यावृत्तये विशेषणान्तरदानं च प्रक्षालनाद्धीति न्यायनायुक्तमित्यस्वरसः–पञ्चम्यन्तेत्यादिलक्षणकर्तुरनुमतां धूमादित्यादिवाक्यस्थधूमादिपदस्य ज्ञाने लक्षणां स्वातन्त्र्येण दूषयति। नव्यास्त्विति ज्ञानज्ञाप्यत्वे लक्षणयेति। ज्ञाप्यत्वलक्षणाया आवश्यकत्वात्तत्रैव ज्ञानांशस्याप्यधिकस्य प्रवेशेनैव धूमादिपदस्य मुख्यार्थपरत्वेऽपि धूमादिज्ञानज्ञाप्यत्वलाभसम्भव इत्यर्थः। न प्रातिपदिके। न पञ्चमीप्रकृतिधूमादिपदे। नन्वेवं ज्ञानस्य पञ्चम्यर्थैकदेशतया तत्र धूमादिपदार्थस्यान्वयायोगात् धूमादिज्ञानालाभः। नच ज्ञाप्यत्वस्य पञ्चम्यर्थत्वेऽपि जन्यत्वरूपतदेकदेशे कथं धूमादिपदार्थतज्ज्ञानान्वयसम्भव इति वाच्यम्। चैत्रस्य पुत्रो घटादन्य इत्यादौ ससम्बन्धिपदार्थैकदेशे जन्यत्वादौ पदार्थान्तरस्यान्वयदर्शनान्निष्प्रतियोगिक

एव पदार्थैकदेशे जन्यत्वादौ पदार्थान्तरस्यान्वयदर्शनान्निष्प्रतियोगिक एव पदार्थैकदेशे इतरान्वयस्याऽव्युत्पन्नत्वात्। न च स्वतन्त्रोपस्थित एव पदार्थे इतरान्वयजिज्ञासा जायते नत्वितरविशेषणतयोपस्थिते अत एव गौर्नित्येत्यादौ स्वतन्त्रगोत्वाद्युपस्थितये लक्षणेत्यत आकाङ्क्षादिविरह एवं पदार्थान्तरस्य पदार्थैकदेशेऽनन्वये बीजं न च सप्रतियोगिनिष्प्रतियोगिकदेशसाधारण इति वाच्यम्। फलानुरोधेन सप्रतियोगिकपदार्थे विशेषणतयोपस्थितेऽपि प्रतियोगिजिज्ञासा जायत इति कल्पनात्। न च ज्ञानादिसविषयकपदार्थेऽपि तथोपस्थिते विषयविशेषजिज्ञासा जायत इति युज्यते कल्पकाभावादित्याशङ्क्य सविषयककृतिदृष्टान्तेन पदार्थैकदेशे ज्ञानेऽपि विषयाकाङ्क्षां व्यवस्थापयति। आकाङ्क्षावैचित्र्याच्चेति। कुत्रचित्स्वतन्त्रोपस्थित एवेतराकाङ्क्षा कुत्रचिद्विशेषण-तयाऽप्युपस्थिते कस्यचिदाकांक्षेति विषयस्वभावाधीनतयाऽऽकाङ्क्षावैचित्र्या-दित्यर्थः। कर्तृकृतीवेति। वक्तेत्यादौ तृजाद्यर्थकर्त्राद्येकदेशे कृतौ यथा विषयत्वेन पाकादिक्रियाऽन्वेतीत्यर्थः। इदं तु बोध्यम्। जिज्ञासारूपाकाङ्क्षायाः शाब्दधीहेतुत्वं अजिज्ञासोरपि शाब्दबोधोदयान्मणिकृता निराकृतं, तथाचाकाङ्क्षाविरहः पदार्थैकदेशे पदार्थान्तरानन्वये न बीजम्। गौर्नित्येत्यादौ पदार्थैकदेशे गोत्वे नित्यादिपदार्थ-भेदान्वयबोधप्रयोजिकायास्समानविभक्तिकतत्पदसमभिव्याहाररूपाया आकाङ्क्षाया अक्षतत्वादतः पदाधीनायास्स्वतन्त्रतदुपस्थितेः पदार्थान्तरस्य तत्रान्वयबोधे हेतुता वाच्या। एवं च ज्ञानविशिष्टार्थकात्मादिपदघटितादात्मा न द्रव्यमित्यादिवाक्यात्पदार्थैकदेशे ज्ञाने द्रव्यभेदान्वयवारणाय दण्डजन्यो न दण्डजन्य इत्यादिवाक्यात्पदार्थैकदेशजन्यत्वादौ दण्डजन्यभेदान्वयबोधवारणाय च कल्पनीये ज्ञानाद्यंशे इतरान्वयबोधे स्वतन्त्रज्ञानाद्युपस्थितिहेतुत्वे कार्यतावच्छेदककोटिप्रविष्टेतरविषयतायां विषयतासम्बन्धावच्छिन्नप्रकारतान्यत्वं विशेषणं देयम्। वस्तुतो ज्ञानादिविषयकशाब्दबोधे स्वतन्त्रज्ञानाद्युपस्थितेर्हेतुत्वेऽपि पञ्चम्यादिजन्यज्ञानज्ञाप्यत्वोपस्थितिप्रकृतिजन्यधूमाद्युपस्थिति योग्यताज्ञानादि-घटितशाब्दसामग्र्याः पदार्थैकदेशे ज्ञानादौ विषयतादिसम्बन्धेन धूमादिप्रकारक-शाब्दबोधजनने बाधकाभावः, तादृशसामग्र्यां स्वतन्त्रज्ञानाद्युपस्थितेर-नन्तर्भावात्तादृशोपस्थितेर्ज्ञानादौ द्रव्यभेदान्वयबोधप्रयोजकसामग्र्यान्तरेष्वेव निवेशात्। न चैवं स्वतन्त्रज्ञानाद्युपस्थितेर्व्यभिचारेण हेतुत्वमेव न सम्भवतीति वाच्यम्। यतो यत्रैकरूपावच्छिन्ने पदे पदान्तराकाङ्क्षा गृहीता अन्यरूपेण च

वृत्तिः गृहीता तत्रातिप्रसङ्गवारणाय तत्तदानुपूर्वीविशेषरूपपदविशेषत्वप्रकारेण गृहीत वृत्तिकपदजन्यतत्तत्पदार्थोपस्थितेर्हेतुता वाच्या तथा सति तद्धर्मप्रकाराकाङ्क्षादिग्रहस्य तद्धर्मप्रकारेण गृहीतवृत्तिकपदाधीनोपस्थितेश्च परस्परसहकारेणैव फलजनकत्वोपगमनोक्तातिप्रसङ्गवारणसम्भवात् तथाच नानानुपूर्वीप्रकारकपद-ज्ञानजन्योपस्थितीनामेकविधशाब्दबोधे विभिन्नरूपेण हेतुतया व्यभिचार आवश्यक इति तद्वारणवर्त्मनैव दर्शितव्यभिचारस्य वारणमिति। एतेन जन्यत्वांशे इतरान्वयबोधे स्वतन्त्रजन्यत्वोपस्थितेः कार्यकारणभावे कार्यतावच्छेदक-कोटिप्रविष्टेतरविषयताया निरूपितत्वसम्बन्धावच्छिन्नप्रकारताभेदनिवेश-नमुभयवादिसिद्धम् अन्यथा औपगव इत्यादौ तद्धितार्थापत्यैकदेशजन्यत्वे निरूपितत्वसम्बन्धेन प्रकृत्यर्थान्वयानुपत्तेर्ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थत्वमते च निरूपितत्वसम्बन्धेन प्रकृत्यर्थान्वयानुपपत्तेर्ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थत्वमते च स्वतन्त्रज्ञानोपस्थितिजन्यतावच्छेदकघटकज्ञानविषयता निरूपितेतरविषयतायां विषयतासम्बन्धावच्छिन्नप्रकारताभेदनिवेशनमधिकमिति प्रत्युक्तम्। तदनिवेशेऽप्युपदर्शितरीत्या सामञ्जस्यात्। वैयाकरण इत्यादौ तदधीते तद्वेदेत्यनेन विहिततद्धितार्थस्य वेत्तुरेकदेशज्ञाने विषयतया प्रकृत्यर्थस्यान्वयोपपत्तये उक्तस्थले विषयतासम्बन्धावच्छिन्नप्रकारता भेदनिवेशस्य सर्वमत एवावश्यकत्वाच्चेति। प्रकृतेर्मुख्यार्थपरत्वे युक्त्यन्तरमाह। यद्धर्मविशिष्टश्चेति। यद्धर्मविशिष्टः पञ्चमीप्रकृत्यर्थः तद्धर्मविशिष्टस्यैव पञ्चम्या जनकज्ञानविषयत्वबोधलाभादिति भावः। अन्यथा। पञ्चम्या ज्ञानजनकत्वेन बोधितप्रकृत्यर्थज्ञाने विषयत्वेन विशेषणतामवलम्ब्य विषये व्याप्त्युपदर्शनसङ्गमने। यथार्थधूमज्ञानादित्यादि-प्रयोगेऽपीति।। तत्रापि शक्त्युपस्थितज्ञाने पञ्चम्यर्थज्ञापकतान्वयेन धूमादेः ज्ञापकज्ञानविषयत्वलाभेन धूमादौ व्याप्यत्वदर्शनं स्यात्। अस्मन्मते च ज्ञानज्ञाप्यत्वस्यैव पञ्चम्यर्थतया धूमज्ञानज्ञानस्यैव तत्र ज्ञापकत्वं प्रतीयते न तु धूमज्ञानस्येति नातिप्रसङ्ग इति। न च पञ्चम्याः केवलज्ञाप्यत्वार्थकत्व-मतेऽप्युक्तस्थले ज्ञानपदस्य लक्ष्यार्थे ज्ञानविषयकज्ञान एव तात्पर्यात् न धूमज्ञाने मुख्येऽप्यर्थे ज्ञापकता लाभ इति न धूमादौ व्याप्यत्वोपदर्शनप्रसङ्ग इति वाच्यम्। मुख्यार्थपरत्वे बाधकविरहेण तत्तात्पर्येणापि प्रयोगसम्भवात्। न वा यत्र पदे अर्थान्तरे निरूढलक्षणाशक्त्युपस्थापितार्थस्तेन न बोध्यते, तद्बोधौपयिकाकाङ्क्षादिसामग्रीकाले तद्बोधस्य दुर्वारत्वात्। अथ तत्र

शक्यार्थबोधस्यापि सम्भवेन तत्रापि कस्यचित्कदाचित्तात्पर्यं सम्भवतु तथापि तत्रानादितात्पर्यविरहात् न तत्तात्पर्येण न्यायान्तर्गतपदप्रयोगसम्भव इति चेत्। माभून्मुख्यार्थतात्पर्यकज्ञानपदघटितयथार्थधूमज्ञानादित्यादिवाक्यसमुदायस्य न्यायत्वम्, तथापि ज्ञाप्यत्वमात्रस्य पञ्चम्यर्थत्वे न्यायानन्तर्गतमुख्यार्थपरज्ञानपद-घटित यथार्थधूमज्ञानादित्यादिवाक्यस्य धूमादौ व्याप्त्याकांक्षाप्रयोजकधीजनकत्वं दुर्वारमेव तच्चानुभवविरुद्धम्। न च ज्ञानज्ञाप्यत्वे पञ्चम्याः लक्षणापक्षेऽपि केवलज्ञाप्यत्वे स्वारसिकलक्षणयोपस्थिते धूमज्ञाने ज्ञानजनकताबोधसम्भ-वादुक्तातिप्रसङ्गो दुर्वारः तत्रेष्टापत्तौ च प्रकृतेऽपीष्टापत्तिसम्भव इति वाच्यम्। स्वारसिकलक्षणया पञ्चम्युपस्थितविषयत्वरूपार्थान्तर इव तादृशज्ञाप्यत्वेऽपि प्रकृत्यर्थान्वये आकाङ्क्षाया मयाऽनभ्युपगमात् धूमादिज्ञानादित्यतो धूमज्ञानस्य ज्ञापकत्वाबोधनादिति भावः। यत्तु धूमज्ञानादित्यतो लक्षणयोपस्थितधूमरूपविषय-विशिष्टज्ञानज्ञाने ज्ञापकताभाने ज्ञापकज्ञानविषयत्वं धूमज्ञान इव तद्विषये धूमेऽपि भासत इति प्रकृतेर्लाक्षणिकतामते तत्र धूमे व्याप्त्याकाङ्क्षया तदुपदर्शनप्रसङ्गो दुर्वार इत्याशयवर्णनम्। तदसत्। तथापि स्वमतेऽपि तद्दोषस्य दुर्वारत्वात् पञ्चम्यर्थैकदेशे ज्ञाने मुख्यार्थधूमरूपविषयविशिष्टज्ञानान्वयेऽपि धूमे ज्ञापकज्ञानविषयबोधस्य दुर्वारत्वात्। न च तथापि पञ्चमीप्रकृत्यधीनो-पस्थितिविशेष्यत्वं यस्य तस्यैव व्याप्त्यादिकं प्रदर्श्यत इति नियमस्य स्वयमुपगमात् न स्वमते दर्शितातिप्रसङ्ग इति वाच्यम्। तत्र धूमादौ ज्ञापकज्ञानविषयताबोधादाकाङ्क्षासम्भवे तादृशनियममननुरुध्य व्याप्त्याद्युपदर्शन-स्यानपवादात्। वस्तुतो लिङ्गज्ञानं प्रकृत्यर्थे पञ्चम्यर्थे वाऽन्तर्भवतूभयथापि धूमज्ञानादित्यत्र धूमज्ञान एव साध्यज्ञापकतावच्छेदकपक्षतावच्छेदका-वच्छिन्नविषयतानिरूपितप्रकारता लभ्यते सैव विषयता तस्य व्याप्तिपक्ष-धर्मतानिर्वाह्येति तदाकाङ्क्षया तत्रैव व्याप्त्याद्युपदर्शनं तद्ज्ञानविशेषणधूमे च तादृशविषयतावच्छेदकत्वरूपविषयतैव सा च न तत्र व्याप्त्यादिनिर्वाह्या अतो न तत्र तदाकांक्षेति धूमादित्यादिप्रयोगे धूमत्वादाविव धूमज्ञानादित्यत्र धूमादौ व्याप्त्यादेर्नोपदर्शनमिति।

॥ इति गादाधरीये हेतुग्रन्थः ॥

मूलोक्तलक्षणापेक्षया लघूनि प्रतिज्ञाद्यवयवलक्षणानि स्वयमाह। इतरान्वितेति। प्रथमसत्यन्तस्य हेतूपनयनिगमनसाधारणस्योदाहरणव्यावर्तनप्रयोजनं स्वयमेव दर्शयिष्यते प्रतिज्ञाहेत्वोरित्यादिना, इतरान्वितत्वं स्वभिन्नावयवार्थान्वितत्वं स्वाघटकपदोपस्थापितार्थान्वितत्वं वा। एवं चेतरावयवसहकारेण स्वाघटकपदसहकारेण वा बोधकत्वं समुदायार्थः। तेनोदाहरणबोध्यार्थप्रविष्टसाध्यादेः प्रतिज्ञादिजन्यबोधे इतरान्वितत्वेऽपि न क्षतिः। द्वितीयसत्यन्तानन्तरमग्रिमं न्यायावयवत्वमिति सम्बध्यते। द्वितीयसत्यन्तं च हेतुनिगमनवारकं हेतुजन्ये तस्मादितरेभ्यो भिद्यते इत्यादिनिगमनजन्ये च बोधे विभक्त्यर्थस्य विशेष्यतया विवक्षीयविभक्त्यन्तपदार्थविशेष्यकत्वविरहाद्वह्निव्याप्यधूमवाश्चायं तस्माद्वह्निमानित्याद्युपनयनिगमनजन्यबोधे च विभक्तयन्तपदमध्येऽन्तर्भूतेदम्पदमतुपाद्यन्तपाद्यन्तपदार्थयोर्विशेष्यतया अन्त्यभिन्ने स्वीयपदार्थविशेष्यकत्वविरहाद् अन्त्यत्वञ्च स्वघटकपदेषु चरमत्वम्। उपनयादिस्थेदमादिपदानामपि न पदसामान्यमध्ये चरमत्वं तदुत्तरमप्यन्यवाक्यघटकपदसत्त्वादित्यतः स्वघटकत्वं पदविशेषणम्। एवञ्च निगमनघटकपदेषु यच्चरमं तदन्योपनयस्थेदंपदार्थविशेष्यकबोधं प्रत्युपनयसहकारेण स्वार्थबोधजनके निगमने तादात्म्येन द्रव्यादिसाध्यके इदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ स्वघटकविभक्त्यन्तपदेषु यदन्त्यं सत्तादिपदं तदन्यविभक्त्यन्तप्रतिज्ञास्थद्रव्यादिपदार्थविशेष्यकान्वयबोधजनके हेतौ चातिव्याप्तिवारणाय स्वीयत्वमन्त्यभिन्नपदविशेषणम्। अत्र स्वत्वपुरस्कारेण लक्ष्यव्यक्तीनां निवेशादननुगम इति प्रतियोगिनि स्वत्वं निवेश्य लक्षणान्तरमाह। अन्त्यपदवत्त्व इति। अत्राप्युदाहरणवारकं प्रथमसत्यन्तमनुषज्यते, द्वितीयसत्यन्तेन वैकल्पिकं सत्यन्तद्वयम्, धूमादित्यादिहेतौ विभक्त्यन्तान्त्यपदाप्रसिद्ध्या एकपदमात्रघटकतत्पदसाधारणस्यान्त्यत्वस्य निर्वचनेऽप्यन्त्यभिन्नविभक्त्यन्तस्वीयपदाप्रसिद्ध्या स्वपदेनान्यस्यैवोपादेयतया स्वीयानन्त्यपदार्थविशेष्यकशाब्दबोधाजनकं यत्तदन्यत्वसत्त्वादतिव्याप्तिरतोऽन्त्यपदत्वे सतीति। अन्त्यपदवत्त्वं च स्वघटकपदोत्तरपदाघटकं यत्स्वं तदन्यत्वं न तु स्वघटकपदोत्तरपदाघटित्वं लक्ष्यभूतप्रतिज्ञाव्यक्तीनां स्वपदेनोपादेयतया अननुगमतादवस्थ्यात्, अन्त्यपदवतो हेतुविशेष्योपनयनिगमनयोस्तद्वतोस्स्वीयानन्त्यपदार्थविशेष्यकबोधजनकयोस्तदन्यत्वासत्त्वान्नातिव्याप्तिः। न चोपनय-

घटकानन्त्यपदार्थहेतुमदादिविशेष्यकबोधजनकतदेकदेशमतुबन्तादेर्भेदस्य तद्घटितसमुदायात्मकोपनयादावसत्वात्तादृशबोधजनकं स्वं नोपनयादिक-मित्यतिव्याप्तिरिति वाच्यम्। तादृशबोधजनकत्वं यादृशसमुदायवृत्तितादृश-समुदायरूपस्वभिन्नत्वनिवेशे वाऽनतिप्रसङ्गात्। उपनयाद्येकदेशवृत्ति-तादृशबोधजनकताया इदमाद्यन्तपदघटितसमुदायात्मकोपनयावृत्तितया तदन्तपदसमुदायात्मकोपनयावृत्तितया तदन्तपदसमुदायात्मकोपनयादेस्ता-दृशसमुदायात्मकत्वेन तद्भिन्नत्वाभावात्। तादृशसमुदायभिन्नत्वं च तद्भेदानुयोगितावच्छेदकावयवतावच्छेदकरूपवत्त्वमतस्समुदायघटकप्रत्येक-सकलभागेषु समुदायभेदसत्त्वेऽपि नातिप्रसङ्गः। ईदृश्येव रीतिरवयवान्तर-भेदस्वघटितलक्षणान्तरेऽपि बोध्या। तस्मात्पृथिवीतरेभ्यो भिद्यत इत्यादिनिगमने स्वघटकविभक्त्यन्तपदमध्ये यदन्त्यं धातुपदं तदन्याख्यातार्थविशेष्यक-बोधजनकतया अतिव्याप्तिम् अन्त्यभिन्नपदस्य विभक्त्यन्तरूपताविवक्षणेन वारयति। पदमिति। निगमन इति। निगमनपदमपि तस्मात्पृथिवीतरेभ्यो भिद्यत इत्यादिनिगमनविशेषपरम्, अन्त्यपदशरीरे वृत्तिमत्त्वरूपपदत्वनिवेशे पुनरुपनयनिगमनयोरेवातिव्याप्तिःस्यात् उपनयघटकेदं पदनिगमनघटक-मतुप्पदयोरन्ते तद्घटकविभक्तिसत्त्वेनान्त्यभिन्नत्वादतः तत्र विभक्त्यन्तपदमेव निवेश्यमिति भाव इति केचिद्व्याचक्षते। तन्न मनोरमम्। तथाहि स्वघटक-विभक्त्यन्तपदमध्ये यदन्त्यभिन्नमित्यस्य कोऽर्थः, स्वघटकविभक्त्यन्तपदप्राग-भावासमानकालीनविभक्त्यन्तपदमित्यर्थः इति केचित्, उपनयादिस्थेमादिपदस्य विभक्तिरूपपदप्रागभावसमानकालीनतया तस्यान्त्यत्वनिर्वाहाय प्रथमं विभक्त्यन्त्यत्वं विशेषणमस्तु चरमविभक्त्यन्तत्वविशेषणमनर्थकम्, तद्धेयमिति चेत् तर्हि अनन्त्यत्वं स्वीयविभक्त्यन्तप्रागभावसमानकालीनत्वपर्यवसितं भिन्नभिन्नत्वनिवेशस्य वैयर्थ्यात्, एवं च तस्माद्भिद्यत इत्यादिनिगमनस्थाख्यात-पदस्यानन्त्यत्वमेव नास्तीति किमनन्त्यपदे विभक्त्यन्तत्वनिवेशनेनेति। वस्तुतस्तु तस्मान्नेतराणीत्यादौ निगमने विभक्त्यन्तेतरपदप्रागभावसमानकालीननञ्-पदार्थविशेष्यकशाब्दबोधजनकेऽतिव्याप्तिरेव लक्षणस्थपदस्य विभक्त्यन्तपरतया वारिता। अथ नञ्पदस्यापि प्रातिपदिकत्वेन विभक्त्यन्ततया विभक्त्यन्तत्व-विशेषणेन दुर्वारता। न च निपातस्य विभक्तिप्रकृतित्वं न स्वीक्रियते तदर्थेन विभक्त्यर्थानन्वयात् स्वराद्यव्ययार्थे च अनुसन्धीयमान-

प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वम्। निगमनवारणायोपस्थापितान्तम्।

प्रमेयत्वमभिधेयं प्रमेयत्वादित्यादौ प्रकृत्यर्थपक्षान्वितस्वार्थबोध-

---

लुप्तविभक्त्यर्थान्वयेन तादृशतादृशाव्ययोत्तरमेव विभक्तिस्वीकारस्यावश्यकत्वात् नञोऽसुबन्तत्वेऽपि नञ्तत्पुरुषविधायकसूत्रसामर्थ्यादेव तेन सह समासो भविष्यतीति वाच्यम्। विभक्तेर्निपातार्थान्वितार्थाबोधकत्वेऽपि निर्विभक्तिकप्रातिपदिकस्यासाधुतया साधुत्वाय विभक्तेरावश्यकत्वात् नञोऽसुबन्तत्वेऽपि नञिति तत्पुरुषविधायकसूत्रसामर्थ्येन तेन सह पदान्तरस्य तत्पुरुषसमर्थनेऽपि बहुव्रीह्यव्ययीभावयोरनुपपत्तेश्च। सुबन्तत्वेऽपि समासप्रविष्टप्रतियोगिपदार्थानुपरागेण नञोऽभावाबोधकतया तत्सापेक्षत्वेनासामर्थ्यान्न तेन सह द्वन्द्व इति चेत् सत्यम्। विभक्त्यन्तत्वमत्र शाब्दबोधौपयिकविभक्तिप्रकृतित्वं पर्वतो वह्निमानित्यादिप्रतिज्ञास्थपर्वतादिपदोत्तरसुब्विभक्तेरर्थविशेषपरताविरहेऽप्यभेदान्वयबोधाद्युपयोग्याकांक्षानिर्वाहकसमानविभक्तिता-सम्पादकत्वेन शाब्दबोधोपयोगिता न तु निपातोत्तरविभक्तेरिति नातिव्याप्तिः। अघटादिशब्देन यत्र प्रतिज्ञायां घटभिन्नादिरूपपक्षनिर्देशः तत्र नञादेर्निरुक्तविभक्त्यन्तताविरहेऽपि विशेष्यीभूतविशिष्टपक्षबोधकाघटादिपदस्य तादृशविभक्त्यन्तत्वा- ल्लक्षणसमन्वयः। यत्तु यादृशपदोत्तरं कदाचिद्विभक्तेः श्रवणं तदेव विभक्त्यन्तपदेन विवक्षितम् दध्यादिपदोत्तरं प्रथमैकवचनश्रुतावपि द्विवचनादिश्रुतेर्दधि द्रव्यमित्यादिप्रतिज्ञासङ्ग्रह इति। तन्न। पक्षवाचकस्वरादिपदघटितप्रतिज्ञायामव्याप्तेः। निगमनवारणायेति। इतरान्वितस्वार्थबोधकन्यायावयवत्वमात्रनिवेशे उपनयार्थान्वितस्वार्थबोधकतया निगमनातिव्याप्तिस्यात्तद् वारणायेत्यर्थः। यद्यपीतरान्वितस्वार्थबोधकत्वं निगमनस्येव प्रतिज्ञोपनयोरपि। तथापि विशेषणतयाऽन्वितत्वनिवेशनेन तद्वारणसम्भवान्निगमनमात्रकथनम्। यद्यपि निगमनसमुदायार्थः पक्ष एवान्वेतीति साध्यान्वितस्वार्थबोधकत्वं निवेश्यापि प्रायशो निगमनवारणसम्भवः। तथापि यत्र साध्यस्य प्रमेयत्वगोत्वाभावादेरेव पक्षता तत्रत्यनिगमनेऽतिव्याप्तिवारणाय पक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितत्वनिवेशनम्। पक्षान्वितस्वार्थबोधकत्वं च पक्षतावच्छेदकावच्छिन्नविषयता निरूपितस्वार्थविषयताप्रयोजकत्वम्। यथाश्रुते

कपञ्चम्यन्तार्थान्वितो न प्रतिज्ञार्थः। अपि तु तदेकदेशार्थ इति।

स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वम्। विशिष्टवैशिष्ट्याबोधजनकस्वार्थबोधजनकन्यायावयत्वम्। विशिष्टवैशिष्ट्याबोधजनकस्वार्थविशिष्टबोधजनकन्यायावयत्वं वा तत्त्वम्। एकवाक्यतया हेत्वर्थविशिष्टसाध्यवैशिष्ट्यं भासते न पुनरवयवान्तरार्थविशिष्टस्य कस्यचिदिति।

उपनयस्थपक्षवाचकेदम्पदस्य वस्तुगत्या अभेदेन पक्षसंस्पृष्टो यः पक्षस्तद्बोधकत्वेन, पाषाणमयः पर्वत इत्यादिवाक्यात् पाषाणमयत्वादिरूपेण पक्षतावच्छेदकावच्छिन्नपक्षसंस्पृष्टतया प्रतीयमानो यः पक्षतावच्छेदकावच्छिन्नस्तद्बोधकत्वेन च, तदुपस्थापितार्थान्वितस्वार्थबोधके निगमनेऽतिव्याप्तेरवारणात्। तादृशपदोपस्थापितार्थान्वितस्वार्थबोधकत्वं च तादृशपदप्रयोज्यविषयतानिरूपितस्वप्रयोज्यस्वार्थविषयताकत्वम्। यथाश्रुते निगमनार्थान्वयिन एव पक्षतावच्छेदकावच्छिन्नस्य पर्वतो नीलपर्वत इत्यादिवाक्यस्थपक्षतावच्छेदकावच्छिन्नादिविषयतानिरूपितविषयताप्रयोजकनीलपर्वतपदोपस्थाप्यत्वेन निगमनातिव्याप्तेर्दुर्वारत्वात्।पक्षतावच्छेदकावछिन्नविषयता निरूपिता या विषयता तन्निरूपितविषयताप्रयोजकत्वं फलितार्थः। पक्षतावच्छेदकावच्छिन्नत्वानिवेशे व्याप्यवत्त्वावच्छिन्ना या पक्षविषयता तन्निरूपितोपनयस्थेदम्पदप्रयोज्यविषयता निरूपितविषयताप्रयोजनकत्वमादय निगमन एवातिव्याप्तिः स्यादिति तन्निवेशः। अथ तन्निवेशेऽपि पक्षतावच्छेदकावच्छिन्ना या उपनयस्थेदम्पदप्रयोज्यविषयता तन्निरूपितनिगमनार्थविषयतानिरूपिता उपनयार्थस्य विशेष्यतैवेत्युपनये ऽतिव्याप्तिः। न च चरमविषयता प्रकारत्वरूपा विवक्षणीया अतो नायमतिव्याप्तिप्रसङ्ग इति वाच्यम्। एवं सति प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र पक्षान्वितपञ्चम्यर्थे विशेष्यतयाऽन्वितं साध्यरूपार्थमादाय प्रतिज्ञातिप्रसङ्गाप्रसक्तेः प्रमेयत्वमभिधेयमित्याद्यग्रिमग्रन्थानुत्थानात्। एव प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र प्रतिज्ञातिव्याप्तेरेकदेशार्थविषयताव्यावृत्तस्वार्थविषयतानिवेशनेन वारणेऽपि तत्रत्यनिगमनेऽभिधेयत्वव्याप्यप्रमेयत्ववांश्चायमित्युपनयार्थप्रमेयत्वरूपपक्षतावच्छेदकरूपहेतुतावच्छेदका-

पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा। हेतुपदेन ज्ञाने लक्षणा अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्था-नन्वयात्[१९] तथैवाकाङ्क्षानिवृत्तेः।

अनुमितिहेतुज्ञानकारणधूमवत्त्वादिशब्दजन्यज्ञानवृत्तिप्रतिज्ञादिजन्य-ज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यत्वं हेतुत्वमित्यन्ये, जातिं विना केन रूपेण ज्ञानस्यानुमितिजनकत्वं वाक्यविशेषजन्यत्व-स्यापि जन्यतावच्छेदकरूपापरिचये दुर्ग्रहादित्यपरे।

अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनक-हेतुत्वप्रतिपादकविभक्तिमन्यायावयवत्वमन्वयिहेतुत्वम्।

वच्छिन्नान्विततादृशपक्षतावच्छेदकावच्छिन्ने स्वार्थान्वयबोधजनकेऽतिप्रसङ्गो दुर्वारः। पक्षतावच्छेदकावच्छिन्नेत्यत्र विशेषणतयाऽन्वितत्वनिवेशे प्रमेयत्वमित्याद्यग्रिमग्रन्थानुत्थितेः पञ्चम्यर्थहेतुत्वस्य विशेष्यतयैव पक्षान्वयित्वेन प्रतिज्ञातिव्याप्तिप्रसक्तेः। विशेषणतया किञ्चिदन्वितत्वनिवेशनैवोपपत्तेः प्रकृतपक्षनिवेशवैयर्थ्यापाताच्च। निगमनार्थविशेषणतया किञ्चिदन्वितेऽनन्वयेन तत्रातिव्याप्तेस्तमनिवेश्यापि वारणसम्भवात्। मैवम्। शुद्धपक्षतावच्छेदका-वच्छिन्नान्वितत्वं निवेश्य दर्शितातिप्रसङ्गवारणसम्भवात्। उपनयार्थव्याप्य-विशिष्टपक्षान्वयिनो निगमनार्थस्य शुद्धपक्षतावच्छेदकावच्छिन्नानन्वितत्वेन तदन्वितार्थकेऽप्युपनये शुद्धपक्षतावच्छेदकावच्छिन्नान्वितार्थकपदो-पस्थापितार्थान्वितार्थकत्वविरहात् प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र व्याप्तिविशिष्टप्रमेयत्वरूपपक्षतावच्छेदकावच्छिन्न एव इदमर्थान्वयेन तदन्वितार्थकतया निगमने निरुक्तरूपविरहात्। एतेन पक्षसाध्ययोरभेदस्थले निगमनार्थघटकसाध्यरूपपक्षान्वितेदम्पदार्थान्वितार्थकतया निगमनातिव्याप्तेरपि नावकाशः। यत्तु एकविशेषणतापन्नस्य यत्रापरविशेष्यता तत्र विशेष्यत्व-विशेषणत्वरूपविषयतयोर्भेदेन पक्षविषयतानिरूपितविषयितानिरूपितस्वार्थ-विषयतानिवेशे हेतुमात्र एव लक्षणानुपपत्तिः, पक्षविषयितानिरूपितसाध्यीय-प्रकारतारूपविषयतया हेत्वर्थप्रकारताया निरूप्यनिरूपकभावविरहादतः

एतदेव व्यतिरेकव्याप्त्यभिधायकपदप्रक्षेपाद्व्यतिरेकि हेतुत्वम्। अन्वयव्यतिरेकोदाहरणाकाङ्क्षाप्रयोजकतथाभूतावयवत्वमन्वयव्यतिरेकिहेतुत्वं।

यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्वयव्यतिरेकि, अत्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरणपक्ष-सपक्षसद्धेतुवचनं केवलान्वयि।

यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारणसाध्याविषयकशाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतुविभक्तिमच्छब्दत्वमन्वयिहेतुत्वम्। एतदेवाप्रतीतान्वयसाध्यसाधनेति विशेषणाद्व्यतिरेकि हेतुलक्षणं, कथायां धूमादित्येव

पक्षविषयतानिरूपितविषयत्वावच्छिन्नविषयतानिरूपितस्वार्थविषयतैव निवेशनीया एवञ्चोक्तरीत्या उपनयातिव्याप्तेर्नावकाशः पक्षविषयतानिरूपकतन्निष्ठविषयतायाः पक्षविषयतानिरूपकतन्निष्ठविषयताया अभेदेनावच्छेद्यावच्छेदकभावविरहादेवं क्रमेण पक्षसाध्ययोरभेदस्थले निगमनातिव्याप्तेरपि नावतारः, एवं हेतुपक्षयोरभेदस्थले निगमनातिव्याप्तिरपि समाहिता, हेतुप्रकारतानिरूपिताया निगमनार्थप्रकारतानिरूपितायाश्चेदमर्थनिष्ठाविशेष्यतारूपविषयतायाश्चाभेदेनावच्छेद्यावच्छेदकभावविरहादिति। तन्न एकविशेषणतापन्नस्य यत्रापरविशेष्यता तत्र विशेष्यताप्रकारतयोरभेदे बाधकविरहेण लाघवेन तस्यैवोपगमात् न त्ववच्छेद्यावच्छेदकभावापन्नविषयताद्वयस्य। यदि चैकविशेषणतापन्नस्यापरविशेष्यतास्थले प्रकारताविशेष्यतयोरभेदे दण्डी पुरुषवानित्यादिबुद्धेः पुरुषादिनिष्ठप्रकारतानिरूपितदण्डादिनिष्ठविशेष्यताशालित्वं दुर्वारमिति तस्याः पुरुषीयो न वा दण्ड इत्यादिसंशयविरोधिताप्रसङ्ग इति तद्भेदस्समूहालम्बनविषयतावैलक्षण्याय तयोरवच्छेद्यावच्छेदकाभाव एव च स्वीक्रियत इति मन्यते, तदा हेतुपक्षयोरभेदस्थले निगमनार्थधर्मितावच्छेदकहेतुप्रकारतानिरूपिताया निगमनार्थप्रकारतानिरूपितायाश्च विशिष्टहेतुत्वावच्छिन्नाया इदम्पदार्थपक्षविशेष्यताया ऐक्ये हेतोर्हेतुधर्मितावच्छेद-

प्रयोक्तव्यं न तु धूमवत्त्वादिति मतुपोव्यर्थत्वात्।

सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकं विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभक्त्यन्तरावरुद्धस्यानन्वयादिति केचित्। तन्न। सति सप्तमीबलात् सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः, न ह्ययमर्थोऽस्मानावगम्यते इति।

कतापत्तिरिति तत्रावच्छेद्यावच्छेदकभावापन्नविषयताद्वयस्य स्वीकरणीयतया तत्रातिव्याप्तेर्दुर्वारत्वात्। स्वार्थैकदेशस्यापि स्वार्थत्वाभिमानमूलां प्रतिज्ञाविशेषातिव्याप्तिशङ्कां स्वार्थपदस्य स्वप्रतिपाद्यत्वपर्याप्त्यधिकरणविशिष्टार्थपरतां स्पष्टयन्निराकरोति। प्रमेयत्वमिति। प्रतिज्ञार्थः। साध्यविशिष्टपक्षरूपः। एकदेशार्थः। साध्यमात्रम्। यद्यपि प्रमेयत्वमभिधेयम् प्रमेत्वादित्यादिन्यायान्तर्गतनिगमने हेतुभूतपक्षान्वितस्वार्थबोधकेदम्पदोपस्थापितपक्षान्वितस्वार्थबोधकत्वं निगमनेऽश्रुतमिति विशेषणतया पक्षान्वितत्वं विवक्षणीयमिति कथितस्थले पञ्चम्यर्थः पक्षे न विशेषणमित्यतोऽपि नोक्तप्रतिज्ञायामतिव्याप्तिसम्भवः। तथापि निगमनार्थैकदेशस्य ज्ञाप्यत्वान्तभागस्य तादृशार्थान्विततया निगमनेऽप्यतिप्रसङ्गवारणाय स्वार्थपदस्य स्वप्रतिपाद्यविशिष्टपरताया आवश्यकत्वात् कथितस्थले पञ्चम्यर्थान्वितस्वार्थबोधकत्वाभावेनाप्यतिव्याप्तिवारणसम्भवात्तत्कथनम्। केवलेन हेतुवाक्येन पञ्चम्यर्थविशेष्यकावान्तरवाक्यार्थबोधो जन्यते ततश्च प्रतिज्ञास्थवह्न्यादिपदसहकारेण धूमज्ञानज्ञाप्यो वह्निरित्याकारकस्वार्थनिष्ठबोधो जन्यते, ततस्समुदितप्रतिज्ञासहकारेण पक्षे स्वार्थविशिष्टस्वार्थवैशिष्ट्यबोधश्च, प्रत्येकमेतादृशबोधत्रयजनकताघटितलक्षणत्रयमाह स्वार्थेति। प्रथमं तृतीयबोधघटितं द्वितीयं प्रथमबोधघटितं तृतीयं द्वितीयबोधघटितं बोध्यम्। (तथा च तल्लक्षणत्रयस्य स्वत्वगर्भतया तादृशबोधविशेषणतया स्वत्वं प्रविष्टं तादृशबोधमादाय लक्षणानि सम्भवन्तीति भावः।) विशिष्टवैशिष्ट्येति स्वतात्पर्यविषयबोधीयविशेषणावच्छेदकस्वार्थबोधजनकन्यायावयवत्वमित्यर्थः।

तेन निगमनार्थान्वितोपनयार्थबोधस्यापि निगमनार्थैकदेशविशिष्टवैशिष्ट्यबोधकतया निगमनार्थबोधस्य तज्जनकत्वेन यथाश्रुतलक्षणस्य निगमनेऽतिव्याप्तिरिति दूषणं प्रत्युक्तम्।। विशेषणतावच्छेदकताया अव्यावर्तकत्वात्स्वतात्पर्यविषय-बोधीयत्वं तद्विशेषणम्। विशिष्टवैशिष्ट्यबोधेति। स्वतात्पर्यविषयबोधजनकता-वच्छेदकस्वार्थप्रकारताशालिबोधजनकन्यायावयवत्वमित्यर्थः। तेन निमगनार्थ-विशिष्टोपनयार्थज्ञानस्य निगमनार्थविषयकत्वेन तादृशज्ञानजननस्वरूपयोग्यत्वेऽपि न निगमनेऽतिव्याप्तिः। लक्षणत्रयमेव हेतौ सङ्गमयन् अवयवान्तराद्व्यावर्तयति। एकवाक्यतयेत्यादिना—इतरोपस्थापितेति। स्वाघटकपदोपस्थापितेत्यर्थः। स्वार्थत्वं स्वजन्यप्रतिपत्तिविशेष्यत्वमतो निगमनजन्यप्रतिपत्तिविशेष्ये मतुबाद्यर्थे तद्घटकपदोपस्थापितसाध्यविशेषणकबोधजनकस्य निगमनस्य वारणायोप-स्थापितान्तम्। अत्र प्रथमलक्षणे इतरार्थप्रकारकस्वार्थविषयताकत्वेन द्वितीये च स्वर्ग्थांशे इतरप्रकारकत्वेन च बोधस्य निवेशाद्भेदः। अवयवार्थेति। अवयवजन्यप्रतिपत्तिविशेष्यकस्वार्थप्रकारकबोधजनकावयवत्वमर्थः। सर्वेषामेव वाक्यानां स्वार्थघटकविशेष्यांशे स्वार्थघटकार्थान्तरप्रकारकबोधजनकतया तत्रातिव्याप्तिवारणाय स्वार्थप्रकारकेति। प्रतिज्ञार्थघटकसाध्यरूपविशेषणे हेत्वर्थस्यान्वयेऽपि विशेष्ये पक्षे तदनन्वयात् प्रतिज्ञायां नोपनयलक्षणातिव्याप्तिः। न वा हेतौ निगमनलक्षणातिव्याप्तिः उपनयलक्षणे स्वार्थपदस्य निगमनलक्षणे चावयवार्थपदस्य विशेष्यपरत्वादित्याह। हेत्वर्थश्चेत्यादिना। उक्तप्रायमिति।

पूर्व हेत्वर्थैकदेशे पञ्चम्यर्थस्यैकदेशार्थमात्रान्वयित्वमुक्तम् अत्र च हेतुसमुदायार्थस्य तथात्वमिति विशेषात् प्रायमिति।। इति गादाधरीये दीधितिकृत्यत्प्रतिज्ञादिलक्षणानि।।

शब्दोऽनित्यः सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादिति हेतुप्रयोगे हेतुघटकदलयोः प्रत्येकं व्यभिचारितया भेदेन नामार्थयोस्तयोरेकांशे अपरस्य विशेषणतयाऽनन्वयेन च विशिष्टहेतुत्वान्वयासम्भवेन विशेष्यविशेषण-भावानापन्नयोर्मिलितयोर्हेतुत्वान्वयो वाच्यः, सोऽपि न सम्भवति सामान्यवत्त्वादेस्सप्तम्यन्तपदोपस्थाप्यस्य हेतुत्वार्थकपञ्चमी प्रकृत्यर्थत्वा-भावादिति केषाञ्चित्पूर्वपक्षं समाधातुमुपन्यस्यति। मूले हेतुग्रन्थे सामान्यवत्त्व इति। सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वे विशेषणत्वाविशेषणत्वासम्भवेऽपि सप्तम्यन्तार्थस्य सामान्यवत्त्वसामानाधिकरण्यस्य तत्र विशेषणतया तादृशविशेषणावच्छिन्ने बाह्यकरणप्रत्यक्षत्वे हेतुत्वान्वयसम्भवान्नापार्थकतेत्याह-तन्नेति। सामान्यवत्त्वस्येति। सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वे विशेषणीभवत्सामानाधिकरण्यप्रतियोगितयोपस्थापितावित्यर्थः। अथ सामानाधिकरण्ये सप्तम्या अननुशासनात्कथमेतत्, सतीत्यस्य वा कोऽर्थ इति चेन्न "यस्य च भावेन भावलक्षण" मिति सूत्रानुशिष्टसप्तम्याः गोषु दुह्यमानासु गत इत्यादौ यथा गोदोहनादिसमानकालीनत्वं गमनादौ बोध्यते तथा प्रकृतेऽपि समानदेशत्वप्रत्ययनात्। न च तादृशसप्तम्याः क्रियासमानकालीनत्ववत्क्रियासमानदेशत्वस्य कदाचित्क्रियायां न प्रत्यायनसम्भवः यस्य क्रियया अन्यस्य क्रिया लक्ष्यते विशेष्यते यद्वाचकपदसमभिव्याहृतकृदन्तपदोपस्थापितक्रिया समानकालीनत्वादिसम्बन्धेन क्रियान्तरविशेषणमिति यावत् तद्वाचकपदात्सप्तमीत्यर्थकत्वात्तादृशसूत्रस्य क्रियासमानकालीनत्वादौ क्रियान्तरविशेषणतया विवक्षिते तादृशसूत्रेण सप्तमीविधानात् सप्तमीप्रकृत्यर्थनिरूपितसामानाधिकरण्यादेरपरनामार्थ-विशेषणतया विशेषणे सप्तम्यनुशासनात्सामान्यवत्त्वसामानाधिकरण्यस्य प्रत्यक्षत्वे कुतो लाभ इति वाच्यम्। यथा गोषु दुह्यमानास्वागत इत्यादौ गोपदोत्तरसप्तम्या-स्समभिव्याहृतक्रियादोहनरूपार्थः तत्र समभिव्याहृतकृदन्तार्थान्वितप्रकृत्यर्थस्य कर्मतानिरूपकत्वसम्बन्धेनान्वयः तस्याश्च समानकालीनत्वसम्बन्धेन क्रियान्तरेऽन्वय इति तत्र दुह्यमानगोकर्मकदोहनसमानकालीनत्वलाभस्तथा प्रकृतेऽपि शतृप्रकृत्यसिधातोराधारत्वमर्थः। अत्रास्ति घटक इत्यादावेतद्देशनिष्ठा-धारताप्रतियोगी घट इत्यादिप्रतीतेः, अत्र चाधारत्वरूपक्रियायां सामान्यवत्त्वस्य प्रकृत्यर्थस्य प्रतियोगित्वसम्बन्धेनान्वयः आधारतायाः प्रत्यक्षत्वे

हेतावुक्ते कथमस्य गमकत्वमित्याकाक्षायां व्याप्तिपक्षधर्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनायोदाहरणम् तत्रानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनकव्याप्यत्वाभिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनकशब्दत्वमुदाहरणत्वं सामान्यलक्षणे साध्यसाधनसम्बन्धबोधजनकत्वं साध्य-साधनाभावसम्बन्धबोधजनकत्वञ्च विशेषलक्षणद्वयम्।

न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु न। दृष्टान्तप्रयोगस्य सामयिकत्वेनासार्व्वत्रिकत्वात् यो यो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः।

नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानविषयव्याप्त्युपनायकं वचनं तत्, उपनयातिव्याप्तेः, अत एव

इतरान्वितस्वार्थबोधकन्यायावयवत्वमुदाहरणत्वम्। अन्वयव्याप्तिबोधकतत्त्वं व्यतिरेकव्याप्तिबोधकतत्त्वं च विशेषलक्षणम्।

समानदेशत्वसम्बन्धेनान्वयः प्रत्यक्षत्वे सामान्यवत्त्वसामानाधिकरण्यलाभसम्भवात्। भावलक्षणमिति भावशब्दस्य धर्ममात्रपरत्वात्प्रत्यक्षत्वस्य क्रियात्वविरहेऽपि क्षतिविरहात्। सत इत्यस्याध्याहारेण वा प्रत्यक्षत्वसत्त्वे सामान्यवत्त्वसत्त्वस्य समानदेशतालाभेन सामञ्जस्यात्। कुत्रचित्समानकालीनत्वं क्रियायास्सम्बन्धः कुत्रचित्समानदेशत्वमित्यत्र किं नियामकमिति चेत्। यत्र समभिव्याहृतकृत्प्रत्ययस्य वर्तमानत्वेऽपि तात्पर्ये तत्र समानकालीनत्वं यत्र च न तद्विवक्षणं तत्र समानदेशत्वं सम्बन्ध इति नियमात्। प्रकृते च वर्तमानत्वविवक्षया समानदेशत्वलाभात् वर्तमानत्वाविवक्षायामपि विरोधिकालाविवक्षायां लटः साधुत्वात् यत्र चातीतत्वमनागतत्वं वा कृतौ विवक्षितं, दुग्धासु दोग्धव्यास्वित्यादौ तत्रोत्तरत्वं पूर्वत्वं वा सम्बन्ध इति दोहनोत्तरत्वादिकमेव प्रतीयते न तु समानकालीनत्वमित्यवधेयम्।

उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम्। एतदेवान्वयव्यतिरेकव्याप्तिविषयत्वविशेषितं विशेषलक्षणद्वय-मित्यन्ये। अत्र च व्यभिचारवारणाय वीप्सामाहुः। यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा केवलान्वयिन्य-भेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थमिति तु वयं,

---

इतरोपस्थापितार्थविशेषणकस्वार्थबोधजनकन्यायावयवत्वम्।

ननूदाहरणे यत्पदद्विरुक्तिप्रयोजिकायाः महानसत्वमहानसान्यत्वादिना वक्तुर्यावत्साधनाधिकरणप्रत्यायनेच्छारूपवीप्सायाः किं प्रयोजनं न हि साधनस्य यावदधिकरणे साध्यसत्त्वज्ञानमनुमितिहेतुर्येन यत्पदे वीप्सां विना यावद्धूमाधिकरणानुपस्थापने तत्पदेन तावदधिकरणानां परामर्शासम्भवात्सकल-साधनाधिकरणे साध्यवत्त्वाप्रतीतेरनुमित्यनिर्वाहः स्यादिति यत्तत्पदात्तावदधि-करणबोधो वीप्साप्रयोजनं भवेत्। न च व्याप्तिप्रत्यायनेच्छा वीप्सा तस्याश्चानुमित्यौपयिकबोध एव प्रयोजनमिति वाच्यम्, व्याप्तेश्च पदार्थवाक्यार्थत्वविरहेण तत्प्रत्यायनेच्छायामपि शाब्दतत्प्रत्ययस्यायोगात् मानसबोधे च वक्त्रभिप्रायानुपयोगात्, यदि च तत्पदसमभिव्याहृतवह्न्यादिपदस्य धूमव्यापकताविशिष्टवह्न्यादिलाक्षिकतया धूमादौ वह्निव्याप्तिलाभ इत्युच्यते, तदा यत्पदे द्विरुक्तिं विनापि तल्लाभसम्भवात् द्विरुक्तिवैयर्थ्यमित्याक्षेपे प्राचीनसमाधानमुपन्यस्यति। अत्र चेति। उदाहरणस्थयत् पदे चेत्यर्थः। व्यभिचारवारणायेति। वीप्सामुद्दिश्य मानसव्याप्तिज्ञानविरोधिव्यभिचारधीवारण-प्रयोजनिकामाहुरित्यर्थः। यावद्धेत्वधिकरणे साध्यवत्त्वनिश्चये तेन विपरीत-निश्चयात्मकत्वेन साधनाधिकरणे साध्याभाववत्त्वरूपव्यभिचारग्रहस्य प्रतिबन्धक इति भावः। नन्वेवं वाच्यत्वादिसाध्यस्य यत्रोपायान्तरात्केवलान्व-यित्वं गृहीतं अयमेतदभिन्नः एतद्वृत्तियावद्धर्मवत्त्वादित्यत्र च हेतावेक-मात्रवृत्तित्वं गृहीतं तत्र हेतौ साध्यसामानाधिकरण्यग्रहादेव मानसी व्याप्तिधीस्सम्भवति प्रथमेऽभावे साध्यीयत्वाऽग्रहेण द्वितीये साध्याभाववत्तया गृह्यमाणेऽधिकरणान्तरे हेतोरग्रहेण व्यभिचारग्रहासम्भवादित्युभयसिद्धव्याप्ति-कसाधकतानुमाने यथोदाहरणं न प्रयुज्यते तथात्र सामानाधिकरण्यलाभायोदाहरण-

वीप्सा च यत्पदे न तु तत्पदेऽपि विरूपोपस्थितयोरपि तत्पदेन परामर्शाद्बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः, यथा "यद्यत् पापं प्रतिजही जगन्नाथ नम्रस्य तन्म" इत्यत्र। इदञ्च साध्यसाधनोभयाश्रयविकलानुपदर्शितान्वयविपरीतोपदर्शितान्वयानुपदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकभेदादाभासरूपमिति।

प्रयोगेऽपि द्विर्यत्पदं न प्रयुज्यत इत्यत्रेष्टापत्तिमाह। यत्र चेति। सर्वत्रैव द्विरुक्तिरनपेक्षितेति स्वमतमाह—वीप्सायामपीति। अयमाशयः। द्विर्यत्तत्पदप्रयोगेऽपि सकलसाधनाधिकरणपरत्वाग्रहे व्यभिचारतादवस्थ्याद्व्यभिचारधियोऽनिवृत्तिः तत्परत्वग्रहापेक्षायां च यद्योगप्राथम्याभ्यां साधननिष्ठव्याप्तितात्पर्यमेव गृह्यतां तत एव लक्षणया व्याप्तिशाब्दबोधसम्भवात् तत्र व्यभिचारशङ्काया अविरोधित्वात् यावत्साधनवति साध्यवत्त्वबोधाय द्विर्वचनमनर्थकमेव। अत एव यन्नैवं तन्नैवमिति प्राचामुदाहरणोपदर्शनमपि सङ्गच्छते, आवश्यकश्च व्याप्तेः शाब्दबोधः अन्यथा समानप्रकारतामपुरस्कृत्य विपरीतधियो विरोधितायाः दुष्कल्पतया महानसत्त्वादिना सकलधूमाधिकरणे साध्यवत्त्वबोधेऽपि धूमवत्त्वप्रकारेण तत्र तत्रैव साध्याभावशङ्काया अनुच्छेदेन मानसव्याप्तिग्रहसम्भवात्, एवमद्विरुक्तेनापि यत्पदेनैकरूपेण विभिन्नरूपेण वा सकलधूमाधिकरणोपस्थितिसम्भवात् तदर्थकतया द्विरुक्तिसार्थक्यमपि दुर्वचम्। न च सकृदुच्चरितेत्यादिव्युत्पत्तिविरोधादेकस्माद्यत्पदान्नानेकाधिकरणबोधस्सम्भवतीति वाच्यम्। सकृदुच्चरितस्य नानाशक्त्याऽबोधकतायामेव व्युत्पत्तेः सर्वनाम्नाञ्च बुद्धिस्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नत्वेन नानाधर्मिणामनुगमात् नानार्थेषु शक्तैरैक्येन व्युत्पत्तेरविरोधात्। अन्यथा द्विरुक्तावपि नानार्थबोधानुपपत्तेः। कथञ्चिदर्थद्वयबोधकत्वनिर्वाहेऽपि भूयोऽर्थबोधस्य निर्वाहयितुमशक्यत्वाच्चेति। अथ द्विरुक्तस्थल एव व्याप्तौ निरूढलक्षणा, अत एव यत्पदप्रयोगेऽपि वादिवाक्ये स्वारसिकलक्षणाविरहेण न व्याप्तिबोधनिर्वाहः। वस्तुतो व्याप्तिगोचरशाब्दबोधानुरोधेन चेदुदाहरणप्रयोगः तदोपनयवद्व्याप्यपदेनैवोदाहरणेऽपि व्याप्तिबोधनं युज्यत इति सकलधूमाधिकरणे साध्यवत्त्वबोधनाय यो यो धूमवानित्युदाहरणम्। इत्थं च यत्पदस्य

उदाहरणानन्तरम्भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्त्तते न वेत्याकाङ्क्षायां भवतु व्याप्तस्य पक्षधर्म्मत्वप्रदर्शनायोपनयः, तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपनयत्वमिति सामान्यलक्षणं, साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वञ्च विशेषलक्षणद्वयम्, उदाहरणान्त एव प्रयोग इति न वाच्यं तृतीयलिङ्गपरामर्शस्य व्याप्तिपक्षधर्म्मतावगाहिनोऽवयवान्तरादलाभात् तदनभ्युपगमेऽपि पक्षधर्म्मताया अलाभात्। न च हेतुवचनादेव तदवगमः, तस्य को हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात्, वादिवाक्यादेवाक्षेप इति चेत्। न तदर्थस्यासिद्धत्वेनाऽनाक्षेपकत्वात् अन्यथा प्रतिज्ञावाक्यादेव सर्व्वापेक्षेऽवयवान्तरविलयात्। प्रतिपाद्यानां स्वत एव तदवगम इति चेत्, न, तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात् प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च अन्यथावयवान्तरेऽप्येवं प्रसङ्गादिति।

स्वार्थविशेष्यकेतरार्थान्वयबोधो जनकन्यायावयवत्वं चोपनयत्वम्।

सकलधूमाधिकरणपरताया आवश्यकतयाऽद्विरुक्तयत्पदस्य तत्परत्वनियमेन तत्परत्वग्रहार्थं द्विरुक्तेरावश्यकता। एवं नित्यवीप्सयोरिति सूत्रेण द्विरुक्तिविधानस्य नित्यतया सकलधूमाद्यधिकरणपरत्वे यत्पदस्य द्विरुक्तस्य साधुत्वमेव न स्यादित्यतो द्विरुक्तेरावश्यकता इत्याशयेन यत्पदे द्विरुक्तिमभ्युपेत्य तत्पदे द्विरुक्तिं खण्डयति। वीप्सा चेति। द्विरुक्तिनियमोऽपि कदाचित्यत्पद एव न तु तत्पदेऽपीत्यर्थः। सर्वत्रैव तत्पदेन न द्विरुक्तिरिति नार्थः। "विवर्णभावं स स भूमिपालः" इत्यादौ छन्दोऽनुरोधादिना द्विरुक्तिदर्शनात्। न्याय्ये तु प्रयोज्यमानेऽधिकस्यान्याय्यतया साधुत्वेऽपि न तत्र द्विरुक्तिः

उपनयानन्तरं निगमनं तच्चानुमितिहेतुलिङ्गपरामर्श-प्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम्। न च व्याप्तिपक्षधर्म्मतयोश्चतुर्भिरेवावयवैः पर्य्याप्तेः किं तेनेति वाच्यम्। अबाधितासत्प्रतिपक्षितत्वयोरलाभे चतुर्णामप्यपर्य्यवसानात्। अथाभिधानाभिधेययोर्व्याप्तिपक्ष-धर्म्मतावल्लिङ्गप्रतिपादनादेव पर्य्यवसानेनावयवान्तराणां निराकाङ्क्षत्वं विपरीतशङ्कानिवृत्तेरपि तत एव लाभात् अन्यथा निगमनेनापि तदवारणात्, न हि तत् विशेषदर्शनमनादृत्यैव तन्निवर्त्तकम्। सिद्धनिर्द्देशतया वारयतीति चेन्न। स्वरूपमात्राभि-धानात् साध्यत्वानुस्थितौ तस्मादिति हेतुविभक्त्यनन्वय-प्रसङ्गाच्चेति चेन्न व्याप्तिपक्षधर्म्मताज्ञानेऽपि बाधसत्प्रति-पक्षबुद्धेः साध्यज्ञानेनानुत्पत्तिदर्शनात् तदभावाबोधने समीहितानिर्व्वाहात्। अथ बाधादिविरहस्य प्रयोजकत्वं न तु तदबोधस्य मानाभावादसिद्धेश्च किमर्थं बाधादिविरहो बोधनीय इति चेन्न यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः। न चानन्वयः, तस्मादित्यन्वयबलादेव हेत्वनाकाङ्क्षितत्वलक्षणसिद्धत्वज्ञानात् न त्वन्वयात् प्राक्। इह केचित् यथा तस्मादिति सर्व्वनाम्ना हेतोः परामर्शः पूर्व्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथेति सर्व्वनाम्ना सिद्धस्थल इव विरोधादिवारणाय युक्त इत्याहुः। तन्न। तथेति स्वरूपे प्रकारे सादृश्ये, वा, आद्ये तथाचायमिति प्रक्रमात् तथेति हेतुमानित्यर्थः स्यात् तथाचानन्वयः, न हि हेतुमत्त्वादेव हेतुमत्त्वमित्यन्वितम्, न द्वितीयः, सामान्येन पक्षस्यापि अन्वयव्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात्, अत एव न तृतीयोऽपि, अभेदानुमाने चान्वयिनि तस्मात्तथेति

सादृश्यान्वयाभावात् बहूनाञ्च प्रक्रमे विशेष्यानन्वयात्, वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात् तस्मादित्यत्र तु हेतुविभक्त्यर्थानन्वयादेव नियमः तस्मादनित्य इत्यभिधाने च विशिष्य सिद्धान्तावगम्यते पूर्व्वं साध्यतयोक्तस्य समर्थहेतुसम्बन्धेन पुनरुत्कीर्त्तनात् अन्यथा तद्वैयर्थ्यात्। संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः किन्तु न्यायाङ्गतयान्यायान्तर्गतत्वेनोपयुज्यन्त इति नाधिक्यम्, कण्टकोद्धारस्य च सार्व्वत्रिकत्वं समयविशेषोपयोगित्वादिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानापरिच्छेदे अवयवग्रन्थः सम्पूर्ण।

अवयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वम्।

हेत्वर्थश्च न प्रतिज्ञार्थे विशेषणत्वेनान्वेति। किन्तु तदेकदेशार्थे इत्युक्तप्रायम्। इति श्रीमन्महामहोपाध्यायभट्टचार्यतार्किकशिरोमणि-रघुनाथकविविरचितायां तत्वचिन्तामणिव्याख्यायामनुमान-दीधित्यपराख्यायामवयवग्रन्थस्सम्पूर्णः।

सकलधर्मिप्रत्यायनेच्छारूपवीप्सासत्त्वेऽप्यद्विरुक्ततत्पदस्य साधुतासम्भवः महाकविप्रयोगदर्शनात्, एतदपि स्पष्टयितुं भवभूतीनां (भवभूतिनान्द्या) तथा प्रयोगो दर्शयिष्यते, द्विरुक्तयत्पदबोधितनानाधर्मिणामेकेन तत्पदेन परामर्शायोग इत्याशङ्कां निरस्यति। विरूपेति। महानसत्वमहानसान्यत्वादिना विभिन्नप्रकारेणेत्यर्थः। तत्पदेन परामर्शात्। तत्पदेन परामर्शसम्भवात्। तत्पदस्य परामर्शकतायाम्, व्युत्पत्तिविरोधे द्विरुक्तयत्पदेनापि तावद्धर्मिबोधासम्भवात् व्युत्पत्तिविरोध एव न कथमित्याकाङ्क्षायामाह। बुद्धिस्थवाचकत्वादिति बुद्धिप्रकारावच्छिन्नेषु सर्वेष्वेकशक्तेरित्यर्थः। व्युत्पत्त्यविरोधं दृष्टान्तेन द्रढयति। यथेति।

इति

श्रीमन्महामहोपाध्याय-गदाधरभट्टाचार्यचक्रवर्तिविरचितायां

युक्तिनिकरकल्लोलमालातरङ्गितकल्पनापयःपारावार-

रूपिण्याम्-अनुमानदीधितिटिप्पण्याम्

अवयवग्रन्थः सम्पूर्णः॥

टिप्पणी

१. यद्यपि तादृशशाब्दबोधप्रयोजकवाक्यपञ्चकमात्रवृत्तिसमुदायत्वोक्तौ नायं दोषः। मात्रपदोपादानात्को वह्निमान् कुत इत्यादिप्रश्नवाक्यानां व्युदासः। तथापि लिङ्गं पक्षवृत्ति सपक्षवृत्तीत्यादिवाक्यपञ्चक-समूहेऽतिव्याप्तेः। प्रतिज्ञात्वादिना वाक्यनिवेशे च प्रयोजकान्तवैयर्थ्यात् सिद्धान्तलक्षणे पर्यवसानम्।

२. नन्वत्र लक्षणे तादृशपदेन प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकहेतु-प्रतिपाद्यविशिष्टार्थविषयक उदाहरणप्रतिपाद्यविशिष्टार्थविषयक उपनयप्रतिपाद्यविशिष्टार्थविषयक निगमनप्रतिपाद्यविशिष्टार्थविषयक-समूहालम्बनयत्किञ्चिद्बोधनिवेशे धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यत्र हेतुवाक्याऽघटितप्रतिज्ञोदाहरणादिचतुष्टयेऽतिव्याप्तिः, तद्वृत्तिसमुदायत्वे हेतुप्रतिपाद्यविशिष्टार्थविषयकशाब्दत्वा-वच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतप्रतिज्ञामात्रविषयक-यत्किञ्चिद्ज्ञानीयविषयताश्रयवर्णत्वव्यापकत्वस्य सत्वात्, यदि च हेतुज्ञानज्ञाप्यसाध्यवत्पक्षविषयक "प्रतिज्ञाहेत्वोर्विशिष्टवैशिष्ट्या-वगाहि" बोधस्तादृशलक्षणघटकस्तदा तत्रातिव्याप्तिवारणेऽपि एकन्यायघटकीभूतप्रतिज्ञाऽपरन्यायघटकीभूतहेत्वादिचतुष्टयै-तदुभयघटितसमुदायेऽतिव्याप्तिवारणाय "स्वाश्रयीभूतप्रतिज्ञाद्य-व्यवहितोत्तरत्वशून्यहेत्वादिवृत्तियद्यत्समुदायत्वं तद्भिन्नरूपविशेषणस्य" वैयर्थ्यमिति **चेन्न।** तादृशभिन्नत्वस्याऽत्राऽनिवेशात्। न चैवमुत्तरग्रन्थाऽसंगतिरिति वाच्यम्। प्रतिज्ञा आदिर्येषामिति व्युत्पत्त्या प्रतिज्ञापदस्य हेत्वादिपरत्वात्। हेतुरादिर्येषामिति व्युत्पत्या हेत्वादिपदस्योदाहरणादिपरत्वात्। भेदद्वयनिवेशे तद्ग्रंथतात्पर्यात्, उपनयनिगमनयोरपि विशिष्टवैशिष्ट्यावगाहिबोधसंभवात्। अन्यथा भेदत्रयनिवेशो बोध्य इति ध्येयम्।

३. अथ यत्किञ्चित्त्वनिवेशेऽननुगम इति चेन्न तादृशशाब्दबोध-विशिष्टज्ञानविशिष्टसमुदायत्वस्य विवक्षणात्। ज्ञाने शाब्दबोधवै॰

व्यापकतासंबन्धेन तत्र व्याप्यतावच्छेदकसबन्ध: स्वनिष्ठजन्यतानिरूपितशब्दज्ञाननिष्ठजनकतात्वरूप:, स्वनिरूपितविषयितावच्छेद्यत्वं व्यापकतावच्छेदकसंबन्ध:, समुदायत्वे ज्ञानवै॰ व्यापकता सम्बन्धेनैव। व्याप्यत्वं स्वनिरूपित "वर्णनिष्ठ" विषयतासंबन्धेन। व्यापकता च स्वरूपसंबन्धेनेति ध्येयम्।

४. न च योग्यताज्ञानकारणताया अपि शब्दविषयकसमूहालम्बनवृत्तितयाऽसंभवो दुष्परिहर एवेति वाच्यम्। शब्दत्वव्याप्यजात्यवच्छिन्नविषयित्वावच्छिन्नत्वस्य कारणतायां विवक्षणात्। न च तथापि यत्र ग "वर्ण" स्य पक्षत्वं क "वर्ण" स्य साध्यत्वं तत्रत्यन्यायेऽव्याप्तिर्दुर्वारैव, योग्यताज्ञानकारणताया अपि तादृशविषयित्वावच्छिन्नत्वेन यादन्तर्गतत्वेन तादृशकारणतावच्छेदककोटिप्रविष्टविषयताश्रयत्वस्य साध्यात्मकवर्णे सत्वेन तत्र न्यायगतसमुदायत्वस्याभावादिति **वाच्यम्। शब्दज्ञाननिष्ठेत्यनेन** निश्चयत्वावच्छिन्नत्वस्य कारणतायां **विवक्षणात्**, तथा च योग्यताज्ञानकारणता न निश्चयत्वावच्छिन्ना किन्तु संशयसाधारणज्ञानत्वावच्छिन्नैवेति योग्यताज्ञानकारणताव्यावृत्ति:। **अथैवमपि** विशिष्टवै शिष्यावगाहिबुद्धित्वावच्छिन्नजन्यतानिरूपितविशेषणतावच्छेदकप्रकारकनिश्चयत्वावच्छिन्नकारणतामादाय गगनपक्षकवर्णविशिष्टवर्णसाध्यकन्यायेऽव्याप्ति:, तादृशकारणतावच्छेदककोटिप्रविष्टविषयताया: वर्णविशिष्टवर्णे एव सत्त्वेन तत्र न्यायगतसमुदायत्वस्याभावादिति चेन्न। **तादृशयकिञ्चिच्छाब्दबोधनिरूपितेत्यनेन** शाब्दबोधनिष्ठशाब्दत्वव्याप्यजात्यवच्छिन्ननिरूपितत्वस्य **विवक्षणादिति।**

केचित्तु शाब्दबोधं प्रति यथाऽऽनुपूर्वीरूपाऽऽकाक्षाज्ञानं कारणं तथा एकपदार्थे अपरपदार्थवत्त्वरूपाया योग्यताया ज्ञानमपि कारणं तथा च पर्वतधर्मिकवह्निमत्प्रकारकशाब्दत्वावच्छिन्नजन्यतानिरूपिता या पर्वतधर्मिकवह्निमत्प्रकारकशानत्त्वरूपयोग्यताज्ञानत्वावच्छिन्न-

कारणता तदवच्छेकीभूतविषयताश्रयवर्णाऽप्रसिद्ध्यासम्भवः अतः **शब्दज्ञाननिष्ठत्वं** जनकताविशेषणम्।

न च तथापि घटशब्दोगुणः द्रव्यकर्मान्यत्वे सति सत्त्वादित्यादौ पक्षीभूतघटशब्दविषयकत्वघटितयोग्यताज्ञानत्वावच्छिन्नजनकताया अपि शब्द ज्ञाननिष्ठतया तदवच्छेदकीभूतयत्किञ्चिद्ज्ञानीयविषयताश्रयपक्षीभूतशब्दसाधारणवर्णत्वव्यापकत्वस्य न्यायगतसमुदायत्वे विरहात्तत्रत्यन्यायेऽव्याप्ति दुर्वारैवेति वाच्यम्। शब्दज्ञाननिष्ठेत्यनेनाऽव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकताकजन्यतानिरूपितत्वस्य जनकतायां विवक्षणात्। तथा च पर्वतधर्मिकवह्निमत्प्रकारकशाब्दबोधं प्रति पर्वतो वह्निमानित्यानुपूर्वीप्रकारकज्ञानत्वेन कारणत्वे पर्वतो दहनवान् गिरिर्वह्निमानित्याद्यानुपूर्वीप्रकारकज्ञानोत्तरपर्वतधर्मिकवह्निमत्प्रकारकशाब्दबोधे व्यभ्भिचारः। तद्वारणार्थ पर्वतो वह्निमानित्यानुपूर्वीप्रकारकज्ञानत्वावच्छिन्न कारणता निरूपितकार्यतायामव्यवहितोत्तरत्वसम्बन्धाावच्छिन्नतादृशानुपूर्वीप्रकारकज्ञान निष्ठावच्छेदकताकत्वमवश्यं वाच्यम्। एवं चाऽव्यवहितोत्तरत्वसम्बन्धेन पर्वतो वह्निमानित्यानुपूर्वीप्रकारकज्ञानविशिष्टपर्वतधर्मिकवह्निमत्प्रकारकशाब्दबोधं प्रति पर्वतो वह्निमानित्यानुपूर्वीप्रकारकज्ञानविशिष्टपवतधर्मिकवह्निमत्प्रकारकशाब्दबोधं प्रति पर्वतो वह्निमानित्यानुपूर्वीप्रकारकज्ञानं कारणमिति कार्यकारणभावः। पर्वतधर्मिकवह्निमत्प्रकारकशाब्दत्वाच्छिन्नं प्रति पर्वतधर्मिकवह्निमत्प्रकारकयोग्यताज्ञानत्वेन कारणत्वे व्यभिचारविरहेण तत्कार्यतायामव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकताकत्वस्यानिवेशनीयतया योग्यताज्ञानत्वावच्छिन्नकारणताया लक्षणाऽघटकत्वान्नासम्भवः।

यदि च यत्रैकविधाऽनुपूर्वीज्ञानादेव प्रतिज्ञाजन्यशाब्दबोधो जायते तत्र तादृशप्रतिज्ञाज्ञानकारणतायां व्यभिचाराभावात्तत्कार्यतायामव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकताकत्वस्याऽनिवेशेन तादृशप्रतिज्ञाघटितन्यायेऽ व्याप्तिरित्युच्यते, तदा पदार्थोपस्थितिद्वाराजनकता-

लाभायैव **शब्दज्ञाननिष्ठेत्युक्तम्**। तथा चाऽकांक्षाज्ञानमेव पदार्थोपस्थितिद्वारा कारणं न तु योग्यताज्ञानमिति योग्यताज्ञान-कारणतामादाय न दोष इति **वदन्ति**।

५. तादृशयत्किंचिच्छाब्दबोधविशिष्टसमुदायत्वम्। वैं०

स्वनिरूपितजनकतात्वविशिष्टज्ञानवत्त्वसम्बन्धेन वैं० स्वाधिकरण-निष्ठभेदप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेद-कताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन, अवच्छेदकता च स्वीय-विषयत्वावच्छेद्यत्वसम्बन्धेन "आधेयतासंबन्धेन वा"। ज्ञानवत्ता च स्वीयविषयताश्रयवर्णत्वसमानाधिकरणभेदप्रतियोगितावच्छेद-कत्वसम्बन्धावच्छिन्नस्वनिष्ठत्वच्छेदकता- कप्रतियोगिताकभेदवत्त्व-संबन्धेनेति **परम गुरुचरणाः**।

६. अनुगमस्तु–तादृशकारणतात्वव्यापकसमुदायत्वम्। व्यापकता च स्वनिष्ठनिरूपितत्वसंबन्धावच्छिन्नावच्छेदकतानिरूपिताऽ-वच्छेदकत्वनिष्ठावच्छेदकतानिरूपिता सती ज्ञानवृत्ति उभयावृत्ति-धर्मनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकनिरूपितत्वसंबन्धावच्छिन्ना-वच्छेदकतानिरूपकीभूता या विषयतात्वावच्छिन्नावच्छेदकता तन्निरूपकवर्णनिष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठावच्छेदकता-निरूपकभेदनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठा-वच्छेदकतानिरूपकीभूता याऽवच्छेदकतात्वावच्छिन्न प्रतियोगिता तन्निरूपकाभाववत्त्वसंबन्धावच्छिन्नाधेयतासंबन्धेनेति। अभाव-प्रतीतिश्च स्वावच्छेदकीभूततद्ज्ञानीयविषयता- श्रयवर्णवृत्तिभेद-प्रतियोगितावच्छेदकत्वं नास्तीति। स्वं० कारणता।

७. यद्वा प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकशाब्दबोधविशिष्ट-ज्ञानविशिष्टसमुदायत्वं तत्पक्षसाध्यहेतुकन्यायत्वम्। ज्ञाने शाब्दबोध-वैं०स्वनिरूपितजनकतानिष्ठभेदप्रतियोगितावच्छेदकत्वसम्बन्धा-वछिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्व सं०। स्वनिष्ठावच्छेदकता च स्वनिरूपिताविषयतत्वावच्छिन्नत्वसंबन्धा-

वच्छिन्ना। स्वं ज्ञानम्। ज्ञानवैºस्वनिरूपितविषयताश्रयवर्णनिष्ठ-भेदप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्नेति ध्येयम्।

अथ यत्किञ्चिच्छाब्दबोधनिरूपितजनकतावच्छेदिका यत्किञ्चिद्-ज्ञानीयवर्णनिष्ठा या या विषयता प्रत्येकं तत्तत्सामानाधिकरण्यस्य "समुदायदले" विवक्षणेनैव सामंजस्ये व्यापकत्वनिवेशो व्यर्थः। नचा ऽनन्तसामानाधिकरण्यनिवेशे गौरवमिति वाच्यम्। यत्किञ्चि-च्छाब्दबोध- निरूपितजनकतावच्छेदकीभूतयत्किञ्चिद्ज्ञानीयवर्णनिष्ठ विषयतात्वव्यापकत्वस्य समुदायत्वे विवक्षणीयत्वात्। व्यापकता च सामानाधिकरण्यसंबन्धेन। न च यत्किञ्चित्पदेन प्रतिज्ञामात्र-विषयकज्ञानमादाय प्रतिज्ञायामतिव्याप्तिरिति वाच्यम्। तादृशशाब्द-बोधविशिष्टसमुदायत्वस्यैव विवक्षणात्। वैº व्यापकतासम्बन्धेन। तत्र च व्याप्यत्वं स्वनिरूपितजनकतावच्छेदकत्वस्वाव्यवहित-पूर्ववर्तिज्ञानीयवर्णनिष्ठविषयतात्वोभयसंबन्धेन। व्यापकता च स्वाश्रयवर्णवृत्तित्वसम्बन्धेनेति चेन्न। यत्र स्थलविशेषे यन्न्यायविषयकज्ञानोत्तरं तादृशबोधो न जातस्तत्राऽव्याप्तिः, तद्ज्ञानीयविषयतायां स्वनिरूपितजनकतावच्छेदकत्वसत्वेऽपि स्वाव्यवहितपूर्ववर्तिज्ञानीयविषयतात्वाभावेन तादृशसमुदायत्वस्य शाब्दबोधविशिष्टत्वाभावात्। न च तत्रापि तत्राऽगतिरिति वाच्यम्। स्वमते न्यायान्तरजन्यबोधमादायैव लक्षणगमनादिति ध्येयम्।

८. यत्तु न्यूनवृत्तित्वं स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वसमानाधिकरणत्वम्। स्वद्वयं-वाक्यान्तरघटितसमुदायत्वपरम्। न च स्वाधिकरणं यत्प्रत्येकं प्रतिज्ञादि तत्र न्यायत्वावच्छिन्न-भेदसत्वेनाऽसंभव इति वाच्यम्। स्वावच्छिन्नानुयोगिताकभेद-प्रतियोगितानिवेशेन तद्वारणात्। प्रतियोगितायां चाऽनुयोगितासमानाधि-करणभेदप्रतियोगितावच्छेदकत्वं निवेशनीयम्। तेन वाक्यान्तर-साधारणसमुदायत्वस्य न्यायत्वन्यूनवृत्तित्वेऽपि नासंभवः। उच्चारणभेदेन न्यायभेदादेकन्यायत्वस्याऽपरन्यायत्वनिष्ठ-न्यूनवृत्तितानिरूपकतयाऽसंभव इति स्वसमानाधिकरणत्वनिवेशः।

एवं च घटमानयेति वाक्येऽतिव्याप्तिवारणाय विशेष्यदले व्यापकान्तमिति। तन्न। तत्र नियमतो वाक्यान्तरार्थविषयकन्यायार्थबोधः तत्र वाक्यान्तरघटितसमुदाये एतद्विशेषणोपादानेऽपि अतिव्याप्तिरशक्यसमाधाना स्यात्, एवं न्यायत्वेऽप्यैकन्यायघटकवाक्यपञ्चकवृत्तिसमुदायत्वनिष्ठन्यूनवृत्तितानिरूपकत्वसत्त्वादसंभवापातादिति ध्येयम्।

९. केचित्तु स्वाश्रयोत्तरवर्तिस्वानाश्रयतत्पुरुषप्रयुक्तशब्दानुत्तरत्व, स्वाश्रयप्रतिज्ञोत्तरत्वोभयाभावविशिष्टं यद्धेतुवृत्तिसमुदायत्वं तद्भिन्नं सत्, एवं तादृशशब्दानुत्तरत्व-स्वाश्रयहेतूत्तरत्वोभयाभावविशिष्टोदाहरणवृत्तिसमुदायत्वभिन्नं "एवमुदाहरणोपनयाऽव्यवहितोत्तरत्वशून्यवृत्तिसमुदायत्वभिन्नत्वं निरुच्य तादृशसमुदायत्वभिन्नं" यत्समुदायत्वं तस्य स्वाश्रयीभूतेत्यादिना विवक्षणान्नाव्याप्तिः। तेन द्वित्रिक्षणसाधारणाऽव्यवहितोत्तरत्वनिवेशे यत्र प्रतिज्ञाप्रयोगानन्तरं दण्डादिविलम्बे हेत्वादिप्रयोगस्तत्र नाव्याप्तिरित्याहुः।

न चैवं यत्र प्रतिज्ञाप्रयोगानन्तरं घटपदप्रयोगः ततो हेत्वादिप्रयोगस्तादृशहेत्वादिघटितन्यायेऽव्याप्तिरिति वाच्यम्। तादृशहेत्वादिघटितप्रतिज्ञादिपञ्चकसमुदायस्य न्यायत्वानभ्युपगमात्। यत्र प्रतिज्ञाप्रयोगानन्तरं नोदासीनप्रयोगः किन्तु हेत्वादिप्रयोगस्तत्रैव न्यायत्वस्वीकारात्। एतन्मते प्रतिज्ञाप्रयोगानन्तरं यत्र दण्डादिविलम्बेन हेत्वादिप्रयोगस्तत्र हेत्वादिघटितन्यायस्याप्यलक्ष्यतयैवेति ध्येयम्।

वस्तुतोऽत्राऽव्यवहितोत्तरत्वं न स्वाधिकरणक्षणध्वंसाधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वम्। येन जिज्ञासाप्रयुक्तन्यायेऽव्याप्तिः स्यात् किन्तु प्रतिज्ञोत्तरं यादृशयादृशक्षणव्यवधानेऽपि हेत्वादिप्रयोगे न्यायव्यवहारोऽनुभवसिद्धस्तस्यैव क्षणत्वात्, तत्तक्षणभिन्नत्वस्यैव शून्यत्वान्तेन विवक्षणात्। तत्त्वञ्च स्वाधिकरणसमयध्वंसाधिकरणत्वस्वाधिकरणत्व-एतदन्यतरवत्त्वे सति स्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसाधिकरण- समयध्वंसानधि-

करणत्वादिरूपं यथायथमूह्यमिति संक्षेपः।

अत्र लक्षणे पञ्चपुरुषप्रयुक्तक्रमिकपञ्चावयवघटितसमुदायेऽति-व्याप्तिवारणाय एकत्ववदन्यत्वमपि समुदायत्वे विशेषणीयम्। एकत्ववत्ता च स्वाश्रयसमवेतकृतिप्रयोज्यशब्दवृत्तित्व-स्वानाश्रय-समवेतकृतिप्रयोज्यशब्दवृत्तित्वोभयसम्बन्धेन।

अथवा स्वाश्रयीभूतप्रतिज्ञाव्यवहितोत्तरत्वशून्येत्यत्रप्रतिज्ञाऽव्यवहितोत्त-रत्वं प्रतिज्ञात्वम्। प्रतिज्ञावत्ता च स्वोत्तरत्व-स्वोच्चारकपुरुषो-च्चरितत्व-स्वोत्तरवाक्यवदन्यत्वैतत्त्रितयसम्बन्धेन। वाक्यवत्ता च स्वोत्तरत्त्व-स्वोच्चारकपुरुषोच्चरितत्वोभसम्बन्धेन। एवं च न कोपि दोष इति ध्येयम्।

१०. एतेन निरुक्तसम्बन्धावच्छिन्ननिरुक्तरूपावच्छिन्नप्रतियोगिताकत्व-विशिष्टभेदचतुष्ट्यनिवेशापेक्षया स्वतादात्म्य-स्वाश्रयप्रतिज्ञाऽ-व्यवहितोत्तरहेतुवृत्तित्व, स्वाश्रयहेत्वव्यवहितोत्तरोदाहरणवृत्तित्व, स्वाश्रयोदाहरणाऽव्यवहितोत्तरोपनयवृत्तित्व, स्वाश्रयोपनयाव्यवहि-तोत्तरनिगमनवृत्तित्व एतत्पञ्चसम्बन्धेन, समुदायत्ववत्त्वनिवेशे लाघवं किं नञ्द्वयघटितभेदचतुष्टयनिवेशेनेत्यपि निरस्तम्। तत्तद्यक्तित्वेन भेदचतुष्टयनिवेशापेक्षया निरुक्तपञ्चसम्बन्धेन समुदायत्ववत्त्व-निवेशस्याऽतिगुरुत्वादिति ध्येयम्।

११. तादृशप्रतिज्ञासमानाधिकरणो न्याय इतिज्ञानीयाऽऽनुपूर्वीनिष्ठा या सामानाधिकरण्यनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकता तादृशावच्छेदकताविषयिताकाऽऽनुपूर्वीविषयकज्ञानान्तरे नास्ति, एतादृशविषयितानिरूपकीभूता या विशेष्यतावच्छेदकता तस्या अभावात्। तथाच ज्ञानभेदे विषयिताया ऐक्येऽपि निरूपकभेदाद्भिन्नेति भावः।

१२. अथात्र न्यायलक्षणप्रविष्टप्रतिज्ञाशरीरे न्यायान्तर्गतत्वप्रवेशे कथमन्योन्याश्रयः, प्रतिज्ञाघटकीभूतन्यायान्तर्गतत्वस्य प्रतिज्ञोत्तर-हेतूरोदाहरणोत्तरोपनयोत्तरनिगमनत्वरूपाऽऽनुपूर्व्यवच्छिन्न-

प्रतियोगिताकभेदप्रतियोगितावच्छेदकत्वमात्ररूपत्वेन प्रकृतन्याय-त्वाऽघटितत्वादिति चेन्न। स्वाविषयकप्रतीत्यविषयन्यायत्वकत्वं न्यायत्वाश्रयत्वं वा न्यायान्तर्गतत्वमिति यथाश्रुताभिप्रायेण तत्संगतेः।

१३. समर्थःपदविधिरिति सूत्रम्। अस्यार्थः—**पदविधिः** पदकार्यम्। कार्याणि च कृत्तद्धितसमासादीनि। समर्थः-समर्थाश्रित एव, सर्वं वाक्यं सावधारणमिति न्यायात्। एवकारव्यवच्छेद्यं चाऽसमर्थाश्रितत्वम्, असामर्थ्यं च स्वविशिष्टविशेष्यकशाब्दबोधानुकूलवृत्त्यघटक-पदार्थान्वितस्वार्थपरत्वम्। तथा च प्रकृते वह्निपदस्य वृत्त्यघटक-द्विरुक्तयत्पदार्थान्वितस्वार्थपरत्वेऽसामर्थ्यान्न तदुत्तरं तद्धितसंभव इति भावः। वृत्तयश्च कृत्तद्धितसमासैकशेषसनाद्यन्तधातवः।

१४. अथ यादृशयादृशवाक्यानामित्युक्तरीत्या न्यायान्तरवाक्यानामपि तादृशत्वात्तावद्वृत्तित्वस्य न्यायत्वेऽसत्वादसंभवः, वक्ष्यमाणाति-व्याप्त्यसंगतिश्च। न च यादृशसमुदायत्वाश्रयप्रयोज्यस्मृतिविषयत्वं परामर्शविषयताव्यापकं तादृशसमुदायत्वाश्रयत्वमिति पूर्वनिरुक्तार्थे तात्पर्यं वक्तुं शक्यम्। अविशेषप्रसङ्गत् उक्तातिव्याप्ते दुर्वारत्वाच्चेति चेन्न। यत्किञ्चित्परामर्शप्रयोजकता यादृशयादृशवाक्यानामिति विवक्षणीयम्। न्यायान्तरगतवाक्यानामतादृशत्वान्नासंभवः। न च को वह्निमान् कुत इत्यादिवाक्यानामपि तादृशतयाऽसंभवो दुर्वार इति वाच्यम्। एकप्रयुक्तत्वेन तादृशवाक्यस्य विशेषणीयत्वात्। न चाऽग्रिमदीधित्यसंगतिःशक्या। तादृशवाक्यपञ्चकस्यैकप्रयुक्तत्वेन तत्रैवातिव्याप्तेरेवाभिप्रेतत्वान्न वाक्यदशकेत्यस्य वक्तुं शक्यत्वात्। न च तथा सति पर्वतो वह्निमान्, कुतः?धूमादित्यादेरित्यत्र पर्वतो वह्निमान् इत्यस्य वैफल्यं शक्यं लक्षणसमन्वयार्थं तदुक्तेः। न च विप्रतिपत्तिघटकपर्वतो वह्निमानिति वाक्यस्य न्यायप्रयोक्तुप्रयुक्तत्वेन तादृशतद्घटितसमुदायवृत्तित्वस्य न्यायत्वेऽसंभवादसंभव इति वाच्यम्। आवृत्तौ सैव प्रतिज्ञेति मते विप्रतिपत्तिघटकवाक्यस्य पुनरनुसन्धानमात्रमेव न पुनः प्रतिज्ञावाक्योच्चारणमिति तस्य वाक्यान्तरत्वाभावादिति विभावनीयम्।

१५. अत्र तादृशनिश्चयत्वव्याप्यत्वं न **तादृशनिश्चयत्वाभाववद-वृत्तित्वरूपं**, स्वरूपसम्बन्धात्मिकायाः कारणतायाः प्रतिव्यक्तिभेदेन भिन्नत्वे प्रतिज्ञोत्तरत्वविशिष्टहेतुवैशिष्ट्यावगाहिबुद्धिं प्रति हेतुधर्मिकप्रतिज्ञोत्तरत्वप्रकारकनिश्चयस्य **कारणत्वेऽपि** निगमनं प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरमिति निश्चये वर्त्तते या कारणता तस्यास्तादृशनिश्चयत्वाभाववदवृत्तितया तदवच्छेदकत्वस्य प्रतिज्ञोत्तरत्वविषयतानिरूपितहेतुत्वावच्छिन्नविषयतात्वेन प्रतिज्ञोत्तरो हेतुरिति ज्ञानीयविषयतायां सत्त्वात्तादृशविषयतावत्त्वमादाय न्यायान-न्तर्गतप्रतिज्ञोत्तरहेता**वति व्याप्तेः किन्तु तादृशनिश्चय-त्वाभाववद्वृत्तिविषयित्वानवच्छिन्नत्वरूपं "तादृशानुपूर्वी-प्रकारताशून्यज्ञानवृत्तिविषयित्वानवच्छिन्नत्वरूपं वा"**। तथा च प्रतिज्ञोत्तरत्वविषयतानिरूपितहेतुत्वावच्छिन्नविशेष्यताशालि-निश्चयत्वावच्छिन्ना या तादृशविशिष्टानुपूर्वीप्रकारकनिश्चयवृत्ति-कारणता तस्या अपि तादृशविशिष्टानुपूर्वीप्रकारताशून्यं यत्प्रतिज्ञोत्तरो हेतुरिति ज्ञानं तद्वृत्तिविषयित्वावच्छिन्नत्वान्न तादृशकारणता लक्षणघटिका। **एवं** तादृशनिश्चयनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपं व्यापकत्वमपि स्वरूपसम्बन्धात्मिकायाः कारणताया भिन्नत्वेऽ-प्रसिद्धम्, अतस्तादृशभेदप्रतियोगितावच्छेदकत्वं स्वावच्छेदकीभूत-विषयित्वसम्बन्धावच्छिन्नं **ग्राह्यम्। तथा च** तादृशानुपूर्वी-प्रकारकैकज्ञानवृत्तिकारणताया अपि स्वावच्छेदकीभूतविषयित्व-सम्बन्धेन तादृशापरज्ञाने सत्त्वात्स्वावच्छेदकीभूतविषयित्व-सम्बन्धावच्छिन्न तादृशनिश्चयनिष्ठभेदप्रतियोगितानवच्छेदकताया अभावस्तादृशकारणतायाम**क्षतमेव।**

ननु यथा रक्तदण्डवानिति बुद्धिं प्रति दण्डत्वावच्छिन्नधर्मिक-रक्तत्वप्रकारकनिश्चयत्वेन कारणता। तत्र **दण्डत्वावच्छिन्नधर्मिक-रक्तत्वप्रकारकनिश्चयत्वं च** दण्डत्वाद्यच्छिन्नधर्मिकरक्तत्वा-भावाऽप्रकारकत्वे सति दण्डत्वावच्छिन्नविशेष्यतानिरूपित-रक्तत्वप्रकारकज्ञानत्वरूपमिव दण्डत्वावच्छिन्नविशेष्यतानिरूपित-रक्तत्वाभावाप्रकारकत्वे सति रक्तत्वप्रकारतानिरूपितदण्डत्वा-

वच्छिन्नविशेष्यताकज्ञानत्वमपि। **तथा च** दण्डत्वावच्छिन्नविशेष्यता-निरूपितरक्तत्वप्रकारत्वावच्छिन्ना या कारणता रक्तत्वप्रकारता-निरूपितदण्डत्वावच्छिन्नविशेष्यत्वावच्छिन्ना या च कारणता तदुभयोः साक्षादवच्छेदकं दण्डत्वावच्छिन्नधर्मिकरक्तत्वाभावा-भावाप्रकारकत्वम्। **तथे**हापि अव्यवहितोत्तरत्वसम्बन्धावच्छिन्न-प्रतिज्ञात्वावच्छिन्नविषयतानिरूपिता या तादृशसम्बन्धावच्छिन्न-हेतुत्वावच्छिन्नविषयता तन्निरूपिता या तादृशसम्बन्धाव-च्छिन्नोदाहरणत्वावच्छिन्नविषयता तन्निरूपिता या तादृशसम्बन्धाव-च्छिन्नोपनयत्वावच्छिन्नविषयता तन्निरूपिता या निगमनत्वावच्छिन्न-विशेष्यताशालिनिश्चयत्वमपि। निगमनत्वावच्छिन्नविशेष्यताकाऽ-व्यवहितोत्तरत्वसम्बन्धावच्छिन्नतादृशोपनयाभावाऽप्रकारकत्वे सति तादृशोपनयप्रकारतानिरूपितनिगमनत्वावच्छिन्नविशेष्यताकज्ञानत्व**मिव**-तादृशोपनयाभावाऽप्रकारकत्वे सति निगमनत्वावच्छिन्नविशेष्यता-निरूपिताऽव्यवहितोत्तरत्वसम्बन्धावच्छिन्नोपनयप्रकारताशालिज्ञानत्वमपि भवति एवं क्रमेण विनिगमनाविरहात्तादृशविषयतान्तःपातिन सकलविषयत्वावच्छिन्ना या या कारणताः तासां सर्वासां एवाऽवच्छेदककीभूतं निगमनत्वावच्छिन्नविशेष्यकतादृशोपनया-भावाऽऽप्रकारकत्वं भवति तथा च विशेष्यांशं परित्यज्य निगमनत्वावच्छिन्नविशेष्यकतादृशोपनयोत्तरत्वाभावप्रकारकान्य-त्वनिष्ठा या स्वरूपसम्बन्धावच्छिन्नाऽवच्छेदकता तन्निरूपिका या कारणता तदवच्छेदकीभूतविषयतावत्त्वमेव **न्यायान्तर्गतत्वमस्तु। तेनैव** प्रतिज्ञोत्तरहेतुवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नकार्यतानिरूपित-हेतुविशेष्यक प्रतिज्ञोत्तरत्वप्रकारकनिश्चयत्वावच्छिन्नकारणताया व्युदासः सम्भवति तादृशकारणतावच्छेदककोटौ निगमनत्वाव-च्छिन्नविशेष्यकतादृशोपनयोत्तरत्वाभावप्रकारकान्यत्वस्याऽप्रवेशात्। तथा च **व्याप्यत्वदलं विफलम्। एवं** प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरो-पनयोत्तरनिगमनभिन्नवाक्यवानिति बुद्धिं प्रति वाक्यत्वावच्छिन्न-धर्मिकतादृशनिगमनभिन्नत्वप्रकारकनिश्चयत्वावच्छिन्नकारणतायां निगमनत्वावच्छिन्नविशेष्यकतादृशोपनयोत्तरत्वाभावप्रकारकान्यत्वावच्छिन्न-

त्वस्याऽप्रवेशादेव तादृशकारणतावच्छेदकीभूतविषयतावत्त्वमादाय तादृशवाक्येतिव्याप्तिव्युदाससम्भवाद् **व्यापकत्वदलमपि विफलम्।** प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनवानिति बुद्धिं प्रति निगमनत्वावच्छिन्नविशेष्यकतादृशोपनयोत्तरत्वप्रकारकनिश्चयनिष्ठा विनिगमनाविरहेण या या कारणता सर्वासामेव तासां निगमनत्वावच्छिन्नविशेष्यकतादृशोपनयोत्तरत्वाभावप्रकारकान्यत्वस्याऽवच्छेदकतया न्यायान्तर्गतप्रतिज्ञादिषु सर्वेष्वेव तादृशाभावावच्छिन्नकारणतावच्छेदकीभूतविषयतावत्त्वान्नाऽव्याप्तिसम्भावनेति **चेन्न।** प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरनिगमनवानिति विशिष्टवैशिष्ट्यबोधस्य इतरसकलकारणसत्त्वेऽपि निगमनं तादृशोपनयोत्तरत्वप्रकारकं न वेति संशयः कदापि न जातः तत्र तादृशसंशयात्तादृशविशिष्टवैशिष्ट्यबोधोत्पत्तेरसम्भवात् तादृशविशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति निगमनत्वावच्छिन्नविशेष्यकतादृशोपनयोत्तरत्वप्रकारकज्ञानत्वेनैव कारणता वक्तव्या। तथा च न्यायान्तर्गतप्रतिज्ञादिषु निगमनत्वावच्छिन्नविशेष्यकतादृशोपनयोत्तरत्वाभावप्रकारकत्वान्यत्वावच्छिन्नकारणतावच्छेदकीभूतविषयतावत्त्वविरहात्तादृशप्रतिज्ञादिष्वव्याप्तिरतः **समनियतत्वं** कारणतायां निवेशितम्।

केचित्तु प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनभिन्नवाक्यवानिति बुद्धिं प्रति वाक्यत्वावच्छिन्नविशेष्यकतादृशनिगमनभिन्नत्वप्रकारकनिश्चयत्वावच्छिन्ना या कारणता तदवच्छेदककोटावुपनयोत्तरत्वाभावप्रकारकान्यत्वस्याऽप्रवेशेऽपि तादृशनिगमनोत्तरवाक्यवानिति बुद्धिं प्रति वाक्यत्वावच्छिन्नविशेष्यकनिगमनोत्तरत्वप्रकारकनिश्चयत्वावच्छिन्नकारणतायां तादृशोपनयोत्तरत्वाभावप्रकारकान्यत्वमवश्यं वक्तव्यम्। नं च तादृशबोधोविशेषणतावच्छेदकांशे संशयात्मको भवतीति तथापि विशेषणतावच्छेदकांशे निश्चयत्वं निवेशितमिति वाच्यम्। तादृशबोधस्याऽभावप्रत्ययवत्तथाविधविशिष्टवैशिष्ट्यावगाहित्वनियमे भेदांशे संशयात्मकत्वाऽसम्भवात्, प्रवेशेऽपि तादृशनिगमनोत्तरवाक्यवानिति बुद्धिं प्रति वाक्यत्वावच्छिन्न-

विशेष्यकतादृशनिगमनत्वप्रकारकनिश्चयत्वावच्छिन्नकारणतायां तादृशोपनयोत्तरत्वाभावप्रकारकान्यत्वमवश्यं वक्तव्यम्। अन्यथा विशेष्ये विशेषणमिति रीत्या निगमनांशे उपनयोत्तरत्वप्रकार-कसंशयात्मकवाक्यत्वावच्छिन्नधर्मिकतादृशनिगमनोत्तरत्व-प्रकारकज्ञानादपि तादृशनिगमनोत्तरवाक्यवानिति बुद्ध्यापत्तेः। तथा च तादृशोपनयोत्तरत्वाभावप्रकारकान्यत्वावच्छिन्नकारणतावच्छे-दकत्वं तादृशनिगमनोत्तरोदासीनवाक्यविषयतायामप्यस्ति इत्युदासीनवाक्यवारणमशक्यमित्याहुः। तन्न मनोरमम्। एवमपि व्यापकदलस्य व्यावृत्तिर्जाता न तु समनैयत्यघटक व्याप्यत्वदलस्य।

एवं विशेषणांशे लाघवाद् विशिष्टवैशिष्ट्यावगाहिविशेषणता-वच्छेदकप्रकारकनिश्चयस्यैव विशिष्टवैशिष्ट्यावगाहिबुद्धिहेतुत्वात्, विशेषणतावच्छेदकांशे संशयाकारकविशिष्टवैशिष्ट्यावगाहिबोधानुदयेन तादृशसंशयाकारकविशेषणतावच्छेदकप्रकारकज्ञानाद्विशिष्ट-वैशिष्ट्यावगाहिवुद्ध्युत्पत्त्यसम्भवेन तादृशोपनयोत्तरत्वभावप्रकारक-त्वस्य तदवच्छेदकतायामनिवेशादिति **ध्येयम्।**

अथ तादृशानुपूर्वीविशेषप्रकारकज्ञानत्वसमनियतकार्यतावच्छेद-कविषयताश्रयत्वनिवेशेनैवोपपत्तौ किं गुरुतरनिश्चयत्वसमनियत-कारणताघटितनिवेशेनेति **चेन्न।** विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयस्य कारणतेत्येकं **मतं**, विशिष्ट-वैशिष्ट्यावगाह्यनुभवं प्रति तादृशनिश्चयस्य कारणत्वमित्यपरं, **अपरं च** विशिष्टवैशिष्ट्यावगाहित्वावच्छिन्नं प्रति तादृशनिश्चयस्य कारणत्वमिति **मतत्रयसाधारण**किञ्चिद्धर्मसमनैयत्यं कार्यतायां न सम्भवतीति कारणतायां **तादृशनिश्चयत्वसमनैयत्यं** निवेशितम्। **वस्तुतः** तादृशानुपूर्वीप्रकारकज्ञानत्वस्योपलक्षितवैशिष्ट्याव-गाहिज्ञानसाधारणतया तत्समनैयत्यं न कुत्रापि जन्यतायां सम्भवतीति "तादृशनिश्चयत्वसमनैयत्यं कारणतायां सम्भवतीति" तादृशनिश्चयत्वसमनैयत्यं कारणतायां **निवेशितम्।** सर्वांशे विशिष्टवैशिष्ट्यावगाहित्वं निवेश्योपलक्षितवैशिष्ट्यावगाहि-

ज्ञानव्यावर्त्तने च प्रकृतापेक्षया **गौरवमेव** दूषणम्।

अथ तथापि तादृशानुपूर्वीप्रकारकज्ञानत्वसमनियतकारणतानिवेशेऽपि विशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजन्यतानिरूपितविशेषणतावच्छेदकप्रकारकज्ञानत्वावच्छिन्नकारणतामादाय सर्वसामजस्ये **निश्चयत्वप्रवेशो व्यर्थः। न चाऽन्तरा** सधर्मितावच्छेदककविशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयत्वेनैव कारणतया तादृशज्ञानत्वसमनियतकारणत्वाऽप्रसिद्धिरिति **वाच्यम्।** प्रतिज्ञादिविशिष्टनिगमनत्वरूपाऽनुपूर्वीमानित्याकारकाऽन्तरानिर्धर्मितावच्छेदककविशिष्टवैशिष्ट्यावगाहिज्ञानकारणताया एव तादृशज्ञानत्वसमनियतत्तयाऽप्रसिद्धेरनवकाशादिति चेन्न। विशिष्टनिगमनत्वांशे निश्चयत्वाऽनिवेशेऽपि तादृशनिगमनत्वरूपानुपूर्वीविशेषणीभूतप्रतिज्ञाद्यंशे निश्चयत्वनिवेशार्थमेव **निश्चयपदोपादानात्, अन्यथा** विशेषणांशे संशयात्मकज्ञानसाधारणतादृशानुपूर्वीप्रकारकज्ञानत्वसमनियतकारणताया एवाऽप्रसिद्ध्यापत्तेः। **वस्तुतो** ज्ञानत्वसमनियतकारणतानिवेशेऽप्रामाण्यनिश्चयाभावनिवेशेन गौरवान्निश्चयत्वसमनियतनिवेश एव युक्त इति **ध्येयम्।**

अत्रेदं चिन्त्यते। विशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नं प्रति न निश्चयत्वेन कारणत्व अपि तु संशयसाधारण्याय ज्ञानत्वेनैव तथा, तत्कथमत्र निश्चयत्वं **निवेशितम्! न चाऽन्तरा**सधर्मितावच्छेदककविशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्ननिरूपितकारणतालाभाय तत्। **तथाहि।** तादृशबुद्धित्वावच्छिन्नं प्रति निश्चयत्वेनैव कारणत्वं न तु ज्ञानत्वेन दण्डो रक्तो वेति संशयसत्त्वे रक्तदण्डवनिति निश्चयविरहात्। **तथा च प्रतिज्ञादिविशिष्ट** निगमनत्ववद्वाक्यत्ववानयमिति ज्ञानमादायलक्षणसमन्वय इति वाच्यम्। तादृशनिगमनत्वप्रकारकनिश्चयत्वस्य तादृशानुपूर्वीमद्वाक्यत्वात्, तादृशानुपूर्वीमद्वर्णवानित्यादिज्ञानसाधारणतया कस्या अपि कारणतायास्तादृशनिश्चयत्वसमनैयत्यविरहात्। यदि च वाक्यत्वधर्मितावच्छेदककतादृशनिश्चयत्वसमनियतकारणतामादाय

लक्षणसमन्वयः **तदा** निश्चयत्वनिवेशनं **विफलमिति विभावनीयम्।**

ननु तादृशविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजन्यता-निरूपितजनकतावच्छेदकविषयताश्रयत्वनिवेशेनैवोपपत्तौ किं व्याप्यत्वव्यापकत्वनिवेशेनेति चेन्न। तादृशानुपूर्वीभिन्नवाक्य-त्वविशिष्टवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नजन्यतानिरूपित "तादृशानु-पूर्व्यवच्छिन्नभिन्नवाक्यत्वप्रकारकज्ञानत्वाच्छिन्न" कारणतामादायो-दासीनेऽ**तिप्रसङ्गात्।** ननु अवच्छेदकतावच्छेदकसाधारणाऽवच्छेद-कत्वास्वीकारे तादृशबुद्धित्वपर्याप्तावच्छेदकताकजन्यता-निरूपितजनकतानिवेशाऽसम्भवेऽपि मुख्यविशेष्यतानिरूपित-तादृशानुपूर्व्यवच्छिन्नप्रतियोगिताकत्वावच्छिन्नसांसर्गिकविषयता-निरूपितप्रकारताशालि बुद्धित्वावच्छिन्नजन्यतानिरूपितजनकता-निवेशादतिव्याप्तिविरहादिति चेन्न। **एवं** सति व्युत्क्रमप्रयुक्तप्रतिज्ञा-कालीनतादृशानुपूर्वीविशिष्टवैशिष्ट्यावगाहि जन्यतानिरूपित-जनकतावच्छेदकविषयताश्रयत्वस्य व्युत्क्रमप्रयुक्तप्रतिज्ञायां सत्वात्तत्रातिव्याप्तिरतस्तद्वारणाय जन्यतावच्छेदककोटौ न्यूनेतरवारक-पर्याप्तिनिवेशनीयतया पर्याप्तिनिवेशेऽतिगौरवादिति **ध्येयम्।**

१६. अथ प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितानवच्छेदकत्वस्य धर्मविशेषणत्वेनैव प्रतिज्ञाहेतुसमुदायत्वस्य वारणादलं तत्तद्धर्मावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वविशेषणेन। गुणत्व-सत्त्वादेः प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रति-योगितानवच्छेदकत्वेऽपि प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं. यद्यद्रूपत्वादिकं तदवच्छिन्नानुयोगिताकभेदप्रतियोगिता-वच्छेदकत्वविरहेण गुणत्व-सत्त्वादिकमादायाऽतिव्याप्तेः प्रथमदेलेनैव वारणसंभवादिति **चेन्न।** प्रतिज्ञात्वावच्छिन्नानुयोगिताको यः प्रतिज्ञाहेतुसमुदायत्वावच्छिन्नप्रतियोगिताको भेदस्तत्प्रतियोगिता-वच्छेदकत्वस्यैव प्रतिज्ञात्वेऽपि सत्त्वात्, प्रतिज्ञात्वेऽपि तादृशाऽनवच्छेदकत्वस्य दुर्घटतयाऽसम्भवापत्तेः। तादृशभेदप्रतियोगिता-

वच्छेदकतापर्याप्त्यधिकरणभिन्नत्वनिवेशे च अवच्छेदकतावच्छेदकसाधारणाऽवच्छेदकतापर्याप्त्यङ्गीकर्तृमते प्रतिज्ञाहेतुसमुदायभेदप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वं न प्रतिज्ञाहेतुसमुदायत्वमात्रे किन्तु तादृशसमुदायत्वत्वान्तर्भावेणापीति तादृशप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मभेदः प्रतिज्ञाहेतुसमुदायत्वेऽक्षत एवेत्यतः प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदक- पर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वं निवेशितम्। तथा च प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नपर्याप्तिकावच्छेदकताकप्रतियोगिताकभेदानुयोगितावच्छेदकत्वस्य प्रतिज्ञाहेतुसमुदायत्वेऽसत्वान्न प्रतिज्ञाहेतुसमुदायत्वमादाय प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिः।

अत्र भेदे प्रतिज्ञात्वावच्छिन्नानुयोगिताकत्वे सति हेतुत्वावच्छिन्नानुयोगिताकत्वम् एकत्र द्वयमितिरीत्या न विशेषणम्। **तथासति** अधिकरणभेदेनाऽभावभेदस्वीकर्तृमते तादृशभेदाऽप्रसिद्याऽ**संभवापत्तेः। किन्तु** प्रतिज्ञात्वावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकं सत् हेतुत्वावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकं सत् इत्यादिक्रमेण निगमनत्वावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकं यत्तद्धर्मावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वं **निवेशनीयं,** प्रतिज्ञाहेतुसमुदायत्वावच्छिन्नभेदस्य प्रतिज्ञात्वादिरूपानुयोगितावच्छेदकभेदेन भिन्नत्वेऽपि प्रतिज्ञात्वावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकस्य प्रतिज्ञाहेतुसमुदायत्वेऽप्यनपायात्।

१७. अथ प्रतिज्ञादिभेदपञ्चकान्यतमप्रतियोगितावच्छेदकधर्मत्वं लघुलक्षणं कुतो न कृतं, प्रतिज्ञैकदेशत्वादेः प्रतिज्ञाहेतुसमुदायत्वादेश्च तादृशान्यतमभेदप्रतियोगितावच्छेदकत्वाभावादेकदेशे, प्रतिज्ञाहेतुसमुदाये चाऽतिप्रसङ्गानवकाशात्। एवं प्रतिज्ञात्वाद्यन्यतमत्वमेवावयव- लक्षणं सम्यगिति चेन्न। प्रतिज्ञाद्यन्यतमत्वं दीधितिकृतः प्रतिज्ञाद्यंशे एवाऽन्यतमत्वबोधनात् तादृशपरिस्कारः परित्यक्त इति ध्येयम्।

अथ तथापि न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यवृत्तिधर्मशून्यत्व-रूपलघुलक्षणसंभवे गुरुतरलक्षणानुसरणमनुचितमिति चेन्न। पक्षे साध्यवैशिष्ट्यावगाहिजन्यतानिरूपित जनकतावच्छेदकयत्किञ्चिद्-ज्ञानीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वरूपप्रतिज्ञात्वस्य लक्षणघटकत्वे प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तेः। स्वनिष्ठन्यूनवृत्तित्वा-निरूपकत्वघटितलक्षणकरणे लाघवानवकाशादिति ध्येयम्।

अथ प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकं यद्यद्रूपं तत्तद्रूपाव-च्छिन्नानुयोगिताको यो भेदः प्रतिज्ञात्वाद्यवच्छिन्नाननुयोगिताकः तत्प्रतियोगितावच्छेदकधर्मवत्त्वविवक्षयैव प्रतिज्ञाहेतुसमुदाय-धारणसंभवः। तथा हि प्रतिज्ञाहेतुसमुदायत्वावच्छिन्नभेदस्य प्रतिज्ञादिभेदपञ्चकानुयोगितावच्छेदकीभूतपर्वतपदत्वावच्छिन्नानु-योगिताकत्वेऽपि प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकत्वविरहात् इति विशेष्यदलस्यैव सम्यक्त्वे सत्यन्तदलं व्यर्थमिति चेन्न। अधिकरणभेदेनाऽभावभेदाङ्गीकर्तृमते प्रतिज्ञाहेतुसमुदायत्वावच्छिन्न-भेदस्य पर्वतपदत्वावच्छिन्नानुयोगिताकस्य प्रतिज्ञात्वाद्यवच्छिन्नानु-योगिताकत्वात्तादृशभेदमादाय प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तितादवस्थ्यात्।

१८. स्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वघटितलक्षणकरणे लाघवानवकाशादिति

१९. अथ पर्वतधर्मिकवह्निप्रकारकशाब्दत्वमात्रं न पर्वतो वह्निमानित्यानु-पूर्वीज्ञानस्य जन्यतावच्छेदकं पर्वतो दहनवानित्यानुपूर्वीज्ञानजन्यतादृश-शाब्दबोधसाधारणत्वात्। "तथा च परस्परजन्ये व्यभिचारः" किन्तु पर्वतो वह्निमानित्यानुपूर्वीज्ञानाव्यवहितोत्तरपर्वतधर्मिकवह्निप्रकारक-शाब्दत्वमेव। तथा च पर्वतधर्मिकवह्निप्रकारकशाब्दत्वपर्याप्ता-वच्छेदकताकजन्यतानिरूपितजनकत्वं न पर्वतो वह्निमानिति ज्ञानस्यापीति कथं प्रतिज्ञादौ लक्षणसमन्वयः। न च तादृशशाब्द-बुद्धित्वपर्याप्तावच्छेदकताकजन्यता इत्यनेन प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयताबहिर्भूतविषयत्वानवच्छिन्नत्वं विवक्षणीयम्। तादृशविषयताबहिर्भूतत्वं च तादृशविषयित्वावच्छिन्न-प्रतियोगिताकभेदप्रतियोगितानवच्छेदकत्वम्, भेदप्रतियोगितावच्छेदकता

च साक्षात्परम्परासाधारणी ग्राह्या। एवं च पर्वतो वह्निमान् धूमादित्यादिवाक्यज्ञाननिरूपिता या जन्यता तस्यास्तादृशविषयता-बहिर्भूतधूमज्ञानज्ञाप्यत्वविषयत्वावच्छिन्नतया न तादृशजन्यतामादाय प्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिः। पर्वतो वह्निमानिति प्रतिज्ञाजन्यता-वच्छेदककोटौ पर्वतो वह्निमानित्यानुपूर्वीज्ञानस्याऽव्यवहितो-त्तरत्वसम्बन्धेनाऽवच्छेदकत्वेऽपि तादृशजन्यतायां पर्वतत्वावच्छिन्न-विशेष्यतानिरूपितवह्नित्वावच्छिन्नविषयताबहिर्भूतविषयत्वान-वच्छिन्नत्वमस्त्येवेति प्रतिज्ञादिरूपावयवे लक्षणसमन्वय इति वाच्यम्। परस्परजन्ये व्यभिचारवारणाय पर्वतो वह्निमान् धूमादित्या-कारकाङ्क्षाज्ञानस्याऽव्यवहितोत्तरत्वसम्बन्धेन तादृशानुपूर्वीज्ञान-जन्यतावच्छेदकत्वे तज्जन्यतावच्छेदककोटौ पर्वतधर्मिकधूमज्ञान-ज्ञाप्यवह्निप्रकारतायाःप्रवेशो व्यर्थ इति प्रतिज्ञाहेत्वन्तभाग-विषयकज्ञाननिष्ठजनकतानिरूपितजन्यतायाः विषयत्वानवच्छिन्नतया प्रकृतपक्षे प्रकृतसाध्यविषयताबहिर्भूतविषयत्वानच्छिन्नत्वमक्षत-मेवेति प्रतिज्ञाहेत्वन्तवारणमशक्यमेवेति चेन्न। स्वावच्छिन्नाऽसमव-धानप्रयुक्तप्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिज्ञानोपधायक-त्वाभाववत् प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिज्ञानत्वकत्वा-च्छिन्नत्वेन जनकतां निवेश्य तादृशान्यतमत्वेन जनकतानिवेशे तात्पर्यात्। एवं च पर्वतत्वावच्छिन्नविशेष्यकवह्निप्रकारकयोग्यताज्ञाने यः प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिशाब्दबोधरूपफलोप-धायकत्वसामान्याभावः तत्र पर्वतो वह्निमानित्यानुपूर्वीज्ञानाभावः इति स्वपदेन पर्वतो वह्निमान्धूमादित्यानुपूर्वीज्ञानत्वं न धर्त्तुं शक्यते इति तदवच्छिन्नजनकतामादाय प्रतिज्ञाहेतुसमुदाये नातिव्याप्तिः। एवं प्रकारेणैव हेत्वाद्यानुपूर्वीज्ञानत्वावच्छिन्नजनकतापि निवेशनीया। एतादृशलाभार्थमेव तत्तद्बुद्धित्वपर्याप्तावच्छेदकताकत्वं जन्यतायां निवेशितम्।

२०. न च प्रतिज्ञादिप्रत्येकमात्रविषयकज्ञानमादाय प्रतिज्ञाहेतुसमुदायेऽ-तिव्याप्तिवारणाय तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वेन

तादृशसमुदायत्वविशेषणात् प्रतिज्ञाहेतुसमुदायत्वादेः प्रतिज्ञामात्र-समुदायत्वनिष्ठन्यूनवृत्तितानिरूपकतया तमादायाऽतिव्याप्तिशङ्का न संगच्छते इति वाच्यम्। प्रतिज्ञाघटकहेतुमात्रवृत्तिसमुदायत्वनिष्ठ-न्यूनवृत्तितानिरूपकत्वेन प्रतिज्ञाविशेषेऽव्याप्तिवारणाय यत्किञ्चिद्-ज्ञानीयतादृशविषयताश्रयवर्णसमुदायत्वरूपप्रतिज्ञालक्षणे वस्तुगत्या तज्ज्ञानं यत्किञ्चित्त्वेन निवेश्य तादृशसमुदायत्वनिष्ठन्यून-वृत्तित्वानिरूपकत्वस्य निवेश्यतया तस्य प्रतिज्ञाहेत्वादिसमुदाये सत्त्वात्।

२१. अथ पर्वतो वह्निमान्धूमादित्यत्र प्रतिज्ञाहेतुविषयकज्ञाने प्रतिज्ञा-ज्ञानत्वावच्छिन्न- जनकता वच्छेदकीभूतहेतुविषयिताविशिष्ट-प्रतिज्ञाज्ञानत्वावच्छिन्न जनकतायाः हेतुज्ञानत्वावच्छिन्नजनकता-वच्छेदकीभूतप्रतिज्ञाविषयिताविशिष्टहेतुज्ञानत्वावच्छिन्नजनकतायाश्च सत्त्वात् प्रतिज्ञाहेतुविषयकज्ञानमादाय प्रतिज्ञाहेतुसमुदायेऽति-व्याप्तिवारणेऽपि धूमादालोकवान्पर्वतोवह्निमानित्यत्रप्रतिज्ञाया-मव्याप्तिः, तादृशप्रतिज्ञाज्ञाने हेतुविषयकज्ञानत्वावच्छिन्न-जनकतावच्छेदकीभूता या पर्वतो वह्निमानिति "भागविषयकज्ञानवृत्ति" विषयिता तद्विशिष्टहेतुविषयकज्ञानत्वावच्छिन्नजनकतायाः सत्वात्। न च यादृशजनकतामादायाऽवयवे लक्षणं नेयम्, तादृशजनकतावच्छेदकीभूतविषयिताविशिष्टतथाविधजनकताशून्यत्व-मेव ज्ञाने विवक्षणीयम्। तथा च धूमालोकवान् पर्वतो वह्निमानिति प्रतिज्ञायां यादृशप्रतिज्ञाजनकतामादाय लक्षणं नेयं तादृशजनकता-वच्छेदकीभूतविषयिताविशिष्टतादृशान्यतमजन्यतानिरूपित-जनकताशून्यत्वस्य तादृशप्रतिज्ञाज्ञाने सत्त्वात् तादृशजनकतामादाय तादृशप्रतिज्ञायां लक्षणसमन्वय इति वाच्यम्। एवं यज्जनकतामादाय लक्षणं नेयं तज्जनकतावच्छेदकी भूतविषयिताशून्यत्वस्य ज्ञानविशेषणत्वेनैव प्रतिज्ञाहेतुवारणसंभवात्स्वानवच्छेदकीभूत-विषयिताविशिष्टतथाविधजनकतापर्यन्तानुधावनस्य वैयर्थ्यापत्तेरिति चेद्, एतत्कल्पे उदाहरणेऽव्याप्तेर्वक्ष्यमाणत्वात्।

२२. धूमादालोकवान्पर्वतो वह्निमानित्यत्राऽऽलोकपदं तेजः परम्, तेन हेतुवाक्ये एव वह्निनिष्ठधूमज्ञानज्ञाप्यत्वप्रतिपत्तावपि नानुमित्यनतिरिक्तविषयकत्वक्षतिरित्यस्मद्गुरुचरणाः।

२३. तेन कृतेः साध्यतायां कृतिप्रकारकबोधानिवर्त्त्यस्य कर्तृसंशयस्य निवर्तको यः कर्तृप्रकारको बोधस्तज्जनकत्वेऽपि चैत्रः कर्ता इति प्रतिज्ञायां नाव्याप्तिः।

तृतीयस्तबकः

अवयवतत्त्वचिन्तामणिरहस्यम्

गङ्गेशोपाध्यायविरचितः

अवयवतत्त्वचिन्तामणिः

मथुरानाथतर्कवागीशविरचितम्

अवयवतत्त्वचिन्तामणिरहस्यम्

श्रीकामाख्यानाथतर्कवागीशविरचिता

टिप्पणी

गङ्गेशोपाध्यायविरचितः

तत्त्वचिन्तामणिः

तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनय-निगमनानि निरूप्यन्ते। तत्र न समस्तरूपोपन्नलिङ्गप्रतिपादकवाक्यं न्यायः, अत्रैव वाक्येऽतिव्याप्तेः, किन्त्वनुमितिचरमकारणलिङ्गपरामर्श-

---

मथुरानाथतर्कवागीशविरचितम्

तत्त्वचिन्तामणिरहस्ये

अवयवप्रकरणम् परार्थानुमानप्रयोजकत्वेन स्मृतस्य न्यायादेरुपेक्षानर्हतया प्रसङ्गसङ्गत्या तन्निरूपयितुमाह, 'तच्चेति, 'परार्थं' परप्रतिपिपादयिषाप्रयोज्यं, परोऽत्र विप्रतिपन्नः न तु मीमांसकमात्रं, तेनाप्तेन परप्रतिपिपादयिषया उदीरितेऽपि न्यायत्वमित्यवधेयम्। 'न्यायसाध्यमिति न्यायजन्यज्ञानप्रयोज्य-मित्यर्थः। अवयवान्विभजते, 'प्रतिज्ञेति, यद्यपि अवयवसामान्यं निरूप्यैव तद्विभागोयुक्तस्तथापि पञ्चावयवोपेतस्यैवात्र लक्ष्यत्वं न तु मीमांसका-भिमतोदाहरणादित्र्यवयवस्य बौद्धाभिमतोदाहरणोपनयात्मकद्व्यवयवस्य वा इति सूचनाय प्रथमत एव तद्विभागः, अन्यथा वक्ष्यमाणन्यायलक्षणस्या-व्याप्त्यतिव्याप्त्यापत्तेः। 'तत्र' न्यायावयवनिरूपणे, सप्तम्यर्थो विषयत्वं, 'समस्तरूपेति पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाबाधितत्त्वासत्प्रतिपक्षितत्व-रूपपञ्चरूपविशिष्टलिङ्गप्रतिपादकमित्यर्थः, 'अत्रैवेति पञ्चरूपविशिष्ट-लिङ्गमिति वाक्य इत्यर्थः, तस्यापि उक्तपञ्चरूपविशिष्टलिङ्गप्रतिपादक-त्वादिति भावः।।[१]

---

(१) प्रसङ्गादाह, 'तच्चेति तत्त्रिविधमप्यनुमानं, 'परार्थं' परस्य वादिनोऽर्थः साध्यनिश्चयः तच्छङ्कानिवृत्तिर्वा यस्मात् तादृशं, 'न्यायसाध्यं' न्यायप्रयोज्य-

प्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः। प्रतिज्ञादिपञ्चवाक्यैरेक-

'अनुमितीति अनुमितिचरमकारणं यल्लिङ्गपरामर्शस्तस्य प्रयोजकं

मित्यर्थः, अतिप्राच्यैरुपनयमात्रस्य सौगतैरुदाहरणादिद्वयस्य मीमांसकैः प्रतिज्ञादित्रयस्य जरन्नैयायिकैर्व्विप्रतिपत्तिसमयबन्धजिज्ञासावाक्यकण्टको-द्धारदृष्टान्तक्रमेण वाक्यदशकस्य न्यायत्वोपगमात् तेषां मतमपाकर्त्तुं विशिष्यावयवान् दर्शयति, 'प्रतिज्ञाहेतूदाहरणोपनयनिगमनानीति, 'तत्र' न्यायावयवयोर्मध्ये, 'समस्तेति पक्षसत्त्वादिपञ्चरूपैर्विशिष्टस्य लिङ्गस्य प्रतिपादकं वाक्यम् इत्यर्थः, 'अत्रैव' समस्तरूपोपेतं लिङ्गमिति वाक्य एव, 'अतिव्याप्तेरित्युपलक्षणं केवलान्वयिस्थले विपक्षाप्रसिद्ध्या तत्साध्यक-न्यायेऽव्याप्तिरपि द्रष्टव्या। 'किन्त्वित्यादि, अत्रानुमितिपदं यादृशयादृशानुपू-र्व्यवच्छिन्नवाक्ये नैयायिकानां प्रकृतपक्ष-हेतु-साध्यकन्यायव्यवहारः तादृश-तादृशानुपूर्व्यवच्छिन्नाभावकूटसाध्यकानुमितिपरं, तथाच तादृशानुमितेः चरमकारणीभूतो यो लिङ्गपरामर्शः तादृश-तादृशानुपूर्व्यवच्छिन्नाभावकूट-व्याप्यघटपदत्ववान् इत्याकारकः परामर्शः, तस्य प्रयोजकं तज्जनकव्याप्ति-ज्ञानस्य जनकं यत् शाब्दज्ञानं शब्दप्रकारकं ज्ञानं तज्जनकं तस्य प्रकारतया जनकतावच्छेदकं वाक्यमित्यर्थः, घट इत्यानुपूर्व्यवच्छिन्नाभावस्य ज्ञानं प्रति प्रकारतया जनकतावच्छेदकं घट इत्यानुपूर्व्यवच्छिन्नवाक्यमपीति तत्रातिव्याप्तेर्व्वारणाय प्रयोजकान्तं शाब्दज्ञानस्य विशेषणं। न च यादृश-यादृशानुपूर्व्यवच्छिन्ने न्यायव्यवहारस्तादृशतादृशानुपूर्व्यवच्छिन्नाभावकूटवत्ता-बुद्धिजनकतावच्छेदकीभूतानुपूर्वीविशिष्टवाक्यत्वमेव न्यायत्वं कुतो लघुतरं न तन्निरुक्तम् इति वाच्यम्। स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वात् इति जागदीशी व्याख्या। केचित्तु अनुमितिकारणपरामर्शनिष्ठकार्य्यतानिरूपित-शाब्दत्वव्याप्यधर्म्मावच्छिन्नकारणतावच्छेदकीभूता या विषयता तदवच्छिन्न-कार्य्यतानिरूपिता या यत्किञ्चिज्ज्ञानवृत्तिजनकता तदवच्छेदकीभूत-विषयितानिरूपकवर्णसमुदायत्वं न्यायत्वम् अतो न कुत्राप्यतिव्याप्तिः। परामर्शं प्रति न्यायजन्यशाब्दबोधस्य तादृशशाब्दत्वेन हेतुत्वोपगमात् व्यभिचारश्चा-व्यवहितोत्तरत्वादिनिवेशेन वारणीयः, केवलोपनयजन्यपरामर्शस्थले च उपनयजन्यशाब्दबोधस्य न परामर्शं प्रति तादृशशाब्दबोधत्वेन हेतुता अपि तु

वाक्यतया स्वार्थविशिष्टज्ञानं जन्यते तेन च विशिष्टवैशिष्ट्या-

---

तज्जनकजनकं यच्छाब्दज्ञानं तज्जनकज्ञाननिष्ठकारणताया विषयिता-सम्बन्धेनावच्छेदकवाक्यमित्यर्थः घटमानयेति वाक्येऽतिव्याप्तिवारणाय प्रयोजकान्तम्, उपनयस्यापि अनुमितिकारणपरामर्शप्रयोजकशाब्दज्ञानजनकतया तत्रातिव्याप्तिवारणाय 'चरमेत्युक्तं, चरमत्वञ्चानुमितौ कर्त्तव्यायां स्वात्तरोत्पन्नज्ञानानपेक्षत्वं, तथाच उपनयप्रयोज्यानुमितिकारणपरामर्शस्य स्वोत्तरोत्पन्ननिगमनसाध्याबाधितत्वज्ञानसापेक्षत्वात् नोपनयेऽतिव्याप्तिरिति भावः। अनुमितिचरमकारणात्मकशाब्दज्ञाने कृतेऽसम्भवः न्यायजन्यज्ञानस्य पक्षतावच्छेदकविशिष्टे साध्यव्याप्यवदभेदस्यैव विषयीकरणात् नामार्थयोर्भेदान्वयस्याव्युत्पन्नतया पक्षतावच्छेदकविशिष्टे साध्यव्याप्य-वैशिष्ट्यानवगाहित्वात् तादृशज्ञानस्यानुमितिजनकत्वाभावात्। न च तादृशपरामर्शजनकत्वमेवोच्यतां किं तज्जनकजनकत्वप्रवेशेनेति वाच्यं। तथाप्यसम्भवापत्तेः न्यायजन्यज्ञानस्य वादिवाक्यज्ञानजन्यत्वेनाप्रामाण्य-

---

तद्विषयकज्ञानत्वेन। न च तादृशकार्य्यकारणभावे मानाभाव इति वाच्यम्। उपनायकज्ञानादिसत्त्वे वह्निव्याप्यो धूमः पर्व्वते इत्यादिज्ञानकाले वह्निव्याप्यधूमवान् पर्व्वत इत्यादिवारणाय तत्तदननुगतक्षणादीनां हेतुत्वं कल्प्यम् इत्थञ्च न्यायजन्यपरामर्शस्थलीयानन्तक्षणानां हेतुत्वकल्पनमपेक्ष्य लाघवात् न्यायजन्यबोधस्य तादृशबोधत्वेन हेतुता कल्प्यते तादृशकारणबाधादेवान्यत्र धूमविशेष्यकपरामर्शकाले न धूमप्रकारकपरामर्श-इति, चरमकारणपदन्तु तादृशकारणतालाभायैव उपात्तम्। न च तादृशयुक्त्या न्यायजन्यशाब्दबोधस्य तादृशशाब्दबोधत्वेन हेतुत्वकल्पने तादृशयुक्त्यैव केवलोपनयजन्यशाब्दस्यापि तादृशशाब्दत्वेन हेतुत्वं वाच्यम्। तत्र परामर्शस्यानैयत्येनानुगतकारणता-कल्पनासम्भवादित्याहुः, तच्चिन्त्यं।

नवीनास्तु न्यायजन्यशाब्दबोधप्रयोज्यानुमितिव्यक्तिमेव तद्व्यक्तित्वेनादाय तदनुमितिफलोपधायकीभूतपरामर्शव्यक्तिफलोपधायकीभूतशाब्दबोधनिष्ठकार्य्यतानिरूपित-यत्किञ्चिज्ज्ञाननिष्ठस्वरूपयोग्यतावच्छेदकी भूतविषयितानिरूपकवर्ण-समुदायत्वमतो न कश्चिद्दोषः, असम्भववारणाय यत्किञ्चिज्ज्ञाननिवेशनमिति प्राहुः, इति व्याख्यान्तरं।

वगाहिमानान्तरमुत्थाप्यते तेन च चरमपरामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजकता।

अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनक-शाब्दज्ञानजनकवाक्यत्वमवयवत्वम्, अत एव वह्निव्याप्य-धूमवानयमिति वाक्ये तदवयवे च न न्यायतदवयव-लक्षणातिव्याप्तिः तेन परामर्शस्य तदवयवेन परामर्शजनकस्य

ज्ञानास्कन्दितत्वेन तेन विशिष्टवैशिष्ट्यबोधात्मकतादृशज्ञानजननासम्भवात् अप्रामाण्यज्ञानानास्कन्दितविशेषणतावच्छेदकप्रकारकनिश्चयात्मकं न्यायजन्यशाब्दज्ञानजन्यज्ञानान्तरमपेक्षणीयमिति।

उपाध्यायास्तु तादृशपरामर्शप्रयोजकत्वं तादृशपरामर्शजनकत्वमेव तथाच न्यायजन्यज्ञानानन्तरोत्पन्नज्ञानादेवानुमितिरित्याहुः।

यत्र समयवशेनायन्नाभास इत्यादिरूपकण्ठकोद्धारसहित एव न्यायप्रयोगः कृतः तत्र कण्टकोद्धारवाक्येऽतिव्याप्तिवारणाय 'शाब्देति, तथाच तत्पदमहिम्ना तादृशपरामर्शं प्रति तज्जन्यज्ञानस्य शाब्दत्वेन प्रयोजकत्वमित्यर्थः पर्य्यवस्यति, कण्टकोद्धारवाक्यस्य च योग्यताज्ञानमात्रसम्पादकत्वात् योग्यताज्ञानस्य च शाब्दाशाब्दसाधारणेनैव हेतुत्वमिति नातिप्रसङ्गः, न्यायजन्यज्ञानस्य च प्रतिवादिपरामर्शं प्रति तादृशशाब्दत्वेन हेतुत्वम् अन्वयव्यतिरेकाभ्यां तथैव कार्य्यकारणभावावधारणादिति हृदयम्। वाक्यपदं तादृशशाब्दज्ञान-निष्ठकार्य्यतानिरूपितकारणताया विषयविधयावच्छेदकत्वपर्य्याप्त्यधि-करणत्वलाभाय अन्यथा न्यायैकदेशेऽतिव्याप्तेः।[२]

---

२. लक्ष्ये लक्षणं योजयति, 'प्रतिज्ञादीति प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया एकानुपूर्वीमत्त्वेन रूपेण यः स्वस्यार्थो निवृत्तिरभाव इति यावत्, तज्ज्ञानं जन्यते, 'तेन च' क्रमिकप्रतिज्ञादिपञ्चगतैकानुपूर्व्यवच्छिन्नाभावकूटज्ञानेन च, विशिष्टस्य तादृश-तादृशानुपूर्वीमत्त्वावच्छिन्नाभावीयत्वविशिष्टव्याप्यत्वस्य घटपदत्वादिहेतौ वैशिष्ट्यावगाहि यन्मानं घटपदत्वं तादृश-तादृशानुपूर्व्य-वच्छिन्नाभावकूटव्याप्यमित्याकारकं ज्ञानं तदुत्थाप्यते जन्यते, 'तेन च' व्याप्यत्वबोधेन च, 'चरमपरामर्शः' तादृश-तादृशानुपूर्व्वीमत्त्वावच्छिन्ना-

जननात्।

यत्तु संक्षेपतः परामर्शप्रयोजकवाक्यत्वेन विशेषाभावात् सोऽपि न्याय एवेति, तन्न, कथायामाकाङ्क्षाक्रमेणाभिधानमिति

लक्ष्ये लक्षणं सङ्गमयति, 'प्रतिज्ञादीति, 'एकवाक्यतया' मिलित्वा, स्वार्थविशिष्टज्ञानं' परस्परार्थान्वितस्वार्थविषयकज्ञानं, 'तेन' विशिष्ट-भावकूटव्याप्यघटपदत्ववान् इत्याकारको जन्यत इत्यर्थः।

साम्प्रदायिकास्तु लक्षणस्थस्यानुमितिपदस्य प्रकृतपक्षकप्रकृत-साध्यकप्रकृतहेतुकानुमितिपरत्वं वर्णयन्तो ग्रन्थमन्यथा व्याचक्षते, यथा प्रतिज्ञादिपञ्च- वाक्यैरेकवाक्यतया स्वस्वघटकपदानामेकवाक्यत्ववशेन स्वस्वार्थविशिष्टज्ञानं समूहालम्बनरूपमेव जन्यते न तु मिथो विशिष्टवैशिष्ट्यावगाहिरूपम्, उदाहरणस्यान्यत्रानन्वयित्वेन पञ्चभिः परस्परमेकवाक्यतापन्नैरन्वयबोधस्य जननासम्भवात्, तेन च प्रतिज्ञादिपञ्चकजन्यबोधेन च विशिष्टस्य प्रकृतसाध्यीयत्वविशिष्टस्य व्याप्यत्वस्य हेतो वैशिष्ट्यावगाहियन्मानं मानसात्मकं ज्ञानं तदुत्थाप्यते जन्यते। न च न्यायजन्यबोधस्य विशेषणज्ञानविधया परामर्शजनकत्व-सम्भवात् मानान्तरोत्थापनमफलमिति वाच्यम्। हेत्वंशे व्याप्तेर्व्याप्त्यंशे च साध्यस्य संसर्गविधया वैशिष्ट्यावगाहिन एव बोधस्य चरमपरामर्शहेतुतया न्यायजन्यबोधस्य तथात्वासम्भवात् तस्य हेत्वाद्यंशे तादात्म्येन व्याप्याद्यवगाहित्वात्, एतेन न्यायजन्यशाब्दबोधेन विशिष्टवैशिष्ट्या-वगाहिव्याप्तिविशिष्टस्य हेतोः पक्षवैशिष्ट्यग्राहकं यन्मानं मनः तदुत्थाप्यते सहकारिसम्पन्नीक्रियते इत्युपाध्यायव्याख्या- नमनादेयं। यत्तु न्यायजन्यबोधस्य वादिवाक्यजन्यत्वेनाप्रामाण्यज्ञानास्क- न्दितत्वात् ततो न चरमपरार्शोत्पादः सम्भवत्यतः साध्यीयत्वविशिष्ट- व्याप्यत्वस्य साधने वैशिष्ट्यावगाहि यन्मानान्तरं मानसज्ञानं तस्यानुसरणमिति मिश्रैरुक्तं, तदप्युक्तं, न्यायजन्यशाब्द-ज्ञानस्याप्रामाण्यज्ञानास्कन्दितत्वे ततः परामर्शस्येव साधनधर्म्मिकव्याप्यत्वो-पनीतभानस्याप्युत्पत्तेरसम्भवात् सर्वस्यां न्यायजन्यबुद्धौ वादिवाक्यजन्यत्वे-नाप्रामाण्यग्रहानावश्यकत्वाच्चेत्याहुः, तन्मन्दं, वह्निव्याप्यवानय-मित्यादिवाक्यजशाब्दस्यापि वह्न्याद्यनुमितिचरमकारणीभूतपरामर्शं प्रति कथञ्चित्

प्रथमं विशिष्टवैशिष्ट्य आकाङ्क्षा नास्तीति तदभिधाने निग्रहादिति वक्ष्यते, अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्तिः आकाङ्क्षाविरहस्तुल्य एव।

अन्ये तु पञ्चावयववाक्याद्विजातीयमेव शाब्दज्ञानमुत्पद्यत इति तद्विजनकवाक्यत्वं न्यायत्वम्, एवं प्रतिज्ञाद्यवयवादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्धीजनकशाब्दत्वमेव

वैशिष्ट्यज्ञानेन, 'मानान्तर' मित्यन्तरं, 'उत्थाप्यते' जन्यते, उपाध्यायमते 'मानं' मनः, 'उत्थाप्यते' स्वात्मकसहकारिसम्पन्नीक्रियते इत्यर्थः, मनसोविशिष्टवैशिष्ट्यावगाहिता तु व्यापारानुबन्धिनी। न च प्रतिज्ञादिपञ्चवाक्यैर्मिलित्वा विशिष्टवैशिष्ट्यावगाहिज्ञानमसम्भवि उदाहरणे यद्यदित्यनेन पर्वतादीनाम् उपस्थापनादिति वाच्यम्। वीप्सासमभिव्याहारेण तत्र व्यापकत्वबोधनात् तथाच धूमवदभिन्न-धूमव्यापकवह्निसम्बन्ध्यभिन्न-धूमज्ञानज्ञाप्यवह्निसम्बन्ध्यभिन्नः पर्वतो वह्निव्याप्याभिन्नधूमसम्बन्ध्यभिन्न-वह्निव्याप्यधूमज्ञानज्ञाप्यवह्निसम्बन्ध्यभिन्नपर्वताभिन्न इति न्यायजन्यमहावाक्यार्थबोधः। न च धूमज्ञानज्ञाप्यवह्निसम्बन्ध्यभिन्नपर्वते कथं वह्निव्याप्यधूमज्ञानज्ञाप्यवह्निसम्बन्धिनस्तादात्म्येन भानम् उद्देश्यतावच्छेकस्य विधेयतावच्छेककोटिप्रविष्टत्वादिति वाच्यम्। उद्देश्यतावच्छेदके विधयतावच्छेदकतायाः पर्य्याप्तेरेव निराकाङ्क्षत्वात्, अत एव दण्डी रक्तदण्डीति प्रयोगोऽपि सङ्गच्छते। यदि च उद्देश्यतावच्छेदकस्य विधेयतावच्छेदककोटिप्रवेश एव निराकाङ्क्षत्वम् अत एव पक्ता पचतीत्यादौ लङर्थवर्त्तमानत्वादेरधिकस्य प्रवेशेऽपि नान्वयबोध इत्यभ्युपेयते तदा 'एकवाक्यतया' एकैकवाक्यतया प्रत्येकेनेति यावत्, 'स्वार्थविशिष्टज्ञानं' स्वार्थमात्रविषयकम् अवान्तरवाक्यार्थज्ञानं, 'जन्यते', 'तेन च' अवान्तरवाक्यार्थज्ञानेन च, 'विशिष्टवैशिष्ट्यावगाहि' प्रतिज्ञार्थे

प्रयोजकत्वेन तज्जनकतादृशवाक्येऽतिव्याप्तेर्दुर्व्वारत्वापत्तेः इत्यास्तां विस्तरः इति जागदीशी व्याख्या।

तत्तल्लक्षणमिति, तन्न, ज्ञानविशेषजनकत्वं तत्तज्ज्ञानजनकत्वं वा न्याये प्रतिज्ञादौ चानतिप्रसक्तमनुगतरूपमन्तरेण दुर्निरूपमिति तत्स्वीकारे तस्यैव लक्षणत्वात् अन्यथा जातिसङ्करप्रसङ्गः।

तत्र प्रतिज्ञा न साध्यनिर्देशः साध्यपदेऽतिव्याप्तेः(६)।

हेत्वर्थवैशिष्ट्यावगाहि उपनयार्थे निगमनार्थवैशिष्ट्यावगाहि, 'मानान्तरं' महावाक्यार्थज्ञानम्, 'उत्थाप्यते' जन्यते इत्यर्थः। यद्वा 'एकवाक्यतया' एकान्वयबुद्धिजननयोग्यतया, 'स्वार्थविशिष्टज्ञानं, स्वार्थविषयकं समूहालम्बनरूपं महावाक्यार्थज्ञानं जन्यते इत्यर्थः, इति नानुपपत्तिगन्धोऽपीति। ननु न्यायजन्यज्ञानस्य तादृशपरामर्शं प्रति प्रयोजकत्वं यदि व्याप्तिपक्षधर्मतोपस्थापकतया[३] उदाहरणोपनययोरेवानुमितिचरमकारणलिङ्गपरामर्शप्रयोजक-शाब्दज्ञानजनकत्वं पर्यवस्यति, तदा अवयवान्तरेऽव्याप्तिः, यदि च परामर्शविषयीभूतयत्किञ्चित्पदार्थमात्रविषयकतामात्रेण तदा वह्निव्याप्यधूमवान् पर्वत इत्युदासीनवाक्यादावतिव्याप्तिः। न च न्यायजन्यज्ञानस्य तादृशशाब्दत्वेन तादृशपरामर्शं प्रति स्वातन्त्र्येण हेतुत्वमिति वाच्यम्। मानाभावादिति चेत्। न। शाब्दज्ञानान्तेन बहुव्रीहिणा विरुद्धानुपूर्वीकभिन्नस्य तत्-पक्षक-तत्साध्यक-तद्धेतुकप्रतिज्ञादिपञ्चकसमुदायत्वमुक्तं एवम्भूतं जनकीभूतं वाक्यं तत् इत्यत्र तात्पर्य्यात्। न चैवमपि हेत्वाभासतालिङ्गकासॉधकता-साधकन्यायेऽव्याप्तिः तत्र व्याप्तेरुभयवादिसिद्धतया उदाहरणाभावेन तादृशपञ्चकत्वाभावादिति वाच्यम्। स्वकर्त्तव्यतानिर्वाहार्थं तत्राप्युदाहरण-प्रयोगादित्यलमधिकेनेति।[४]

---

३. व्याप्ति-पक्षधर्म्मताविषयकतयेत्यर्थः।

४. 'अनुमितीति अत्राप्यनुमितिपदं यादृश-यादृशानुपूर्व्यवच्छिन्ने प्रकृतपक्ष-प्रकृतसाध्यादिन्यायव्यवहारः प्रामाणिकः तादृश-तादृशानुपूर्व्य-वच्छिन्नाभावकूटसाध्यकानुमितिपरं, तथाच तादृशानुमितेश्चरमकारणीभूतो यः तादृशानुपूर्व्यवच्छिन्नाभावकूटव्याप्यवानयमित्याकारकः परामर्शः तस्य प्रयोजकं तज्जनकव्याप्तिज्ञानस्य जनकं यच्छाब्दं शब्दप्रकारकं ज्ञानं

किन्तूद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यम्।(७)

'अनुमितिचरमकारणेति, न्यायेऽतिव्याप्तिवारणाय तादृशशाब्दज्ञान-जनकेत्युक्तं वह्निव्याप्यधूमवानयमिति वाक्यैकदेशेऽतिव्याप्तिवारणाय चरमत्वं

तादृश-तादृशानुपूर्व्वीमत्त्वावच्छिन्नाभाव इत्याकारकं ज्ञानं तज्जनकं विषयविधया जनकतावच्छेदककोटिप्रविष्टम् अथ च शाब्दबोधस्य जनकं यद्वाक्यं तत्त्वमित्यर्थः, न्यायाप्रविष्टस्य प्रतिज्ञादिसमानार्थकवाक्यस्य वारणाय प्रविष्टान्तं, न्यायनिविष्टस्य प्रतिज्ञाद्यन्तर्गतपर्व्वत इत्यादिनिरर्थकभागस्य वारणाय शाब्दबोधजनकेति। न च न्यायनिविष्टस्य वह्निमानित्यादिभागस्य शाब्दबोधजनकत्वात्तत्रातिव्याप्तिरिति वाच्यम्। शाब्दबोधजनकेत्यनेन पक्षे साध्यस्य, हेतुतायां साधनस्य, साधने साध्यव्याप्यत्वस्य, पक्षे साध्यव्याप्यहेतुमत्त्वस्य, हेतुज्ञाप्यसाध्यत्त्वस्य च येऽन्वयबोधास्तेषामन्यतमबोधं प्रत्येव जनकत्वस्य विवक्षितत्वात्। न चैवमपि रमेश्वरः पूज्यो देवत्वादित्यादिन्यायान्तर्गतस्य मेश्वरः पूज्य इति भागस्यापि उक्तरूपवत्त्वात् तत्रातिव्याप्तिरिति वाच्यम्। स्वघटितवाक्याप्रतिपाद्यस्वार्थकवाक्यत्वरूपमहा-वाक्यत्वपरेण वाक्यपदेनैव तद्वारणादिति भावः। ननु प्रकृतपक्ष-हेतु-साध्यक-परामर्शजनकवाक्यत्वं न्यायत्वं, तादृशबोधानुकूलबोधजनकत्वञ्चावयवत्वम् इति प्राचीनैरुक्तं कुतस्त्यक्तमत आह, 'अत एवेति उक्तनिरुक्तेस्त्यागादेवेत्यर्थः, 'तदवयवे' तादृशवाक्यैकदेशे वह्निव्याप्येत्यादिभाग इति यावत्। ननु नामार्थधात्वर्थयोर्नामार्थयोश्च भेदेनान्वयबोधस्याव्युत्पन्नतया उक्तवाक्यस्य पक्षव्याप्त्यादौ हेतुसाध्यादिप्रकारकबोधाजनकत्वेन परामर्शजनकत्वमेव नास्ति कुतस्तत्रातिव्याप्तिरित्यत आह, 'तेनेति, 'जननात्' जननसम्भवात्, प्राच्यैर्मतुबादिसमभिव्याहारवशान्नामार्थयोर्भेदेनान्वयस्याभ्युपगमादिति भावः।

न्यायावयवपदयोः पर्य्यायत्ववादिनां मतमुपन्यस्यति, 'यत्त्विति 'सङ्क्षेपतः' लाघवात्, 'विशेषाभावादित्यस्य प्रतिज्ञादिपञ्चकसमुदायापेक्षयेत्यादिः, 'सोऽपीति वह्निव्याप्यधूमवामयम् इत्यादिशाब्दबोधप्रयोजकोऽपीत्यर्थः, न्यायस्य प्रथमतो वादिवाक्यत्वनियमात् उक्तवाक्यस्य च न्यायत्वेऽनाकाङ्क्षितस्य तस्य

अन्यूनानतिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणं तेनोदाहरणादिव्युदासः, निगमनञ्च न परामर्शहेतुः अबाधितासत्प्रतिपक्षितत्वज्ञानजनकत्वात्।

हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा।

परामर्शविशेषणं, अर्थस्तु पूर्ववत्, पूर्वोक्तकण्टकोद्धारावयवेऽतिव्याप्तिवारणाय शाब्दपदं, उदासीने च यथा नातिव्याप्तिस्तथोक्तमधस्तात्। न च यत्र द्वाभ्यामवयवाभ्यां न्यायजन्यज्ञानजनकं एकं ज्ञानं जनितं तत्र तादृशावयवद्वयेऽतिव्याप्तिः एवं पूर्वोक्तरीत्या वह्निव्याप्यधूमवानयमिति

प्रागभिधानेऽर्थान्तरात्मकस्य निग्रहस्थानस्य प्रसङ्गादित्याशयेन निरस्यति, 'कथायामिति जल्प-वादकथायामित्यर्थः, लाघवाद्यदिपरामर्शप्रयोजक-वाक्यत्वस्यैव न्यायपदप्रतिपाद्यतावच्छेदकता तदाऽतिलाघवात् परामर्शप्रयोजक-त्वमात्रस्य तथात्वं स्यात् तथाच चक्षुरादिरपि न्यायः स्यादित्याह, 'अन्यथेति न्यायत्वापत्तिर्न्यायपदवाच्यत्वापत्तिः। ननु चक्षुरादेर्न्यायत्वे प्रथमतस्तदभिधानेऽ-र्थान्तरं स्यादित्यत आह, 'आकाङ्क्षेति, 'तुल्य इत्यस्य उपनयनवाक्येऽपीत्यादिः।

'तद्धीति तादृशशाब्दधीत्यर्थः, विजातीयं विलक्षणैकजातिविशिष्टं, 'तल्लक्षणं' अवयवलक्षणं, क्वचित्तु मूले 'तत्तद्धीजनकत्वमेव तल्लक्षणमिति पाठः, स च विजातीयज्ञानजनकत्वं प्रतिज्ञात्वं, तद्विलक्षणज्ञानजनकत्वं हेतुत्वमित्येवं क्रमेण व्याख्येयत्वे प्रतिज्ञादिग्रन्थे तादृशतल्लक्षणस्याग्रे शङ्कितत्वेन पुनरुक्तिभिया प्रामादिक इति ध्येयं। 'दुर्निरूपमिति कार्य्यमात्रवृत्तिजाते-रनुगताननतिप्रसक्तधर्म्मावच्छिन्नकारणप्रयोज्यत्वनियमादिति भावः। 'तस्यैवेत्ये-वकारो भिन्नक्रमे तेन 'तत्स्वीकारे एव' प्रतिज्ञादावनुगतधर्म्मस्वीकार एव, 'तस्य'-विजातीयधीजनकवाक्यत्वस्य लक्षणत्वसम्भवादित्यर्थः, तथाच वैजात्यासत्त्वात्तद्गर्भलक्षणस्यासम्भवादिति भावः। ननु विनाप्यनुगताननतिप्रसक्त-धर्म्मावच्छिन्नकारणं कार्य्यगतवैजात्यसत्त्वे को दोष इत्यत आह, 'अन्यथेति अनुगतकारणं विनापि कार्य्यगतवैजात्योपगमे घट-पटादित्रिचतुरेष्वप्येक-वैजात्यसिद्ध्या तेन समं घटत्व-पटत्वादेः सङ्करप्रसङ्ग इत्यर्थः, तथाविधवैजात्ये प्रमाणविरहस्तु प्रकृतेऽपि समान इति भावः इति जागदीशी व्याख्या।

लिङ्गविषयकलिङ्गिविषयकज्ञानजनकन्यायावयववाक्यत्वं वा इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात्।

प्रतिज्ञात्वं जातिः अनुगतानतिप्रसक्ततान्त्रिकव्यवहारादिति केचित्, तन्न, देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गात्,

---

वाक्यैकदेशेऽतिव्याप्तिरिति वाच्यम्। स्वाविषयकप्रतीत्यविषयन्यायकत्वे सति प्रतिज्ञाद्यन्यतमत्वम् अवयत्वम् इत्यर्थे तात्पर्य्यात्, बहुव्रीहिसमासे जनकान्तात् तथा लाभात्, उदासीनवाक्येऽतिव्याप्तिवारणाय सत्यन्तं, अवयवैक-देशेऽतिव्याप्तिवारयाय विशेष्यदलं, तत्र चान्यतमत्वघटकाः प्रतिज्ञादिभेदाः तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताका ग्राह्याः, न तु तत्तदानुपूर्व्यवच्छिन्न-प्रतियोगिताकाः, धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यत्र हेत्ववयवसमानानुपूर्वीकप्रतिज्ञैकदेशे धूमादिति भागेऽतिव्याप्तेः। न च शब्दभेदेन न्यायानन्त्यं स्यादिति वाच्यम्। इष्टत्वात्। न्यायलक्षणे तदवयवलक्षणे च चरमपदव्यावृत्तिमाह, 'अत एवेति परामर्शे चरमत्वोपादानादेवेत्यर्थः, 'तदवयवे चेति वह्निव्याप्यधूमवानिति न्यायावयवैकदेशे चेत्यर्थः, 'न्यायतदवयवेति यथाक्रममन्वयः। ननु चरमत्वोपादानादेव कुतो नातिव्याप्तिः तत्र हेतुमाह, 'तेनेति वह्निव्याप्यधूमवानयमिति वाक्येनेत्यर्थः, 'परामर्शस्येति सावधारणं, 'परामर्शपदं परामर्शप्रयोजकशाब्दज्ञानपरम्, अस्य 'जननादित्यनेनान्वयः, तथाच परामर्शप्रयोजकशाब्दज्ञानस्यैव जननादित्यर्थः, अनुमितिचरमकारणपरामर्श-प्रयोजकशाब्दज्ञानजननात् इति पर्य्यवसितार्थः, तथाच तादृशवाक्यजन्यशाब्द-ज्ञानप्रयोज्यज्ञानस्य स्वोत्तरोत्पन्नाबाधिततत्वज्ञानसापेक्षतया चरमत्वाभावान्नाति-व्याप्तिरिति भावः। 'तदवयवेनेति वह्निव्याप्यधूमवानय- मित्यस्य एकदेशेनेत्यर्थः, 'परामर्शजनकस्येति इदमपि सावधारणं, अत्रापि पूर्वोक्तरीत्या अर्थोऽवसेयः।

'सङ्क्षेपतः' लाघवतः नन्वेवं वाक्यत्वमेव तदुच्यतामिति लाघवादित्यत आह, 'अविशेषादिति' अत्र चकारः पूरणीयः, अत्र हेतुमाह, 'परामर्शप्रयोजकेति परामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वेनेत्यर्थः, 'सोऽपीति तावन्मात्रमपि यदि

---

५. 'विशेषाभावात्' इत्यत्र 'अविशेषात्' इति कस्यचिन्मूलपुस्तकस्य पाठोऽनेन रहस्यकृत्पाठधारणेनानुमीयते।

प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं वाक्यं प्रतिज्ञेत्यपि न, तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्यानुसरणीयत्वात्। एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्ति-जातियोगिज्ञानजनकवाक्यं प्रतिज्ञेति निरस्तम्।

कथायां प्रयुज्यते तदा तस्यापि न्यायत्वमिष्यत एवेत्यर्थः, 'प्रथममिति हेत्वाद्यभिधानात् प्रागित्यर्थः, 'विशिष्टवैशिष्ट्य इति सप्तम्यर्थो विषयत्वं, तथाच व्याप्तिविशिष्टवैशिष्ट्यावगाहिजिज्ञासा नास्तीत्यर्थः, 'तदभिधाने' अनाकाङ्क्षिताभिधाने, तथा चात्रेष्टापत्तिरनुचितेति भावः। ननु हेत्वाद्यभिधानात् प्रागपि कदाचित् वह्निव्याप्तिविशिष्टवैशिष्ट्यज्ञानगोचरेष्टसाधनतास्मरणादिना विशिष्टवैशिष्ट्यगोचराकाङ्क्षा सम्भवत्येवेति तत्र न्यायत्वस्वीकारे नोक्तदोषः इत्यत आह, 'अन्यथेति लाघवेन सम्प्रदायसिद्धन्यायव्यवहारविषयस्यापि न्यायत्वस्वीकारे इत्यर्थः, 'चक्षुरादेरपीति अतिलाघवात् वाक्यत्वमपि परित्यज्य चक्षुरादिसाधारणस्यैव वक्तुमुचितत्वादिति भावः। 'आकाङ्क्षाविरह इति आकाङ्क्षापदं सम्प्रदायसिद्धन्यायव्यवहारपरं, तथाच सम्प्रदायसिद्धन्याय-त्वव्यवहारविरहश्चक्षुरादाविव वह्निव्याप्यधूमवानयमित्येतावन्मात्रवाक्येऽपि तिष्ठतीत्यर्थः, तथाचात्र न्यायत्वास्वीकारे तत्रापि तथात्वौचित्यादिति भावः। 'तद्धीजनकेति विजातीयशाब्दज्ञाननिष्ठकार्य्यतानिरूपितकारणतायाः विषयितासम्बन्धेनावच्छेदकं यद्वाक्यं तत्त्वमित्यर्थः वह्निव्याप्यधूमवानयमित्येता-वन्मात्रजन्यज्ञाने च न वैजात्यमिति नातिप्रसङ्गः, वाक्यपदम् अवच्छेदकता-पर्य्याप्तिलाभाय, इतरथा न्यायैकदेशेऽतिव्याप्तिः, एवमिति तुल्यप्राप्तमित्यर्थः। तल्लक्षणमिति प्रतिज्ञादिलक्षणमित्यर्थः 'अनतिप्रसक्तमिति उदासीनवाक्यव्या-

---

६. 'तत्रेति, 'तत्र' निरूपणीयप्रतिज्ञादिषु मध्ये, 'साध्येति, 'साध्यस्य' विधेयधर्म्मविशिष्टधर्म्मिणः, 'निर्द्देशः' तद्बोधकशब्द इत्यर्थः, तथाच साध्यविशिष्टपक्षबोधकन्यायावयववाक्यत्वमर्थः पर्य्यवस्यति, 'साध्येति, निरुक्तसाध्यस्य 'पदे' बोधकशब्दे इति यावत्, 'अतिव्याप्तेरिति उपनयनिगमनाभ्यां एकवाक्यतया जायमाने बोधे निगमनस्य हेतुत्वेनातिव्याप्ते-

ननु प्रतिज्ञा न साधनाङ्गं विप्रतिपत्तेः पक्षपरिग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेत्, न, विप्रतिपत्त्यग्रे हि समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनो वाकाङ्क्षायां शब्दानित्यत्वं साध्यं, न च

वृत्तमित्यर्थः एतेन तादृशवाक्यत्वव्यवच्छेदः, 'अनुगतमिति सकलन्याय-साधारणमित्यर्थः, एतेन तत्तद्व्यक्तित्वव्यवच्छेदः, 'दुर्निरूपमिति दुःसम्भवमित्यर्थः, जनकतायाः जनकतावच्छेदकघटितत्वादिति भावः। ननु तादृशं रूपं स्वीकृत्यैव लक्षगं करणीयमित्यत आह, 'तत्स्वीकार इति न्यायादावनुगतानतिप्रसक्तधर्मस्वीकार इत्यर्थः, 'लक्षणत्वात्' लक्षण्त्वापातात्। ननु तस्यैव इत्युक्तं लक्षणान्तरसत्त्वेन लक्षणान्तरकरणे दोषाभावादित्यत आह, 'अन्यथेति न्यायादिजन्यतावच्छेदकवैजात्यानां स्वीकारे इत्यर्थः, 'जातिसङ्करप्रसङ्ग इति प्रतिज्ञाजन्यतावच्छेदकजात्यभाववति हेतुमात्रजन्यज्ञाने हेतुजन्यतावच्छेदिका जातिः हेतुजन्यतावच्छेकजात्यभाववति प्रतिज्ञामात्रजन्यज्ञाने प्रतिज्ञाजन्यतावच्छेदिका जातिः उभयज्ञानजन्ये च उभयोः समावेश इति सङ्कर इत्यर्थः, एवमुदाहरणादिजन्यतावच्छेदकजातिमादायापि सङ्करो बोध्यः। न चोभयजन्यतावच्छेदकं भिन्नमेव वैजात्यं स्वीकार्य्यं प्रत्येकजन्यता-वच्छेदकवैजात्यावच्छिन्नं प्रति उभयजन्यतावच्छेदकवैजात्यावच्छिन्नसामग्रीणां प्रतिबन्धकतया नोभयादिजन्यज्ञाने च प्रत्येकजन्यतावच्छेदकवैजात्यमिति न सङ्कर इति वाच्यम्। एतादृशप्रतिबध्य-प्रतिबन्धकभावे विभिन्नवैजात्यकल्पने मानाभावात् क्लृप्तसामग्रीत एव तादृशशाब्दोदयात्।

रित्यर्थः एतेन निगमने अयम्पदानुषङ्गपक्षे नातिव्याप्तिरिति परास्तम्। तादृशबोधमात्रपदप्रक्षेपे तु नोक्तदोष इति ध्येयमिति जागदीशी व्याख्या।

७. 'किन्त्वित्यादि, प्रतिज्ञासमानार्थकस्य न्यायानन्तर्गतवाक्यस्य वारणाय सत्यन्तं, तत्राप्युद्देश्यानुमितिपदं यादृश-यादृशानुपूर्व्यवच्छिन्ने प्रकृत-पक्षक-प्रकृतसाध्यकन्यायत्वं तादृशतादृशानुपूर्व्यवच्छिन्नाभावसाध्यकानुमितिपरं, तथाच तादृशानुमितेर्हेतुभूतो यो लिङ्गधर्म्मिकः परामर्शः घटत्वं तादृश-तादृशानुपूर्व्य-वच्छिन्नाभावकूटव्याप्यमित्याकारकव्याप्तिनिश्चयः तस्य प्रयोजकं विषयविधया जनकतावच्छेदकानुपूर्वीघटकम् अथ च यादृश-यादृश-वाक्ये प्रकृतपक्ष-साध्य-

साध्यनिर्देशं विना हेतुप्रवाक्यं निष्प्रतियोगिकमन्वयं बोधयितुमीष्टे। न च वादिवाक्येऽनुपस्थितमपि योग्यतया अन्वेति, अतिप्रसङ्गात्। न च विप्रतिपत्तितः साध्योपस्थितिः, तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरितत्वात्

'तत्र' निरूपणे, सप्तम्यर्थो विषयत्वं, 'साध्यनिर्देश इति साध्यं निर्दिश्यतेऽनेनेति व्युत्पत्त्या साध्यप्रतिपादकशब्द इत्यर्थः, 'साध्यपद इति साध्यपदस्यापि साध्यप्रतिपादकत्वादिति भावः। 'उद्देश्येति, उभयत्र उद्देश्यत्वं प्रकृतत्वं, यथाश्रुते यत्र न्याये अनुमितिर्नेच्छाविषयस्तत्रत्यप्रतिज्ञायामव्याप्तेः, तथाच तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकन्यायावयवत्वे सति तद्धर्मावच्छिन्नपक्षक-तद्धर्मावच्छिन्नसाध्यकान्यूनानतिरिक्तविषयकशाब्दज्ञानजनकवाक्यत्वं तद्धर्मावच्छिन्नपक्षक-तद्धर्मावच्छिन्नसाध्यकप्रतिज्ञात्वमित्यर्थः, पर्वतो वह्निमानित्युदासीनवाक्येऽतिव्याप्तिवारणाय सत्यन्तं, तद्दले तद्धर्मावच्छिन्न-पक्षकेत्यनुक्तौ यत्राभिधेयसामान्यं पक्षीकृत्य वह्निज्ञानजन्यज्ञानं निरूपितत्व-सम्बन्धेन साध्यते वह्निश्च हेतुस्तत्र वह्नेरिति हेतौ विषयत्वत्वा-वच्छिन्नपक्षक-वह्निज्ञानजन्यज्ञानत्वावच्छिन्नसाध्यकप्रतिज्ञालक्षणातिव्याप्तिः तादृशहेत्ववयवस्य वह्निज्ञानजन्यज्ञानत्वावच्छिन्नसाध्यकन्यायावयवत्वात् विषयत्वावच्छिन्नपक्षकवह्निज्ञानजन्यज्ञानत्वावच्छिन्नसाध्यकानुमित्यन्यूनान-तिरिक्तविषयकशाब्दज्ञानजनकत्वाच्च, तद्दाने च विषयत्वावच्छिन्नपक्ष-कन्यायावयवत्वाभावात् नातिव्याप्तिः, तत्पक्षकेत्युक्तावपि तद्दोषतादवस्थ्यमत आह, तद्धर्मावच्छिन्नपक्षकेति। न चैवमपि यत्र विषयत्वत्वेन विषयत्वं पक्षीकृत्य निरूपितत्वसम्बन्धेन वह्निज्ञानजन्यज्ञानं साध्यं वह्निश्च हेतुस्तत्र वह्नेरिति हेत्ववयवेऽतिव्याप्तिदुर्व्वारैवेति वाच्यम्। सम्प्रदायविरुद्धतया तादृशन्यायप्रयोगाभावात् तावन्मात्रे कृते पर्वतत्वावच्छिन्नपक्षकद्रव्य-

---

हेतुकावयवव्यवहारस्तादृश-तादृशवाक्यकूटस्यार्थोनिवृत्तिरभाव इति यावत् तद्गोचरज्ञानस्य जनकं प्रतियोगिविधया जनकतावच्छेदकं तत्त्वे सतीत्यर्थः, हेत्वाद्यवयवस्य वारणार्थं विशेष्यदलं, 'उद्देश्या' प्रकृतपक्ष-साध्यिका, यानुमितिः तदन्यूनानतिरिक्तविषयकशाब्दधीजनकबाध्यत्वमिति तदर्थः, प्रकृतानुमित्यन-

परविप्रतिपत्तिं समयबन्धञ्च विना स्थापनाया अभावात् विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण पर्य्यवसितत्वेन निराकाङ्क्षत्वाच्च, आवृत्तौ तु सैव प्रतिज्ञा। न चावयवान्तराद्धेत्वन्वययोग्या

त्वाच्छिन्नसाध्यकोपनये पर्वतत्वाच्छिन्नपक्षक-द्रव्यव्याप्यधूमत्वावच्छिन्न साध्यक प्रतिज्ञालक्षणातिव्याप्तिः तादृशोपनयस्य पर्वतत्वावच्छिन्न पक्षक न्यायावयवत्वात् पर्वतत्वावच्छिन्न पक्षक द्रव्यव्याप्य धूमत्वावच्छिन्न-साध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकवाक्यत्वाच्च, तद्दाने च तस्य द्रव्यव्याप्यधूमत्वावच्छिन्नसाध्यकन्यायावयवत्वाभावात् नातिप्रसङ्गः, तत्साध्यत्वमात्रोक्तौ पर्वतो द्रव्यवान् धूमादित्यादिन्यायान्तर्गते द्रव्यव्याप्य-धूमवानयमित्युपनये द्रव्यव्याप्यधूमसाध्यकप्रतिज्ञालक्षणातिव्याप्तिः तस्यापि द्रव्यत्वेन रूपेण द्रव्यव्याप्यधूमसाध्यकन्यायावयवत्वात् पर्वतत्वावच्छिन्नपक्षक-द्रव्यव्याप्यधूमत्वावच्छिन्नसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्द-ज्ञानजनकवाक्यत्वाच्च, तथोक्तौ च तस्य द्रव्यव्याप्यधूमत्वाच्छिन्न-साध्यकन्यायावयवत्वाभावान्नातिव्याप्तिः, हेत्वाद्यवयवेऽतिव्याप्तिवारणाय विशेष्यदलं, तत्र तद्धर्मावच्छिन्नपक्षकेत्यनुक्तो यत्राभिधेयसामान्यं पक्षीकृत्य निरूपितत्वसम्बन्धेन वह्निज्ञानजन्यज्ञानं साध्यं वह्निश्च हेतुः तत्र हेत्ववयवेऽति-व्याप्तिः तस्याभिधेयत्वावच्छिन्नपक्षकवह्निज्ञानजन्यज्ञानत्वावच्छिन्नसाध्य-कन्यायावयवत्वात् विषयत्वत्वावच्छिन्नपक्षकवह्निज्ञानजन्यज्ञानत्वा-वच्छिन्नसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वाच्च ज्ञानजन्यज्ञानविषयत्वस्य पञ्चम्यर्थत्वात्, तद्दाने च अभिधेयत्वावच्छिन्नपक्षक-तत्साध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वाभावान्नातिव्याप्तिः, तत्पक्षकेत्युक्तावपि तद्दोषतावदवस्थ्यम् अत आह तद्धर्मावच्छिन्नेति, तद्धर्मावच्छिन्नसाध्यकेत्यनुक्तौ वह्निव्याप्यधूमवानयमित्युपनये पर्वतत्वा-

---

तिरिक्तविषयकत्वमात्रं धूमाद्द्रिव्यत्ववान् पर्व्वतो वह्निमान् धूमादित्यादिन्यायस्थले धूमादित्यादिहेत्ववयवेऽतिव्याप्तमतः प्रकृतानुमित्यन्यूनविषयकत्वमुक्तं, तच्च प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वरूपं ग्राह्यं, धूमात् प्रमेयत्ववद्धेतुत्वं धूमीयं धूमादित्यादौ हेतुतामात्र एव प्रकृतसाध्यवैशिष्ट्यबोधको हेतुर्न तु विशिष्टहेतुत्वात्मके प्रकृतपक्षे, हेतुत्वं वाच्यत्वात् प्रमेयवृत्तिधर्म्मवत्

साध्योपस्थितिः, नाप्यवयवान्तरेणाक्षेपात्, साध्यान्वये तदभिधानं तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात्। तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेहाक्षेपः।

अन्ये तु(१२) शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा किन्तु विशिष्टे, विशिष्टन्तु विशेषणं साध्यमनभिधाय न शक्याभिधानं। न च

वच्छिन्नपक्षक-वह्नित्वावच्छिन्नसाध्यकप्रतिज्ञालक्षणातिव्याप्तिः तस्यापि पर्वतत्वावच्छिन्नपक्षक-वह्नित्वावच्छिन्नसाध्यकन्यायावयवत्वात् पर्वतत्वावच्छिन्नपक्षक वह्निव्याप्यधूमसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वाच्च, तद्दाने च वह्निसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वाभावान्नातिप्रसङ्गः, तत्साध्यकेत्युक्तौ च पर्वतो द्रव्यवान् धूमादित्यादि स्थलीयोपनयेऽतिव्याप्तिः तस्य पर्वतत्वावच्छिन्नपक्षकद्रव्यत्वावच्छिन्नसाध्यकन्यायावयवत्वात् पर्वतत्वावच्छिन्नपक्षकद्रव्यव्याप्यधूमात्मकद्रव्यसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वाच्च, तद्दाने च द्रव्यत्वावच्छिन्नसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वाभावान्नातिव्याप्तिः, धूमाद्वह्न्यवयवसमवेतद्रव्यवान् पर्वतो वह्निमान् धूमादित्यत्र हेत्ववयवे तादृशपर्वतत्वाच्छिन्नपक्षक-वह्नित्वावच्छिन्नसाध्यकन्यायावयवत्वात् तादृशपर्वतत्वावच्छिन्नपक्षक-वह्नित्वावच्छिन्नसाध्यकानुमित्यनतिरिक्तविषयकशाब्दज्ञानजनकत्वाच्च तत्र तादृशपर्वतत्वावच्छिन्नपक्षक-वह्नित्वावच्छिन्नसाध्यकप्रतिज्ञालक्षणातिव्याप्तिवारणायान्यूनेति, तद्दाने च तस्य वह्न्यवयवसमवेतद्रव्याविषयकत्वेन तादृशानुमित्यन्यूनविषयकत्वाभावान्नातिप्रसङ्गः। तस्माद्वह्निमानित्यादिनिगमनस्यापि पर्वतत्वावच्छिन्नपक्षक-वह्नित्वावच्छिन्नसाध्यकन्यायावयवत्वात् पर्वतत्वावच्छिन्नपक्षक-

---

वाच्यत्वादित्यादौ च प्रकृतपक्षे प्रकृत्यर्थस्य वाच्यत्वस्यैव वैशिष्ट्यबोधको हेतुर्न तु वाच्यत्वज्ञाप्यप्रमेयवृत्तिधर्म्मात्मकस्य प्रकृतसाध्यस्य इति तयोर्व्युदासः। न च पर्व्वतो वह्निमानित्यादौ वह्निसाध्यकप्रतिज्ञायामव्याप्तिः नामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वेन तस्याः पक्षे साध्यप्रकारकबोधजनकत्वासम्भवादिति

वस्तुतो यत्साध्यं तत्र प्रमाणं वदेति मध्यस्थनियोगः, वादिद्वयमध्ये तदसम्भवात् तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा, न वान्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति।

साध्यनिर्द्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जक-विभक्तिमल्लिङ्गवचनमेवोचितं अन्यथानाकाङ्क्षिताभिधाने निग्रहापत्तेः लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः, हेतुत्वञ्चानुमितिकारणीभूतलिङ्ग-

---

वह्नित्वावच्छिन्नसाध्यकानुमित्यन्यूनविषयकशाब्दज्ञानजनकत्वाच्च तत्रातिव्याप्तिवारणायानतिरिक्तेति, तथाच तस्य तादृशानुमितिविषयातिरिक्त-व्याप्त्यादिविषयकत्वात् नोक्तातिव्याप्तिः, तत्र शाब्दज्ञानजनकत्वं तादृशज्ञानजनकतावच्छेदकानुपूर्व्वीमत्त्वम्, अतः सभाक्षोभादिनाऽजनित-बोधकप्रतिज्ञायां नाव्याप्तिः, एतल्लाभायैव शाब्दवाक्यपदयोरूपादानम्।

ननु सर्व्वं प्रमेयमित्यादिप्रतिज्ञायामव्याप्तिः तादृशानुमितिविषयाति-रिक्ताप्रसिद्धेः। न च तादृशानुमित्यनतिरिक्तविषयकत्वं तादृशानुमिति-विषयिताव्यावृत्तवैलक्षण्याश्रयविषयिताशून्यत्वं वाच्यमिति वाच्यम्। अनुमितिविषयिताव्यावृत्ततत्तद्व्यक्तित्वरूपवैलक्षण्यस्य शाब्दबोधविषयितायां

वाच्यं। समानविभक्तिकमतुबादिसमभिव्याहारवशेन नामार्थयोरपि भेदेनान्वयस्य प्राचीनैः स्वीकृतत्वादेव तत्सम्भवादिति प्रतिज्ञासहकारेण हेत्ववयवस्य उपनयस्थायमादिपदसहकारेण निगमनस्य च निरुक्तानुमित्यन्यूनविषयकत्वात् तत्रातिव्याप्तिवारणार्थमनतिरिक्तविषयकत्वमुक्तं। न च सर्व्वं प्रमेयं वाच्यत्वादित्यादौ प्रकृतानुमितिविषयातिरिक्ताप्रसिद्धिः, प्रकृतपक्षधर्म्मिक-प्रकृतसाध्यावगाहितानन्तर्गतविषयताशून्यत्वस्य विवक्षितत्वात्। न चैवमपि रमाधवः पूज्यो देवत्वादित्यादौ माधवः पूज्य इत्याकारकप्रतिज्ञैकदेशेऽतिव्याप्तिः तस्यापि निरुक्तसत्यन्तार्थवत्त्वात् प्रकृतानुमित्यन्यूनानतिरिक्तविषयकशाब्दधी-जनकत्वाच्चेति वाच्यम्। स्वघटितवाक्याप्रतिपाद्यस्वार्थकत्वरूपमहावाक्यत्वपरेण चरमवाक्यपदेनैव तस्य वारितत्वादिति भावः इति जागदीशी व्याख्या।

परामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वं।

हेतुत्वप्रतिपादकविभक्तिमन्यायावयवत्वं वा।

उदाहरणप्रयोजकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा।

सत्त्वात् इत्यतो लक्षणासम्भवात् लक्षणान्तरमाह, **'अन्यूनेति,'** अन्यूनानतिरिक्तपदं

---

८. लाघवादाह, 'अन्यूनेति अन्यूनानतिरिक्तविषयकान्तभागं विहाय इत्यर्थः, अनुमितिविषयकत्वस्य प्रायशः प्रतिज्ञायामसत्त्वात् अनुमितिसमानविषयकत्वस्य सतोऽपि व्यर्थत्वादिति ध्येयम्। 'लिङ्गाविषयकत्वमिति लिङ्गं भावभिन्नत्वस्य यल्लिङ्गमभावत्वं तदविषयत्वमित्यर्थः, तेन ह्रदो निर्धूमो निर्वह्नित्वादित्यादौ यो यो धूमवान् स वह्निमानित्यादिव्यतिरेक्युदाहरणस्य निर्व्वह्नित्वादिरूपहेत्वविषयकत्वेऽपि नातिव्याप्तिः। न च घटाभावः पटशून्योऽभावत्वादित्यादिस्थलीयप्रतिज्ञाया अभावत्वविषयकत्वनियमात् तत्राव्याप्तिः प्रकृतपक्षधर्म्मिकप्रकृतसाध्यप्रकारिताबहिर्भावेन यदभावत्वविषयकत्वं तच्छून्यत्वस्य विवक्षितत्वात्। न च प्रकृतपक्षधर्मिकप्रकृतसाध्यप्रकारिताबहिर्भूतविषयिताशून्यत्वमात्रस्य सम्यक्त्वेऽभाववत्त्वप्रवेशो व्यर्थ इति वाच्यम्। अखण्डाभावघटकतया तस्या व्यर्थत्वादिति भावः। ननु तस्माद् वह्निमान् इति निगमनस्याप्यभावत्वाविषयकत्वात्तत्रातिव्याप्तिरित्यत आह, 'निगमनञ्चेति, 'न परामर्शहेतुः' नाभावत्वाविषयकज्ञानहेतुः, 'अबाधितत्वेति, प्रतिज्ञातः पक्षस्य साध्यवत्त्वसिद्धेः पुनस्तदभिधानस्याबाधितत्वादिबोधकत्वस्यावश्यकत्वात् सिद्धे सत्यारम्भोनियमायेत्यादिव्युत्पत्तेरिति भावः। वस्तुतोऽबाधितत्वादेर्निगमनाप्रतिपाद्यत्वेऽपि ज्ञापकत्वरूपहेतुत्वस्याभावत्वगर्भजनकताघटितत्वेन हेतुतावाचिपञ्चमीगर्भनिगमनस्याभावत्वाविषयकज्ञानजनकत्वमेव दुर्लभं, अत एव पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवेऽपि नातिव्याप्तिः, तस्यापि पञ्चम्यर्थहेतुताघटकतयैवाभावत्वविषयकज्ञानजनकत्वनियमादिति ध्येयं।

साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा।

प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा।

अनुमित्यन्यूनानतिरिक्तविषयकपरं, लिङ्गाविषयकत्वमिति लिङ्गपदं व्याप्यपरं, भावार्थश्च विवक्षितः, व्याप्यत्वञ्च प्रकृतहेतुकप्रकृतसाध्यकानुमितिगमकतौपयिकव्याप्यत्वं, यथाश्रुते पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यत्र प्रतिज्ञायामव्याप्तेः, तथाच नञ्व्यत्यासेन प्रकृतहेतुक-प्रकृतसाध्यकानुमित्यौपयिकव्याप्यत्वविषयकशाब्दबोधजनकाकाङ्क्षाशून्यत्वमित्यर्थः, उदाहरणादीनां तादृशाकाङ्क्षासत्त्वान्नातिप्रसङ्गः, अत्राप्युदासीनवाक्येऽतिव्याप्तिवारणाय न्यायावयवत्वे सतीत्यनुसञ्जनीयम्, अत्र च हेत्ववयवेऽतिव्याप्तिवारणाय हेत्वन्यत्वविशेषणं देयं, प्रकृतपदद्वयदानात् तेजोव्याप्यधूमवानयं वह्निमान् धूमादित्यादौ। वह्निव्याप्यनीलवानयं वह्निमान् धूमादित्यत्र नाव्याप्तिः। न च प्रकृतहेतुनिष्ठप्रकृतसाध्यनिरूपितव्याप्यत्वाद्येव उच्यतामिति वाच्यम्। व्यतिरेकव्याप्तिज्ञानजनकोदाहरणादावतिव्याप्तेः, अत्र चान्वयव्याप्तिविषयता-व्यतिरेकव्याप्तिविषयतोभयोः प्रत्येकरूपेणैवाभावौ निवेश्यौ व्याप्तिद्वयसाधारणानुगतरूपस्य एकस्याभावेन एकरूपेण तदुभयाभावानिवेशासम्भवात्। अन्यूनपदस्य व्यावृत्तिमाह, 'तेनेति अन्यूनपददानेनेत्यर्थः, 'उदाहरणादिपदं उदाहरणस्यादिरिति समासेन धूमाद्वह्न्यवयवसमवेत-

---

'हेत्विति, 'हेतुः' स्वार्थज्ञाप्यत्वविशिष्टसाध्यवत्तया पक्षबोधानुकूलपञ्चम्यन्तशब्दः, तस्य यदभिधानं तस्य प्रयोजिका तज्जन्यबोधनिवर्त्या पक्षः कुतः साध्यवानित्याकारिका या जिज्ञासा तदनुकूलावयवत्वमित्यर्थः, 'लिङ्गेति उपनयनादिवारणार्थमविषयकान्तं प्रकृतसाध्यपक्षविषयताबहिर्भावेन प्रकृतलिङ्गाविषयकत्वार्थकं, नातः प्रागुक्तदोषः, ह्रदो निर्धूमो ह्रदावृत्तिधर्मशून्यत्वादित्यादौ यो यो धूमवान् स ह्रदावृत्तिधर्मवान् इत्यादिव्यतिरेक्युदाहरणस्य वारणाय 'लिङ्गिविषयकेति लिङ्गं प्रकृतसाध्यव्याप्यं तद्वद्विषयकेत्यर्थः। न च साध्यवद्विशेष्यकत्वमेव सम्यक् व्याप्यपदं व्यर्थमिति वाच्यम्। यथासन्निवेशे वैयर्थ्याभावात् इति जागदीशी व्याख्या।

पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा। हेतुपदेन ज्ञाने लक्षणा अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्थानन्वयात्(११) तथैवाकाङ्क्षानिवृत्तेः।

अनुमितिहेतुज्ञानकारणधूमवत्त्वादिशब्दजन्यज्ञानवृत्तिप्रतिज्ञादिजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यत्वं हेतुत्वमित्यन्ये, जातिं

द्रव्यवान् पर्व्वतो वह्निमान् धूमादित्यादिस्थलीयहेत्ववयवपरम्।

केचित्तु लिङ्गाविषयकपदव्यावृत्तिपरोऽयं ग्रन्थ इत्यप्याहुः।

अनतिरिक्तपदस्य छलतोव्यावृत्तिमाह, 'निगमनञ्चेति, अन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं सदिति शेषः, 'न परामर्शहेतुः' न न्यायावयव इत्यर्थः। ननु तस्य कुतो न तथाज्ञानजनकत्वम् अत आह, 'अबाधितेति अबाधितत्वासत्प्रतिपक्षत्वज्ञानजनकत्वादित्यर्थः। ननु निगमनं नाबाधितत्वादिज्ञानजनकम् तस्यापदार्थत्वात्। न च लक्षणया तस्योपस्थितिरिति वाच्यम्। वादिवाक्ये स्वारसिकताया तस्या अभावादिति चेत्। न। अबाधितत्वासत्प्रतिपक्षितत्वज्ञानजनकत्वादित्यस्य अबाधितत्वासत्प्रतिपक्षत्वादिमानसज्ञानप्रयोजकस्य साध्यव्याप्तिविशिष्टपक्षधर्मताविशिष्टहेतुज्ञानज्ञाप्यत्वस्य ज्ञानजनकत्वादित्यर्थत्वात्, तादृशहेतुज्ञानज्ञाप्यत्वज्ञानस्य अबाधितत्वादिज्ञानप्रयोजकत्वं तादृशहेतुज्ञानज्ञाप्यत्वस्य अबाधितत्वादिव्याप्यतया।

नव्यास्तु नास्ति बाधितत्वं पक्षनिष्ठात्यन्ताभावप्रतियोगित्वं यस्मादिति विग्रहेणाबाधितत्वादिपदस्य व्याप्तिपक्षधर्मताविशिष्टो यो हेतुस्तज्ज्ञानज्ञाप्यत्वमर्थः, 'असत्प्रतिपक्षिततत्वम्' असत्प्रतिपक्षवृत्तिधर्म्मो व्याप्तिरूपः, तथाच तज्ज्ञानज्ञाप्यत्व-व्याप्त्युभयबोधजनकत्वादित्यर्थ इत्याहुः।

केचित्तु 'लिङ्गाविषयकेति लिङ्गस्वरूपव्याप्ति-पक्षमधर्मताकाङ्क्षात्रयनिवर्त्तकभिन्नत्वे सति अबाधितत्वादिशून्यलिङ्गपरामर्शप्रयोजकन्यायावयवत्वमर्थः, सत्यन्तव्यावृत्तिमाह, 'तेनेति, 'उदाहरणादिव्युदासः,' हेत्ववयवस्य च लिङ्गस्वरूपाकाङ्क्षानिवर्त्तकत्वात्, उदाहरणस्य व्याप्त्याकाङ्क्षानिवर्त्तकत्वात्, उपनयस्य पक्षधर्मताकाङ्क्षानिवर्त्तकत्वात्, प्रतिज्ञायाश्च तादृशाकाङ्क्षात्रयनिवर्त्तकभिन्नत्वादिति भावः। अबाधितत्वादिशून्यलिङ्गपरामर्शप्रयोजकपद-

विना केन रूपेण ज्ञानस्यानुमितिजनकत्वं वाक्यविशेष-जन्यत्वस्यापि जन्यतावच्छेदकरूपापरिचये दुर्ग्रहादित्यपरे।

अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनक-हेतुत्वप्रतिपादकविभक्तिमन्यायावयवत्वमन्वयिहेतुत्वं, एतदेव

व्यावृत्तिमाह, 'निगमनञ्चेति, 'न परामर्शहेतुः' नाबाधितत्वादिशून्यलिङ्ग-परामर्शप्रयोजक इत्यर्थः, उदासीनवाक्येऽतिव्याप्तिवारणाय विशेष्यदलमिति व्याचक्रुः।

परे तु 'निगमनञ्चेति निगमनैकदेश इत्यर्थः, 'न परामर्शहेतुः' न न्यायावयव इत्यर्थः, तथाच न्यायावयवार्थकसत्यन्तस्येयं व्यावृत्तिरित्याहुः। तदसत्। अवयवैकदेशवारणस्यापि सत्यन्तदलसाध्यतया निगमनैकदेश-मात्रानुसरणविरोधात्।

'हेत्वभिधानेति हेत्वभिधानस्य प्रयोजिका या जिज्ञासा तज्जनक-वाक्यार्थज्ञानजनकत्वे सति न्यायावयत्वमित्यर्थः। भवति हि पर्व्वतो वह्निमानित्यादिवाक्यजन्यज्ञानानन्तरं कुतोऽस्य वह्निमत्त्वमिति जिज्ञासा, हेत्वादावतिव्याप्तिवारणाय सत्यन्तम्, उदासीनवाक्येऽतिव्याप्तिवारणाय विशेष्यदलं। न च तस्य हेत्वभिधानप्रयोजकजिज्ञासाजनकत्वमेव नास्तीति कथं तर्हि अतिव्याप्तिरिति वाच्यम्। यत्र सभाक्षोभादिना जिज्ञासादिकमेव न जातं तत्राव्याप्तिवारणाय तादृशजिज्ञासाजनकवाक्यार्थजनकतावच्छेदका-नुपूर्वीमत्त्वस्य सत्यन्तार्थतात्पर्य्यात्।

'लिङ्गाविषयकेति, 'लिङ्गी' पक्षः, तज्ज्ञानं तन्मुख्यविशेष्यकज्ञानं, तथाच लिङ्गाविषयक-पक्षमुख्यविशेष्यकज्ञानजनकन्यायावयवत्वमित्यर्थः। हेत्वादावतिव्याप्तिवारणाय 'लिङ्गाविषयकेति। न च धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिस्थलीयप्रतिज्ञायामव्याप्तिः अस्या लिङ्गविषयकज्ञान-जनकत्वादिति वाच्यम्। पक्षतावच्छेदकावच्छिन्नपक्षविषयतानिरूपिता या साध्यतावच्छेदकावच्छिन्नसाध्यविषयता तदनिरूपिता तदनिरूपिता या लिङ्गविषयता तच्छून्यत्वस्य तदर्थत्वात्। ह्रदो निर्धूमत्ववान् निर्व्वह्नित्वादित्या-दिस्थलीय यो यो धूमवान् स वह्निमान् इति व्यतिरेक्युदाहरणेऽतिव्याप्तिवारणाय

व्यतिरेकव्याप्त्यभिधायकपदप्रक्षेपाद्व्यतिरेकि हेतुत्वम्। अन्वय-व्यतिरेकोदाहरणाकाङ्क्षाप्रयोजकतथाभूतावयवत्वमन्वयव्यतिरेकिहेतुत्वं।

यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्वयव्यतिरेकि, अत्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरणपक्ष-सपक्षसद्धेतुवचनं केवलान्वयि।

पक्षमुख्यविशेष्यकेति, पक्षविशेष्यकेत्येतावन्मात्रे कृते ह्रदो निर्धूमत्ववान् ह्रदावृत्तिधर्म्मशून्यत्वादित्यादिस्थलीययो यो धूमवान् स ह्रदावृत्तिधर्म्मवान् इत्युदाहरणेऽतिव्याप्तेः, तथाच तज्जन्यज्ञाने ह्रदस्य विशेष्यत्वेऽपि मुख्यविशेष्यत्वाभावान्नातिव्याप्तिः, छलतोलिङ्गाविषयकेत्यस्य व्यावृत्तिमाह, 'इतरेति व्यतिरेक्युदाहरणभिन्नप्रतिज्ञेतरावयवानामित्यर्थः, 'लिङ्गविषयक-ज्ञानजनकत्वात्' लिङ्गविषयकज्ञानस्यैव जनकत्वात् उक्तलिङ्ग-विषयताशून्यज्ञानजनकत्वादिति यावत्।

'प्रतिज्ञात्वमिति,[१] अत्र च प्रतिज्ञापदप्रवृत्तिनिमित्तत्वेन पक्षत्वं, प्रतिज्ञापदप्रवृत्तिनिमित्तत्वञ्च उभयवादिसिद्धमेव, तत्र जातिरूपाधिर्वा इत्यत्र विवादात् अतो नाश्रयासिद्धिः, 'अनुगतेति प्रतिज्ञेत्याकारकहेत्वादिव्यावृत्त-तान्त्रिकानुगतबुद्धिजनकत्वादित्यर्थः, अत्र चानुगतबुद्धिजनकत्वमेव हेतुः,

---

९. 'प्रतिज्ञात्वमिति, न च जातेर्व्यासज्यवृत्तित्वविरहात् एकैकपदेऽपि प्रतिज्ञात्वजातेर्ग्रहापत्तिरिति वाच्यम्। प्रतिज्ञाघटकतत्तदानुपूर्व्वीव्यङ्ग्यत्वस्य तादृशजातावङ्गीकारादिति भावः। 'प्रभवत्वादीत्यादिना कत्वखत्वपरिग्रहः, 'उक्तस्य' न्यायावयवलक्षणोक्तदोषस्य उद्देश्यानुमित्याद्युक्तलक्षणस्येति वार्थः। 'एतेन' प्रतिज्ञाजन्यज्ञानमात्रवृत्तिवैजात्यविरहेण, 'निरस्तमित्यग्रेऽन्वयः। उदाहरणादिप्रयोज्यजातेर्व्वारणाय 'वृत्त्यन्तं शब्दोऽनित्य इत्याकारकं यल्लिङ्गिधी-परमवयवात्मकं वाक्यं तज्जन्यज्ञानवृत्तीत्यर्थः, न्यायाप्रयोज्यचैत्रादिशरीरविशेषस्य प्रयोज्यायाः शब्दोऽनित्य इत्युदासीनवाक्यधीनिष्ठायाः शाब्दत्वावान्तरजातेः प्राचीनसम्मतत्वेन तद्वारणार्थमवयवेति, सत्ता-गुणत्वादेरवयवसामान्यप्रयोज्य-जातेर्व्वारणार्थं 'कृतकत्वादित्याद्यवृत्त्यन्तं, 'जातियोगीति जातिसमवायीत्यर्थः, इति जागदीशी व्याख्या।

यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारण-साध्याविषयकशाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतु-विभक्तिमच्छब्दत्वमन्वयिहेतुत्वम्। एतदेवाप्रतीतान्वयसाध्य-साधनेति विशेषणाद्व्यतिरेकि हेतुलक्षणं, कथायां धूमादित्येव प्रयोक्तव्यं न तु धूमवत्त्वादिति मतुपोव्यर्थत्वात्।

'अनतिप्रसक्ताद्यभिधानञ्च आश्रयासिद्धिशङ्कानिरासतर्कप्रदर्शनपरमेवेति ध्येयम्। 'देवदत्तप्रभवत्वादिनेति पुरुषविशेषजन्यतावच्छेदकजात्यादिनेत्यर्थः, 'आदिपदात्कत्वादिपरिग्रहः, इदमुपलक्षणं तस्य प्रत्येकपरिसमाप्तौ एकदेशे तादृशबुद्ध्यापत्तेः, समुदितपर्य्याप्तत्वे व्यासज्यवृत्तित्वेन जातित्वासम्भवादित्यपि बोध्यम्। 'अनुगतरूपमन्तरेणेति, 'सम्भवतीति, अस्यार्थस्तु प्रागेव व्याख्यातः, 'उक्तस्येति अस्मदुक्तलक्षणस्यैवेत्यर्थः। 'एतेनेति अनुगतजनकतावच्छेदकरूपं विना तज्जनकत्व-तद्ग्रहयोरसम्भवेनेत्यर्थः, 'शब्दोऽनित्य इति, अत्र 'लिङ्गिधीरपरेति स्वरूपकथनं, वाक्यत्वं न्यायान्तर्गतत्वं, 'कृतकत्वादित्यादीति, आदिपदात् यो यः कृतक इत्युदाहरणादेः परिग्रहः, तथाच शब्दोऽनित्य एतादृशवाक्यजन्यज्ञानवृत्तिः सती कृतकृत्वादित्यादिवाक्यजन्यज्ञानवृत्तिर्या जातिस्तदाश्रयज्ञानजनकन्यायान्तर्गतत्वमित्यर्थः। यत्र स्थलविशेषे कण्ठकोद्धारसहित एव न्यायप्रयोगः कृतस्तत्र कण्ठकोद्धारवाक्ये कृतकत्वा-दित्यादिवाक्यजन्यज्ञानावृत्तिजातिविशेषशालिज्ञानजनकेऽतिव्याप्तिवारणाय 'वृत्त्यन्तं, शब्दोऽनित्य इति वाक्यधीजन्यज्ञानवृत्तिसत्तावज्ज्ञानजनकवाक्ये चातिव्याप्तिवारणाय 'अवृत्त्यन्तं, समवायेन तदाश्रयतालाभाय जातिपदं, कालोपाधिव्यावृत्तजनकतालाभाय ज्ञानपदं उदासीनवाक्येऽतिव्याप्तिवारणाय विशेष्यदलं।

'प्रतिज्ञा न साधनाङ्गमिति[१०] प्रतिज्ञा न परार्थानुमाने प्रयोजकज्ञान-

---

१०. 'साधनाङ्गमिति साधनस्य न्यायस्याङ्गं घटकमित्यर्थः, साधनस्य परार्थानुमानस्याङ्गमुपयुक्तमिति वा। ननु पक्षस्य साध्यवत्त्वाग्रहे तत्र हेत्वाकाङ्क्षाविरहात् तदभिधानेऽर्थान्तरं स्यादित्यवश्यं प्रतिज्ञा कर्त्तव्येत्यत आह, 'विप्रतिपत्तेरिति विप्रतिपत्तिवाक्यादेव, 'पक्षपरिग्रहे' साध्यवत्तया पक्षग्रह

सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकं विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभक्त्यन्तरा-वरुद्धस्यानन्वयादिति केचित्। तन्न। सति सप्तमीबलात् सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्या-पस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः, न ह्ययमर्थोऽस्मान्नावगम्यते इति।

जनकमित्यर्थः तथाच न्यायप्रयोगे प्रतिज्ञाकरणं व्यर्थमिति भावः। 'पक्षपरिग्रहे' शब्दानित्यत्वादिकोटिपरिग्रहे सतीत्यर्थः, 'तत्र' शब्दानित्यत्वे, 'प्रमाणाकाङ्क्षायां' कुत इति प्रयोगे, 'प्राथम्यादिति प्रथममेव वक्तुमुचितत्वादित्यर्थः, 'समयबन्धेति कण्टकोद्धारसहित एव न्यायप्रयोगः कार्य्यः उदाहरणे समयबन्धः कर्त्तव्यः तथा न कार्य्यं वा इत्यादिरूपेत्यर्थः, 'साध्यनिर्देशं विनेति पदजन्यसाध्योपस्थितिं विनेत्यर्थः, 'हेतुवाक्यमिति साध्यान्वितपञ्चम्यर्था- न्वयबोधजनकमिति शेषः, निष्प्रतियोगिकमिति पञ्चम्यर्थज्ञानज्ञाप्यत्वांशे निर्धर्म्मितावच्छेदककबोधजननसमर्थं भवतीत्यर्थः। ननु हेतुवाक्येन साध्यानन्वितकृतकत्वविषयकज्ञान-

---

इत्यर्थः, 'तत्र' पक्षस्य साध्यवत्तायां।

केचित्तु 'प्रतिज्ञा न साधनाङ्गं' साधनं हेतुवाक्यं तेन सहैव वाक्यत्वापन्ना प्रतिज्ञा नेत्यर्थः, पर्व्वतो वह्निमानिति प्रतिज्ञा ततः कुत इत्याकाङ्क्षायां धूमादिति प्रयोगः प्रतिज्ञाहेतूभ्यां विशिष्टार्थबोधो जन्यत इति नेति पर्य्यवसितं, तथाच प्रतिज्ञाहेत्वोरेकवाक्यताविरहेण प्रतिज्ञादिपञ्च इत्यादिन्याये यदुक्तं तस्यासम्भवेन न्यायलक्षणासम्भव इति भावः। अत्र प्रतिज्ञादिप्रयोगे प्रमाणाभावेन नैकवाक्यता इति अभिसन्धिः, अभिसन्धिं प्रकाशयति, 'विप्रतिपत्तेरिति, पञ्चम्याः प्रयोज्यत्वमर्थः, स च परिग्रहेऽन्वेति, विप्रतिपत्तिः शब्दोऽनित्यो न वेत्याकारिका, 'पक्षपरिग्रहः' मया शब्दानित्यत्वं साधनीयमित्यादिवाक्यरूपः, 'तत्र' शब्दानित्यत्वे, 'प्रमाणाकाङ्क्षायां' शब्दविशेष्यकानित्यत्वप्रकारकप्रमाकरणं वद इत्याकाङ्क्षायामिति यावत्, तादृशाकाङ्क्षानिरासकप्रश्ने कृते 'हेत्वभिधानस्य' कृतकत्वादिप्रयोगस्य, 'प्राथम्यात्' प्रथमोपन्यासार्हत्वात् इति साम्प्रदायमतानुसारेण व्याचक्रुः इति जागदीशी व्याख्या।

हेतावुक्ते कथमस्य गमकत्वमित्याकाक्षायां व्याप्तिपक्ष-धर्म्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनायोदाहरणम् तत्रानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनकव्याप्यत्वा-भिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनक-

जन्यज्ञानविषयत्वमित्याकारकशाब्दबोधजनने न किमपि बाधकमिति कथं तत्रासामर्थ्यमिति चेत्। न। साध्यानन्विततादृशान्वयबोधजनने कुतोऽस्यानित्यत्वमित्याकाङ्क्षाया अनिवृत्तेः। ननु पदानुपस्थितमपि शाब्दबोधविषयो भविष्यतीत्यत आह, 'न चेति, 'वादिवाक्ये' वादिकवाक्यजन्यशाब्दबोधे, 'अनुपस्थितमपि' पदानुपस्थितमपीत्यर्थः, साध्यमिति शेषः, 'योग्यतया' अबाधिततया, 'अन्वेति' शाब्दबोधविषयो भवति, 'अतिप्रसङ्गात्' साध्यभिन्नाबाधितान्तरस्यापि शाब्दबोधविषयत्वप्रसङ्गात्, 'तस्याः' साध्योपस्थितेः, 'प्रतिवादिविप्रतिपत्त्या' प्रतिवादिविप्रतिपत्तिजन्योपस्थित्या, 'प्रमाणादिव्यवस्थयेति समर्यबन्धजन्यज्ञानेनेत्यर्थः, 'अन्तरितत्वात्' नष्टत्वात्। ननु परविप्रतिपत्त्यादिरेव तत्र नास्ति मानाभावादित्यत आह, 'परेति, 'विप्रतिपत्तिवाक्यस्येति निराकाङ्क्षत्वादित्यनेनान्वयः, अत्र हेतुमाह, 'पक्षपरिग्रहेति शब्दानित्यत्वादिशाब्दबोधरूपतात्पर्य्यविषयीभूतान्वयबुद्ध्युपधायकतयेत्यर्थः, 'निराकाङ्क्षत्वादिति तत्पदविषयकतज्ज्ञानजन्यशाब्दबोधं प्रति तत्पदविषयक-तज्ज्ञानजन्यतात्पर्य्यविषयीभूतशाब्दबोधाभावरूपाकाङ्क्षाविरहादित्यर्थः, ननु विप्रतिपत्तिवाक्यस्यशब्दोऽनित्य इति भागस्यावृत्त्या अन्वयबोध इति नोक्तदोष इत्यत आह, 'आवृत्ताविति तत्पदस्य पुनरनुसन्धान इत्यर्थः, 'सैवेति तादृशानुसन्धानविषय एवेत्यर्थः। ननु मा भूदनुपस्थितस्य शाब्दबोधविषयता अस्य तु उदाहरणादेवोपस्थितिरस्ति, अथवा अनुमानत एव उपस्थितिर्भविष्यति, तथाहि अयमवयवः साध्यान्वितस्वार्थबोधकावयवजन्यजिज्ञासाप्रयोज्यः व्याप्तिबोधकावयवत्वादित्यादीत्याशङ्कते, 'न चेति, 'अवयवान्तरात्' प्रतिज्ञेतरात्,[११] हेत्वन्वययोग्येति हेत्वर्थान्वयबोधजनिकेत्यर्थः, 'अवयवान्तरणेति

११. 'विप्रतिपत्त्यग्रे' मध्यस्थोक्तविप्रतिपत्तेः पश्चात्, 'समयेति मया न्यायमतेनैव अन्वयिहेतुना स्वसाध्यं साधनीयमित्यादिको वादिनोर्नियमाभिलापः समयवद्धस्तदुत्तरमित्यर्थः, मध्यस्थस्यासार्वत्रिकत्वात् तस्यैव वादिनोऽप्युक्ता-

शब्दत्वमुदाहरणत्वं सामान्यलक्षणे साध्यसाधनसम्बन्ध-

व्याप्तिबोधकावयवत्वादिज्ञानेनेत्यर्थः तृतीयार्थीजन्यत्वम् आक्षेपान्वितं,

काङ्क्षायां क्षत्यभावाच्चाह, 'वादिनो वेति "साध्यं' साधनीयं, 'न चेति, बोधयितुमीष्ट इत्यग्रेतनेनान्वयः, 'साध्यनिर्देशं विनेति साध्यस्य प्रतिज्ञां विनेत्यर्थः, 'निष्प्रतियोगिकं' निर्व्विशेष्यकं, 'अन्वयं' स्वार्थवत्त्वान्वयं। अथावयवानुपस्थितमपि प्रकृतसाध्यं योग्यताबलादेव हेत्वर्थस्य धूमज्ञानज्ञाप्यत्वादेर्विशेष्यतयाऽन्वयि भविष्यति इत्याह, 'स चेति, 'अतिप्रसङ्गादिति पदानुपस्थाप्यस्यान्वयबोधविशेष्यत्वे अतिप्रसङ्गादित्यर्थः। शङ्कते, 'न चेति, निरस्यति, 'प्रतीति उक्तविप्रतिपत्तेर्भावकोटावभावकोटावेव वा प्रमाणं नास्तीत्येवं प्रतिवादिनो विरुद्धविप्रतिपत्तिजनकोक्त्येत्यर्थः, निरुक्तविरुद्धोक्तेरनावश्यकत्वेऽप्याह, 'प्रमाणादिव्यवस्थया चेति प्रागुक्तसमयबन्धेन चेत्यर्थः, अन्तरितत्वादित्यत्र विप्रतिपत्तेरित्यनुषज्यते, 'स्थापना' प्राथमिकन्यायप्रयोगः। ननु प्रतिवादिनोविरुद्धोक्तेः समयबन्धस्य च स्थापनायामुपयोगित्वं निष्प्रमाणकमत आह, 'विप्रतिपत्तिवाक्यस्येति, पक्षस्य यः मरिग्रहः साध्यवत्तया बोधनं, तेनैव 'पर्य्यवसितत्वेन' जनितान्वयबोधत्वेनेत्यर्थः, प्रत्यक्षस्येव शाब्दबोधस्यापि संशयत्वमभ्युपेत्येदं। ननु पक्षः साध्यवान्नवेत्यादिविप्रतिपत्त्येकदेशस्य पक्षः साध्यवानिति भागस्यैव पुनरावर्त्तनं कार्य्यमिति तदर्थ एव हेत्वर्थस्यान्वयो भवितेति विफलः प्रतिज्ञोपगम इत्यतआह, 'आवृत्ताविति विप्रतिप्रत्येकदेशस्य पुनरावर्त्तने त्वित्यर्थः, 'सैव' आवृत्तिरेव। यत्तु जनितान्वयबोधस्यापि पक्षः साध्यवानित्येवं विप्रतिपत्त्येकदेशस्य पुनः प्रतिसन्धानरूपायामावृत्तौ सत्यां हेत्वर्थस्यान्वयो भविता इत्याशङ्कायामाह, 'आवृत्ताविति, 'सैवेति तादृशवृत्तिविषयीभूतपक्षः साध्यवानिति वाक्यमेव प्रतिज्ञापदेनोच्यते इत्यर्थः, तदयुक्तं, पक्षः साध्यवानित्येवं भागस्य प्रतिसन्धानेऽपि हेत्ववयवस्य तदानन्तर्य्यविरहेण तमन्तर्भाव्य प्रतिज्ञादिपञ्चकस्य क्रमिकोचितानूपूर्वीकत्वाभावेन तस्य प्रतिज्ञात्वासम्भवात्। वस्तुतो हेत्ववयवस्य प्रतिज्ञानन्तर्यं न प्रतिज्ञोत्तरोच्चरितत्वगर्भं किन्तु प्रतिज्ञोत्तरज्ञातत्वगर्भम् अतः प्रतिसन्धानरूपायामेवावृत्तौ न क्षतिरिति ध्येयम्।

शङ्कते, 'न चेति, 'अवयवान्तरात्' उदाहरणात्। ननु यो यो धूमवान्

बोधजनकत्वं साध्य-साधनाभावसम्बन्धबोधजनकत्वञ्च विशेषलक्षणद्वयम्।

न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु न। दृष्टान्त-प्रयोगस्य सामयिकत्वेनासार्व्वत्रिकत्वात् यो यो धूमवान्

'आक्षेपादिति, 'आक्षेपः' अनुमितिः, पञ्चम्यर्थोऽभेदः अस्य च प्रागुक्त-साध्योपस्थितिरित्यनेनान्वयः, तथाच व्याप्तिबोधकावयवत्वादिज्ञानजन्यानु-मित्यभिन्ना साध्योपस्थितिरित्यन्वयबोधः, इदन्तु नैयायिकमते, मीमांसकमते तु आक्षेपोऽर्थापत्तिः, 'अवयवान्तरेणेत्यस्य च साध्यान्वितस्वार्थ-बोधकावयवजन्यजिज्ञासां विना अयमनुपपन्न इत्यनुपपत्तिज्ञानेनेत्यर्थः,

---

स वह्निमानित्येवं क्रमेण हेत्वन्वययोग्यस्य वह्न्यादिसाध्यस्यो-दाहरणादुपस्थितावपि पक्षः कुतः साध्यवानित्याकाङ्क्षायास्तथाविधहेत्वन्वयान्न निवृत्तिरुपपद्यते वस्तुतोऽप्रसिद्धसाध्यव्यतिरेक्युदाहरणस्य साध्याबोधकतया उदाहरणोपस्थाप्यसाध्ये हेत्वन्वयः सर्वत्र न सम्भवतीति अतः प्रकारान्तरमाह, 'नापीति, 'अवयवान्तरेण' उपनयेन, स्वार्थान्वयानुपपत्त्या साध्यवत्तया पक्षस्य 'आक्षेपात्' अनुमानात्, हेत्वन्वययोग्यसाध्योपस्थितिरिति पूर्वेणान्वयः, प्रथमे दूषणमाह, 'साध्यान्वय इति हेतोः साध्ये अन्वये सति कथमस्य गमकत्वमित्याकाङ्क्षायाम् उदाहरणस्याभिधानं तदभिधाने च हेत्वन्वययोग्य-साध्योपस्थितिरित्यन्योन्याश्रयादित्यर्थः, द्वितीये दोषमाह, 'तस्मादिति, तस्मादुपनयात्मकावयवान्तरात् पक्षस्य साध्यव्याप्यवत्त्वप्रतीतिः, यच्च साध्यव्याप्यवत्त्वं प्रतीतं तदन्यथानुपपत्त्या पक्षस्य साध्यवत्त्वाक्षेपः, 'इह' हेतुप्रयोगप्राक्काले नास्त्येवेत्यर्थः, पक्षस्य साध्यवत्त्वं विनापि तद्व्याप्य-वत्त्वप्रतीतेः सम्भवात् तदन्यथानुपपत्त्या पक्षस्य साध्यवत्त्वाक्षेपः+ सम्भवदुक्तिक एव नेत्यतः प्रतीतस्य साध्यव्याप्यवत्त्वस्यानुसरणं। वस्तुतः पक्षे साध्यवत्त्वाक्षेपसम्भवेऽपि न तत्र हेत्वर्थान्वयः सम्भवत्यपदार्थत्वादिति ध्येयम्।

अप्रसिद्धसाध्यव्यतिरेक्युदाहरणादेः साध्याबोधकतया उदाहरणोप-स्थाप्यसाध्ये हेत्वन्वयः सर्वत्र न सम्भवतीत्यतोऽपि प्रतिज्ञा साधनाङ्गमिति कश्चित्। इति जागदीशी व्याख्या।

एवञ्चावतारणिकापि तथैव करणीया इत्यपि बोध्यम्, आशङ्कां खण्डयति, 'साध्यान्वय इति उदाहरणादितः साध्योपस्थितावित्यर्थः, 'तदभिधानमिति हेतुवाक्यात् अन्वयबोधानन्तरं तदाकाङ्क्षायामित्यादिः, 'तदभिधानम्, उदाहरणाभिधानं, 'तदभिधाने चेति उदाहरणाभिधाने चेत्यर्थः।, द्वितीयशङ्कामुपसंहारव्याजेन खण्डयति, 'तस्मादिति, 'प्रतीत्यनुपपत्त्येति, इदन्तु मीमांसकमते प्रतीतानुपपत्त्येति इदन्तु नैयायिकमते, मीमांसकमते हि स्वर्गकामो यजेत इत्यादौ यागे स्वर्गकामकृतिसाध्यतान्वयबोधो हि इष्टसाधनत्व-रूपयोग्यताज्ञानादेव भवति, तच्चाशुविनाशिनि यागे व्यापारं विना न सम्भवतीति स्वर्गकामकृतिसाध्यतान्वयानुपपत्त्या अपूर्व आक्षिप्यते, नैयायिकमते तु वेदात् प्रतीते इष्टसाधनत्वान्वयानुपपत्त्या अपूर्व आक्षिप्यते, अत्र चानुपपत्तिद्वयमेव नास्ति साध्यान्वितस्वार्थबोधकहेतुजन्यजिज्ञासां विना उदाहरणाद्युपन्यासासम्भवात् इत्याखण्डनार्थः।[१२]

न च शब्दानित्यत्वे प्रमाणं वदेति प्रश्नवाक्यादेव साध्योपस्थिति-र्भविष्यतीति वाच्यम्। तदा धूमादिति पञ्चमी न स्यात् किन्तु धूम इत्येव स्यादिति, 'किन्तु विशिष्ट इति शब्दानित्यत्वप्रमाणे इत्यर्थः, 'तदसम्भवात्' वस्तुगतित्वासम्भवात्, द्वयोरेकस्यावश्यं बाधितत्वादिति भावः। 'अन्ये' इत्यस्वरसोद्भावनं, तद्वीजन्तु वस्तुतो यत्सिषाधयिषितं साध्यं तत्र प्रमाणं वदेति प्रश्ने नोक्तदोष इति ध्येयं। उपसंहरति, 'तस्मादिति, 'न वान्वयबोधकत्वमिति हेतुवाक्यस्येति शेषः, तथाच न वा तादृशाकाङ्क्षा-निवर्त्तकान्वयबोधजनकत्वं हेतुवाक्यस्येत्यर्थः, तथाच एतदुभयानुकूलसाध्यो-पस्थित्यर्थं साध्यनिर्देश इति भावः।[१३]

---

१२. प्रतिज्ञायाः साधनाङ्गत्वे निबन्धकृदयुक्तिमुपन्यस्यति, 'अन्ये त्विति, मध्यस्थेत्युपलक्षणं वादिनो वेत्यपि द्रष्टव्यं, 'अनुयोगः' प्रश्नः, शब्दानित्यत्वं साधयेत्येवं मध्यस्थस्य नियोगः साम्प्रदायिक इत्यतो यदीत्युक्तं, 'विशिष्ट इति शब्दानित्यत्वसाधकत्वविशिष्ट इत्यर्थः, 'यत्साध्यं' पक्ष इति शेषः, 'तदभावात्' वास्तविकत्वाभावात्। इति जागदीशी व्याख्या।

१३. ननु प्रतिज्ञोत्तरं हेतुरेवोद्भाव्यते न उदाहरणादिकमित्यत्र किं नियामकमित्यत आह, 'साध्यनिर्देशेति, 'साधनताभिव्यञ्जकेति ज्ञापकताबोध-केत्यर्थः, 'लिङ्गं नाम, 'अन्यथा' साध्यनिर्देशोत्तरमुदाहरणाद्यभिलापे। ननु

सोऽग्निमानित्येव व्याप्तिप्रतीतेः।

नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञान-विषयव्याप्त्युपनायकं वचनं तत्, उपनयातिव्याप्तेः, अत एव

लक्ष्यतावच्छेदकाक्रान्तधूमोऽयं इत्यादिवाक्ये वक्ष्यमाणहेतुलक्षण-व्याप्त्याशङ्कायां तस्यालक्ष्यत्वेन परिहर्तुं छलतोलक्ष्यतावच्छेदकं दर्शयति,

---

साध्यस्य प्रतिज्ञोत्तरं उदाहरणादेरिव हेतोरपि अनाकाङ्क्षितत्वमविशिष्टमत आह, 'लोक इति, 'तथैव' साधनताभिव्यञ्जकविभक्तिमल्लिङ्गवचनेनैव, कुत इत्याकाङ्क्षानिवृत्तिरेवं व्युत्पत्तिकल्पनादित्यर्थः। 'अनुमितीत्यादि हेतुसमानानुपूर्वीकोदासीनवाक्यस्य प्रतिज्ञाद्येकदेशस्य च वारणाय जनकान्तं, यादृश-यादृशानुपूर्व्यवच्छिन्ने प्रकृतं न्यायत्वं तादृश-तादृशानुपूर्व्यवच्छिन्नाभाव-कूटसाध्यकानुमितिकारणीभूतलिङ्गपरामर्शस्य यत्प्रयोजकं प्रकारतया जनकता-वच्छेदकानुपूर्वीघटकम् अथ च प्रामाणिकस्य यादृश-यादृशशब्दे न्यायावयव-व्यवहारस्तादृश-तादृशशब्दकूटाभावस्य धियो जनकं प्रतियोगितासम्बन्धा-वच्छिन्नजनकतावच्छेदकमिति तदर्थः। निगमनस्य वारणाय साध्याविषय-केत्यादि, हेतुताधर्मिकप्रकृतहेतुप्रकारताबहिर्भावेन साध्यविषयताशून्यधीजनकेति तदर्थः। तेन पर्वतो वह्निमान् वह्निसामग्रीमत्त्वादित्यादिहेतौ नाव्याप्तिः अयं धूमादालोकाभाववान् ह्रदत्वादित्यादौ यो यो धूमादालोकवान् स ह्रदत्वाभाववान् इत्यादिव्यतिरेक्युदाहरणेऽतिव्याप्तिवारणाय हेतुविभक्तिमदिति प्रकृतसाध्यधर्मि-कस्वार्थान्वयबोधजनकपञ्चमीविभक्तिमदिति। तदर्थः। अत एव गोत्वाभावो गोत्वशून्यः सास्नावत्त्वाभावात् यो यो गोत्ववान् स सास्नावान् गोत्वव्यापकसास्नाभाववांश्चायं तस्माद् गोत्वशून्य इत्यादौ व्यतिरेक्युपनयस्य गोत्वाभावरूपसाध्यधर्मिकस्वार्थैकत्वान्वयबोधकप्रथमा- विभक्तिमत्त्वेऽपि न तत्रातिप्रसङ्गः। न चैवं रमाधवः पूज्यो माधवत्वादित्यादौ हेत्वेकदेशे माधवत्वादित्यत्रातिप्रसङ्गः तस्यापि प्रकृतन्यायान्तर्गतत्वे सति प्रकृतावयवसमानार्थकानुपूर्वीकत्वादिति वाच्यम्। स्वघटिताप्रतिपाद्यस्वार्थकत्व-रूपमहावाक्यत्वपरेण चरमशब्दपदेनैव तद्वारणादिति भावः। इति जागदीशी व्याख्या।

उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम्। एतदेवान्वयव्यतिरेकव्याप्तिविषयत्वविशेषितं विशेषलक्षणद्वय-

---

'साध्येत्यादिना 'साध्यनिर्देशानन्तरं' प्रतिज्ञावाक्यात् पक्षतावच्छेदकविशिष्टे साध्यान्वयबोधानन्तरं' 'कुत इत्याकाङ्क्षायां' हेत्वाकाङ्क्षया प्रयुक्ते कुतः प्रश्ने सतीत्यर्थः, 'साधनताव्यञ्जकेति साधनताव्यञ्जकपञ्चमीविभक्तिम-लिङ्गप्रतिपादकवाक्यमित्यर्थः, तेन धूमेनेति प्रयोगनिरासः, आकाङ्क्षाया आवश्यकत्वे युक्तिमाह 'अन्यथेति अस्यैवार्थविवरणम् 'अनाकाङ्क्षिताभिधान इति, साधनताव्यञ्जकविभक्तिप्रयोगे युक्तिमाह, लोक इति तथैवेति इच्छाविषयता। वच्छेदकप्रकारेण सिद्धिरित्यर्थः, 'इति व्युत्पत्तेरिति इत्यस्यानुभवसिद्धत्वादित्यर्थः, तथाच तादृशाकाङ्क्षानिवर्त्तकपञ्चमीविभक्ति-मन्यायावयवत्त्वमेव लक्ष्यतावच्छेदकमिति नोक्तस्य लक्ष्यतावच्छेदका-क्रान्तत्वमिति नाव्याप्तिरिति। हेत्ववयवनिरूपणभूमिकामाह, 'अनुमितीति कारणीभूतो यो लिङ्गपरामर्शस्तत्प्रयोजकशाब्दज्ञानजनकत्वे सति साध्याविषयकशाब्दज्ञानकारणं यो हेतुविभक्तिमान् शब्दस्तत्त्वमित्यर्थः, धूमादित्युदासीनवाक्येऽतिव्याप्तिवारणाय सत्यन्तं न्यायावयवार्थकं, निगमनैकदेशे तस्मादिति भागेऽतिव्याप्तिवारणाय न्यायान्तर्गतत्वं विहाय न्यायावयवत्व-पर्य्यन्तमुक्तं, निगमनेऽतिव्याप्तिवारणाय 'साध्याविषयकेति विषयितासम्बन्धेन साध्यवद्भिन्नेत्यर्थः, तथाच निगम जन्यबोधस्य विषयितासम्बन्धेन साध्यवत्त्वान्नातिव्याप्तिरिति भावः। न च वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ हेत्ववयवेऽव्याप्तिः तज्जन्यबोधस्य साध्यविषयकत्वादिति वाच्यम्। साध्याविषयकपदेन प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयिता-वह्निर्भावेन यद्विषयित्वं तेन सम्बन्धेन साध्यवद्भिन्नस्य विवक्षितत्वात्, तथाच वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ तादृशविषयितान्तर्भावेनैव साध्यविषय-कत्वान्नाव्याप्तिरिति भावः। न चेदमेकं धूमादित्यादौ निरुक्तविषयितावह्निर्भावेन एकत्वरूपसाध्यविषयकज्ञानजनकत्वादव्याप्तिरिति वाच्यम्। तेन कदाचित् केवलधूमज्ञानज्ञाप्यत्वबोधस्यापि जननात् तमादाय लक्षणगमनात् ह्रदो निर्धूमो निर्वह्नित्वादित्यादौ यो यो धूमवान् स वह्निमानित्युदाहरणस्य साध्याविषयकज्ञानजनकत्वात् तत्रातिव्याप्तिवारणाय हेतुविभक्तिमदिति

मित्यन्ये। अत्र च व्यभिचारवारणाय वीप्सामाहुः। यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थमिति तु वयं,

ज्ञानज्ञाप्यत्वप्रतिपादकविभक्तिमदित्यर्थकं तथा च व्यतिरेक्युदाहरणस्य तादृशविभक्तिमत्त्वाभावान्नातिव्याप्तिरिति भावः। न च धूमादालोकाभाववनान् आलोकसामग्रीशून्यत्वादित्यादौ यो यो धूमादालोकवान् स आलोकसामग्रीमान् इत्यादिव्यतिरेक्युदाहरणेऽतिव्याप्तिः तस्यापि साध्याविषयकज्ञानजनकत्वात् हेतुविभक्तिमत्त्वाच्चेति वाच्यम्। हेतुविभक्तिमत्पदस्य प्रकृतसाध्यतात्पर्य्यकपदमाकाङ्क्षहेतुत्वबोधकविभक्तिमदर्थकत्वात्, तथाच तस्यालोकतात्पर्य्यकपदसाकाङ्क्षहेतुत्वबोधकविभक्तिमत्त्वेन प्रकृतसाध्यतात्पर्यकपदसाकाङ्क्षहेतुत्वबोधकविभक्तिमत्त्वाभावान्नातिव्याप्तिरिति भावः। न च प्रकृतसाध्यतात्पर्य्यकपदसाकाङ्क्षहेतुत्वबोधकत्वमेवास्तु किं विभक्तिमत्त्वेनेति वाच्यं। हेतुत्वं घटभिन्नं द्रव्यत्वाभावादित्यादौ यो यो घटः स द्रव्यत्ववानित्यादौ घटत्वव्यापकीभूताभावप्रतियोगिद्रव्यत्वाभाववदिदं इत्युपनयेऽतिव्याप्तिः तस्यापि साध्याविषयकज्ञानजनकत्वात् निगमनस्य प्रकृतसाध्यघटभिन्नत्वतात्पर्य्यकं यद्घटभिन्नपदं तत्साकाङ्क्षहेतुत्वबोधकेदम्पदवत्त्वाच्च विभक्तिपददाने च न दोषः तस्य विभक्तित्वाभावात्।

ननु एत लक्षणे हेतुत्वबोधकेति व्यथम् अतो लाघवाच्चाह, 'हेतुत्वप्रतिपादकेति।[१४] विभक्त्यर्थहेतुत्वमुख्यविशेष्यकशाब्दबोधजनकत्वे सति

१४. लक्षणान्तरमाह, 'हेतुत्वप्रतिपादकेति स्वार्थहेतुत्वमुख्यविशेष्यकान्वयबोधजनकविभक्तिमन्यायावयवत्वमर्थः। हेतुत्वं प्रमेयं वाच्यत्वादित्यादौ प्रतिज्ञोपनययोर्वारणाय विभक्तिपदं। न च वह्निर्धूमात् धूमव्यापकत्वादित्यादौ धूमहेतुताकत्वस्य साध्यतास्थले तस्माद्धूमादित्येवं निगमनस्यापि विभक्त्यर्थहेतुत्वमुख्यविशेष्यकधीजनकत्वात्तत्रातिव्याप्तिरिति वाच्यम्। उपनयस्थायम्पदस्य निगमनघटकतया तदर्थस्यैव मुख्यविशेष्यत्वात्। वस्तुतस्तु एकसुबर्थस्य सुबर्थान्तरमुख्यविशेष्यत्वेनान्वयस्य निराकाङ्क्षितत्वेन तस्माद्धूमादित्यस्य धूमनिष्ठज्ञापकतायां हेतुनिष्ठज्ञापकताकत्वबोधनासमर्थत्वेन

वीप्सा च यत्पदे न तु तत्पदेऽपि विरूपोपस्थितयोरपि तत्पदेन परामर्शाद्बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः, यथा

न्यायावयवत्वमर्थः, उदाहरणादावतिव्याप्तिवारणाय सत्यन्तं, हेतुत्वं प्रमेयमित्यादिप्रतिज्ञायामतिव्याप्तिवारणाय विभक्त्यर्थत्वं हेतुत्वविशेषणं, हेतुत्वानुपादाने पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ तस्माद्भिद्यते इत्यादिनिगमनेऽतिव्याप्तिः तस्याप्याख्यातार्थविशेष्यकान्वयबोधजनकत्वात्। न च निगमस्थायं पदार्थमुख्यविशेष्यकान्वयबोधस्य जनकत्वात् कथं तत्रातिव्याप्तिरिति वाच्यं। अयम्पदाननुसङ्गपक्षे एव एतल्लक्षणकरणात्, उक्तनिगमनस्यापि तस्मादिति विभक्त्यर्थहेतुत्वविशेष्यकबोधजनकत्वात् तद्दोषतादवस्थ्यवारणाय मुख्यविशेष्यकेति, उदासीनवाक्येऽतिव्याप्तिवारणाय विशेष्यदलं। न च वह्निर्धूमात् वह्नित्वेन प्रमीयमाणत्वादित्यादौ तस्मात् धूमादिति निगमनेऽतिव्याप्तिः तस्यापि विभक्त्यर्थज्ञानज्ञाप्यत्वरूपहेतुत्व-मुख्यविशेष्यकान्वयबोधजनकत्वादिति वाच्यम्। कथकसम्प्रदायविरोधेन वह्निर्धूमादित्यस्य प्रतिज्ञात्वाभावात् तादृशपञ्चकस्य न्यायत्वाभावेन विशेष्यदलेनैव तद्वारणात्।

ननु हेतुत्वं प्रमेयमित्यादिप्रतिज्ञायामतिव्याप्तिर्दुर्वारा हेतुत्वपदोपस्थाप्य-ज्ञानज्ञाप्यत्वस्य विभक्त्यर्थज्ञानज्ञाप्यत्वाभिन्नत्वात्। न च विभक्तिजन्योपस्थिति-सहकारेणैव हेतुत्वविशेष्यकशाब्दबोधजनकत्वं वाच्यमिति न दोषः तस्य हेतुत्वपदजन्योपस्थितिसहकारेणैव तादृशबोधजनकत्वादिति वाच्यं। तथापि तस्माद्धेतुत्वमिति निगमनेऽतिव्याप्तिः पञ्चमीजन्योपस्थितिसहकारेणैव

तद्गर्भो न्याय एव नास्तीति न तत्रातिव्याप्तिशङ्कापीति। न च घटे जातावित्यादौ घटवृत्तित्वं जातिवृत्ति इत्याकारकान्वयबोधानुत्पत्त्या सुबर्थयोर्मिथोऽन्वयबोध एवाऽव्युत्पन्न इति तत्र मुख्यविशेष्यतानुसरणमफलमिति वाच्यम्। क्रमाच्चैत्रस्येदमित्यादा- विदमंशे विशेषणतापन्नस्य षष्ठ्यर्थस्वत्वस्य पञ्चम्यर्थजन्यतायां विशेष्यत्वेन सामान्यतन्तदन्वयस्यानिराकाङ्क्षितत्वादिति ध्येयम्। एकजातीयसुपोर्मिथो निराकाङ्क्षत्वात् क्रमाच्चैत्रस्येदमित्यादौ पञ्चमी-षष्ठयोर्मिथः साकाङ्क्षत्वेऽपि न क्षतिरिति वदन्ति। इति जागदीशी व्याख्या।

"यद्यत् पापं प्रतिजही जगन्नाथ नम्रस्य तन्म" इत्यत्र। इदञ्च साध्यसाधनोभयाश्रयविकलानुपदर्शितान्वयविपरीतोपदर्शितान्वयानु-

हेतुत्वविशेष्यकशाब्दबोधजनकत्वात्। न च हेतुत्वमुख्यविशेष्यकत्वांशे विभक्तिजन्योपस्थितेः सहकारित्वं वाच्यम् इति न दोषः तत्र हेतुत्वमुख्यविशेष्यकत्वांशे हेतुत्वपदजन्योपस्थितेरेव सहकारित्वादिति वाच्यं। मुख्यविशेष्यकत्वस्य कार्य्यतानवच्छेदकतया तदंशे सहकारित्वस्य दुर्व्वचत्वात् इत्यतो लक्षणान्तरमाह, 'उदाहरणेति'[१५] उदाहरणस्य प्रयोजिका या आकाङ्क्षा कुतोऽस्य गमकत्वमित्याकारिका जिज्ञासा तज्जनकं यच्छाब्दज्ञानं तज्जनकत्वे सति न्यायावयवत्वमित्यर्थः। इतरावयवानां तादृशाकाङ्क्षाप्रयोजकत्वा-भावान्नातिव्याप्तिः, अत्र जनकत्वं स्वरूपयोग्यत्वम् अतो यत्र तादृशजिज्ञासा न जाता तत्र नाव्याप्तिः इत्थञ्च उदासीनवाक्येऽतिव्याप्तिरित्यतो विशेष्यदलम्। न च न्यायान्तर्गतत्वे सतीति सम्यगिति वाच्यम्। हेत्वेकदेशेऽतिव्याप्तिरिति तदुपादानम्। ननु यत्पक्षक-यत्साध्यक-यद्धेतुकन्यायस्थले कदापि तादृशाकाङ्क्षा न जाता तत्र तत्स्वरूपयोग्यत्वे मानाभाव इत्यतो लक्षणान्तरमाह, 'साध्याविषयकेति'[१६] साध्याविषयकज्ञानजनकत्वे सति हेतुपञ्चम्यन्तत्वे सति

---

१५. 'उदाहरणेति उदाहरणस्य प्रकृतहेतुक-प्रकृतसाध्यसिद्ध्योप-यिकव्याप्तिधीजनकवाक्यस्य प्रयोजिका तज्जन्यबोधनिवृत्तये कथमस्य गमकत्वमित्याकाङ्क्षा तज्जनकं तज्जनकावयवत्वमित्यर्थः, अत्र जनकत्वं स्वरूपयोग्यत्वं तेनासाधकतानुमानस्थलीयन्याये उदाहरणसत्त्वेऽपि न क्षतिरिति स्वरूपयोग्यतावच्छेदकरूपस्य हेतुत्वस्य तत्रापि सत्त्वादिति, अनुक्तोप-नयादिकस्य उदाहरणस्य प्रयोजकहेतुवाक्येऽतिव्याप्तिवारणार्थमवयवेति। इति जागदीशी व्याख्या।

१६. 'साध्येत्यादि घटो न धूमादेस्तत्त्वादित्यादौ धूमहेतुताकत्वाद्यभाव-साध्यके प्रतिज्ञानिगमनयोर्व्वारणाय 'जनकान्तं हेतुत्वधर्मिकप्रकृत-हेतुविषयताबहिर्भावेन यत्साध्यविषयकं तदन्यज्ञानजनकार्थकं, तेनायं वह्निमान् वह्निसामग्रीमत्त्वादित्यादिस्थलीयहेतौ नाव्याप्तिः, वस्तुतः प्रकृतलिङ्गकहेत्व-वयवानां वस्तुगत्या यादृश-यादृशविषयताकबोधजनकत्वं तादृश-तादृशविषयता-बहिर्भावेनैव साध्यविषयकत्वं वाच्यं। तेनायं एको धूमादित्यादौ

पदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकभेदादाभासरूपमिति।

उदाहरणानन्तरम्भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्त्तते

न्यायावयवत्वमित्यर्थः। अयं न दण्डाद्दण्डसंयोगाजन्यद्रव्यत्वादित्यादौ प्रतिज्ञा-निगमनयोर्हेतुपञ्चम्यन्तत्वात् अनुमितिपरवाक्यत्वाच्च तत्रातिव्याप्ति-वारणाय 'साध्याविषयकेति। न चैवं वह्निमान् वह्निसामग्रीत इत्यादौ अव्याप्तिः तत्र साध्यविषयकज्ञानस्यैव जननादिति वाच्यम्। 'साध्यविषयकपदेन हेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयतावह्निर्भावेन या विषयता तेन सम्बन्धेन साध्यवद्भिन्नत्वस्य विवक्षितत्वात्, ह्रदो निर्धूमो निर्व्वह्नित्वादित्यत्र साध्याविषयकज्ञानजनकत्वेन धूमव्यापकीभूताभावप्रतियोगिवह्न्यभाववा-नयमित्युपनयेऽतिव्याप्तिवारणाय हेतुपञ्चम्यन्तेति हेतुत्वबोधकपञ्चम्यन्तेत्यर्थः, तथा च तस्यायम्पदान्तत्वेन 'हेतुपञ्चम्यन्तत्वाभावान्नातिव्याप्तिः। न चोक्तोपनयेऽतिव्याप्तिवारणाय हेतुत्वबोधकान्तत्वं पञ्चम्यन्तत्वं वा उपादीयतां कृतं विशिष्टोपादानेनेति वाच्यम्। साध्याविषयकज्ञानजनकहेतुत्वबोधकान्ता-नुमितिपरवाक्यत्वं साध्याविषयकज्ञानजनकपञ्चम्यन्तानुमितिपरवाक्यत्वं वा हेतुत्वमिति लक्षणद्वये तात्पर्य्यात्।

ननु पर्वतस्तेजस्त्वाभाववान् पृथिवीत्वादित्यादौ योयस्तेजस्त्ववान् स पृथिवीत्वाभाववान् यथा वह्निर्धूमादिति धूमज्ञानज्ञाप्यवह्निरूपदृष्टान्त-शालिव्यतिरेक्युदाहरणेऽतिव्याप्तिः तस्य साध्याविषयकज्ञानजनकत्वात्

साध्यीभूतैकत्वविशिष्टधूमस्य ज्ञापकत्वबोधकहेत्ववयवे नाव्याप्तिः, ह्रदो निर्धूमो निर्व्वह्नित्वादित्यादौ धूमव्यापकवह्न्याभाव- वांश्चायमित्यादिव्यतिरेक्यु-पनयस्य वारणाय 'हेतुपञ्चम्यन्तेति 'हेत्विति, सम्पातायातं, हेतुसामानापूर्वीकस्य उदासीनवाक्यस्य वारणाय 'अनुमितिपरेत्यादि न्यायावयवत्वार्थकम्। न चायं न गुरुत्वहेतुताकोऽरसवत्त्वादित्यादौ यो यो गुरुत्वात्स रसवत्त्वादित्यादि-व्यतिरेक्युदाहरणेऽतिव्याप्तिस्तस्यापि साध्याविषयकत्वे सति पञ्चम्यन्तावयव-त्वादिति वाच्यम्। उदाहरणान्यत्वेनापि विशेषणीयत्वादिति भावः। इति जागदीशी व्याख्या।

न वेत्याकाङ्क्षायां भवतु व्याप्तस्य पक्षधर्म्मत्वप्रदर्शनायोपनयः, तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपन-

पञ्चम्यन्तानुमितिपरवाक्यत्वाच्च इत्यतो लक्षणान्तरमाह[१७] 'प्रतिज्ञावाक्येति

१७. 'प्रतिज्ञावाक्यधीजन्येत्यादि पक्षधर्मिक-साध्यवत्ताबोधकवाक्य- जन्या स्वार्थधीद्वारा प्रयोज्या या कारणस्य ज्ञापकस्याकाङ्क्षा पक्षः कुतः साध्यवान् इत्याकारिका जिज्ञासा तन्निवर्त्तकज्ञानस्य जनकत्वे सति हेतुविभक्तिमदव-यवत्वमित्यर्थः, प्रतिज्ञादिवारणाय सत्यन्तम्, अयं तस्मात् वह्निमान् इत्यादिनिगमनस्यापि पक्षः कुतः साध्यवानित्याकारक- जिज्ञासानिवर्त्तक-ज्ञानजनकत्वसम्भवात्तत्रातिव्याप्तेर्वारणाय 'हेतुविभक्तिमदिति, 'हेतोः' अबाधितत्वादिधीहेतोः। या 'विभक्तिः' विभागः पार्थक्यं तद्वन्निगमना-न्यत्ववदिति तु फलितार्थः, न्यायवहिर्भूतस्य हेतुसमानार्थकस्य धूमादित्यादेर्वारणाय 'अवयवेति, 'पञ्चम्यन्तेत्यादिपञ्चमी अन्ते यस्य तादृशं यल्लाक्षणिकं पदं तद्गर्भावयवमित्यर्थः, धूमेनालोकवानयं वह्निमान् धूमादित्यादौ प्रतिज्ञावारणाय 'पञ्चम्यन्तेति, अयं दण्डाज्जातो घटत्वादित्यादौ प्रतिज्ञावारणाय 'लाक्षणिकेति। यद्यप्येवमपि धूमादालोकवानयं वह्निमानित्यादिप्रतिज्ञायां अतिव्याप्तिः प्रकृतसाध्यधर्मिकस्वार्थबोधकत्वेन पञ्चम्या विशेषणीयत्वेऽपि। धूमाद् वह्निमतः सधर्मायं वह्निमानित्यादिप्रतिज्ञायां तथा, तथापि प्रकृतपक्षधर्मिकस्वार्थविशिष्ट-प्रकृतसाध्यवत्त्वान्वयबोधजनकत्वेन पञ्चमी विवक्षितेति नायं दोषः। यद्यपि चैवमप्ययं तस्माद्वह्निमानित्यादिनिगमनेऽतिव्याप्तिः ज्ञानत्वादिप्रकारेण ज्ञानशक्तस्यापि सर्वनाम्नास्तच्छब्दस्य व्याप्त्यादिविशिष्टधूमत्वप्रकारेण बोधने लाक्षणिकत्वात् लघु-गुरुरूपाभ्यामन्वयबोधकस्य पदमात्रस्यैव गुरुरूपेण लक्षणायाः सर्वसम्मतत्वात्। तथापि लाक्षणिकेत्यस्य प्रकृतहेतुविषयकज्ञानत्वाव-च्छिन्नलाक्षणिकपरत्वान्नोक्तदोषः तत्र व्याप्त्यादिविशिष्टप्रकृतहेतुगोचरज्ञानत्वेनैव तच्छब्दस्य लक्षकत्वादिति। न चायं गुरुः पतनादित्यादौ हेतावव्याप्तिस्तत्र पञ्चम्यन्तस्य पतनादिशब्दस्य शक्तिविरहेण पतनज्ञानत्वावच्छिन्नलक्षकत्वा-सम्भवादिति वाच्यम्। पञ्चम्यन्ते त्यस्य पञ्चमीसाकाङ्क्षपरत्वेन तत्रापि पञ्चमीसाकाङ्क्षस्य ल्युडन्तपतधातोः पतनज्ञानलक्षकत्वसम्भवादिति ध्येयम्।

ननु धूमादित्यादिहेत्ववयवस्य धूमनिष्ठं ज्ञापकत्वमित्यन्वयबोधकतायां

यत्वमिति सामान्यलक्षणं, साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधका-

---

प्रतिज्ञावाक्यार्थज्ञानजन्या या कारणाकाङ्क्षा कुत इति प्रश्नोन्नेयकारणजिज्ञासा तन्निवर्त्तकज्ञानजनकत्वे सति हेतुविभक्तिमन्न्यायावयवत्वमित्यर्थः, अयं न दण्डादित्यादिप्रतिज्ञावारणाय सत्यन्तं, तस्माद्वह्निमानिति निगमनेऽतिव्याप्तिवारणाय 'हेतुविभक्तिमदिति हेतुत्वप्रतिपादकविभक्त्यन्तार्थकं, हेतुत्वं प्रमेयमित्यादौ तस्मात्प्रमेयमिदमिति निगमने हेतुत्वप्रतिपादकेदम्पदान्तकेऽतिव्याप्तिवारणाय 'विभक्तीति।

पञ्चम्यन्तधूमादित्यादिपदस्य लाक्षणिकत्वाभावात् अव्याप्तिरत आह, 'हेतुपदेनेति हेतुभूतधूमादिवाचकपदेन धूमज्ञानादिलक्षणादित्यर्थः। अत्र हेतुमाह, 'अन्यथेति लक्षणां विनेत्यर्थः, 'अहेतुत्वेन' साध्याज्ञापकत्वेन। ननु प्रकृत्यर्थे स्वार्थसङ्ख्याबोधकतयैव हेतुविभक्त्यर्थान्वयो भविता इत्यत आह, 'तथैवेति पञ्चम्या ज्ञापकत्वबोधकतायामेव कुतो वह्निमानित्याकाङ्क्षानिवृत्तेरित्यर्थः।

प्राञ्चस्तु लिङ्गस्यानुमापकत्वमतेऽप्याह 'तथैवेति धूमादिपदस्य धूमादिज्ञाने लक्षणायामेवेत्यर्थः, अन्यथा पक्षः किं गोचरज्ञाननिष्ठज्ञापकताकवह्निमानिति प्रश्नस्य धूमनिष्ठज्ञापकताकवह्निबोधानिवर्त्त्यत्वेन धूमादित्यस्य तत्रोत्तरत्वानुपपत्तेरिति प्राहुः। ननु तत्र पञ्चम्या ज्ञाप्यत्वमर्थो बोध्यः अत आह 'तथैवेति निरुक्तहेत्वन्वयबोधेनैवेत्यर्थः, 'आकाङ्क्षानिवृत्तेः' कुत इति जिज्ञासाया अनुत्पत्तेः तथाच निरुक्तहेतुत्वमेव पञ्चम्यर्थ इति भाव इत्यन्ये।

अत्रेदं बोध्यं धूमपदं धूमज्ञानपरं, वह्निपदे ज्ञानविषयवह्नौ लक्षणा, वह्निज्ञाने वा सा, पञ्चम्या हेतुत्वमयर्थः, धूमज्ञानहेतुकज्ञानविषयवह्निमान् पर्वतः धूमज्ञानहेतुकवह्निज्ञानविषयाभिन्नः पर्वत इति वा बोध इति कश्चित्, तन्न 'आवृत्तौ सैवेति मूलविरोधात्।

अन्ये तु धूमपदं धूमज्ञानलाक्षणिकं, पञ्चम्या ज्ञानजनकत्वं, जन्यज्ञानविषयत्वं वार्थः धूमज्ञाननिष्ठज्ञानजनकत्वनिरूपकवह्निमदभिन्नः पर्वतः धूमज्ञानजन्यज्ञानविषयवह्निमदभिन्नः पर्वत इति वा बोधः।

परे तु पञ्चम्या ज्ञानजन्यज्ञानविषयत्वमर्थः, धूमपदं यथाश्रुतमेव, बोधस्तु पूर्व्ववदित्याहुः इति जागदीशी व्याख्या।

वयवत्वञ्च विशेषलक्षणद्वयम्, उदाहरणान्त एव प्रयोग इति न वाच्यं तृतीयलिङ्गपरामर्शस्य व्याप्तिपक्षधर्म्मताव-

लक्षणान्तरमाह,[१८] 'पञ्चम्यन्तेति पञ्चम्यन्तं यल्लाक्षणिकपदं तद्वत्त्वे सति न्यायावयवत्वमर्थः, लाघवेन पञ्चम्या विभागत्वस्यैव शक्यतावच्छेदकतया यत्र पञ्चम्या ज्ञानज्ञाप्यत्वादिबोधः तत्र लक्षणैवेति तस्माद्वह्निमानित्यादिनिगमने लाक्षणिकपञ्चमीपदवति न्यायावयवेऽतिव्याप्तिवारणाय 'पञ्चम्यन्तेति, तथाच पञ्चम्यन्ततत्पदस्य लाक्षणिकत्वाभावान्नातिव्याप्तिरिति भावः। तस्माद्वह्निमानिति निगमनस्यापि पञ्चम्यन्ततत्पदवत्त्वात् तद्दोषतादवस्थ्यवारणाय 'लाक्षणिकेति, उदासीनवाक्येऽतिव्याप्तिवारणाय विशेष्यदलं, लक्ष्ये लक्षणं सङ्गमयति, 'हेतुपदेनेति हेतूपस्थापकधूमादिति पदेनेत्यर्थः, 'ज्ञाने लक्षणा' हेतुज्ञाने लक्षणा, पञ्चम्या ज्ञानविषयत्वरूपं ज्ञाप्यत्वमर्थः, तदेकदेशज्ञाने हेतुज्ञानस्य जन्यतासम्बन्धेनान्वयः, तथाच धूमादिति हेतुवाक्यात् धूमज्ञानजन्य-ज्ञानविषयत्वमित्याकारकः शाब्दबोधः। ननु धूमपदे कथं धूमज्ञाने लक्षणा धूमस्यैव जन्यतासम्बन्धेन ज्ञानेऽन्वयः स्यादित्यत आह, 'अन्यथेति हेतुपदे हेतुज्ञाने लक्षणानङ्गीकारे, 'विभक्त्यर्थानन्वयादिति पञ्चमीविभक्त्यर्थे हेतोरनन्वयापत्तेरित्यर्थः, अनन्वये हेतुमाह, 'लिङ्गस्याहेतुत्वेनेति साध्यज्ञाने लिङ्गस्याहेतुत्वेनेत्यर्थः, लिङ्गज्ञानस्यैवानुमितिहेतुत्वादिति भावः। ननु लिङ्गोपहितलैङ्गिकभानादिमते लिङ्गस्याप्यनुमितिविषयतया विषयतासम्बन्धेन हेतोरन्वयोऽस्तु पञ्चम्यर्थैकदेशे ज्ञाने इति किं लक्षणयेत्यत आह, 'तथैवेति जन्यतासम्बन्धेन धूमज्ञानस्य ज्ञानेऽन्वयेनैवेत्यर्थः, 'आकाङ्क्षानिवृत्तेरिति कारणाकाङ्क्षानिवृत्तेरित्यर्थः। वह्निज्ञाने धूमज्ञानजन्यत्वसिद्धौ जायमानायां धूमज्ञानेऽपि तुल्यवित्तिवेद्यतया वह्निज्ञानजनकत्वसिद्धेरिति भावः। ननु एतल्लक्षणं धूमादालोकवान् पर्व्वतो वह्निमानित्यादिप्रतिज्ञायामतिव्याप्तं तस्यापि

---

१८. ननु तथापि अयं न दण्डादित्यादौ तस्मान्न दण्डादिति निगमने अतिव्याप्तिस्तस्य तादृशजिज्ञासानिवर्त्तकज्ञानजनकत्वात् हेतुत्वप्रतिपादक-विभक्त्यन्तत्वाच्चातो लक्षणान्तरमाहेत्यधिकः पाठः घ-चिह्नितपुस्तके वर्त्तत इति।

१९. विभक्त्यर्थानन्वयात् इति पा.।

गाहिनोऽवयवान्तरादलाभात् तदनभ्युपगमेऽपि पक्षधर्म्मताया अलाभात्। न च हेतुवचनादेव तदवगमः, तस्य को

पञ्चम्यन्तलाक्षणिकधूमपदवत्त्वादिति चेत्। न। प्रकृतपक्षविशेष्यक-प्रकृतसाध्यप्रकारकान्वयबोधजनकाकाङ्क्षा-तात्पर्य्यादिमत् यत् प्रकृतसाध्यता-त्पर्य्यकं पदं तदाकाङ्क्षादि-तात्पर्य्यादिमती या पञ्चमी तदन्तलाक्षणिक-पदवत्त्वस्य विवक्षितत्वात् तथाच धूमादालोकवान् पर्व्वतोवह्निमानित्यादिप्रतिज्ञायां नातिव्याप्तिः तत्रत्यपञ्चम्याः प्रकृतसाध्यतात्पर्य्यकं यद्वह्निपदं तदाकाङ्क्षाद्यभावात् एवं धूमाद्वह्निमतः सधर्म्मा पर्व्वतो वह्निमान् धूमादित्यादौ नातिव्याप्तिः तत्र तादृशविशिष्टपक्षविशेष्यकसाध्यप्रकारकान्वयबोधजनकाकाङ्क्षादिमत् यत्प्रकृतसाध्यतात्पर्य्यकं पदं चरमवह्निपदं तदाकाङ्क्षादिमत्त्वस्य पञ्चम्या अभावादिति भावः।

'अनुमितीत्यादि, उदाहरणादिप्रयोज्यजातेर्व्वारणाय वृत्त्यन्तं जातिविशेषणं, परार्थानुमितिहेतुभूतं यच्छाब्दज्ञानं तत्कारणीभूतस्य धूमवत्त्वादिति शब्दस्य जन्यज्ञाने वर्त्तमानेति तदर्थः, न्यायजन्यज्ञानविधुरस्य चैत्रादिशरीरविशेषस्य प्रयोज्याया धूमवत्त्वादित्यादिशाब्दधीवृत्तिजातेर्व्वारणाय 'कारणान्तं, अवयवजन्यस्यैव शाब्दस्य परार्थस्थलीयानुमितिहेतुत्वान्नातिव्याप्तिरित्यभिमानः। सत्ता-शाब्दत्वादेर्व्वारणाय 'प्रतिज्ञादिजन्यज्ञानावृत्तीति प्रतिज्ञोदाहरणादेरेकैकमात्रं निवेश्यं न तु समुदायोवैयर्थ्यात्। वस्तुतस्तु एतद्व्यक्तिसमवेततद्व्यक्त्य-समवेतधर्म्मवत्त्वमर्थः, तद्व्यक्तेरेतद्व्यक्तेश्च लाभाय वृत्त्यवृत्त्यन्तद्वयमिति, एतेन प्रतिज्ञात्वादिप्रवेशे प्रतिज्ञात्वस्याप्येतन्मते हेतुत्वघटितत्वापत्त्या आत्माश्रयापत्तिरिति दूषणं निरस्तं, मतं दूषयति, 'जातिं विनेति हेतुजन्यबुद्धौ वैजात्यं विना केन रूपेण परार्थानुमितिजनकत्वमित्यर्थः, तथाच कारणान्तदलमव्यावर्त्तकमेवेति भावः। ननु कारणान्तं प्रकृतन्यायावयवार्थकं धूमवत्त्वादित्यादिशब्दान्वयि तथाच धूमवत्त्वादित्यानुपूर्व्वीकावयवजन्य-ज्ञानवृत्तीत्येव जातेर्विशेषणं वाच्यम् न तु कारणान्तगभम् अत आह, 'वाक्यविशेषजन्यत्वस्यापीति धूमवत्त्वादित्यानुपूर्व्वीकावयवजन्यत्वस्यापीत्यर्थः, तथाच कत्वादिना साङ्कर्य्येण तादृशवाक्यवृत्तिजात्यभावेन तदवच्छिन्नजनकता-निरूपितजन्यतावच्छेदकजातावपि मानाभावेन लक्षणस्यासम्भव इति भावः।

हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात्, वादिवाक्यादेवाक्षेप इति चेत्। न तदर्थस्यासिद्धत्वेनाऽ-

---

हेतुत्वस्यान्वयि-व्यतिरेक्यन्वयव्यतिरेकिभेदेन त्रैविध्यात् तदनुक्तौ न्यूनत्वमत आह, 'अन्वयेत्यादि, व्यतिरेकिहेतोर्वारणाय 'जनकान्तं प्रकृतहेतुधर्म्मिकसाध्यान्वयव्याप्त्यभिधायकवाक्यप्रयोजकशाब्दधीप्रयोजकार्थकं, उपनयप्रयोजकज्ञानजनके उदाहरणे प्रतिज्ञायाञ्चातिव्याप्तिवारणाय उदाहरणान्तमात्रस्याभिधानस्थले हेतोरलक्ष्यत्वात्तद्वारणाय च 'हेतुत्वप्रतिपादकेत्यादि स्वार्थहेतुत्वमुख्यविशेष्यकान्वयबोधजनकविभक्ति-मन्नायावयवत्वमित्यर्थः, 'अन्वयितहेतुत्वमिति अन्वयिहेत्ववयवत्वमित्यर्थः। 'एतदेव' स्वार्थेत्याद्यवयवत्वमेव, 'तथाभूतावयवत्वं' निरुक्तहेत्ववयवत्वं, तावन्मात्रञ्च केवलान्वयिनः केवलव्यतिरेकिणश्च हेतोर्गतमतः 'प्रयोजकान्तं प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौपयिकान्वय-व्यतिरेकोभयव्याप्त्यभिधाननिवर्त्याकाङ्क्षा-कारणीभूतज्ञानजनकार्थकं, तथेत्यादिपदव्यावृत्तिः पूर्व्ववत्।

ननु कथमस्य गमकत्वमित्याकाङ्क्षायाम् एकव्याप्त्यभिधानेनैव निरस्तत्वात् व्याप्त्यन्तराभिधानस्यार्थान्तरग्रस्तत्वमतो नोक्तक्रमेणान्वयव्यतिरेकिहेतोर्लक्षणं युक्तमत आह, 'यद्वेति। सद्धेतोरेव लक्ष्यत्वमित्यभिप्रायेणाह, 'यद्वेतीत्यन्ये। 'हेतुवचनं' प्रकृतहेतुत्वप्रतिपादकोऽवयवः, तथाच पक्षे सपक्षे च सतो विपक्षेऽसतोऽर्थस्य हेतुत्वप्रतिपादकोऽवयवः, अन्वयव्यतिरेकीत्यर्थः, अत्र च सपक्षसत्त्वं निश्चितसाध्यवद्वृत्तित्वं, तेन पृथिवीतरेभ्योभिद्यते पृथिवीत्वादित्यादौ केवलव्यतिरेकिहेतौ नातिव्याप्तिः, पक्षमत्त्वन्तु पर्वतो वह्निमान् महानसत्वादित्यादौ स्वरूपासिद्धस्य हेतोर्व्युदासार्थं, सद्धेतोरेव लक्ष्यत्वादिति ध्येयं। नन्वेवं वह्निसाध्यकधूमादिहेतोरन्वयव्यतिरेकित्वे तत्र प्रागुक्तकेवलान्वयिहेतुलक्षणस्यातिव्याप्तिरतस्तस्य लक्षणान्तरमाह, 'अत्यन्तेति वृत्तिमदत्यन्ताभावाप्रतियोगिनः साध्यस्य समानाधिकरणो यः पक्षसपक्षयोः सन् हेतुस्तस्य 'वचनं' हेतुत्वप्रतिपादकोऽवयवः केवलान्वयीत्यर्थः, अत्र पक्षसत्त्वस्य व्यावृत्तिः प्रागिव स्वरूपासिद्धहेतोर्वारणं, सपक्षसत्त्वन्तु सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्य पक्षतादशायां प्राचीनसम्मतस्यानुपसंहारिहेतोर्वारणायेति ध्येयम्। इदमुपलक्षणं पक्षसतः सपक्षासतः पक्षमात्रसतो वा विपक्षामतश्च

नाक्षेपकत्वात् अन्यथा प्रतिज्ञावाक्यादेव सर्व्वापेक्षेऽवयवान्तर-विलयात्। प्रतिपाद्यानां स्वत एव तदवगम इति चेत्, न, तेषां

हेतोर्वचनं केवलव्यतिरेकीति द्रष्टव्यं।

दशाविशेषे वह्न्यादिसाध्यके धूमादिहेतावप्यन्वयित्वं स्वीकुर्वतामाचार्य्याणां मतेनाह, 'यद्वेति, 'अनुमितीत्यादि, अत्रोदासीनस्य धूमादित्यादिवाक्यस्य वारणार्थमाद्यं कारणान्तं, प्रागुक्तरीत्या प्रकृतपक्षकप्रकृतहेतुकप्रकृतसाध्य-कन्यायावयवार्थकं, धूमाद्वह्निमतः सधर्म्मायं वह्निमान् धूमादित्यादौ प्रतिज्ञादेर्निगमनस्य च वारणाय द्वितीयं कारणान्तं, प्रकृतहेतुविशिष्टहेतुत्व-विषयतावहिर्भावेण यत् साध्यविषयकं तदन्यशाब्दधीकारणमिति तदर्थः, तेनायं वह्निमान् वह्निसामग्रीमत्त्वादयं हेतुतावान् तत्त्वेन प्रमीयमानत्वादित्याद्य-न्वयिहेतौ नाव्याप्तिः, अयं न धूमाद्वह्निशून्यो धूमात् यो यो धूमाद्वह्निशून्यः स धूमशून्य इत्यादावप्रतीतसाध्यान्वय-व्यतिरेकिहेतोर्वारणाय 'प्रतीतसाध्यान्वये-त्यादिप्रतीतः साध्यान्वयोऽन्वयसहचारमात्रं यत्र तादृशं यत्साधनं तद्वाचकशब्दाद्या हेतुविभक्तिः पक्षधर्म्मिकस्वार्थविशिष्टसाध्यवत्त्वबोधस्य हेतुभूता या विभक्तिस्तद्वत्त्वमित्यर्थः, 'प्रतीतान्वयसाध्य-साधनेति पाठेऽपि साध्यपदस्य व्यत्यासेन उक्त एवार्थः।

केचित्तु वह्निसामग्रीमत्त्वादित्यादिहेतुसंग्रहाय 'साध्याविषयकेति साध्यविषयकत्वनियतावयवतावच्छेदकरूपशून्यार्थकं, तथाच उदाहरणत्वा-वच्छिन्नस्यापि तथात्वादन्यय्दुदाहरणवारणाय 'हेतुविभक्तीति प्रागुक्तहेतुत्वार्थ-कमित्याहुः।

'अप्रतीतेत्यादि, इदमुपलक्षणम् एतदेव प्रतीतसाध्य-तदभाव-सहचारकेति।[२०] विशेषणादन्वय-व्यतिरेकिहेतुलक्षणमित्यपि बोध्यं। ननु प्रतिज्ञादित्र्यवयववादिनां मीमांसकानां मते धूमहेतुस्थले तस्य पक्षधर्म्मताप्रतिपत्त्यर्थं धूमवत्त्वादिति कथञ्चिन्मतुपोऽस्तु प्रयोजनं पञ्चावयववादिनान्तु तार्किकाणां उपनयादेव हेतोः पक्षधर्म्मताप्रतिपत्तिसम्भवान्मतुपोव्यर्थत्वमित्यत्र इष्टापत्तिमाह, 'कथायामिति, एतेन धूमसम्बन्धपर्य्यवसन्नत्वेन तस्य धूमवत्त्वस्य हेतुतायां

---

२०. प्रतीतोभयसहचारकेतीति घ।

व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात् प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च अन्यथावयवान्तरेऽप्येवं प्रसङ्गादिति।

न वैयर्थ्यं धूमत्वस्य धूमसम्बन्धावृत्तित्वेन तन्निष्ठव्याप्त्यवच्छेदकत्वासम्भवात् अन्यथा धूमप्रागभावस्यापि हेतुता न स्यादिति दूषणं प्रत्युक्तम्।

नन्वेकविभक्त्यर्थान्वितसामान्यवत्त्वे[२१] विभक्त्यन्तरार्थहेतुत्वान्वये आकाङ्क्षाविरहात् कथं विशिष्टहेतौ हेतुत्वान्वय इत्याशङ्कते, 'केचित्त्वित्यादि, 'सामान्यवत्त्व इत्यस्य शब्दानित्यत्वे साध्ये इत्यादिः, 'अपार्थकम्' अनन्वितं',[२२] तथा च निश्चितानन्वयरूपापार्थकत्वमेव तस्य न त्वन्वयाबोधकत्वमित्यर्थः, विरुद्धविभक्त्यर्थाविरुद्धे विभक्त्यन्तरार्थान्वयबोधास्वीकारात् प्रकृते सप्तम्यर्थसामानाधिकरण्यविशिष्टहेतौ हेतुत्वान्वये बाधकाभाव इत्याशयेन समाधत्ते, 'सतीति सति पदसमभिव्याहृतसप्तमीबलादित्यर्थः, 'विशिष्ट इति सामान्यवत्त्वविशिष्टवाह्यकरणकप्रत्यक्षत्व इत्यर्थः, लिङ्गस्य हेतुतामतेनेदं, अन्यथा तु लक्षणयोपस्थिते तादृशप्रत्यक्षत्वस्य ज्ञाने हेतुत्वान्वयो द्रष्टव्यः। ननु सति सप्तम्याः सामानाधिकरण्यवाचित्वे घटे जातिमत्त्वमित्यतोऽपि घटविशिष्टजातिमत्त्वं प्रतीयेत इत्यत आह, 'तथैव व्युत्पत्तेरिति सतिपदसमभिव्याहारेणैव सप्तम्याः सामानाधिकरण्ये व्युत्पन्नत्वादित्यर्थः, 'अयं' सामानाधिकरण्यरूपः, 'अस्मात्' सप्तम्याः सतिपदसमभिव्याहारात्।

ननु व्याप्तेरिव पक्षधर्म्मताया अपि गमकतौपयिकत्वात् तत्प्रदर्शनाय हेतूत्तरमुपनय एव कथं नोपन्यस्यते इत्यत आह, 'कथमस्येति, 'अस्य' धूमादेः, 'गमकत्वं' गमकतावच्छेदकत्वं, लिङ्गस्य हेतुतामते तु यथाश्रुतमेव न्यायः। 'अस्य' लिङ्गज्ञानस्येत्यर्थः, इति कश्चित्। 'प्राथम्यादिति परामर्शार्थं प्रथमोपस्थाप्यत्वादित्यर्थः, परामर्शेर्व्याप्तेर्विशेषणतावच्छेदकतया पूर्वोपस्थिति-नियमः पक्षधर्म्मतायास्तु वैशिष्ट्यरूपतया न विशेषणतावच्छेदकत्वमिति न तदुपस्थितिः प्रागपेक्षणीयेत्यभिप्रायः।

---

२१. नन्वेवं विभक्त्यर्थावरुद्धे सामान्यवत्त्व इति घ०।

२२. अनुचितमिति घ०।

उपनयानन्तरं निगमनं तच्चानुमितिहेतुलिङ्गपरामर्श-प्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं

यत्तु 'प्राथम्यादिति प्रथमाकाङ्क्षाविषयत्वादित्यर्थः, प्रतीतव्याप्तिको हेतुः पक्षे वर्त्तते न वेत्याकाङ्क्षादर्शनादिति व्याख्यानं, तन्न सम्यक्, युक्त्यनभिधाने व्याप्त्याकाङ्क्षायाः प्राथम्ये मानाभावात्। वस्तुतः 'कथमस्य गमकत्वमित्या-काङ्क्षायाः किं प्रकारावच्छिन्नस्य गमकत्वमित्यर्थः, इति तादृशाकाङ्क्षायां प्रथमतः पक्षधर्मताप्रदर्शनस्य प्रसक्तिरेव नास्तीति ध्येयम्। 'तत्प्रदर्शनायेति व्याप्तिप्रदर्शनायेत्यर्थः, यद्यपि उदाहरणस्य न व्याप्तिः पदार्थो न वा वाक्यार्थः, तथापि उदाहरणाद्व्याप्तिग्राहकसहचारज्ञाने जाते व्याप्ति गग्रहो मानसो भवतीति व्याप्तितात्पर्य्यकत्वरूपव्याप्तिप्रदर्शकत्व।

यद्वा वीप्साया व्याप्तिबोधकत्वादेव व्याप्तिप्रदर्शकत्वमित्यवगन्तव्यं, वीप्सया व्यापकत्वं बोध्यते, तथाच स्वव्यापकीभूतसाध्यावच्छिन्नस्यैव हेतोः पक्षधर्म्मताज्ञानं अनुमितिहेतुरित्याशयेनेदं, व्याप्तिपदस्य व्यापकत्वपरत्वादित्यपि वदन्ति।[२३]

'अनुमितीत्यादि, उदाहरणसदृशोदासीनवाक्यवारणाय 'जनकान्तं प्रागुक्तरीत्या प्रकृतन्यायावयवार्थकं, हेत्वादिवारणाय 'व्याप्यत्वाभिमतेत्यादि, व्याप्यत्वाभिमतवद्धर्म्मिको यः 'नियतः' प्रतिनियतः प्रकृतपक्षे प्रकृतसाध्यवत्त्वाविषयकोव्यापकत्वाभिमतस्य सम्बन्धबोधस्तज्जनकत्वं, अभिमतान्तद्द्वयञ्चात्र धर्मद्वयोपलक्षकं, तथाच प्रकृतपक्षे प्रकृतसाध्यवत्त्वा-विषयको य एकपदार्थवद्धर्मिकस्तद्व्यापकत्वविशिष्टापरपदार्थवत्त्वबोध-स्तज्जनकत्वमिति तु फलितार्थः। एतेन यथाश्रुतलक्षणमिदं उपनयेऽतिव्याप्तमिति निरस्तम्। न च प्रकृतपक्षे प्रकृतसाध्याविषयकत्वदलवैयर्थ्यं, धूमवान् धूमव्यापकवह्निमान् पर्वतत्वादित्यादिस्थलीयप्रतिज्ञावाक्येऽतिव्याप्तिवारकत्वात्, यत्पदवीप्सासहकारेण व्यापकत्वावगाहिबोधजनकावयवत्वं समुदितार्थः इत्यपि कश्चित्, 'सामान्य-लक्षणे' अन्वय-व्यतिरेकिसाधारणलक्षणे, 'साध्येत्यादि साध्ये साधनस्य सम्बन्धो व्यापकत्वं, एवमग्रेऽपि, तथाच वीप्सालभ्य-साधनव्यापकत्वबोधकावयवत्वं अन्वय्युदाहरणत्वं, वीप्सालभ्यसाध्याभाव-

---

२३. द्रष्टव्यमिति ङ०।

वाक्यम्। न च व्याप्तिपक्षधर्म्मतयोश्चतुर्भिरेवावयवैः पर्य्याप्तेः किं तेनेति वाच्यम्। अबाधितासत्प्रतिपक्षितत्वयोरलाभे

व्यापकत्वबोधकावयवत्वं व्यतिरेक्युदाहरणत्वं, उपनयादेर्व्युदासाय वीप्सालभ्येति विशेषणमिति भावः।

केचित्तु 'साध्येत्यादि, 'सम्बन्धपदं सामानाधिकरण्यार्थकं, तथाचान्वयव्याप्तितात्पर्य्यकसाध्य-साधनसामानाधिकरण्यबोधकावयवत्वं अन्वय्युदाहरणत्वं, व्यतिरेकव्याप्तितात्पर्य्यकसाध्याभावसाधनाभावसामनाधि-करण्यबोधकावयवत्वं व्यतिरक्युदाहरणत्वं, पक्षधर्मतातात्पर्य्यकोपनयादेः सामानाधिकरण्यबोधकत्वेऽपि व्याप्तितात्पर्य्यकत्वाभावादेव वारणमित्याहुः। तन्न साधीयः, अन्वयव्याप्तितात्पर्य्यकावयवत्वस्यैव सम्यक्त्वेनेतरांशवैयर्थ्यात्।

प्राचीनमतं निरस्यति, 'न्यायेत्यादि न्यायावयवत्वे सति 'दृष्टान्तवचनं' यथा पदार्थान्वयिस्वार्थबोधकनामोत्तरप्रथमान्तत्वं, तेनान्वयिनोव्यतिरेकिणश्च द्वयोर्दृष्टान्तयोः[२४] संग्रहः, 'दृष्टान्तेति दृष्टान्तशून्योदाहरणेऽव्याप्तिः, 'इत्येव' इत्यत एव, 'व्याप्तिप्रतीतेरिति, वीप्सया तत्समभिव्याहृताग्न्यादिपदेनैव वा अग्न्यादेरुद्देश्यतावच्छेदकीभूतधूमादिव्यापकत्वांशबोधनादिति भावः। 'नापीत्यादि, अत्रोक्तरीत्या 'वाक्यान्तं प्रकृतन्यायार्थकं, तथाच प्रकृतन्यायजन्यज्ञानविषयीभूता या अन्वयतो व्यतिरेकतो वा व्याप्तिस्तस्याः 'उपनायकं' बोधकं, यत् 'वचनम्' अवयवः, 'तत्' उदाहरणमित्यर्थः, 'उपनयाभिधानेति 'उपनयस्य' प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौपयिकव्याप्त्यवच्छिन्नप्रकृतलिङ्गवत्त्वेन पक्षबोधकवाक्यस्य, प्रयोजिका या पक्षः साध्यव्याप्यप्रकृतहेतुमान्न वेत्याकारिका जिज्ञासा तस्याः 'जनकं' अनुकूलं यत् 'वाक्यं' अवयवः, 'तत्' उदाहरणमित्यर्थः, एतेन उपनयत्वस्य एकस्याभावे सामान्यलक्षणस्यानुपपत्तिरिति दूषणं प्रत्युक्तम्। 'एतदेवेति साध्यान्वयव्याप्तिविशिष्टप्रकृतहेतुमत्पक्षबोधक-वाक्याभिधानप्रयोजकजिज्ञासानुकूलावयवत्वं साध्यीयव्यतिरेकव्याप्तिविशिष्ट-प्रकृतहेतुमत्पक्षबोधकवाक्याभिधानप्रयोजकजिज्ञानुकूलावयवत्वञ्चान्वयि-

---

२४. द्वयोरुदाहरणयोरिति क०।

२५. यद्यत् पापं प्रतिजहीत्यत्रेति क०।

चतुर्णामप्यपर्य्यवसानात्। अथाभिधानाभिधेययोर्व्याप्तिपक्ष-धर्म्मतावल्लिङ्गप्रतिपादनादेव पर्य्यवसानेनावयवान्तराणां

नोव्यतिरेकिणश्च क्रमेणोदाहरणद्वयस्य लक्षणमित्यर्थः, उदाहरणस्य न व्याप्यत्वमर्थः, किन्तु सहचारमात्रम्, अन्यथा अन्वयव्याप्तेरेव गमकतया व्यतिरेकव्याप्त्युपन्यासेऽर्थान्तरप्रसङ्गात्, वीप्सितयत्पदद्वयेन महानसत्व-तदन्यत्वादिविरुद्धरूपाभ्यामधिकरणद्वयोपस्थितौ अन्वयतोव्यतिरेकतश्च सहचारद्वयोरेव तादृशाधिकरणत्वान्तर्भावेन व्यभिचारशङ्कानिवृत्तिद्वारा गमकतौपयिकत्वेन तदुपन्यासेऽर्थान्तरस्यायोगात्। यो यो धूमवान् स वह्निमानित्यादौ महानसं तद्भिन्नञ्च धूमवत् महानसं तद्भिन्नञ्च वह्निमदित्यादिक्रमेणैवान्वयबोधादित्याचार्य्याणां मतमुपन्यस्यति, 'अत्र चेति, 'व्यभिचारवारणाय' तज्ज्ञानवारणाय इत्यर्थः, तथाच उदाहरणवशात् महानसे तदन्यस्मिंश्च सामानाधिकरण्यभानेन व्यभिचारज्ञानाभावात् मानसोव्याप्तिग्रह इत्यर्थः, समानविषयत्वेन विरोधित्वमित्याशयः। 'आहुरित्यनेन सूचितमस्वरमबीजं स्वयमेव प्रकाशयति, 'यत्र चेति, 'चः' त्वर्थः, 'व्याप्तिः' व्यभिचारविरहः, 'न वीप्सेति स्यादिति शेषः, कुत्र न वीप्सा अर्हणीया इत्यतः' केवलेति तथाचेदं प्रमेयं द्रव्याभिन्नं वा गगनत्वादित्यादौ हेतुमति साध्यव्यभिचारासम्भवात् तत्रत्योदाहरणे वीप्साप्रवेशो व्यर्थः स्यादस्मान्कन्तु गमकतोपयुक्तस्य व्यापकत्वस्य बोधकत्वेनैव तत्सार्थक्यं, "उदाहरणेन धूमव्यापकता वह्नेरेवोपदर्श्यते" इति परामर्शग्रन्थे एव स्फुटतरमभिधानादिति भावः। यत्र साधनस्यानेकमधिकरणं तत्रापि यो यो धूमवान् सोऽग्निमानित्यादौ वीप्सा व्यभिचारशङ्कानिरसनं दुर्घटं, वीप्सितयत्पदाभ्यां महानसं तद्भिन्नञ्च धूमवत् वह्निमच्चेति बोधनेऽपि धूमवान् कश्चित् वह्न्यभाववानित्येवं व्यभिचारग्रहे बाधकाभावादित्याह, 'वीप्सायामपीति, समानप्रकारकत्वेनैव विरोधित्वादिति भावः। ननु यदि वीप्सितयच्छब्देन विधेयधर्म्मस्य उद्देश्यतावच्छेदक-धर्म्मव्यापकत्वमात्रं प्रत्याय्यते न तु विरुद्धरूपाभ्याम् अधिकरणद्वयं तदा पूर्ववाक्यगतयच्छब्दस्य तच्छब्दसाकाङ्क्षत्वानुरोधादेकमेव तत्पदं उदाहरणस्य घटकमस्तु तत्र वीप्सा विफला, अस्माकन्तु उपक्रान्ताभ्यां महानसत्व-तदन्यत्वादिविरुद्धरूपाभ्यामेकेन तच्छब्देन बोधयितुमशक्यत्वादेव तत्र

निराकाङ्क्षत्वं विपरीतशङ्कानिवृत्तेरपि तत एव लाभात् अन्यथा निगमनेनापि तदवारणात्, न हि तत् विशेषदर्शनमनादृत्यैव

वीप्सास्वीकारः, सकृदुच्चरितेत्यादिव्युत्पत्तेः[२६] बलवत्त्वादित्यतस्तत्रेष्टापत्तिमाह, 'वीप्सा चेति, प्राचां मतेऽपि वीप्सितयत्पदोपक्रान्ताभ्यां विरुद्धरूपाभ्यामेकेनैव तत्पदेन परामर्शसम्भवात् तत्र वीप्सा विफलैव तैरपि बुद्धिस्थवाचक-तदादिपदातिरिक्तस्थल एव सकृदुच्चरितेत्यादिव्युत्पत्तेः स्वीकर्त्तव्यत्वादि-त्याशयेनाह, 'विरुद्धरूपेति, 'तत्पदेन' एकेन, 'परामर्शात्' परामर्शसम्भवात्। नन्वेकेन तत्पदेन वीप्सितयत्पदोपक्रान्ताभ्यां विरुद्धरूपाभ्यां युगपद्बोधनं न दुष्टचरमतोभवभूतेः काव्यं[२७] अत्र प्रमाणयति, 'यथेति हे जगन्नाथ मे मम यद्यत्पापं तत्प्रतिजहि नम्रस्य नतस्य नाशय इति वाक्यार्थः। अत्रेदं बोध्यं विरुद्धरूपाभ्यां प्रत्येकपदेन प्रत्येकबोधने यत्र तात्पर्य्यं तत्र तत्पदेऽपि वीप्सा बोध्या यथा "स स भूमिपाल इत्यादि[२८] यादृशोदाहरणप्रयोगे निग्रहस्तादृशोदाहरणान्याह, 'इदञ्चेति साध्यविकलं, साधनविकलं, उभयविकलं, आश्रयविकलञ्चेति बोध्यं, 'विकलशब्देन सह सर्वत्रान्वयः। साध्यविकलं यथा शब्दोऽनित्योऽमूर्त्तत्वात् यद्यदमूर्त्तं तदनित्यं यथाकाशं,

---

२६. सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति व्युत्पत्तेरित्यर्थः।

२७. कल्याणानां त्वमसि महसां भाजनं विश्वमूर्त्ते
धूर्य्यां लक्ष्मीमथ मयि भृशं धेहि देव प्रसीद।
यद्यत् पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन् भूयसे मङ्गलाय।।
इति मालतीमाधवे भवभूतिः।

२८. सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिम्बरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः।। इति रघुवंशे कालिदासः।
यां यां प्रियां प्रैक्षत कातराक्षीं
सा सा ह्रिया नम्रमुखी बभूव।। इति माघश्च

तन्निवर्त्तकम्। सिद्धनिर्देशतया वारयतीति चेन्न। स्वरूपमात्राभिधानात् साध्यत्वानुस्थितौ तस्मादिति हेतुविभक्त्यनन्वयप्रसङ्गाच्चेति चेन्न व्याप्तिपक्षधर्म्मताज्ञानेऽपि बाधसत्प्रतिपक्षबुद्धेः साध्यज्ञानेनानुत्पत्तिदर्शनात् तदभावाबोधने

साधनविकलं यथा शब्दोऽनित्यो गुणत्वात् यो यो गुणत्ववान् सोऽनित्यः यथा घट इत्यत्र, उभयविकलं यथा शब्दोऽनित्यो गुणत्वात् यथाकाशं, आश्रयविकलं यथा स्थिरोभावोऽनित्यः क्रम-यौगपद्याभ्यां रहितत्वात् यथा शशविषाणं कूर्म्मरोम वाजिविषाणञ्चेति, 'अनूपदर्शितान्वयं' यथा शब्दोऽनित्यः कृतकत्वात् यथा घट इत्यत्र उदाहरणानुल्लेखेन केवलदृष्टान्तमात्रकथनं, 'विपरीतोपदर्शितान्वयं' यथा यदनित्यं तत् कृतकं यथा घट इत्यत्र प्राक्साध्यवाचकपदोल्लेखेन विपरीतक्रमेण सहचारप्रतिपादनस्थले बोध्यम्, 'अनुपदर्शितव्यतिरेकं' यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वादिति व्यतिरेकिप्रयोगे साध्याभाव-साधनाभाववाचकपदानुल्लेखेन बोध्यं, 'विपरीतोपदर्शितव्यतिरेकं' यथा यत्प्राणादिमत्त्वरहितं तन्निरात्मकं यथा घट इत्यत्र साधनाभाववाचकपदस्य प्राङ्निर्देशेन बोध्यम्। ननु विपरीतान्वयव्याप्त्युपदर्शनेऽपि प्रकृतविवक्षितव्याप्त्यनुपदर्शनादनुपदर्शितान्वयमेव कथं स्वातन्त्र्येण तस्योपन्यासः एवं विपरीतोपदर्शितव्यतिरेकस्यापीति चेत्। न। व्याप्त्यन्तरोपदर्शनेन विपरीतोपदर्शितव्याप्तिकं, यत्र क्वापि व्याप्तिर्न प्रदर्श्यते तदनुपदर्शितव्याप्तिकं एवमनुपदर्शितव्यतिरेकमिति भावः। उदाहरणाभासस्तु व्याप्तिग्रहाननुकूलतया अर्थान्तरविधया दोषः विभाजकसूत्रस्थचशब्देन समुच्चितो वा, स्वतन्त्रनिग्रहस्थानान्येतान्यपि यथायथं बोध्यानि।

केचित्तु 'इदञ्चेत्यादि, अयं धूमवान् वह्नेरित्यादौ साध्य-साधनयोरन्वयव्याप्तिविकलत्वात् यो यो वह्निमान् स धूमवान् इत्युदाहरणमाभासः, अयं वाच्यः प्रमेयत्वादित्यादौ यो यो न प्रमेयः स न ज्ञेयः इत्युदाहरणं अनुपदर्शितसाध्य-साधनान्वयव्याप्तिकत्वादाभासं, पर्वतो वह्निमान् धूमादित्यादौ यो यो वह्निमान् स धूमवानित्युदाहरणम् वैपरीत्यक्रमेणोपदर्शितान्वयव्याप्तिकत्वादाभासं, अयमेतद्घटाभिन्नः एतद्घटत्वादित्यादौ यो य एतद्घटत्ववान् स एतद्घटाभिन्न इत्युदाहरणं अनुपदर्शितव्यतिरेकव्याप्ति-

समीहितानिर्व्वाहात्। अथ बाधादिविरहस्य प्रयोजकत्वं न तु तदबोधस्य मानाभावादसिद्धेश्च किमर्थं बाधादिविरहो बोधनीय इति चेन्न यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति

कत्वादाभासं, एवं तत्रैव यो य एतद्घटत्वाभाववान् स एतद्घटाभिन्नत्वाभाववानित्युदाहरणं विपरीतक्रमेणोपदर्शितव्यतिरेकव्याप्तिकत्वादाभासमित्यर्थः, इत्थञ्च दृष्टान्तस्य उदाहरणघटकत्वेऽपि न क्षतिरिति मन्तव्यम्।

अत एव प्रकृतहेतुक-प्रकृतसाध्यसिद्ध्यौपयिकव्याप्तिप्रमाया अजनकत्वमेव उदाहरणस्याभासताप्रयोजकं पञ्चविधभेदोक्तिस्तु[२९] प्रपञ्चार्थमित्यवधेयमिति व्याचक्रुः।

'उदाहरणेति तथाच व्याप्तोहेतुः पक्षे वर्त्तते न वेत्याकाङ्क्षायां व्याप्त्याश्रयस्य पक्षधर्म्मत्वं विधीयत इत्यर्थः। वस्तुतोव्याप्तं किमित्यादेः पक्षः साध्यव्याप्यप्रकृतहेतुमान्न वेत्याकाङ्क्षायां तात्पर्य्यं तस्या एव पक्षधर्मिकान्वयबोधजनकोपनयनिवर्त्त्यत्वादिति ध्येयम्। 'अनुमितीत्यादि प्रकृतहेतुकप्रकृतसाध्यकानुमित्यौपयिकव्याप्तिविशिष्टहेतुमत्तया प्रकृतपक्षबोधकावयवत्वमुपनयत्वमित्यर्थः, यथाश्रुते तु शाब्दपरामर्शस्य व्याप्यवदभेदविषयकस्य संयोगेन पक्षे व्याप्याप्रकारकस्यानुमितिहेतुत्वाभावादसङ्गतेः, अनुमितिकारणव्यापारस्यानाकारज्ञानजनकावयवत्वमुपनयत्वमित्यपि कश्चित्। 'सामान्यलक्षणं' अन्यदुपनय-व्यतिरेक्युपनयसाधारणसामान्यलक्षणमित्यर्थः। 'साध्यव्याप्येति साध्यान्वयव्याप्तिविशिष्टेत्यर्थः, 'साध्याभावेति साध्यीयव्यतिरेकव्याप्तिविशिष्टप्रकृतहेतुमत्तया पक्षबोधकावयवत्वमित्यर्थः। 'जरन्मीमांसकमतं निरस्यति, 'उदाहरणान्त एवेति उदाहरणादित्रिकस्यैव प्राभाकरादिनव्यमीमांसकानां सम्मतत्वादिति ध्येयं। 'तृतीयलिङ्गपरामर्शस्येत्यस्य विवरणं 'व्याप्तिपक्षधर्मतावगाहिन इति, 'अवयवान्तरात्' उपनयभिन्नावयवान्तरात्। ननु मीमांसकमते व्याप्तिविशिष्टपक्षधर्मताया ज्ञानं नानुमितिहेतुरतस्तदलाभो न क्षतिकर इत्यत आह, 'तदनभ्युपगमेऽपीति, 'अलाभादिति व्याप्यतावच्छेदकरूपेण पक्षधर्मत्वग्रहस्यानुमितिहेतुतायाः परैरपि स्वीकारादिति भावः।

---

२९. एवम्विधभेदोक्तिस्त्विति घ०।

व्याप्तेः। न चानन्वयः, तस्मादित्यन्वयबलादेव हेत्वनाकाङ्क्षितत्वलक्षणसिद्धत्वज्ञानात् न त्वन्वयात् प्राक्। इह केचित् यथा तस्मादिति सर्व्वनाम्ना हेतोः परामर्शः

'हेतुवचनात्' हेत्ववयवात्, 'को हेतुरित्यस्य कुतः इत्याकाङ्क्षायां तात्पर्य्यम्, अन्यथा धूमादित्युत्तरस्य धूमधर्मिकहेतुत्वबोधाजनकत्वेन तस्य को हेतुरित्याकाङ्क्षानिवर्त्तकत्वानुपपत्तेः सङ्ख्यातिरिक्तसुवर्थस्य प्रकृत्यर्थविशेष्यत्व-नियमादिति ध्येयम्। 'हेतुस्वरूपेति लिङ्गनिष्ठहेतुतामात्रबोधकस्येत्यर्थः 'अतत्परत्वात्' पक्षधर्मत्वाबोधकत्वात्। न चैवं पर्वतो द्रव्यं महानसत्वादित्याद्यपि प्रयोगः स्यादिति वाच्यम्। तदुत्तरपञ्चम्यर्थज्ञाप्यत्वान्वितसाध्यस्य हेत्वधिकरणवृत्तिसाध्यताघटकसम्बन्धेनैव पक्षधर्मिकान्वयबोधं प्रति साकाङ्क्षत्वादिति भावः। शङ्कते, 'वादिवाक्यादिति हेत्वन्तवाक्यात्पक्षे लिङ्गज्ञाप्यसाध्यवत्त्वप्रतीतौ यो यज्ज्ञाप्यसाध्यवान् स तद्वान् इत्यनुमानादेव पक्षस्य हेतुमत्त्वावगम इत्यर्थः, 'तदर्थस्य' हेत्वन्तवादिवाक्यार्थस्य, 'असिद्धत्वेन' प्रमितत्वेनानिश्चिततयेत्यर्थः, परेषां मते अनुमितौ प्रमितसाध्याभाव-वत्त्वादिनिश्चियस्य विरोधित्ववत्प्रमितहेतुमत्तानिश्चयस्यैव कारणत्वादिति भावः। 'अन्यथेति प्रतिज्ञावाक्यात् पक्षस्य साध्यवत्त्वावगतौ तेनैव हेतुना तज्ज्ञापकहेतुमत्तादेरप्याक्षेपसम्भवेन हेत्ववयवादेरपि वैयर्थ्यापातादित्यर्थः।

केचित्तु 'वादिवाक्यादिति, इदं पदं विशिष्टपरामर्शतात्पर्य्यकं तत्तात्पर्य्यकतया वादिप्रयोज्यत्वात् 'इत्यनुमानादेव विशिष्टपरामर्शलाभात् किमुपनपयेनेत्यर्थः, 'तदर्थस्येति, तथाच वादिवाक्यार्थस्याप्रामाण्यज्ञानास्कन्दि-तत्वेन उभयवाद्यसिद्धतया अनाक्षेपकत्वं तस्येति भावः, इति व्याचक्रुः।

शङ्कते, 'प्रतिपाद्यानामिति प्रतिवादिनामिति शेषः, 'स्वत एव' शब्दं विनैव, 'तदवगमः' पक्षस्य हेतुमत्त्वावगमः, पक्ष-हेत्वोरुपस्थितौ प्रतिज्ञास्थले इव तयोर्विशिष्टोपनीतभानसम्भवादिति भावः। यत्र पूर्व्वं यदवगतं तत्रैव तस्योपनीतभानं त्वया वाच्यम् अन्यथा अन्यथाख्यात्यापत्तेः, तथाच यस्य प्रतिवादिनः साधनवत्तया पूर्वं पक्षो नोपस्थितस्य उक्तक्रमेण स्वतः पूजय हेतुमत्त्वग्रहो न सम्भवतीत्याशयेन समाधत्ते, 'तेषामिति, व्युत्पत्तिः' पक्षधर्मिकहेतुमत्त्वज्ञानाधीनहेतुस्मृतिः, परनये तस्या एव पक्षधर्मिकहेतुमत्त्वोप-

पूर्व्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथेति सर्व्वनाम्ना सिद्धस्थल इव विरोधादिवारणाय युक्त इत्याहुः। तन्न। तथेति स्वरूपे प्रकारे सादृश्ये, वा, आद्ये तथाचायमिति प्रक्रमात्

नीतभानहेतुत्वादिति भावः। साधनाद्युपनीतभानं प्रति साधनाद्युपस्थितिमात्रस्य हेतुत्वमिति मतेऽप्याह, 'प्रतिपादकेनेति वादिनेति शेषः, 'स्वव्यापारस्य' व्याप्तो हेतुः पक्षे वर्त्तते न वेत्याकाङ्क्षानिवर्त्तकवाक्यस्य, 'निर्वाहयितुं' सम्पादयितुमौचित्यादित्यर्थः, 'प्रतिपादयितुमिति क्वचित् पाठः तत्र प्रापयितुमौचित्यादित्यर्थः, 'अन्यथा' प्रतिपाद्याकाङ्क्षानिवर्त्तकवाक्यस्य वादिनानभिधाने, 'अवयवान्तरे' हेत्वादौ, 'एवं प्रसङ्गः' अनभिधानप्रसङ्गः,[३०] प्रतिज्ञोत्तरं कुतः इत्याकाङ्क्षानिवर्त्तकस्यापि वाक्यस्यानवश्यकत्वादिति भावः।

परे तु 'प्रतिपाद्यानां' श्रोतृणां, 'स्वत एव तदवगमः' परप्रयुक्तत्तदर्थशक्तपदं विनापि स्वकल्पितशब्दादनुमानाद्वा व्याप्तिपक्षधर्मत्वावगम इत्यर्थः, 'तेषामिति प्रतिपाद्यानामित्यर्थः, 'व्युत्पन्नेति, तथाच ये व्युत्पन्ना भवन्ति तान् प्रति आपातत उपनयप्रयोगो न क्रियतां ये तु तादृशा न भवन्ति तान् प्रति अवश्यम् उपनयादिप्रयोगः करणीय इत्यर्थः। व्युत्पन्नं प्रत्येव उपनयः कर्त्तव्य इत्याह, 'प्रतिपादकेनेति, यदि च व्युत्पन्नतया तस्य स्वत एव तदर्थावगम इति नोपनयापेक्षा इति ब्रूयात्तदाप्याह, 'अन्यथेति, इति प्राहुः।

'उपनयेति उपनयनिरूपणानन्तरं निगमनं निरूप्यत इत्यर्थः, एतेनावसरसङ्गतिः सूचितेति ध्येयम्। 'अनुमितीत्यादि, निगमनसदृशस्य उदासीनवाक्यस्य वारणाय 'कारणान्तं प्रागुक्तरीत्या प्रकृतन्यायावयवार्थकं, प्रतिज्ञादिवारणाय 'व्याप्तीत्यादि, 'प्रयुक्तत्वं' ज्ञाप्यत्वं, तथाच व्याप्ति-पक्षधर्मताविशिष्टप्रकृतहेतुधीज्ञाप्यत्वप्रकारकप्रकृतसाध्यधीजनकत्वमर्थः, धूमाद्वह्निमत्सधर्मायं वह्निमान् धूमादित्यादौ प्रतिज्ञादिव्युदासाय विशिष्टान्तं, अत्र तादृशहेतुज्ञाननिरूपिताखण्डजन्यत्वनिवेशान्न व्याप्तिपदवैयर्थ्यं, वह्निव्याप्ति पक्षधर्मताविशिष्टधूमाद्वह्निमानयं वह्निमानित्यादिका तु प्रतिज्ञा प्रकृतहेतौ पक्षधर्म्मतां बोधयन्त्यपि न प्रकृतव्याप्तिविशिष्टपक्षधर्म्मतां बोधयतीति न तत्रातिप्रसङ्गः। वस्तुतोव्याप्ति-पक्षधर्मतापदयोर्वैकल्पिकोपादानात् लक्षणद्वये तात्पर्य्यं,

---

३०. अयं प्रसङ्गः अनभिधानप्रसङ्गः इति घ०, ङ०।

तथेति हेतुमानित्यर्थः स्यात् तथाचानन्वयः, न हि हेतुमत्त्वादेव हेतुमत्त्वमित्यन्वितम्, न द्वितीयः, सामान्येन पक्षस्यापि अन्वयव्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात्, अत

वह्निव्याप्तिविशिष्टेत्यादिका तु न प्रतिज्ञा सम्प्रदायविरोधादिति तत्त्वं,। 'चतुर्भिः' प्रतिज्ञाद्यैः, 'पर्य्याप्तेः' **प्राप्तेः** अपर्य्यवसानादिति अनुमितिसामग्र्यसम्भवादित्यर्थः। पर्य्याप्तेः ज्ञानजनकत्वात्, 'अपर्य्यवसानात्' अनुमित्युपधायकज्ञाना-जनकत्वादित्यर्थः, इति कश्चित्। ननु प्रतीत्यनुपपत्ति-प्रतीतानुपपत्त्योर-भावेनावयवान्तरेण सह निगमनस्य आकाङ्क्षाविरहः[३१] इत्याशङ्कते, 'अथेति, 'अभिधानं' प्रतीतिः व्याप्ति-पक्षधर्म्मताविशिष्टलिङ्गानुभव इति यावत्, 'अभिधेयं' तथाभूतलिङ्गं, 'निराकाङ्क्षत्वमिति तथाच चतुर्णामवयवानां व्याप्ति-पक्षधर्म्मताप्रतिपादनेन पर्य्यवसानात् निगमनाकाङ्क्षा तेषां नास्तीत्यर्थः। ननु साध्याभाववत्पक्षज्ञानसत्त्वे तादृशज्ञानसत्त्वेऽप्यनुमितिसामग्र्यसम्पादनात् तत्सम्पत्त्यर्थं निगमनाकाङ्क्षास्ति तेषामित्यत आह, 'विपरीतेति पक्षादेः साध्याभावादिमत्त्वशङ्कानिवृत्तेरपीत्यर्थः, 'तत एव' व्याप्ति-पक्षधर्म्मता-विशिष्टलिङ्गप्रतिपादनादेवेत्यर्थः, 'तत एव' प्रतिज्ञाजन्यज्ञानादेव इत्यर्थ इति कश्चित्। 'निगमनेनापीति, अबाधितत्वादेरपदार्थतया निगमनेन तस्य बोधयितुमशक्यत्वादिति भावः। 'तत्' निगमनं, 'तन्निवर्त्तकं' विपरीतशङ्कानिवर्त्तकं, शङ्कते, 'सिद्धनिर्देशतयेति सिद्धत्वविशिष्टस्य बोधकतया निगमनं विपरीतशङ्कां वारयतीत्यर्थः। सिद्धत्वमत्र प्रमाणसिद्धत्वं वा, हेतुविभक्तिसाकाङ्क्षत्वरूपस्य साध्यस्याभाववत्त्वं वा, हेतुजिज्ञासा-विरोधिबोधविषयत्वं वा प्रथमे 'स्वरूपमात्रेति अयं तस्माद्वह्निमानित्यादौ वह्न्यादिपदेन वह्न्यादिस्वरूपमात्रस्याभिधानादित्यर्थः। द्वितीये 'साध्यत्वेति वह्न्यादौ हेतुविभक्तिसाकाङ्क्षत्वस्यानुपस्थितौ तस्मादित्यादिहेतुविभक्त्यर्थस्य वह्न्यादावनन्वयप्रसङ्गादित्यर्थः। शाब्दबोधमात्रं प्रत्येवाकाङ्क्षाधियः कारणत्वादिति भावः। 'तदभावेति तयोर्बाधितत्व-सत्प्रतिपक्षितत्वयोः अभावबोधन इत्यर्थः,

---

३१. अवयवान्तरार्थविशेष्यक-निगमनार्थप्रकारकबोधजनकता-वच्छेदकीभूतानुपूर्व्वीमत्त्वं नास्तीत्यर्थः।

एव न तृतीयोऽपि, अभेदानुमाने चान्वयिनि तस्मात्तथेति सादृश्यान्वयाभावात् बहूनाञ्च प्रक्रमे विशेष्यानन्वयात्,

'समीहितानिर्व्वाहात्' अनुमितिरूपफलानिर्व्वाहात्, अत्र पक्षादेः साध्यादिमत्त्वस्य उपनयान्तैः चतुर्भिरेव सिद्धत्वात् पुनर्निगमनेन तदभिधानस्य "सिद्धे सत्यारम्भो नियमाय" इति व्युत्पत्तिबलेनाबाधितत्वासत्प्रतिपक्षितत्वबोधकत्वं, स च बोधो यदि शाब्दस्तदा निगमनस्थतच्छब्दस्य व्याप्ति-पक्षधर्म्मताविशिष्ट इवाबाधितत्वासत्प्रतिपक्षितत्वविशिष्टेऽपि हेतौ शक्त्या निरुढ़लक्षणया वा सम्पादनीयः इतरथा तादृशतच्छब्दोपस्थापितेन व्याप्तिविशिष्टपक्षधर्म्मत्वेन हेतुनैवाबाधितत्वासत्प्रतिपक्षितत्वयोरानुमानिको बोधः प्रकृतहेतौ द्रष्टव्यः, 'बाधादिविरहस्येति बाधादिनिश्चयाभावस्येत्यर्थः, 'तद्बोधस्य' बाधाद्यभाववत्त्व-बोधस्य। अथान्वयाद्यनुविधानमेव मानमत आह, 'असिद्धेश्चेति अन्वयाद्यनुविधानासिद्धेश्चेत्यर्थः, 'यदवगमे' यन्निश्चये, तथाचानुमितिर्बाधा-भावज्ञानजन्या बाधनिश्चयप्रतिबध्यत्वादित्यनुमानमेव अबाधितत्वादिज्ञानस्य हेतुतायां मानमिति भावः। ननु बाधः पर्व्वते वह्न्यभावरूपः तद्भावो वह्निः पर्व्वते तज्ज्ञानस्य पर्व्वतो वह्निमान् इति सिद्ध्यात्मकस्य सत्त्वे कथं ततोऽनुमितिः। न च बाधाभावस्य वह्निरूपस्य वह्न्यभावाभावत्वेन ज्ञानं कारणं तच्च न सिद्ध्यात्मकं एवं वह्न्यभाववत्त्वप्रकारकप्रमाविशेष्यत्वज्ञानं प्रतिबन्धकं तादृशविशेष्यत्वाभावज्ञानं हेतुः तच्च निगमनसाध्यं सिद्ध्यनात्मकमिति वाच्यम्। तस्य कारणत्वे मानाभावात् स्वीयस्थले व्यभिचाराच्च इति चेत्। न। यदवगमे यन्न भवति तत्तदभावज्ञाने सत्येव सम्भवतीति प्रयोक्तृतात्पर्य्यात्, तथाच यज्ज्ञानं यत्प्रतिबन्धकं तदभावज्ञाने तज्ज्ञानप्रतिरोधेन तदवश्यं भवतीति तस्य कारणत्वे मानाभावात्, निगमनादेव बाधविरहो यदा बोध्यते तदा प्रतिबन्धकबाधज्ञानाभावे अनुमितिरविकलैव स्यात् इति, इत्थञ्च बाधज्ञानप्रतिबन्धकद्वारा बाधाभावज्ञानस्य प्रयोजकत्वं न तस्य कारणत्वं अग्रे च साध्यमित्यस्य प्रयोज्यत्वमर्थो बोध्य इति रमणीयम्[३२] उक्ता-बाधितत्वज्ञानमन्वयव्यतिरेकाभ्यां स्वार्थातिरिक्तस्थले हेतुस्तच्च निगमनाद्भवतीति

३२. विभावनीयमिति ङ०।

वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात् तस्मादित्यत्र तु हेतुविभक्त्यर्थानन्वयादेव नियमः तस्मादनित्य इत्यभिधाने च विशिष्य सिद्धान्तावगम्यते पूर्व्वं साध्यतयोक्तस्य

यथा–श्रुतग्रन्थ एव साधुरित्यपि कश्चित्। तृतीयमाशङ्कते, 'न चेति हेतुजिज्ञासाविरोधिबोधविषयत्वरूपस्य सिद्धत्वस्यापदार्थत्वेन साध्यांशे तदन्वयायोग इत्यर्थः, उक्तरूपं सिद्धत्वं न निगमनेन बोध्यते किन्तु ततः साध्यव्याप्त्यादिविशिष्टलिङ्गज्ञाप्यत्वप्रतीतौ तेनैव हेतुना प्रकृतसाध्यस्य निरुक्तसिद्धत्वमनुमीयते इत्याशयेन परिहरति, 'तस्मादित्यन्वयबलादिति, 'हेत्वनाकाङ्क्षितत्वं' हेत्वाकाङ्क्षाविरोधिविषयत्वं, 'प्राक्' अनुत्तरं, इदञ्च निगमनात् सिद्धत्वज्ञानं भवतीत्यभिप्रायेण। हेत्वन्वयबोधानन्तरं मानससिद्धत्वज्ञानं भवति न तु तस्मात् पदार्थभाने तत्प्राक्काले वा इत्याशयेन परिहरति, 'तस्मादिति कश्चित्।

तस्मात्तथेति निगमनाकारं ये वदन्ति तन्मतं दूषयितुमुपन्यस्यति, 'इह केचिदिति पूर्व्वोक्तं व्याप्ति–पक्षधर्म्मतात्मकं यद्धेतोरशेषरूपं तल्लाभायेत्यर्थः, 'सिद्धस्थल इवेति चैत्रः पचत्ययमपि तथेत्यादिलोकप्रसिद्धस्थल इवेत्यर्थः। 'सिद्धं' पक्षादि, तथाच वह्निव्याप्यधूमवानयमित्यत्र यथा इदमादिप्रसिद्धपक्ष–स्योपस्थापनं तद्वदिहापीत्यन्ये। 'विरोधादीति अयं तस्माद्वह्निमानित्युक्तौ हि पक्षे साधनीयस्य[३३] साध्यवत्त्वस्यालाभेन उपसंहारविरोधः साध्यवदभेदप्राप्त्या अर्थान्तरञ्च स्यात् अतस्तद्वारणाय 'साध्यांशस्यापि तथेति सर्वनाम्ना युक्तः परामर्श इत्यन्वयः, 'स्वरूप इति सादृशपदान्तरप्रयुक्तप्रक्रान्तस्वरूप इत्यर्थः, 'प्रकार इति अव्यवहितपूर्वबुद्धेर्विशेष्यत्वे सति प्रकार इत्यर्थः, तथासत्ये–वाग्रिमग्रन्थसङ्गतेरिति ध्येयं। 'सादृश्य इति अव्यवहितपूर्वबुद्धिविशेष्यस्य सादृश्य इत्यर्थः, न हीति, अभेदेनोद्देश्यविधेयभावस्येव ज्ञाप्य–ज्ञापकभावस्याप्य–व्युत्पन्नत्वात् धूमो धूम इतिवत् धूमाद्धूमवान् इति शाब्दधियोऽपि असत्त्वादित्यभिमानः। वस्तुतः 'अनन्वय इत्यस्य उपनयार्थे निगमनार्थस्याप्य–नन्वयप्रसङ्ग इत्यर्थः, 'हेतुमत्त्वादित्यस्य ल्यव्लोपे पञ्चम्या हेतुमत्त्वं धर्मितावच्छेदकीकृत्येत्यर्थकत्वात् दण्डवान् रक्तदण्डवान् इत्यत्रेव

---

३३. बोधनीयस्येति क॰।

समर्थहेतुसम्बन्धेन पुनरुत्कीर्त्तनात् अन्यथा तद्वैयर्थ्यात्। संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः किन्तु

साध्यव्याप्यहेतुमान् पक्षः हेतुज्ञाप्यहेतुमान् इत्यन्वयेऽपि उद्देश्यतावच्छेदक-विधेययोरैक्येन निराकाङ्क्षत्वस्वीकारादिति ध्येयं। 'सामान्येन' साधनाधिकरणत्वा-दिना, 'तत्प्रकारेति निगमनप्रकारीभूतस्य तस्मादित्यस्य, 'अन्वयः', 'तत्रैव' पक्ष एव, 'इत्यनन्वयात्' अयोग्यत्वादित्यर्थः, पक्षस्य लिङ्गाव्यापकत्वेन तज्ज्ञाप्यत्वबाधादिति भावः। 'अभेदानुमाने चेति, 'चः' केवलान्वयिनीत्यनन्तरं योज्यः, तथाच पर्वतः पर्वताभिन्नः पर्वतत्वादित्यादौ पर्वतसादृश्यस्य पर्वतत्वाव्यापकत्वेन पर्वतत्वाज्ञाप्यतया केवलान्वयिपक्षके च प्रमेयं वह्निमत् धूमादित्यादौ पक्षीभूतस्य प्रमेयस्य सादृश्यस्याप्रसिद्ध्या तदुभयस्थले तस्मात् तथेति निगमनेन लिङ्गज्ञाप्यत्वविशिष्टस्य पक्षसादृश्यस्य बोधयितुम-शक्यत्वादित्यर्थः पक्षसादृश्यस्य तद्भेदगर्भत्वादिति भावः।

अन्ये तु 'सामान्येन' व्याप्त्यन्तर्निविष्टसामानाधिकरण्यघटकत्वेनेत्यर्थः, 'अत एव' व्याप्त्यन्तर्निविष्टसामानाधिकरण्यघटकतया पक्षस्योपस्थापना-देवेत्यर्थः, 'अभेदानुमाने चान्वयिनीति, विशेषणविशेष्यभावेनान्वयात् घटो द्रव्याभिन्नः द्रव्यत्वादित्यादिस्थलोपसंग्रहः अन्वयिनीत्युपादानाच्च पक्षाघटितव्यतिरेकव्याप्तिवारणं व्यतिरेकव्याप्तिबोधकोपनयस्य पदार्थपरामर्श-कतत्पदेन पक्षपरामर्शसम्भवादिति व्याचक्रुः।

ननु तथापदं बुद्धिस्थत्वेनैव वह्निं बोधयिष्यतीति तत्रैव तस्मादित्यस्यान्व-यो भविष्यतीत्यत आह, 'वहूनाञ्चेति, 'प्रक्रमे' बुद्धिस्थत्वे, 'विशेष्येति साध्यतावच्छेदकधर्म्मावच्छिन्ने तस्मादित्यस्य अन्वयायोगादित्यर्थः। ननु साध्यवद्भिन्ने बुद्धिस्थे लिङ्गज्ञाप्यत्वस्य बाधादेव प्रकृतसाध्ये तस्मादित्यस्या-न्वयो भवितेत्यत आह, 'वादिवाक्ये चेति, 'अतिप्रसङ्गादिति इदं स्नेहवत् गुणादित्यपि प्रयोगापातादित्यर्थः, स्नेहस्य जलान्यवृत्तिगुणज्ञाप्यत्वबाधकवशादेव जलान्यावृत्तिगुणज्ञाप्यत्वमादाय तादृशवाक्यस्य प्रामाण्यसम्भवादिति भावः। यद्वा ननु तथाशब्दस्य पूर्वप्रक्रान्तपरत्वेन साध्य एव तादृशि तस्मादित्यस्या-न्वयो भवितेत्यत-आह, 'वहूनाञ्चेति, 'विशेष्येति साध्यस्येव व्याप्त्यादेरपि प्रक्रान्तत्वेन तत्रापि तस्मादित्यस्यान्वयप्रसङ्गादित्यर्थः। ननु व्याप्त्यादौ लिङ्गज्ञाप्यत्वस्य बाधादेव तत्र तस्मादित्यस्यान्वयो न भविष्यतीत्यत आह,

न्यायाङ्गतयान्यायान्तर्गतत्वेनोपयुज्यन्त इति नाधिक्यम्, कण्टकोद्धारस्य च सार्व्वत्रिकत्वं समयविशेषोपयोगित्वादिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानापरिच्छेदे अवयवग्रन्थः सम्पूर्ण।

'वादिवाक्ये चेति, 'चः' अप्यर्थे, तथाच वादिवाक्ये योग्यतयान्वयेऽप्यतिप्रसङ्गात् पूर्वप्रक्रान्ते व्याप्तिघटकप्रतियोगित्वादौ तस्मादित्यस्यान्वयप्रसङ्गादित्यर्थः। प्रतियोगित्वादेरपि लिङ्गज्ञाप्यत्वसम्भवादिति भावः। यद्यपि पूर्वोपस्थितं साध्यमेव विशेषतस्तथाशब्देन परामृष्टमित्युक्तौ न कश्चिदोषः, तथापि सादृश्यादिशक्तस्य तस्य वह्नित्वादिप्रकारेण बोधकतायामाधुनिकलक्षणाापत्तेर्न्नैष प्रकारोयुक्त इति ध्येयं। ननु तथाशब्दस्येव तच्छब्दस्यापि पूर्वोपस्थितयावद्वस्तुपरामर्शकत्वसम्भवेन तस्मादित्यतोऽपि कुतः साधनज्ञाप्यत्वस्यैवावगतिरित्यत आह, 'तस्मादित्यत्रेति, त्वन्मतेऽपि उपस्थितपक्षादिज्ञाप्यत्वस्य प्रकृतसाध्ये बाधादेव तत्रोपस्थितलिङ्गमात्रपरामर्शकत्वं तत्पदस्येति भावः। ननु तथा शब्दात् बुद्धिस्थत्वेन साध्यस्योपस्थितौ तत्र विशिष्टहेतुज्ञाप्यत्वस्यान्वये को दोष इत्यत आह, 'तस्मादनित्य इत्यभिधाने चेति, 'चः' हेतौ, 'विशिष्य' साध्यतावच्छेदकरूपेण, 'सिद्धता' हेत्वनाकाङ्क्षितत्वं, अवगतेः प्रकारमाह, 'पूर्वमिति, 'समर्थः' व्याप्तिपक्षधर्म्मताविशिष्टो हेतुः तज्ज्ञानज्ञाप्यत्वेनेत्यर्थः, तथा च वह्निर्हेत्वनाकाङ्क्षितः स्वव्याप्त्यादिविशिष्टधूमज्ञाप्यत्वात्तादृशज्ञाप्यतयोपस्थितत्वाद्वेत्यादिक्रमेण वह्नित्वाद्यवच्छिन्नस्य सिद्धभाव इत्यर्थमेव बुद्धिस्थत्वेन साध्यस्य परामर्शकत्वं तथाशब्दस्य नोचितमिति भावः। अथ मास्तु सिद्धत्वस्य विशिष्यानवगमः ततः किमत आह, 'अन्यथेति तस्य निगमनस्य वैयर्थ्यादित्यर्थः। ननु साध्यसंशयप्रयोजनहेत्वाकाङ्क्षादीनामपि अवयवत्वात् तेषामपि विभागो युक्त इत्यवयवानां पञ्चताभिधानमसङ्गतमत आह, 'संशयेति, 'प्रयोजनं' तत्त्वनिर्णयः, 'लक्षणेति, वाक्यत्वगर्भस्यावयवत्वस्य तत्रासत्त्वादिति भावः। 'उपयुज्यन्त इति प्रयोजनस्यापि स्वगोचरेच्छाद्वारैव न्यायोपयोगित्वं, तत्त्वबुभुत्सैवात्र प्रयोजनपदार्थः, 'कण्टकोद्धारस्येति को वह्निमान् कुतो धूमात् कथमस्य गमकत्वमित्यादिप्रश्नव्यञ्जककिम्पदस्तोमस्येत्यर्थः।

इति श्रीमथुरानाथतर्कवगीशविरचिते तत्त्वचिन्तामणिरहस्ये अनुमानाख्य-द्वितीयखण्डरहस्ये अवयवरहस्यम्।

चतुर्थस्तबकः

अवयवतत्त्वचिन्तामणिदीधितिजागदीशी

गङ्गेशोपाध्यायविरचितः

तत्त्वचिन्तामणिः

रघुनाथशिरोमणिविरचिता

तत्त्वचिन्तामणिदीधितिः

जगदीशभट्टाचार्यविरचिता

तत्त्वचिन्तामणिदीधितिजागदीशी

गङ्गेशोपाध्यायविरचितः

तत्त्वचिन्तामणिः

तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनय-निगमनानि निरूप्यन्ते। तत्र न समस्तरूपोपन्नलिङ्गप्रतिपादकवाक्यं न्यायः, अत्रैव

रघुनाथशिरोमणिविरचिता

अवयवदीधितिः

उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम्।

प्रतिज्ञात्वादिकं पुनरुदासीनवाक्यवारकन्यायान्तर्गतत्व-शून्यमेवाऽत्रोपादेयमिति नान्योन्याश्रयः। साध्यादिभेदनियंत्रिताश्च

जगदीशभट्टाचार्यविरचितम्

जागदीश्यामवयवप्रकरणम्

मूलोक्तन्यायलक्षणस्याऽग्रे दूष्यतया स्वयं न्यायलक्षणमाह उचितेति। व्युत्क्रमेणोक्तप्रतिज्ञादिपञ्चकातिव्याप्तिवारणार्थमानुपूर्वीकान्तं व्युत्क्रमोक्तप्रति-ज्ञादिभिन्नार्थकम्। तेन क्रमोत्पन्नप्रतिज्ञाहेतूदाहरणोपनयनिगमनानां लाभः। प्रतिज्ञाहेतूदाहरणत्रिकाद्यतिव्याप्तिवारणाय पञ्चकपदम्। न चाऽसाधकता-साधकानुमानस्थलीयन्यायाव्याप्तिः तत्र हेत्वाभासात्मकहेतोरसाधकताव्याप्यत्व-स्योभयसम्मतत्वादुदाहरणाभावेन तादृशपञ्चकसमुदायत्वाभावादिति वाच्यम्। शिरोमणिमते तत्रापि वादिनः स्वकर्तव्यनिर्वाहार्थमुदाहरणस्याऽऽवश्यकत्वात्। अन्यथा सर्वत्रैवोपनयमात्रस्य उद्भाव्यतापत्तेः अनुमित्युपयुक्तव्याप्तिपक्षधर्मता-यास्तत एव लाभसंभवात्। यत्तु साध्यादिभेदेन न्यायस्य विभिन्नत्वादुदाहरण-विनाकृतं प्रतिज्ञादिचतुष्टयत्वमेव न्यायत्वं वाच्यमिति। तन्न। तथा सति

वाक्येऽतिव्याप्तेः, किन्त्वनुमितिचरमकारणलिङ्गपरामर्श-प्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः। प्रतिज्ञादिपञ्चवाक्यैरेक-वाक्यतया स्वार्थविशिष्टज्ञानं जन्यते तेन च विशिष्टवैशिष्ट्या-वगाहिमानान्तरमुत्थाप्यते तेन च चरमपरामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजकता।

प्रतिज्ञादयो वाच्या इति विभिन्नसाध्यादिपक्षकप्रतिज्ञादिसमुदाये नातिव्याप्तिः। व्याप्त्यादेरिव साध्यादेरप्यननुगमादननुगगो न्यायादेरपीष्यत एव।

एतेन प्रतिज्ञानिगमनयोरुदाहरणावयवान्तरयोश्च न संभूयैकार्थ-प्रतिपादकत्वम्, द्रागेव तु पञ्चानामवयवानाम्,

परन्तु प्रतिज्ञाहेत्वोः कथञ्चिदुपनयनिगमनयोः।

कदाचित्तत्रैव समयबन्धवशेन पञ्चावयवप्रयोगेऽव्याप्त्यापत्तेः। समुदायपदन्तु तादृशपञ्चत्वस्य पर्याप्तिसम्बन्धेन यदधिकरणं तस्य क्रमिकत्वलाभार्थम्। तेन क्रमिकप्रतिज्ञाहेत्वादिमात्रे नातिव्याप्तितादवस्थ्यम्। क्रमेण पञ्चभिः पुरुषैः प्रतिज्ञादिपञ्चकाभिधाने न्यायव्यवहारविरहे त्वेकपुरुषप्रयुक्तत्वमप्यौचित्ये निवेश्यम्। तथा सिद्धसाधनस्थलीयप्रतिज्ञादिसमुदाये न्यायत्वाभावात् सिषाधयिषाकालीनत्वं साध्यसंशायकविप्रतिपत्तिकालीनत्वं वा प्रतिज्ञाविशेषणं वाच्यमित्यपि वदन्ति। ननु न्यायावयवत्वघटितस्य प्रतिज्ञात्वादेर्न्यायनिरुक्तौ प्रवेशादन्योन्याश्रयत्वमत आह प्रतिज्ञात्वादिकमिति। तथा च यादृशयादृशानुपूर्व्यवच्छिन्ने कथकानां प्रतिज्ञाव्यवहारस्तादृशतादृशा-नुपूर्वीकत्वमेवात्र प्रतिज्ञात्वम् एवं हेतुत्वोदाहरणत्वादिकमपि उक्तक्रमेणैव निरुच्य न्यायलक्षणे निवेश्यम्। अन्यथा पर्वतादौ वह्न्यादिप्रतिज्ञायाः पर्वतो वह्निमान् गिरिरग्निमानित्यादिनानाविधानुपूर्वीकत्वेन तेषामेकविधानुपूर्व्याः प्रकृते न्यायलक्षणघटकत्वेऽन्यविधानुपूर्वीकप्रतिज्ञागर्भन्यायाव्याप्तिः, पक्षधर्मिक-साध्यवत्ताबोधकवाक्यत्वेन कथञ्चित्तादृशसकलप्रतिज्ञानामनुगम- सम्भवेऽपि यद्यद्धूमवत् तत्तद्वह्निमत् यथा महानसं यो यो धूमवान् सो सोऽग्निमान् यथा

एकवाक्यताव्यवहारस्तु विशिष्टैकार्थप्रतिपत्तिपरतामात्रेण। तादृशपरामर्शप्रयोजकत्वं च यदि तद्विषयतत्तत्पदार्थोपस्थापकतया तदा उदाहरणोपनययोरेव तत्पर्यवस्यति।

अथ तदानुकूल्यमात्रेण। तदा को वह्निमान्, कुतो धूमत्त्वादित्यादेरपि तथात्वमित्यादिकं समाहितम्।

अवयवत्वन्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम्।

प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाऽघटितत्वं वा वक्तव्यम्।

उभयं च प्रतिज्ञाहेतू-हेतूदाहरणे-उदाहरणोपनयौ-उपनयनिगमने

पाकदेशः इत्याद्यनेकविधानुपूर्वीकस्य वह्निसाध्यकधूमोदाहरणस्य एकोपादानेऽन्यगर्भन्यायाव्याप्तिः, साधनधर्मिकसाध्यव्याप्यताबोधजनक-वाक्यत्वेन उदाहरणानामनुगमे धूमो वह्निव्याप्य इत्यादिवाक्यस्यापि तादृशत्वेन तद्गर्भप्रतिज्ञादिपञ्चके अतिप्रसङ्गादिति ध्येयम्। अत एव पर्वतो वह्निमान् तस्मादिति क्रमिकवाक्यपञ्चकेऽपि नातिव्याप्तिः, तस्मादित्यादिभागे कथकानां हेतुत्वव्यवहारविरहेण तादृशानुपूर्व्याः प्रकृतन्यायनिरुक्त्यन्तर्गतहेतुत्वाघटक-त्वादिति वदन्ति। नाऽन्योन्येति। इदमुपलक्षणम्। न्यायावयत्वघटितस्य प्रतिज्ञात्वादेः प्रवेशे उचितानुपूर्वीकेत्यस्य वैयर्थ्यमपि स्यात् व्युत्क्रमेणोक्तानां न्यायान्तर्गतत्वेन प्रतिज्ञात्वाभावादेव तादृशसमुदायेऽतिव्याप्त्यसम्भवादिति ध्येयम्। ननु न्यायघटितप्रतिज्ञात्वादेरप्रवेशे पर्वतो वह्निमान् धूमात् यो यो धूमवान् स स्पर्शवानित्यादिभिन्नसाध्यकक्रमिकवाक्यपञ्चकेऽतिव्याप्तिः, न च तस्य उचितानुपूर्वीकत्वमेव नेति वाच्यम्, व्युत्क्रमोक्तप्रतिज्ञादिभिन्नत्व-रूपस्यौचित्यस्य तत्रापि सत्त्वादित्यत आह साध्यादीति। तथा च यादृशयादृशानुपूर्व्यवच्छिन्ने तत्पक्षसाध्यकप्रतिज्ञाव्यवहारस्तादृशान्यतमानु-पूर्वीकत्वमेव प्रकृते प्रतिज्ञात्वम्। एवं यादृशयादृशानुपूर्व्यवच्छिन्ने तत्पक्षकतद्धेतुकतत्साध्यकहेत्ववयवत्वव्यवहारस्तादृशान्यतमानुपूर्वीकत्वमेव प्रकृते प्रतिज्ञात्वम्। एवं यादृशयादृशानुपूर्व्यवच्छिन्नं तत्पक्षकतद्धेतुकतत्साध्यक-

इति विशिष्य वक्तव्यमिति।

प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकज्ञानपञ्चकान्यतमज्ञान-जनकवाक्यत्वमिति केचित्।

तस्यैवेति। तथा च तादृशजातौ साधकाभाव इति भावः। बाधकमप्याह। अन्यथेति। न्यायजन्यज्ञाने पंचावयवजन्यत्वात्पञ्च, द्वित्रादिजन्ये द्वित्राद्या, एकैकजन्ये चैकैका जातय इति जातिसंकर

हेत्ववयवत्वव्यवहारस्तादृशान्यतमानुपूर्वीकत्वमेव प्रकृते हेतुत्वम्। उदाहरणत्वादिकमपि उक्तदिशैव निरुच्य निवेशनीयमिति भावः। न चैवं पर्वतस्तेजस्वी वह्निमत्त्वात् यो योऽग्निमान्स दीप्तिमान् छविव्याप्यहुताशनवांश्चायं तस्माद्द्युतिमानित्यादिसमुदायस्यापि, तेजःसाध्यकन्यायत्वापत्तिः, इष्टत्वात्। साध्यादिवाचकपदानामेकानुपूर्वीकत्वस्य अतन्त्रत्वात्। अन्यथा घटो नेतराणीत्यादिप्रतिज्ञाघटितन्यायाव्याप्तिप्रसङ्गादिति ध्येयम्। ननु साध्यादिभेदेन न्यायनिरुक्तेरननुगमो दोष इत्यत आह व्याप्त्यादेरिति। तथा च लक्ष्यस्याप्यननुगतत्वेन लक्षणस्याप्यननुगतत्वाददोषः इति भावः। अत्र यद्यपि आनुपूर्व्याः क्रमिकतत्तद्वर्णविशिष्टचरमवर्णत्वपर्यवसन्नतया हेत्वाद्यानुपूर्व्य-वच्छिन्नस्य तदीयचरमवर्णस्य प्रतिज्ञाद्यव्यवहितोत्तरत्वासम्भवात् प्रतिज्ञादिपञ्चकस्यात्र क्रमिकत्वं दुर्घटम्, तथापि तत्तच्चरमपूर्व-पूर्ववर्णविशिष्टपूर्ववर्णत्वमपि तत्तदानुपूर्वी विनिगमकाभावादित्याशयेनेदम्। यादृशयादृशानुपूर्व्यवच्छिन्ने तत्पक्षहेतुसाध्यकन्यायव्यवहारः कथकसम्प्रदायसिद्धः तादृशान्यतमानुपूर्वीमत्त्वं तत्पक्षहेतुसाध्यकन्यायत्वमित्यत्र तात्पर्यम्। इत्थञ्च यादृशयादृशानुपूर्व्यवच्छिन्नं सामान्यतो न्यायव्यवहारः साम्प्रदायिकः तादृशान्यतमानुपूवीमत्त्वरूपं न्यायसामान्यलक्षणमपि साध्यविशेषाद्यनियन्त्रितं सुवचमिति ध्येयम्। मूलोक्तलक्षणत्यागे बीजमाह एतेनेति। समाहितमित्यग्रेऽन्वयः। प्रतिज्ञानिगमनयोरिति। ननु प्रतिज्ञार्थधर्मिको निगमनार्थप्रकारको बोधः सम्भवत्येव वह्निमान् पर्वतस्तस्माद्वह्निमानित्यन्वये बाधकाभावात् दण्डवान् रक्तदण्डवानित्यादिबोधानुरोधेन तद्विशिष्टे विशेषणान्तरावच्छिन्नस्य तस्याऽन्वये निराकाङ्क्षितत्वाभावादत आह उदाहरणेति।

अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनक-शाब्दज्ञानजनकवाक्यत्वमवयवत्वम्, अत एव वह्निव्याप्य-

---

इत्यर्थः। तत्र तत्र भिन्नभिन्नजातिकल्पने च सुतरां मानाभाव इति भावः।

प्रागेव सुतराम् पञ्चानामिति। तथा च प्रतिज्ञादिभिरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते इति मूलमसङ्गतमिति भावः। एकविशेषनिषेधस्य विशेषान्तरविधिव्युत्पन्नत्वात् तमाह परन्त्विति। कथञ्चिदिति। उपनयस्थेदंपदस्य निगमनेऽनुषङ्गपक्षे तयोरपि प्राचां मते निराकाङ्क्षतया परस्परमन्वयबोधा-सम्भवादिति भावः। यद्यपि धूमाद्वह्निमत्पर्वताभिन्नो यो यो धूमवान् धूमव्यापकवह्निमान् तदभिन्नो वह्निव्याप्यधूमवानयं तस्माद्वह्निमानिति क्रमेण पञ्चावयवानां सम्भूय विशिष्टवैशिष्ट्यबोधजनकत्वं वह्न्यादिसाध्यकन्यायस्थले सम्भवत्येव, तथापि चैत्रः पचति चैत्रत्वात् यो यश्चैत्रः स पचतीत्यादावुक्तक्रमेण पाककर्तृत्वादिविशिष्टविशेष्यकान्वयबोधासम्भवात् तादृशन्यायव्याप्तौ तात्पर्यम्, कृत्यवच्छिन्नविशेष्यकशाब्दबोधं प्रति **नामजन्याया**स्तिङन्यपदजन्याया वा कृत्युपस्थितेस्तन्त्रत्वात्। पक्ता चैत्रो गच्छतीत्यादाविव पचति चैत्रो गच्छतीत्यादावपि पाककर्तृत्वावच्छिन्ने चैत्रे गतिमत्त्वस्याऽन्वयबोधापत्तेः। यो यः पचति स ज्ञाता इत्यादौ यत्पदेनैव लक्षणया पक्तृत्वावच्छिन्नः प्रत्याय्यत इति तद्धर्मिकपक्तृत्वव्यापकीभूतज्ञातृत्वान्वयो नानुपपन्नः। वीप्सितार्थविधेयकान्वयबोधातिरिक्तस्थल एव उक्तव्युत्पत्त्यादरे तु तत्र पक्तृत्वस्य तिङर्थत्वेऽपि न क्षतिः, फलानुरोधित्वाकल्पनायाः। वस्तुतो व्यतिरेक्युदाहरणगर्भन्यायस्थल एव उक्तक्रमेण विशिष्टवैशिष्ट्यबोधो दुर्घटः। [एवमुदाहरणमात्रस्योद्देश्यविधेयभावेन स्वार्थबोधं प्रति स्वरूपायोग्यत्वे कस्यापि न्यायस्य न विशिष्टवैशिष्ट्यान्वयबोधजनकत्वमित्युक्तमेवेति स्मर्तव्यम्।] दृष्टान्तस्य न्यायघटकत्वपक्षे तूदाहरणस्य विशिष्टवैशिष्ट्यान्वयो दुर्घटः यथा महानस इत्यादिदृष्टान्तस्य कुत्राप्यनन्वितत्वादिति ध्येयम्। नन्वेवं पञ्चावयवानामेकवाक्यताव्यवहारस्तान्त्रिकाणां कथं स्यादित्यत आह एकेति। विशिष्टेति। विशिष्टैकार्थप्रतीतीच्छाप्रयोज्यत्वमात्रेणेत्यर्थः। मात्रपदेन

धूमवानयमिति वाक्ये तदवयवे च न न्यायतदवयव-लक्षणातिव्याप्तिः तेन परामर्शस्य तदवयवेन परामर्शजनकस्य जननात्।

केचित्तु यदि चानुगतकारणमन्तरेणापि तादृशजातिमत्त्वसंभवस्तदा कदाचित्प्रतिज्ञाजन्येऽपि हेत्वादिजन्यवृत्तिर्हेत्वादिजन्ये प्रतिज्ञादि-जन्यवृत्तिर्जातिः स्यादिति संकर एवेत्यर्थः। एवं सर्वेषां

तादृशप्रतिपत्तिजनकत्वव्यवच्छेदः। ननु प्रतिज्ञादिपञ्चवाक्यैरिति मूलस्य प्रतिज्ञादिभिरेकवाक्यतापन्नत्वज्ञानसहकारेण प्रत्येकं स्वस्वार्थविशिष्टज्ञानं जन्यते तेनाऽवान्तरवाक्यार्थज्ञानरूपेण प्रतिज्ञार्थे हेत्वर्थस्य उपनयार्थे निगमनार्थस्य विशिष्टवैशिष्ट्यावगाहि यन्मानं महावाक्यार्थज्ञानं तदुत्थाप्यते जन्यते इत्यर्थकरणान्नासङ्गतिरतो मूलोक्तलक्षणे दोषमाह तादृशपरामर्शेति। अनुमितिचरमकारणपरामर्शेत्यर्थः। तद्विषयेति। परामर्शविषयेत्यर्थः। तत्तत्पदार्थसार्थो व्याप्तिपक्षधर्मतेति। तदुपस्थापकतया तद्विषयकतयेत्यर्थः। तेन शाब्दबोधनिष्ठस्यैव प्रयोजकत्वस्य मूलेऽभिधानान्नासङ्गतिः। सर्वदा उदाहरणस्य परामर्शविषयीभूत-पक्षानुपस्थापकत्वादुपनयपर्यन्तानुसरणम्। तदिति। मूलोक्तपरामर्शजनकशाब्द-धीजनकत्वमित्यर्थः। तथा चाऽसम्भव एव लक्षणस्य दोषः उदाहरणादावति-व्याप्तिर्वा इति भावः। तदानुकूल्यमात्रेणेति। परामर्शविषयीभूतार्थ-विषयत्वमात्रेणेत्यर्थः। तादृशपरामर्शप्रयोजकत्वमिति पूर्वेणान्वयः। इत्यादेरित्यादिना न्यायसमानार्थकस्य तावद्विसदृशवाक्यस्तोमस्य परिग्रहः। तथात्वं परामर्शप्रयोजक-शाब्दधीजनकत्वम्। इत्यादिकमित्यादिना प्रतिज्ञाद्येकैकस्मिन्नतिप्रसङ्गोपग्रहः। मूलोक्तावयवलक्षणस्याप्युक्तदोषग्रस्तत्वात्स्वयं तल्लक्षणमाह अवयवत्वं त्विति। अत्र प्रतिज्ञासमानानुपूर्वीकस्य उदासीनवाक्यस्य वारणाय सत्यन्तम्। न्यायान्तर्गतत्वगर्भप्रतिज्ञात्वादिकमुपादाय तदन्यतमत्वोक्तौ न्यायान्तर्गतत्वस्य पञ्चधा प्रवेशे गौरवं स्यादतः सकृदेव पार्थक्येन निवेशितमिति ध्येयम्। न च प्रकृतपक्षहेतुसाध्यकैकविधन्यायान्तर्गतत्वस्योक्तावन्यानुपूर्वीकतादृश-न्यायवयवेऽव्याप्तिरिति वाच्यम्। प्रकृतपक्षहेतुसाध्यकन्यायसामान्यं यदघटितं तदन्यत्वस्य विवक्षितत्वात्। यादृशयादृशानुपूर्व्यवच्छिन्नस्य प्रकृतपक्षहेतु-

सर्वजातीयत्वमेकजातीयत्वं वा स्यादित्यपि द्रष्टव्यमित्याहुः।

साध्यनिर्देशः प्रतिज्ञेति सूत्रम्। साध्यो विधेयधर्मविशिष्टोधर्मी।

तथा च पक्षतावच्छेदकपर्वतत्वादिविशिष्टे साध्यतावच्छेदक-

साध्यकन्यायत्वं तादृशतादृशानुपूर्व्याः प्रत्येकानन्तर्गतं यत्तदन्यत्वे सति इति तु फलितार्थः। यत्तु प्रकृतपक्षहेतुसाध्यकयावन्न्यायविषयिताव्यापक-विषयिताकत्वमेव प्रकृतन्यायान्तर्गतत्वमिति। तन्न। उदासीनवाक्याविषयके यावन्न्यायविषयकैकज्ञाने मानाभावेनाऽसम्भवापत्तेः। प्रतिज्ञाद्येकदेशेऽति-व्याप्तेर्वारणाय विशेष्यदलम्। तत्र प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञादिस्वरूपमेव तद्भिन्नभेदस्य तदात्मकत्वात् तथा च यदात्मकं यत्र प्रतिज्ञाद्यन्यतमत्त्वं तस्य ताद्रूप्येण न्यायावयवत्वं साध्यसम्बन्धितावच्छेदकयद्रूपवत्त्वं यस्य यस्य ताद्रूप्येण साध्यव्याप्यतावत्। अन्यथा सत्ताया एकत्वादिविशिष्टसत्ता द्रव्यत्वव्याप्येतिवत् शुद्धसत्ता द्रव्यत्वव्याप्येति व्यवहारापत्तेः साध्यसम्बन्धितावच्छेदकीभूतविशिष्टसत्तात्वस्यैव शुद्धसत्तायां सत्त्वात्। एवञ्च क्रमिकतत्तद्वर्णविशिष्टचरमवर्णत्वपर्यवसितस्य प्रतिज्ञात्वादेरन्तिमवर्णवृत्तित्वेऽपि न तन्मात्रऽवयवव्यवहारः। यादृशयादृशानुपूर्व्यवच्छिन्ने तान्त्रिकाणां प्रकृतपक्षहेतुसाध्यकप्रतिज्ञाहेत्वादिव्यवहारः तादृशतादृशानुपूर्व्यन्यतमत्वे तात्पर्य्यम्। यत्तु यादृशयादृशवर्णस्तोमे तान्त्रिकाणां प्रतिज्ञादिव्यवहारः तादृशतादृशवर्णस्तोमान्यतमत्वमेव प्रतिज्ञाद्यन्यतमत्वं वाच्यमतो नैकवर्णेऽतिप्रसङ्गः इति। तत्तुच्छम्। तथासति प्रतिज्ञादिघटकेषु सर्वेष्वेव वर्णेषु प्रत्येकं क्रमिकतावद्वर्णसमुदायात्मकस्य प्रतिज्ञादेभेदसत्त्वात्त-द्भिन्नभेदात्मकस्य प्रतिज्ञाद्यन्यतमत्वस्य प्रतिज्ञाद्यवयवमात्र एवाऽसम्भवापत्तेः। नन्वेवं रमाधवः पूज्यो रमाधवत्वादित्यादौ प्रतिज्ञाघटकस्य माधवः पूज्य इत्यस्य हेतुघटकस्य माधवत्वादित्यस्य च निरुक्तप्रतिज्ञाद्यन्यतमत्वात्त-मादायाऽतिव्याप्तिः एवं पर्वतो धूमाद् गुणवान् धूमादित्यादौ धूमजगुणत्वेन साध्यतायां प्रतिज्ञादिपञ्चानामेवावयवानां घटिकायां धूमादित्यानुपूर्व्यामपि। न चोक्तलक्षण एव प्रतिज्ञाद्यघटकत्वे सतीत्यपि विशेषणं देयमतो नैष दोषः, तथा सत्यपि प्रतिज्ञात्वादिपर्यवसितेन प्रतिज्ञाद्यन्यतमत्वेनावयवाना-

यत्तु संक्षेपतः परामर्शप्रयोजकवाक्यत्वेन विशेषाभावात् सोऽपि न्याय एवेति, तन्न, कथायामाकाङ्क्षाक्रमेणाभिधानमिति प्रथमं विशिष्टवैशिष्ट्य आकाङ्क्षा नास्तीति तदभिधाने

वह्नित्वविशिष्टवैशिष्ट्यज्ञानजनको न्यायावयव इति पर्यवसितार्थः।

उदाहरणाच्च पक्षतावच्छेदकविशिष्टे न साध्यवैशिष्ट्यज्ञानम्।

उपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदकविशिष्ट-वैशिष्ट्यज्ञानमिति तयोर्व्युदासः।

किन्त्वित्यादि। प्रकृतन्यायबहिर्भूतवाक्यवारणाय सत्यन्तम्, प्रकृतन्यायावयवत्वपर्यवसितम्। उद्देश्येति। प्रकृतेत्यर्थः।

मितरभेदसाधने प्रतिज्ञात्वादेरेव गमकत्वसम्भवेऽन्यतमत्वांशस्य व्यर्थविशेषणत्वेन लक्ष्यत्वानुपपत्तेः। (न चान्यतमत्वमत्र न प्रतिज्ञात्वादिरूपं किन्त्वतिरिक्तो भेद इति वाच्यम्। तावतापि यत्र पर्वतत्वाद्यवच्छेदेन वह्नेः साध्यतायां तत्सामानाधिकरण्येन यथाऽयं पर्वत इति दृष्टान्तोपन्यासः तत्र पर्वतो वह्निव्याप्यधूमवानित्यन्तस्य उदाहरणोपनयघटकभागद्वयस्यापि पर्वतधर्मिक-साध्यव्याप्यवत्ताबोधकत्वेन प्रतिज्ञाद्यन्यतमत्त्वात् प्रतिज्ञाद्यघटकत्वाच्च तत्रातिव्याप्तिः) इत्यस्वरसाल्लक्षणान्तरमाह प्रतिज्ञाद्यघटकत्वे सतीति। प्रतिज्ञाद्येकदेशेऽतिव्याप्तिवारणार्थं सत्यन्तम्। अत्र च स्वान्यप्रतिज्ञाविषयता-व्यापकविषयताकत्वेन स्वविषयिताशून्यज्ञानावृत्तिस्वान्यप्रतिज्ञाविषयताकत्वेन वा प्रतिज्ञाघटकत्वं निरुच्य तदन्यत्वं निवेश्यं प्रतिज्ञाविषयतायामपि तद्विषयिताव्यापकत्वादसम्भवः स्यादतः स्वान्येति प्रतिज्ञाविशेषणम्। एवं हेत्वादिघटकत्वमपि निर्वाच्यम्। यद्यपि सर्वेषामेव पदार्थानां प्रतिज्ञादिघटकत्वात्तदन्यत्वं न प्रतिज्ञादावपि, तथापि प्रतिज्ञात्वान्ययद्धर्मा-वच्छिन्नविषयित्वं प्रतिज्ञाविषयताव्यापकं तद्धर्मावच्छिन्नयायान्तर्गतविषयितावत्त्वं वाच्यम्। एवं हेत्वाद्यघटकत्वमपि निर्वाच्यम्। प्रतिज्ञाहेतुसमुदायादावति-व्याप्तिवारणार्थमुभयघटकभागद्वयाघटितत्वमिति। ननु प्रतिज्ञादेरपि

निग्रहादिति वक्ष्यते, अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्तिः आकाङ्क्षाविरहस्तुल्य एव।

वह्निसाध्यकोपनयस्य वह्निव्याप्यधूमसाध्यकाऽनुमित्यन्यूनाऽनतिरिक्तविषयकशाब्दबोधजनकस्य वारणाय प्रकृतद्वयं। तथा च यादृशपक्षसाध्यक न्यायावयवत्वं तादृशपक्षसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वं पर्यवसितोऽर्थः।

धूमादालोकवान्पर्वतोवन्हिमान्धूमादित्यादावनतिरिक्तविषयकज्ञानजनकस्य हेतोर्वारणायाऽन्यूनेति। निगमनवारणायाऽनतिरिक्तेति।

यद्यपि निगमने साक्षात्पक्षवाचकपदं न श्रूयते तथापि

स्वीयदलद्वयघटकभागद्वयघटितत्वादसम्भवोऽव्याप्तिर्वा इत्यत आह उभयञ्चेति। न चैवं निगमनेऽऽव्याप्तिः उपनयस्थायंपदघटितस्य अयं तस्माद् वह्निमानिति निगमनस्योपनयघटकायं पदेन निगमनघटकवह्न्यादिपदेन च घटितत्वादिति वाच्यम्। अन्वयबोधार्थमयं पदस्याऽनुषङ्गेऽपि तदन्तर्भावेण निगमनत्वाभावात् तस्माद्वह्निमानित्येव निगमनाकारत्वात् निगमनाघटकं सत् यदुपनयघटकं यच्चोपनयाघटकं सत् निगमनघटकं तदुभयाघटितत्वं वा लक्षणे निवेश्यम्। तथा चायं पदस्य उपनय इव निगमनेऽपि घटकत्वाददोषः। न च प्रतिज्ञाघटकहेतुघटकोभयाघटितत्वादित्यादिना प्रवेशेऽपि प्रतिज्ञोपनयसमुदायेऽतिव्याप्तिस्तादृशोभयाघटितत्वादिति वाच्यम्। उदासीनवाक्यवारणार्थमवश्यमनुषञ्जनीयेन न्यायान्तर्गतत्वे सतीत्यनेनैव तादृशसमुदायस्य वारणात् न्यायविषयिताव्यापकविषयिताप्रतियोगित्वरूपस्य प्रकृतपक्षहेतुसाध्यकन्यायसामान्यं यदघटितं तदन्यत्वरूपस्य वा न्यायान्तर्गतत्वस्य प्रतिज्ञोपनयसमुदायस्य कुत्राप्यसत्त्वात्। केचित्तु प्रतिज्ञाहेत्वित्यत्र हेतुपदं प्रतिज्ञाघटकान्यपरं तथा च प्रतिज्ञाघटकप्रतिज्ञा- घटकान्योभयाघटितत्वे सतीत्यर्थलाभान्नोक्तदोषः। एवं हेतूदाहरणेत्यादावपि उदाहरणाद्यन्तिमपदं हेत्वादिघटकान्यपरं नातो हेतूपनयसमुदायादावति- व्याप्तिरित्याहुः। तच्चिन्त्यम्।

अन्ये तु पञ्चावयववाक्याद्विजातीयमेव शाब्दज्ञानमुत्पद्यत इति तद्धिजनकवाक्यत्वं न्यायत्वम्, एवं प्रतिज्ञाद्यवयवादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्धीजनकशाब्दत्वमेव तत्तल्लक्षणमिति, तन्न, ज्ञानविशेषजनकत्वं तत्तज्ज्ञानजनकत्वं वा न्याये प्रतिज्ञादौ चानतिप्रसक्तमनुगत- रूपमन्तरेण

न्यूनताभंगायोपनयस्थाऽयमादिपदस्याऽनुषङ्गात्तथा बोध्यम्। इत्थमेव च प्रसक्तामतिप्रसक्तिनिगमनंचेत्यादिना निराकरिष्यति।

तदर्थश्च निगमनमन्यूनाऽनतिरिक्तविषयकशाब्दज्ञानजनकं सन्न परामर्शहेतुःयेन निरुक्तन्यायावयवत्वरूपं प्रतिज्ञात्वं तदपि व्याप्नुयात्। अबाधितत्वादेस्तद्बोधौपयिकविशिष्टहेतुसंबन्धस्य च बोधकतया

कस्यचिदवयवलक्षणमाह प्रतिज्ञादीति। तत्तद्विशिष्टाविषयकेत्यादेस्तन्मात्र-विषयकेत्यर्थः। तेन प्रतिज्ञाहेतुसमुदायस्य प्रतिज्ञार्थज्ञानजनकत्वेऽपि न तत्राऽतिव्याप्तिः। वाक्यत्वं न्यायान्तर्गतवाक्यत्वम्। तेन उदासीनवाक्ये नातिव्याप्तिः। अत्र तादृशान्यतमबोधजनकत्वं तत्स्वरूपयोग्यत्वमेव वाच्यम् अन्यथा सभाक्षोभादिवशाद्बोधाजनकप्रतिज्ञादावव्याप्त्यापत्तेः, तथा च चित्रभानुः प्रमेयो द्रव्यत्वादित्यादौ प्रतिज्ञैकदेशे भानुः प्रमेय इत्यत्रातिव्याप्तिःतस्यापि तादृशविशिष्टार्थबोधस्वरूप- योग्यत्वादित्यस्वरसः केचिदित्यनेन सूचितः। नन्वेकलक्षणस्य लक्षणान्तरादूषक- त्वात् तस्यैवेति मूलमसङ्गतमत आह तथा चेति। तादृशजाताविति। न्यायप्रयोज्यायां प्रतिज्ञादिप्रत्येकप्रयोज्यायाञ्च जातावित्यर्थः। साधकाभाव इति। अन्यथा प्रतिज्ञाव्यवहार-सम्भवाज्जातिसाधकाभाव इत्यर्थः। बाधकमिति। प्रतिज्ञादिप्रत्येकप्रयोज्यायां जातावित्यादिः। न्यायप्रयोज्यजातेः प्रतिज्ञादिप्रयोज्यजातिव्याप्यत्वोपगमे साङ्कर्य्यासम्भवादिति ध्येयम्। पञ्चेति। जातय इत्यग्रेऽन्वयः। प्रतिज्ञादिपञ्चवाक्यैरेकबोधजननपक्षेपि साङ्कर्य्यार्थमाह द्वित्रादीति। ननु द्वित्रादिजन्ये प्रत्येकजन्ये च शाब्दबोधे विरुद्धा एव नानाजातयो वाच्यास्तत्कुतः साङ्कर्य्यमत आह तत्रेति। सुतरामिति। प्रतिज्ञाव्यवहारानुरोधेन

तस्यातिरिक्तविषयकज्ञानजनकत्वादिति।

यत्तु पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ यन्न पृथिवीतरेभ्यो भिद्यते तन्न पृथिवीत्युदाहरणवारणाय तदिति।

तत्तुच्छम्। तेन पृथिव्यामितरभेदस्याऽविषयीकरणात्। तात्पर्यभ्रमेण तादृशबोधजनकत्वस्याऽतिप्रसक्तत्वात्।

न च तावताप्युदाहरणस्य तथात्वसंभवः। यन्नेत्यादेरनन्वयात्।

यदि च निगमने नायमादिपदं निविशते वाक्यैकवाक्यतयैव विशिष्टार्थभानादिति विभाव्यते, तदा हेतौ साध्यसामानाधिकरण्यभाने

प्रत्येकजन्यबोधवृत्तिवैजात्यसत्त्वेपि द्वित्रादिजन्यबोधे तद्विरुद्धजातेः कल्पकाभावादिति भावः मिश्रमतमाह केचित्त्विति। मूलस्थमन्यथापदं व्याकरोति यदि चेति। कदाचिदिति साङ्कर्यसम्पत्तये। ननु नियामकाभावान्मिथो व्यभिचार एव नास्ति कुतः सङ्कर इत्यत आह एवमिति। ननु समनियतनाना-जातेरनङ्गीकारात्सर्वजातीयत्वमसङ्गतमत आह एकजातीयत्वं वेति। तथा च सर्वमेव लक्षणमवयवान्तरेऽतिव्याप्तमिति भावः। सङ्करपदस्य मुख्यार्थयोगोऽत्राऽस्वरसः।।

वक्ष्यमाणार्थस्य शब्दाल्लाभार्थमाह साध्य इति। अत्र जनकान्तेन हेत्वादेरवयव इत्यनेनोदासीनवाक्यस्य व्युदासः। न च पर्वतो वह्निमानिति प्रतिज्ञायां वह्निमत एव तादात्म्येन प्रकारत्वान्न पक्षे साध्यतावच्छेदकीभूतवह्नित्व-विशिष्टवैशिष्ट्यावगाहिधीजनकत्वं नामार्थयोर्भेदान्वयस्याऽव्युत्पन्नतया पर्वते वह्नेः संयोगेन प्रकारत्वाभावादिति वाच्यम्। भेदार्थकविभक्तीनामिव तदर्थकमतुबादीनामपि समभिव्याहारवशेन नामार्थयोर्भेदान्वयस्य प्राच्यैरुपगमात् तन्मत एवैतल्लक्षणकरणादिति भावः। पक्षतावच्छेदकविशिष्टेत्यस्य व्यावृत्तिमाह उदाहरणाच्चेति। न च यत्र पर्वतत्वावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे तत्सामानाधिकरण्येन पर्वतस्य दृष्टान्तता तत्र उदाहरणेऽतिव्याप्तिरिति वाच्यम्। पक्षतावच्छेदकनिष्ठावच्छेदकत्वाद्यवगाहिताया अपि विशिष्य प्रवेशनीयत्वादिति

दुर्निरूपमिति तत्स्वीकारे तस्यैव लक्षणत्वात् अन्यथा जातिसङ्करप्रसङ्गः।

तत्र प्रतिज्ञा न साध्यनिर्देशः साध्यपदेऽतिव्याप्तेः[६]।

सामान्यतः पक्षेऽपि साध्यवत्त्वभानात्पक्षे हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताबोधकस्योपनयस्य यत्र च पक्षसाध्ययोस्ताद्रूप्येण दृष्टान्तत्वहेतुत्वाभ्यामुपन्यासः तादृशसिषाधयिषया च न्यायप्रयोगस्तत्रोदाहरणोपनययोः।

यत्र वा पर्वतत्वाद्यवच्छेदेन साध्यसिद्धेरुद्देश्यतायामेतत्पर्वतत्वादिना दृष्टान्तस्योपन्यासस्तत्रोदाहरणस्य।

सत्यन्तस्य चाऽवयवाऽघटकन्यायान्तर्गतत्वपरतया हेत्वन्तस्याऽयमादिनिगमनान्तभागस्य वारणाय तत्।

भावः। साध्यतावच्छेदकेत्यस्य फलमाह उपनयाच्चेति। द्रव्यव्याप्यधूमवान्पर्वत इत्युपनयाच्चेत्यर्थः। यत्र येन सम्बन्धेन साध्यता तत्र तेनैव साध्यवैशिष्ट्यावगाहित्वं बोध्यम्। तेन यत्र विषयतासम्बन्धेन ज्ञानस्य साध्यतायां समवायेनैव ज्ञानं हेतुः तत्र ज्ञानव्याप्यज्ञानवानयमित्युपनये नातिप्रसङ्गः, सिषाधयिषया च न न्यायप्रयोग इति भावः। तयोः उदाहरणोपनययोः। सर्वमिदमापाततः। प्रतिज्ञासहकारेण हेत्ववयवस्यापि प्रकृतपक्षधर्मिकस्वार्थविशिष्टप्रकृतसाध्यबोधकतया तत्रातिप्रसङ्गस्य दुर्वारतापत्तेः। परन्तु तद्वारणाय प्रकृतपक्षधर्मिकप्रकृतसाध्यान्वयबोधत्वावच्छिन्नं प्रति जनकत्वमेव लक्षणं वाच्यम्, अत्र च प्रकृतपक्षसाध्ययोरेकमात्रस्योपादाने प्रतिज्ञामात्रेऽसम्भवापत्तिरतो द्वयमुपात्तमित्येव तत्त्वम्। [ननु प्रकृतपक्षधर्मिकयत्किञ्चित्प्रकारकशाब्दत्वावच्छिन्नं प्रति यत्किञ्चिद्धर्मिकप्रकृतसाध्यप्रकारकशाब्दत्वावच्छिन्नं प्रति वा जनकत्वं कुतो न निवेशितमित्याशङ्कयैव उदाहरणाच्चेत्यादिको ग्रन्थ इति न कञ्चिद्दोषः।] बहिर्भूतवाक्यस्येति। प्रतिज्ञासमानार्थकस्येति। शेषः। तस्यापि कथञ्चित्-

किन्तूद्देश्यानुमिति- हेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यम्।(७)

अन्यूनानतिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा

यद्यपि सर्वमभिधेयं प्रमेयमित्यादावतिरिक्ताऽप्रसिद्धिः

न च कोट्यप्रसिद्ध्या प्रमेयं न वेति विप्रतिपत्तेः संशयस्य चाऽयोगान्न तादृशी प्रतिज्ञा, प्रकृतानुमितिविषयतासमव्याप्त-विषयताकत्वं, प्रकृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वा वक्तव्यमिति वाच्यम्। सकलाभिधेयवृत्तिधर्मवत् सकलाभिधेय-

---

परामर्शप्रयोजकशाब्दधीजनकत्वात् यथाश्रुते सत्यन्तदलेन वारणासम्भवादाह प्रकृतन्यायेति। साध्यव्याप्यवत्त्वानुमितेरपि कदाचिदुद्देश्यत्वादुपनयेतिव्याप्तिरतो व्याचष्टे प्रकृतेत्यर्थ इति। वह्निसाध्यकेत्यादिः। न्यायावयवत्वे सति प्रकृतानुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वोक्तौ वह्निव्याप्यधूमसाध्यक-प्रतिज्ञालक्षणस्य वह्निसाध्यकोपनयेऽतिव्याप्तिः तस्यापि न्यायावयवत्वात् वह्निव्याप्यधूमसाध्यकानुमितिसमानाकारकबोधजनकत्वात् च अतः प्रकृतद्वयमित्यर्थः। इदन्तु चिन्त्यते। वह्निसाध्यकोपनयस्य व्यावृत्तये प्रकृतद्वय-मित्यसङ्गतं साध्यादिभेदेन प्रतिज्ञायां विभिन्नतया वह्निसाध्यकप्रतिज्ञालक्षणे यत्किञ्चिन्न्यायावयवत्वे सति वह्निसाध्यकानुमित्यन्यूनानतिरिक्तविषयक-बोधजनकत्वमात्रस्यैव सम्यक्त्वेन तत्र प्रकृतन्यायावयवत्वपर्यन्तप्रवेशे वैयर्थ्यात्। प्रकृतन्यायावयवत्वे सति अनुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वोक्तौ च वह्निसाध्यकप्रतिज्ञालक्षणस्य तत्साध्यकोपनयेऽतिव्याप्तिः तस्यापि वह्निव्याप्यधूमसाध्यकानुमितिसमानाकारबोधजनकत्वात् च किन्तु वह्निव्याप्यधूम-साध्यकप्रतिज्ञालक्षणस्य वह्निसाध्यकोपनयेऽतिव्याप्तिवारणार्थमेव प्रथमं प्रकृतपदम्, द्वितीयन्तु तस्यैव लक्षणस्य वह्निव्याप्यधूमसाध्यकोपनये-ऽतिव्याप्तिवारणार्थम्, तादृशोपनयस्यापि यत्किञ्चिदनुमितिसमानाकारक-

ज्ञानविशेषणं तेनोदाहरणादिव्युदासः, निगमनञ्च न परामर्शहेतुः अबाधितासत्प्रतिपक्षिततत्त्वज्ञानजनकत्वात्।

निष्ठात्यन्ताभावाप्रतियोगि आकाशाभाववद्वा इदं द्रव्यमित्यादौ विशिष्टपक्षबोधके उपनयेऽतिव्याप्तेः।

तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयत्वं तदन्यूनविषयत्वम्।

बोधजनकत्वात् न च वह्निसाध्यकप्रतिज्ञालक्षणे अनुमित्यंशे यत्प्रकृतत्वं यच्च वह्निव्याप्यसाध्यकप्रतिज्ञालक्षणे न्यायावयवत्वांशे प्रकृतत्वं तदुभयं वह्निसाध्यकोपनयस्य वारणाय इत्यर्थकरणान्नाऽसङ्गतिरिति वाच्यम्। तथाप्येकलक्षणस्थप्रकृतद्वयस्य व्यावृत्त्यननुधावने सन्दर्भविरोधित्वापत्तेरिति ध्येयम्। प्रकृतेत्यस्यार्थं व्याकरोति यादृशपक्षसाध्यकेति। यद्धर्मावच्छिन्न-साध्यपक्षकेत्यर्थः। न च तद्धर्मावच्छिन्नसाध्यकन्यायावयवत्वे सति तद्धर्मावच्छिन्नसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वमेव तद्धर्मावच्छिन्नसाध्यकप्रतिज्ञात्वमस्तु तद्धर्मावच्छिन्नपक्षप्रवेशो व्यर्थ इति वाच्यम्। तद्धर्मावच्छिन्नसाध्यकानुमितिविषयत्वसमनियतविषयताकत्व-पर्यवसितस्य तद्धर्मावच्छिन्नसाध्यकानुमित्यन्यूनानतिरिक्तविषयत्वस्याऽप्रसिद्ध्या प्रतिज्ञामात्र एवाऽसम्भवापत्तेः। प्राञ्चस्तु बुद्धिविषयत्वं धूमज्ञानजन्यज्ञानीयं धूमादित्यादिन्यायस्थलीयहेत्ववयवे विषयत्वमात्रपक्षकधूमज्ञानजन्यज्ञानीयत्व-साध्यकप्रतिज्ञालक्षणस्याऽतिव्याप्तिवारणार्थमवश्यं तद्धर्मावच्छिन्नपक्षकत्वेन न्यायावयवो विशेषणीयः। अन्यथा तत्रापि धूमज्ञानजन्यज्ञानत्वत्वावच्छिन्न-साध्यकन्यायावयवत्वस्य विषयत्वत्वावच्छिन्नपक्षकधूमज्ञानजन्यज्ञानीयत्वत्वाव-च्छिन्नसाध्यकानुमितिसमानाकारकशाब्दधीजनकस्य च द्वयोः सत्त्वेनाति-व्याप्त्यापत्तेः। बुद्धिविषयत्वत्वावच्छिन्नपक्षकन्यायावयवस्य हेतोर्विषयत्व-त्वावच्छिन्नपक्षकन्यायावयवत्वाभावादेव व्युदासात्। इत्थञ्चानुमित्यंशेऽपि तद्धर्मावच्छिन्नपक्षकत्वं देयम्। अन्यथा वह्निविषयत्वत्वावच्छिन्नपक्षकोपदर्शित-प्रतिज्ञालक्षणस्य तत्र हेत्ववयवेऽतिव्याप्त्यापत्तेः तस्यापि विषयत्वत्वावच्छिन्न-पक्षकप्रकृतानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वादित्याहुः। तच्चिन्त्यम्। हेतोरिति न चोक्तस्थले अनुमितावालोकनिष्ठमेव धूमज्ञानज्ञाप्यत्वं

हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा।

लिङ्गाविषयकलिङ्गिविषयकज्ञानजनकन्यायावयववाक्यत्वं वा इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात्।

प्रतिज्ञात्वं जातिः अनुगतानतिप्रसक्ततान्त्रिकव्यवहारादिति

पञ्चम्यर्थपक्षकप्रतिज्ञादिस्थले तु पक्षे प्रकृत्यर्थस्य वैशिष्ट्यबोधको हेतु र्नतु प्रकृतसाध्यस्य।

तादृशविषयताविलक्षणविषयताशून्यत्वम् प्रकृतहेतुकप्रकृतसाध्य-

भासत इत्यतिरिक्तविषयकत्वादेव उक्तहेतावतिव्याप्त्यसम्भव इति वाच्यम्। अत एवाऽस्वरसादादिपदेन ज्ञेयाद्वाच्यवत्सर्वं प्रमेयं ज्ञेयादित्यादिस्थलीय-हेतोरुपग्रहात् प्रकृतानुमितिविषयताबहिर्भूतविषयताशून्यत्वरूपस्य प्रकृतसाध्य-व्याप्त्यविषयकत्वरूपस्य वा वक्ष्यमाणानतिरिक्तविषयत्वस्य धूमादालोकवान् पर्वतो. वह्निमान् धूमादित्यादिस्थलीयहेतावप्यनपायाच्च। केचित्तु हेत्ववयव-जन्यबोधस्य धूमज्ञानजन्यज्ञानविषय इत्याकारकस्य आलोकेतरस्मिन् बाधदशायामुक्तस्थलेऽप्यन्यूनपदस्य व्यावृत्तिरिति व्याचक्षते। यत्तु धूमात्तेजस्वी पर्वतो वह्निमान् धूमादित्यादिस्थलीयहेतावतिव्याप्तिवारणार्थमेव अन्यूनपदम्, तत्र वह्निनिष्ठस्यैव धूमज्ञानज्ञाप्यत्वस्याऽनुमितौ हेतुजन्यबोधे च भानादिति। तत्तुच्छम्। तत्रापि प्राथमिकेन हेतुजन्यबोधेनाकाङ्क्षादिसाम्याद्धूमज्ञानज्ञाप्यत्वत्वेन द्रव्यत्वादिनिष्ठस्य धूमज्ञानज्ञाप्यत्वस्य विषयीकरणादनतिरिक्तविषय-कत्वासम्भवात्। ननु निगमनस्य पक्षतावच्छेदकरूपेण पक्षाबोधकत्वादन्यूनपदेनैव तद्वारणं सम्भवतीत्यत आह यद्यपीति। सम्बन्धित्वप्रकारेण पक्षबोधकं सत्त्वादिमेव निगमनेऽस्तीत्यतः साक्षादिति। पक्षतावच्छेदकरूपेणेत्यर्थः। न्यूनतेति। निगमनस्य प्रतिज्ञासमानाकारबोधजनकतायामेव पुनरुक्तताप्रतिसन्धानाद-बाधितत्वादिरूपबोधकत्वं तस्य लभ्यते नान्यथा इति भावः। अयमादीत्यादिपदादियमिति स्त्रीलिङ्गे, नपुंसकलिङ्गे चेदमित्यस्य परिग्रहः। तथेति। अन्यूनविषयकत्वमित्यर्थः। इत्थमेव चेति। अयमादि-पदानुषङ्गादन्यूनविषयकज्ञानजनकत्वेनैवेत्यर्थः। ननु निगमनस्य

केचित्, तन्न, देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गात्, प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं वाक्यं प्रतिज्ञेत्यपि न, तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण

सिद्ध्यौपयिकव्याप्तिविषयकत्वं वा तदनतिरिक्तविषयकत्वम्।

वह्निव्याप्यालोकवत्सधर्मा पर्वतो वन्हिमान्धूमात्, इन्धनव्याप्यधूमवान्पर्वतो वन्हिमान्धूमादित्यादौ तस्या: संग्रहाय

कथञ्चित्परामर्शप्रयोजकत्वान्न परामर्शहेतुरिति मूलासङ्गतिरित्यत आह तदर्थश्चेति। न परामर्शहेतुरिति। इदञ्च सत्यन्तमूलस्य यथाश्रुतार्थमभिप्रेत्य। वस्तुत: परामर्शपदस्य ज्ञानवाचकतया निगमनं नान्यूनानतिरिक्तविषयकज्ञानहेतुरित्येवार्थो बोध्य इति ध्येयम्। येनेति। सत्यन्तस्य प्रकृतन्यायावयवार्थकतया व्याख्यातत्वादिति भाव:। निरुक्तेति। प्रकृतानुमित्यन्यूनानतिरिक्तविषयकज्ञानजनकत्वे सति प्रकृतन्यायावयवत्वरूपमित्यर्थ: तदपि निगमनमपि। अबाधितत्वादेरित्यादिपदात्सत्प्रतिपक्षस्य सङ्ग्रह:। अबाधितत्वादेरपदार्थतया निगमनबोध्यत्वासम्भवादाह तद्बोधेति। विशिष्टेति। व्याप्तिविशिष्टपक्षधर्मताविशिष्टहेतोर्य: साध्ये ज्ञानज्ञाप्यत्वलक्षण: सम्बन्धस्तद्बोधकतयेत्यर्थ:। अत्र च निगमनस्याऽनुवादकत्वप्रतिसन्धानोत्तरमेवाऽबाधितत्वादेर्मानसग्रहोत्पत्त्या कथञ्चित्तद्बोधौपयिकत्वं बोध्यम्। मिश्रमतमुपन्यस्यति यत्त्विति। तदिति। अनतिरिक्तपदमित्यर्थ:। तेन उक्तोदाहरणेन पृथिव्यामिति। पृथिवीतरत्वावच्छिन्नभेदाभावस्यैव तेनाऽबोधनात् तथा चाऽनुमितिन्यूनविषयकत्वादन्यूनपदेनैव वारणं सम्भवतीति भाव:। ननूक्तस्थलेऽपि तात्पर्यभ्रमेण पृथिव्यामितरभेदप्रकारकबोध: सम्भवत्येवेत्यत आह तात्पर्येति। तादृशबोधेति। अनुमित्यन्यूनविषयकबोधेत्यर्थ:। अतिप्रसक्तत्वात् अवयवान्तरेऽपि सत्त्वात्। नन्ववयवान्तरे तत्सत्त्वेपि न क्षति:, तस्यातिरिक्तविषयकबोधजनकतया अनतिरिक्तपदेनैव तद्वारणसम्भवादत आह न चेति। तावतापीति। तात्पर्यभ्रमेणापीत्यर्थ:। तथात्वस्य अन्यूनविषयकबोधजनकत्वस्य सम्भव:। यत्रेत्यादेरिति। तात्पर्यभ्रमादप्येकदेशस्यैवानुमित्यन्यूनविषयकज्ञानजनकत्वं न तु

सम्भवतीत्युक्तस्यानुसरणीयत्वात्। एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञाना-

---

प्रकृतहेतुसाध्ययोरुपादानम्। वह्निव्याप्यधूमवान्पर्वतो वह्निमान्धूमात्, सत्तादिव्याप्यद्रव्यवदिदं सत्तादिमद्द्र व्यत्वादित्यादयस्तु न प्रयोगाः।

समुदितोदाहरणस्य, तस्य च न्यायावयवार्थकेन सत्यन्तदलेनैव वारणं सम्भवतीति भावः। नायमादीति। तथा चान्यूनविषयकत्वाभावादेव निगमनव्युदासात्तद्वारणार्थमनतिरिक्तपदं व्यर्थमिति भावः। नन्वेवं न्यूनतातादवस्थ्यमत आह वाक्येति उपनयनिगमनस्वरूपवाक्ययोरेक-वाक्यताबलाद्विशिष्टवैशिष्ट्यान्वयबोधबलादेव विशिष्टस्य प्रकृतसाध्यविशिष्टप्रकृतपक्षस्य लाभादित्यर्थः। तथा च विनाप्यनुषङ्गमबाधित-त्वादिबोधकस्य पुनरुक्तत्वस्य लाभान्न न्यूनत्वमिति भावः। यत्र पक्षतावच्छेदकधर्मावच्छेदेन साध्यसिद्धिरुद्देश्या तत्र तदवच्छेदेनैव साध्यस्य पुनरुक्तत्वज्ञानमबाधितत्वादिग्रहोपयोगि, तच्च वाक्यैकवाक्यतया बोधान्न सम्भवति वह्निव्याप्यधूमवत्पर्वतत्वावच्छेदेन वह्निमत्त्वग्रहेऽपि पर्वतत्वावच्छेदेन वह्निमत्त्वाग्रहादन्वयितावच्छेदकधर्मावच्छेदेनैवान्वयस्य व्युत्पन्नत्वादित्यनुषङ्गस्यैव सम्यक्त्वमित्यावेदयितुं यदि चेत्युक्तम्। सामान्यतः अधिकरणत्वप्रकारेण। उपनयस्येति। वारणादित्यग्रेऽन्वयः। न च पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्-च्यावगाहित्वरूपमेवाऽन्यूनविषयकत्वं निरुच्य उपनयवारणसम्भवादिदम-सङ्गतमिति वाच्यम्। यत्राधिकरणं प्रमेयं ज्ञेयत्वादित्यादिक्रमेण न्यायस्तत्रोपनयस्य पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्व-नियमादधिकरणत्वावच्छेदेन प्रमेयत्वसिद्धेरुद्देश्यत्वादेव सिद्धसाधनायोगादिति भावः। अथानुमित्यन्यूनविषयत्वमेवाऽवश्यं पक्षविशेष्यकसाध्यप्रकारकत्वं वाच्यं तथा च तत्रैव पक्षनिष्ठमुख्यविशेष्यकत्वनिवेशेनोपनयवारणसम्भवात्तदर्थं विशेषणान्तरमयुक्तम्, स्वव्यापकसाध्यकत्वस्य साध्यवदन्यावृत्तित्वस्यैव वाऽनुमितिहेतुत्वमते साध्यसामानाधिकरण्यांशस्य उपनयाविषयतया तत्राऽतिव्याप्त्ययोगश्चेत्यत आह यत्र चेति। ताद्रूप्येणेति। पक्षतावच्छेदकसाध्यता-वच्छेदकरूपाभ्यामित्यर्थः। तथा च पर्वतो वह्निमान् धूमात् यो यो धूमवान्

वृत्तिजातियोगिज्ञानजनकवाक्यं प्रतिज्ञेति निरस्तम्।

ननु प्रतिज्ञा न साधनाङ्गं विप्रतिपत्तेः पक्षपरिग्रहे तत्र

विशिष्टपक्षोपस्थापकादेव तादृशव्याप्तिप्रतीतौ आकांक्षाविरहेणोदाहरणानुत्थानात्, अन्यथाऽतिप्रसङ्गात्। अत एव नैकदोभयव्यात्युपन्यासोऽपि।

यदि च मैत्रः पचति अयं गौरित्यादेरेव प्रतिज्ञाया तथोपवर्णितविशिष्टज्ञानजनकत्वसंभवः तादात्म्येन गोः साध्यत्वात् गोत्वत्वाद्यनुपस्थित्या गोत्वादेः साध्यत्वानुपपत्तेः पदार्थतावच्छेदकजातौ

स स वह्निमान् यथा पर्वतः इत्यादिस्थलीयोदाहरणस्य पर्वतो वह्निमान् वह्निरित्यादिस्थलीयस्य वह्निव्याप्यवह्निमांश्चायमित्युपनयस्य च वारणायाऽनतिरिक्तपदम्। तत्रापि यद्रूपेण पक्षत्वं तदन्यरूपेणैव दृष्टान्तमते निरुक्तोदाहरणेऽतिव्याप्त्यसम्भवादुपनयपर्यन्तानुसरणम्। यत्तु दृष्टान्तस्योदाहरणाघटकत्वपक्षे तत्रातिव्याप्त्यसम्भवादुपनयपर्यन्तानुधावनमिति। तत्तुच्छम्। तथासत्यग्रे सामानाधिकरण्येन दृष्टान्तमुपादाय उदाहरणेऽतिव्याप्तिप्रदर्शनस्य सन्दर्भविरोधापत्तेः। न च साध्यहेतुतुल्यन्याय एवाऽसम्भवीति कुतस्तदुपनयेऽतिव्याप्तिः उद्देश्यतावच्छेदकविधेययोरैक्येन यो यो वह्निमान् स स वह्निमानित्युदाहरणस्य निराकाङ्क्षत्वेनासम्भवादिति वाच्यम्। यद्योगात्प्राथम्यलब्धस्य वह्निव्यापकत्वविशिष्टवह्नेरेव विधेयता दण्डवान् रक्तदण्डवानित्यादेरिवोक्तोदाहरणस्यापि साकाङ्क्षत्वसम्भवात्, व्यापकत्वस्य तत्र संसर्गमर्यादया भानमतेऽपि संयोगमात्रेण वह्निमति व्यापकत्वविशिष्टसंयोगेन वह्निमत्तान्वये बाधकाभावात्, एकसम्बन्धेनैव उद्देश्यतावच्छेदकस्य विधेयतायां निराकाङ्क्षत्वादिति ध्येयम्। ननूक्तस्थले पक्षे साध्यसन्देहविरहान्न्यायप्रयोग एव नास्ति कुत्रोदाहरणातिव्याप्तिरत आह सिषाधयिषेति। ननु सिषाधयिषया न्यायप्रयोगो विवादग्रस्त इत्यत आह यत्र वेति पर्वतत्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे सिद्धसाधनापत्तेः पर्वतत्वावच्छेदनेत्युक्तम्। यद्रूपेण पक्षत्वं तदन्यरूपेणैव दृष्टान्तवचनमिति प्रवादरक्षार्थमेतत्पदम्। उदाहरणस्येति। यद्यपि

प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेत्, न, विप्रतिपत्त्यग्रे हि समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनो वाकाङ्क्षायां शब्दानित्यत्वं साध्यं, न च साध्यनिर्देशं विना हेतुप्रवाक्यं निष्प्रतियोगिकमन्वयं बोधयितुमीष्टे। न च वादिवाक्येऽनुपस्थितमपि योग्यतया

हेत्वर्थान्वयायोगाच्च।

वह्निमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य वह्नेः संयोगात्मकः संबन्धो भासते तथैव वह्निव्याप्यधूमवानयमित्युपनयसङ्गमात्,

शाब्दबोधे तु वह्निमतोऽभेदः एवं भेदे साध्ये भिद्यते

यत्र पर्वतत्वावच्छेदेन जातिमत्त्वस्योद्देश्यतायां जातिमत्पर्वतस्य तादात्म्येन "हेतुत्वं तत्रावयवमात्रेतिव्याप्त्यसम्भवादुदाहरणमात्रोक्तिरङ्गता, तथापि पक्षमुख्यविशेष्यकसाध्यवत्तावगाहित्वरूपस्याऽन्यूनविषयकत्वस्य प्रवेशेऽवयवान्तरातिव्याप्त्यसम्भवात्तन्मान्त्रानुसरणमिति भावः। ननु यन्मते दृष्टान्तमनन्तर्भाव्यैवोदाहरणशरीरं तन्मते नोदाहरणेऽतिव्याप्तिः सम्भवतीत्यत आह सत्यन्तस्य चेति। ननूक्तदृष्टान्तस्य पर्वतत्वसामानाधिकरण्येन वह्निमत्त्वबोधकत्वेप्यनुमितिविषयीभूतस्य पर्वतत्वावच्छेदेन वह्निमत्त्वस्याऽबोधकत्वादन्यूनपदेनैव तद्वारणं सम्भवतीत्यत उक्तं सत्यन्तस्य चेत्यपि वदन्ति। परमेश्वरो देव सौदामिनी द्रव्यमित्यादि प्रतिज्ञैकदेशस्य मेश्वरो देवः दामिनी द्रव्यमित्यादेरपि प्रकृतानुमितिसमानाकारबोधजनक-त्वात्तत्रातिव्याप्तिरत उक्तमवयवाघटकेति। अवयवाघटकत्वे सति यन्न्यायान्तर्गतं तत्त्वे सतीत्यर्थः। हेत्वन्तस्य प्रतिज्ञादिहेत्त्वन्तभागस्य। न्यायस्य पूर्वप्रतीके व्यावृत्तिमुक्त्वा परप्रतीकेपि तामाह अयमादीति। हेत्वघटितत्वोक्त्यापि हेत्वन्तभागस्य वारणसम्भवादाह अयमादीत्यपि कश्चित्। न चोपनयादि-निगमनान्तभागेऽप्यतिव्याप्तिसम्भवादयमादिपर्यन्तानुसरणं व्यर्थमिति वाच्यम्। पक्षतावच्छेदकमात्रावच्छिन्नविशेष्यकसाध्यप्रकारत्वरूपान्यूनविषयकत्वविवक्षयापि

अन्वेति, अतिप्रसङ्गात्। न च विप्रतिपत्तितः साध्योपस्थितिः, तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरितत्वात् परविप्रतिपत्तिं समयबन्धञ्च विना स्थापनाया अभावात् विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण पर्य्यवसितत्वेन निराकाङ्क्ष-त्वाच्च, आवृत्तौ तु सैव प्रतिज्ञा। न चावयवान्तराद्धेत्वन्वययोग्या

भिन्नमित्यादावपि वैलक्षण्यमिति सूक्ष्ममीक्ष्यते–

तदा यादृशपक्षसाध्यिकाः पक्षे यादृशयादृशविशिष्टार्थबोधिकाः प्रतिज्ञा सम्प्रदायसिद्धाः तादृशानां बोधानामन्यतमेनाप्यनिवर्त्यत्वस्य संशयस्यानिवर्तको यस्तावद्बोधानामन्यतमो बोधस्तज्जनकत्वं वक्तव्यम्। एवं च तादात्म्येन गवि साध्ये पक्षे गवाभेदस्य, संयोगेन

तद्वारणसम्भवादिति भावः। तत् अनतिरिक्तपदम्। न च साध्यतावच्छेदकधर्म-मात्रावच्छिन्नविधेयताकत्वरूपमन्यूनविषयकत्वं निरुच्यैव प्रतिज्ञादिहेत्वन्त-भागादेर्वारणसम्भवादनतिरिक्तपदं व्यर्थं तत्र धूमाज्ञानज्ञाप्यवह्नित्वावच्छिन्नस्यैव विधेयत्वादिति वाच्यम्। विशिष्टवैशिष्ट्यविषयतातिरिक्तशाब्दधीविषयत्वस्या-ऽनङ्गीकारात्तादृशविषयतायाः प्रकृतेपि सत्त्वादनतिरिक्तपदसार्थकत्वार्थमेव तावद्दूराविवक्षणाच्च। वस्तुतः प्रतिज्ञासहकारेण हेत्ववयवस्य उपनयसहकारेण निगमनस्य अनुमित्यन्यूनविषयकत्वात् सत्यन्तस्यावयवार्थकत्वेपि हेतुनिगमनयोर्वारणार्थमेवाऽनतिरिक्तपदं देयम्। न ह्यन्यूनविषयकशाब्द-त्वावच्छिन्नजन्यतानिरूपितं जनकत्वं निरुक्तौ निविष्टं येन केवले हेतौ निगमने चातिव्याप्तिर्न स्यादिति युक्तमुत्पश्यामः। यद्यपीति। सर्वस्य पक्षत्वे व्यतिरेकिणः साध्यस्यांशतो बाधितत्वात्तत्साध्यको न सन्न्यायः इति केवलान्वयिनः साध्यतयोल्लेखः। अभिधेयपदं सम्पातायाम्। सर्वत्वावच्छिन्नस्यैव पक्षत्वे प्रकृते दोषसम्भवादतिरिक्तेति। प्रकृतानुमितिविषयतातिरिक्तेत्यर्थः। तद्विषयतायाः केवलान्वयित्वादिति भावः। न चेति। वाच्यमित्यग्रेऽन्वयः। कोटीति। प्रमेयत्वाभावरूपेत्यादिः। सन्दिग्ध

साध्योपस्थितिः, नाप्यवयवान्तरेणाक्षेपात्, साध्यान्वये तदभिधानं तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात्। तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेहाक्षेपः।

समवायेन वा वह्नौ वह्निमदभेदस्य, समवायेन पाकस्य कृतौ पाककृतिमत्त्वस्य, पाककर्त्रभेदस्य,

विशेषणतया इतरेभ्योभेदे, इतरभेदवत्ववत्त्वस्य, इतरान्याभेदस्य, इतरभेदवत्त्वस्य, इतरभिन्नाभेदस्य बोधा विशिष्य धर्तव्या इति दिक्।

तावद्बोधानिवर्त्यसंशयानिवर्तकतावद्बोधनिवर्त्ययावत्संशयनिवर्त्तक-बोधजनकत्वं वाच्यमित्यपि कश्चित्।

एव न्यायप्रवृत्तेर्विप्रतिपत्तेरनावश्यकत्वादाह संशयस्य चेति। सन्दिग्धसाध्यके धर्मिण्येव न्यायप्रवृत्तेरिति भावः। ननु खण्डशः प्रत्येकपदार्थप्रसिद्ध्यैव सर्वं प्रमेयं न वा इत्याकारकसंशयः सम्भवत्येव सर्वसदृशः पर्वतो वह्निमान् इत्यादिप्रतिज्ञान्तरेऽव्याप्तितादवस्थ्यञ्च तन्त्र कोट्यप्रसिद्धेर्वक्तुमशक्यत्वादत आह प्रकृतेति। प्रकृतानुमितिविषयतासमव्यापकविषयताकत्वमित्यर्थः। सामानाधिकरण्यांशस्य वैयर्थ्येनाऽप्रविष्टत्वादिति ध्येयम्। सर्वपक्षोपनयमात्रेति-व्याप्तिरतः कल्पान्तरमाह प्रकृतानुमितीति। वक्तव्यमित्यस्यान्यूनानतिरिक्तद-लेनेत्यादिः। सकलाभिधेयवृत्तिधर्मवदिदं द्रव्यमिति योजना। अभिधेयेति सम्पातायातम्। संशयकोटिप्रसिद्ध्यर्थं द्रव्यत्वस्य व्यतिरेकिणः साध्यतयोल्लेखः। अत्रानुमिताविव उपनयेपि वस्तुमात्रस्यै प्राकरत्वात्ततन्त्रातिव्याप्तिरिति भावः। ननु निरवच्छिन्नप्रकृतानुमितिप्रकारत्वसमव्यापकनिरवच्छिन्नप्रकारताकत्वं वाच्यं तथा चानुमितौ स्वरूपतोऽप्रकाराणामभावत्वप्रतियोगित्वादीनामुक्तस्थलीयोपनये व्याप्तिघटकतया स्वरूपतः प्रकारत्वान्न तत्रातिव्याप्तिरत आह सकलाभिधेय निष्ठेति। तथा च सकलाभिधेयनिष्ठाभावप्रतियोग्याकाशाभाववादिदं द्रव्यमाकाशादित्यादितादात्म्यसम्बन्धावच्छिन्नहेतुकस्थलीयोपनयेऽतिव्याप्तिः तत्राऽनुमितावुपनये च स्वरूपतः प्रकाराणां तुल्यत्वादिति भावः। समव्याप्तत्वं

अन्ये तु(१२) शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा किन्तु विशिष्टे, विशिष्टन्तु विशेषणं साध्यमनभिधाय न शक्याभिधानं। न च वस्तुतो यत्साध्यं तत्र प्रमाणं वदेति मध्यस्थनियोगः, वादिद्वयमध्ये तदसम्भवात् तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा, न वान्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति।

चैत्रः पचति, घटो नेतराणीति प्रतिज्ञायां साध्ये विषयत्वानु-योगित्वयोः संबन्धविधयैवानुप्रवेशात् यथोपदर्शितसाध्यगमतौपयिक-

---

विहाय समसंख्यप्रकारत्वोक्तौ न कोपि दोष इति ध्येयम्। प्रकृतपक्ष इत्यादि। पक्षतावच्छेदकधर्मावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदक-धर्मावच्छिन्नप्रकारकत्वमित्यर्थः। तदन्यूनविषयकत्वं प्रकृतानुमित्यन्यून-विषयकत्वम् अत्र यदि निरुक्तविषयताविलक्षणविषयताशून्यत्व-रूपमनतिरिक्तविषयकत्वं निवेश्यते, तदा पक्षदिशि प्रकृतत्वानुक्तौ वह्निमद्द्रव्यं तेजस्वी पर्वतो वह्निमान् वह्निमद्द्रव्यादित्यादिस्थलीये तादात्म्येन हेत्ववयवेऽतिव्याप्तिः तस्यापि द्रव्यत्वेनैव पक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वात्। यदि तु प्रकृतव्याप्त्यविषयकत्वरूपमेवाऽनतिरिक्तविषयकत्वं निवेश्यते, तदा पर्वतो वह्निमान् वह्निमद्द्रव्यादित्यादित्यादिस्थलीयहेतावतिव्याप्तिवारणार्थं तद्बोध्यम्। साध्यीयप्रकृतत्वस्य व्यावृत्तिं स्वयमेवाह प्रकृतपञ्चम्यर्थेति। ज्ञापकत्वादिरूपो यः पञ्चम्यर्थः तत्पक्षकेत्यर्थः। तथा च हेतुत्वं वाच्यवत् प्रमेयत्वादित्यादौ हेत्ववयवस्य पञ्चम्यर्थहेतुत्वे प्रकृतपक्षे वाच्यविशेषे मेयत्वस्वरूपसाध्यस्य वैशिष्ट्यावगाहित्वेपि साध्यतावच्छेदकीभूतवाच्यत्व-प्रकारेणैव तद्वैशिष्ट्यानवगाहनान्नातिव्याप्तिः, हेतुत्वं वाच्यवत् वाच्यादित्यादिकन्तु न न्यायः सिद्धसाधनादिति भावः। इदञ्च व्याप्त्यविषयत्वरूपमनतिरिक्तविषयकत्वं लक्षणे प्रविष्टमित्यभिप्रेत्योक्तम्। प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिताविलक्षणविषयताशून्यत्वरूपस्य तस्य

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचितं अन्यथानाकाङ्क्षिताभिधाने निग्रहापत्तेः लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः, हेतुत्वञ्चानुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वं।

व्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षे उपनेयत्वात्तथा चाऽयमित्याकारकः सुवच एव प्राचामुपनयः।

प्रवेशे तु ज्ञापकं प्रमेयत्वात् वाच्यत्ववन्निष्ठधर्मवत् प्रमेयत्वादित्यादौ पर्वतो वह्निमत्पर्वतात्तेजस्वी वह्निमत्पर्वतादित्यादौ च हेत्ववयवस्य वारणाय प्रकृतत्वं वाच्यमिति ध्येयम्। अत्र च प्रकृतसाध्यवैशिष्ट्यविषयकत्वं साध्यतावच्छेदकधर्मावच्छिन्नविधेयताकत्वपर्यवसितं ग्राह्यम्। तेन नव्यमते ज्ञानज्ञाप्यत्वस्यैव हेतुपञ्चम्यर्थत्वाद्विषयत्वं धूमज्ञानजन्यज्ञानीयं धूमादित्यादौ हेत्ववयवस्य प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिबोधजनकत्वेपि न तत्रातिव्याप्तिः। ज्ञानज्ञाप्यत्वरूपपञ्चम्यर्थैकदेशस्य ज्ञानजन्यज्ञानस्य तदर्थविषयतायां विधेयत्वेनाऽनन्वयात्, वृत्तिद्वयोपस्थाप्ययोरेवोद्देश्यविधेयभावेनान्वयस्य व्युत्पन्नत्वादिति वदन्ति। तादृशेति। प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयताविलक्षणविषयताशून्यत्वमर्थः। तादृशविषयताविलक्षणविषयत्वमत्र न तादृशविषयताभिन्नत्वं सर्वस्यैव प्रतिज्ञाजन्यबोधस्य तादृशविशिष्टविषयताभिन्नसाध्यादिप्रत्येकविषयतावत्त्वेन प्रतिज्ञामात्र एवाऽसम्भवापत्तेः। किन्तु तादृशविषयताव्यापकत्वम्, तथा च तत्र साध्यपक्षयोः प्रकृतत्वानुक्तौ प्रतिज्ञायासम्भवः स्यात् तज्जन्यबोधविषयतामात्रस्यैव सामान्यतः साध्यवत्पक्षावगाहित्वाव्यापकत्वात् अतस्तदुपात्तम्। ननु ज्ञानभेदेन स्वरूपसम्बन्धात्मिकानां प्रतियोगिताव्यक्तीनां भेदात् प्रतिज्ञाजन्यबोधानामपि न तादृशविषयत्वाव्यापकविषयताशून्यत्वमित्यसम्भवः समानाकारज्ञानीयविषयतानामैक्यस्य विवादग्रस्तत्वात् अतः प्रकारान्तरमाह प्रकृतहेतुकेति।

हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं वा।

उदाहरणप्रयोजकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा।

साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा।

नव्यानां पुनरनन्यगतिकतया तद्व्याप्यहेतुमान् तद्वान्वेत्याकारो योग्यतावशाच्च तदा साध्यस्य तद्व्याप्यस्य वा परामर्शः।

केचित्तु वह्निमान्नवेति विप्रतिपत्ती संशये च वह्निमत्तदन्योन्याभावयोस्तादात्म्यविशेषणत्वाभ्यां कोटित्वेन जिज्ञासितत्वादिति

अन्यवयव्याप्तित्वेन प्रवेशे व्यतिरेकिनिगमनेऽतिव्याप्तिरतः सिद्ध्यौपयिकान्तम्। प्रकृतहेतुमत्तानिनिश्चयोत्तरप्रकृतसाध्यानुमितित्वघटितधमावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतविषयिताशून्यत्वमर्थः। तेन वह्निव्याप्यधूमवन्निरूपितसंयोगेन पर्वते वह्नेः साध्यतायां पर्वतो वह्निमान् धूमादित्यादिस्थलीयप्रतिज्ञायां सम्बन्धमर्यादया वह्निधूमयोर्व्याप्त्यवगाहित्वेपि न तत्राव्याप्तिः। यद्यपि विवक्षेयं न्यायावयवत्वगर्भनिरुक्तावेव अन्यथा तद्वानेपि हेत्वन्तभागेतिव्याप्तिरिति वक्ष्यते तथा च निगमनस्थयिमादिपदाघटितत्वकल्पने अन्यूनपदेनैव तद्वारणसम्भवः, तथापि अन्वयव्याप्तीनामपि नानात्वादेकोपादानेऽन्यामन्तर्भाव्य पक्षतावच्छेदकसामानाधिकरण्येन दृष्टान्तवत्युदाहरणेऽतिव्याप्तिवारणार्थमुक्तानुगमस्यावश्यकत्वादिति भावः। प्रकृतहेतुप्रवेशस्य फलमाह वह्निव्याप्येति। वह्निव्याप्यालोकवत्पर्वतत्वेन पक्षत्वे तद्रूपावच्छिन्ने वह्नेः संशयासम्भवान्नाय एव नावतरतीत्यतः सधर्मेति। यत्तु वह्निव्याप्यालोकवत्तया गृहीते पर्वते वह्निसाध्यकहेत्वाकाङ्क्षा न सम्भवत्यतः सधर्मपदमिति। तत्तुच्छम्। पर्वतधर्मिकवह्निसिद्ध्यौपयिकहेत्वाकाङ्क्षानुपपत्तावपि वह्निव्याप्यावलोकत्पर्वतत्वावच्छिन्नधर्मिकवन्ह्यनुमित्युपयुक्तहेत्वाकाङ्क्षायां बाधकाभावात्, प्रकृतपक्षे प्रकृतसाध्यवत्त्वं कुत इत्याकाङ्क्षयैव हेतुप्रयोगात् इति। प्रकृतत्वेन साध्यप्रवेशस्य फलमाह इन्धनव्याप्येति। तस्याः प्रतिज्ञायाः।

तादात्म्येन वह्निमानेव साधयितुमुचितः, न तु वह्निरजिज्ञासितत्वात्।

तथाचायमित्याकारको वह्निमद्व्याप्यधूमवांश्चायमित्याकारको वा उपनयः। न तु वह्निव्याप्यधूमवांश्चायमित्याकारकः, अर्थान्तरत्वादिति प्राहुः।

इदन्तु बोध्यम्। सत्यन्तस्य न्यायावयवार्थकत्वपक्ष एवायं कल्पोऽभिहितः, तेन अवयवाघटकन्यायान्तर्गतस्य हेत्वन्तभागस्य प्रकृतव्याप्त्यविषयकत्वेपि न तत्रातिव्याप्तिः। न चैवमनतिरिक्तपदवैयर्थ्यम् अन्यूनविषयकत्वाभावेनैवावयवान्तरव्युदासादिति वाच्यम्। पर्वतत्वावच्छेदेन वन्हेः साध्यतायामेतत्पर्वतत्वेन दृष्टान्तवत्युदाहरणेतिव्याप्तिवारकत्वात्। न च तथापि पर्वतो वह्निमान् वह्निमत्पर्वतादित्यादौ हैतववयवेतिव्याप्तिः तस्यापि व्याप्त्यविषयकत्वेनाऽनतिरिक्तविषयकत्वात् पक्षे साध्यवैशिष्ट्यावगाहित्वेनाऽन्यूनविषयकत्वाच्च, पर्वतत्वावच्छेदेन साध्यसिद्धेरुद्देश्यत्वादेव सिद्धसाधनासम्भवादिति वाच्यम्। पक्षमुख्यविशेष्यकसाध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वविवक्षयैव तद्वारणात् पञ्चम्यर्थहेतुत्वस्यैव तन्मुख्यविशेष्यत्वादिति दिक्। के चित्तु सत्यन्तस्यावयवाघटकन्यायान्तर्गतत्वार्थकत्वेपि हेत्वन्तभागेतिव्याप्तिः तत्रावयवाघटक इत्यत्रावयवोऽघटको यस्य अवयवस्याऽघटकमित्येकत्र समासद्वयाश्रयेणाऽवयवद्वयाघटितत्वे सत्यवयवाघटकत्वस्य लाभात् प्रथमेन हेत्वन्तस्य द्वितीयेन च चित्राभानुः प्रमेय इत्यादिप्रतिज्ञैकदेशे भानुः प्रमेय इत्यादावतिव्याप्तिवारणादित्याहुः। नन्वेवं वह्निव्याप्यधूमवत्पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायामव्याप्तिः स्यात् प्रकृतव्याप्तिविषयकत्वात्, पक्षतावच्छेदीभूतव्याप्तिभिन्नाया एव व्याप्तेर्विधेयकोटिनिविष्टतया उपनयस्योद्देश्यतावच्छेदकविधेययोरैक्यासम्भवेन निराकाङ्क्षत्वायोगादत आह वह्निव्याप्येति। संयोगेन साध्यतास्थलेऽव्याप्तिमुक्त्वा समवायेन साध्यतास्थले तामाह सत्तादिति। अन्यथा विनाप्याकाङ्क्षामभिधाने। अतिप्रसङ्गादिति। हेत्ववयवद्वयस्याप्युद्भावनप्रसङ्गादित्यर्थः। अत एव आकाङ्क्षाविरहादेव। नैकदेति। समयबन्धं विनेत्यादिः। तेनाऽन्वयव्यतिरेकोभयव्याप्तिबोधकोदाहरणाकाङ्क्षाप्रयोजकावयवत्वेन मणिकृता वक्ष्यमाणस्य नासङ्गतिः, समयबन्धानुरोधेन व्याप्तिद्वयबोधकोदाहरणसम्भवादिति ध्येयम्।

प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्ति-

यत्र चाऽन्तरा तादृशबोधो न जनितस्तत्रापि तादृशाकाङ्क्षा-योग्यताशालित्वरूपं तज्जननयोग्यत्वमक्षतम्।

उभयव्याप्तीत्यत्र व्याप्तिभेदमेकजातीयव्याप्ति परमतो नाऽसङ्गतिरिति परमार्थः। यदि मीमांसकमतेनैव मया पक्षे साध्यं साधनीयमित्यादिसमयबन्ध-वशाद्धूमलिङ्गान्वयव्याप्तिं पक्षतावच्छेदककोटौ निवेश्य व्यतिरेकव्याप्त्या धूमहेतोरुदाहरणोत्थानसम्भवस्तदा तत्रत्यप्रतिज्ञायामव्याप्तिरिति तु चिन्तनीयम्। यदि चेति। सूक्ष्ममीक्ष्यत इत्यन्वयः। खलेकपोतन्यायेनैव शाब्दधीस्वीकारे पचतीत्यादेः पाककृतित्वावच्छिन्नसाध्यबोधकत्वासम्भवात् वैयाकरणमते पाककर्तुरेव तादात्म्यसम्बन्धेन तत्र साध्यत्वच्चाह अयं गौरिति। आदिना घटो नेतराणि इत्यादेः सङ्ग्रहः। ननु व्युत्पत्तिविरोधादयं गौरित्यादिप्रतिज्ञायाः पक्षे साध्यीभूतगोत्वविशिष्टज्ञानजनकत्वाकथं तत्रोपदर्शितज्ञानजनकत्वमत आह तादात्म्येनेति। गोत्वादेः साध्यतायां स्वयं बाधकमाह गोत्वत्वादीति। अनुपस्थित्येति। गवादिपदादनुपस्थित्येत्यर्थः। तथा च साध्यतावच्छेदकरूपेण साध्यवत्त्वबोधकस्यैव वाक्यस्य प्रतिज्ञात्वान्न तस्य गोत्वसाध्यक-प्रतिज्ञात्वसम्भवः इति। ननु शुद्धगोत्वादेः साध्यतायां निरवच्छिन्न-तद्बाधकेवाक्यस्यैव प्रतिज्ञात्वं स्थसयतीत्यत आह पदार्थतावच्छेदकेति। घटादन्य इत्यादावेकदेशेपि पञ्चम्यर्थान्वयाज्जातावित्युक्तम्। ननु पर्वतो वह्निमानित्यादिस्थलेऽनुमितौ तादात्म्येन वह्निमानेव साध्यमित्यत आह तथैवेति। वह्नौ साध्यतायामित्यर्थः। अन्यथा वह्निमद्व्याप्यवांश्चायमित्येवोपनयः स्यादिति भावः। अभेद इति। भासत इति पूर्वेणान्वयः। तथा च वह्न्यादिसाध्यक-प्रतिज्ञायावह्न्यादिसाध्यकानुमित्यन्यूनविषयकज्ञानाजनकत्वात्तत्राव्याप्तिरिति भावः। ननु साध्यपक्षभेदेन प्रतिज्ञाया भिन्नत्वाद्वह्न्यादिसाध्यकस्थले साध्यवद्भेद-बोधकत्वमेवाऽन्यूनविषकत्वं वाच्यमत आह एवमिति। तथा व भिद्यत इत्यत्र भेदाश्रयत्वप्रकारकस्य भिन्नमित्यत्र च तादात्म्येन भेदाश्रयप्रकारकस्य बोधस्य जनिकायां भेदसाध्यकप्रतिज्ञायामेकविधबोधस्य उपादानेऽन्यादृश-बोधजनिकायां तस्यामव्याप्तिरिति भावः। यादृशपक्षसाध्यकेति। बहुवचनं तथाविधयावत्प्रतिज्ञालाभार्थम्। अन्यथा पृथिवीपक्षकेतरभेदसाध्यक-

मद्वाक्यत्वं वा।

पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा। हेतुपदेन ज्ञाने लक्षणा अन्यथा लिङ्गस्याहेतुत्वेन हेतुविभक्त्यर्था-

---

तल्लाभश्च जातिविशेषोपस्थापकशाब्दवाक्यपदयोरूपसन्धानादेवेति।

अन्यूनेत्यादि। तथा चोद्देश्यानुमितिसमानविषयकलिङ्गाविषयक-शाब्दज्ञानजनकन्यायावयत्वमर्थः। व्यतिरेकिणि ह्रदो निर्धूम इत्यादौ निर्वह्नित्वहेतुके यथा ह्रदभिन्नमिति दृष्टान्तवतो ह्रदावृत्तिधर्म-शून्यत्वादिहेतुके वा उदाहरणस्य वारणाय समानविषयकान्तम्

प्रतिज्ञायास्तादृशप्रतिज्ञास्थलीयकतिपयबोधानिवर्तनीयसंशयनिवर्तकत्वेन तत्राव्याप्तिप्रसङ्गात्। एवञ्च यत्पक्षिका यत्साध्यिका यावत्यः प्रतिज्ञाः प्रकृतपक्षे यादृशयादृशबोधजनकत्वेन सम्प्रदायसिद्धा इत्युक्तावसम्भवः स्यादतो यादृशपक्षसाध्यकेति यादृशत्वेन पक्षसाध्ययोर्द्वयोरुपादानमिति ध्येयम्। पक्ष इति। प्रकृतपक्षतावच्छेदकविशिष्टधर्मिणीत्यर्थः। तेन रूपान्तरावच्छिन्ने पक्ष एव साध्यस्य यादृशो वोधस्तदनिवर्तनीयसंशयनिवर्तकत्वेपि प्रतिज्ञासु नाऽसम्भवः। वस्तुतः पक्षतावच्छेदकविशिष्ट इत्यपहायात्रापि यादृशधर्मावच्छिन्नधर्मिणीत्येव वक्तुमुचितम्, अन्यथा संयोगेन वन्ह्यवच्छिन्न एव पर्वते द्रव्यत्वस्य साध्यतायां वह्निमत्पर्वतो द्रव्यमित्यादिप्रतिज्ञायां वह्निमदभिन्न एव द्रव्यत्वबोधजनकत्वेनाऽव्याप्तेरिति ध्येयम्। तादृशानामिति। प्रकृतपक्षविशेष्यकतद्धर्मावच्छिन्नविधेयताकबोधानामित्यर्थः। तावद्बोधनिवर्त्यत्वं न कस्यापि संशयस्य अत उक्तमन्यतमेनेति। अपि शब्दः सामान्याभावलाभार्थः। तेन कृतेः साध्यतायां कृतिप्रकारकबोधानिवर्त्यस्य कर्तृसंशयस्य निवर्तको यः कर्तृप्रकारको बोधस्तज्जनकत्वेपि चैत्रः कर्ता इति प्रतिज्ञायां नाव्याप्तिः। अनिवर्तकेत्यन्तेन अनतिरिक्तविषयकत्वं व्युत्पादितम्। तत्प्रयोजनञ्च हेत्वन्तभागस्य वारणमित्युक्तमेव, तावद्बोधानिवर्त्यो यो वह्निर्धूमज्ञानज्ञाप्यो न वा इति संशयस्तन्निवर्तकत्वात् हेत्वन्तभागस्य। यद्यपि हेत्वन्तरभागजनितस्य पर्वतो धूमज्ञानज्ञाप्यवह्निमानित्याकारकबोधस्यापि तावदन्यतमबोधान्तर्गतत्वात्

नन्वयात्[११] तथैवाकाङ्क्षानिवृत्तेः।

अनुमितिहेतुज्ञानकारणधूमवत्त्वादिशब्दजन्यज्ञानवृत्तिप्रतिज्ञादिजन्यज्ञाना-वृत्तिजातियोगिज्ञानजनकवाक्यत्वं हेतुत्वमित्यन्ये, जातिं विना केन रूपेण ज्ञानस्यानुमितिजनकत्वं वाक्यविशेषजन्यत्वस्यापि

पक्षमुख्यविशेष्यकार्थकम्। उपनयवारणाय लिङ्गाविषयकेति।

यद्यपि प्रकृतलिङ्गाविषयकत्वं पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् (गन्धवती तथा गन्धादित्यादावव्यापकम्। न चात्रोपनयासम्भवः इदमा गन्धवत्त्वेन परामृष्टे हेतुभूतगन्धवत्वान्वयायोगादिति वाच्यम्।

वह्निर्धूमज्ञानज्ञाप्यो न वेति संशस्यापि तावदन्यतमबोधनिवर्त्यत्वादतिव्याप्ति-तादवस्थ्यम्, तथापि केवलप्रतिज्ञाव्यक्तीनां यादृशयादृशशाब्दधीजनकत्वं तादृशतादृशशाब्दसामान्यं यत्र यत्र प्रतिबन्धकं तदन्यसंशयानिवर्तकत्वं विवक्षितम्। तथा च वह्निर्धूमज्ञानज्ञाप्यो न वेति संशयस्य केवलप्रतिज्ञाजन्यबोधेनाऽप्रतिबन्धान्न हेत्वन्तभागेऽतिप्रसङ्गः। इदन्तु चिन्त्यते। यद्यप्येवमपि संशयपदं व्यर्थं प्रकृतपक्षसाध्यकप्रतिज्ञाव्यक्तीनां यादृशयादृशशाब्दधीजनकत्वं तादृशतादृशशाब्दसामान्यं यत्र यत्र प्रतिबन्धकं तदन्यानिवर्तकत्वामात्रस्यैव सम्यक्त्वात्। न चैतत्कालीनं वह्निमत्तया पर्वतस्य शाब्दज्ञानं जायतामितीच्छाया अपि प्रतिज्ञाजन्यशाब्दसामान्याप्रतिबध्य-त्वात्तन्निवर्तकं यदेतत्कालीनं वह्निमत्तया पर्वतस्य शाब्दज्ञानं तज्जनिकायामिदानीन्तनप्रतिज्ञायामव्याप्तिवारवारणार्थं संशयपदमिति वाच्यम्। ज्ञानपदेनापि उक्तेच्छामादायाव्याप्तिवारणसम्भवे संशयत्वप्रवेशस्य तथाप्यनौचित्यात्। किञ्चैतत्कालीनस्य प्रतिज्ञाजन्यतादृशशाब्दस्य निरुक्तेच्छानिवर्तकत्वेपि तदनिवर्तकस्य कालान्तरोत्पन्नस्यैव वह्निमत्तया पर्वते शाब्दस्य स्वरूपयोग्यताया इदानीन्तनप्रतिज्ञायां क्षणसम्भवान्नाव्याप्तिशङ्कापि, यत्र चेत्यादिना ग्रन्थकृतैवाग्रे तादृशशाब्दस्वरूपयोग्यताया निवेशनीयत्वात्। एतेन प्रतिज्ञाजन्यशाब्दमात्रस्य न समानाकारशाब्दं प्रति विरोधित्वं बुभुत्सासत्त्वे शाब्दज्ञानान्तरोत्पादेन बुभुत्साविरहविशिष्टसमानाकारशाब्दत्वेनैव

जन्यतावच्छेदकरूपापरिचये दुर्ग्रहादित्यपरे।

अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनक-हेतुत्वप्रतिपादकविभक्तिमन्यायावयवत्वमन्वयिहेतुत्वं, एतदेव व्यतिरेकव्याप्त्यभिधायकपदप्रक्षेपाद्व्यतिरेकि हेतुत्वम्। अन्वय-

साध्याभावव्यापकगन्धाभावाभावत्त्वेनान्वयात्।

अत एव व्यतिरेकिणि न च नेयं पृथिवीत्यादिकः प्राचां प्रयोगः।

यदि च दण्डवान् रक्तदण्डवानित्यस्यान्वयो नानुपपन्नः तद्विशिष्टे शुद्धत द्विशिष्टान्वयस्यैवाव्युत्पन्नत्वादित्युच्यते। तदा नानुपपत्तिगन्धोऽपि।

शाब्दधीविरोधित्वात्, तथा च प्रतिज्ञाजन्य शाब्दसामान्यं यत्र यत्र प्रतिबन्धकं तदन्यस्य समानाकारशाब्दस्यैव निवर्तकत्वं प्रतिज्ञाजन्य बोधस्येत्यसम्भवापत्तिरतः संशयपदमित्यपास्तम्। तत्रापि बुभुत्साकालीनशाब्दबोधस्यैव तादृशशाब्दसामान्यानिवर्तनीयबोधानिवर्तकतया तत्स्वरूपयोग्यतयैव प्रतिज्ञामात्रे लक्षणसम्भवादिति दिक्। धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवस्य वारणाय लक्षणोपात्तस्यान्यूनविषयकत्वदलस्य निष्कर्षमाह तावतां बोधानां चान्यतमबोधेति। वक्तव्यमिति। अन्यूनानतिरिक्तविषयकत्वदलेनेत्यादिः। अत्र कल्पे सत्यन्तस्य न्यायान्तर्गतत्वमेवार्थो न तु न्यायावयवोर्थः, तावदन्यतमबोधानिवर्त्यसंशयानिवर्तकत्वदलस्य वैयर्थ्यापत्तेः। अवयवान्तरस्य तावद्बोधान्यतमबोधजनकत्वविरहाद्विशेष्यदलेनैव वारणसम्भवात्। न च यत्रानुमित्सया पर्वतो वह्निमान् वह्नेरित्यादिकन्यायस्तत्र उपनयादिवारकतया निवर्तकान्तसार्थक्यम्, अनुमित्सया न्यायप्रयोगानश्युपगमात्। अन्यथा हेतुत्वं प्रमेयवत्प्रमेयादित्यादौ हेत्ववयवातिव्याप्तेर्दुर्वारतापत्तेरिति ध्येयम्। यादृशतादृशत्वयोरनुगतयोरभावाद्विशेषतः पर्यवसन्नं लक्षणमाह एवञ्चेति। पक्षे इदन्त्वादिविशिष्टे। गवाभेदस्येति। अभेदसम्बन्धेन गोरित्यर्थः। बोधाः, विशिष्य वक्तव्या इत्यग्रेणान्वयः। तथाच तादात्म्येन गोप्रकारकेदंधर्मिकशाब्द-सामान्यानिवर्तनीयसंशयानिवर्तकबोधजनकत्वे सत्यवयवाघटकप्रकृत-न्यायान्तर्गतत्वं प्रकृतन्यायावयवत्वं वा तादात्म्येन गोसाध्यकेदंपक्षकप्रतिज्ञात्वं

पक्षाविशेषणत्वेन तदविषयकत्वञ्चायं वह्निसामग्रीमान् वह्नेरित्यादौ पक्षाविशेषणत्वेन साध्याविशेषणत्वेन तदविषयकत्वञ्च,

दधि द्रव्यं दध्नः प्रमेयत्वमभिधेयं प्रमेयत्वात् गोत्वाभावो न सास्नादिमान् गोत्वाभावादित्यादावव्यापकमतिव्यापकञ्चोपनयस्य।

तथापि पक्षतावच्छेदकविशिष्टपक्षे यत्साध्यतावच्छेदकविशिष्ट-साध्यवैशिष्ट्यावगाहित्वं तद्बहिर्भावेण लिङ्गविषयत्वस्याभावो वाच्यः।

निर्वाच्यम्। इंदधर्मिकतादृशगोप्रकारकत्वपर्यवसितमन्यूनविषयकत्वं तु बोधस्य न देयं विशेषणं वैयर्थ्यात् धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादि-स्थलीयनिरुक्तावेव हेतुवारणार्थं तस्य प्रवेश्यत्वात्। न चायं गौरितिप्रतिज्ञाजन्य-बोधस्य तादृशशाब्दसामान्यनिवर्तनीयेदन्त्वधर्मिकैकत्वसंशयं प्रति निवर्तकत्वाद-व्याप्तिरिति वाच्यम्। एकत्वाविषयकप्रतिज्ञाजन्यबोधमादाय लक्षणसङ्गमादिति भावः। समवायेनेति। संयोगान्यवृत्तिनियामकसम्बन्धेनेत्यर्थः। तेन कालिक-सम्बन्धेन वह्नेः साध्यत्वे कालो वह्निमानितिप्रतिज्ञाया अपि वह्निमदभेदमादायैव निर्वाच्यत्वान्न न्यूनतेति ध्येयम्। वह्नाविति। साध्य इति पूर्वेणान्वयः। एवमग्रेपि। वह्निमदभेदस्येति। तथा च पर्वतधर्मिकवह्निमत्प्रकारकशाब्दसामान्यनिवर्तनीय-संशयानिवर्तकबोधजनकत्वमन्तर्भाव्यैव संयोगादिसम्बन्धेन वह्निसाध्यकपर्वत-पक्षकप्रतिज्ञात्वं निर्वाच्यम्। न च तादात्म्येन वह्निमत्साध्यकप्रतिज्ञायामतिव्याप्तिः तत्रापि पर्वतो वह्निमानित्येव प्रतिज्ञाशरीरत्वादिति वाच्यम्। प्रकृतन्यायाव-यवार्थकेन मूलोक्तसत्यन्तदलेनैव तद्वारणादिति भावः। पाककृतेः साध्यतायां चैत्रः पचति चैत्रः पक्तेत्येवं प्रतिज्ञाद्वैविध्यवाद्बोधद्वयं दर्शयति समवायेत्यादिना। कृतिमत्त्वस्येति चैत्रः पचतीत्यत्र आख्यातार्थकृतेरेव चैत्रे प्रकारत्वात्। पाककर्त्रभेदस्येति। चैत्रः पक्तेत्यत्र कृदर्थस्य कर्तुरेव चैत्रे तादात्म्येन प्रकारत्वात्। तथा च चैत्रधर्मिको यः पाककृतिप्रकारको यश्च तादात्म्येन पक्तृप्रकारको बोधस्तदन्यतरानिवर्तनीयसंशयानिवर्तकतदन्यतरबोधजनकत्वमन्तर्भाव्य चैत्रपक्षकपाककृतिसाध्यकप्रतिज्ञात्वं वाच्यमिति भावः। अत्र चैत्रः पाककृतिमानित्येवं कृतीयस्यापि प्रतिज्ञाप्रकारस्यासम्भवद्बोधद्वयोपादानम-सङ्गतम्। न च तादृशवाक्यस्य साध्यतावच्छेदकीभूतपाककृतित्वेन

व्यतिरेकोदाहरणाकाङ्क्षाप्रयोजकतथाभूतावयवत्वमन्वयव्यतिरेकिहेतुत्वं।

यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्वयव्यतिरेकि, अत्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरणपक्ष-सपक्षसद्धेतुवचनं केवलान्वयि।

वस्तुतो लिङ्गं लिङ्गत्वम्। तथा च प्रकृतहेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतौपयिकं यद्व्याप्तिविषयकत्वं तच्छून्यत्वमर्थः।

साध्यस्यानुपस्थापकत्वान्न पाककृतिसाध्यकप्रतिज्ञात्वसम्भवः पाकपदस्य पाकसम्बन्धिनि लाक्षणिकत्वादिति वाच्यम्। ताद्रूप्येणानुपस्थापकत्वेपि तदवच्छिन्नसाध्यकप्रतिज्ञात्वे बाधकाभावात्। अन्यथा प्रतियोगितासम्बन्धेन इतरतो भेदस्य साध्यतायामितरभिन्नेति प्रतिज्ञायाः पश्चादुपदर्शनानुपपत्तेः तत्रापि इतरपदस्येतरप्रतियोगिके लाक्षणिकत्वादिति चिन्तनीयम्। पृथिव्यादावितरभेदस्य साध्यतायां चतुर्विधस्यैव प्रतिज्ञाजन्यबोधस्य सम्भवात्तत्रान्यतम त्वेनोपादेया इत्याह विशेषणतयेत्यादिना। इतरभेदवत्त्व-वत्त्वस्येति। पृथिवी इतराद्भिद्यते इत्यत्राख्यातार्थस्य आश्रयत्वस्यैव पृथिव्यां प्रकारत्वादिति भावः। इतरान्याभेदस्येति। पृथिवी इतरान्या इत्यत्र अभेदसम्बन्धेन पृथिव्यामितरान्यस्यैव प्रकारत्वादिति भावः। इतरभेदवत्त्वस्येति। पृथिवी नेतराणीत्यत्र पृथिव्यामितरभेदस्य नञर्थस्य साक्षात्प्रकारत्वादिति भावः। इतरभेदवत्त्वस्येति। पृथिवो नेतराणीत्यत्र पृथिव्यामितरभेदस्य नञर्थस्य साक्षात्प्रकारत्वादिति भावः। इतरभिन्नाभेदस्येति। पृथिवी इतरभिन्नेति प्रतिज्ञामभिप्रेत्येदम्। न च पृथिवी इतरान्येति प्रागुक्तक्रमेणैवास्य गतार्थत्वम्, तत्रान्यत्वप्रकारेणैव भिन्नस्योपस्थानात्, इह तु भिदधात्वर्थभिदाश्रयत्वस्येव निष्ठार्थश्रयस्यैवाश्रयत्वरूपेण पृथिव्याभेदेन भानात्ततो वैलक्षण्यादिति भावः। कस्यचिल्लक्षणमुपन्यस्यति तावदिति। यत्पक्षकयत्साध्यकप्रतिज्ञाव्यक्तयो यादृशयादृश चाबोधजनकतया सम्प्रदायसिद्धास्तावद्बोधेत्यर्थः। अत्राऽनिवर्तकान्तं

यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारण-साध्याविषयकशाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतु-विभक्तिमच्छब्दत्वमन्वयिहेतुत्वम्। एतदेवाप्रतीतान्वयसाध्य-

---

तच्च हेतौ साध्यव्याप्यत्वावगाहित्वं, हेतुभूताभावप्रतियोगिता-वच्छेदका वच्छिन्ने साध्याभावव्यापकत्वावगाहित्वञ्चः द्रव्यत्वव्याप्य-संयोगवद्वृत्तिधर्मवानयं द्रव्यत्ववान् गुणात्। गुणव्याप्यरूपवानयं स्पर्शवान् रूपादित्यादौ प्रतिज्ञासङ्ग्रहायावच्छेदकद्वयोपादानम्।

चरमबोधस्य विशेषणं हेत्वन्तभागेऽतिव्याप्तिवारणार्थम्। तत्रापि पृथिवी इतरेभ्यो भिद्यते इति प्रतिज्ञाजन्यबोधस्य तावद्बोधानिवर्त्यस्वसमानाकारका-नुमितिनिवर्तकत्वादतः संशयपदं प्रत्यक्षार्थम्। धूमादालोकवान्पर्वतो वह्निमानित्यादिस्थलीयहेतोर्वारणाय निवर्तकान्तम्। धूमादालोकवानित्यादि-प्रतिज्ञाजन्यबोधनिवर्त्यस्य हेतुत्वं धूमीयं न वेत्याकारकसंशयस्य निवर्तकबोधजनकत्वं धूमादित्येवं तदीयहेत्ववयवस्यापीत्यतो यावादिति। तथा च तत्र प्रतिज्ञाजन्यबोधनिवर्त्ययावत्संशयान्तर्गतस्य साध्यसंशयस्यैवा-निवर्तकत्वान्न हेतोरतिव्याप्तिरिति भावः। पृथिवी इतरेभ्यो भिद्यते इति प्रतिज्ञाजन्यबोधस्य तावद्बोधस्य प्रत्येकनिवर्तनीययावदन्तर्गतायाः पृथिवी इतरान्येत्येवसमानाकारानुमितेः अप्रतिबन्धकत्वादव्याप्तिरतः संशयपदं पूर्ववदर्थकम्। स्वसमानाकारस्य निश्चयस्यैव विरोधित्वादितरभेदादि-साध्यकस्थले तावद्बोधनिवर्त्यो न कोपि संशयः इत्यस्वरसात्कश्चिदित्युक्तम्। ननु यद्रूपेण साध्यत्वं तदवच्छिन्नव्याप्यवत्ताबोधकस्य उपनयस्याऽसम्भवाच्चैत्रः पचतीत्यादिप्रतिज्ञैव नास्ति तत्र मूलोक्तानुमित्यन्यूनानतिरिक्तविषयकत्वस्य व्युत्पादनं प्रागुक्तं विफलमत आह चैत्रः पचतीत्यादि। चैत्रः पचतीत्यत्र पाककृतित्वावच्छिन्नव्याप्यवत्ताबोधकपक्तृत्वव्याप्यचैत्रत्ववानयमित्याकारकोपनयसम्भवादाह घटो नेतराणीति। विषय इति। पचतीत्यत्र तिङर्थकृतौ पाकस्य विषयित्वं संसर्गस्तथा नेतराणीत्यत्र नञर्थभेदे इतरस्यानुयोगित्वं सम्बन्ध इति भावः। यथोपदर्शितेति। यद्रूपेण साध्यं प्रतिज्ञायामुपदर्शितं तदवच्छिन्नसाध्येत्यर्थः। उपनेयत्वात् उपनयेन दर्शयितुमुचितत्वात्। अन्यथा वह्नित्वेन साध्यातायां

साधनेति विशेषणाद्व्यतिरेकि हेतुलक्षणं, कथायां धूमादित्येव प्रयोक्तव्यं न तु धूमवत्त्वादिति मतुपोव्यर्थत्वात्।

अन्यूनानतिरिक्तपदमिति च मूलमुद्देश्यानुमित्यन्यूनानतिरिक्त-विषयभागपरम्। हेतुत्वमभिधेयं प्रमेयत्वादित्यादौ पञ्चम्यर्थपक्षक-हेतुवारणाय पञ्चम्यन्तान्यत्वस्य हेत्वन्यत्वस्य वाऽवश्यं वाच्यत्वात्।

संख्यातिरिक्तसुबर्थस्य प्रकृत्यर्थविशेष्यत्वेनैवाऽन्वयात्। प्रातिपदि-कार्थयोः क्रियाप्रातिपदिकार्थयोश्च साक्षाद्भेदेनाऽन्वयस्याऽ-

---

तेजोव्याप्यवत्त्वेन पक्षस्य उपनयप्रसङ्गादिति भावः। सुवच एवेति। यद्रूपेण साध्यत्वं तदवच्छिन्नव्याप्यवत्त्वस्यैव तथाशब्देन बोधयितुं शक्यत्वादिति भावः। यो यश्चैत्रः पचतीत्यादिक्रमेणोदाहरणसम्भवादुपनयपर्यन्तानुसरणम्। ननु तथापि मणिकारादीनां नव्यानां मते पाककृतिव्याप्यवांश्चाय-मित्युपनयस्यासङ्गतिरेवयादृशेन पाकीयकृतित्वादिना साध्यत्वं तदवच्छिन्न-साध्यव्याप्यवत्त्वस्य तेनाऽनुपस्थापनादत आह नव्यानामिति। तद्व्याप्यहेत-मानित्यतो हेतौ व्याप्यस्याऽभेद एव भासते न तु व्याप्तिमत्त्वमनुमित्युपयुक्तञ्च तदेव इत्यतः प्रकारान्तरमाह तद्वान् वेति। ननूक्तक्रमेणाप्युपनये पूर्वोपस्थापितत्वविशेषात्पक्षादेरपि तच्छब्देन परामर्शः स्यादत आह योग्यतेति। प्रमेयं वाच्यमभिधेयत्वादित्यादिस्थले पक्षपरामर्शेऽपि योग्यतासम्भवादादि-पदमुपात्तम्। तेन तात्पर्याद्युपग्रहः। तदा तच्छब्देन। साध्यस्येति, प्रथमे। तद्व्याप्येति, द्वितीये। अत्र पाककृतिव्याप्यचैत्रत्ववांश्चायमित्याद्युनपनयेऽपि न क्षतिः। कृतिपदेन लक्षणया साध्यतावच्छेदकीभूतपाकीयकृतित्वप्रकारेण साध्यस्योपस्थितिसम्भवादत्र लक्षणाया आवश्यकत्वात्। अन्यथा नामार्थस्य कृतेर्धात्वर्थव्याप्तौ भेदेनान्वयस्य सम्भवात् पाकपदस्य तात्पर्यग्राहकतयैवोपयोगात्। न च तथापि चैत्रत्वादित्यादिहेतौ व्याप्यस्याभेदान्वयात् तत्र व्याप्तिमत्त्वालाभः, तवापि तद्वानयमित्युपनयादनुमित्युपयुक्तस्य पक्षे हेतुमत्त्वस्याऽलाभेन तुल्यत्वात्, पक्षे हेतुमदभेदस्यैव तेन बोधानादिति चिन्त्यम्। तादात्म्येन वह्निमतः साध्यतायामेव पर्वतो वह्निमानित्याकारिका प्रतिज्ञा वह्नेः साध्यतायान्तु पर्वतस्तथा

सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकं विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभक्त्यन्तरावरुद्धस्यानन्वयादिति केचित्। तन्न। सति सप्तमीबलात्

व्युत्पत्तेर्वक्ष्यमाणत्वात्।

चैत्रस्येदं न मैत्रस्य, मैत्रस्येदं न चैत्रस्य, द्वयोरिदं नेदमेकस्यापीत्यादौ चैत्रादिसंबन्धाभावबोधस्य विभक्त्यर्थविशेष्यतां विनाऽनुपपत्तेः।

चैत्रो न पचतीत्यादौ तिङर्थस्येव विनाप्यनुयोगिनि सप्तमीं

इत्यादिरूपैव सा तथा च यादृशेत्यादिविवक्षां विना मूलोक्तानुमित्यन्यूनानतिरिक्तविषयत्वेनैव सामञ्जस्यमित्येवं केषाञ्चिन्मतं सयुक्तिकमुपन्यस्यति के चित्त्विति। विप्रतिपत्तिवाक्यस्य निर्विषयत्वात् वह्निमदादेर्न तत्कोटित्वसम्भवः शाब्दसंशयस्यापसिद्धान्तत्वेन व्यापारानुबन्धितत्कोटित्वस्याप्यभावादाह तदधीनसंशये चेति। जिज्ञासितत्वात् तादृशसंशयाधीनजिज्ञासाविषयत्वात्। न तु वह्निरिति। साधयितुमुचित इति पूर्वेणान्वयः। न च विप्रतिपत्तिवाक्याद्वह्निमत इव वह्नेरप्युपस्थितत्वाद्वह्निवह्निमद्भेदकोटिकसंशयोत्पत्त्या वह्नेरपि जिज्ञासितत्वसम्भवः इति वाच्यम्। विप्रतिपत्तिवाक्यस्य यद्धर्मावच्छिन्नविधेयताकबोधजनकत्वं तदवच्छिन्नस्यैव प्रतिज्ञायामपि विधेयत्वनियमात्। अन्यथा वह्निसामग्रीमात्रवेति विप्रतिपत्तिवाक्यस्थलेऽपि वह्नेः साध्यत्वप्रसङ्गात्। अत एवावृत्तौ सैव प्रतिज्ञा इति मूले वक्ष्यते इति भावः। ननु वह्निमतः साध्यत्वे वह्नेरुपनयप्रदर्शनविरोध इत्यतस्तदपि परित्यजन्नाह तथा चेति। प्राचीननव्ययोर्मतभेदेन प्रकारद्वयम्। अर्थान्तरदिति। वह्निव्याप्त्युपन्यासस्य वह्निमत्सिद्धावनुपयुक्त्वादिति भावः। प्राहुरिति। यादृशपक्षकेत्यादिविवक्षां विनापि मूलोक्तसामञ्जस्यप्रकर्षः। ननु यत्र समाक्षोभादिवशातप्रतिज्ञया बोधो न जनितस्तत्राव्याप्तिरत आह यत्र चेति। तादृशाकाङ्क्षा इति। तादृशबोधानुकूलाकाङ्क्षा इत्यर्थः। योग्यतादीत्यादिना आसत्यादेः परिग्रहः। न चैवं हृदो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिः

सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः, न ह्ययमर्थोऽस्मान्नावगम्यते इति।

सुबर्थस्याप्यभावान्वयात्।

हेतुविषयकज्ञानजनकत्वव्याप्याऽवयवतावच्छेदकरूपशून्यत्वे सति उदाहरणान्यन्यायावयवत्वं तत्त्वम्। तादृशावच्छेदकं हेतुत्वादिकमिति केचित्।

योग्यताविरहादिति वाच्यम्!। सन्न्यायान्तर्गतप्रतिज्ञाया एव लक्ष्यतया तत्राऽव्याप्तेरदोषत्वादिति भावः। नन्वेवं शाब्दवाक्यपदयोर्वैयर्थ्यं योग्यताज्ञानादेस्तादृशबोधजनकत्वेपि आकाङ्क्षादिमत्त्वविरहेण वारणादत आह तल्लाभश्चेति। तथा चोक्तपदद्वयसान्निध्यादेव स्वरूपयोग्यत्वलाभान्न तयोर्व्यर्थत्वमिति भावः। ननु अन्यूनानतिरिक्तपदत्यागे उद्देश्यानुमितिविषयक-शाब्दज्ञानजनकवाक्यत्वं लक्षणं भविष्यति तच्च न सम्भवति असम्भवात् प्रतिज्ञाजन्यबोधस्यानुमित्यविषयकत्वादित्यत आह उद्देश्येति। समानविषयकेति। अन्यूनानतिरिक्तपदत्यागादुद्देश्यानुमितिविषयकपदेन उद्देश्यानुमितिविषयो विषयो यस्येति व्युत्पत्त्या तत्समानविषयकत्वालाभादिति भावः। अत्र कल्पे सत्यन्तस्य अवयवाघटकन्यायान्तर्गतत्वं. नार्थः तथा सति वह्निः शुक्लभास्वरस्ते जस्त्वाद्रूपवत्त्वादित्यादौ तेजस्त्वज्ञाप्यरूपवत्त्वहेतुकन्याये तेजस्त्वादित्यन्तस्य दुर्वारतापत्तेः, किन्तु न्यायावयवत्त्वमेवेत्याशयेन प्राग्व्याख्यातस्यापि सत्यन्तस्य अर्थो न्यायावयवत्वरूपः पुनरुदितः। समानविषयकान्तस्य फलमाह व्यतिरेकिणीति। यो यो निर्वह्निः स निर्धूमो यथा ह्रद इत्युदाहरणस्य लिङ्गाविषयत्वविरहादेव व्युदासाद्व्यतिरेकिणीत्युक्तम्। तथा च यो यो धूमवान् स वह्निमान् यथा ह्रदभिन्नमित्युदाहरणस्य निर्वह्नित्वरूपलिङ्गाविषयकत्व-मस्त्येवेति भावः। पक्षविषयत्वं त्यक्त्वा पक्षविशेष्यकत्वपर्यन्तस्याग्रे विवक्षणीयस्य व्यावृत्तिमाभिधातुं यथा पर्वत इत्यादिदृष्टान्तमुपेक्ष्य दृष्टान्तान्तरमाह यथा ह्रदेति। दृष्टान्तवत इति। उदाहरणस्य इत्यग्रेन्वयः। तथा च प्रतियोगिविधयैव निरुक्तोदाहरणस्यापि पक्षविषयकत्वात्पक्षविशेष्यकत्वं

हेतावुक्ते कथमस्य गमकत्वमित्याकाक्षायां व्याप्तिपक्ष-धर्म्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनायोदाहरणम् तत्रानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनकव्याप्यत्वा-

---

हेत्वभिधानेति। जिज्ञासाजनकत्वं—तद्योग्यता। वाक्यत्वं—न्यायावयवत्वम्। लिङ्गेत्यादि। लिङ्गविषयकेति पूर्वोपदर्शितार्थकम्। अभावहेतुकव्यतिरेक्युदाहरणवारणाय लिङ्गीति। लिङ्गी—साध्यं—तद्विषयकं—तद्वद्विशेष्यकम्।

वाच्यमिति भावः। दृष्टान्तमनन्तर्भाव्यैव उदाहरणशरीरमिति मतेपि पक्षविशेष्यकत्वपर्यन्तप्रवेशार्थं स्थलान्तरमाह ह्रदावृत्तीत्यादि। ह्रदो निर्धूमो ह्रदावृत्तिधर्मशून्यत्वादित्यादौ यो यो धूमवान् स ह्रदावृत्तिधर्मवानित्युदाहरणस्यापि लिङ्गविषयकस्य ह्रदात्मकपक्षविषयकत्वात्पक्षविशेष्यकत्वप्रवेशस्त-द्वारणार्थमावश्यक इति भावः। पक्षविशेष्यकेति। तन्मुख्यविशेष्यकेत्यर्थः। न च वृक्षस्तत्कपिसंयोगशून्यः तत्कपिविभागरहितत्वादित्यादिस्थलीयस्य यस्तत्कपिसंयोगवान् स तत्कपिविभागवानिति व्यतिरेक्युदाहरणस्य तत्कपिसंयोगवत्त्वप्रकारेणैव पक्षीभूतवृक्षविशेष्यकज्ञानजनकत्वात्तत्रातिव्याप्तिरिति वाच्यम्। कथितसाध्यसाधनयोः केवलान्वयितया व्यतिरेकव्याप्त्यसम्भवेन उदाहरणस्यैव तादृशस्यासत्त्वात्तत्रातिव्याप्त्ययोगादिति भावः। उपनयेति। यद्यपि निगमनस्यापि पक्षविशेष्यकज्ञानजनकत्वादुपनयमात्रोक्तिरयुक्ता तस्माद्वह्निमानित्यादौ वह्निमत्त्वेन पर्वतस्यैव विशेष्यत्वात्। न च पक्षतावच्छेदकधर्मावच्छिन्नविशेष्यकत्वप्रवेशेनैव तद्वारणसम्भवात्तदुपनयपर्यन्त-ानुसरणमिति वाच्यम्। हेतुत्वं प्रमेयं ज्ञेयत्वादित्यादौ हेत्ववयवस्यापि वारणीयत्वसम्भवात् इत्थमपि न्यूनतानुद्धारात्। तथापि निगमनादौ न सर्वत्रातिव्याप्तिसम्भवः तस्माद्भिद्यते इत्यादावभावात् उपनये तु सर्वत्र पक्षधर्मिकज्ञानजनकत्वात्तन्मात्रोक्तिरिति भावः। वस्तुमात्रस्यैव लिङ्गत्वात्सामान्यतस्तदविषयकत्वमसम्भवदुक्तिकमतः। प्रकृतपदं प्रक्षिप्य शङ्कते यद्यपीति। ननु लिङ्गतावच्छेदकरूपेण यल्लिङ्गविशेषणकत्वं तद्भावो वाच्यः तथा चोक्तप्रतिज्ञायां पृथिवीत्वत्वप्रकारेण पृथिवीत्वस्याप्रवेशान्नाव्याप्तिः

भिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनक-शब्दत्वमुदाहरणत्वं सामान्यलक्षणे साध्यसाधनसम्बन्ध-बोधजनकत्वं साध्य-साधनाभावसम्बन्धबोधजनकत्वञ्च विशेषलक्षणद्वयम्।

तेनेदं जलं निःस्नेहत्वप्रकारकप्रमाविषयशून्यत्ववत्वात् इदं द्रव्यं जलान्यत्वप्रकारकप्रमाविषयत्वशून्यत्वादित्यादौ यन्न जलं

विशेषणत्वनिवेशाच्चोक्तस्थल एव तादात्म्येन पृथिव्याः साधनत्वेपि नाप्रसङ्ग इत्यत आह गन्धवतीत्यादि। तथा इतरेभ्यो भिद्यते। अव्यापकमिति। लिङ्गतावच्छेदकीभूतं यद्गन्धत्वं तादृूप्येणैव लिङ्गस्य प्रतिज्ञायां निविष्टित्वादिति भावः। ननूक्तस्थले न्यायासम्भवात्प्रतिज्ञैव नास्ति कुत्राव्याप्तिरित्याशङ्क्य निराचष्टे न चेति। वाच्यमित्यग्रन्वयः। गन्धवत्त्वान्वयेति। गन्धवत्त्वप्रकारेणा-भेदान्वयबोधस्यायोगादित्यर्थः। उद्देश्यतावच्छेदकविधेययोरैक्याद्दण्डवान् रक्तदण्डवानित्यादिवन्निराकाङ्क्षत्वादिति भावः। साध्याभावेति तथा चेतरभेदाभावव्यापकीभूतस्य गन्धाभावस्याऽभाववती चेयमित्याकारकमुपनय-शरीरमतो न निराकाङ्क्षत्वमिति भावः। अत एवेति। यद्रूपेण हेतुत्वं तदवच्छिन्नाभावाभावत्प्रकारेणैव व्यतिरेक्युपनयस्य हेतुमत्त्वबोधकत्वादेवेत्यर्थः। न च नेयमिति। यद्यप्युक्तप्रयोगाद्व्याप्त्यवच्छिन्नस्य हेतोर्न पक्षधर्मताबोधः, तथापि पक्षधर्मताबोधमात्रमुपनयस्य फलं व्याप्तिबोधस्य उदाहरणादेव वृत्तत्वादतो व्याप्तिबोधार्थं न तत्र पदान्तरप्रक्षेप इति प्राचामाशयः। ननु व्याप्तस्य हेतोः पक्षसत्त्वं न वा इत्याकाङ्क्षायामाभिधानीयस्योपनयस्यावश्यं हेतुतावच्छेदकावच्छिन्नहेतुमत्तया पक्षबोधकत्वम् अन्यथा तादृशाकाङ्क्षाया अनिवृत्तेरत आह यदि चेति। शुद्धेति। विशेषणान्तरानवच्छिन्न इत्यर्थः। तदेति। प्रकृतेऽपि गन्धविशिष्टव्यतिरेकव्याप्तिविशिष्टगन्धवत्त्वावच्छिन्न-स्यैवाऽन्वयेन व्युत्पत्त्यभङ्गादिति भावः। प्राच्यैः खलेकपोतन्यायेनैव सर्वत्रान्वयबोधस्योपगमात् तन्मते च दण्डवान् रक्तदण्डवानित्यत्रापि रक्तत्वविशिष्टण्डत्वावच्छिन्नस्य न दण्डवत्यन्वयः किन्तु दण्डवति दण्डस्तत्र

न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु न। दृष्टान्त-प्रयोगस्य सामयिकत्वेनासार्व्वत्रिकत्वात् यो यो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः।

तन्निःस्नेहत्वप्रकारकप्रमाविषयः इत्युदाहरणे नातिप्रसङ्ग्ः। लिङ्गा-विषयकेत्यस्य पूर्वोक्तव्याप्यत्वाविषयकार्थकत्वे तु हेतुवारणाय लिङ्गीति।

रक्तत्वं विशेष्ये विशेषणमिति न्यायेन युगपदेव भासत इत्यवश्यं तन्मते निराकाङ्क्षत्वमित्याशयेन यदि चेत्युक्तम्। पक्षाविशेषणत्वेनेति। इदमत्र चिन्त्यते। किमिदं पक्षाविशेषणत्वेन लिङ्गाविषयकत्वं न तावत्पक्षविशेषणतान्यलिङ्ग-विषयत्वाभावः, प्रागुक्तदोषतादवस्थ्यात्, गन्धवती इतरेभ्यो भिद्यते इति प्रतिज्ञायामपि पक्षविशेषणतान्यगन्धत्वांशे विशेष्यातारूपस्यैव गन्धात्मकहेतुविषयत्वस्य सत्त्वात् प्रकारत्वविशेष्यत्वयोरिव विशेष्यताात्वयोर्मिथो निरूप्यनिरूपकत्वाभावेन पक्षनिष्ठाविषयत्वानिरूपितलिङ्गविषयत्वाभावस्यापि वक्तुमशक्यत्वात्। न च पक्षविशेषणतातिरिक्तं यद्धेतुतावच्छेदकधर्मा-वच्छिन्नविषयकत्वं तदभावोऽर्थः प्रोक्तप्रतिज्ञायान्तु गन्धनिष्ठगन्धत्वांशे विशेष्यत्वस्य गन्धत्वानवच्छिन्नत्वान्नाव्याप्तिरिति वाच्यम्। सुरभिगन्धवती इतरेभ्यो भिद्यते गन्धादित्यादि प्रतिज्ञायामव्याप्तितादवस्थ्यात् तत्र सौरभांशे गन्धत्वावच्छिन्नस्य विशेष्यत्वस्य पक्षविशेषणतातिरिक्तगन्धत्वा-वच्छिन्नविषयतारूपत्वात्। नापि प्रकृतपक्षविषयत्वानन्तर्गतलि-ङ्गविषयतवाभावोर्थः, तथासति प्रमेयत्वनिष्ठहेतुत्वं वाच्यं प्रमेयत्वादित्यादौ हेतावतिव्याप्तिप्रसङ्गात्। एवं दधि द्रव्यमित्यादिप्रतिज्ञायां वक्ष्यमाणा-व्यावप्तेरसङ्गत्यापत्तेः तत्रापि पक्षविषयत्वानन्तर्गतत्वे सति साध्यविषयत्वानन्तर्गतं यल्लिङ्गविषयकत्वं तदभाववत्त्वेनाऽव्याप्त्यसम्भवात्। साध्याविशेषणत्वेन लिङ्गाविषयत्वस्युक्तक्रमेणैव निर्वाच्यत्वात्। अन्यथाऽयं वह्निसामग्रीमान् वह्नेरित्यादावप्युक्तदिशैवाव्याप्तितादवस्थ्यादिति सङ्क्षेपः। वह्नेरित्यादाविति। अव्यापकमित्यग्रेऽन्वयः। पक्षेत्यादि। तथा चोक्तप्रतिज्ञाद्वये पक्षसाध्ययोर्विशेषण-तयैव लिङ्गस्य विषयत्वान्नाव्याप्तिरिति भावः। दधि द्रव्यमित्यत्र प्रतिज्ञायां

नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञान-विषयव्याप्त्युपनायकं वचनं तत्, उपनयातिव्याप्तेः, अत एव उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम्।

लिङ्गिविषयकत्वं च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतु-विशिष्टहेतुत्वविषयताबहिर्भावेण वाच्यम्।

विशेष्यत्वेनैव लिङ्गस्य भानात् पक्षसाध्ययोरविशेषणत्वेन यल्लिङ्गविषयत्वं तदभावविरहादव्याप्तिरित्यर्थः। न चात्र समवायेन दध्नो हेतुत्वात्तदन्व-यानुरोधादन्त्यावयविभिन्नं दध्येव प्रतिज्ञायां बोध्यते, अन्यथा भागासिद्धिप्रसङ्गात् तथा च पक्षसाध्ययोरविशेषणत्वेन लिङ्गतावच्छेदकावच्छिन्नपयावल्लिङ्ग-विषयकत्वविवक्षयैव नात्राव्याप्तिरिति वाच्यम्। तादात्म्यसम्बन्धेन तत्र दध्नो हेतुतया तथाप्यप्रतीकारात् इति भावः। व्यतिरेकिपक्षकप्रतिज्ञाया-मव्याप्तिमुक्त्वा केवलान्वयिपक्षिकायां तामाह प्रमेयत्वमिति। न च केवलान्वयिसाध्यके विवादाभावात्प्रतिज्ञैव नास्ति कुत्राव्याप्तिरिति वाच्यम्। केवलान्वयित्वाग्रहदशायां विवादसम्भवादिति भावः। ननु नीलधूमत्वेनेव प्रमेयत्वत्वेन हेतूकृत्यापि न न्यायो व्यर्थविशेषणत्वात् विषयतात्वस्यैव व्याप्यतावच्छेदकत्वादिति कुतस्तत्रत्यप्रतिज्ञायामव्याप्तिरत आह गोत्वाभावेति। अत्र च गोत्वाभावस्य स्वरूपसम्बन्धेन स्वस्मिन्नपि सत्त्वान्न पक्षधर्मत्वहानिः। ननु पक्षसाध्ययोरविशेषणत्वेनं यल्लिङ्गप्रकारकत्वं तदभावो वाच्यः तथा चोक्तप्रतिज्ञाभ्रमेपि लिङ्गस्य प्रकारत्वाभावान्नाव्याप्तिरत आह अतिव्यापकञ्चेति। सर्वत्रैवोपनये लिङ्गस्य पक्षविशेषणतयैव भानादतिव्याप्तिरित्यर्थः। न चोपनयमात्रस्यैव हेतुव्यापकत्वांशे पक्षाविशेषणत्वेन लिङ्गप्रकारकत्वान्नाति-व्याप्तिरित वाच्यम्। साक्षात्परम्परासाधारणपक्षतिविशेषणत्वस्यैव प्रवेश्यतया व्याप्तिविशेषणतया भातस्याप्युपनये पक्षविशेषणत्वात्। अन्यथा धूमसधर्मा पर्वतो वह्निमान् धूमादित्यादिप्रतिज्ञायामव्याप्तितादवस्थ्यात् तत्र धूमस्य पक्षे साक्षादविशेषणत्वात् साध्यवदन्यावृत्तित्वादिव्याप्तेर्लिङ्गाघटकत्वात्त-द्गर्भोपनयेऽतिप्रसक्तेस्तथाप्यवारणाच्चेति भावः। तथापीत्यादि। गन्धवती इतरेभ्यो भिद्यते गन्धादित्यादौ पर्वतो वह्निसामग्रीमान् वह्नेरित्यादौ च प्रतिज्ञायाः

एतदेवान्वयव्यतिरेकव्याप्तिविषयत्वविशेषितं विशेषलक्षणद्वय-मित्यन्ये। अत्र च व्यभिचारवारणाय वीप्सामाहुः। यत्र च सामानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा केवलान्वयिन्य-

---

लिङ्गविषयकज्ञानजनकत्वाऽनियतलिङ्गिविषयकज्ञानजनकत्व-नियतावयवताच्छेदकरूपवत्त्वं तत्त्वमित्यादिकं तु तादृशरूपान्तरापरिचये दुर्ग्रहत्वादनुपादेयम्।

सङ्ग्रहार्थमवच्छेदकत्वस्योपादानम्। अत्र च यत्र गन्धवत्त्वावच्छेदेन साध्यसिद्धेरुद्देश्यतायां गन्धादिकं हेतुस्तत्रत्यप्रतिज्ञायामव्याप्तिवारणार्थं यद्रूपेण पक्षत्वं तन्निष्ठावच्छेदकत्वादेरप्यवगाहिताया: क्व चिन्निवेशो बोध्यः। निरुक्तावगाहिताबहिर्भूतं यद्विषयित्वं तदभावस्योक्तौ प्रागुक्तस्य पक्षविशेष्यकत्वदलस्य वैपर्थ्यादत उक्तं लिङ्गविषयत्वस्येति। अखण्डाभावघटकतया च लिङ्गपदस्य न वैयर्थ्यमिति भावः। अत्रापि यत्पक्षसाध्यकप्रतिज्ञाव्यक्तीनां यादृशयादृशविषयिताकबोधजनकत्वं साम्प्रदायिकं तादृशविषयिताबहिर्भूतलिङ्गविषयित्वाभाव फलितार्थो ग्राह्यः। तेन गन्धवती इतरेभ्यो भिद्यते गन्धादित्यादौ प्रतिज्ञायाः पक्षे साध्यवैशिष्ट्यावगाहिज्ञानाजनकतया तादृशविषयिताबहिर्भूतलिङ्गविषयिताकत्वस्य तत्र सत्त्वेपि नाव्याप्तिरिति ध्येयम्। ननूक्तविषयिताबहिर्भावो न तद्भिन्नत्वं तादृशीं विषयितामादायै-वोक्ताव्याप्तितादवस्थात्, अत एव न तद्विषयित्वाव्यापकत्वमपि तद्बहिर्भावः, प्रतिज्ञाभेदेन स्वरूपसम्बन्धात्मनो लिङ्गविषयित्वस्य भेदादुक्तदोषतादवस्थात् अत आह वस्तुत इति। ननु लिङ्गत्वं व्यावप्यत्वं तथा च व्याप्यवान्पर्वतो वह्निमान् धूमादित्यत्र प्रतिज्ञायामव्याप्तिरत आह तथा चेति। तच्चेति। तादृशव्याप्तिविषयकत्वञ्चेत्यर्थः। हेतुभूतेति। हेतुभूतो योऽभावस्तत्प्रति-योगितावच्छेदकं यद्धेत्वभावत्वं तदवच्छिन्नेत्यर्थः। हेतौ साध्याभावव्यापकीभूताभावप्रतियोगित्वावगाहित्वामित्युक्तौ ह्रदौ निर्धूमो निर्वह्नित्वादित्यादौ यो यो निर्धूमत्वाभाववान् स वह्निमानिति व्यतिरेक्युदाहरणेऽतिव्याप्तिः तस्य निरुक्तव्याप्त्यविषयत्वादतो वक्रोक्तिः। तेन तत्रापि हेतुभूतं यन्निर्वह्नित्वं तत्प्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्ने

तेन वह्निमान् वह्निसामग्रीमत्त्वात् अयं हेतुरिदं वा हेतुत्वं तत्त्वेन प्रतीयमानत्वादित्यादौ नातिप्रसङ्गः।

साध्याभावव्यापकत्वावगाहित्वान्नातिव्याप्तिः। इदमुपलक्षणम्। साध्याभावोऽपि साध्यीभूताभावप्रतियोगितावच्छेदकावच्छिन्नत्वेनोपादेयः, तेन धूमाभावाभावत्वेन साध्याभावाप्रवेशेऽपि नोक्तस्थलीयोदाहरणेऽतिप्रसङ्गः। वस्तुतो यावत्यो व्याप्तिविषयिताः प्रकृतसाध्यहेतुकानुमित्यौपयिकाः प्रत्येकं तत्तद्विषयित्वा-भावकूटवत्त्वमेव प्रवेश्यम्। तेन नानाविधानां व्याप्तिविषयितानामनुगतधर्माभावेपि नोपनयाद्यतिव्याप्तिरिति ध्येयम्। प्रकृतहेतुतावच्छेदकेत्यस्य फलमाह द्रव्यत्वव्याप्येति। अत्र हेतुतावच्छेदकीभूतं यद्गुणत्वं तदवच्छिन्ने द्रव्यत्वव्याप्त्यभावान्नाव्याप्तिरिति भावः। द्रव्यत्वव्याप्यसंयोगवानयमित्युक्तौ विवादात् संशयाद्यसम्भवात्संयोगवद्वृत्तीत्युक्तम्। प्रकृतसाध्यतावच्छेदकेत्यस्य फलमाह गुणव्याप्येति। तथा चात्र स्पर्शत्वावच्छिन्नं यत्प्रकृतसाध्यं तद्व्याप्त्यलाभान्नाव्याप्तिरिति भावः। नन्वेवं निरुक्तव्याप्तिविषयिताशून्यत्वदलेनैव व्यतिरेक्युदाहरणस्यापि वारणसम्भवात्पक्षविशेष्यकार्थकं समानविषयकान्तदलं व्यर्थमतप्तपरित्यागे मूलस्य तात्पर्यमाह अन्यूनेति। ननु तद्दलत्यागे धूमादहेत्ववयवेऽतिव्याप्तिरत आह हेतुत्वमिति। वारणायेति। तत्र हेत्ववयस्य पक्षविशेष्यकत्वात्समानविषयकत्वदलेन तद्वारणायोगादिति भावः। ननु पञ्चम्याऽन्त्यत्वोक्तौ वह्निरन्यो धूमादित्यादिप्रतिज्ञायामव्याप्तिरत आह हेत्वन्यत्वस्य वेति। ननु हेतुत्वपक्षकस्य प्रमेयत्वादित्यादिहेतौ पक्षविशेष्यकज्ञानजनकत्वे सत्येव हेत्वन्यत्वविशेषणं वाच्यं तत्रैव किं मानमतस्तत्र प्रमाणमाह सङ्ख्येत्यादि। विभक्त्यर्थस्य संसगविधयैव भानसम्भवादित्यत आह सङ्ख्यातिरिक्तेति। तथा चोक्तनियमबलादेव प्रकृतहेतोः पक्षविशेष्यकज्ञानजनकत्वमावश्यकमिति भावः। यत्तु ननु सुवर्थमात्रस्य प्रकृत्यर्थविशेषणतयैव भानात्प्रमेयत्वादित्यादिहेतुवाक्येन प्रमेयत्वं हेतुतावदित्येव बोधजननात्पक्षविशेष्यकत्वदलेनैव तद्वारणं सम्भवत्यतः सङ्ख्यातिरिक्तेत्यादीति। तत्तुच्छम्। तादृशशङ्कया ग्रन्थावतारणे पर्वतो वह्निमान् पर्वतादित्यादौ हेत्ववयवे तथाप्यतिव्यावप्तितादवस्थ्यात् तस्याप्युक्तक्रमेणाशङ्कया पक्षविशेष्यकज्ञानजनकत्वसम्भवादिति ध्येयम्। सुबर्थसङ्ख्यायाः

प्रकृत्यर्थविशेषणतयैवान्वयात् तत्र व्यभिचारवारणार्थमतिरिक्तान्तम्। जानातीत्यादौ तिङर्थवर्तमानत्वस्य यजेतेत्यादौ च तिङर्थकार्यत्वादेः प्रकृत्यर्थविशेषणतयैव भानाद्विभक्त्यर्थेत्यपहाय सुबर्थेत्युक्तम्। ननु चैत्र गच्छेत्यादौ सुबर्थस्य सम्बोध्यत्वादेः प्रकृतत्यर्थचैत्रादौ विशेषणत्वेनैव भानादुक्तनियमो व्यभिचारीत्यत आह प्रातिपदिकेति। भेदेन तादात्म्यान्यसम्बन्धेन। वक्ष्यमाणत्वादिति। अन्यथां घटो रूपमोदनः पचतीत्यतोपि घटीयत्वेन रूपस्य ओदनीयत्वेन पाकस्य बोधापत्तेः, तथा च हेतुत्वमभिधयं भिद्यते वा प्रमेत्वादित्यादौ हेतुत्वसमबन्धेन प्रमेयत्वस्य नामोपस्थाप्याभिधेयत्वे धातूपस्थाप्यभेदे वा अन्वयासम्भवादवश्यं हेत्ववयवस्य हेतुतारूपपक्षविशेष्यकान्वयबोधजनकत्वमिति भावः। ननु कर्मत्वादिरूपभेदसंसर्गेण नामार्थस्यान्वयबोधे नाम्नः कर्मत्वाद्यर्थकविभक्त्यन्तस्य तन्त्रत्वादेवोक्तातिप्रसङ्गस्य वारणसम्भवात् पञ्चम्यर्थहेतुत्वादिविशिष्टस्य प्रमेयत्वादेर्हेतुत्वादिसम्बन्धेनैवाऽभिधेयत्वादावान्वये बाधकाभाव इत्यत आह चैत्रस्येत्यादि। तथा च चैत्रस्येदं मैत्रस्वत्वाभाववदित्यन्वयबोधे विभक्त्यर्थस्य स्वत्वादेर्नामार्थविशेष्यता भानमावश्यकं, न हि स्वत्वान्वितस्य मैत्रस्येव स्वत्वसम्बन्धेनाभावस्तत्र धनादौ प्रतीयते, स्वात्वादेर्वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्याऽसम्भवात्। न वा स्वत्वविशिष्टमैत्रस्य संयोगादिसम्बन्धेनैवाभावस्तत्र भासते, नेदं चैत्रस्येत्यपि प्रसङ्गात् चैत्रस्वामिकेपि धने संयोगादिसम्बन्धेन चैत्रस्याभावसत्त्वात् एतदर्थमेव चैत्रस्येत्यभिधानादिति भावः। ननु नञा चैत्रात्यन्ताभावस्य बोधने चैत्रात्मकनाम्नः प्रथमान्तत्वं तन्त्रमतः संयोगादिना चैत्रात्यन्ताभावस्य चैत्रीयधने सत्त्वेऽपि नेदं चैत्रस्येति न प्रयोग इत्यत आह मैत्रस्येदं न चैत्रस्येति। तथा चोक्त एव चैत्रात्यन्ताभावाबोध स्वीकारे प्रथमान्तताव्युत्पतौ व्यभिचार इत्यवश्यं चैत्रादिस्वत्वाभाव एव बोधनीयः अन्यथा उक्तक्रमेणाऽपि प्रसङ्गादिभावः। ननु नेदं चैत्रस्येत्यादिषष्ठ्या प्रतियोगित्वस्य च भिन्नस्याभिधानान्मैत्रादिधने स्वत्वसम्बन्धेन चैत्रान्यत्ववत्त्वमेव प्रतीयेत इति यदि बूयात्तदाह द्वयोरिदमिति। नेदं चैत्रस्येत्यनुषञ्जनीयम्। तथा चोक्तक्रमेण चैत्रमैत्रयोरिदं न चैत्रस्येति वाक्यस्यापि योग्यतापत्तिः उभयस्वामिकस्य सुतरां चैत्रभिन्नस्वामिकत्वादतस्तदयोग्यत्वार्थं चैत्रस्वत्वाभावबोधने विभक्त्यर्थविशेष्यकत्वमावश्यकमिति भावः। उक्तक्रमेण शाब्दबुद्ध्युपगमे अयोग्यस्य वाक्यस्य योग्यतापत्तिं बाधिकामुक्त्वा योग्यस्यापि

वक्यस्याऽयोग्यतापत्तिं बाधिकामाह नेदमेकस्यापीति। अत्रैकपदं प्राणिसामान्यपरम्। तथा च प्राणिभिन्नस्य स्वत्वसम्बन्धेन धनादौ असत्त्वान्नेदमेकस्यपीति वाक्यमयोग्यं स्यादतस्तद्योग्यत्वार्थं प्राणिस्वत्वाभावबोधने विभक्त्यर्थविशेष्यकत्वमावश्यकमिति भावः। नन्वेतावता षष्ठ्यर्थस्य प्रकृत्यर्थ विशेष्यतया भानसिद्धावपि पञ्चम्यर्थहेतुत्वस्य तथात्वं नायातमत आह इत्यादाविति। तथा च पर्वतो वह्निमान् धूमान्न तु जलादित्यादौ वन्ह्यादेर्जलादिज्ञाप्यत्वाभावबोधानुरोधादेव तथात्वमिति भावः। मैत्रादिसम्बन्धाभावबोधस्येति, पाठः तस्यैव प्रागुक्तत्वात्, चैत्रादिसम्बन्धाभावेति पाठः तु चैत्रादिसम्बन्धस्य सान्निध्यात्तदभावस्य च बोधो ग्राह्यः। वस्तुतः चैत्रस्येदं न किन्तु मैत्रस्येति योजनया चैत्रादिसम्बन्धाभावस्यैव बोधः प्रक्रान्त इति नानुपपत्तिलेशोपि। ननु नेदं चैत्रस्येत्यादौ स्वत्वान्वितस्य चैत्रस्यैव स्वत्वसम्बन्धेनाभावो नञा बोध्यते वृत्त्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वप्रवादस्य निर्युक्तत्वादित्यतः स्वत्वस्येव चैत्रस्यात्यन्ताभावो बोधयितुमशक्य इत्याह चैत्रो न पचतीत्यादि। तथा च विभक्त्यर्थात्यन्ताभावबोधने नञा सप्तम्यनपेक्षणात् अस्माकं मते चैत्रस्वत्वात्यन्ताभावस्य बोधो न दुर्घटः, प्रातिपदिकार्थस्य तु चैत्रादेः स्वत्वादिसम्बन्धेन धनादावभावस्य बोधो न सम्भवति नामार्थस्यात्यन्ताभावबोधने नञा सप्तम्यपेक्षणात्, अन्यथा घटः पटो नेत्यादावपि पटादेरत्यन्ताभावप्रतीतिप्रसङ्गादिति निगर्वः। हेतुविषयकेत्यादि। हेतुविषयकज्ञानजनकत्वव्याप्यं यदवयवतावच्छेदकं हेतुत्वोपनयत्वादि तच्छून्यत्वे सतीत्यर्थः। हेतुविषयकज्ञानजनकत्वस्य समानाधिकरणं प्रतिज्ञात्वमादायाऽसम्भवः स्यादतो व्याप्यपदम्। हेतुविषयकज्ञानजनकत्वव्याप्यं तत्तत्प्रतिज्ञाव्यक्तित्वमादायाव्याप्तेर्वारणाय अवयवतावच्छेदकेति। उदाहरणत्वस्य हेतुविषयकज्ञानजनकत्वनियतत्वात्तामादायोदाहरणेऽतिव्याप्तिरत उक्तमुदाहरणान्येति। उदासीनव्युदासाय न्यायावयवेति। अत्र हेतुविषयकत्वमवयश्यं प्रकृतहेतुविषयकत्वं वाच्यम्, अन्यथा वस्तुमात्रस्यैव हेतुत्वसम्भवात्प्रतिज्ञायामसम्भावापत्तेः तथा च सर्वसाधारणस्योपनयत्वादेरपि धूमादिप्रकृतहेतुविषयकज्ञानजनकत्वनियतत्वात्तद्वत्यतिव्याप्तिः। यदि च सर्वसाधारणमुपनयत्वादिकं नास्त्येवाऽवयवविभाजकं परन्तु तत्तत्साध्यत्वादिघटितं तत्तथेति विभाव्यते,

भेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थमिति तु वयं, वीप्सा च यत्पदे न तु तत्पदेऽपि विरूपोपस्थितयोरपि तत्पदेन

इति दीधितौ प्रतिज्ञालक्षणम्।

अनुमितीत्यादि। जनकान्तं न्यायावयवार्थकम्। निगमनवारणाय साध्याविषयकेति।

साध्याऽविषयकत्वं च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतु-विशिष्टहेतुत्वविषयताबहिर्भावेण, पूर्वोपदर्शितसाक्षात्परंपरासाधारण-

---

तदा प्रतिज्ञात्वमपि तत्तद्धेतुकतत्तत्साध्यकत्वादिनैव निर्वाच्यं तथा च यत्साध्यहेतुकप्रतिज्ञायां हेतुविषयकत्वनैयत्यं तत्राव्याप्तिरित्यस्वरसः के चिदित्युक्त्वा सुचितः। जिज्ञासानुपधायकप्रतिज्ञायामव्याप्तिरत आह तद्योग्यतेति। योग्यता चात्र प्रकृतहेत्ववयवप्राग्वर्तित्वरूपा ग्राह्या। ननु प्रतिज्ञैकदेशादेरपि तादृशवाक्यत्वात्तत्रातिव्याप्तिरत आह न्यायावयवत्वमिति। प्रकृतेत्यादिः। गन्धवती भिद्यते गन्धादित्यादिस्थलीयप्रतिज्ञायामव्याप्तिमाशङ्क्याह पूर्वोपदर्शितेति। प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयतावहिर्भावेन यल्लिङ्गविषयत्वं तदभावार्थकमित्यर्थः। तेन चोपनयादेर्व्युदासः। भावहेतुकोदाहरणस्य लिङ्गाविषयकत्वदलेनैव वारणसम्भवादाह अभावहेतुक इति। तथा च ह्रदो निर्धूमो निर्वह्नित्वादित्यादिस्थलीयस्य यो यो धूमवान् स वह्निमानित्युदाहरणस्य वारणायेत्यर्थः। लिङ्गिपदस्य पक्षपरत्वे पूर्वस्मादभेदापत्तिरतो व्यचष्टे लिङ्गि साध्यमिति। यद्यपि लिङ्गिविषयकं लिङ्गवद्विशेष्यकमित्येव व्याख्यातुमुचितं तावतैवाग्रिमदोषव्युदासात्, तथाप्यग्रिमव्याख्यायां लिङ्गिपदस्य साध्यपरत्वार्थं ग्रन्थगौरवापत्तिभियैवात्र लिङ्गि साध्यमित्युक्तमिति ध्येयम्। तेनेति। साध्यवन्मुख्यविशेष्यकत्वपर्यन्तविवक्षणनेत्यर्थः। अन्यथा इदं जलमित्यादिस्थलीयस्य यन्न जलं तन्निःस्नेहत्वप्रकारकप्रमाविषय इत्युदाहरण-स्यापि जलत्वं साध्यं जलात्मकञ्च साध्यवन्तमवगाहमानात्वात्तत्राति-प्रसङ्गापत्तेरिति भावः। स्नेहवत्त्वप्रकारकप्रमाविषयत्वस्य हेतुतायामुदाहरणस्य लिङ्गाविषयकत्वदलेनैव वारणसम्भवान्निःस्नेहत्त्वप्रकारकप्रमाविषयत्वाभावो

परामर्शाद्बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः, यथा "यद्यत् पापं प्रतिजही जगन्नाथ नम्रस्य तन्म" इत्यत्र। इदञ्च

प्रकृतपक्षविशेषणत्वेन वा तेन पूर्वोपदर्शितहेतौ नाव्याप्तिः।

इदं न दण्डाज्जातं दण्डसंयोगाजन्यद्रव्यत्वात्, अयं न धूमादालोकवान् आर्द्रेन्धनशून्यत्वादित्यादौ व्यतिरेक्युदाहरणस्य,

---

हेतुरुक्तः। शीतस्पर्शादिसमवायिकारणतावच्छेदकीभूतजलत्वजातेर्द्व्यणुकपर्यन्तस्थायित्वमते जलारम्भकपरमाणावुक्तहेतोः साध्यव्यभिचारादाह इदं द्रव्यमिति। यत्तु निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावो जलत्वमेव स्नेहानामनन्तत्वेन तथात्वायोगात् तथा च यन्न जलमित्युदाहरणस्य जलत्वरूपलिङ्गविषयकत्वादेव नातिप्रसङ्गः अतः स्थलान्तरमाह इदं द्रव्यमितीति। तन्न। निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावस्याऽतिरिक्तत्वात्। अन्यथा तुल्यन्यायेन जलान्यत्वप्रकारकप्रमाविषयत्वाभावस्यापि जलत्वस्वरूपत्वे यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्यापि जलत्वस्वरूपलिङ्गविषयकत्वेनैव वारणसम्भवादिति ध्येयम्। जन्यजलस्य पक्षत्वे निःस्नेहत्वप्रकारकप्रमाविषयकत्वशून्यत्वं स्वरूपासिद्धम् उत्पत्तिकालावच्छेदेन निःस्नेहत्वस्य तत्र सत्त्वादतो हेत्वन्तरमाह जलान्यत्वेति। तथा चोक्तस्थलीयस्य यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्य द्रव्यत्वरूपसाध्यविषयकत्वेपि तद्वन्मुख्यविशेष्यकत्वाभावान्नातिव्याप्तिरिति भावः। ननु विषयत्वं प्रमेयत्वज्ञानजन्यज्ञानीयं प्रमेयत्वादित्यादिस्थलीयहेता- वतिव्याप्तिः, तादृशानूपूर्व्याः सम्प्रदायविरोधेन न्यायाघटकतया कथञ्चिद्द्वारेण ह्रदो निर्द्धूमो निर्वह्नित्वादित्यादिस्थलीये यत्र धूमस्तत्र वह्निरिति व्यतिरेक्युदाहरणेतिव्याप्तिः तस्य साध्यवन्मुख्यविशेष्यकत्वात् यत्र धूमस्तत्र वह्निरित्याकारकस्यैवोदाहरणस्य मिश्रैर्व्यवस्थापितत्वादित्यतः प्रकारान्तरमाह लिङ्गाविषयेत्यस्येत्यादि। पूर्वोक्तेति। प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौ- पयिकेत्यर्थः। ननु साध्यवद्विशेष्यकत्वरूपस्य प्रागुक्तलिङ्गिविषयत्वस्य निवेशे घटः प्रमेयो द्रव्यत्वादित्यादौ हेतावतिव्याप्तिः पञ्चम्यर्थस्यापि प्रमेयत्वेन साध्यवत्त्वादतः साध्यतावच्छेदकरूपेण साध्यविषयकत्वरूपं तद्वाच्यं तच्च वह्निमान् वह्निसामग्रीमत्त्वादित्यादि-

साध्यसाधनोभयाश्रयविकलानुपदर्शितान्वयविपरीतोपदर्शितान्वयानुपदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकभेदादाभासरूपमिति।

हेतुत्वपक्षकसाध्यान्वितस्वार्थबोधकेदं पदशालिनः उपनयस्य च वारणाय हेतुविभक्तिमदिति। तदर्थश्च प्रकृतसाध्यान्वितस्वार्थ-

---

हेतावेतिप्रसक्तमत आह लिङ्गिविषयत्वञ्चेति। प्रकृतेत्यादि। प्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपित हेतुत्वावच्छिन्नविशेष्यकत्वस्य बहिर्भूतमव्यापकं यत्साध्यविषयत्वं तादृशविशेष्यताबहिर्भूतविषयताकत्वमिति यावत्, साध्यप्रवेशे वैयर्थ्यादिति ध्येयम्। हेतुतावच्छेदकावच्छिन्नेत्यस्य फलमाह वह्निमानित्यादि। वह्निसामग्रीमत्त्वादित्यत्र हेतुप्रकारकहेतुत्वावावच्छिन्न-विशेष्यत्वाव्यापकसाध्यविषयिताकत्वेपि हेतुतावच्छेदकावच्छिन्नप्रकारि-त्वाव्यापकसाध्यविषयिताकत्वविरहान्नातिव्याप्तिरिति भावः। हेतुत्वत्वावच्छिन्नविशेष्यताप्रवेशस्य फलमाह अयं हेतुरिति। अयं हेतुत्ववान् हेतुत्वेन प्रमीयमाणत्वादित्यादौ हेत्ववयवस्य पञ्चम्यर्थविधेयहेतुतावच्छेदका-वच्छिन्नप्रकारित्वाव्यापकसाध्यविषयितावत्त्वेपि तादृशविषयित्वस्य हेतुत्वावच्छिन्नविशेष्यत्वाव्यापकत्वविरहान्नातिव्याप्तिरिति भावः। ननु पक्षांशे साध्यावगाहित्वविवक्षयैव उक्तहेतोर्वारणसम्भवान्निक्तविषयिताबहिर्भावेन साध्यविषयितापर्यन्तानुधावनमफलमत आह इदं वेति। तथा चेदं हेतुत्वं हेतुतात्वेन प्रमीयमाणत्वादित्यादौ हेतुत्वत्वसाध्यकस्य हेत्ववयवस्य पक्षीभूतहेतुत्वांशे पञ्चम्यर्थतावच्छेदकीभूतहेतुतात्वरूपसाध्यावगाहि-त्वात्तत्राऽतिव्याप्तिरेव स्यात् यदि नोक्तविवक्षा स्यादिति भावः। नन्वेवमपि यत्रायं वह्निमानित्यादौ विषयितासम्बन्धेन बुद्ध्यवच्छिन्नस्यैव समवायेन हेतुत्वं तत्र बुद्धिमत इत्यादौ हेत्वयवेऽतिव्याप्तिः तस्य मतुबर्थबुद्धि-सम्बन्धित्वप्रकारेणैव हेतुत्वावगाहितया हेतुतावच्छेदकधर्मावच्छिन्नप्रकारता-निरूपितहेतुत्वविशेष्यताबहिर्भावेनैव साध्यावगाहित्वात्, तथाऽयमेको धूमादित्यत्रापि हेतावतिव्याप्तिः तस्या निरुक्तविषयिताबहिर्भावेन प्रकृत्यर्थधूमे, एकत्वरूपसाध्याववगाहित्वादिति चेन्न। यत्साध्यकहेत्ववयवानां यादृशयादृशविषयिताकबोधजनकत्वं सम्प्रदायसिद्धं तादृशतादृशविषयितावहिर्भावेन

साध्यावगाहित्वस्य विवक्षितत्वादुक्तहेतूनामतथात्वादिति भावः। लिङ्गेत्यादि। उपनयादिवारणार्थमनियतान्तं प्रकृतहेतुविषयकज्ञानजनकत्वाव्याप्यार्थकम्। प्रतिज्ञात्वस्यापि क्व चिल्लिङ्गज्ञानजनकत्वसमानाधिकरणत्वाद-नियतत्वानुसरणम्। अप्रसिद्धहेतुकोदाहरणस्थले लिङ्गज्ञानजनकत्वानियत-स्योदाहरणत्वस्य वारणाय लिङ्गिविषयकेत्यादि। प्रकृतसाध्यविषयक-ज्ञानविषयकत्वनियतेति तदर्थः। इदं जलं निःस्नेहत्वाभावादित्यादौ यन्न जलं तन्निःस्नेहत्ववदित्याद्युदाहरणे तत्तदुदाहरणत्वमादायातिप्रसङ्गवारणार्थ-मवयवतावच्छेदकेत्युक्तम्। दुर्ग्रहत्वादित्याद्युपलक्षणम्। यत्साध्यकप्रतिज्ञायां लिङ्गविषयकत्वनियमस्तत्र प्रागुक्तरीत्या अव्याप्तेश्चेत्यापि द्रष्टव्यम्।

इति जागदीश्याम् अवयवग्रन्थे प्रतिज्ञालक्षणम्।

न्यायावयवार्थकमिति। न चन्यायान्तर्गतत्वमात्रं सम्यक् तावताप्युदासीनस्य धूमादित्यादिवाक्यस्य वारणसम्भवादिति वाच्यम्। निगमनैकदेशे तस्मादित्यत्रातिव्याप्त्यापत्तेरिति भावः। उपनयादीनां वक्ष्यमाणहेतुविभक्तिमत्त्वेनैव वारणसम्भवादाह निगमनेति। ननु वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ हेतावव्याप्तिः तस्य साध्याविषयकज्ञानजनकत्वाभावादत आह साध्याविषयत्वञ्चेति। प्रकृतेति। तथा च हेतुतावच्छेदकावच्छिन्नप्रकारता-निरूपितहेतुत्वत्वावच्छिन्नविशेष्यताबहिर्भावेन यत्साध्यविषयकत्वं तच्छून्यज्ञानजनकत्वमर्थः। न च तादृशविशेष्यताबहिर्भूतविषयताशून्यत्वस्यैव सम्यक्त्वे साध्यप्रवेशो व्यर्थ इति वाच्यम्। अखण्डाभावत्वात्। न च तथाप्यनतिप्रयोजकत्वम्, हेतुविभक्तिमत्त्वपदसार्थक्यस्यैवाऽतिप्रयोजकत्वात्। अन्यथा तद्वारणीये व्यतिरेक्युदाहरणादौ निरुक्तविशेष्यताबहिर्भूतविशेष्यता-वत्त्वादेवातिव्याप्तिविरहेण तद्वैयर्थ्यापत्तेः। न चेदमेकं धूमादित्यादिहेतावव्याप्तिः तस्य हेतुविशिष्टहेतुत्वविषयताबहिर्भावेनैकत्वरूपसाध्यावगाहित्वादिति वाच्यम्। धूमादावेकत्वादेरयोग्यतानिश्चयकालीनस्य केवलधूमादिहेतुताबोधस्य जनकतामादायैव तत्र लक्षणसम्भवादिति भावः। नन्वेवमपि यत्रायं वह्निमानित्यादौ विषयितासम्बन्धेन बुद्ध्यवच्छिन्नस्यैव समवायेन हेतुत्वं तत्र वह्निमत इत्यादौ हेतावव्याप्तिः तस्य हेतुप्रकारकहेतुत्वविषयताबहिर्भावेन मतुबर्थसम्बन्धांशे बुद्धिरूपसाध्यावगाहित्वादत आह पूर्वोपदर्शितेति। प्रतिज्ञालक्षणोपदर्शितेत्यर्थः। तथा च यत्पक्षकयत्साध्यकप्रतिज्ञाव्यक्तीनां पक्षोद्देश्यकसाध्यनिष्ठया-

उदाहरणानन्तरम्भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्त्तते न वेत्या- काङ्क्षायां भवतु व्याप्तस्य पक्षधर्म्मत्वप्रदर्शनायोपनयः, तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपन- यत्वमिति सामान्यलक्षणं, साध्यव्याप्यविशिष्टपक्षबोधका-

---

बोधनक्षमार्थोपस्थितिजनकविभक्तिमत्त्वम्।

हेत्विति संपातायातम्।

यदि च पर्वते पर्वतभिन्नत्वप्रकारकज्ञानस्य विशेष्यतया अभावस्य साध्यत्वं हेतुत्वं च सिषाधयिषया च न्यायप्रयोगः तत्र यथा

दृशयादृशविशेषणताकबोधजनकत्वं साध्यनिष्ठतादृशविशेषणताशून्यबोधजनकत्वमर्थः स चोक्तहेतावप्यस्तीति नाव्याप्तिः। तत्र साक्षात्पक्षविशेषणत्वेन यत्साध्यविषयकत्वं तच्छून्यत्वमात्रोक्तौ तस्मावद्धिद्यत इत्यादिनिगमनेऽतिव्याप्तिः तत्राख्यातार्थद्वारैव प्रतिज्ञायाः पक्षधर्मिकसाध्यविशेषणकज्ञानजनकत्वादतः परम्परेत्युक्तम्। तन्मात्रोक्तौ च तस्मात्पचतीत्यादिनिगमनेऽतिव्याप्तिः तत्र साक्षादेव प्रतिज्ञायाः पक्षे साध्यप्रकारकज्ञानजनकत्वादतो द्वयमुपात्तम्। न च साध्यनिष्ठतादृशविशेषणत्वानां प्रातिस्विकरूपेण प्रवेशादननगमः, तादृशविशेषणत्वाभावकूटस्यानुगतत्वात् पक्षनिष्ठमुख्यविशेष्यतानिरूपितसाध्यनिष्ठविशेषणताकत्वेन कथञ्चिदनुगमयितुं शक्यत्वाच्च। न चैवं तस्मात्पचतीत्यादिनिगमनेऽतिव्याप्तिरिति वाच्यम्। स्वस्यापि स्वघटकतया साध्यनिष्ठविषयतायामपि तादृशविशेषणतात्वादिति भावः। पूर्वोपदर्शितेति। वह्निमान् वह्निसामग्रीमत्त्वादित्यादावित्यर्थः। यद्यपि हेतुविभक्तिमत्त्वानुक्तौ ह्रदो निर्धूमो निर्वह्नित्वादित्यादौ व्यतिरेक्युदाहरण एवातिप्रसङ्गः, तथापि अग्रे विवक्षणीयतदर्थस्य व्यावृत्त्यर्थं स्थलान्तरमाह इदमिति। दण्डसंयोगेति। संयोगपदं साध्याविशेष्यस्य वारणाय। द्रव्यपदञ्च दण्डगुणादौ व्यभिचारस्य वारणाय। अजन्यत्वस्यैव हेतुत्वसम्भवेपि अखण्डाभावतया दण्डसंयोगाजन्यत्वे व्यर्थविशेषणत्वाभावः। ननूक्तस्थलीयस्य यद्दण्डाज्जातं तद्दण्डसंयोगाजन्यद्रव्यत्वाभाववदित्युदाहरणस्य ज्ञापकत्वरूपहेतुत्वप्रतिपादकविभक्ति-

वयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वञ्च विशेषलक्षणद्वयम्, उदाहरणान्त एव प्रयोग इति न वाच्यं तृतीयलिङ्गपरामर्शस्य व्याप्तिपक्षधर्म्मताव-

---

तादृशज्ञानाभावादुत्पन्नं ज्ञानमिति दृष्टान्तशालिनि व्यतिरेक्युदाहरणेऽति-व्याप्तिरित्युच्यते।

तदा अवयवान्तरोपस्थापितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वं वक्तव्यम्। उदाहरणान्यत्वेन वा विशेषणीयम्। केचित्तु साध्य-

---

मत्त्वमात्रेणापि वारणसम्भवादग्रे साध्यान्वययिस्वार्थबोधाक्षणेत्यादिपर्यन्तविवक्षा व्यर्थेत्यत आह अयं न धूमादिति। अन्वय्युदाहरणस्य साध्याविषयकत्वदलेनैव वारणसम्भवादाह व्यतिरेकिणीति। न्याय इति शेषः। यद्यप्युक्तस्थलीयस्य धूमादालोकव्यापकीभूताभावप्रतियोग्यार्द्रेन्धनशून्यत्ववानयमित्याकारकोपनस्यापि वारणसम्भवादुदाहरणमात्रानुसरणमयुक्तम्, तथापि अग्रे हेतुत्वपक्षकोपनयस्य वारणेनैव उपनयान्तरस्य वारणमर्थतः सिद्धमतो न तस्य पृथगुपन्यास इति ध्येयम्। ननु प्रकृतसाध्यान्वितस्वार्थोपस्थापकपदवत्त्वेनाप्युक्तोदाहरणस्य वारणसम्भवाद्विभक्तिपर्यन्तानुसरणं व्यर्थमत आह हेतुत्वपक्षक इति। घटादिपक्षकोपनयस्य विभक्तिपदाप्रवेशेपि प्रकृतसाध्यान्वितस्वार्थबोधकहेतुत्वार्थ-कपदवत्त्वविवक्षयापि वारणसम्भवात् हेतुत्वपक्षकोपनयानुसरणम्। न चोपनयमात्रस्यैव प्रागुक्तसाध्याविषयकत्वदलेनैव वारणादिदमयुक्तम्, पूर्वोपदर्शितेत्यादिद्वितीयकल्पोक्तसाध्याविषयकत्वस्योपनयेपि सम्भवात्। प्रकृतहेतुविशिष्टहेतुत्वविषयिताबहिर्भावेन साध्याविषयकत्वकल्पे तु हेतुत्वं न रूपं गुणभिन्नत्वादित्यादिस्थलीयस्य रूपत्वव्यापकाभावप्रतियोगिगुणा-न्यत्ववदिदमित्येवं व्यतिरेक्युपनयस्य वारणार्थं विभक्तिपदम्, तस्यापि तस्मान्न रूपमित्याकारकनिगमनोपस्थापितसाध्यान्वितस्वार्थबोधकहेतुत्वार्थकेदम्पदवत्त्वादिति वदन्ति। यथाश्रुतमूलेन वारयितुमशक्यत्वादाह तदर्थश्चेति। अयं धूमाद्वह्निमान् आलोकादित्यादिस्थलीयस्य धूमाद्वह्निव्याप्यालोकवानयमित्युपनयस्यापि वह्निस्वरूपसाध्यान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्त्वात्तत्रातिव्याप्तिरतः

प्रकृतपदम्। तथा च तत्र धूमाज्ञानज्ञाप्यवह्नित्वावच्छिन्ने पञ्चम्यर्थहेतुत्वस्यान्वयान्नातिव्याप्तिः। ननु प्रकृतहेतुविशिष्टहेतुत्वविषयताबहिर्भावेन साध्याविषयकत्वस्य प्रवेशकल्पे मूलोक्तहेतुपदं व्यर्थं प्रकृतसाध्यान्वितार्थोपस्थितिजनकविभक्तिमत्त्वस्यैव सम्यक्त्वादत आह हेत्वितीति। पूर्वोपदर्शितेत्यादिः। द्वितीयसाध्याविषयकत्वकल्पे तु हेतुत्वबोधकार्थकं हेतुपदं देयमेव। अन्यथा गुणाभावो गुणशून्यो द्रव्यभिन्नत्वादित्यादिस्थलीयस्य गुणव्यापकीभूताभावप्रतियोगिद्रव्यत्ववानयमित्याकारकव्यतिरेक्युपनयस्यापि पक्षीभूतप्रकृतसाध्यान्वितैकत्वोपस्थितिजनकप्रथमाविभक्तिमत्त्वात्तत्रातिव्याप्त्यापत्तेः। वस्तुतः प्रथमकल्पेपिहेतुपदादेव प्रकृतसाध्यान्वितस्वार्थोपास्थितिहेतुत्वस्य लाभान्न तद्वैयर्थ्यं सामान्यशब्दस्य विशेषपरताया व्युत्पत्तिसिद्धत्वादिति परमार्थः। ननु पर्वतस्तत्पुरुषीयपर्वतभिन्नत्वप्रकारकनिश्चयस्य विशेष्यतयाऽभाववान् तत्पुरुषीयतादृशनिश्चयाभावादित्यादिस्थलीयस्य यो यस्तत्पुरुषीयपर्वतभिन्नत्वप्रकारकनिश्चयवान् स तत्पुरुषीयतादृशनिश्चयवान् यथा तत्पुरुषीयतादृशनिश्याभावादुत्पन्नं ज्ञानमित्युदाहरणस्यापि प्रकृतहेतुविशिष्टहेतुत्वविषयताबहिर्भावेनोत्पन्नज्ञानांशे प्रकारतावच्छेदकतया साध्यावगाहित्वेऽपि पूर्वोपदर्शितसाक्षात्परम्परासाधारणसाध्याविषयकत्वात् प्रकृतसाध्यान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्त्वाच्च द्वितीयकल्पे तत्रातिव्याप्तिरित्याशङ्कते यदि चेति। पर्वत इति। पक्ष इति शेषः। पर्वतभिन्नत्वेति। तत्पुरुषीयपर्वतभिन्नत्वप्रकारकनिश्चयस्येत्यर्थः। यथाश्रुते तादृशज्ञानत्वावच्छिन्नाभावस्य ज्ञानानुत्पादकतया वक्ष्यमाणदृष्टान्तासङ्गतेर्विशेष्यतासम्बन्धेन तादृशनिश्चयत्वावच्छिन्नाभावादेव पर्वतत्वादिप्रकारकज्ञानस्योत्पादात्। अत एव वस्तुमात्रस्यैव सर्वं पर्वतभिन्नमित्याकारकभ्रमविशेष्यत्वात्साध्याप्रसिद्धिरित्यपि दूषणं समाहितम्, तादृशभ्रमशून्यपुरुषस्यैव साध्येऽन्तर्भावात् प्रमेयावच्छेदेन विशेष्यतया तादृशज्ञानाभावस्य पर्वते सम्भवाच्चेति ध्येयम्। पर्वतत्वादिहेतुतायामुदाहरणस्य प्रकृतसाध्यान्वितस्वार्थबोधकविभक्तिमत्त्वविरहादेव व्युदासः स्यादतः साध्यस्यैव हेतुत्वमुक्तम्। ननु साध्यस्यैव हेतुत्वे विवादाङ्गसंशयाभावान्न्याय एव नास्ति कस्योदाहरणेऽतिव्याप्तिराशंङ्क्यत इत्यत आह सिषाधयिषेति। इदञ्च स्वरूपसम्बन्धेनैव साध्यसाधनभावमभिप्रेत्योक्तं स्वरूपकालिकादिसम्बन्धाभ्यां

गाहिनोऽवयवान्तरादलाभात् तदनभ्युपगमेऽपि पक्षधर्म्मताया अलाभात्। न च हेतुवचनादेव तदवगमः, तस्य को हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्याततत्परत्वात्, वादिवाक्यादेवाक्षेप इति चेत्। न तदर्थस्यासिद्धत्वेनाऽनाक्षेपकत्वात् अन्यथा प्रतिज्ञावाक्यादेव सर्व्वापेक्षेऽवयवान्तर-

---

विषयकधीजनकत्वानियतहेतुविभक्तिमत्त्वनियतावयवतावच्छेदक-रूपवत्त्वं समुदितलक्षणार्थम् इत्याहुः।

तच्चिन्त्यम्। हेतुत्वप्रतिपादकेति। विभक्त्यर्थहेतुत्वविशेष्यकान्वय-बोधजनकन्यायावयवत्वमर्थः। हेतुत्वं प्रमेयमित्यादिप्रतिज्ञावारणाय विभक्त्यर्थेति। तस्मादितरेभ्यो भिद्यत इत्यादिनिगमनवारणाय हेतुत्वेति

तादृशज्ञानाभावस्य साध्यसाधनस्थलेऽनुमित्सां विनापि न्यायप्रयोगसम्भवादिति ध्येयम्। तादृशज्ञानाभावादिति। तत्पुरुषीयपर्वतभिन्नत्वप्रकारकनिश्चया-भावादित्यर्थः। अन्वय्युदाहरणस्य साक्षात्परम्परासाधारणपक्षविशेषणतया साध्याविषयकत्वदलेनैव वारणसम्भवादाह व्यतिरेकीति। न चैतदुदाहरणवारणार्थमेव मूलोक्तं हेतुपदं ज्ञापकत्वरूपहेतुत्वबोधकार्थकमस्तु प्रकृतस्थलीयपञ्चम्याः कारणमात्रबोधकत्वादिति वाच्यम्। यत्र पर्वतभिन्नत्वज्ञानाभावज्ञाप्यास्यैव ज्ञानस्य यथा पर्वतभिन्नत्वज्ञानाभावादिदं ज्ञानमित्येवं प्रकारेण दृष्टान्तता तादृशोदाहरणे तथाप्यतिव्यावप्तितादवस्थ्यादिति भावः। दृष्टान्तस्योदाहरणघटकत्वं न सर्वसम्मतमतो यदि चेत्युक्तम्। यत्तु प्रकृतसाध्यविशेष्यकस्वार्थान्वयबोधजनकत्वविवक्षयैव कथितोदाहरणव्युदा-सम्भवात् यदि चेत्युक्तमिति। तत्तुच्छम्। साध्यविशेष्यकान्वयबोधप्रवेशे विभक्तिपदव्यर्थतापत्तेः, उपनयस्थायपदस्य साध्यप्रकारकान्वयबोधं प्रत्येव हेतुत्वेन तत्रातिप्रसङ्गाभावादिति ध्येयम्। अवयवान्तरेति। न च अवयवान्तरेण प्रतिज्ञादिना साध्यविधया वस्तुगत्योपस्थापितो यः पर्वतभिन्नत्व-प्रकारकज्ञानाभावास्तदन्वितस्यैव स्वार्थस्यान्वयबोधकत्वमुक्तोदाहरणस्थपञ्चम्या अप्यस्तीत्यतिव्याप्तितादवस्थ्यमिति वाच्यम्।

अवयवान्तरस्थपदसाकाङ्क्षविभक्तिमत्त्वस्य विवक्षितत्वादिति भावः। वक्तव्यमिति। हेतुविभक्तिमत्त्वदलेनेति शेषः। अवयवान्तरादिप्रवेशमपेक्ष्य लाघवादाह उदाहरणेति। साध्येत्यादि अत्राऽनियातान्तं निगमनत्वस्य, नियतत्वान्तमुदाहरणत्वस्य, अवच्छेदकान्तञ्च व्यतिरेक्युदाहरणत्वस्य व्युदासाय बोध्यम्। सर्वसाधारणस्य हेतुत्वनिगमनत्वादेर्दुर्वचत्वान्नेदं युक्तमित्याशयेनाह तच्चिन्त्यमिति। अत्र निगमनादेरपि हेतुत्वप्रतिपादकविभक्तिमत्त्वात्तत्रा-तिव्याप्तिरतो व्याचष्टे विभक्त्यर्थेति। विभक्त्यर्थीभूतं यद्धेतुत्वं तद्विशेष्यकान्वयबोधजनकेत्यर्थः। हेतुत्वमित्यादि। यद्यपि नामोपस्थाप्यस्यापि हेतुत्वस्य विभक्त्यर्थत्वात्तद्दोषतादवस्थ्यम्, तथापि विभक्तिजन्योपस्थिति-सहकारेण हेतुत्वविशेष्यकबोधजनकत्वं विवक्षितम्। न चेदं हेतुत्वमित्यादिस्थलीयस्य तस्माद्धेतुत्वमित्यादिनिगमनस्यैवमप्यवारणं तस्य पञ्चमीजन्यहेतुत्वोपस्थितिसहकारेणैव तादृशबोधजनकत्वादिति वाच्यम्। हेतुत्वविधेयकबोधजनकत्वेनापि विभक्तिजन्योपस्थितेर्विशेषणीयत्वात्, तथा च तस्माद्धेतुत्वमित्यादौ पञ्चम्यर्थहेतुत्वस्य साध्यीभूतहेतुत्वांशे विधेयतयैव भानात्तद्वारणमिति भावः। भिद्यत इत्यादिना तस्मात्पचतीत्यादिनिगमनस्यापि सङ्ग्रहः, तस्यापि आख्यातविभक्त्यर्थविशेष्यकबोधजनकत्वादिति भावः। ननु घटो दण्डादित्यादिप्रतिज्ञास्थलीयस्य तस्माद्दण्डादित्यादिनिगमनस्यापि पञ्चम्यर्थहेतुत्वविशेष्यकबोजनकत्वात्तत्रातिव्याप्तिरत आह घटो दण्डादिति। ननु घटो दण्डादित्यत्र जनकत्वमेव पञ्चम्यर्थः इति तत्रत्यलक्षणस्य ज्ञापकत्वलक्षणहेतुत्वविशेष्यकबोधजनकत्वाभावादेव वारणं भविष्यतीत्यत आह वह्निर्धूमादिति। तदवृत्तेरिति। पञ्चम्यर्थहेतुताया दण्डादिवृत्तित्वेन घटाद्यवृत्तेरिति भावः। स्वावृत्तेरपि स्वस्य तादात्म्येन स्वनिष्ठधर्मव्यापकत्वादाह अतदात्मन इति। तथा च तादात्म्येतरवृत्त्यनियामकसम्बन्धेन व्यापकत्वविरहादुक्तक्रमेण न्याय एव नास्ति कस्य निगमनेतिव्याप्तिरिति भावः। ननु वृत्त्यनियामकसंयोगादिनापि गगनादेः पृथिवीत्वादिव्यापकत्वस्य स्वयमेवोक्तत्वात् ज्ञाप्यत्वस्य पञ्चम्यर्थत्वमते वह्न्यादौ तादृशसाध्यस्य सत्त्वाच्चेदं न युक्तमत आह सम्प्रदायेति। न च विवादाङ्गस्य संशयादेः शाब्दप्रमोपयुक्तस्य चाकाङ्क्षादेः सम्भवेपि वह्निर्धूमादित्यादिप्रतिज्ञानङ्गीकारः साम्प्रदायिकानां निर्बीजमिति वाच्यम्। एकसुबर्थेन समं सामान्यत एव

विलयात्। प्रतिपाद्यानां स्वत एव तदवगम इति चेत्, न, तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात् प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च अन्यथावयवान्तरेऽप्येवं प्रसङ्गादिति।

विशेष्येति च। घटो दण्डात् वह्निर्धूमादित्यादिकाः न प्रतिज्ञाः। तदवृत्तेरतदात्मनश्च तद्धर्म व्यापकत्वायोगात् सम्प्रदायविरोधाच्च। तेन तत्रत्यनिगमने नातिप्रसङ्ग इति भावः।

सुबर्थान्तरान्वयस्याऽव्युत्पन्नतया प्रतिज्ञानिविष्टपञ्चम्यर्थोपस्थापित-धूमज्ञाप्यत्वादिसाध्ये हेत्ववयवान्तर्गतपञ्चम्यर्थान्वयस्यैव उपनयानङ्गीकार-बीजत्वात्। अन्यथा गृहे घटस्य इत्यादितोपि घटसम्बन्धो गृहवृत्तिरीत्याकारकबोधप्रसङ्गात्। अत एव धने चैत्रस्य इत्यादितोऽपि चैत्रस्वत्ववद्धने इत्येव बोधो न तु चैत्रस्वत्वं धनवृत्ति इत्याकारको बोधः सप्तम्यर्थाधेयत्वस्य षष्ठ्यर्थस्वत्वेऽन्वयस्याऽव्युत्पन्नत्वात्। न च क्रयाच्चैत्रस्य धनमित्यादितः क्रयजन्यचैत्रस्वत्वस्य धनादौ प्रतीत्यनुरोधात्सुबर्थेन समं स्वार्थमुख्यविशेष्यकान्वयबोधजनकत्वमेव सुपामव्युत्पन्नं कल्प्यते तथा च वह्निर्धूमादिति प्रतिज्ञायां पञ्चम्यर्थस्य पक्षविशेषणतया मुख्यविशेष्यत्वाभावात् तत्र हेत्वन्तर्गतपञ्चम्यर्थस्याऽन्वये बाधकाभाव इति वाच्यम्। तावता तस्माद्धूमादित्येवं निगमनान्तर्गतयोः पञ्चम्यर्थयोः परम्परान्वयसम्भवेन सम्प्रदायविरोधस्यावश्यकत्वात्। तत्र धूमज्ञाप्यत्वादिसाध्यस्य मुख्यविशेष्यतयैव भानादिति भावः। तादृशयोग्यतासत्त्वादिति। धूमादितिवाक्यात्मकेत्यादिः। उदाहरणत्वञ्चेति। न्यायगर्भोदाहरणत्वप्रवेशेऽपि अनुक्तोदाहरणस्थले तादृशयोग्यतासत्त्वेनातिव्याप्तेर्न्यायावयवत्वस्यावश्यकत्वादिति भावः। वैयर्थ्यादिति। प्रकृतव्याप्तितात्पर्यकत्वभागस्यैव सम्यक्त्वादिति भावः। प्रतिज्ञादीतरस्य हेतुपञ्चम्यन्तत्वेनैव वारणादाह अयं न दण्डादित्यादि। यथाश्रुतसाध्याविषयकत्वस्य वह्निमान् वह्निसामग्रीमत्त्वादित्यादिहेताव व्याप्तेराह व्याख्यातार्थमिति। तथा च प्रकृतहेतुविशिष्टहेतुत्वविषयतावर्हिभावेन यत्साध्यविषयकत्वं तदभावो ग्राह्यः अन्वय्युपनयस्य निरुक्तसाध्याविषयकत्व-

दलेनैव वारणादाह उपनयाविशेषेति। तथा च ह्रदो निर्धूमो निर्वह्नित्वादित्यादिस्थलीयस्य धूमव्यापकीभूताभावप्रतियोगिनिर्वह्नित्ववानयमित्याकारकव्यतिरेक्युपनयस्य वारणायेत्यर्थः। यद्यप्युक्तस्थलीयोदाहरणस्यापि हेतुपञ्चम्यन्तत्वेन वारणं सम्भवति, तथाप्यग्रे वक्ष्यमाणोदाहरणान्यत्वेनैव तद्वारणसम्भवादुपनयमात्रानुसरणम्। ननु पञ्चम्यन्तत्वस्यैव सम्यक्त्वाद्धेतुपदं व्यर्थमत आह हत्वितीति। वैकल्पिकमिति। तथा च निरुक्तसाध्याविषयकत्वविशेषित। हेतुत्वप्रतिपादकान्तावयवत्वं पञ्चम्यन्तावयवत्वं वा लक्षणार्थः। 'ननु हेतुत्व निर्धूमं निर्वह्नित्वादित्यादिस्थलीयस्य व्यतिरेक्युपनयस्यापि हेतुत्वप्रतिपादकमिदं पदमन्तर्भूतमिति तत्रातिव्याप्तिरत आह उपनयस्य चेति। ननु घटो वाक्यभिन्नः शब्दान्यत्वादित्यादिस्थलीयस्य यद्यद्वाक्यं स शब्दो यथा दण्डादित्युदाहरणस्यापि पञ्चम्यन्तत्वात्तत्रातिव्याप्तिरत आह यथा दण्डादित्यादेरिति। दृष्टान्तस्येति। प्रथमैवाऽन्त इति पूर्वेणान्वयः। ननु यथा दण्डादिति दृष्टान्तस्य पञ्चम्यन्तत्वे को दोष इत्यत आह पञ्चम्यन्तत्वे इति। अन्वयायोगादिति। समासातिरिक्तस्थले नामार्थयोरभेदान्वयबोधे नाम्नः समानविभक्तिकत्वस्य तन्त्रत्वादिति भावः। इदञ्च वस्तुगतिमनुरुद्ध्योक्तम्। स्वपरदृष्टान्तस्य पञ्चम्यन्तत्वेपि वक्ष्यमाणोदाहरणान्यत्वेनैव तत्रातिव्यावप्त्यसम्भवादिति ध्येयम्। अथायं गोभिन्नो द्रव्यान्यत्वादित्यादिस्थलीयस्य या या गौस्तद्द्रव्यं यथा पशुर्लाङ्गूलवत्त्वादित्याद्युदाहरणस्यापि हेतुपञ्चम्यन्तवात्तत्रातिव्याप्तिरत आह कस्यचिदिति। उदाहरणस्य दृष्टान्तघटितत्वं न सर्वसम्मतमित्याशयेनाह सम्भवे त्विति। पूर्ववदिति। उदाहरणभिन्नत्वविवक्षयेत्यर्थः। ननु वह्निमान् वह्निप्रमातः **इत्यादि हेतावव्याप्तिः** तस्य तसिलन्तत्वेन पञ्चम्यन्तत्वविरहादत आह अत्र चेति। तथा च तसिलो निरर्थकतया लुप्तपञ्चम्यन्तभागस्यैवाऽर्थवत्त्वान्नाव्याप्तिः पञ्चम्यन्तपदेन पञ्चमीभिन्नस्वघटकयावत्पार्थकोत्तरपञ्चमीघटितस्योक्तत्वादिति भावः। पञ्चम्यास्तसिलिति सूत्रस्य पञ्चम्याः स्थाने तसिलित्यर्थमभिप्रेत्याह पञ्चम्यादेरिति। आदिपदाभ्यां सप्तम्या**देस्त्राद्यादेशस्य** परिग्रहः। नानुपपत्तीति। आदेशस्मारितायाः पञ्चम्या एवाऽन्तेनुसन्धीयमानत्वादिति भावः। न च सर्वेभ्य इत्यत्र पञ्चम्याः स्थाने तसिलादेशे बहुत्वे सुप्येकारप्रसङ्गे सर्वेत इत्येव प्रयोगः स्यान्न तु सर्वत इति वाच्यम्। तन्मते तसिलादिभिन्न एव

उपनयानन्तरं निगमनं तच्चानुमितिहेतुलिङ्गपरामर्श-प्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम्। न च व्याप्तिपक्षधर्म्मतयोश्चतुर्भिरेवावयवैः पर्य्याप्तेः किं तेनेति वाच्यम्। अबाधितासत्प्रतिपक्षितत्वयोरलाभे

उदाहरणेति क्वचिज्जिज्ञासानुत्पादेऽपि तद्योग्यतासत्त्वान्नाव्याप्तिः।

अनुक्तोदाहरणस्थलेऽपि तादृशस्वरूपयोग्यतासत्त्वात्तद्वारणाय न्यायावयवेति। उदाहरणत्वं चेदं न न्यायावयवत्वगर्भम्। वैयर्थ्यात् (साध्याविषयकेत्यादि अयं न दण्डात् दण्डसंयोगाजन्यद्रव्यत्वानित्यादौ प्रतिज्ञानिगमनयोर्वारणाय साध्याविषयेत्यादिव्याख्यातार्थकम्। उपनयविशेषवारणाय हेतुपञ्चम्यन्तेति)

बहुत्वे स्यादिति स्वतः परतो वैकारस्यानुनासिकत्वादिति भावः। यथाश्रुतेन धूमादालोकवत्पर्वतो वह्निमान् धूमादित्यादिस्थलीयप्रतिज्ञादेर्वारणासम्भवादाह पूर्ववदिति। प्रकृतसाध्यविशेष्यकप्रकृतहेतुविशिष्टहेतुत्वप्रकारकान्वय-बोधजनकपदवत्त्वमित्यर्थः। न च सर्वत्र प्रतिज्ञायामतिव्याप्तिः साध्यविशेष्यकप्रकृतहेतुत्वप्रकारकान्वयबोधजनकसाध्यवाचकपदवत्त्वादिति। वाच्यम्। साध्यवाचकपदान्यत्वस्य तादृशपदे निवेश्यत्वात्। न च साध्यस्य हेतुतास्थले हेतावव्याप्तिरिति वाच्यम्। तत्र साध्यवाचकपदान्यस्य तादृशान्वयबोधजकपञ्चमीपदस्यैव सत्त्वादिति विभावनीयम्। न च प्रकृतहेतुविशिष्टदलं व्यर्थम्, आलोकाद्वह्निमतः सधर्मा पर्वतो वह्निमानित्यादिप्रतिज्ञायामतिव्याप्तिवारकत्वादिति भावः। इत्थञ्च धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमानित्यादिप्रतिज्ञायास्तस्माद्वह्निमानित्यादिनिगमनस्य वा व्युदासार्थमेव साध्याविषयकत्वदलम्, तच्च वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ हेतावव्याप्तमतो व्याचष्टे साध्याविषयकेत्यादि। प्रतियोगितानवच्छेदकेत्यादौ मध्यस्थनञापि समुदितान्वयस्य व्युत्पत्तिसिद्धत्वादिति भावः। इतरेत्यादि। हेत्ववयवमात्रस्यैव प्रतिज्ञैकवाक्यतया हेतुत्वविशिष्टसाध्यज्ञानजनकत्वाद-सम्भवापत्तिरतो नैरपेक्ष्यान्तम्। पर्वतो धूमज्ञानज्ञाप्यवह्निमान् धूमाद्वह्निसामग्र्या

चतुर्णामप्यपर्य्यवसानात्। अथाभिधानाभिधेययोर्व्याप्तिपक्ष-धर्म्मतावल्लिङ्गप्रतिपादनादेव पर्य्यवसानेनावयवान्तराणां

हेत्विति हेतुत्वबोधकार्थकम्। हेतुपञ्चम्योर्वैकल्पिकमुपादानम्। उपनयस्य चान्तेऽनुसन्धीयमाना प्रथमैवान्त:। एवं दण्डादित्यादे: स्वपरस्यापि दृष्टान्तस्य पञ्चम्यन्तत्वे अन्वयायोगात् कस्यचिद्व्य-तिरेकिण उदाहरणस्य पञ्चम्यन्तत्वसम्भवे तु तद्वारणं पूर्ववत्। अत्र चार्थवद्भागस्य हेतुपञ्चम्यन्तत्वं बोध्यम्। तेन निरर्थकतसिलन्ते वह्निप्रमात इत्यादौ नाव्याप्ति:।

इत्यादिहेतावव्याप्ति: तस्यापि अवयवान्तरनैरपेक्ष्येण हेतुत्वविशिष्टसाध्यज्ञान-जनकत्वादत: तस्यापि अवयवान्तरनैरपेक्ष्येण हेतुत्वविशिष्टसाध्यज्ञान-जनकत्वादत: प्रकृतपदम्। तथा च इतरनैरपेक्ष्येण प्रकृतहेतुविशिष्टहेतुत्व-प्रकारकसाध्यधर्मिकज्ञानजनकत्वमर्थ: स चोक्तहेतावस्त्येव तत्र हेतुभूतसामग्रीविशिष्टहेतुत्वस्य वह्न्यावप्रकारत्वादिति भाव:। वैयर्थ्यादिति। यद्यपि प्रकृतहेतुविशिष्टहेतुत्वप्रकारकसाध्यधर्मिकज्ञानजनकत्वाभावस्याऽ-खण्डत्वान्न वैयर्थ्यम्, तथाप्यसत्प्रयोजनत्वे तात्पर्यम्। अत्र उदक्षरत्व-मेवाऽस्वरस: केचिदित्युक्त्या सूचित:। ननु उदासीनस्यापि धूमादिति वाक्यस्याऽनुमित्यनुकूलत्वेन कथञ्चिदनुमितिपरत्वात्तत्रातिव्याप्तिरतो व्याचष्टे अवयवत्वमिति। एतदनन्तरमेव पञ्चम्यन्तेतीति पाठो युक्त:। लक्षणद्वय एवानुमितिपरत्वस्य निविष्टत्वेन पूर्वत्रैव तस्य व्याख्यातुमौचित्यात् तावतैवोत्तरत्र तदर्थलाभसम्भवादिति ध्येयम्। ननु निगमनस्य पश्चाद्विवक्षणीय-लाक्षणिकपदवत्त्वाभावादेव व्युदाससम्भवे तद्वारणार्थं पञ्चम्यन्तपदं व्यर्थमत: पञ्चमीरूपं पदमादायैव निगमनस्य लाक्षणिकपदवत्त्वं व्यवस्थापयितुमाह हेतुत्वादाविति। हेतुत्वं ज्ञापकत्वम्। आदिना ज्ञाप्यत्वादे: परिग्रह:। अवधित्व इति। तथा च वृक्षनिष्ठं यदवधित्वं निरूपकतासम्बन्धेन तद्वान् यो विभागस्तदाश्रयत्वमित्याकारोऽन्वयबोध:। ननु निरूपकतासम्बन्धेनावधित्वस्य विभागेऽन्वये घटीयविभागेऽप्यं विभागो न घटादिति प्रयोग: स्यात्

पञ्चम्यादेः तसिलाद्यादेशत्ववादिनां नये तु नानुपपत्तिगन्धोऽपि। केचित्तु। हेतुपञ्चम्यन्तत्वं हेतुत्वप्रतिपादकपदशालित्वं पूर्ववत्।

साध्याविषयकबोधजनकत्वञ्च इतरनैरपेक्ष्येण प्रकृतहेतुत्वाविशिष्टसाध्यविषयकज्ञानाजनकत्वं, साध्यं चेह न विवक्षितम्। वैयर्थ्यादित्याहुः पञ्चम्यन्तेति। अनुमितिपरवाक्यत्वमवयवत्वं हेतुत्वादौ पञ्चमी लाक्षणिकी। वृक्षाद्विभजत इत्यादौ लाघवेनावधित्वे अवधिमत्त्वे वा शक्तत्वात्।

संयोगादिसम्बन्धेनैव घटनिष्ठावधित्वस्य तत्राऽसत्त्वात् निरूपकतासम्बन्धस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वादत आह अवधिमत्त्वे वेति। तथा च घटनिरूपितं यदवधिमत्त्वं स्वरूपसम्बन्धावच्छिन्नतदभावस्य घटीयविभागे विरहान्नोक्तप्रयोग इति भावः। ननु विभागनिष्ठे अवधिमत्त्वे प्रमाणाभाव इत्यत आह द्रव्येत्यादि। अवधित्वमिवेति। इवार्थः। सादृश्यं तच्चानुभूयमानत्वेन, तथा चानुभव एव तत्र प्रमाणमिति भावः। सः सम्बन्धविशेषः। अतिरिक्त इति। विभागादित्यादिः। अनतिरिक्तो वेति। न चैवं जनकत्वादेः स्वरूपसम्बन्धत्वमते तत्रापि पञ्चम्याः शक्तिः स्यादिति वाच्यम्। तथात्वेपि क्षत्यभावात्। अत एव हेतुमत्त्वे शक्तावपीत्यादि स्वयमग्रे वक्ष्यते। ननु ज्ञापकत्वादिरूपहेतुत्वादौ पञ्चम्याः शक्त्यभावे शक्यसम्बन्धाप्रतिसन्धानदशायां धूमाद्वह्निमानित्यादितस्तत्प्रतीतिः कथं स्यादत आह तत्सम्बन्धेति। हेतुत्वादौ अवधिमत्त्वादिरूपशक्यस्य सम्बन्धस्य इत्यर्थः। अवधितानिरूपकत्वातिरिक्तमवधिमत्त्वं यदि विभागनिष्ठं नानुभवसिद्धं तदा विभागापेक्षया गुरुत्वात्तस्य शक्यत्वं दुर्घटमित्याशयेनाह वृक्षादपेतीति। ननु विनापि पञ्चम्यन्तसमभिव्याहारमपेतिशब्दाद्विभागावच्छिन्नक्रियाप्रतीतेः वृक्षादपैतीत्यत्रापि विभागो धातुलभ्य एव पञ्चम्यास्तु विभागान्वितमाधेयत्वमवधितानिरूपकत्वं वाऽर्थः इत्यतः स्थलान्तरमाह पततीत्यादि। वृक्षादित्यर्थः। अत्र गुरुत्वजन्यतावच्छेदिका पतनत्वजातिरेव पतेः शक्यतावच्छेदिका विभागावच्छिन्नक्रियात्वस्य तदपेक्षया गुरुत्वादतो नोक्तक्रमावसरः। ननु वृक्षात्पततीत्यतो वृक्षनिष्ठविभागजनकपतनानुकूलकृति-

मानिति बोधो जायंते तत्र धात्वर्थपतनादौ विभागवत्त्वस्य बाधितत्वात् विभागजनकत्वमेव पञ्चम्यर्थो बोध्यः तत्कुतो ज्ञापकत्वाद्यपेक्षया लाघवमत आह तज्जनकत्वञ्चेति। न चैवं वृक्षात्पतनेपि नेदं पतनं वृक्षादिति प्रयोगः स्यात् पतनस्य सम्बन्धान्तरेण वृक्षावधिकविभागाभाववत्त्वात् जनकत्वस्य वृत्त्यनियामकतया तत्सम्बन्धेन विभागाभावस्य बोधयितुमशक्यात्वादिति वाच्यम्। तत्र नञसमभिव्याहृतपञ्चम्या विभागजनकत्वे लाक्षणिकत्वादिति भावः। अत इति लाक्षणिकपञ्चमी। विशिष्टनिमनवारणाय पञ्चम्यन्तेतीति। अन्यथा तस्माद्वह्निमानित्यादिनिगमनस्यापि पञ्चमीस्वरूपलाक्षणिकपदवत्त्वात्तत्राऽति-व्याप्तिः स्यादित्याशयः। न च तस्माद्वह्निमानित्यादावपि ज्ञानजनकत्वलक्षणं हेतुत्वं जन्यज्ञानविषयत्वलक्षणं ज्ञाप्यत्वं वा न पञ्चम्यर्थः येन विभागाद्यपेक्षया गुरुत्वेन लक्षणा स्यात् किन्तु ज्ञानमात्रं तदर्थः तच्छब्दोपस्थापितस्य धूमादिज्ञानस्य जनकत्वादिसम्बन्धेन पञ्चम्यर्थज्ञानेऽन्वयादेव धूमज्ञानादौ ज्ञापकत्वादिलक्षणस्य हेतुत्वादेर्लाभसम्भवादिति वाच्यम्। विभागत्वस्येव ज्ञानत्वस्य लघुत्वेऽपि तदवच्छिन्ने पञ्चम्याः स्वारसिकभूरिप्रयोगाभावेन लक्षणायास्तत्रावश्यकत्वात्। अन्यथा घटादिपदस्यापि पटादौ शक्त्यापत्तेः पटत्वस्यापि घटत्ववल्लघुत्वादिति भावः। ननु पञ्चम्यन्तलाक्षणिकपदवत्त्वोक्तावपि निगमनतिव्याप्तिरेव तन्निविष्टतच्छब्दस्य पञ्चम्यन्तत्वात् धूमादिज्ञानलाक्षणिकत्वाच्चेत्यत आह तस्मादिति। शक्तयैवेति। यद्यपि धूमादिलघ्वर्थशक्तस्य तच्छब्दस्य धूमज्ञानत्वादिगुरुधर्मेण बोधने लक्षणैव युक्ता, तथापि प्रत्येकशक्त्या धूमस्य ज्ञानस्य तच्छब्दादुपस्थितौ व्युत्पत्तिवैचित्र्यादेवकारस्थल इव नामार्थयोरपि तयोर्मिथोऽन्वयादेव धूमज्ञानस्य लाभसम्भवान्न विशिष्टे तत्पदस्य लक्षणेत्याशयः। नन्वेवं यत्र तस्मादित्येव हेतुः प्रयुज्यते तत्राव्याप्तिः तच्छब्दस्य पञ्चम्यन्तत्वेपि लाक्षणिकत्वाभावादत आह पर्वतो वह्निमानिति। अत्र तच्छब्दस्य प्रक्रान्तपरामर्शकत्वनियमाद्वह्निपरामर्शे साध्याविशेषः स्यादतः साध्यान्तरमाह वह्निसामग्रीमान्वेति। सम्प्रदायविरोधादिति। हेत्वादेरसाधारणशब्देनैव कथायामुल्लेखः, अन्यथाऽविज्ञातार्थनिग्रहस्थानापत्तेः इत्याचार्य्यैरभिधानादिति भावः। पञ्चम्यन्तपदानुक्तौ पर्वतो वह्निमानित्यादिप्रतिज्ञायामप्यतिव्याप्तिः तत्रापि ज्ञेयवह्नित्वप्रकारेण लाक्षणिकस्य वह्निपदस्य सत्त्वात्, अन्यथा हेत्ववयवार्थस्य धूमज्ञानजन्यत्वादेर्वह्नावसत्त्वेन तत्र हेत्वर्थान्वयासम्भवादिति

निराकाङ्क्षत्वं विपरीतशङ्कानिवृत्तेरपि तत एव लाभात् अन्यथा निगमनेनापि तदवारणात्, न हि तत् विशेषदर्शनमनादृत्यैव

द्रव्यनिष्ठावधित्वमिव विभागनिष्ठमवधिमत्त्वमपि सम्बन्धविशेषः। स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत्। तत्सम्बन्धाग्रहेऽपि व्यवहारः, शक्तिभ्रमात्। वृक्षादपैति पततीत्यादौ लाघवाद्विभागे शक्तिः तज्जनकत्वं च क्रियायाः संसर्गमर्यादया भासत इत्यपि वदन्ति।

प्राचीनमतं निरस्यति यत्त्वित्यादिना। ज्ञानलक्षणेति। ज्ञानप्रकारेण ज्ञेयवह्न्यादौ लक्षणेत्यर्थः। तेन लक्ष्यतावच्छेदके लक्षणाविरहेऽपि न क्षतिः। ज्ञापकत्व इति प्राचां मतेन, ज्ञाप्यत्व इति स्वमतेन। अनयोस्तत्त्वं पुनरग्रे दर्शयिष्यते। उपपत्ताविति। हेत्वर्थान्वयस्येत्यादिः। तत्र प्रतिज्ञान्तर्गतसाध्यपदे। मानाभावादिति। जनकत्वादिबोधार्थ पञ्चम्या लक्षणाया आवश्यकत्वे तत्रैव ज्ञानजनक-जनकत्वादिलक्षणौचित्यादिति भावः। अत एव प्रतिज्ञासु साध्यपदेन लक्षणाविरहादेव। आवृत्ताविति। अन्यथा बोधितधर्मप्रकारेण बोधितार्थस्य प्रतिपत्तये पुनः पदानुसन्धानस्यैवावृत्तित्वात् बोधितवह्निस्वरूपस्य पर्वतो वह्निमान्नवेत्यादिविप्रतिपत्तिस्थवह्निपदस्य ज्ञेयवह्नित्वप्रकारेण बोधने आवृत्तित्वाभावप्रसङ्गादिति भावः। ननु सुब्विभक्तौ निरुढलक्षणान्यलक्षणा-विरहात्पञ्चम्याः कुतो ज्ञापकत्वादौ लक्षणेत्यत आह एव एवचेति। व्याचक्षते प्रकाशकृतः। तथा च ज्ञापकत्वादावपि पञ्चम्या निरूढलक्षणेति भावः। यथासम्भवमिति। द्रव्यादावुत्पादकत्वं जात्यादौ च ज्ञापकत्वमेव हेतुत्वमित्यर्थः। ननु वाक्यार्थमर्यादया लब्धस्यैव ज्ञापकत्वलक्षणहेतुत्वस्य उपदर्शितत्वेनापि प्रकाशव्याख्यां निर्वाहाज्ज्ञापकत्वस्य पञ्चम्यर्थत्वे मानाभाव इत्यत आह अत एवेति। ज्ञापकत्वस्य पञ्चम्यर्थत्वादेवेत्यर्थः। जिज्ञासेति। जिज्ञासावाक्य-मित्यर्थः। तथा च ज्ञापकत्वस्य पञ्चम्यर्थत्वाभावे कुतो वह्निमानित्यतः किंनिष्ठज्ञापकताकवह्निमानित्यन्वयबोधो न स्यादिति भावः। ननु वह्नेरुत्पादकत्वे एव जिज्ञासा न तु ज्ञापकत्वे ज्ञानविषयस्येति यदि ब्रूयात्तदा बाधकमाह धूमवत्त्वादित्युत्तरञ्चेति। तथा वह्न्युत्पादकत्वजिज्ञासायां धूमवत्वादित्युत्तरं न

तन्निवर्त्तकम्। सिद्धनिर्देशतया वारयतीति चेन्न। स्वरूपमात्राभि-

अतः पचम्यन्तेति लाक्षणिकविशेषणम्। तस्मादित्यत्र च तत्पदे न लक्षणा।

शक्त्यैव तादृशज्ञानोपस्थितिसम्भवात्। पर्वतो वह्निमान् वह्निसामग्रीमान् वा तस्मादित्यादिकस्तु न प्रयोगः सम्प्रदायविरोधादिति वदन्ति। यत्तु हेत्वन्वयानुरोधात् वह्निमानित्यादावपि ज्ञानलक्षणेति।

स्यात् वह्निस्वरूपस्य धूमस्यानुत्पादकत्वेन बाधादित्यवश्यं ज्ञापकत्वं एव जिज्ञासेति भावः। ननु वह्निज्ञाने प्रश्नविरहेऽपि कुत इत्युत्तरकालीनजिज्ञासा-नुरोधादेव तद्गृहं वह्निमदित्युत्तरवाक्यं ज्ञेयवह्नित्वप्रकारेण बोधं जनयिष्यतीत्यत आह न वेति। अर्थान्तरत्वापत्तेरिति भावः। ननु कुत इत्यनन्तरं ज्ञातमित्यध्याहारात्पञ्चम्या जनकत्वबोधकतयैव सर्वसामञ्जये तस्य ज्ञापकत्वार्थकत्वे मानाभाव इत्यत आह न वा कुत इत्यादि। मानाभावादि-त्युपलक्षणम्। ज्ञातपदार्थस्य ज्ञानविषयस्य पूर्ववाक्यस्थवह्नावन्वयायोगाच्चेत्यपि बोध्यम्। नामार्थयोरभेदान्वये नाम्नोः समानविभक्तिकत्वस्य तन्त्रत्वादिति ध्येयम्। ज्ञापकत्वं परित्यज्य ज्ञाप्यत्वे वेति युदक्तं तत्र सदृष्टान्तमनुशयमाह दाह इत्यादि। तथा च दाहो दहनान्न तु जलादित्यत्र यथा जन्यत्वमेव पञ्चम्यर्थो न तु जनकत्वं तथा सति जलनिष्ठजनकत्वस्येव दहननिष्ठजनकत्वस्यापि स्वरूपादिसम्बन्धावच्छिन्ना भावस्य दाहे सत्त्वाद् दाहो न दहनादित्यपि प्रयोगापत्तेः, निरूपकतासम्बन्धस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नभावस्य दुर्वचत्वात्, तथा जलं स्पर्शवत् रूपान्न तु गन्धादित्यत्रपि ज्ञाप्यत्वमेव पञ्चम्यर्थो न तु ज्ञापकत्वं तथा सति गन्धनिष्ठस्येव रूपनिष्ठस्यापि ज्ञापकत्वस्य स्वरूपादिसम्बन्धेनाभावस्य स्पर्शे सत्त्वाज्जलं स्पर्शवन्न रूपादित्यपि प्रयोगापत्तेः, निरूपकत्वस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नज्ञापकत्वाभावस्याऽप्रसिद्धत्वेन बोधयितुमशक्यत्वादित्या-खण्डनार्थः। ननु जलं स्पर्शवन्न गन्धादित्यत्र तन्मतेपि नञा स्पर्शे गन्धज्ञाप्यत्वस्याभावो न बोध्यते गन्धेनापि घटादौ स्पर्शस्यानुमानात् गन्धज्ञाप्यत्वस्यैव स्पर्शे सत्त्वात्। अन्यथा घटः स्पर्शवान्न गन्धदित्यपि

धानात् साध्यत्वानुस्थितौ तस्मादिति हेतुविभक्त्यनन्वय-प्रसङ्गाच्चेति चेन्न व्याप्तिपक्षधर्म्मताज्ञानेऽपि बाधसत्प्रति-

---

तदसत्। पञ्चम्याः ज्ञापकत्वे ज्ञाप्यत्वे वा लक्षणयैवोपपत्तौ तत्र लक्षणायां मानाभावात्।

अत एवोक्तमावृत्तौ सैव प्रतिज्ञेति।

प्रयोगापत्तेः। परन्तु पञ्चम्यर्थेन गन्धज्ञाप्यत्वेनान्वितस्य स्पर्शादेर्गन्धवन्निरूपित-समवायादिसंसर्गेणैव मतुबादिसाकाङ्क्षतया गन्धज्ञाप्यत्वादिविशिष्टस्पर्शस्य तादृशसम्बन्धेन यदधिकरणं तद्भिन्न एव नञा जलादौ बोध्यते, कथितक्रमेण आकाङ्क्षानुपगमे जलं स्पर्शवद्गन्धादित्यादिवाक्यस्यापि प्रामाण्यापत्तेः। एवञ्च ज्ञापकतायाः पञ्चम्यर्थत्वमतेऽपि गन्धनिष्ठज्ञापकताकस्पर्शस्य गन्धवन्निरूपितसमवायेन यदधिकरणं तद्भेदस्यैव नञा जले धर्म्मिणि बोधनसम्भवान्नोक्तस्थलीयनञर्थान्वयानुरोधात् ज्ञाप्यत्वस्य पञ्चम्यर्थत्वं सिद्ध्यतीत्यत आह नापि शब्दादिति। तथा च शब्दादितिपञ्चम्युपस्थापितस्य शब्दज्ञाप्यत्वस्य शब्दव्यापकत्वविशिष्टस्वरूपसम्बन्धेनैव साध्यसाकाङ्क्षत्वात् स्पर्शस्य च शब्दाव्यापकतया तादृशसम्बन्धेन तत्र ज्ञाप्यत्वस्यान्वयासम्भवान्नेह शब्दज्ञाप्यस्पर्शस्य यदधिकरणं तद्भेदो नञा बोधयितुं शक्यते किन्तु शब्दव्यापकत्वविशिष्टस्वरूपसम्बन्धेन ज्ञाप्यत्वस्यैवाभावः स्पर्शे धर्म्मिणि बोध्यते शब्दव्यापकत्वविशिष्टनिरूपकत्वस्य वृत्त्यनियामकतया तादृशसम्बन्धेन शब्दनिष्ठज्ञापकत्वाभावस्य बोधनायोगात्। न च स्वरूपसम्बन्धमात्रेणैव पञ्चम्यर्थस्य शब्दादिज्ञाप्यत्वस्य साध्यसाकाङ्क्षत्वम्, स्पर्शवान् शब्दादित्यादिवाक्यस्यापि प्रमाणतापत्तेः। व्याप्त्यादिभ्रमवशात् शब्देनापि स्पर्शस्य ज्ञापनादिति भावः। ननु दाहो दहनादित्यादिप्रयोगमसत्त्वाद्विभागादिकमिव जन्यत्वमपि पञ्चमीशक्यमस्तु नव्यमते जन्यत्वस्यातिरिक्तत्वेन गौरवानवकाशादित्यतः तत्रेष्टापत्तिमाह एवञ्चेति। जन्यतायां पञ्चम्याः प्रयोगसत्त्वे चेत्यर्थः। हेतुमत्त्वे जन्यत्वे। ज्ञाप्यत्वे लक्षणैवेति। तावतैव निगमनवारकतया पञ्चम्यन्तपदस्य सार्थक्यसम्भवादिति भावः। ननु प्रकृतसाध्यन्वितस्वार्थ-

बोधकत्वेन पञ्चम्यर्थविवक्षणे धूमादालोकवत्पर्वतो वह्निमानिति प्रतिज्ञायां नातिव्याप्तिः सम्भवतीत्यत आह धूमाद्वह्निमत इत्यादि। न चोक्तवाक्यादेव प्रथमतो वह्नेर्धूमज्ञाप्यत्वावगमात् कुत इत्याकाङ्क्षाविरहे त्ववयवासम्भवान्न तादृशी प्रतिज्ञेति वाच्यम्। किं ज्ञाप्यो वह्निरित्याकाङ्क्षाविरहेऽपि धूमज्ञानज्ञाप्यवह्निमत्सधर्मपर्वतं किंज्ञाप्यो वह्निरित्येवं क्रमेण हेत्वाकाङ्क्षयैव हेतोः प्रयोगात्। अत एव पर्वतो द्रव्यमित्यत्र प्रतिज्ञायां पर्वते द्रव्यत्वं किंज्ञाप्यमित्याकाङ्क्षायां पृथिवीत्वादेरेव हेतुत्वेनोपन्यासो न तु महानसत्त्वादेः। अन्यथा द्रव्यत्वं किंज्ञाप्यमित्याकाङ्क्षया महानसत्वादेरपि तत्र हेतुत्वेनोद्भावनापत्तेः तस्यापि महानसे द्रव्यत्वज्ञापकत्वात्। न चैवं धूमाद्वह्निमत्पर्वतो वह्निमान् धूमादित्यादिक्रमेणापि न्यायः स्यात् वह्निमात्रस्य धूमज्ञाप्यत्वावगमेऽपि धूमज्ञाप्यवह्निमत् पर्वतत्वावच्छिन्ने किंज्ञाप्यो वह्निरित्याकाङ्क्षया हेतूत्थानसम्भवादिति वाच्यम्। तत्रोद्देश्यतावच्छेदकविधेययोरैक्येन निराकाङ्क्षत्वादेव तादृशप्रतिज्ञाविरहेण तद्घटितन्यायासम्भवात्। न हि ज्ञातवह्निमान् पर्वतो वह्निमानित्यादिवाक्याद्वन्ह्यादिविधेयकः कदाप्यन्वयबोधः। ननु प्रकृतपक्षधर्मिकस्वार्थान्वयबोधकपदोपस्थापितं यत्साध्यं तदन्वितस्वार्थबोधकत्वे पञ्चमीविशेषणादेव धूमाद्वह्निमत इत्यादिप्रतिज्ञाया अपि व्युदासः सम्भवतीत्य आह पर्वत इत्यादि। इत्यादौ। प्रज्ञियामित्यनुषज्यते। तत्रत्यनिगमने तस्माद्धूमाद्वह्निमानित्याकारे। अत्रापि धूमादित्यस्यैव निरुक्तपञ्चम्यन्त-लाक्षणिकपदस्य सत्त्वादिति भावः। प्रकृतेत्यादि। प्रकृतपक्षधर्ममिव स्वार्थबोधकपदोपस्थापितं यत्प्रकृतसाध्यं तद्धर्मिकस्वार्थबोधिका या पञ्चमी तदन्तलाक्षणिकपदावयवत्वमित्यर्थः। अत्र धूमाद्वह्निमतः सधर्मेत्यादि प्रतिज्ञावारणार्थमुपस्थापितान्तम्। तत्रापि पक्षमात्रोक्तौ मतुबर्थसम्बन्धित्वेनैव पक्षेधर्मिणि वह्निपदस्य प्रकृतसाध्यबोधकत्वात्तद्दोषतादवस्थ्यमतः प्रकृतपदम्। न च प्रकृतपक्षान्वितस्वार्थबोधकेनाऽन्तिमपदेनोपस्थापितं यद्वह्निस्वरूपं प्रकृतसाध्यं तत्रैव धूमपदोत्तरपञ्चम्याः स्वार्थबोधकत्वान्नोक्तप्रतिज्ञाव्युदास इति वाच्यम्। प्रकृतपक्षधर्मिकप्रकृतसाध्यान्वयबोधसाकाङ्क्षं यत्प्रकृतसाध्यबोधकं पदं तत्साकाङ्क्षा या पञ्चमी तदन्तलाक्षणिपदवत्त्वे तात्पर्यात् न च समवायेन नीलरूपावच्छिन्नपर्वते संयोगेन वह्निसाध्यतास्थले नीलपर्वतो वह्निमानित्यादिप्रतिज्ञायाः प्रकृतपक्षधर्मिकप्रकृतसाध्यप्रकारकबोधस्याऽऽ-

जनकत्वात्तत्रत्यहेतावव्याप्तिः नीलरूपवतो वह्निमतश्च तादात्म्येनैव पर्वते प्रकारीभूय भानादिति वाच्यम्। नव्यमते नीलाभिन्नपर्वते तादात्म्येन वह्निमतः साध्यतायामेवोक्ताकारप्रतिज्ञास्वीकारात् तन्मते चैतल्लक्षणकरणादिति भावः। पर्वतो धूमाद्वह्निमानित्यादिप्रतिज्ञाया अपि तादृशपदोपस्थापितान्वित-स्वार्थबोधकपञ्चम्यन्तपदवत्त्वात्तद्वारणार्थं प्रकृतसाध्यपदम्। तथा च तत्र साध्यतावच्छेदकीभूतधूमज्ञाप्यवह्नित्वावच्छिन्ने धूमज्ञाप्यत्वरूपस्य पञ्चम्यर्थस्याऽन्वयान्नातिप्रसङ्गः। निरुक्तसाध्यान्वितस्वार्थबोधकलाक्षणिक-पदवत्त्वोक्तौ निगमनातिव्याप्तिः तस्यापि प्रकृतसाध्यान्वितहेतुत्वलाक्षणिक-पञ्चमीसत्त्वादतः पञ्चम्यन्तपदम्। न च साध्यावन्वितस्वार्थबोधक-सुबन्तलाक्षणिकपदवत्त्वोक्त्यापि तद्वारणसम्भवात्पञ्चमीपर्यन्तानुसरणं व्यर्थमिति वाच्यम्। तादात्म्येन रक्तसाध्यकस्य घटो **रक्तस्तद्धट्ट वादित्या**दिन्यायस्य निगमने तस्माद्रक्त इत्याकारेऽतिव्याप्त्यापत्तेः तस्यापि प्रकृतसाध्यान्वित-स्वार्थबोधकं यत्प्रथमैकवचनं तदन्तलाक्षणिकरक्तपदवत्त्वात् गुणशक्तरक्तपदस्य गुणिपरत्वे लाक्षणिकत्वात्। निरुक्तपञ्चन्तपदवत्त्वमात्रोक्तौ तु तादृशतच्छब्दमादाय पुनर्निगमनेतिव्याप्तिरतो लाक्षणिकत्वेत्युक्तम्। न चैवमयं देशः क्रियावान् पाकादित्यत्र हेतावव्याप्तिः पाकशब्दस्य शक्तिविरहेण पाकज्ञानलक्षणत्वासम्भवात् अन्यत्रक्लृप्तपचधातोरेव प्रतीतेरिति वाच्यम्। पञ्चम्यन्तपदेन पञ्चमीसाकाङ्क्षपदस्योक्तत्वात् पाकादित्यादौ भावकृदन्तस्य पचादिधातोरपि स्वोत्तरविभक्तिसाकाङ्क्षत्वेन तत्र लक्षणासम्भवात्। यत्तु तत्र पाकशब्दान्तर्गतककारस्यैव पाकज्ञाने लाक्षणिकत्वान्नातिव्याप्तिः, एकाक्षरकोशस्तस्यापि शक्तत्वावधारणात् वर्णान्तरस्य तत्र तात्पर्यग्रहाकत्वेनैव साफल्यात्, एवमन्यत्रापीति। तच्चिन्त्यम्। अत्र निरुक्तौ प्रगल्भोक्तं दूषणं निरस्यति यत्त्वित्यादिना। ज्ञानादित्यादिना धिय इत्यादिहेतूपग्रहः। ननु ज्ञानादित्यत्र ज्ञानपदं न शक्तं सुबन्तशब्दस्य कुत्राप्यशक्तत्वात् धातोस्तु शक्त्या ज्ञानोपस्थापकत्वेति तस्य निरुक्तपञ्चम्यन्तत्वाभावात् तथा च ज्ञानपदान्तर्गतस्य नशब्दस्य ज्ञाने लक्षणाऽऽवश्यकीत्यतआह इत्यादाविति। तथा चायमात्मा धियः इत्यादौ धीशब्दस्य शक्त्यैव धीविषयकज्ञानोपस्थापकत्वात्तादृशहेत्वव-यवाव्याप्तिरावश्यकीति भावः। अन्यथेति। वस्तुगत्या यद्विषयज्ञानस्य हेतुत्वमवगतं तत्रेव तद्भिन्नेऽपि व्याप्त्यादेरुपदर्शनीयत्व इत्यर्थः। तत्र अयमात्मा

पक्षबुद्धेः साध्यज्ञानेनानुत्पत्तिदर्शनात् तदभावाबोधने समीहितानिर्व्वाहात्। अथ बाधादिविरहस्य प्रयोजकत्वं न तु

अत एव व्याचक्षते यतो द्रव्यं गुणाः कर्मेत्यत्र हेतुत्वं यथासम्भवमुत्पादकत्वं ज्ञापकत्वं चेति। अत एव लोके किं वह्निमदिति पृष्टे तद् गृहं वह्निमदित्युत्तरिते कुत इति जिज्ञासा धूमवत्त्वादित्युत्तरं च। नहि तत्र ज्ञाने प्रश्नः। येन लक्षणया ज्ञानेनोत्तरयेत्।

न वा परकीयभाविप्रश्नानुरोधादजिज्ञासिताभिधानम्। न वा कुत

ज्ञानादित्यादौ। सुखादेरपीति। ज्ञानविषयकज्ञानस्येव सुखादिविषयज्ञानस्यापि ज्ञानत्वप्रकारेण हेतुत्वावगमादिति भावः। केचिदित्यादि। अत्र प्रतिज्ञात्वादिवारणाय नियतान्तम्। तत्रापि पञ्चम्यन्तपदवत्त्वस्य लाक्षणिकपदवत्त्वस्य वा नियतत्वोक्तौ निगमनेऽतिव्याप्तिरतः पञ्चम्यन्तत्वविशिष्टलाक्षणिकपदवत्त्वस्यैव नियम उक्तः। प्रतिज्ञात्वादेरपि पटो न दण्डादित्यादिप्रतिज्ञायां तादृशपदवत्त्वसामानाधिकरण्यान्नियतेति। तत्प्रतिज्ञात्व व्युदासार्थमवयवतावच्छेदकेति। हेतुत्वरूपस्य तादृशावच्छेदकस्य प्रथमं गृहीतुमशक्यत्वादाह तादृशेति। यत्साध्यकप्रतिज्ञादौ तादृशपदवत्त्वनैयत्यं तत्रातिव्याप्तिरित्यस्वरसः केचिदित्युक्त्या सूचितः। प्रगल्भदूषणं निरस्य स्वयं मूललक्षणं दूषयति नव्यास्तु इत्यादिना। न प्रातिपदिकेपीति। मानाभावादिति शेषः। तथा च हेतोः पञ्चम्यन्तलाक्षणिकपदवत्त्वाभावादसम्भव इति भावः। ननु ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थत्वे तदेकदेशे ज्ञाने धूमादेरन्वयो न स्यान्निराकाङ्क्षत्वादत आह आकाङ्क्षेति। कर्तृकृतीति। पाचक इत्यादौ ण्वुला द्यर्थस्य कर्तुरेकदेशीभूतायां कृतौ धात्वर्थपाकादिर्यथाऽन्वेतीत्यर्थः। यद्यपि गन्तव्यो ग्राम इत्यादौ कर्मकृतोऽप्येकदेशान्वयित्वम्, तथापि विषयतासम्बन्धेनैकदेशान्वयित्वमेव प्रकृते सौसादृश्यमित्याशयेन कर्तृकृदुपन्यासः। धूमादिपदे लक्षणायां बाधकमाह यद्धर्मविशिष्टश्चेति। हेतौ यद्धर्मावच्छिन्नो हि हेत्ववयवान्तर्गतधूमादिप्रातिपदिकेन बोध्यते कुतोऽस्य गमकत्वमित्याकाङ्क्षावशात्तदवच्छिन्नस्यैव व्याप्यत्वमाकाङ्क्षावशादुदाहरणेन प्रदर्श्यत इति नियमाद्धूमस्य व्याप्यतयोपन्यासो नाऽसङ्गत इत्याह अन्यथेति।

तदबोधस्य मानाभावादसिद्धेश्च किमर्थं बाधादिविरहो बोधनीय इति चेन्न यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः। न चानन्वयः, तस्मादित्यन्वयबलादेव हेत्वनाकाङ्क्षितत्वलक्षणसिद्धत्वज्ञानात् न त्वन्वयात् प्राक्। इह

इति प्रश्ने ज्ञातमित्यध्याहारः। मानाभावात्।

दाहो दहनात् न जलात् जलं स्पर्शवत् रूपात् न गन्धात् नापि

तत्रस्थपञ्चम्यन्तप्रातिपदिकेन यद्विषयज्ञानं बोध्यते तस्यैव व्याप्तेः प्रदर्शनीयत्वे इत्यर्थः। यथार्थधूमज्ञानादिति। धूमयथार्थज्ञानविशेष्यत्वादित्यर्थः। धूमस्य व्याप्यतारक्षार्थं यथार्थपदम्। धूमादेरिति। हेत्वन्तर्गतधूमज्ञानपदेन तद्विषयकस्य ज्ञानस्यैव बोधनादिति भावः। यद्यपि हेतुघटकपञ्चम्यन्तप्रतिपदिकेनोपस्थापिते यद्धर्मावच्छिन्नविषयकज्ञाने तादृशपञ्चम्या ज्ञापकत्वं बोध्यते तदवच्छिन्नस्यैव व्याप्यत्वं प्रदर्श्यत इत्युक्तौ नैष दोषः यथार्थधूमज्ञानादित्यत्र प्रातिपदिकेन लक्षणया यथार्थधूमज्ञानविषयकज्ञानत्वेनोपस्थापित एव ज्ञापकत्वबोधनात् यथार्थधूमज्ञानत्वावच्छिन्नस्यैव व्याप्तेः प्रदर्शनस्यौचित्यात्। तथापि पञ्चमीलक्षणाध्रौव्ये तस्यामेव ज्ञानज्ञाप्यत्वे लक्षणया सर्वसामञ्जस्ये प्रातिपदिके लक्षणान्तरकल्पने गौरवम्, एवं हुंफडितिनिरर्थकशब्दस्य हेतुतास्थले तस्य लाक्षणिकत्वानुपपत्तिः शक्तिविरहादित्येव मूलं बाधकमित्यवधेयम्।

इति जागदीश्यां हेतुलक्षणम्।

न्यायतदवयवयोरिव प्रतिज्ञादीनामपि स्वातन्त्र्येण लक्षणमाह इतरान्वितेत्यादि अत्रोदाहरणस्यापि स्वीयं यदन्त्यभिन्नं धूमवानित्यादिपदं तदर्थविशेष्यकान्वयबोधजनकत्वात्तद्वारणार्थं प्रथमसत्यन्तम्। स्वाघटकपदा-काङ्क्षादिमत्पदघटितत्वे सतीति तदर्थः। अवयवान्तरस्य व्युदासार्थमाह स्वीकीयमिति। भवति हि पर्वतो वह्निमानित्यादौ स्त्रीयान्त्यपदभिन्नं यत्पर्वत इति पदं तदर्थविशेष्यकान्वयबोधजनकत्वं प्रतिज्ञाया इति लक्षणसमन्वयः। अन्त्यभिन्नत्वं नान्त्यसामान्यभेदः शब्दमात्रस्यैव कुतश्चिदन्त्यतया प्रतिज्ञाया असम्भवापत्तेः, किन्तु स्वघटकपदप्राक्क्षणवृत्तित्वम्। तथा च स्वकीयं यत्पदं स्वघटकपदप्राग्वर्तिपदं तदर्थविशेष्यकान्वयबोधजनकत्वे सतीत्यर्थः।

केचित् यथा तस्मादिति सर्व्वनाम्ना हेतोः परामर्शः

शब्दादित्यादौ नञर्थान्वयानुरोधात् जन्यत्वरूपहेतुमत्त्वं जन्यज्ञानविषयत्वरूपज्ञाप्यत्वञ्च पञ्चम्यर्थः। एवञ्च हेतुमत्त्वे शक्तावपि ज्ञाप्यत्वे लक्षणैव।

तत्र स्वीकीयमित्यनुक्तौ स्वघटकपदप्राक्क्षणवृत्त्युपनयस्थायंपदार्थविशेष्यकान्वयबोधजनके निगमनेऽतिव्याप्तिः स्यादतस्तदुक्तम्। न चोपनयस्थेदंपदस्यैव निगमनेऽतिव्याप्तिः स्यादतस्तदुक्तम्। न चोपनयस्थेदंपदस्यैव निगमनेऽप्यन्तर्भावात्तद्दोषतादवस्थ्यम्, तदनन्तर्भावमत एवैतल्लक्षणकरणात्। स्वीयमित्यनेन स्वेतराघटकस्य विवक्षितत्वानोक्तदोष इत्यप्याहुः। स्वघटकपदप्राक्क्षणवृत्तीत्यनुक्तौ स्त्रघटकान्त्यपदार्थविशेष्यकान्वयबोधजनकयोरुपनयनिगमनयोरतिव्याप्तेस्तदुपात्तम्। न च स्वकीयं यदाद्यपदं तदर्थविशेष्यकेत्युक्त्वाप्युपनयादिव्युदाससम्भवादन्त्यभिन्नत्वपर्यन्तप्रवेशो व्यर्थः। स्वघटकपदध्वंसाधिकरणक्षणावृत्तित्वरूपस्याऽऽद्यत्वस्य निरुक्तान्त्यभिन्नत्वापेक्षया गुरुत्वात्, नीलः पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिप्रसङ्गाच्च। तत्र नीलपदस्यैवाद्यत्वेन तदर्थमुख्यविशेष्यकान्वयबोधजनकत्वाभावात्। मुख्यविशेष्यतापर्यन्तप्रवेशस्तु इदं द्रव्यं गुणाद्यन्यत्वे सति सत्त्वादित्यादिहेतोर्वारणार्थम्। अन्यथा तस्यापि स्वीयं यत्स्वघटकप्राग्वर्तिपदं तदर्थविषयकबोधजनकत्वेनातिव्याप्तिप्रसङ्गादिति भावः। अत्रानुयोगिनि स्वत्वघटनयाऽननुगमादनुगतं लक्षणमाह अन्त्यपदवत्त्वे इत्यादि। अत्र स्वीयं यदन्त्यभिन्नं पदे तदर्थविशेष्यकान्वयबोधजनकं यन्निगमनादिकं तदन्यत्वं धूमादित्यादिहेतावपि गतं तदीयान्त्यभिन्नपदस्याऽप्रसिद्धत्वात् पदशब्देन विभक्तयन्तस्याऽग्रे वक्ष्यमाणत्वादतस्तद्वारणार्थमन्त्यपदवत्त्वे सतीत्युक्तम्। पदद्वयघटितत्वे सतीति तदर्थः। तावन्मात्रञ्च निगमनादिष्वतिप्रसक्तमतः स्वीयानन्त्येत्यादिकमुक्तम्। अत्राप्यनन्त्यत्वं स्वघटकपदप्राक्क्षणवृत्तित्वं तथा च निगमनस्यापि तादृशायम्पदार्थविशेष्यकान्वयबोधजनकत्वेन तादृशान्वयबोधजनकभिन्नस्य वारणार्थं स्वीयपदम्। न च स्वीयं यदन्त्यपदं

पूर्व्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथेति सर्व्वनाम्ना सिद्धस्थल इव विरोधादिवारणाय युक्त इत्याहुः। तन्न। तथेति

न च धूमादालोकवान्पर्वतो वह्निमान् धूमात् धूमाद्वह्निमत्सधर्मा पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायाम्, पर्वतो धूमाद्वह्निमानित्यादौ च तत्रत्यनिगमने चातिव्याप्तिः। प्रकृतपक्षान्वित- स्वार्थबोधक-पदोपस्थापित प्रकृतसाध्यान्वितस्वार्थबोधकपञ्चम्यन्तलाक्षणिकपद-वदवयवत्वस्य विवक्षितत्वात्। यत्तु अयमात्मा ज्ञानादित्यत्राव्याप्तिः शक्त्यैव ज्ञानोपस्थितिसम्भवे लक्षणाविरहादिति।

तदर्थविशेष्यकान्वयबोधजनकभिन्नमेव किन्नोक्तम् अन्त्यशब्देन स्वघटकपदप्राक्क्षणावृत्तित्वस्य बोधनीयत्वादिति वाच्यम्। गुणाद्यन्यत्वे सति सत्त्वादित्यादिहेतावतिप्रसङ्गात् तस्यापि स्वीयं यत्स्वघटकपदप्राक्क्षणावृत्ति सत्त्वादिति पदं तदर्थविशेष्यकान्वयबोधजनकत्वात्, पञ्चम्यर्थस्यैव तत्र मुख्यविशेष्यत्वात्। अत्राप्युदाहरणवारणार्थमितरान्वितस्वार्थबोधकत्वे सतीत्यनुषञ्जनीयम्। तस्य च स्वाघटकपदाकाङ्क्षादिमत्पदाघटितं यद्यत्तदन्यत्वमुदाहरणभिन्नत्वमेव वार्थो नातः स्वत्वाननुगमतादवस्थ्यम्। नन्वितरान्वितस्वार्थबोधकत्वे सतीत्यनेनैव हेतूपनयनिगमनानां व्युदाससम्भवात्स्वीयं यदन्त्यभिन्नं पदमित्यादिकं व्यर्थमत आह प्रतिज्ञाहेत्वोरिति। नन्वेवं तावन्मात्रमेवास्तु इतरान्वितेत्यादिकं व्यर्थमत आह न तूदाहरणस्येति। केनापीति। अन्वय इति शेषः। तथा च तद्वारणार्थमेवेतरान्वितेत्यादिकमिति भावः। ननु पदत्वं शक्तिमत्त्वं तथा च तस्मात्पाचक इत्यादिनिगमने लक्षणद्वयस्याप्यतिव्याप्तिः तस्यापि ण्वुला द्यात्मकं यत्स्वीयान्त्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वात् प्रथमाविभक्तेरेव तत्रान्तिमपदत्वादत आह पदं विभक्त्यन्तमिति। स्वीयं यत्स्वघटकपदप्राग्वर्ति पदं तदर्थविशेष्यकेत्यत्रोभयत्रैव पदं विभक्त्यन्तरूपं ग्राह्यमित्यर्थः। न च स्वीयं यत्स्वघटकस्य विभक्त्यन्तपदस्य प्राग्वर्ति शक्तपदं तदर्थविशेष्यकत्वप्रवेशेनैव उक्तनिगमनव्युदासादन्तिमपदस्य विभक्त्यन्तरूपस्य प्रवेशो व्यर्थ इति वाच्यम्। कायपूर्वभागसाध्यकस्य अयं

स्वरूपे प्रकारे सादृश्ये, वा, आद्ये तथाचायमिति प्रक्रमात् तथेति हेतुमानित्यर्थः स्यात् तथाचानन्वयः, न हि हेतुमत्त्वादेव हेतुमत्त्वमित्यन्वितम्, न द्वितीयः, सामान्येन पक्षस्यापि

तन्न। यद्विषयकज्ञानस्य हेतुत्वमवगतं तस्य व्याप्त्यादिजिज्ञासायां उदाहरणादिप्रयोगः।

पूर्वकायो मस्तकत्वादित्यादिन्यायस्य निगमने तस्मात्पूर्वकाय इत्याकारेऽतिव्याप्त्यापत्तेः तस्यापि स्वघटकं यद्विभक्त्यन्तं कायपदं तत्प्राग्वर्तिपूर्वशब्दार्थीभूत पूर्वभागविशेष्यकान्वयबोधजनकत्वात्, पूर्वकायादितत्पुरुषस्य पूर्वपदार्थप्रधानत्वात्। इत्थञ्च पूर्वशब्दस्य विभक्त्यन्तत्वाभावान्न तत्राऽतिप्रसङ्गः। अत एव प्रथमस्यैव पदस्य विभक्त्यन्तरूपस्य निवेशादुपनयवारणादाद्यस्याग्रिमस्य च विभक्त्यन्तरूपपदस्य निगमनमात्रवारणं प्रयोजनमित्याशयेन निगमनव्युदास इत्येवोक्तम्। अन्यथा उपनयस्यापि स्वघटकं यत्प्रथमास्वरूपं पदं तत्प्राक्क्षणवृत्तीदम्पदार्थ-विशेष्यकबोधजनकतया निरुक्तलक्षणस्य तत्राप्यतिव्याप्तत्वात् तद्वारणार्थमपि प्रथमविभक्त्यन्तदलनिवेशध्रौव्ये निगमनमात्रव्युदासाभिधानं विरुद्ध्यते। न चैवं पूर्वकायो द्रव्यमित्यादिप्रतिज्ञायामव्याप्तिः पूर्वपदस्य। विभक्त्यन्तत्वा-भावेनान्त्यभिन्नपदत्वाभावादिति वाच्यम्। तत्र कार्यशब्दस्यैव पूर्वकार्यभागस्यापि विभक्त्यन्तत्वात् तदुपस्थाप्यविशिष्टार्थविशेष्यतामादायैव लक्षणसामञ्जस्यादिति भावः। यद्यप्येवमपि लक्षणद्वयस्यैव तस्मान्नेतराणीत्यादिनिगमनातिव्याप्तिः तस्य स्वीयं यदन्त्यभिन्नं नञ्पदं तदर्थविशेष्यकान्वयबोधजनकत्वात् नञोऽपि विभक्त्यन्तत्वस्यानुशिष्टत्वात्। न चाऽव्ययभिन्नत्वेन श्रूयमाणविभक्तिक-जातीयत्वेन वा पदं विशेषणीयम्, दिवा प्रमेयमित्यादिप्रतिज्ञायामव्याप्तेः दिवाशब्दस्याव्ययत्वात् तदुत्तरविभक्तिमात्रस्यैवाश्रूयमाणत्वाच्च। तथाप्यन्त्यभिन्नं यत्पदं तदर्थविशेष्यत्वं स्वीयपदार्थानवच्छिन्नत्वेन विशेषणीयमित्यदोषः। केचित्तु अन्त्यभिन्नं पदं नञादिभिन्नत्वेनापि विशेष्यमतो नोक्तदोषः। न चैवं न पटत्वं घटे इत्यादिप्रतिज्ञायामव्याप्तिः पटत्वाभावो घटवृत्तिरित्याकारकबोधे नञर्थस्य विशेष्यत्वादिति वाच्यम्। सुबर्थद्वयोर्मिथोऽन्वयस्याऽव्युत्पन्नतया

अन्वयव्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात्, अत एव न तृतीयोऽपि, अभेदानुमाने चान्वयिनि तस्मात्तथेति सादृश्यान्वयाभावात् बहूनाञ्च प्रक्रमे विशेष्यानन्वयात्,

---

न चेह ज्ञानविषयकत्वेनोपस्थितिर्विना लक्षणाम्। अन्यथा सुखादेरपि व्याप्त्याद्युपदर्शनप्रसङ्गात्। केचित्तु पञ्चम्यन्तलाक्षणिकपदवत्त्वनियतावयवताच्छेदकरूपवत्त्वं तादृशपदवत्त्वव्यभिचार्यवयवतावच्छेदकशून्यावयवत्त्वं विवक्षितमित्याहुः।

हेत्वर्थान्वयासम्भवेन घटो दण्डादित्यादेरिव न पटत्वं घटे इत्यादिप्रतिज्ञाया अपि सम्प्रदायविरुद्धत्वात्। वस्तुतो नञादिनिपातानां स्वोत्तरविभक्त्यर्थान्वयित्वस्य अदृष्टचरत्वात्तेषां विभक्त्यन्तत्वे प्रमाणाभावादेव नोक्तातिव्याप्तिः, अत एव भूतले प्रमेयं नेत्यादिको न प्रयोगः। अन्यथा नञः प्रथमान्तत्वे तत्समानविभक्तिकप्रमेयपदसत्त्वात् प्रमेयात्मकोऽभावो भूतलवृत्तिरित्यभेदान्वयमादाय तादृशप्रयोगस्य योग्यतापत्तेरित्याहुः। तच्चिन्त्यम्। कथितरीस्यापि तस्मादन्यो घटादित्यादिनिगमनातिव्याप्तेर्दुरुद्धरत्वादिति दिक्। प्रकृतपक्षेत्यादि। प्रकृतपक्षान्वितस्वार्थबोधकं यत्पदं तदुपस्थापितार्थान्वितो यः स्वार्थस्तद्बोधकावयवत्वमित्यर्थः। ननु इतरान्वितस्वार्थबोधकावयवत्वमेव सम्यक् किमुपस्थापितान्तेन इत्यत आह निगमनवारणायेति। अन्यथा तस्याप्युपनयार्थान्वितस्वार्थबोधकपदवत्त्वादतिव्याप्त्यापत्तेः इति भावः। स्वार्थप्रकारकबोधजनकत्वविवक्षयाप्युपनयवारणसम्भवान्निगमनपर्यन्तानुसरणम्। साध्यव्याप्यहेतुमत्त्वप्रकारेण पक्षान्वितस्वार्थबोधकं यदिदं पदं तदुपस्थापितान्वितस्वार्थबोधकत्वं निगमनस्यास्त्येव इत्यतः प्रकृतपदम्। तथा चेदं पदस्य पक्षतावच्छेदकविशिष्टपक्षान्वितस्वार्थबोधकत्वाभावात्तदुपादाय निगमने नातिव्याप्तिः। स्वार्थपदमप्यत एव, अन्यथा प्रकृतपक्षान्वितव्याप्यवत्त्वान्वयबोधजनकेन उपनयस्थायम्पदेनोपस्थापितान्वितस्वार्थबोधके निगमन एवातिव्याप्त्यापत्तेः। स्वार्थ इत्युक्तौ तु व्याप्यवत्त्वादेरिदं पदार्थत्वाभावान्न दोषः। स्वयमेव चरमस्वार्थपदस्य व्यावृत्तिमाह प्रमेयत्वमित्यादिना। तदेकदेशार्थ इति तथा चोक्तप्रतिज्ञावारणार्थमेव द्वितीयं स्वार्थपदमिति भावः। इदमुपलक्षणम्।

वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात् तस्मादित्यत्र तु हेतुविभक्त्यर्थानन्वयादेव नियमः तस्मादनित्य इत्यभिधाने च विशिष्य सिद्धान्तावगम्यते पूर्व्वं साध्यतयोक्तस्य

नव्यास्तु पञ्चम्याः ज्ञानज्ञाप्यत्वे लक्षणयैवोपपत्तौ न प्रातिपदिकेऽपि लक्षणा आकांक्षावैचित्र्याच्च पदार्थैकदेशेऽपि।

ज्ञाने प्रातिपदिकार्थो विषयित्वेनान्वेति कर्तृकृतीवकृतौ धात्वर्थः।

यद्धर्मविशिष्टश्च हेतुः प्रयुज्यते आकांक्षादिवशात्तद्धर्मविशिष्टस्यैव व्याप्यत्वमुपदर्श्यते अन्यथा यथार्थधूमज्ञानादित्यादिप्रयोगेऽपि धूमादेर्व्याप्यत्वोपदर्शनप्रसङ्ग इति प्राहुः। इतरान्वितस्वार्थबोधकत्वे सति, स्वीयं यदन्त्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे सति अन्त्यपदवत्त्वे सति स्वीयानंत्यपदार्थविशेष्यकान्वयबोधाजनकान्यत्वे

प्रकृतपक्षान्वितस्वार्थबोधकवह्न्यादिपदोपस्थापितवह्न्याद्यन्वितस्य धूमादिज्ञाप्यत्वस्य तस्मादित्यंशेन बोधके निगमनेऽतिव्याप्तिवारणार्थमपि द्वितीयं स्वार्थपदं द्रष्टव्यम्। ननूपनयेऽतिव्याप्तपदमिदं लक्षणं तस्यापि वाक्यैकवाक्यतया प्रकृतपक्षान्वितस्वार्थबोधकं यन्निगमनस्थसाध्यपदं तदुपस्थापिताार्थान्वितस्वार्थ-बोधकत्वात्। न चान्वितस्वार्थबोधकेत्यत्र स्वार्थप्रकारबोधजनकत्व-विवक्षणान्नातिव्याप्तिः उपनयार्थस्य निगमनार्थे विशेष्यत्वेनैव भानादिति वाच्यम्। प्रमेयत्वमित्यादिप्रागुक्तग्रन्थविरोधापत्तेः तत्र प्रतिज्ञैकदेशार्थस्यापि विशेष्यतया एव भानादतिव्याप्त्यसम्भवात्, किञ्च गोत्वाभावः प्रमेयो गोत्वाभावादित्यादिस्थलीये निगमनेऽतिव्याप्तिः तस्यापि हेतुविधया प्रकृतपक्षान्वितस्वार्थबोधकं यत्प्रमेयत्वव्याप्यगोत्वाभाववानय-मित्याकारकोपनयस्थायम्पदं तदर्थान्विस्वार्थबोधकत्वादित्यतो लक्षणान्तरमाह स्वार्थविशिष्टेत्यादि। निगमनस्यापि धूमादिज्ञाप्यत्वविशिष्टसाध्यवैशिष्ट्य-बोधजनकत्वात्स्वार्थपदम्। स्वार्थविशिष्टबोजधनकत्वमपि निगमनेऽतिप्रसक्तमतो वैशिष्ट्यपदम्। विशिष्टवैशिष्ट्येति। विशिष्टवैशिष्ट्यबोधजनिका या स्वार्थोपस्थितिस्तज्जनकावयवत्वमित्यर्थः। धूमज्ञाप्यत्वादिविशिष्टवह्न्यादि-

समर्थहेतुसम्बन्धेन पुनरुत्कीर्त्तनात् अन्यथा तद्वैयर्थ्यात्। संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः किन्तु न्यायाङ्गतयान्यायान्तर्गतत्वेनोपयुज्यन्त इति नाधिक्यम्, कण्टकोद्धारस्य च सार्व्वत्रिकत्वं समयविशेषोपयोगित्वादिति।

च सति न्यायावयवत्वं प्रतिज्ञात्वम्। प्रतिज्ञाहेत्वोरुपनयनिगमनयोः स्वार्थौ परम्परमन्वितौ। न तूदाहरणस्य केनापि। पदं विभक्त्यन्तम्। तेन निगमने नातिव्याप्तिः।

प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वम्। निगमनवारणायोपस्थापितान्तम्।

प्रमेयत्वमभिधेयं प्रमेयत्वादित्यादौ प्रकृत्यर्थपक्षान्वितस्वार्थबोधकपञ्चम्यन्तार्थान्वितो न प्रतिज्ञार्थः। अपि तु तदेकदेशार्थ इति।

वैशिष्ट्यबोधं प्रत्यपि विशेषणज्ञानविधया धूमज्ञाप्यतामात्रबोधस्य हेतुत्वात् धूमादित्यादिहेतौ लक्षणसमन्वयः। पदव्यावृत्तिस्तु पूर्ववत्। विशिष्टबोधेत्यादि। विशिष्टबोधजनको यः स्वार्थविशिष्टबोधस्तज्जनकावयवत्वमर्थः। पर्वतो ज्ञाप्यवह्निमानित्येवं विशिष्टबोधे वह्निर्धूमज्ञाप्य इति स्वार्थविशिष्टबोधस्य हेतुत्वाद्धूमादित्यादिहेतौ लक्षणसङ्गमः। हेतौ लक्षणं योजयति एकवाक्यतयेति। प्रतिज्ञैकवाक्यतयेत्यर्थः। कस्य चिदिति वैशिष्ट्यं भासते इति पूर्वेणाऽन्वयः। अन्वयव्याप्तिबोधकतामात्रस्य अन्वय्युपनयसाधारणत्वादाह तत्त्वमिति। उदाहरणत्वमित्यर्थः। न चान्वयव्यतिरेक्युदाहरणातिव्याप्तिः, व्यतिरेकव्याप्त्यबोधकत्वेनापि विशेषणीयत्वात्। वस्तुतः शिरोमणिमते व्याप्तित्रयबोधकमुदाहरणमेव नास्ति कुतोऽस्य गमकत्वमित्याकाङ्क्षाया प्रथमोक्तव्याप्त्यवगमादेव निवृत्तौ व्याप्त्यन्तराभिधानस्य निराकाङ्क्षतयाऽनौचित्यात्। अत एव प्रतिज्ञालक्षणे स्वयमेवोक्तं नैकदोभयव्याप्त्युपन्यासोऽपीति, अत एव चान्वयव्यतिरेक्युदाहरणस्य विशिष्य लक्षणाकरणद्दीधितन्यूनत्वमित्यपि नाशङ्कनीयम्। न चैवमुदाहरणस्येव हेत्ववयवस्यापि अन्वयिव्यतिरेकिभेदेन लक्षणद्वयस्यौचित्यात्तदकरणे न्यूनतैव ग्रन्थस्येति वाच्यम्। अन्यवय्युदाहरण-

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानापरिच्छेदे अवयवग्रन्थः सम्पूर्ण।

स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वम्। विशिष्ट-वैशिष्ट्याबोधजनकस्वार्थबोधजनकन्यायावयत्वम्। विशिष्टवैशिष्ट्या-बोधजनकस्वार्थविशिष्टबोधजनकन्यायावयत्वं वा तत्त्वम्। एकवाक्यतया हेत्वर्थविशिष्टसाध्यवैशिष्ट्यं भासते न पुनरवयवान्तरार्थविशिष्टस्य कस्यचिदिति।

इतरान्वितस्वार्थाबोधकन्यायावयवत्वमुदाहरणत्वम्। अन्वयव्याप्ति-बोधकतत्त्वं व्यतिरेकव्याप्तिबोधकतत्त्वं च विशेषलक्षणम्। इतरोपस्थापितार्थविशेषणकस्वार्थबोधजनकन्यायावयवत्वम्। स्वार्थविशेष्यकेतरार्थान्वयबोधो जनकन्यायावयवत्वं चोपनयत्वम्। अवयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वम्।

पूर्वावयवत्वादिरूपस्यान्वयिहेत्वादिलीक्षणस्य अन्वय्युदाहरणादिग्रहोत्तर-मर्थवशसम्पन्नत्वात्। अत एव अन्वय्युपनयादेरपि लक्षणं न वक्ष्यते। तत्राप्यन्वय्युदाहरणोत्तरावयवत्वादेरेव तल्लक्षणस्याऽर्थतः प्राप्यत्वादिति भावः। इतरेत्यादि। यद्यपि साध्यांशे हेत्वर्थविशेष्यको यः स्वार्थविधेयको बोधस्तज्जनकत्वं प्रतिज्ञायामतिप्रसक्तम्। न चेतरोपस्थापितार्थविषयक-स्वार्थविशेष्यकबोधजनकत्वविवक्षणान्नातिव्याप्तिः प्रतिज्ञार्थस्य वह्निविशिष्टपर्वतत्वाद्यवच्छिन्नस्य हेत्वर्थविशेष्यकत्वादिति वाच्यम्। विशेषणकान्तवैयर्थ्यापत्तेः स्वार्थविशेष्यकान्वयबोधजनकत्वस्यैव सम्यक्त्वात्। तथापि इतरोपस्थापितार्थनिष्ठविशेषणतानिरूपितस्वार्थनिष्ठविषयताकबोधज-नकन्यायावयवत्वमित्यर्थो विवक्षितस्तथा च प्रतिज्ञावारणाय स्वार्थेति, अवयवान्तरवारणाय निरूपितान्तं स्वार्थविषयताविशेषणम्। विशेषण-विशेष्यभावव्यत्यासेन लक्षणान्तरमाह स्वार्थेत्यादिना। स्वार्थनिष्ठविषयता-निरूपितेतरप्रकारताकबोधजनकन्यायावयवत्वमित्यर्थः। स्वार्थविशेष्यकत्वप्रवेशे तादृशबोधजनकतामात्रस्यैव सम्यक्त्वे शेषवैयर्थ्यापत्तेरिति ध्येयम्। अवयवार्थेति।

हेत्वर्थश्च न प्रतिज्ञार्थे विशेषणत्वेनान्वेति। किन्तु तदेकदेशार्थे इत्युक्तप्रायम्। इति श्रीमन्महामहोपाध्यायभट्टचार्यतार्किकशिरोमणि-रघुनाथकविविरचितायां तत्वचिन्तामणिव्याख्यायामनुमान-दीधित्यपराख्यायामवयवग्रन्थस्सम्पूर्णः।

अवयवार्थविशेष्यकस्वार्थप्रकारकबोधजनकावयवत्वमर्थः। स्वार्थप्रकारकबोध-जनकत्वं हेतावपीत्यतो विशेष्यकान्तम्। अवयवार्थविशेष्यकबोधजनकत्व-मुपनयस्यापीत्यतः स्वार्थप्रकारकेति। ननूपनयलक्षणस्य प्रतिज्ञायामतिव्याप्तिः तस्यापि हेत्वर्थविशेषणकबोधजनकत्वात्, एवं निगमनलक्षणस्य हेतावतिव्याप्तिः तस्यापि प्रतिज्ञार्थविशेष्यकस्वार्थप्रकारकबोधजनकत्वादत आह हेत्वर्थश्चेति। प्रतिज्ञार्थे वह्निविशिष्टपर्वतादौ। तदेकदेशे वह्न्यादौ। उक्तप्रायमिति। पञ्चम्यर्थान्वितो न प्रतिज्ञार्थः। किन्तु तदेकदेशार्थ इत्येव प्रागुक्तं न तु हेत्वर्थान्वितो न प्रतिज्ञार्थ इत्युक्तमित्याशयेनाह प्रायमिति।।

इति श्रीजगदीशतर्कालङ्कारविरचिता
अवयवदीधितिव्याख्या समाप्ता।।

ट्खं

ाचार
ांस्कृ

ष्ट्रिय

ाम्मान
, उत्त
उ.प्र.

मर्श:
यनम्
वार:,
न्थ:)
वाद:
मणि–

का:।



प्रो. हरेरामत्रिपाठी

जन्मस्थानम्– ग्रा. चकिया पो. शङ्करपट्टखौल
ज., कुशीनगरम् (उत्तरप्रदेश:)
जन्मतिथि: 01.08.1966
पिता– स्व. श्री पं. भीमत्रिपाठी
माता– स्व. श्रीमती यादी देवी
शिक्षा– नव्यन्यायाचार्य:, सांख्ययोगाचार्य:
शाङ्करवेदान्ताचार्यश्च, एम.ए. (संस्कृ
दर्शनग्रुप)
विद्यावारिधि: (पी-एच. डी.)
विद्यागुरव: प्रो. वशिष्ठ त्रिपाठी, प्रो
श्रीरामपाण्डेय:, श्री सुधाकरदीक्षितश्च
वाराणसेया:, श्री पं. वसावन त्रिपाठी, कुशीनग
कार्यक्षेत्रम्– आचार्य: विभागाध्यक्षचरश्च
सर्वदर्शनविभागे, श्रीलालबहादुरशास्त्री राष्ट्रि
संस्कृतविद्यापीठस्य, नवदेहलीस्थस्य
पुरस्कारौ– 1. वादरायणव्यास सम्म
राष्ट्रपतिद्वारालब्धम्। 2. शाङ्करपुरस्कार:, उत्त
प्रदेशसंस्कृत संस्थानम्, लखनऊ, उ.प्र
सर्वकारेण
मुद्रितग्रन्था:– तर्कचन्द्रिका, हेत्वाभासविमर्श:
आकाङ्क्षावाद:, ईश्वरवाद:, विधिरसायनम्
सामान्यलक्षणारहस्यम्, नवीनमतादिविचार:
न्यायपदार्थदीपिका, एवकारवाद: (लघुग्रन्थ:)
दशलकारवाद: (लघुग्रन्थ:) व्युत्पत्तिवाद
सादर्शश्च भाग 1 भाग 2, अवयवतत्त्वचिन्तामणि
विद्योत: इदानीं प्रकाश्यते।
शोधलेखा:– अष्टाविंशतित: अधिका:।
समाचारपत्रेषु प्रकाशिता: लेखा: चतुर्दशत: अधिका

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-110016